Institut Français de Pondichéry
UMIFRE 21 CNRS-MAEE

*Regards sur l'Asie du Sud / South Asian Perspectives – 6*
*Shree Somnath Sanskrit University Shastragrantha Series - 2*

# वैयाकरणसिद्धान्तभूषणम्


## निरञ्जनीव्याख्यया प्रकाशटिप्पण्या च सहितम्

## प्रथमो भागः

# THE VAIYĀKARAṆASIDDHĀNTABHŪṢAṆA OF KAUṆḌABHAṬṬA

with the Nirañjanī commentary by Ramyatna Shukla
and Prakāśa explanatory notes by K.V. Ramakrishnamacharyulu

Part I



सम्पादकः के.वि. रामकृष्णमाचार्यः
Critically edited by K.V. Ramakrishnamacharyulu

*Regards sur l'Asie du Sud / South Asian Perspectives* – 6

श्रीसोमनाथसंस्कृतविश्वविद्यालयशास्त्रग्रन्थमाला - 2

पदवाक्यप्रमाणपारावारपारीणधुरीणश्रीकौण्डभट्टविरचितम्

# वैयाकरणसिद्धान्तभूषणम्

## प्रथमो भागः

श्रीरामयत्नशुक्लविरचितया निरञ्जनीव्याख्यया
श्रीरामकृष्णमाचार्यविरचितया प्रकाशटिप्पण्या च सहितम्

सम्पादकः
के.वि. रामकृष्णमाचार्यः



परियोजनासमन्वयकौ
पियेर् ग्रार्
वेम्पटिकुटुम्बशास्त्री

INSTITUT FRANÇAIS DE PONDICHÉRY
SHREE SOMNATH SANSKRIT UNIVERSITY

*The French Institute of Pondicherry* (IFP), UMIFRE 21 CNRS-MAEE, is a financially autonomous institution under the joint authority of the French Ministry of Foreign and European Affairs (MAEE) and the French National Centre for Scientific Research (CNRS). It is a part of the network of 27 research centres under this Ministry. It also forms part of the research unit 3330 "Savoirs et Mondes Indiens" of the CNRS, along with the Centre de Sciences Humaines (CSH) in New Delhi. It fulfills its missions of research, expertise and training in Human and Social Sciences and Ecology in South and South-East Asia. It works particularly in the fields of Indian cultural knowledge and heritage (Sanskrit language and literature, history of religions, Tamil studies...), contemporary social dynamics and the natural ecosystems of South India.
French Institute of Pondicherry, 11, St. Louis Street, P.B. 33, Pondicherry 605001- India, Tel : (91) (413) 2231609, Email : ifpcom@ifpindia.org
Website : http ://www.ifpindia.org

*Shree Somnath Sanskrit University* (SSSU), Veraval has been established by the Government of Gujarat in April 2005 for imparting in depth training and conducting research in traditional knowledge systems of Sanskrit Shastras, Scriptures, Scientific Literature and Literature. The aim of its social out-reach programmes is to connect the people with Sanskrit and make them aware of the rich traditions of knowledge systems written in Sanskrit. It is a public State University with Sanskrit as its medium of instruction. It has seven faculties and one constituent college at its head quarters at Veraval. It has thirty five affiliated colleges and more than seventy five study centres all over Gujarat. It provides an opportunity for Sanskrit education starting from Certificate Course to Ph.D.
Shree Somnath Sanskrit University, Rajendra Bhuvan Road, Veraval – 362 266, District- Gir Somnath, Gujarat, India, Tel : (91) (2876)- 244532, Email : sssu.veraval@gmail.com
Website : http://www.shreesomnathsanskrituniversity.info

*Regards sur l'Asie du Sud / South Asian Perspectives – 6*
*Shree Somnath Sanskrit University Shastragrantha Series- 2*

# THE VAIYĀKARAṆASIDDHĀNTABHŪṢAṆA OF KAUṆḌABHAṬṬA

## Part I

with the Nirañjanī commentary by Ramyatna Shukla and
Prakāśa explanatory notes by K.V. Ramakrishnamacharyulu

Critically edited by
K.V. Ramakrishnamacharyulu

Project Coordinators
Pierre Grard
Vempaty Kutumba Sastry

INSTITUT FRANÇAIS DE PONDICHÉRY
SHREE SOMNATH SANSKRIT UNIVERSITY

## ।। शुभाशंसा ।।

पदवाक्यप्रमाणपारावारपारीणस्य महामहोपाध्यायस्य कौण्डभट्टस्य कृतिद्वयं 'वैयाकरण-सिद्धान्तभूषणम्' तथा 'वैयाकरणसिद्धान्तभूषणसारः' च व्याकरणशास्त्रस्य आर्थिकग्रन्थेषु शिरो-रत्नायमानं वरीवर्तीति विदन्त्येव विद्वांसः। तत्र भूषणं तावत् आकारेण विषयगाम्भीर्येण च विशाल इति कारणात् केषाञ्चिदेवातिविशिष्टविदुषां व्यवसायविषयमासीत्। अन्ये तु भूषणसारे एव व्यवस्यन्ति स्म। अत एव यद्यपि भूषणस्य मातृकाः भारतस्य सर्वासु दिक्षु गणनीयसंख्ययोपलभ्यन्ते, तथापि अद्यपर्यन्तं काचिदपि व्याख्या तदुपरि नोपलभ्यते। किञ्च, कतिपयवारं प्रकाशितस्याप्यस्य ग्रन्थस्य उपलभ्यमानसर्वमातृकापरामर्शपूर्वकं समीक्षात्मकसम्पादनमद्यावधि न सम्पन्नम्। अतिगभीरशास्त्र-ग्रन्थानामध्ययने समीक्षात्मकसम्पादनस्योपकारभावः अत्यन्तापेक्षितता च सर्वविदित एव। जटिलं च दुस्साधञ्च कार्यद्वयमपीदं साधयितुं सङ्कल्प्य, व्ययप्रयासे सोढ्वा, प्रामाणिक्या रीत्या कृतार्थतां प्राप्य विद्वज्जनकरकमलेषूपायनीकर्तुमुद्यतते भारते पुदुच्चेरीनगरे प्रतिष्ठिता भारताध्ययनपरा 'French Institute of Pondicherry' नाम्नी वैदेशिकी संस्था। शताधिकभारताध्ययनात्मक-ग्रन्थप्रकाशनयशोविराजितैषा संस्था प्रायः विगतपञ्चाशद्वर्षेभ्यः संस्कृताध्ययनक्षेत्रे महनीयमवदानं विधाय विश्वविदितास्ति।

१९९०-१९९९ मध्यकाले पुदुच्चेर्यां केन्द्रीयविश्वविद्यालये आचार्यपदमधितिष्ठता मया संस्थयानया सह विद्वदुचितः सौहार्दसम्बन्धोऽधिगत इति सुमहद्भागधेयमेवैतन्मम। गतेऽपि बहुतिथे काले, तदधिकारिणः अद्यापि मयि तमेव स्नेहं प्रदर्शयन्तीति तेषामेवैषा महत्ता। तस्यैतस्य सौहार्दसम्बन्धस्य फलरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य, यत्राहमिदानीं कुलपतिपदे वर्ते. तथा 'French Institute of Pondicherry' संस्थायाश्च मध्ये सन्धिबन्धस्सम्पन्नः यत्कारण-मिदानीं ग्रन्थ एषः संस्थाद्वयनाम्ना श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्राकाश्यं नीयते।

सुगृहीतनामधेयैः काशीविद्वत्परम्परामूर्धन्यैः तत्रभवद्भिः श्रीरामयत्नशुक्लमहाभागैः ऐदम्प्राथम्येन प्रणीतया निरञ्जन्याख्यया व्याख्यया विभूषितम्, व्याकरणशास्त्रविशारदैः आचार्यरामकृष्णमाचार्यैः उपचत्वारिंशन्मातृकाणां लिपिचतुष्टयमाध्यमेन लिखितानां साहाय्येन

**Published by:**

Institut Français de Pondichéry
11, St. Louis Street, P.B. 33, Pondicherry
Website: www.ifpindia.org
&
Dr. Dashrath Jadav
Registrar, Shree Somnath Sanskrit University
Veraval – 36 266, Dist.: Gir-Somnath, Gujarat, India.
Phone: 02876-244532, Fax: 02876-244417
E-mail: ssssu.veraval@gmail.com
Website: www.shreesomnathsanskrituniversity.info

**Coordinators:**

Dr. S. Lakshminarasimham
Senior Researcher, Department of Indology
French Institute of Pondicherry, Pondicherry
&
Dr. Kartik Pandya
Research Officer
Shree Somnath Sanskrit University, Veraval



| | |
|---|---|
| Edition | : First |
| Year | : May 2015 |
| Copies | : 600 |
| Price | : Rupees 1200 (₹) |
| | Euro 52 (€) |
| Typeset by | : M.V.A.S. Balaji |
| Cover photo | : Mss of the *Vaiyākaraṇasiddhāntabhūṣaṇa* from the Adyar Library, Chennai and the Sarasvati Bhavan Library, Varanasi |
| Cover design | : Gopinath Sricandane |
| Printed by | : H.K. Offset, Veraval, Gujarat |

# आमुखम्

विदितचरमेवैतत् समेषां विदुषां यदिदानीं शब्दसाधुत्वसम्पादकं पाणिनीयमेवेति। अतस्तदेवोपजीव्य बहुभिर्विद्वद्भिः बहवो ग्रन्थाः रचिताः। व्याकरणस्य प्राधान्येन साधुशब्दनिरूपकत्वेन प्रकृतिप्रत्ययविभागेन पदानि प्रविभज्य लोपागमवर्णविकारैः कार्यैः परिनिष्ठितस्वरूपप्रतिपादकाः तत्तत्सूत्रार्थविवेचनपरा एव ग्रन्थाः अत्र अधिकाः, ये च प्रक्रियाग्रन्थाः इत्यपि विख्याताः। शब्दशास्त्रमिति प्रथितस्यास्य व्याकरणस्य साधुशब्दज्ञापनमेव यद्यपि मुख्यं प्रयोजनम्, तथापि -

"यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्" ॥

"अनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्"। "उतत्वः पश्यन्न ददर्श वाचम्, उतत्वः श्रृण्वन्न श्रृणोत्येनाम्" इत्यादि भाष्योक्त्या, शब्दार्थयोरविनाभावाच्च अर्थज्ञानसहितं साधुशब्दज्ञानमेव व्याकरणस्य प्रयोजनं सिध्यति। अतश्चास्मिन् शास्त्रे प्रतिपाद्यप्राधान्यमनुसृत्य उपलभ्यमानाः ग्रन्थाः द्विधा विभज्यन्ते शब्दग्रन्थाः(प्रक्रियाग्रन्थाः),अर्थग्रन्थाः(आर्थिक - ग्रन्थाः) इति।

अथार्थविचारपराः व्याकरणस्य दर्शनत्वप्रतिपादकाश्च ग्रन्थाः अत्यन्तप्राचीनकालादेव आविर्भूताः, यद्यप्येषां संख्या अङ्गुलिगणनीयास्ति। तत्र च प्राथम्येन कीर्तनीयः ग्रन्थः व्याडिरचितः सङ्ग्रहग्रन्थः लक्षश्लोकात्मकः यश्च महाभाष्यस्यैव आधारभूतः, असकृत् सादरं महाभाष्ये तत्तत्सन्दर्भे समुल्लिखितः, दौर्भाग्यात् इदानीं नोपलभ्यते। भर्तृहरिणाप्ययं ग्रन्थः परामृष्ट इति तावत्पर्यन्तमयमुपलभ्यमान आसीदित्यूहितुं शक्यम्।

यद्यपि महाभाष्येऽपि सर्वे विचाराः तत्तत्सन्दर्भेषु कृताः, यानेव प्रमाणीकृत्य समनन्तरैः अर्थविचारपराः ग्रन्थाः रचिताः, अथापि तस्य सर्वग्रन्थाकरत्वेन इदमित्थमिति शब्दग्रन्थ इति वा अर्थग्रन्थः इति वा व्यपदेशः अशक्य एव।

ततः परं भर्तृहरिरेव वाक्यपदीयनाम्ना अर्थविचारपरं ग्रन्थं निर्ममे, य एव व्याकरणे इदानीमुपलभ्यमानेषु आर्थिकग्रन्थेषु प्राचीनतमः। ततः क्री.श.सप्तमशतकमारभ्य षोडशशतकपर्यन्तं तथा प्रसिद्धः कोऽपि आर्थिकग्रन्थः नोद्भूतः।

अत्रान्तरे दर्शनान्तरीयैः स्वस्वग्रन्थेषु स्वस्वमतनिरूपणावसरे आर्थिकविचारान् कुर्वद्भिः शाब्दिकमतं प्रसङ्गादवतार्य कुत्रचिन्निराकृतं, कुत्रचिच्च तद्विरुद्धतया स्वमतमाविष्कृतम्। तथा पाणिनीयसूत्राणामपि अन्यार्थत्वमापादितम्।

एतत्सर्वं दर्शनान्तरीयैः क्रियमाणं वैयाकरणानामुद्वेगकारिनिरूपणम् असहमानः सर्वतन्त्रस्वतन्त्रः श्रीमान् भट्टोजिदीक्षितः फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धृत्य तत्र तत्र प्रसङ्गवशात् दर्शनान्तरीयराद्धान्तविमर्शनपुरस्सरं तत्प्रदर्शितवैयाकरणसिद्धान्तखण्डनं निराकृत्य शब्दशास्त्रीयसिद्धान्तान् पुनः प्रतिष्ठापयामास।

शब्दकौस्तुभे च तत्र तत्र विप्रकीर्णान् वैयाकरणसिद्धान्तान् वैयाकरणाः सुखेन गृह्णीयुरिति बुद्ध्या सर्वान् शाब्दबोधसिद्धान्तान् समाकलय्य द्वासप्ततिकारिकामयं वैयाकरणसिद्धान्तमतोन्मज्जनं नाम कारिकाग्रन्थमनुजग्राह भट्टोजिदीक्षितः।

अस्य च ग्रन्थस्य अत्यन्तलघ्वी व्याख्या भट्टोजिशिष्येण वनमालिमिश्रेण रचिता वैयाकरणमतोन्मज्जनीति ,या च यद्यपि तथा न प्रसिद्धा तथापि कौण्डभट्टेन स्वभूषणे तत्र तत्र समुल्लिखिता।

अतीव लघुभूतया तया व्याख्यया असन्तुष्टः, विस्तृतव्याख्यां विना दुर्बोधममुं ग्रन्थं शिष्यसुखबोधाय भट्टोजिदीक्षितशिष्यः, तद्भ्रातुः रङ्गोजिभट्टस्य सुतः, पदवाक्यप्रमाणपारावारीणः कोण्डभट्टः,यश्चेदानीं कौण्डभट्ट इति ख्यातः वैयाकरणसिद्धान्तभूषणव्याख्यया वैयाकरणमतोन्मज्जनं समलञ्चकार।सा च व्याख्या अतिविस्तृतेति मन्वानः, पुनस्तामेव सञ्चिक्षेप भूषणसारनाम्ना, या च रच्यमानैव नितरां प्राचुर्यमाप। अत्र च प्रमाणं क्री.श.1602 वर्षे लिखिता उपलभ्यमाना मातृकैव।इदानीमपि अस्य ग्रन्थस्य शतशः मातृकाः तत्तत्तालपत्रग्रन्थालयेषूपलभ्यन्ते। अयमेव ग्रन्थः दर्शनान्तरीयाणां कृते वैयाकरणसिद्धान्तप्रदर्शनपरः आसीत्। अस्य ग्रन्थस्यातिप्रचुरत्वादेव अस्य दशाधिकाः व्याख्याः उत्पन्नाः इतोऽपि रच्यमानश्च सन्ति। अयमेव ग्रन्थः उत्पत्तिकालमारभ्यैतावत् पर्यन्तं पठनपाठनेषु वरीवर्ति, यदध्ययनं विना वैयाकरणत्वमेव न सिद्ध्यति। अथेदानीं कौण्डभट्टं तद्वंश्यांश्चाधिकृत्य किञ्चिदत्र प्रस्तूयते।

महामहोपाध्यायः कौण्डभट्टः

दार्शनिकवैयाकरणेष्वग्रगण्यः, प्राचीननव्यवैयाकरणसिद्धान्ततीरयोः सेतुः,आन्ध्रदेशरत्नेष्वन्यतमः कौण्डभट्टो वैयाकरणैस्सदाऽऽराध्यत एव। यतो ह्यस्य भूषणसारग्रन्थस्याध्ययनं विना वैयाकरणत्वमेव न सिद्ध्यति इति पूर्वमेव प्रतिपादितम्।

अयं च कौण्डभट्टः काश्यपगोत्रो बह्वृचशाखाध्यायी।आन्ध्रदेशे[1] कृष्णानद्यास्तीरे स्थितश्चरुकूरुनामाग्रहारः एतत्पूर्वजानां निवासः। अत एवास्य वंशस्य चरुकूरुवंश इति नाम। इदानीमपि एतद्वंश्याः ब्राह्मणाः अन्ध्रदेशे तत्र तत्र निवसन्ति। अस्य पितामहो लक्ष्मीधरः सर्वविद्वत्कविसम्मतो मीमांसाद्वयपारगश्चासीत्।अयं लक्ष्मीधरः षड्भाषाचन्द्रिकेति प्राकृतव्याकरणं, अनर्घराघवनाटकस्य इष्टार्थकल्पवल्लरी[2] व्याख्यां, गीतगोविन्दस्य श्रुतिरञ्जनीव्याख्यां, जयदेवप्रसन्नराघवस्य अभीष्टार्थदायिनी व्याख्यां, नलवर्णनकाव्यञ्चारचयत्। अयं षड्भाषाचन्द्रिकायाः उपोद्घाते आरम्भे स्ववंशपरिचयमित्थमकरोत् –

[3](ओङ्कारार्थाय विज्ञानदायिने लोकसाक्षिणे ।
करुणामयवीक्षाय दक्षिणामूर्तये नमः ॥)
अस्त्यान्ध्रदेशे चरकूरिवंशः कृष्णातटे काश्यपगोत्ररूढः ।
यो बह्वृचानां बहुमाननीयो धत्ते सदा कीर्तिं सुवैजयन्तीम् ॥
यत्र नामादिमशिशोरङ्कितं वेङ्कटेशितुः।
सलक्ष्मीकस्स एवाद्यो भगवान् गृहदेवता॥
आसप्तपूरुषं यत्र लक्ष्मीवाण्योरवस्थितिः।
आसीत् कपोतनाथस्य वरात् कदळवासिनः॥
तत्रोदभूत्तिम्मयसोमयाजी बुधोऽष्टभाषाकविपट्टभद्रः(बन्धः)[4] ।
नित्यान्नदाता निजभक्तिलब्धवृषाकपायीरमणप्रसादः॥
तस्मादुदै(दभू)द्बह्वृचचक्रवर्ती यज्ञेश्वरः पण्डितसार्वभौमः ।
सर्वाम्बिका सर्वगुणोपपन्ना तस्य द्वितीया भवदम्बिकाभा(म्बा) ॥
ताभ्यामुदभवन्पुत्राः सर्वाचारनियामकाः(चत्वारः श्रीनिकेतनाः) ।
विधिमन्त्रार्थवादज्ञा(निपुणा)श्चत्वारो निगमा इव ॥
षड्दर्शनीतत्त्वविवेककर्ता स्वशिष्यसम्पादितदिग्जयश्रीः।
तेष्वादिमः पण्डितसार्वभौमः(पट्टबन्धः) श्रीकोण्डभट्टो जयतीह लोके ॥

---

[1] द्र. षड्भाषाचन्द्रिकायाः प्रकाशितायाः प्रस्तावनम्। इयं मुम्बय्याम् ईस्वी 1916 वर्षे के.पी. त्रिवेदिना आमुखेन सह प्रकाशिता। आन्ध्राक्षरैः मैसूर्नगरादपि प्रकाशिता।

[2] अनर्घराघवव्याख्या- इष्टार्थकल्पवल्लरी- Tanjore Des. Cat. Vol. viii No. 4269

[3] इष्टार्थकल्पवल्लरीप्रारम्भे मङ्गलश्लोकः

[4] एतेषु श्लोकेषु ( ) एतत्कोष्टकान्तर्गतः पाठः इष्टार्थकल्पवल्लरीप्रस्तावे।

लक्ष्मीधरस्तदनुजो दक्षिणामूर्तिकिङ्करः ।
सर्वविद्वत्कविमतः सज्जनाप्तो विराजते(जयति क्ष्मातले सुधीः) ॥
तेन लक्ष्मीधरार्येण षड्भाषाचन्द्रिकानघा।
विद्वत्कविचकोराणां प्रीतये क्रियतेधुना॥
(स गार्हस्थ्ये चिरं स्थित्वा जित्वा सर्वदिशः सुधीः ।
सन्यस्याजनि योगीन्द्रो रामानन्दाश्रमाभिधः[5] ॥) इति।

लक्ष्मीधरस्य ज्येष्ठभ्रातुः कोण्डभट्टस्य द्वितीयः सुतः श्रीयज्ञनारायणः शास्त्रदीपिकायाः प्रभामण्डलव्याख्यामकरोत्। तत्प्रस्तावनायां सोऽपि स्वपरिचयमित्थमकरोत् -

वन्देऽस्मत्प्रपितामहं तिरुमलश्रीयज्वराजं[6] तथा।
यज्ञेशं च पितामहं स्वपितरं श्रीकोण्डभट्टारकम्॥
तस्यानुजनिं पितृव्यतिलकं श्रीलक्ष्मणार्यं गुरुम्।
ज्येष्ठंश्रेष्ठगुणान्वितं तिरुमलाख्यानं वरं यज्वनाम्॥[7]

अयमेव लक्ष्मीधरः कौण्डभट्टस्य पितामहः भट्टोजिदीक्षितस्य पिता चेति भट्टोजिदीक्षितेनैव स्वीये शब्दकौस्तुभमङ्गलाचरणे तत्त्वकौस्तुभपादान्तगद्येषु च स्पष्टमित्थमभिहितम्–

नत्वा लक्ष्मीधरं तातं सुमनोबृन्दवन्दितम्।
फणिभाषितभाष्याब्धेः शब्दकौस्तुभमुद्धरे॥ इति,

"इति श्रीमद्विद्वन्मकुटमाणिक्यलक्ष्मीधरभट्टसूनुभट्टोजिभट्टविरचिते तत्त्वकौस्तुभे" इति च। कौण्डभट्टस्तु भट्टोजिदीक्षितं स्वपितृव्यत्वेन ख्यापितवानेव।

अयञ्च लक्ष्मीधरः लक्ष्मणार्यनाम्नापि ख्यातः। अयं विजयनगराधिपस्य अरवीडुवंशजस्य तिरुमलरायस्य (क्री. श. 1570-73)आस्थानपण्डित[8] आसीत्। वेल्लूर् पालकः चिनबोम्मभूपालः, यस्य आस्थानपण्डितः अप्पय्यदीक्षितः, स्वरचितप्राकृतमणिदीपिकायां षड्भाषाचन्द्रिकां समुल्लिलेख। अतोऽयम् अप्पय्यदीक्षितसमसामयिकः अप्पय्य-

---

[5] इष्टार्थकल्पवल्लरीप्रस्तावे अयं श्लोकः

[6] आन्ध्रदेशे तिरुमल इति शब्दस्य तिम्मय इति आख्यान्तरम् प्रसिद्धम्। तिम्मयसोमयाजी तिरुमलयज्वराजश्च अभिन्नौ इति विमर्शकानामाशयः।


[7] यज्ञनारायणेन स्वपितृव्यस्य नाम लक्ष्मण इत्युल्लिखितम्। अयं लक्ष्मणः लक्ष्मीधरश्चाभिन्नाविति सप्रमाणं निरूपितं के.पि.त्रिवेदीमहाभागेन षड्भाषाचन्द्रिकाप्रस्तावे।

[8] द्र.-प्रभामण्डलः – यज्ञनारायणकृतः – Tanjore Des. Cat. Vol. xii, कविविवेकटिप्पणी।

* लक्ष्मीधरानुजयोः नामधेयौ तद्विषयकः परिचयो वा नोपलभ्यन्ते।

दीक्षितात् ज्येष्ठश्चेत्यूह्यते। भट्टोजिदीक्षितस्य अप्पय्यदीक्षितशिष्यत्वमपि अनयोः सुदृढं स्नेहमभिव्यनक्ति। अयञ्च लक्ष्मीधरः सुचिरं गृहस्थाश्रमे स्थित्वा सन्न्यस्य रामानन्दाश्रमनाम्ना प्रसिद्धोऽभूत्। सन्न्यासस्वीकारात् पूर्वमेवानेन षड्भाषाचन्द्रिका रचिता। अस्य वंशस्य तिरुपतिवेङ्कटेशः गृहदेवता इति, अत एव एतद्वंशमूलपुरुषः तन्नाम्ना(तिरुमलनाम्ना) प्रसिद्ध इति, अयं दक्षिणामूर्त्युपासक इति च स्पष्टं ज्ञायते। अस्य लक्ष्मीधरस्य भट्टोजिदीक्षितरङ्गोजिभट्टाभिधौ द्वौ पुत्रौ आस्ताम्।

पूर्वोक्तं लक्ष्मीधरकृतं स्ववंशवर्णनमादृत्य तद्वंशवृक्षःइत्थं सिद्धः।




न कोऽप्यस्तीदानीं वैयाकरणस्तादृशो यः भट्टोजिविरचितां सिद्धान्तकौमुदीं न पठति। अयञ्च भट्टोजिदीक्षितः आत्मना वंशेन च पाणिनीयं स्वायत्तं चकार। न केवलमयं पाणिनीये व्याकरणे, किन्तु अन्यतन्त्रेष्वपि महापण्डित आसीत्। भट्टोजिदीक्षितः इक्केरीं पालयतः केलदिवेङ्कटाद्रिनाम्नः आन्ध्रभूपस्य (ईस्वी 1582-1629) आस्थानपण्डितो[9] भूत्वा तत्प्रेरणया तत्त्वकौस्तुभग्रन्थं वेदान्ते रचयामास। एवं न्याये तर्कामृतम्, पूर्वमीमांसायां

[9] See- A contact of Bhattoji and some members of his family with keladi rulers of Ikkeri - P.K. Gode, Studies in Indian literary history vol iii p. 206.

तन्त्रसिद्धान्तदीपिका, तन्त्राधिकारनिर्णयः, धर्मादिशास्त्रेषु गोत्रप्रवरनिर्णयः, कालनिर्णयः, तिथिनिर्णय इत्याद्यनेकान् ग्रन्थानरचयत्। अस्य दीक्षितस्य समयः ईस्वी 1535 तः 1625 पर्यन्तमिति डा. महेशदत्तशर्माणो[10] निरूपयन्ति।

भट्टोजिदीक्षितस्यानुजो रङ्गोजिभट्टोऽपि महाविद्वानासीत्। पदवाक्यप्रमाणपारावारीणधुरीण इति[11], गुरूपमगुरु[12]रिति चायं कौण्डभट्टेन स्तुतः। अस्य रङ्गोजिभट्टस्य वेदान्तविद्यागुरुर्नरसिंहाश्रमी। इक्केरीप्रभोः केलदिवेङ्कटाद्रेरास्थानेऽयमप्यासीत्। अनेनाद्वैतवेदान्ते अद्वैतचिन्तामणिः, अद्वैतसारोद्धारः (व्याससूत्रव्याख्या) इति द्वौ ग्रन्थौ रचितौ। अयं न केवलं पण्डितः, अपि तु कविपुङ्गवोऽपि। अनेन हि शिवोल्लासकाव्यं रचितम्। अयम् इक्केरीराजसभायाम् ईस्वी 1629 वर्षे विद्याधीशवडेरु नामानं माध्वयतिं वादे जित्वा प्रभुणा आन्दोलिकादानेन[13] सत्कृत इति ज्ञायते। अयं माध्वसिद्धान्तखण्डनमप्यलिखदिति ज्ञायते। अयं रङ्गोजिभट्टः आन्ध्रदेशे तिरुपतिक्षेत्रसमीपे स्थिते श्रीकालहस्तिक्षेत्रे विराजमानस्य कालहस्तीश्वरस्य भक्तः। अयं चेश्वरः वायुलिङ्गरूपेण प्रसिद्धः। रङ्गोजिभट्टः स्वीये शिवोल्लासकाव्ये स्वेष्टदेवतामित्थमस्तौत् –

ग्रन्थे चास्मिन् तव विलसिते कालहस्तीश नित्यं
कृत्वाभ्यासं भवति विजयी भक्तिभावैकनिष्ठः॥

श्रीकालहस्तिक्षेत्रमाहात्म्यमेव काव्येऽस्मिन् इतिवृत्तभूतम्। अतश्च रङ्गोजिभट्टस्य निवासः कालहस्तिपरिसरे स्यात्। अस्य कालः 1540 खैस्ताब्दतः 1635 पर्यन्तमित्यूह्यते। अद्वैतशास्त्रव्यवस्थापनेन लब्धप्रतिष्ठस्य रङ्गोजिभट्टस्य पुत्रः, भट्टोजिदीक्षितस्य शिष्यः कौण्डभट्टोऽपि न्यायव्याकरणाद्वैतवेदान्तमीमांसादिषु शास्त्रेषु निष्णातः, व्याकरणशास्त्रीयार्थिकग्रन्थकर्तृषु मुख्यं स्थानमलङ्करोति। यतोऽयमान्ध्रस्ततोऽस्य नाम कोण्डभट्टः इति स्यात्। अस्य पितामहस्याग्रजः कोण्डभट्टारक इति ख्यातः, यस्मादस्य पितामहेन[14] विद्या गृहीता। किञ्च पदार्थदीपिकाया अन्ते कोण्डभट्ट इति नामैव दृश्यते[15]।

---

[10] द्र. काशिकावृत्तिसिद्धान्तकौमुद्योस्तुलनात्मकमध्ययनम्, पूना-1974

[11] See the colophon – "इति श्रीपदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टात्मजकोण्डभट्टकृते वैयाकरणभूषणे चरमः स्फोटः समाप्तः"

[12] विद्याधीशवडेरुसंज्ञकयतिं इत्यादिभूषणान्तश्लोके चतुर्थचरणे "गुरूपमगुरुं रङ्गोजिभट्टं भजे"।

[13] द्र. विद्याधीशवडेरुसंज्ञकयतिं इत्यादिभूषणान्तश्लोकः।

[14] अनर्घराघवव्याख्या-इष्टार्थकल्पवल्लरीप्रस्तावः-Tanjore. Des. Cat. No. viii 4269

[15] (i) पदार्थदीपिकायां पृ.5। कोण्डभट्टेन निर्मिता कोण्डभट्टकृता (ii) श्रीकोण्डभट्टः कुर्वेऽहं वैयाकरणभूषणम् (5-श्लोकः)

भूषणारम्भेऽपि कोण्डभट्ट इति नामैव दृश्यते। अयं च कोण्डभट्टः केलदिभूपस्य वेङ्कटाद्रेः पौत्रस्य वीरभद्रस्य (ईस्वी 1629-1645) आस्थाने आसीत्[16]। तस्य भूपस्य प्रेरणया तर्कप्रदीप इति तर्कग्रन्थमरचयत्। अनेन कौण्डभट्टेन रचिता ग्रन्थाः श्री पि. के. गोडे-महोदयैः स्वीये लेखे एवमुल्लिखिताः –

1. तर्कप्रदीपः – वीरभद्रभूपप्रेरणया लिखितः – Hall P 79 Ben 165
2. तर्करत्नम् - Hall P 78
3. (न्याय) पदार्थदीपिका- वाराणस्यां प्रकाशिता, ईस्वी 1900
4. वैयाकरणसिद्धान्तभूषणम् – वाराणस्यां प्रकाशितम्, ईस्वीये -1900
5. वैयाकरणसिद्धान्तभूषणसारः
6. लघुवैयाकरणसिद्धान्तभूषणसारः Oppert 5397
7. वैयाकरणसिद्धान्तदीपिका – K 88
8. स्फोटवादः –Peters I-21

तत्रैव तैः प्रतिपादितं यत् न्यायपदार्थदीपिकायां कौण्डभट्टो वैयाकरणसिद्धान्त-भूषणं तर्करत्नं च समुल्लिलेखेति। अतश्च भूषणरचना तर्करत्नरचना वा प्रथमेति वक्तव्यम्। वाराणस्याः सरस्वतीभवनग्रन्थालये वैयाकरणसिद्धान्तभूषणसारस्यैको हस्तलेखो[17] दरी-दृश्यते, यस्य कालः 1637 खैस्ताब्द इति उल्लिखितः। अतश्चास्मात् कालात् पूर्वमेव भूषणसारो रचितश्चेद् भूषणरचना ततोऽपि पूर्वैव भवति। गुरुप्रसादशास्त्रिभिः स्व-सम्पादितभूषणसारारम्भे भूषणसारलेखनकालः 1660 विक्रमाब्दः (ईस्वी 1602) निर्दिष्ट इति संस्कृतव्याकरणशास्त्रेतिहासे युधिष्ठिरमीमांसकाः[18]। प्रायोऽयं कालो भूषणस्य स्यात्, न तु भूषणसारस्य। पदार्थदीपिकायां भूषणसारस्यानुल्लेखाद् भूषणसाररचना पदार्थ-दीपिकातः परैवेति कौण्डभट्टग्रन्थानां क्रम इत्थं निर्देष्टुं शक्यते –1. वैयाकरण-सिद्धान्तभूषणम्, 2. तर्करत्नम्, 3. पदार्थदीपिका, 4. वैयाकरणसिद्धान्तभूषणसारः लघुभूषणसारश्च, 5. तर्कप्रदीपः, 6.वैयाकरणसिद्धान्तदीपिका, 7. स्फोटवाद इति। अस्य ग्रन्थरचनाकाल ईस्वी 1610-1660 इति गोडेमहाशयैरुक्तम्। तर्कप्रदीपस्य वीरभद्रप्रेरणया

---

[16] P.K. Gode – The Chronology of the works of Kondabhatta-P. 207-211. Studies in Indian literary history Vol.iii, 1956.

[17] सरस्वतीभवनसूचीपत्रे – क्रमसंख्या 39558 वै. भू. सारः, लिपिकालः – सं. 1695

[18] संस्कृतव्याकरणशास्त्रेतिहासः – द्वितीयभागः, पृ. 393

रचितत्वात् ईस्वी 1629तः परमेव स रचित इति तस्मात्पूर्वमेव भूषणस्य तर्करत्नस्य न्यायपदार्थदीपिकायाश्च रचना जातेति वक्तव्यम्। यदि च पूर्वोक्तं युधिष्ठिरमीमांसकवचनं सत्यं स्यात् तर्हि ईस्वी 1600 तः पूर्वमेव कौण्डभट्टेन ग्रन्थरचना आरब्धेति भूषणं च रचितमिति वक्तव्यम्। तस्मादस्य काल ईस्वी 1570-1650 इत्यूहितुं शक्यते।

अस्य च कौण्डभट्टस्य गुरुः शेषकृष्णपण्डितसूनुर्वीरेश्वर इति केचन। ते त्वत्र प्रमाणतया भूषणसारगतमिदं मङ्गलश्लोकमुदाहरन्ति-

अशेषफलदातारमपि सर्वेश्वरं गुरुम्।<br>
श्रीमद्भूषणसारेण भूषये शेषभूषणम् ॥

परन्त्वेष श्लोको न गुरुस्तोत्रपरः, किन्तु इष्टदेवतास्तुतिपर एव। दर्पणादिव्याख्यासु तथैव व्याख्यातत्वात्। यश्शेषभूषणः पूर्वं स्तुतः तस्यैव कृतिसमर्पणस्य युक्तत्वात्। पदार्थदीपिकाया आरम्भे मङ्गलश्लोकोऽप्येतत्तुल्य[19] एवास्ति। हरिदीक्षितेनापि शब्दरत्नारम्भे एतादृश एव श्लोकः[20]कृतः। अतश्चायमिष्टदेवतास्तुतिपर एव। स चेष्टदेवो हरिहरनाथः। एते च दीक्षितवंश्या हरिहराद्वैतवादिनः। लक्ष्मीधरोऽपि षड्भाषाचन्द्रिकायाः प्रस्तावे स्ववंशवर्णनसन्दर्भे स्वयं स्वपितामहं वृषाकपायीरमणप्रसादं ख्यापयति। एतादृशो हि हरिहराद्वैतवादो बहोः कालात् पूर्वमेव आन्ध्रदेशे प्रसिद्धः। ईस्वीयत्रयोदशशतके नेल्लूरुमण्डलं पालयतो मनुमसिद्धेर्मन्त्री, भारतान्ध्रीकर्तृष्वेकः तिक्कन महाकविः स्वीयं भारतं हरिहरनाथस्यैव समर्पितवान्। यदा स्वप्नेऽयं स्वेष्टदैवं हरिहरनाथमपश्यत्, तदा स तमित्थमपृच्छत्-

किमस्थिमालां किमु कौस्तुभं वा परिष्क्रियायां बहुमन्यसे त्वम्।<br>
किं कालकूटं किमु वा यशोदास्तन्यं तव स्वादु वद प्रभो[21]मे ॥ इति।

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।<br>
स्फोटरूपं यतस्सर्वं जगदेतद्विवर्तते॥

इति भूषणसारमङ्गलश्लोकोऽप्येतादृश एव खलु। कौण्डभट्टः प्रथमं स्वपितुस्सकाशादेव सर्वा विद्या जग्राह। विषयममुं सूचयति स्वयमेव कौण्डभट्टः "गुरूपमगुरुं रङ्गोजिभट्टं भजे" इति। ततः भट्टोजिदीक्षितादीनां शुश्रूषामकरोत्। "नत्वा गणेशपादाब्जमि"ति मङ्गलश्लोके "गुरून्" इति बहुवचनप्रयोगेण अन्येऽप्यस्य गुरवः आसन्निति ज्ञायते। तस्मिन्काले प्रसिद्धः

---

[19] श्रीमत्सिद्धिकरं कान्तं रमोमारमणात्मकम्। दयासिन्धुं चिदानन्दं सितासितमुपास्महे॥

[20] शेषविभूषणमीडे शेषशेषार्थलाभाय। दातुं सकलमभीष्टं फलमीष्टे यत्कृपादृष्टिः ॥

[21] आन्ध्रमहाभारते उद्योगपर्वणि पीठिकायामस्ति।

नैयायिकाग्रणीः रामकृष्णभट्टाचार्योऽप्यस्य गुरुर्भवेत् यतोऽह्ययं भूषणे "रामकृष्ण-भट्टाचार्या" इति तं सादरं निर्दिशति इति केचन विमर्शकाः।

कौण्डभट्टस्य ग्रन्थाः

अनेन रचितेषु ग्रन्थेषु त्रय एव प्रकाशिताः समुपलभ्यन्ते। अन्येषां नाममात्रा-वशेषता वा, हस्तलिखितमातृकारूपता वा स्यात्। तत्र प्रकाशितानां सङ्क्षिप्तः परिचयोऽत्र प्रस्तूयते।

पदार्थदीपिका

अयं न्यायग्रन्थो यद्यपि अन्नंभट्टकृततर्कसङ्ग्रहतुल्यः, अथापि तस्मादस्य वैलक्षण्यं बह्वस्ति। स च तर्कसङ्ग्रहोऽत्यन्तं सङ्क्षिप्तः, अयं तु न तथा। किञ्च, पृथिव्यादिलक्षणेष्व व्याप्त्यादिदोषपरिहाराय जातिपर्यन्तानुधावनं कर्तव्यमेवेत्ययं पृथिवीत्वजातिमती गन्धवती वा पृथिवीत्यादिना सम्यक् प्राकाशयत्। तत्र मीमांसकानामन्येषाञ्च मतानि प्रदर्शितानि। यथा वायोरनुमानगम्यतेति नैयायिकसिद्धान्तमुक्त्वा तस्य प्रत्यक्षत्वमेवेति मीमांसकानां मतं सम्यगत्र प्राकाशयत्। यद्यप्यस्मिन् ग्रन्थे न्यायवैशिषकयोः पदार्थाः निरूपिताः, तथापि नायं ग्रन्थः कैवलन्यायवैशेषिकसम्बद्धः, किन्तु सर्वदर्शनसम्बद्धः। अत्र भाट्टप्राभाकरतान्त्रिकादिमतेष्वपि प्रमाणादिविचारः पदार्थविचारश्च कृतोऽस्ति। यद्यप्ययं ग्रन्थो बालव्युत्पत्तिसिद्धये कृतः, अथापि सर्वैरपि दर्शनशास्त्राध्यायिभिरवश्यमध्येतव्यः। अयमेव ग्रन्थः कौण्डभट्टस्य सुनिशिते सर्वशास्त्रपाण्डित्ये प्रमाणभूतः।

वैयाकरणसिद्धान्तभूषणम्

कौण्डभट्टस्य सर्वतोमुखप्रज्ञायाः परिचायकमिदं वैयाकरणसिद्धान्तभूषणम्। पदवाक्यप्रमाणादिशास्त्रेषु कीदृशोऽस्त्यधिकारः कौण्डभट्टस्य इति सुस्पष्टं भवति अस्य अध्ययनेन।भूषणं चेदं द्वासप्ततिकारिकामयस्य वैयाकरणमतोन्मज्जनाख्यस्य भट्टोजि-विरचितस्य ग्रन्थस्य व्याख्यारूपमिति तु ज्ञायत एव। अयं च कारिकाग्रन्थः चतुर्दशसु प्रकरणेषु विभक्तः यत्र प्रकरणस्य सङ्केतः निर्णयपदेन कृतः। तानि च प्रकरणानि – धात्वाख्यातसामान्यार्थनिर्णयः, लकारार्थनिर्णयः, कारकार्थनिर्णयः(सुबर्थनिर्णयः), नामार्थनिर्णयः, समासशक्तिनिर्णयः, शक्तिनिर्णयः, नञर्थनिर्णयः, निपातार्थनिर्णयः, भावप्रत्ययार्थनिर्णयः, देवताप्रत्ययार्थनिर्णयः, अभेदैकत्वसंख्यानिर्णयः, संख्याविवक्षा-

निर्णयः, क्त्वाद्यर्थनिर्णयः, स्फोटनिर्णयश्चेति। तत्र संपूर्णे भूषणे तृतीयभागकल्पः ग्रन्थः धात्वाख्यातसामान्यार्थनिरूपणपर एव। ग्रन्थस्यास्य हृदयभूतः भागः स एवेति वक्तुं शक्यम्। अत्रैव कौण्डभट्टेन बहु पराक्रान्तम्। न किञ्चिदेकदेशिमतमपि अविमृष्टं परित्यक्तमत्र विद्यते। स्वसमयपर्यन्तं पदवाक्यप्रमाणशास्त्रेषु प्रवृत्तानि यानि शाब्दबोध-विषयाणि मतानि तानि सर्वाणि सुनिशितम् अत्र परिशीलितानि। यतोऽयं कौण्डभट्टो भट्टोजि-दीक्षितस्य साक्षाच्छिष्यप्रायः, तस्माद् तस्य हृदयगता भावा सम्यगनेन ज्ञाता आविष्कृ-ताश्च। "गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान् सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये" इति हि कौण्डभट्टस्य प्रतिज्ञा।[22] अनया प्रतिज्ञया कौण्डभट्टस्येतरशास्त्रज्ञेषु तत्सिद्धान्तेषु चावज्ञेति नैव मन्तव्यम्। शास्त्रमूलभूतसिद्धान्तापरित्यागेन यावत्पर्यन्तं सर्वेषां शास्त्राणामैकमत्यं संपादयितुं शक्यम्, तावत्पर्यन्तमैकमत्यमनेन भूषणे प्रतिपादितम्। अत एवायं ग्रन्थो न केवलं वैयाकरणैः, किन्तु तन्त्रान्तरीयैरपि शिरसि धार्यते। उक्तञ्च शाब्दतरङ्गिण्यां श्रीमद्भिः सुब्रह्मण्यशास्त्रिभिः[23] –"नव्यवैयाकरणसिद्धान्तानपेक्ष्य प्राचीनवैया-करणसिद्धान्ता नैयायिकसिद्धान्तसन्निकृष्टा वर्तन्ते" इति। अत्रैकमुदाहरणं प्रदीयते – वैयाकरणसिद्धान्तभूषणे सुबर्थनिर्णये[24]धर्मी एव सुबर्थ इति निर्णीय, सम्बन्धस्य षष्ठ्यर्थ-तामुक्त्वा ओदनस्य पाक इत्यादौ कर्मतायां षष्ठीत्यादि कथमिति विशङ्क्य "आश्रयोऽपि न विभक्त्यर्थः। घटादिरूपस्य तस्य प्रकृत्यैव लाभात्। एवमवधिर्वृक्षादिरूपो न विभक्त्यर्थः।उद्देश्योऽपि ब्राह्मणादिर्न विभक्त्यर्थः।तथा चाश्रयत्वादिकमेवार्थः। अनन्य-लभ्यत्वात्। तच्च निरूपकत्वादिना धात्वर्थेऽन्वेति। कर्मणि द्वितीयेत्यादेश्शक्तिशक्तिमतो-स्तादात्म्याभ्युपगमेनोपपत्तिः। अन्यथा द्व्येकयोरिति विहितैकवचनादेरपि सङ्ख्याविशिष्टा-श्रयवाचकत्वापत्तिः" इत्यादिना धर्मवाचकत्वमेव सुपां व्यवस्थापितवान् कौण्डभट्टः। अयमेव नव्यनैयायिकसिद्धान्त इति सर्वैर्विद्वद्भिर्ज्ञायत एव।

किञ्चात्र कौण्डभट्टेन नव्यमार्गबीजावापोऽपि कृतः। अभेदैकत्वसङ्ख्यानिर्णये[25] प्राचीनं मतद्वयमुपपाद्य अन्ते नव्यमतमित्थं स प्राचीकटत् – "नव्यास्तु पदार्थैकदेशत्वात् राजपुरुष इत्यत्र राज्ञः, तत्र सङ्ख्यात्वरूपेणापि न तदन्वय इत्याहुः" इति। अत्राहु-

[22] भूषणारम्भे पाणिन्यादिमुनीन् इत्यादि चतुर्थः श्लोकः।

[23] शाब्दतरङ्गिणी – P. 25, Sanskrit Education Society, Madras, 1969.

[24] वै.सि. भूषणम् (1900 प्रकाशनम्)सुबर्थनिर्णयः --p.143, 144

[25] वै.सि.भूषणे(1900 प्रकाशने) P. 286.

रित्यनेनारुचिरेव ग्रन्थकर्तुः सूचितेति मन्येरन्। परन्त्वत्र नव्यमते एवेष्टतां तत्रैव स इत्थं प्राकाशयत् "समासादौ शक्तिः कल्प्यमाना सङ्घाविशिष्टे एव सा कल्प्येत्यभ्युपगमे तु नायं दोषः। परन्त्वनुभवविरहात् जिज्ञासानुरोधेन शक्तौ तु ज्ञानेच्छयोः समानप्रकारत्वेन हेतुहेतुमद्भावात् विशिष्यैव वाच्यतापत्तेः, इष्टापत्तौ जिज्ञासोच्छेदापत्तेः। मूलोच्छेदात् शक्तिकल्पनमेवानर्थकमिति विभावयाम इति दिक्" इति। वैयाकरणसिद्धान्तदीपिकेति कश्चन ग्रन्थः स्वतन्त्रः यद्यैतत्कृतः स्यात्, तर्हि तत्र कौण्डभट्टहृदयं नव्यमार्गावलम्बि वा न वेति सम्यग् ज्ञातुं शक्येत। परन्त्वयं ग्रन्थ एतावत्पर्यन्तं नाममात्रेणोपलब्धः।

अनेन च भूषणे वहवो ग्रन्थाः ग्रन्थकर्तारश्च समुल्लिखिताः। ते च यथा –

अद्वैतसारोद्धारः, अनुव्याख्यानं, अप्पय्यदीक्षितः, अमरः, आख्यातवादशिरोमणिः, आचार्यः, उदयनाचार्यः, ऋषभः, कर्कटी, कलापः, कल्पतरुः, कल्पतरुकारः, काव्यप्रकाशकारः, कुसुमाञ्जलिः, कुसुमाञ्जल्युपायः, कैयटः, खण्डनकारः, गार्ग्यः, गीता, गुणोपायः, गुरुः, गौतमः, जयतीर्थः, जैमिनिः, तत्त्वविवेकः, दुर्गसिंहः, धातुवृत्तिः, नयविवेकटीका, नयविवेकवरदराजीयं, निरुक्तम्, निरुक्तकारः, नृसिंहाश्रमः, न्यायतात्पर्यटीका, न्यायरक्षामणिः, न्यायसुधा, पञ्चशिखाचार्यः, पतञ्जलिः, पतञ्जलियोगशास्त्रम्, पराशरः, परिमलः, पाणिनिः, पार्थसारथिमिश्रः, प्रभाकरः, ब्रह्मोत्तरखण्डः, भट्टः, भट्टोजि, भर्तृहरिः, भागवतं, भामती, भाष्याकारः, भीमसेनः, मण्डनमिश्रः, मध्वः, मनोरमा, महाभारतं, माधवाचार्यः, माध्वः, मिश्रः, मुकुटः, रङ्गोजि, रामकृष्णभट्टाचार्यः, लीलावत्युपायः, वरदराजः, वसिष्ठः, वाक्यपदीयं, वाचस्पतिमिश्रः, विवरणं, विवरणटिप्पणी, विवरणाचार्यः, वेदान्तभूषणकृत्, व्यासः, शङ्कराचार्यः, शबरः, शब्दकौस्तुभः, शाकटायनः, शास्त्रदीपिका, श्रीधरस्वामी, संक्षेपशारीरकृत्, सिद्धान्तकौमुदी, सिद्धान्तलेशः, सुधा, स्कन्दपुराणं, हरदत्तः, हरिः, हेलाराजः।

एवं तर्कप्रदीपे कौण्डभट्टः स्वपितुः अद्वैतचिन्तामणिग्रन्थमुल्लिलेख। एतैः ग्रन्थानां ग्रन्थकर्तॄणां चोद्धरणैरेव ज्ञायते यत् कौण्डभट्टः सर्वशास्त्रपारङ्गत इति। मीमांसा शास्त्रे तु निरुपममेव पाण्डित्यं तस्य। बहुषु सन्दर्भेषु भट्टपादानां वचनान्यपि खण्डितानि।

न्यायसुधाशास्त्रदीपिके च सुनिशितं परिशीलिते। अस्य न्यायशास्त्रवैशारदी च न्याय-लीलावत्यादिग्रन्थस्थविषयाणां विमर्शने दीधितिकारादीनां मतखण्डनादिषु च सुव्यक्ता।

वैयाकरणभूषणसारः

अयमपि भूषणस्य सारग्रन्थः कौण्डभट्टेनैव रचितः। लघुत्वात् पठनपाठनेषु प्रचारोऽस्यैवासीन्महान्। विषयस्य निर्दुष्टता, सङ्क्षेपश्चात्र कारणीभूतौ। पदवाक्यप्रमाण-शास्त्रीयेषु सर्वेषु शाब्दबोधविचारपरेषु आर्थिकग्रन्थेषु प्रसिद्धतमोऽयं भूषणसार इति विदितचरमेव समेषां विदुषाम्। अस्य ग्रन्थस्य रचनासमयमारभ्य एतावत्पर्यन्तं न केवलं वैयाकरणैः अपि तु नैयायिकैः मीमांसकैश्च सश्रद्धम् अधीयमानोऽयम् आरम्भत एव शास्त्राध्ययनपाठ्यक्रमे विशिष्टं स्थानमधितिष्ठति। शास्त्रान्तरीयेषु ग्रन्थेषु वैयाकरण-मतोल्लेखसन्दर्भेषु एतद्ग्रन्थस्थः न केवलं विषयः अपि तु पङ्क्तिश अस्य ग्रन्थस्य भागाः तत्र तत्र समुल्लिखिताः समुपलभ्यन्ते।

कौण्डभट्टस्य वासस्थानम्

क्रि.श. षोडशशतकोत्तरार्धे सप्तदशशतकारम्भे च कर्णाटकेषु केलदि-परिसरस्य पालकः वेङ्कटप्पनायक इत्यासीत्।'अयमद्वैतमतानुयायी हरिहराद्वैतवादी च। अस्यैव सभायां कौण्डभट्टस्य पिता रङ्गोजिभट्टः, विद्याधीशवडेरु इति माध्वयतिं वादे जित्वा राज्ञा सम्मानितः। तत्त्वकौस्तुभग्रन्थः भट्टोजिदीक्षितेन अस्यैव प्रेरणया रचितः। भट्टोजिरङ्गोजिभट्टौ केलदिवेङ्कटभूपस्यास्थाने आस्ताम्। वेङ्कटप्पनायकानन्तरं तत्पौत्रः वीरभद्रनायकः प्रभुः आसीत् तस्यास्थाने कौण्डभट्टः आसीत्। अतश्च ऊह्यते यत् भट्टोजिरङ्गोजिभट्टौ वेङ्कटभूपेन आहूतौ कर्णाटकप्रान्तं गत्वा केलदीग्रामे न्यवसतामिति। कौण्डभट्टोऽपि तत्रैव उषित्वा अध्ययनाध्यापनादिकमकरोदिति च। इदानीमपि तद्ग्रामस्थाः भट्टोजिदीक्षितादीनां निवासभूतं प्रदेशं तत्र प्रदर्शयन्ति, यत्र गृहाणां शिथिलानि तत्प्राचीनवैभवस्य प्रतीकभूतानि इदानीमपि दर्शनपथमागच्छन्ति। दीक्षिताग्रहार इत्येव इदानीमपि तत्प्रदेशस्य संज्ञानम्। तत्रैव भगवतो वेङ्कटेश्वरस्य लघु मन्दिरमपि विराजते, यश्च देवः दीक्षितवंश्यैराराधितः।

केलदिग्रामे एव कश्चन ईश्वरालयोऽप्यस्ति यः रामेश्वरालय इति प्रसिद्धः यस्य परिसरे एव वेदशास्त्रपाठशाला आसीत्, या च भट्टोजिदीक्षितादिभिः प्रचाल्यमाना आसीदिति इदानीमपि तत्तत्स्थानं प्रदर्श्य वर्णयन्ति तत्रत्याः वृद्धाः।

कौण्डभट्टस्य समसामयिकाः भट्टोजिशिष्याः

लघुसिद्धान्तकौमुदीकारः वरदराजः, वैयाकरणमतोन्मज्जनव्याख्याकारः वनमालिमिश्रः, चिमनीचरितादिग्रन्थकर्ता नीलकण्ठशुक्लः, अमरकोशस्य व्याख्यासुधाकारः भानुदीक्षितश्च भट्टोजिशिष्यत्वेन प्रथिताः अस्य समसामयिकाः। एतेषु वनमालिमिश्रः भट्टोजिकारिकाणां वैयाकरणमतोन्मज्जनव्याख्येति नाम्ना संक्षिप्तां व्याख्यामकरोत् या च भूषणे कौण्डभट्टेन तत्र तत्र उल्लिखिता।

कौण्डभट्टसमकालिकाः अन्ये विद्वांसः

जगदीशः

पदवाक्यप्रमाणपारावारीणस्यास्य कौण्डभट्टस्य नैयायिकाग्रणीर्जगदीशः समकालिकः। अयं जगदीशः ईस्वीये 1635 वर्षे शब्दशक्तिप्रकाशिकां[26] निबद्धवान्। शब्दसङ्क्षेपे उभावपि समानौ। यद्यपि शब्दशक्तिप्रकाशिकातः पूर्वमेव भूषणरचना आसीत्, अथापि उभयोः परस्परप्रभावः स्वग्रन्थयोर्न दृश्यते। परन्तु कुत्रचित् भावसादृश्यमपि लक्ष्यते। परसमवेतत्वस्य द्वितीयावाच्यत्वं नोभयोरिष्टम्। तथा तस्य कर्मलक्षणघटकतापि नेष्टा। चैत्रश्चैत्रं गच्छतीति प्रयोगो द्वितीयार्थसंयोगे प्रकृत्यर्थस्य स्वप्रतियोगिकत्वसंबन्धेनैव साकाङ्क्षतया द्वितीयान्तलभ्यस्य चैत्रीयत्वविशिष्टसंयोगस्य जनकत्वस्वाश्रयवृत्तित्वोभयसंबन्धेनैव क्रियायामन्वयेन चैत्रप्रतियोगिकसंयोगाश्रयवृत्तिगतेश्चैत्रे बाधाद्वारितः[27]। परया कर्तृसंज्ञया कर्मसंज्ञाया बाधात् न तादृशः प्रयोग इति कौण्डभट्टः। तत्र शाब्दबोधप्रसङ्गस्तु द्वितीयार्थफलप्रकारकबोधं प्रति तादृशव्यापारोपस्थितिर्हेतुरिति कार्यकारणभावेनैव वारयितुं शक्य इति तदाशयः[28]। एतादृशं भावसादृश्यं तात्कालिकशास्त्रज्ञानां विचारसरणावैकमत्यं प्रदर्शयति।

गागाभट्टः

एवं भाट्टमीमांसकाग्रणीः खण्डदेवस्य गुरुर्गागाभट्टोऽप्यस्य समकालिकः। अस्य भाट्टचिन्तामणिग्रन्थे प्रायशो वैयाकरणमतं कौण्डभट्टोक्तमेवास्ति।

---

[26] शब्दशक्तिप्रकाशिका -Kashi sanskrit series no. 109. उपोद्घातः, P. 3

[27] शब्दशक्तिप्रकाशिका - Kashi sanskrit series no. 109. P. 320

[28] वै०भूषणम् (1900 प्रकाशनम्) P. 130,

खण्डदेवः

एवं खण्डदेवोऽप्यस्य समकालिक एव। अयं खण्डदेवः ईस्वीये 1965 वर्षे[29] दिवंगत इति श्रूयते। तदीये भाट्टरहस्ये यदनूदितं वैयाकरणमतं तत्सर्वं भूषणोक्तमेव। कुत्रचित्तानि वाक्यानि तथैव भूषणादुद्धृतानि लभ्यन्ते। नव्यमीमांसकमार्गद्रष्टा खण्डदेवो यद्यपि सर्वत्र सुबर्थमखण्डोपाधिरूपमङ्गीकरोति, तथापि तत्किमिति तत्स्वरूप-विचारे भूषणाद्युक्तलक्षणसमनियतत्वं तस्य प्रपञ्चयति।

अनन्तरेष्वस्य प्रभावः

गदाधरः ईस्वीये 1709 वर्षे[30] मृत इति कथयन्ति। तस्मात् गदाधरेण कौण्डभट्टः साक्षात्कृतो वा न वेति वक्तुं न शक्यते। परन्तु भूषणग्रन्थोऽवश्यं तेन दृष्ट एव स्यात्। तत्सिद्धान्तेषु तस्यादरोऽपि महान्। धातोः फलावच्छिन्नव्यापारवाचित्वमिति नव्यमतं तिरस्कृत्य कौण्डभट्टोक्तं फलम् व्यापार उभयमपि पृथगेकवृन्तगतफलद्वय-न्यायेन, पुष्पवन्तादिवद्वा धातुशक्यमिति मतं समर्थयति। न क्वापि भूषणस्य वा, कौण्डभट्टस्य वा खण्डनं तिरस्कारश्च दृश्यते तद्ग्रन्थे।

गोकुलनाथस्तु पदवाक्यरत्नाकरे वैयाकरणमतानुवादरूपेण भूषणसारव्याख्या-मेवाकरोत्। भूषणसारे सूक्ष्मतया प्रपञ्चितानां विषयाणां सम्यक् प्रकाशनं वर्तते पदवाक्य-रत्नाकरे वैयाकरणमतानुवादे। अयञ्च पदवाक्यरत्नाकरो वस्तुतः सर्वसिद्धान्तानामाकर एव। अतश्च गोकुलनाथे कौण्डभट्टस्य प्रभावो महानिति ज्ञायते।

एवं नव्यवैयाकरणे नागेशेऽपि तस्य प्रभावोऽस्ति महान्। नव्यमार्गस्य बीजा-वापः कौण्डभट्टेन कृत इति पूर्वमेवोक्तम्। प्रायशो नागेशस्य गुरुः हरिदीक्षितः कौण्डभट्टस्य सन्निधौ व्याकरणमधीतवान् स्यात्। यद्यप्यस्मिन् विषये प्रमाणं नोपलभ्यते, तथापि बान्धव्यमेव प्रमाणतया स्वीकर्तुं शक्यम्। बृहच्छब्दरत्ने बहुत्र भूषणानुवादः दृश्यते। मञ्जूषादिग्रन्थेषु तत्तन्मतनिराकरणसमये प्रायशो नागेशेन कौण्डभट्टप्रदर्शिता युक्तय एव प्रदर्शिताः। परमलघुमञ्जूषायां तु प्रायशस्सर्वाणि लक्षणानि भूषणसारीयाण्येव, परन्तु नागेशे खण्डदेवस्यापि प्रभावोऽस्ति महान्। तस्मात् तत्र तत्र भूषणाभिप्रायभिन्नं स्वाभिप्रायं प्रकाशयति। समनन्तरेषु वैयाकरणेषु नैयायिकेषु मीमांसकेषु चास्य

[29] P.K. Gode – Indian literary history vol iii, p. 81.

[30] History of Navya nyaya in Mithila - Prof. D.C. Bhattacharya. – p. 197

कौण्डभट्टस्य प्रभावोऽस्त्येव परम्परया। एवं स्वपाण्डित्यप्रभावेण शास्त्रज्ञलोकं प्रभाव्य, भूषणभूषणसारपदार्थदीपिकादिग्रन्थरचनया यशःकायेनामृतस्सन् वैयाकरणानां सर्वेषां सदा पूजनीयो रारजतेऽयम् ।

धात्वाख्यातसामान्यार्थनिर्णये विषयः

अथ धात्वाख्यातसामान्यार्थनिर्णयगतं विषयजातमत्र सङ्गृह्यते–

क. मङ्गलाचरणेन अनुबन्धचतुष्टयं निरूप्य, ग्रन्थस्य प्रामाण्यं वैयाकरणैरुपादेयत्वं च प्रतिपादितम्।

ख. फलव्यापारयोरिति कारिकया महता आग्रहेण इतरमतनिरासपुरस्सरं वैयाकरणमतमुपपाद्य तत्र शाब्दबोधः प्रदर्शितः।

अत्र च विचारिताः विषयाः एते –

1. फलप्रयोजिकाक्रिया, अव्यवधानेन यदनन्तरं फलोत्पादः सा क्रिया, चरमव्यापारवर्तिनी जातिः क्रियेति वाक्यपदीयाद्युक्तानि व्यापारलक्षणानि समीक्ष्य "भावनाभिधा साध्यत्वेन अभिधीयमाना क्रिये" ति सिद्धान्तप्रतिपादनम्।
2. क्रियायाः व्यापारसमुदायरूपत्वेऽपि फूत्कारत्वादिनानाशक्यतावच्छेदकत्वेन धात्वर्थतया तासां भानेऽपि न नानार्थत्वमिति प्रतिपादनम्।
3. व्यापारस्य प्रत्ययार्थत्वमिति भाट्टमीमांसकमतं, व्यापारः वाच्य एव न किन्तु तद्विशेषः कृतिरिति कुसुमाञ्जलिकारादीनां मतं च सम्यग्विमृश्य व्यापारस्य धात्वर्थत्वप्रतिपादनम्।
4. आश्रयप्रतीतिः आक्षेपात् लक्षणया वेति भाट्टमीमांसकमतं, प्रथमान्तपदादाश्रयोपस्थितिरिति प्राभाकरनैयायिकयोः मतं च परिशील्य आश्रयस्य प्रत्ययार्थत्वप्रतिपादनम्।
5. व्याकरणशास्त्रेणापि कर्तुः प्रत्ययार्थत्वं न प्रतिपाद्यते किन्तु तत्संख्याया एवेति भाट्टमतं विमृश्य, तत्रानौचित्यं प्रदर्श्य, तिङन्ते कर्तृसंख्याभिधान मेव कर्तुरभिधानमिति मीमांसकमतनिरासः।
6. अभेदान्वयबोधे न समानविभक्तिकत्वं प्रयोजकमपितु विरुद्धविभक्तिराहित्य -मेवेति सिद्धान्तयित्वा तिङर्थप्रथमान्तार्थयोरभेदस्य स्थापनम्।
7. आख्यातार्थकालस्य व्यापारे एव अन्वयप्रतिपादनम्।

8. भावलकारे आख्यातार्थसंख्या अनन्वितैवेति प्रतिपादनम्।
9. व्यापारस्यैव धात्वर्थत्वमुक्त्वा वाक्यार्थे तस्यैव प्राधान्यमिति सप्रमाणं निरूपणम्। भावनायाः प्रथमान्तार्थविशेषणत्वनिरासश्च।
10. वैयाकरणमते शाब्दबोधप्रदर्शनं च।

ग. ततः परं कारिकाद्वयेन "सकर्मकधातुसमभिव्याहृतभावसाधारणविधिविधेययक्किणादीनां कर्मद्योतकत्वम्" इति निरूपणम्।

घ. व्यापारो भावनेति कारिकात्रयेण च विमृष्टानि मतानि एतानि –

1. व्यापारः न धात्वर्थः, न वा प्रत्ययार्थः, व्यापारत्वस्य शक्यतावच्छेदकत्वे गौरवात्। लाघवात् कृतिरेव प्रत्ययार्थः, कृतित्वमेव शक्यतावच्छेदकम्। धात्वर्थस्तु फलमेव। अचेतनकर्तृकस्थले आश्रयत्वमेव तिङर्थ इति कुसुमाञ्जलिकारमतस्य निरासः। गुरुधर्मस्यापि अवच्छेदकत्वप्रतिपादनम्।
2. धातोः केवलव्यापारवाचित्वं, फलं कर्मप्रत्ययार्थ इति प्राचीननैयायिकमतनिरासः।
3. जानातिकरोत्यादिसविषयकधातुस्थले व्यापार एव धात्वर्थः, सकर्मकत्वं भाक्तमिति नैयायिकमतव्युदासपूर्वकं तत्रापि फलव्यापारयोः धात्वर्थत्वप्रतिपादनम्। तत्र कर्मकर्तरि प्रयोगे कर्मवद्भावव्यवस्था।
4. फलमेव धात्वर्थः, तिङर्थः कालः संख्या च। धात्वर्थफलस्य स्वजनककृतिसंबन्धेन प्रथमान्तार्थे अन्वयः। लिङतिरिक्तस्थले भावनायाः वाच्यत्वमेव न इति प्राचीनप्राभाकरमतनिरासः।
5. व्यापारोऽपि धात्वर्थः, भावना आख्यातार्थः इति नव्यमीमांसकनैयायिकमतनिरासः।

ङ. तस्मात्करोतिरिति कारिकया फलं धात्वर्थः, व्यापारः प्रत्ययार्थ इति मण्डनमिश्रानुयायिमतनिरासः।

च. धातोः भावनावाचकत्वे एव कर्तृकर्मकरणादौ कृत्प्रत्ययानां सङ्गतिरिति प्रतिपादनम्।

छ. क्रियावाचकतां विना धातुत्वमेव नेति, भ्वाद्यन्यतमत्वं धातुत्वं, गणपठितत्वे सति सत्ताद्यन्यतमार्थकत्वमेव धातुत्वं, क्रियावाचकत्वे सति गणपठितत्वस्य

धातुत्वेऽपि क्रिया न व्यापारः अपि तु धात्वर्थः, इत्यादिमत निरासपूर्वकं क्रियायाः धात्वर्थत्वप्रतिपादनम्।

ज. अस्त्यादावपि फलव्यापारोभयबोधवर्णनम्। तेषां देशकालादिकर्मकत्वे अवच्छेदकतारूपव्याप्तिः फलं, सत्तादिः व्यापार इति फलव्यापारोभयार्थकत्ववर्णनम्। आत्मधारणमस्त्यर्थ इति निरुक्तरीत्या स्वस्वरूपधारणमेव अस्त्यादौ फलमिति निरूपणम्। पचतीत्यादिष्विव अस्तीत्यादिषु फलव्यापारयोः स्पष्टतया अप्रतीतौ द्वयोः सामानाधिकरण्यस्य हेतुत्वप्रदर्शनम्। वस्तुतः सकर्मकेष्वेव धातोः फलव्यापारोभयवाचकत्वं नियतम्। अकर्मकेषु तु क्वचित् केवलव्यापारवाचकत्वमेव इति सदृष्टान्तं प्रदर्शनम्।

झ. योग्यताज्ञानस्य न शाब्दबोधकारणत्वं, न वा अयोग्यतानिश्चयस्य सामान्यबाधज्ञानस्य वा तत्प्रतिबन्धकत्वम् इति सोदाहरणं प्रदर्शनम्।

ञ. सकर्मकत्वाकर्मकत्वनिर्वचनम्। "साक्षादव्यभिचारेण धात्वर्थो यत्र कर्मभाक्। स सकर्मक" इति तन्त्रवार्तिकसकर्मकलक्षणस्य निरासः।

ट. "आख्यातशब्दे, साध्यत्वेन क्रिया तत्रे"ति कारिकाद्वयेन भावकृदन्ते क्रियायाः प्रतीतेः धातुना साध्यावस्थायाः, प्रत्ययेन सिद्धावस्थायाः क्रियायाः प्रतीतेः प्रतिपादनम्। साध्यत्वसिद्धत्वपरिष्कारश्च।

ठ. सम्बोधनाद्यष्टकस्य क्रियान्वये एव साधुत्वप्रतिपादनम्। तथान्वयं कुत्रचिदनभ्युपगच्छतां नैयायिकादीनाम् अयुक्तत्वप्रतिपादनम्।

ड. आख्यातस्य कर्तृकर्मवाचित्वमनादृत्य भावनावाचित्वस्वीकर्तॄणां नानृतं वदेदिति निषेधोल्लङ्घनप्रायश्चित्तापत्तिकथनम्।

ण. व्याकरणस्य प्रामाण्यप्रदर्शनेन प्रकरणस्योपसंहारः।

भूषणस्य प्रकाशनानि

1. चौखम्भासंस्कृतपुस्तकविक्रयशालाद्वारा वाराणसीसंस्कृतग्रन्थमालायां (Benaras Sanskrit Studies) आर् टि एच् ग्रिफित्, जि. थिवावुट् इत्यन्ययोः पर्यवेक्षणे, तात्याशास्त्रि पटवर्धननाम्ना ख्यातस्य रामकृष्णशास्त्रिवर्यस्य वाराणसीय राजकीयसंस्कृतकलाषालाचार्यस्य सम्पादने प्रथमवारं क्रि.श. 1900 वर्षे प्रकाशितोऽयं ग्रन्थः। अयञ्च मातृकाद्वयमाधारीकृत्य सम्पादित इति उल्लिखति सम्पादक एवेत्थं भूमिकायाम् - "वारं वारं प्रोक्तचरपुस्तकमुद्रणाय समभ्यर्थितोऽहं शेषोपाख्यप्राचीन-

वैयाकरणमन्दिरात्,महामहोपाध्यायभारद्वाजदामोदरशास्त्रिमित्रवरमन्दिराच्च आनीतैतत्पुस्तकद्वयसहायेन परमपरिश्रमेण चैतत् संशोध्यामुद्रयम्" इति। वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनग्रन्थालये अस्य ग्रन्थस्य मातृकाद्वयमिदानीमुपलभ्यते। परन्तु उपलभ्यमानमातृकाभ्यां पाठभेदोऽपि प्रकाशितेऽस्मिन् उपलभ्यते। अत्र पाठभेदास्तु नाङ्किताः ।

2. अनन्तरं च क्रि.श.1915 वर्षे मुम्बापुरीयराजकीयग्रन्थमालायां सप्ततितम (LXX) ग्रन्थरूपेण कमलाशङ्करप्राणशङ्करत्रिवेदिना पञ्चमातृकाः अवलम्ब्य द्वितीयवारम् अयं ग्रन्थः प्रकाशितः यत्र पाठभेदाः अपि अङ्किताः । अस्य सम्पादनस्य आधारभूताः मातृकाः सम्पादकेनेत्थं निर्दिष्टाः -

1. त्रिवेण्ड्रम् नगरात् संस्कृतमातृकालयाधिकृतात् टि. गणपतिशास्त्रिवर्यात् प्राप्ता मातृका तालपत्रमयी यत्र 180 तालपत्राणि, प्रतिपत्रं 12 पङ्क्तयः, प्रतिपङ्क्ति च 40 अक्षराणि सन्ति। इयं च मातृका षष्ठिवर्षेभ्यः पूर्वतनी इति उल्लिखति सम्पादकः। अर्थात् क्रि.श.1850 अस्याः मातृकायाः कालः। नागराक्षरैः लिखितेयं सम्पूर्णा, शुद्धा, स्पष्टा च । "श्री गणेशाय नमः" इत्यारम्भे, "इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टात्मजकोण्डभट्टकृते वैयाकरणभूषणे चरमः स्फोटवादः समाप्तः" इत्यन्ते च उल्लिखितमस्ति ।

2. अन्या पुण्यपत्तनस्थ दक्कन् कालेज्संस्थातः प्राप्ता मातृका यत्र 229 पत्राणि सन्ति, प्रतिपुटं 11-14 पङ्क्तयः सन्ति । अत्रापि आरम्भः "श्री गणेशाय नमः " इति, समाप्तिश्च "इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणरङ्गोजिभट्टात्मजकोण्डभट्टकृते वैयाकरणभूषणे चरमः स्फोटवादः समाप्तः समाप्तमिदं वैयाकरणभूषणम् । 5000 श्रीरस्तु " इति स्तः । नागराक्षरैः लिखितेऽयं शुद्धा, स्पष्टा, सम्पूर्णा च । तत्र तत्र टिप्पणी अपि रचिताऽस्ति । अस्याः कालस्तु न ज्ञातः ।

3. अन्यापि पूर्वोक्तसंस्थातः एव प्राप्ता यत्र 137 पत्राणि सन्ति, प्रतिपुटं 15-17 पङ्क्तयः, प्रतिपङ्क्ति 50 अक्षराणि सन्ति । आरम्भग्रन्थः अत्र नोपलभ्यते । धात्वर्थनिर्णये एव "भावतिङां धात्वर्थानुवादकमात्रत्वात् न तदर्थोऽत्र वर्णितः " इत्यारभ्य आन्तं वर्तते । इयमपि मातृका शुद्धा । कालस्तु नोल्लिखितः ।

4. अन्यापि मातृका पूर्वोक्तसंस्थातः एव प्राप्ता, यत्र 187 पत्राणि, प्रतिपुष्टं 12 पङ्क्तयः, प्रतिपङ्क्ति 40 अक्षराणि सन्ति । सम्पूर्णा मातृका परन्तु लेखनस्खालित्यानि बहूनि । अस्याः लेखनकालः इत्थं निर्दिष्टः - संवत् 1847 वर्षे भाद्रपदे मासे शुक्लपक्षे अष्टमी गुरौ ग्रन्थः समाप्तोऽमिति ।

5. अन्यापि मातृका तञ्जावूरुसरस्वतीग्रन्थालयात् प्राप्ता। कर्गजमयी पूर्णा, देवनागर्यां लिखिता । 124 पत्राणि, 248 पुटानि, प्रतिपृष्टं 13 पङ्क्तयः, प्रतिपङ्क्ति 56-57 अक्षराणि च सन्ति । शतात् वर्षेभ्यः पूर्वं लिखितेति सम्पादकेनोल्लिखितम्। अर्थात् क्रि.श. 1815 कालीना । एवं पञ्चानां मातृकाणां परिशीलनेन सम्पादितोऽयं भूषणग्रन्थः ।अस्य ग्रन्थस्य प्रकाशनात् परं सम्पादकेन इतोऽपि चतस्रः मातृकाः लब्धाः, यत्सम्बन्धिपाठभेदाः अनुबन्धरूपेण ग्रन्थान्ते प्रकाशिताः । ताश्च मातृकाः एताः -

6. जयपुरात् पण्डितकेदारनाथशास्त्रिवर्यात् प्राप्ता 85 पत्रमिता अपूर्णा मातृका । अतिसूक्ष्माक्षरैः लिखिता । प्रतिपुटं 16-21 पङ्क्तयः, प्रतिपङ्क्ति 52-78 अक्षराणि। धात्वर्थनिर्णयस्य अन्ते भेद्यभेदकेति कारिकाव्याख्यानेन इयं मातृका आरब्धा। ततः आन्तं वर्ततेऽस्यां ग्रन्थः ।

7. अन्या च मातृका पूर्वोक्तपण्डितवर्यात् प्राप्ता देवनागर्यां लिखिता पूर्णा यत्र 203 पुटानि, प्रतिपुटं 9 पङ्क्तयः, प्रतिपङ्क्ति 54 अक्षराणि सन्ति । अत्र लेखनकालः अन्ते "मिति वैशाखसुदि 3 संवत् 1841" निर्दिष्टः ।

8. अन्या च मातृका बरोडातः एव प्राप्ता कर्गजमयी - नागर्यां लिखिता - पूर्णा - 180 पत्राणि, प्रतिपुटं 10-12 पङ्क्तयः, प्रतिपङ्क्ति 30-44 अक्षराणि - कालः संवत् 1832.

9. अन्या च मातृका बरोडातः एव प्राप्ता कर्गजमयी - नागर्यां लिखिता । शुद्धा परन्तु अपूर्णा । श्रीलक्ष्मीरमणमित्यारभ्य धात्वर्थनिर्णये "सम्बोधनान्तमिति" कारिका-व्याख्यामध्यपर्यन्तः, ततः लकारार्थनिर्णये लेडर्थमारभ्य लकारार्थनिर्णयान्तश्च ग्रन्थः केवलमुपलभ्यते ।

अत्रेदमवधेयम् ।अनयोः उभयोः प्रकाशनयोः आधारभूतमातृकाः नितरां भिन्नाः। प्रथमं प्रकाशनं वाराणस्यामेवोपलब्धं मातृकाद्वयमवलम्ब्य कृतं चेत् द्वितीयं त्रिवेण्ड्रम्, पूना, तञ्जावूर् मातृकाः आश्रित्य कृतम्।द्वितीये प्रकाशने प्रथमप्रकाशनस्योल्लेखस्तु वर्तते। अथ तृतीयं प्रकाशनमस्य 1985 क्रिस्तब्दे चौखम्भा अमरभारतीसंस्थाद्वारा सम्पूर्णानन्दसंस्कृतविश्वविद्यालयव्याकरणाचार्यस्य मनुदेवभट्टाचार्यस्य सम्पादने, तत्कृत-

रूपालीटीकया च आसीत् । परन्तु मूलग्रन्थस्य आधार: क इति न कुत्रापि तैरुल्लिखितम् । अत: प्रकाशनद्वयमाश्रित्य अत्र मूलग्रन्थ: योजित: इति चिन्तनीयम् ।

तथैव 1987 क्रिस्तब्दे भारतीयविद्याप्रकाशनसंस्थाद्वारा सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिचरस्य श्री विद्यानिवासमिश्रमहोदयस्य सम्पादने आङ्ग्ल-टिप्पण्या सह अस्य ग्रन्थस्य चतुर्थं प्रकाशनं जातम् । अत्रापि मूलग्रन्थ: मातृका: आधारी-कृत्य न सम्पादित:, अपितु प्रकाशितग्रन्थमाश्रित्यैव मूलग्रन्थ: योजित: ।

एतत् ग्रन्थसम्पादनार्थमुपयुक्तमातृकाणां विवरणम् -

a.अडयार् ग्रन्थालयात्प्राप्ता: चतस्र: मातृका:-

1. क्रमसंख्या - 67378 - वैयाकरणभूषणम् - [अ1]
कौण्डभट्टकृतम् - तालपत्रम् - 105 पत्राणि । 18 अङ्गुलानां दैर्घ्यम् । प्रतिपुटं 5 पङ्क्तय: - तेलुगु लिपि: । प्राचीनामातृका - सुन्दरं लेखनम् । आदित: सुबर्थनिर्णयान्ता । अस्या: प्रतिलिपीकरणकाल: इत्थं निर्दिष्ट: -

सर्वजिद्वत्सरे शुक्ले दशम्यां चैत्रके तथा ।
लिखितं मन्दवारे च वाय्याकरणभूषणम् [31]॥

अयञ्च सर्वजिद्वत्सर: क्रि.श.1647 ( वि.सं.1704) भवति । अत: इयं मातृका उपलब्धासु मातृकासु अत्यन्तं प्राचीना ।

2. क्रमसंख्या - 67380 - वैयाकरणभूषणम् - [अ2]
कौण्डभट्टकृतम् - तालपत्रम् - 61 पत्राणि । तेलुगु-ग्रन्थलिपिद्वयम् । अपूर्णा - धात्वर्थनिर्णय: नास्ति लकारार्थनिर्णयेऽपि मध्ये आरभ्यते । तत: आन्तं ग्रन्थ: अस्ति । अतिप्राचीनामातृका । जीर्णा ।

3. क्रमसंख्या - 67388 - वैयाकरणभूषणम् - [अ3]
कौण्डभट्टकृतम् - तालपत्रम् - 17.5 अङ्गुलानां दैर्घ्यम् । प्रतिपुटं 6 पङ्क्तय: - तेलुगुलिपि: - अपूर्णा - शिथिला । आरम्भत: ग्रन्थ: लकारार्थनिर्णयपर्यन्तमेव वर्तते ।

---

[31] अत्र निर्दिष्ट: दिनाङ्क: 03-04-1647 (द्र. स्वामिकन्नु पिल्लै युफेमरीस्)

4. क्रमसंख्या - 70140 - वैयाकरणभूषणम् - [अ4]
कौण्डभट्टकृतम् - तालपत्रम् - 14.5 अङ्गुलानां दैर्घ्यम् - 151 पत्राणि । प्रतिपुटं 12 पङ्क्तयः - मलयाललिपिः । प्राचीनामातृका - किञ्चित् शिथिला - लेखनमपि किञ्चिदस्पष्टम् - सम्पूर्णा मातृका । कालः न निर्दिष्टः ।

b.सरस्वतीमहल् तञ्जावूरुतः प्राप्ताः मातृकाः चतस्रः -

1 . क्रमसंख्या – D 5837 - वैयाकरणभूषणम् - [त1]
बर्नेल् सूचीसंख्या - 881 - कर्गजमयी मातृका - देवनागरीलिपिः - 124 पत्राणि - प्रतिपुटं 18 पङ्क्तयः । ग्रन्थसंख्या 5500। पूर्णा - शुद्धा - समीचीना ।

2. क्रमसंख्या – D 5839 - वैयाकरणभूषणम् - धात्वर्थमात्रम् - [त2]
कर्गजमयी - 37 पत्राणि । ग्रन्थसंख्या - 1550 - देवनागरीलिपिः - अक्षर-दोषपूर्णा यद्यपि लेखनं सुन्दरम्।

3. क्रमसंख्या – D 5841 - वैयाकरणभूषणम् - [त3]
देवनागरीलिपिः - कर्गजमयी मातृका 130 पत्राणि । ग्रन्थसंख्या - 5000 - अपूर्णा - प्रथमपत्रस्य द्वितीयपुटमारभ्य चतुर्दशपत्रस्य प्रथमपुटपर्यन्तं नास्ति - अन्ते च 68 कारिकाव्याख्यानेन समाप्ता - अत्र मातृकायां तत्र तत्र परिष्करणं दृश्यते । तच्च लेखकेन कृतं वा, मातृकास्वामिना अध्ययनसमये कृतं वेति न ज्ञायते । परिष्करणं च तत्र तत्र साधु चेत् तत्र तत्र दुष्टमपि ।

4. क्रमसंख्या – D 5842 - वैयाकरणभूषणम् - अपूर्णा - [त4]
कर्गजमयी मातृका - ग्रन्थलिपिः - अत्यल्पा - धात्वर्थनिर्णयोऽपि पूर्णतया नास्ति ।

c.सरस्वतीभवनग्रन्थालयात् वारणासीतः प्राप्ते द्वे मातृके -

1 . क्रमसंख्या - 38624 - वैयाकरणभूषणम् - [वा1]
सम्पूर्णा - कर्गजमयी मातृका - 202 पत्राणि - प्रतिपत्रं 10 पङ्क्तयः । प्रतिपङ्क्ति 43 अक्षराणि - देवनागरीलिपिः - शुद्धा - स्पष्टा - प्राचीना - कालः वि.सं. 1751 ।

2 . क्रमसंख्या - 38874 - वैयाकरणभूषणम् - [वा2]
सम्पूर्णा - कर्गजमयी मातृका - 401 पत्राणि - प्रतिपुटं 7 पङ्क्तयः । प्रतिपङ्क्ति 24 अक्षराणि - देवनागरीलिपिः - कालः वि.सं 1848

d.भण्डार्कर प्राच्यशोधसंस्था (पुणे)तः प्राप्तमातृकाः तिस्रः -

1 . क्रमसंख्या - 231/1892-95 -वैयाकरणभूषणम् [भ1]
कर्गजमयी मातृका - पूर्णा - देवनागरी - 187 पत्राणि - प्रतिपुटं 12 पङ्क्तयः । प्रतिपङ्क्ति 40 अक्षराणि - कालः वि.सं 1847 ।

2 . क्रमसंख्या - 549/1887-91 -वैयाकरणभूषणम् [भ2]
कर्गजमयी मातृका - 229 पत्राणि - देवनागरीलिपिः- आरम्भान्तिमपत्राणि किञ्चित् शिथिलानि - सुन्दरं लेखनम् - पूर्णा । अत्र लघ्वी टिप्पणी च एतद्ग्रन्थस्वामिना लिखिता समुपलभ्यते या अत्यन्तमुपयुक्ता।

3 . क्रमसंख्या - 648/1891-95 -वैयाकरणभूषणम् [भ3]
कर्गजमयी मातृका - 126 पत्राणि - देवनागरीलिपिः- आरम्भे द्वादशपत्राणि न सन्ति - अन्यथा पूर्णा । "त्रत्वान्नतदर्थोऽत्र वर्णितः" इत्यारम्भः। पठितुं शक्यं लेखनम् । रामनामाङ्किता प्रतिपत्रम् ।

e.दक्कन कालेज् (पुणे)तः प्राप्ताः चतस्रः मातृकाः -

1 . क्रमसंख्या -154 - वैयाकरणभूषणम् [द1]
कर्गजमातृका - सम्पूर्णा - 292 पत्राणि - देवनागरी - लेखकद्वयेन प्रतिलिपीकृता - कालः शके 1700 - बिलम्बिसंवत्सरे - गोविन्ददासपुत्रेण लेखकद्वारा सूर्यपुरे लेखापितोऽयं ग्रन्थः श्री श्री श्री इति ग्रन्थान्तलेखः । प्रतिपत्रं 8 पङ्क्तयः - प्रतिपङ्क्ति 38 अक्षराणि

2 . क्रमसंख्या -3265 - वैयाकरणभूषणम् [द2]
कर्गजमातृका - सम्पूर्णा - 171 पत्राणि - रामनामाङ्किता प्रतिपत्रम् । स्पष्टा शुद्धा च । देवनागरीलिपिः - कालः संवत् 1830 - समैनाम वैशाखशुक्लपक्ष-एकादश्याः । शुभमस्तु - गोविन्दायनमः । शुभमस्तु ।

3 . क्रमसंख्या -3268 - वैयाकरणभूषणम् [द3]
कर्गजमातृका - 132 पत्राणि - आरम्भतः समासशक्तिनिर्णये "आख्यातं तद्धितकृतोः " इति श्लोकपर्यन्ता - देवनागरीलिपिः - पठितुं शक्यानि अक्षराणि - प्रतिपत्रं रामनामाङ्किता मातृका - कालः न ज्ञातः।

4 . क्रमसंख्या -7619 - वैयाकरणभूषणम् [द4]
कर्गजमातृका - सम्पूर्णा - 207 पत्राणि - 123 पत्रं नास्ति - अन्यथा पूर्णा - देवनागरी - शुद्धा - कालः - शक 1691। विरोधि आश्विन 15 गुरौ - करहाटक वासुदेवाचार्यस्य प्रतिकृतिः ।

f.जैनविद्यासंस्थानम् - श्रीमहावीरजीतः प्राप्ता मातृका –

1 . क्रमसंख्या --987 वैयाकरणभूषणम् [जै]
कर्गजमातृका – देवनागरी – पत्रसंख्या-72 -अत्यन्तमशुद्धा-विद्याविनोदेन प्रतिलिपीकृतेत्युल्लिखितम् -आदितः कारकार्थनिर्णयान्तः ग्रन्थः – कालः – वि.संवत् -1744 ; शा. 1608 ; प्र.फावदि2 बुधे

g.प्राच्यशोधसंस्था (oriental institute) बरोडातः प्राप्ता –

1 . क्रमसंख्या - 12540-वैयाकरणभूषणम् [ब1]
कर्गजमातृका - देवनागरी-स्पष्टा - शुद्धा-पत्रसंख्या – 55 - आदितः लकारार्थ-निर्णयान्तम् ।

h.मद्रासराजकीयप्राच्यहस्तलिखितग्रन्थालयतः (Govt. Oriental Manuscripts Library, (GOML) Madras) प्राप्ता –

1 . क्रमसंख्या -20404, मातृकाविवरणग्रन्थसंख्या-R . 16062
वैयाकरणभूषणम्- [म]
तालपत्रम् – ग्रन्थलिपिः – पत्रसंख्या – 73 - प्रतिपुटं 7-8 पङ्क्तयः, क्रिमिदष्टा समाप्तिर्नास्ति।

i. त्रिवेण्ड्रम् - प्राच्यहस्तलिखितग्रन्थालयतः (Oriental Manuscript Library, Trivandrum) प्राप्ताः षट् मातृकाः

1. क्रमसंख्या-9-वैयाकरणभूषणम्- [के1]
तालपत्रम् – पत्रसंख्या - 229, प्रतिपुटं 10 पङ्क्यः- प्रतिपङ्क्ति 60 अक्षराणि - समीचीना स्थितिः - आरम्भतः नास्ति - अपूर्णा।

2. क्रमसंख्या-113 - वैयाकरणभूषणम् [के2]
तालपत्रम् – पत्रसंख्या - 169, प्रतिपुटं 10 पङ्क्यः - प्रतिपङ्क्ति 52 अक्षराणि - आरम्भः मङ्गलश्लोकश्च धात्वर्थनिर्णयस्य वर्तते। अनन्तरं पुनः लकारार्थः अस्ति।

3. क्रमसंख्या – 2754 - वैयाकरणभूषणम् - [के3]
तालपत्रम् – ग्रन्थलिपिः - जीर्णा मातृका – पत्रसंख्या - 182, प्रतिपुटं 8 पङ्क्यः - प्रतिपङ्क्ति 70 अक्षराणि

4. क्रमसंख्या – 3495 - वैयाकरणभूषणम् [के4]
देवनागरी – कर्गजमातृका – स्पष्टाक्षरा – धात्वर्थमात्रम् – पत्रसंख्या - 35, प्रतिपुटं 9 पङ्क्यः - प्रतिपङ्क्ति 44 अक्षराणि

5. क्रमसंख्या – 5368 - वैयाकरणभूषणम् [के5]
तालपत्रम् – मलयालम् – समीचीना – सम्पूर्णप्राया – पत्रसंख्या - 194, प्रतिपुटं 10 पङ्क्यः - प्रतिपङ्क्ति 55 अक्षराणि

6. क्रमसंख्या – 13762 - वैयाकरणभूषणम् [के6]
तालपत्रम् – ग्रन्थलिपिः - शिथिला मातृका – अस्पष्टाक्षरा – पत्रसंख्या – 51, आरम्भतः नास्ति, प्रतिपुटं 8 पङ्क्यः - प्रतिपङ्क्ति 55 अक्षराणि

j. राजस्थानप्राच्यविद्याप्रतिष्ठान (जोधपूर) तः प्राप्राः तिस्रः मातृकाः –

1. क्रमसंख्या – 24049 – वैयाकरणभूषणम् [जो1]
अपूर्णा - नामार्थनिर्णये "समानवित्तिवेद्यत्वमिति चेन्न" इत्यारभ्य, भावप्रत्ययार्थनिर्णये "निर्विकल्पकं स्मरणं ततस्तत्र" इति पर्यन्तमस्ति। देवनागरी - पत्रसंख्या – 70, प्रतिपुटं 13 पङ्क्यः - प्रतिपङ्क्ति - 46 अक्षराणि – स्पष्टा

2. क्रमसंख्या – 33892 – वैयाकरणभूषणम् [जो2]
देवनागरी – पत्रसंख्या – 125 – कर्गजमयी – स्पष्टाक्षरा - प्रतिपुटं 14 पङ्क्यः-

प्रतिपङ्क्ति 50 अक्षराणि - धात्वर्थनिर्णये "अथ कोऽयं व्यापारः" इत्यारभ्यते। समाप्तिपर्यन्तमस्ति। आरम्भे एकं पत्रं नास्ति। अन्यथा पूर्णा - तत्र तत्र शिथिला

3. क्रमसंख्या – 40115 –वैयाकरणभूषणम् [जो3]
देवनागरी – अपूर्णा – कर्गज – मातृका – पत्रसंख्या -146 - प्रतिपुटं 10 पङ्क्तयः – प्रतिपङ्क्ति - 45 अक्षराणि - लकारार्थनिर्णये "अतिरिक्तकल्पने च" इत्यारभ्य समाप्तिपर्यन्तमस्ति – कालः – काशीप्रवर्तमानविकृतिसंवत्सरश्रावण-शुक्लत्रयोदश्यां समाप्तिमगादिदं वैयाकरणभूषणपुस्तं चेरणायुधग्रामस्थवेंकटाद्रि-भट्टात्मजफणिभट्टस्य। रामभद्रेन लिखितमिदं पुस्तकम्।

k. भारतीय इतिहास संशोधन मण्डल(पुणे)तः प्राप्ते द्वे –

1. क्रमसंख्या - 7/56 - वैयाकरणभूषणम् [भार1]
देवनागरी – पत्रसंख्या – 261 – कर्गजमातृका – देवनागरी – पूर्णा - तृतीयपत्रं नास्ति। प्रतिपुटं 7-8 पङ्क्तयः - प्रतिपङ्क्ति 48 अक्षराणि - कालः - शाके 1699 ज्येष्ठशुद्धपञ्चमीसोमवार

2. क्रमसंख्या - 50/36 – वैयाकरणभूषणम् [भार2]
देवनागरी – पत्रसंख्या – 79 - आदितः 87 पत्राणि न सन्ति। समासशक्ति-निर्णये "स्पष्टम्। तथा च परस्परान्वयरूपा व्यपेक्षैव सामर्थ्यम्" इत्यारभ्यते। समाप्तिपर्यन्तमस्ति। कालः – सं 1819 फाल्गुनवदीपरीवायां – अपूर्णा – कर्गजमयी - प्रतिपुटं 13 पङ्क्तयः - प्रतिपङ्क्ति 46 अक्षराणि। रामनामाङ्किता

उपयुक्तमातृकासङ्केतसूची -

| क्र.सं. | मातृकाः | सङ्केतः |
|---|---|---|
| 1 | अडयार्- 67378 | अ1 |
| 2 | अडयार्- 67380 | अ2 |
| 3 | अडयार्-67388 | अ3 |
| 4 | अडयार्-70140 | अ4 |
| 5 | सरस्वतीमहल् तञ्जावूरु - D5837 | त1 |

| | | |
|---|---|---|
| 6 | सरस्वतीमहल् तञ्जावूरु - D5839 | त2 |
| 7 | सरस्वतीमहल् तञ्जावूरु - D5841 | त3 |
| 8 | सरस्वतीमहल् तञ्जावूरु - D5842 | त4 |
| 9 | सरस्वतीभवन-वारणासी -38624 | वा1 |
| 10 | सरस्वतीभवन-वारणासी -38874 | वा2 |
| 11 | भण्डार्कर प्राच्यशोधसंस्था – पुणे -231/1892-95 | भ1 |
| 12 | भण्डार्कर प्राच्यशोधसंस्था – पुणे -549/1887-91 | भ2 |
| 13 | भण्डार्कर प्राच्यशोधसंस्था – पुणे -648/1891-95 | भ3 |
| 14 | दक्कन कालेज् – पुणे - 154 | द1 |
| 15 | दक्कन कालेज् – पुणे - 3265 | द2 |
| 16 | दक्कन कालेज् – पुणे – 3268 | द3 |
| 17 | दक्कन कालेज् – पुणे – 7619 | द4 |
| 18 | जैनविद्यासंस्थान् – श्रीमहावीरजी -987 | जै |
| 19 | प्राच्यशोधसंस्था– बरोडा-12540 | ब1 |
| 20 | राजकीयप्राच्यहस्तलिखितग्रन्थालयः(GOML)-मद्रास्-20404 | म |
| 21 | प्राच्यहस्तलिखितग्रन्थालयः – त्रिवेण्ड्रम्- 9 | के1 |
| 22 | प्राच्यहस्तलिखितग्रन्थालयः – त्रिवेण्ड्रम्- 113 | के2 |
| 23 | प्राच्यहस्तलिखितग्रन्थालयः – त्रिवेण्ड्रम्- 2754 | के3 |
| 24 | प्राच्यहस्तलिखितग्रन्थालयः – त्रिवेण्ड्रम्- 3495 | के4 |
| 25 | प्राच्यहस्तलिखितग्रन्थालयः – त्रिवेण्ड्रम् – 5368 | के5 |
| 26 | प्राच्यहस्तलिखितग्रन्थालयः – त्रिवेण्ड्रम्- 13762 | के6 |
| 27 | राजस्थानप्राच्यविद्याप्रतिष्ठान, जोधपूर – 24049 | जो1 |
| 28 | राजस्थानप्राच्यविद्याप्रतिष्ठान, जोधपूर – 33892 | जो2 |
| 29 | राजस्थानप्राच्यविद्याप्रतिष्ठान, जोधपूर – 40115 | जो3 |

| | | |
|---|---|---|
| 30 | भारतीय इतिहास संशोधन मण्डल- पुणे - 7/56 | भार1 |
| 31 | भारतीय इतिहास संशोधन मण्डल- पुणे - 50/36 | भार2 |
| 32 | क्रि.व. 1900 मध्ये प्रकाशितम् | 1900 |
| 33 | क्रि.व.1915 मध्ये प्रकाशितम् | 1915 |
| 34 | 1915 प्रकाशनोपयुक्तमातृका- त्रिवेण्ड्रम्(Tr) | त्रि |
| 35 | 1915 प्रकाशनोपयुक्तमातृका- दक्कन्कालेज्-पूणे (D) | द5 |
| 36 | 1915 प्रकाशनोपयुक्तमातृका- दक्कन्कालेज्-पूणे (D1) | द6 |
| 37 | 1915 प्रकाशनोपयुक्तमातृका- दक्कन्कालेज्-पूणे (D2) | द7 |
| 38 | 1915 प्रकाशनोपयुक्तमातृका- तञ्जावूरु- (T) | त5 |
| 39 | 1915 प्रकाशनोपयुक्तमातृका- जयपूर् (J) | ज1 |
| 40 | 1915 प्रकाशनोपयुक्तमातृका- जयपुर् (J1) | ज2 |
| 41 | 1915 प्रकाशनोपयुक्तमातृका- बरोडा (B) | ब2 |
| 42 | 1915 प्रकाशनोपयुक्तमातृका- बरोडा (B1) | ब3 |

अस्य प्रकाशनस्य वैशिष्ट्यम्

नितरां च मोमुदीति मे चेतः ग्रन्थस्यास्य प्रथमभागरूपेण धात्वाख्यातार्थ-सामान्यनिर्णयं प्रकाशनार्थं सज्जीकुर्वतः। यद्यपि अयं ग्रन्थः एतावत् पर्यन्तं चतुर्वारं प्रकाशितः। प्रथमं तावत् 1900 क्रि.वर्षे वाराणसीतः तत्र तदोपलब्धमातृकाद्वय-माधारीकृत्य प्रकाशितः। परन्त्वत्र पाठभेदाः नोट्टङ्किताः। अनन्तरं च मुम्बईतः 1915 क्रि.वर्षे श्रीकमलाशङ्करप्राणशङ्करत्रिवेदिनः सम्पादने आङ्ग्लटिप्पण्या सह अयं पुनः प्रकाशितः यश्च पञ्च मातृकाः आधारीकृत्य सम्पादितः। यत्र च पाठभेदाः अपि निर्दिष्टाः। परन्तु मूलमातृकानिर्धारणमकृत्वैव शुद्धः पाठः इति यः सम्पादकेन निर्णीतः स एव मूलग्रन्थरूपेण स्थापितः। अन्यः पुटटिप्पण्यां योजितः। अथ 1985 क्रि.वर्षे वाराणसीत

एव श्रीमनुदेवभट्टाचार्येण स्वीयरूपालीटिप्पण्या सहायं प्रकाशितः, मूलग्रन्थस्तु प्रायः वाराणस्यां प्रकाशितस्यैव प्रतिकृतिरूपः। ततः 1987 वर्षे विख्यातविदुषां विद्यानिवास-मिश्राणां सम्पादकत्वे पूर्वं कमलाशङ्करप्राणशङ्करत्रिवेदिभिः सम्पादितस्यैव आङ्ग्लटिप्पण्या सहितस्य प्रकाशनं जातम्। एवं चतुर्वारं प्रकाशितस्य पुनः प्रकाशने किं वैशिष्ट्यमिति स्यादेव जिज्ञासा।

अस्य वैशिष्ट्यं चेदम्। प्रायः इदानीं भारते उपलभ्यमानाः मातृकाः सर्वाः सङ्गृह्य मूलमातृकानिर्धारणपुरस्सरं पाठभेदप्रदर्शनपुरस्सरं च सम्पादितः सन् अयं ग्रन्थः विदुषां करकमलेषु समर्प्यते। अत्र च उपचत्वारिंशत् मातृकाः परिशीलिताः। भागशः उपलब्धा अपि मातृका न परित्यक्ता। तासां विवरणं पूर्वमेव प्रदत्तम्। अत्यन्तं प्राचीना मातृका सप्तदशशतकीया कौण्डभट्टसमयस्य अत्यन्तं निकटतमा मूलग्रन्थरूपेण गृहीता या च नैतावता कस्मिन्नपि प्रकाशने उपयुक्ता आसीत्। किञ्चैतन्मातृकापाठः प्रकाशितग्रन्थ-पाठात् भिद्यते, युक्ततरः सन्दर्भानुगुणश्च। प्रकाशितग्रन्थेभ्यः भिन्नाः अत्रत्याः मुख्याः पाठभेदाः स्थालीपुलाकन्यायेन ग्रन्थान्ते प्रथमेऽनुबन्धे प्रदर्शिताः।

अपि च नैतावता अस्य पूर्णा व्याख्या आसीत्। परन्त्विदानीमयं ग्रन्थः सुगृहीतनामधेयैः राष्ट्रपतिसम्मानितैः महामहोपाध्यायैः श्रीरामयतनशुक्लमहाभागैः विरचितया निरञ्जन्याख्यया टीकया प्राकाश्यं नीयते। न केवलमेतत्। अत्र प्रकाशाख्या काचित् टिप्पणी अपि आयोजिता, यत्र ग्रन्थान्तरोल्लेखानामाकरादिकं प्रदर्शितं, ग्रन्थे विमृष्टानां विविधानां मतानां तत्तद्ग्रन्थसमुल्लेखनपूर्वकं स्वरूपं निरूपितम्, तत्तत्प्रघट्टकानां प्रतिपाद्यो विषयः सरलया शैल्या विशदीकृतश्च।

### निरञ्जनीव्याख्यातृणां महामहोपाध्याय-ब्रह्मश्री रामयत्नशुक्लमहोदयानां परिचयः

अथात्र निरञ्जनीव्याख्यातुः श्रीरामयत्नमहोदयस्य परिचयः प्रस्तूयते – अधीतसकलशास्त्रो विदितवेदितव्यो महामहिमराष्ट्रपतिना सभाजितः अनेका-नेकपुरस्कारालङ्करणैः समलङ्कृतः आधुनिकपाणिनिः इत्याख्यया प्रख्यातयशाः महामहोपाध्यायः प्रो. रामयत्नशुक्लः 1932 तमे ईसवीये वर्षे 15 जनवरी दिनाङ्के उत्तर-प्रदेशस्य भदोहीजिलान्तर्गते महरछतुलसीत्याख्ये ग्रामे जनिमलभत। पण्डितरामनिरञ्जन-शुक्लस्य तथा च श्रीमत्याः मैनादेव्याः आत्मजोऽयं स्ववैदुष्येण "स जातो येन जातेन जातो वंशः समुन्नतिम्" इति सूक्त्या स्वस्य जातत्वं सार्थकीकुर्वन्नस्ति।

प्राचीनपरम्परामनुसृत्य अयं महानुभावः महनीयेभ्यो गुरुभ्यः डा. रामप्रसादत्रिपाठिमहोदयेभ्यः व्याकरणं न्यायं, श्रीरामाशयत्रिपाठिभ्यः व्याकरणमीमांसासांख्ययोगान् तथा इतरेभ्यः विद्वत्तल्लजेभ्यः गुरुभ्यः वेदान्तादीनि शास्त्राणि चाधिजगे।

अयं 1961 वर्षे नवम्बरमासे सन्यासिसंस्कृतमहाविद्यालयम् अध्यापकत्वेन प्रविश्य ततः चिरकालं यावत् संपूर्णानन्दसंस्कृतविश्वविद्यालये आचार्यत्वं निरुह्य लालबहुदूरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे 1994 जनवरीमासे पदवीविरमणपर्यन्तं स्वीयेनाध्यापनेन प्रायः पञ्चत्रिंशद्वर्षाणि छात्रान् तोषयामास। तदङ्गतयैव अयं छात्रकल्याणव्रती विविधेषु विश्वविद्यालयेषु विभागाध्यक्षसङ्कायप्रमुखदिप्रशासनपदानि कार्यपरिषत्सदस्यपुस्तकालयसमितिसदस्यप्रवेशसमितिसदस्यादिस्थानानि च अलमकार्षीत्। विद्यावाचस्पति-विद्यावारिध्यादि-उपाधिभाजः बहवः छात्राः एतन्मार्गदर्शनात् पाण्डितीवैभवोपेताः सम्पन्नाः। अस्य महती शिष्यपरम्परा वरीवर्ति, यस्यां वर्धिताः विविधसंस्थासु आचार्य-प्राचार्यविभागाध्यक्ष-प्राध्यापक-उपाचार्य-धर्मगुरु-इत्यादिषु स्थानेषु राराजन्ते। महानुभावोऽयं व्याकरणादिशास्त्रेषु बहून् विमर्शप्रधानान् शोधलेखान् विलिख्य प्राकाशयत्, येन वैयाकरणकुलमत्यन्तमुपकृतम्। अयं विविधासु विद्वद्गोष्ठीषु स्वीयया उपस्थित्या शोभां वर्धयाम्बभूव।

राष्ट्रपतिपुरस्कार-केशवपुरस्कार-वाचस्पत्यादिपुरस्कारैः सत्कृतः महामहोपाध्याय-अभिनव-पाणिनि-करपात्ररत्न-सरस्वतीपुत्रेत्याद्युच्चावचबिरुदभाक् अयं स्वीयया शारदोपासनया स्वां जनिं धन्यामकार्षीत्। एवमनवरतं वेदान्ते व्याकरणे च महत्त्वपूर्णान् ग्रन्थान् अन्तेवासिनः शिष्यान् अध्यापयन् महामहोपाध्यायः आचार्यः रामयत्नशुक्लपादः काशीस्थां प्राचीनां शास्त्रीयपरम्पराम् उज्जीवयन् गतेषु वर्षेषु संस्थापितायाः उत्तरप्रदेशनागकूपशास्त्रार्थसमितेः संस्थापकपदम् अलङ्कुर्वन्नस्ति। तथा च सुप्रसिद्धायाः काशीविद्वत्परिषदः अध्यक्ष-पदं विभूषयति। स्वस्य स्नेहपूर्णेन व्यवहारेण सर्वेषाम् अध्यापकच्छात्रादिसमूहानां समादरणीयः आचार्यः शुक्लः सर्वदा स्वस्थः सन् शास्त्रीयज्ञानं सततं विकिरतु इत्येतदर्थं भगवान् विश्वनाथः भगवती अन्नपूर्णा च संप्रार्थ्येतेतराम्।

कल्पते चैतत् महते संतोषाय यत् एतावन्निर्व्याख्यानं दुरूहं च वैयाकरणभूषणं पाण्डिच्चेरिस्थया फ्रेंच् संस्थया प्रेरितोऽयं महानुभावः स्वीयया निरञ्जन्याख्यया व्याख्यया

समलंकृत्य वैयाकरणकुलं बहूपकृतवानिति । तादृशस्य भूषणस्य प्रथमभागं लोकाय समर्पयन्तो वयं महान्तमानन्दमनुभवामः।

टिप्पण्याः समायोजनम्

अत्र प्रथमं धात्वाख्यातसामान्यार्थनिरूपणाख्यः भूषणग्रन्थः निरञ्जन्या सह समुपस्थापितः। सोऽपि भागद्वयेन विभक्तः।आदितः सप्तमश्लोकपर्यन्तः प्रथमभागः अवशिष्टश्च द्वितीयभागः। अनन्तरं च प्रकाशाख्या टिप्पणी योजिता। एतदर्थं भूषणग्रन्थः द्वान्वतिखण्डिकासु विभक्तः। तत्तत्खण्डिकाटिप्पणी तत्तत्खण्डिकासंख्यया पुटसंख्यया च योजिता।

पुटयोजनम्

अत्र किञ्चिदस्ति निवेदनीयम्। मूलग्रन्थस्य सम्पादनसन्दर्भे द्विविधाः पुट-टिप्पण्यः सन्ति। तत्रैकाः मातृकापाठभेदसूचकाः याश्च प्रतिपुटं समायोजिताः। अन्याश्च तत्तदुद्धरणानामाकरप्रदर्शकाः याश्च ग्रन्थस्य तत्तद्भागान्ते समायोजिताः। तत्र पाठभेद-प्रदर्शनपरटिप्पण्यः देवनागरीसंख्यया अन्याः रोमन्संख्यया च निर्दिष्टाः।

अन्यदप्यत्रावधेयम्। यत्र पुटे पाठभेदटिप्पणीनामाधिक्यं, यासां सर्वासां तस्मिन्नेव पुटे समञ्जनमशक्यं तासां प्रदर्शनं तदनन्तरपुटे कृतम्। अर्थात् मूलपाठः यस्मिन् पुटे तस्मिन् पुटे तत्संबद्धपाठभेदाः कदाचित् काश्चन न स्युः। तस्मिन् सन्दर्भे ताश्च समनन्तरे पुटे स्युः। तत्सन्दर्भे यदि तत्र सूचितया संख्यया तत्पाठभेदः तस्मिन् पुटे नोपलब्धः तर्हि समनन्तरपुटे तयैव संख्यया सूचितः तदीय इति विभावनीयम्।

धन्यवादार्पणम्

महदिदं मे भागधेयं यत् वैयाकरणनिकाये प्रख्यातस्य वैयाकरणसिद्धान्त-भूषणस्य पाठसंशोधनपूर्वकं श्रीरामयत्नशुक्लमहोदयविरचितव्याख्यया, प्रकाशाख्यया मदीयटिप्पण्या च सह सम्पादनाय अवसरो लब्धः। अथेदानीमिदं मदीयं कर्तव्यं यत् मामस्मिन् कर्मणि नियोजितवताम् पाण्डिच्चेरीस्थफ्रेञ्चसंस्थाधिकारिणां कृते कृतज्ञताविष्करणम्। अतस्ते अधिकारिणः सर्वे कृतज्ञतावाकैः अभिवन्द्यन्ते। विशिष्य च अस्याः संस्थायाः निदेशकाय Dr. P. Grard महोदयाय, कार्येऽस्मिन् मम नियोजने निदानभूताभ्यां प्रो. ग्रिमाल्, लक्ष्मीनरसिंहमहाभागाभ्यां च धन्यवादाः वितीर्यन्ते।

अथास्य कार्यस्य सम्पादने बहवः बहुधा उपकृतवन्तः। अतस्तेभ्यः सर्वेभ्यः कृतज्ञता आविष्करणीया अस्त्येव। तत्रादौ कार्तज्ञेन अभिनन्दनीयः प्रयागस्थगङ्गानाथ-झाराष्ट्रियसंस्कृतसंस्थानपरिसरे आचार्यपदमधिष्ठाय कार्यं कुर्वाणः मन्मित्रमणिः वनमाली-विश्वालमहोदयः। अनेन च महोदयेन भूषणस्य सम्पादनाय कश्चन प्रयत्नः आरब्धः आसीत्। तदा अनेन मातृकाणामन्वेषणं कृत्वा विशिष्य पुण्यपत्तने विविधसंस्थासु उपलभ्यमानानां मातृकाणामावलिः कृता। यदा मया अस्य सम्पर्कः कृतः तदा अनेन महानुभवेन सा मह्यं प्रेषिता। या च आवलिः मम महते उपकाराय आसीत्। अथात्र वर्धमानस्य उपायव्याख्याविषये मामुद्बोध्य, कार्ये प्रवृत्तं मां प्रोत्साहितवान् आचार्यः वि.एन्.झा महोदयः अवश्यम् मदीयेन कार्तज्ञेन सभाजनीयः। तथा न्यायमीमांसाशास्त्र-सन्देहेषु स्वविवरणेन मामनुगृहीतवान् आचार्य के.ई.देवनाथाचार्यः, यश्चेदानीं तिरुपतिस्थ-वेदविश्वविद्यालयस्य कुलपतिर्विराजते। अयं च महोदयः मयि अकारणं स्निह्यति। भाग्यादावयोः सतीर्थ्यत्वमप्यस्ति। अतोऽस्मै मदीयं कार्तज्ञं निवेद्यते। एवं 1900 वर्षे प्रकाशितस्य भूषणस्य प्रतिकृतिं मह्यं दत्त्वा उपकृतवान् काशीहिन्दूविश्वविद्यालये संस्कृत-विभागे आचार्यः डा. गोपबन्धुमिश्रमहोदयः। अतस्तस्मै अपि मदीयं कार्तज्ञं निवेद्यते। तथा विविधमातृकालयाध्यक्षाः अधिकारिणश्च यैः मातृकाप्रतिकृतयः प्रेषिताः, तेभ्योऽपि मदीया कृतज्ञता निवेद्यते।

अथात्र बहुधा उपकृतवन्तः मच्छात्राः। राजस्थानीयतालपत्रग्रन्थालयेभ्यः विविध-मातृकाणां प्रतिकृतीः महता प्रयासेन सम्पाद्य मह्यं प्रेषितवान् मच्छिष्यः ज.रा. राजस्थानसंस्कृतविश्वविद्यालये व्याकरणे सहायकाचार्यः डा.शशिकुमारशर्मा। केरलेभ्यः मातृकाणां प्रतिकृतीनां प्राप्तौ, तथा मलयाललिप्यां वर्तमानमातृकाणाम् मूलमातृकया च तोलने, पाठभेदाङ्कने च उपकृतवत्यौ मच्छिष्ये श्रीषीबा-शिवजे, ययोः प्रथमा चिन्मय-अन्ताराष्ट्रियशोधसंस्थाने उपनिदेशिका, द्वितीया च मुम्बय्यां गृहिणी सती यु.जि.सि. संशोधनसाहाय्यप्रक्रमे लब्धादरा संशोधनकार्ये निरता वर्तते। तथा दिनेशचन्द्रभट्टाचार्येण "वङ्गे नव्यन्यायचर्चा" इति वङ्गभाषायां लिखितात् न्यायशास्त्रेतिहासात् वर्धमानरामकृष्ण-भट्टाचार्ययोः चरितं सङ्गृह्य मामुपकृतवान् छात्रः राकेशदासः, यश्च कलकत्तानगरे रामकृष्णमठीयविश्वविद्यालये संस्कृतविभागे सहायाचार्योऽस्ति। तथा मच्छिष्य-प्रायः श्रीवेङ्कटनाथः मद्रपुरीयतालपत्रग्रन्थालयात् मातृकाप्रतिकृतिप्राप्तावुपकारं कृतवान्। विशिष्य प्राप्तानां प्रायः सर्वासां मातृकाणां तोलने उपकारं कृतवन्तौ मत्पुत्री

डा.कादम्बिनी यात्र परियोजनायां सहायिका, तथा मच्छिष्यः श्रीनिवासनारायणः, यश्चेदानीं मत्सविधे व्याकरणशास्त्रमधीते, तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे शोधकार्ये च रतः वैदिकविश्वविद्यालये शोधसहायकश्च वर्तते। अत एतेभ्यः सर्वेभ्यः मदीयानि वर्धापनानि कार्तज्ञपूर्णानि प्रकाश्यन्ते।

अथास्य प्रकाशनाय सन्नद्धाः श्रीसोमनाथसंस्कृतविश्वविद्यालयकुलपतयः मित्रमणयः आचार्याः कुटुम्बशास्त्रिवर्याः। अतः तेभ्योऽपि हार्दाः धन्यवादाः प्रकाश्यन्ते। तथैवतद्विश्वविद्यालयाधिकारिभ्योऽपि धन्यवादाःवितीर्यन्ते।

सामर्थ्याभावेऽपि अहम् एतादृशकार्याय सन्नद्ध इत्युक्ते, तत्र निदानं मम गुरवः नैकात्युत्तमपुरस्कारभाजः, सर्वतन्त्रस्वतन्त्राः राष्ट्रपतिसम्मानिताः, फ्रान्सदेशीयात्युत्तमोपाधिना विभूषिताः महामहोपाध्यायाः श्रीमन्तः रामानुजताताचार्यमहागुरवः। तेषां प्रोत्साहः, आशीर्वादश्च केवलमत्र निदानभूतौ। अतस्तेषां सन्निधौ कोटिशः साष्टाङ्गप्रणामाः निवेद्यन्ते। गच्छतः स्खलनमितिन्यायेनात्र कुत्रचित् मदीयाज्ञानानवधानादिवशात् दोषाः स्युः ये च सहृदयतज्ज्ञैः क्षाम्यन्त एव।

यदत्र सौष्ठवं किञ्चित् रामानुजगुरोर्हि तत्।<br>
यदत्रासौष्ठवं किञ्चित् तन्ममैव गुरोर्नहि ॥

इति विनिवेद्य पुनरेकवारं कर्मण्यस्मिन् मां प्रोत्साह्य, मह्यं साहाय्यं विधाय साक्षात् परम्परया चोपकृतवद्भ्यः सर्वेभ्यः कार्तज्ञं निवेद्य विरमामि विस्तरात्।

तिरुपतिः<br>
जय-माघ-पूर्णिमा-कुजवासरः।<br>
3.2.2015.

इत्थं<br>
विद्वज्जनविधेयः<br>
कं.वें.रामकृष्णमाचार्यः

# भूमिका

अनादिकालतो जीवः स्वधर्मसंस्कारेण तदनुरूपोच्चावचफलभोगपूर्वकम् उच्चावच-योनिषु भ्रमन् तावदात्यन्तिकीं शान्तिं न प्राप्नोति यावत् स श्रुत्यादिसिद्धमात्मज्ञानं नानुभवति। आत्मा कीदृशस्तज्ज्ञानं च कीदृशं तदुपायज्ञानं च किमाकारम् इत्येतत् सर्वं श्रुतिस्मृतिपुराणादिषु समुपबृंहितम्। अतः श्रुत्यादीनां ज्ञानम् आवश्यकम्। श्रुत्यादिज्ञानं तदवबोधश्च प्रथमतः व्याकरणाधीनं यतो हीदं व्याकरणं पदपदार्थस्वरूपतज्ज्ञानद्वारा तदुपकारकम् । व्याकरणस्य मोक्षादिपरत्वं वाक्यपदीयकारेण सम्यगुक्तम्—

तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥ (वा०प० १/१४)
इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥ (वा०प० १/१६) इत्यादि ।

व्याकरणं च नानाविधमिति सर्वे जानन्त्येव । किन्त्वद्यत्वे पाणिनीयं व्याकरणं बहु मन्यते। तत्र च पाणिनीयतन्त्रे त्रिविधा आयामा विद्यन्ते—(१) प्रक्रिया, (२) परिष्कारः तथा च (३) दर्शनमिति। तेषु विशिष्टतया व्याकणदर्शनमाश्रित्य वाक्यपदीयादयो ये केचन प्रसिद्धा ग्रन्था विद्यन्ते तेषु आचार्यकौण्डभट्टेन प्रणीतं बृहद्वैयाकणभूषणमिति, यस्य साररूपः ग्रन्थः सकलैः सुहृद्भिर्वैयाकरणैः विधिवदधीयते, प्रायशः सकलासु पारम्परिकासु पाठशालासु विश्वविद्यालयेषु च पाठ्यग्रन्थरूपेण पूर्णतोऽशतो वा पाठ्यते तथा च विमृश्यतेऽत एव मृग्यते चेति "न रत्नमन्विष्यति मृग्यते हि तद्"(कुमारसम्भवम्-५/४५) इति महाकविकालिदासस्योक्त्या स्वस्य ग्रन्थरत्नत्वं सुतरां साधयत्येव । धातूनां नाम्नां लकाराणां सुपां समासादीनां च मीमांसकाद्यभिमतं किन्तु वैयाकरणासम्मतम् अर्थं निराकर्तुम्, वाक्येऽर्थस्य प्राधान्याप्राधान्यविषये मीमांसकनैयायिकादीनां भ्रमं स्वमत-पोषणपुरःसरं दूरीकर्तुम्, अखण्डस्फोटात्मकं शब्दब्रह्मावगमयितुं च निखिलतन्त्र-विशारदेन आचार्यकौण्डभट्टेन "बृहद्वैयाकणभूषणम्" इत्येष ग्रन्थविशेषो व्यरचि। ततोऽपि सुकरतया शास्त्रव्युत्पत्त्युपलब्धये तेन "वैयाकरणभूषणसार" इत्याख्यो ग्रन्थः प्रणीतः। काले गते बृहद्वैयाकरणभूषणापेक्षया वैयाकरणभूषणसारस्याधिकपाठ्यता सर्वत्र समायात् । तस्य वैयाकरणभूषणसारस्याधिकाधिकाः टीका व्याख्या भाषान्तराणि च पुरःसरत्वम् अवाप्नुवन् । क्रमशः तन्मूलस्य तेनैव ग्रन्थकारेण प्रणीतस्य "बृहद्वैयाकणभूषणा"ख्यस्य ग्रन्थस्य संशोधितपाठयुतं रूपं, तस्य टीकाग्रन्थाः, सहजसुखबोधोद्देशियका व्याख्या, तद्भाषान्तरकरणं च दुर्लभतां समगच्छत्।

बृहद्वैयाकणभूषणसदृशानामेतादृशानां ग्रन्थानां पारम्परिकरीत्या व्याख्याया महत्त्वं विमृश्य वर्षेभ्यः प्राक् पण्डिचेरीस्थया "फ्रेंच इन्स्टिच्यूट" इत्याख्यया प्रसिद्धया संस्थया तेषां व्याख्यां सम्पादयितुं कालेन तत्तद्व्याख्या-सहितान् तान् ग्रन्थान् प्रकाशयितुं च काचिद् महत्त्वाकाङ्क्षिणी योजना प्रारब्धा ।तस्यां योजनायां "बृहद्वैयाकणभूषण"स्य व्याख्यां सम्पादयितुकामया तया संस्थया तदर्थम् अहं स्वीकृतः ।तदुद्दिश्य च पाण्डिचेरीतः कतिपया विद्वांसो वाराणसीम् आगताः । तेषु डा० ग्रिमालमहोदयाः, डा० आञ्जनेयशास्त्रिणः डा०लक्ष्मीनरसिंहशास्त्रिणश्चासन् ।तैः सर्वैः बृहद्वैयाकरणभूषणस्य व्याख्या मया लेखनीया, तच्च कार्यं पाण्डिचेर्याम् उपविश्य सम्पादनीयमिति प्रस्तावः प्रास्तूयत । आदौ तु एतादृशे विशिष्टाय कर्मणे "फ्रेंच इन्स्टिच्यूट" इत्याख्यया संस्थया मम स्वीकरणं विहितमिति तस्यै संस्थायै मम कृतज्ञता मया अभिव्यक्ता, किन्तु तद्व्याख्यालेखनकर्म केवलं वाराणस्यां स्थित्वैव कर्तुं शक्यते न त्वन्यत्र गत्वेति स्पष्टमभिहितं मया । ततस्तैः विद्वद्भिर्ममाभिमतम् अङ्गीकृत्यैतस्मिन् विषये करणीयतायाः सर्वविधाः पक्षाः परामृष्टाः । तदनु मया वाराणस्यामेव स्थित्वा ग्रन्थस्यास्य व्याख्या लिखिता, किञ्च प्रतिमासत्रयं लिखितो व्याख्यांशः पण्डिचेरीं प्रति प्रेषितः । क्रमशः कथितरीत्या "बृहद्वैयाकणभूषण"स्यास्य चतुर्दशानां प्रकरणानां व्याख्या लिखिता तत्र प्रेषिता च । न केवलमेतद् अपि तु मध्ये मध्ये पण्डिचेर्यां स्थितां संस्थाम् इमाम् अहं गतवान्, किञ्च विदुषां पुरतः तस्याः व्याख्यायाः अंशान् श्रावितवान् । कदाचिद् एतस्या व्याख्यायाः कतिपयांशविशेषेषु तत्रत्यानां विद्वद्वरेण्यानां पण्डिततताचार्यपादानां परामर्शो गृहीतः । बहुधा स्फोटविषयगताश्शङ्काः तैः साकम् ऊहिताः तासां समाधानानि च विमृष्टान्यासन् ।तत्तदवसरेषु डा०ग्रिमालमहोदयाः उपविश्य सर्वं श्रृण्वन्ति स्म । एवमेव बृहद्वैयाकणभूषणस्येयं टीका रचिता ।"बृहद्वैयाकणभूषणमि"त्येष ग्रन्थः आदौ फ्रेंच् भाषया ततश्चाङ्गलभाषया अनूद्य प्रकाशयिष्यते, तदनन्तरम् टीकयानया सह मूलो ग्रन्थः प्राकाश्यं नेष्यते इति काचिद् विशिष्टा योजनापि "फ्रेंच इन्स्टिट्यूट" संस्थया परिकल्पिता ।

कालोऽत्येति काममपि प्रतीक्षां विना।महान् कालखण्डो व्यतीतोऽप्येतस्मिन् प्रसङ्गे । २००५तमे ईस्वीये वर्षे मम मुक्तहृच्छल्यचिकित्सा जाता । एतस्माद् अस्वास्थ्याद् हेतोः ग्रन्थस्यास्य प्रकाशने ममौदासीन्यम् आगतम्। "फ्रेंच इन्स्टिच्यूट" संस्थापक्षतोऽपि प्रकाशनतत्परता नैव प्रकटिता । यदा कदा ग्रन्थस्यास्य लेखनप्रसङ्गस्य चर्चायां जातायां मम हितैषिणः प्रेयांसस्सर्वेऽपि एतस्य प्रकाशनस्य शीघ्रतायै स्वाभिमतं प्राकटयन् ।किन्तु

प्रकाशने प्रतिबन्धस्तु तदवस्थ एवासीत् । तस्मिन् काले दैववशाद् अस्माकं सौभाग्य-वशाच्च काशी हिन्दू विश्वविद्यालयस्य कलासङ्कायस्थे संस्कृतविभागे नियुक्तः प्राच्य-पाश्चात्त्योभयपाण्डित्यपरम्परापोषको विद्वान् परमोदारः श्रीगोपबन्धुमिश्रो मयि श्रद्धानः स्वस्य व्याकरणशास्त्रज्ञानपरिवर्द्धनप्रसङ्गे कतिपयान् वैयाकरणान् ग्रन्थान् मत्तोऽध्येतुकामो मम सम्पर्के आगतः। जिज्ञासुना तेन ममाध्ययनाध्यापनादिविषये विहितायां चर्चायाम् एतस्या बृहद्वैयाकरणभूषणटीकाया रचनाविषयकः प्रसङ्गोऽपि ज्ञातः । स्वकीयजीवनवृत्तस्य चर्चाप्रसङ्गे केन विधिना पण्डिचेरीसंस्थया सह मम सम्बन्धोऽभवद् एवं चास्याः टीकाया रचनाभवदित्येतत्सम्बद्धास्सकला अपि विषया मया विवृताः । तदनन्तरं कस्मिंश्चित् शैक्षणिकसंगोष्ठ्यवसरे हैदराबादविश्वविद्यालयं गतेन श्रीमता मिश्रेण तत्र समागतैः डा०ग्रिमालमहोदयैः, प्रो०रामकृष्णमाचार्यमहोदयैस्तथा च अस्माकं प्रियेषु व्याकरणशास्त्र-निष्णातेष्वन्यतमैः प्रख्यातयशोभिः प्रो० ललितकुमारत्रिपाठिभिः सह एतस्य ग्रन्थस्य प्रकाशन-विषये अनौपचारिकी चर्चा विहिता । तैस्सर्वैरपि विद्वद्भिः एतस्य प्रकाशने त्वराया आवश्यकतानुभूता तथैव स्वाभिमतं प्रकटितमपि।ततः प्रत्यागत्य श्रीमता मिश्रेण मत्पक्षतः पण्डिचेरीगतया "फ्रेंच इन्स्टिट्यूट"संस्थया सह पत्राचारो विहितः । तया संस्थयापि एतस्य प्रकाशने तत्परता प्रदर्शिता । तथा च पूर्वं सैद्धान्तिकतया भागद्वयेन प्रकाशयिष्यमाणस्य ग्रन्थस्यास्य प्रथमे भागे "धात्वर्थनिर्णय-लकारार्थनिर्णय-सुबर्थ-निर्णय-नामार्थनिर्णये"ति चतुर्णां निर्णयानां मद्विहितयानया टीकया सह मूलग्रन्थस्य सङ्गणकीयं टङ्कणं विधाय प्रायशः पर ६०० पृष्ठात्मिका मुद्रितसामग्री "प्रूफ"संशोधनार्थं तैः पाण्डिचेरीतोऽत्र प्रेषिता । श्रीमता मिश्रेण मदन्तिकम् उपविश्य तस्य मूलस्य टीकायाश्च प्रतिपृष्ठं पाठं कृत्वा कृत्वा मदीयपरामर्शेन मुद्रणगतम् आवश्यकीयं संशोधनं कृतम् । मध्ये मध्ये मूलपाठे उत टीकांशे परिवर्तनमथवा संस्करणमथवोभयम् अपेक्षितमित्यनुभूतं चेत्तदपि विहितमेव । महतः कालस्य व्यवधानकारणेन कदाचित् कस्मिंश्चित् स्थले संशोध्यांशे सन्देहे उत्पन्ने सति श्रीमता मिश्रेण तत्र कतमः प्रयोगः समीचीन इति विषये मया सह विमर्शोऽपि विहितः । तेन वर्षेभ्यः प्राक् प्रणीताया अस्याः टीकायाः एतस्मिन् संशोधनावसरे पुनरेकवारं तत्प्रणयनमिवानन्दो मयानुभूतोऽपि । तस्मिन् समये एतस्य टङ्कणसंशोधनादिविषये तत्र पाण्डिचेर्यां "फ्रेंच इन्स्टिट्यूट"संस्थया सन्नद्धैः विद्वद्वर्यैः डा०लक्ष्मीनरसिंहशास्त्रिमहोदयैस्तथा च प्रयागे गङ्गानाथझापरिसरे अध्यापयद्भिः प्रो०ललितकुमारत्रिपाठिभिः सह श्रीमान् मिश्रः निरन्तरं सम्पर्कं संसाधय-न्नासीत् । क्रमशः कतिपयानां पृष्ठानां संशोधनं विधाय

पाण्डिच्चेरीं प्रति प्रेषितम्, ततश्च संशोधनोत्तरम् आगतायाः सामग्र्याः द्वितीयं संशोधनं तयैव रीत्या विहितम् । एवं क्रमेणैतस्य प्रथमस्य भागस्य द्वितीयं संशोधनं संसाध्य प्रयागस्थेभ्यः प्रो०ललित-कुमारत्रिपाठिभ्यः प्रतिलिपिरेकाऽवलोकनार्थं प्रेषिता, मूलसंशोधिता लिपिस्तु पाण्डिचेरीं प्रति प्रेषितैव ।

"श्रेयांसि बहुविघ्नानी"ति सूक्तिं सार्थकीकुर्वन्निव प्रसङ्गेऽस्मिन् घटनाक्रमः पुनरेकवारं प्रासरत्। श्रीमान् गोपबन्धु मिश्रः आई.सी.सी.आर, भारतसर्वकारद्वारा नियुक्तो भूत्वा २०१०तः २०१२ इति वर्षद्वयं यावत् प्यारिस्-नगरस्थे सोर्बोन् नोवेल् विश्वविद्यालये संस्कृतविषयेऽतिथ्यध्यापकरूपेण प्रतिनियुक्तो भूत्वा तत्रागच्छदिति हेतोरत्र एतस्य ग्रन्थस्य प्रकाशनविषये पाण्डिचेरीस्थया संस्थया सह सम्पर्को न्यूनतां गतः, अतोऽस्य प्रकाशने पुनरपि शैथिल्यम् आपतितमासीत्। इदानीं पुनरेतस्मिन् प्रकाशनकर्मणि स्वनामधन्याः प्रसिद्धा वैयाकरणाः रामनन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिचराः प्रो०के.वी.रामकृष्णमाचार्याः "फ्रेंच इन्स्टिट्यूट"संस्थया एतदर्थं सन्नद्धाः सन्तः महान्तं श्रमं विधायैतस्य प्रकाशनकार्यं सम्पादयन्तीति महानेष प्रमोदस्य विषयः।

एतस्मिन्नवसरे ग्रन्थलेखनकर्मणि मां प्रोत्साहयन्तीं "फ्रेंच इन्स्टिट्यूट" संस्थां प्रत्यात्मनः कृतज्ञतां विज्ञापयामि । एतस्य प्रकाशनकर्मणि सुतरां तत्पराः प्रो०रामकृष्णमाचार्याः नितरां मया वर्धापनीयास्सन्ति । किं चास्मिन् संशोधनप्रकाशन-कर्मणि दत्तचित्ताः प्रो०ललितकुमारत्रिपाठी, प्रो० गोपबन्धु मिश्रस्तथा च मम परिवारस्था-स्सर्वेऽपि मया शुभाशीर्वादैः पुरस्क्रियन्ते । एष ग्रन्थः सुधीनां विदुषां श्रद्धावतां छात्राणां प्रियभाग् भूत्वा स्वोपयोगितया तान् सर्वान् प्रसादयत्विति कामयमानेन मया तदिष्टपूर्तये साम्बः सदाशिवो भूयो भूयः सम्प्रार्थ्यते ।

इत्थं,
निवेदयति
रामयत्नशुक्लः

# वैयाकरणसिद्धान्तभूषणम्

## विषयानुक्रमणिका

इति वैयाकरणभूषणे धात्वाख्यातसामान्यार्थयोर्निरूपणं समाप्तम्।

कौण्डभट्टकृतम्

# वैयाकरणसिद्धान्तभूषणम्

## निरञ्जनीव्याख्यायुतम्

## धात्वाख्यातसामान्यार्थनिर्णयः

### 1. मङ्गलाचरणम्

1. श्रीगणेशाय नमः[१]

श्रीलक्ष्मीरमणं[२] नौमि गौरीरमणरूपिणम्[३]।
स्फोटरूपं यतः सर्वं जगदेतद् विवर्तते॥ 1॥
अशेषफलदातारं भवाब्धितरणे तरिम्[४]।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम्[५]॥ 2॥
वाग्देवी यस्य जिह्वाग्रे नरीनर्ति[६] सदा मुदा[७]।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये॥ 3॥

---

[१] त2-श्रीवेदव्यासाय नमः। हरिः ओं , द3- "श्री गुरुभ्यो नमः श्री सरस्वत्यै नमः श्रीविश्वेश्वराय नमः, श्रीमोदादिपञ्चवक्रविनायकेभ्यो नमः ओम्" इत्यधिकं, भ1- "श्रीराधिकारमणो जयति श्रीगुरुचरण-कमलेभ्यो नमः" इत्यधिकं

के2-करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम्।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि॥
पूटल्लू रमेलेकत्ते वय्यासाद्रौ करणभूषणम् इतकाटकुरयुम्।

के2,अ4 -हरिः श्रीगणपतये नमः अविघ्नमस्तु – इति आरम्भे अधिकम्,

के4- नन्दहस्तमवलम्ब्य पाणिना मन्दमन्दमरविन्दलोचना।
सञ्चरन् कनककिङ्किणीरवं सन्ततं मम तनोतु मङ्गलम्॥ इति आरम्भे अधिकम्

[२] त3-चरणं

[३] त3-रूपिणां

[४] द1-तरीम्

[५] ज1-शेषरूपिणम्

[६] त3-नरिनर्ति

[७] वा2-दां संमुदा, जो2,भ2,द5,ज1-मुदा सदा

श्रीरामयत्नशुक्लमहोदयरचिता निरञ्जनी टीका

नमस्कृत्य शिवं साम्बं गणेशञ्च सरस्वतीम्।
संस्मृत्य गुरुवाक्यञ्च टीकां कुर्वे निरञ्जनीम् ॥१॥
नानान्यायुतो ग्रन्थो बृहद्भूषणनामकः ।
तस्य तत्त्वं परिक्लिष्टं दुर्बोधं विदुषामपि ॥२॥
मन्दस्य मे प्रवृत्तस्य क्लेशहं स्याद् गुरोर्वचः ।
यत्प्रभावादपुष्टस्य ज्ञानलेशो ममाभवत् ॥३॥
रामयत्नस्य धार्ष्ट्यं मे क्षमन्तां कृपया बुधाः ।
सत्त्वारब्धे तु तच्चित्ते तमोदोषः कथं भवेत् ॥४॥

वैयाकरणमते वाक्यस्फोटस्य मुख्यत्वेऽपि तदन्वाख्यानाय कल्पितप्रकृतिप्रत्ययार्थनिरूपणपूर्वकं वाक्यस्वरूपादिनिश्चायकं श्रीमद्भट्टोजिदीक्षितनिर्मितकारिकाव्याख्यानरूपं वैयाकरणभूषणग्रन्थमारभमाणः श्रीकौण्डभट्टः प्रारिप्सितग्रन्थसमाप्तिग्रन्थप्रचारादिप्रतिबन्धकप्रत्यूहापोहाय मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युरिति भाष्योक्तेः विघ्नध्वंसकामो मङ्गलमाचरेदित्यविगीतशिष्टाचारानुमितश्रुतेश्च भगवन्नमनरूपं मङ्गलमाचरन् शिष्यशिक्षायै व्याख्यातृश्रोतृणामनुषङ्गतो मङ्गलाय च निबध्नाति - श्रीलक्ष्मीरमणं नौमीति॥ श्रीयते या श्रीः लोकोत्तरा कान्तिः तया सहिता लक्ष्मीः, निखिलसम्पदधिष्ठात्री देवता शाकपार्थिवादित्वात्सहितेति पदस्य लोपः। वार्तिकेषु सर्वत्रापि आदिशब्दस्य प्रकारार्थत्वनिश्चयेन सहितशब्दस्यापि शाकपार्थिवादित्वमक्षतमिति बोध्यम्। अथवा - श्रीशब्दस्य श्रीमत्यां लक्षणया श्रीश्चासौ लक्ष्मीश्चेत्येव विग्रहः, श्रीमत्वस्य लक्ष्म्यां सत्त्वेन नायोग्यता। अथवा - श्रीलक्ष्म्यौ उभेऽपि रमणे विशेषणे। भगवतो द्वे भार्ये श्रीः लक्ष्मीश्च। तदुक्तम् - "श्रीश्च ते लक्ष्मीश्च पत्न्यौ"- इति। रमयति आनन्दयति इति रमणः। "एष एवानन्दयाति" इति श्रुतेः। नन्द्यादित्वात् कर्तरि ल्युट् प्रत्ययः। तथा च श्रीश्च लक्ष्मीश्चेति श्रीलक्ष्म्यौ तयो रमणस्तम्। अथवा रमतेऽस्मिन्निति अधिकरणार्थको ल्युट्, ततः श्रीलक्ष्मीपदेन कर्तृषष्ठ्यन्तेन समासः। विष्णुमित्यर्थः। ब्रह्मणो जगदुपादानत्वसम्भवाय श्रीलक्ष्मीतिविशेषणम् असङ्गस्य

परमात्मनः सृष्ट्यनुपपत्त्या, आरोपे सति निमित्तानुसरणं न हि निमित्तमस्तीत्यारोप इति नियमेन ब्रह्मणि एका मायात्मिका शक्तिः कल्प्यते, सा च सर्वशक्तिमती, अनिर्वाच्या त्रिगुणात्मिका च यया सम्बलितं ब्रह्म जगदुपादानमिति इति सूचनाय श्रीलक्ष्मीति विशेषणमिति भावः।

विष्णुनत्या श्रीकौण्डभट्टस्य वैष्णवत्वं स्यादिति व्याकरणस्य माहेश्वरत्वं कुप्येतेत्यत आह- गौरीरमणरूपिणमिति॥ गौरीरमणेत्यत्र पूर्ववद् व्युत्पत्तिः। गौरीरमणस्य रूपं गौरीरमणरूपम् , तदस्यास्तीति विग्रहे "अत इनिठना"(पा.5-2-115) विति सूत्रेण इन् प्रत्यये गौरीरमणरूपीति। गौरीरमणः शिवः, तदभिन्नमित्यर्थः।

ननु गौरीरमणस्य रूपमिव रूपं यस्येति बहुव्रीहिणैवोक्तार्थलाभे तत्पुरुषानन्तरं मत्वर्थीयोऽयुक्तः लाघवमूलकात् "न कर्मधारयात् मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर" इति न्यायात्। न्यायशरीरे कर्मधारयपदं वृत्तिमात्रोपलक्षणमिति चेत् - अत्रेदं बोध्यम्- "प्रत्ययस्थादि" (पा.7-3-44) ति सूत्रे नास्ति सुब् यस्मादिति बहुव्रीहिणा असुपः इत्येवेष्टार्थलाभे, न सुप् असुपिति नञ्तत्पुरुषानन्तरं मतुपि षष्ठ्या असुब्वत इति भाष्यप्रयोगेणोक्तन्यायस्यानित्यत्वज्ञापनेन क्वचिल्लाघवस्य परित्यागेन प्रकृतेऽदोषः। किञ्च न्यायशरीरे बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर इत्युक्तेर्यत्र बहुव्रीहिणा इष्टलाभस्तत्रैवोक्तन्यायप्रवृत्तिः। यत्र तु बहुव्रीहिणा न निर्वाहः तत्र वृत्तिद्वयमावश्यकमेव। यथा - कृष्णसर्पवद् वल्मीकमित्यत्र कृष्णः सर्पो यस्मिन्निति बहुव्रीहिणा सर्पविशेषवद् वल्मीकाप्रतीतेः, कृष्णसर्प इत्यत्र नित्यसमासानन्तरम् मतुप्। कृष्णः सर्पो यस्मिन्निति विग्रहे तु कृष्णगुणविशिष्टसर्पसम्बन्धिवल्मीकस्यैव प्रतीतिः स्यान्न तु सर्पविशेषविशिष्टस्य वल्मीकस्येति बहुव्रीहेरिष्टालाभात् न्यायाप्रवृत्तिः। प्रकृते च नित्याभेदप्रतीतिर्न बहुव्रीहिसाध्या, अपि तु मतुप्साध्यैव।

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्ति विवक्षायां भवन्ति मतुबादयः॥ इति।

नित्ययोगेऽपि मतुपो विधानात्।

ननु शिवविष्णोर्भेदस्य प्रसिद्धत्वेन विष्णोर्गौरीरमणरूपित्वानुपपत्तिरिति चेन्न, 'एकं सद् विप्राः बहुधा वदन्ति', इत्यादिश्रुत्या, ''शिवाय विष्णुरूपाय विष्णवे शिवरूपिणे'', इति स्मृतेश्च तयोरभेदसिद्धेः। तथा चोक्तम् –

''अन्तरं शिवविष्णोर्हि मनागपि न विद्यते।
शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः॥ '' इति।

एकस्यैव मायाशबलितस्य ब्रह्मणो मायाया गुणोत्कर्षापकर्षाभ्यां ब्रह्मविष्णु-रुद्रेति संज्ञायाः सिद्धत्वात्। तथा चोक्तम् – ''इन्द्रो मायाभिः पुरुरूप ईयते''। इन्द्रः परमात्मा। मायाभिः सत्त्वादिगुणैः। पुरुरूपः ब्रह्मादिरूपः।

नौमीति॥ नुधात्वर्थस्तु स्वनिष्ठापकर्षनिरूपितोत्कर्षविशिष्टज्ञानानुकूलो व्यापारः। ज्ञाने उत्कर्षवैशिष्ट्यं च स्वनिष्ठप्रकारतानिरूपकत्व, स्वप्रकारकज्ञानीय-विशेष्यताश्रयसमवेतत्वेत्युभयसम्बन्धेन। स्वपदेनोत्कर्षो ग्राह्यः। समन्वयश्च यथा – ''रामो वशिष्ठं नौति'' इत्यत्र नौमीत्यादिशब्दोच्चारणेन वशिष्ठस्य एतदपेक्षया अहमुत्कृष्ट इति ज्ञानं जायते। अस्मिन् ज्ञाने उत्कर्षः प्रकारः। प्रकारता उत्कर्ष- निष्ठा। तन्निरूपकत्वं पूर्वोक्ते ज्ञाने, ज्ञानस्य प्रकारतादिविषयतानिरूपकत्वात्। उत्कर्षप्रकारकं ज्ञानम् च एतदपेक्षयाहमुत्कृष्ट इत्युक्तं ज्ञानम्, तादृशज्ञानीय-विशेष्यता वशिष्ठे, तदाश्रयो वशिष्ठस्तत्र समवेतं एतदपेक्षयाहमुत्कृष्ट इति ज्ञानम् , समवेतत्वं च तादृशज्ञाने इति रीत्या, तादृशज्ञाने उभयसम्बन्धाभ्यां वैशिष्ट्यम्। तथा च वशिष्ठं नमति रामे, उत्कर्षप्रकारकज्ञानस्य सत्त्वेन न विष्णुमित्रं नमतीति प्रयोगः, ज्ञानस्य उभयसम्बन्धाभ्यां विशिष्टत्वाभावात्। इदानीं नतिप्रयोजकोत्कर्ष-गुणवत्वं व्यक्तीकरोति – स्फोटरूपमिति॥ यतः सर्वं स्फोटरूपमेतज्जगद् विवर्तते इत्यन्वयः।

यत इति ''जनिकर्तुः प्रकृति'' (पा.1-4-30) रिति सूत्रेण पञ्चमी। सूत्रे प्रकृतिपदं हेतुमात्रपरमिति वृत्तिकृन्मतं, पुत्रात्प्रमोदो जायतामिति तत्रोदाहरणात्। भाष्यानुसारिकैयटमते तु उपादानमात्रपरम्। प्रकृतिशब्दस्य उपादानमात्रे एव प्रसिद्धेः। वस्तुतस्तु ब्रह्मणोऽभिन्ननिमित्तोपादानत्वमेव, प्रकृत्यधिकरणे ''प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुरोधाद्'' (ब्र.सू. 1-4-23) इति सूत्रे ब्रह्म प्रकृतिः –'उपादान-

कारणम् , चान्निमित्तकारणम् , "स ईक्षाञ्चक्रे स प्राणमसृजत" (प्र.उ. 6-3-4) इत्यादि श्रुतेरपि ब्रह्मणो निमित्तत्वम्। तथा चोभयपक्षेऽपि, तेनैवात्र पञ्चमी यतः इति।

अभिन्ननिमित्तोपादानात् सर्वं ब्रह्मातिरिक्तम् । स्फोटरूपमिति ॥ इदं ब्रह्मणो जगतश्च विशेषणम्। आद्ये स्फुटत्यर्थो जगद्रूपो यस्मादसौ स्फोटः, स स्वरूपं यस्येति स्फोटरूपं - शब्दात्मकं ब्रह्मेत्यर्थः, द्वितीये स्फुटत्यर्थो बोधविषयी-भवत्यस्मात्स्फोटः शब्दो नामादिरूपः। रूप्यते ज्ञायतेऽसौ रूपोऽर्थः, स्फोटश्च रूपश्चानयोः समाहारः स्फोटरूपम्। वाच्यवाचकस्वरूपमित्यर्थः। "नामरूपे व्याकरवाणि" (छान्दो.6-3-2) इति श्रुतेः। नामरूपात्मकमेतत् पुरो दृश्यमानम् । जगत्॥ गच्छतीति जगत्- "वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च"(उणादि 2-241) ति निपातनात्साधु। अति प्रत्ययो जगादेशश्च। अनेन नामरूपात्मकस्य जगतो मिथ्यात्वं सूचितं भवति। विवर्तते। वेदान्तिमते रज्जूरगवत् अतात्त्विकरूपेण प्रतीयते। अतात्त्विकोऽन्यथाभावो विवर्त इति विवर्तलक्षणात्। तात्त्विकोऽन्यथा-भावः परिणामः दुग्धस्य यथा दधि। रज्जौ प्रतीयमानः सर्पः रज्जुयथार्थज्ञानात्प्राक् प्रतीयते, रज्जुज्ञानेन च निवर्तते। तथैव ब्रह्माज्ञानात् विवर्तमानमिदं जगत्, यावद् ब्रह्म न ज्ञायते तावदनुवर्तते। ब्रह्मज्ञाने सति निवर्तते।

व्याकरणशास्त्रस्येष्टदेवताप्रसादाय शिवं प्रार्थयते अशेषफलदातारमिति॥ अशेषाणि सर्वाणि लौकिकपारलौकिकानि फलानि प्रवृत्त्युद्देश्यानि तेषां दातारम्। न च "न लोकाव्यये"(पा.2-3-69) ति षष्ठी निषेधः, कारकषष्ठ्या एव तेन निषेधात्। प्रकृते च शेषषष्ठीसत्त्वात्। दातृत्वञ्च सङ्कल्पमात्रेणेष्टसाधकत्वम्। ननु भवजनित-क्लेशाहान्या, तज्जनितदुःखनिवृत्तिरूपं फलमवशिष्टमित्यशेषेति विशेषणानुपपत्ति-श्चेदाह- भवाब्धीति॥ भव एव अब्धिरिति रूपकम्। कामादिषड्वर्गग्राहसङ्कुलत्वात् भवे अब्धित्वारोपः। ततस्तरणे पारगमने, पारगमनमपवर्गप्राप्तिरेव। यद्वा भवाब्धेस्तरणं तन्निवृत्तिरेव। तरति अनया तरिः; वृत्त्यारूढश्चिदात्मा। वेदान्ते ब्रह्माकारा वृत्तिरेव अविद्यायाः तत्प्रयुक्तसंसारस्य च विच्छेदिका।

शेषाशेषेति। अशेषो निखिलो योऽर्थः सः अशेषार्थः, शेषस्य पतञ्जलेर्योऽशेषार्थस्तस्य लाभाय यथार्थज्ञानाय। शेषभूषणमिति। शेषो भूषण-

मलङ्कारो वलयतया यस्येति शिवपक्षीया व्युत्पत्तिः, यद्वा शेषं भूषयति शय्यात्वेनेति शेषभूषणो विष्णुः। तं प्रार्थये स्वाभीष्टदायकत्वेन प्रवर्तये।

ब्रह्मणोऽसङ्गत्वेनेष्टफलसाधकत्वानुपपत्त्या शक्तिविशिष्टस्य ब्रह्मणः सर्वार्थसाधकत्वसम्भावनया वाग्देवीस्मरणपूर्वकं पितृव्यभक्तिं प्रकटयति- वाग्देवी यस्येत्यादि॥ यस्य जिह्वाग्रे वाग्देवी नरीनर्ति। प्राकृतध्वनेरेव स्फोटव्यञ्जकत्वादिदमाह। वस्तुतो वाग्देव्याः व्यापकत्वेन जिह्वाग्रे इत्युक्तिस्तु अवच्छेदकत्वार्थकविषयसप्तमीमादायोपपाद्या। वाग्देव्यानर्तनस्य कादाचित्कत्वे यथासमयं विषयोपस्थापनं न स्यादत आह सदेति॥ ननु रुष्टा न सन्निधिं प्राप्नुयादित्यत आह- मुदा॥ प्रसन्नतया। तत्र हेतुस्तु उपासनैव। एवम्भूतं पितृव्यम् - पितृभ्रातरं भट्टोजिदीक्षितं सिद्धये विद्याप्रकाशाय नौमीत्यर्थः। अनेन ग्रन्थकारस्य विद्वत्कुलप्रसूतत्वं ध्वन्यते।

## 2. प्रतिज्ञा

पाणिन्यादिमुनीन् प्रणम्य पितरं रङ्गोजिभट्टाभिधं
द्वैतध्वान्तनिवारणादि[१]फलिकां पुंभाववाग्देवताम्[२]।
ढुण्ढिं[३] गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये[४]॥ 4॥
नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम्[५]।
श्रीकोण्डभट्टः[६] कुर्वेऽहं[७] वैयाकरणभूषणम्॥ 5॥

---

आचार्यदेवो भव पितृदेवो भवेत्यनुशासनमनुवर्तमानः श्रीकौण्डभट्टः पाणिन्यादिमुनीन् पितरञ्च प्रसादयति – पाणिन्यादिमुनीनित्यादिना॥

---

[१] त4,के2,अ4-निवारणैक
[२] म-वाक् देवताम्
[३] त1,त5,के2,अ4-रूढिं
[४] 1900-दूषयेय
[५] अ1-बृहस्पतिं
[६] द1,जो2,त4,भ2,द5 ,ज1,त2-कौण्डभट्टः, अ1,अ3,त1,त5,म-कोण्डुभट्टः
[७] ब2-कुरुते

पाणिनिरादिर्येषां ते पाणिन्यादयः ते च ते मुनयस्तान् प्रणम्य, रङ्गोजिभट्टोऽभिधा यस्य तन्नामानं पितरं च प्रणम्य। पितरं विशिनष्टि – द्वैतध्वान्तेत्यादिना॥ द्वाभ्यां नामरूपाभ्यामितं ज्ञातं द्वीतं प्रपञ्चः, द्वीतमेव द्वैतं स्वार्थिकोऽण्। यद्वा द्वाभ्यामनुयोगिप्रतियोगिभ्यां इतं ज्ञातं द्वीतं भेदः, तत्र भवं द्वैतं संसारः। अथवा द्वयोर्भावो द्विता भेदः तत्र भवं द्वैतम्। यद्वा द्वयोर्विरुद्धयोर्धर्मयोरितं द्वीतं संशयात्मकं ज्ञानं तदेव ध्वान्तं तमः तस्य निवारणादि फलं यस्याः सा। आदिपदेन मोक्षो ग्राह्यः। निवारणस्याभावरूपतया प्रयोजनत्वानुपपत्तौ आदिपदोपादानम्। मोक्षस्य आनन्दात्मकात्मरूपत्वेन प्रयोजनसिद्धिः। तथा चोक्तम् –"निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः" इति। मोहस्य निवृत्तिर्ज्ञातत्वेनोपलक्षित आत्मैवेत्यर्थः। आत्मनः सदा विद्यमानत्वेन मोक्षस्य सार्वदिकत्वापत्तिरित्यतः आह –ज्ञातत्वोपलक्षितेति। ज्ञातत्वोपलक्षितं न सार्वदिकम्, किन्तु वृत्तिदशायामेवेत्यदोषः। जीवस्याविद्यावशगत्वेन द्वैतनिवारकत्वानुपपत्तिरतः पितुः वाग्देवतावतारतया तस्य तत्साधकत्वं प्रसाधयति – पुम्भावेत्यादिना॥ पुंभावो यस्याः सा पुम्भावा सा चासौ वाग्देवतेति कर्मधारयः, तत्पुरुषस्य परलिङ्गतया पितृविशेषणत्वेऽपि न स्वलिङ्गत्यागः। अथवा पुंसो भावः पुंभावः स अस्या अस्तीति अर्शआद्यजन्तः। तथा च पुंशरीरधारिणी सरस्वती एव रङ्गोजिभट्ट इति भावः। तादृशं पितरं प्रणम्येति सम्बन्धः। "सर्वे विघ्नाः शमं यान्ति गणेशस्तव पाठत" इत्युक्त्या ग्रन्थसमाप्त्यादिप्रतिबन्धकदुरितनिर्वहणाय विघ्नेश्वरमपि न विस्मरति – ढुण्ढिमिति॥ ढुण्ढति अन्विष्यति विघ्नान् विनाशयितुमिति ढुण्ढिर्गणेशः, तम् प्रणम्येति शेषः।

सत्सु बहुषु प्राचीनग्रन्थेषु प्रकृतग्रन्थानुपयोग इति शङ्कां प्रत्याह – गौतमजैमिनीयेत्यादि॥ गोतमो ब्रह्मपुत्रस्तस्य गोत्रापत्यं गौतमः न्यायसूत्ररचयिता। जैमिनिः पूर्वमीमांसासूत्रप्रणेता व्यासशिष्यः। तयोरिमानि गौतमजैमिनीयानि यानि वचनानि न्यायमीमांसासूत्ररूपाणि। तेषां व्याख्यातारः वात्स्यायनशबरस्वामि प्रभृतयः। तैर्दूषितान्। एतेन मूलाचार्याः व्याकरणसिद्धान्तस्यैव मन्तार इति सूचितम्। व्याकरणसिद्धान्तान् उपपत्तिभिरुपपादकयुक्तिभिः प्रकटये अनावृत्तान् कुर्वे, तेषां वचो दूषये बाधकयुक्तिभिः निराकुर्वे।

एतेन वैयाकरणसिद्धान्ता विषयाः तज्ज्ञानं प्रयोजनम्, तज्जिज्ञासुरधिकारी प्रतिपाद्यपाकभावादिरूपः सम्बन्धश्च, इत्यनुबन्धचतुष्टयं सूचितं भवति। पूर्वं नमस्कार्यकर्मकनतिकर्मणि तेन जनिष्यमाणेष्टाप्तिप्रतिबन्धाविद्यापोहाय कृतमपि ढुण्ढिनमनरूपं मङ्गलं मङ्गलदाढ्याय पुनरपि स्वातन्त्र्येण गणेशादिनमनरूपं मङ्गलमारचयति - नत्वा गणेशपादाब्जमिति॥ गणानां शिवगणानां प्रमथादीनामीशः, स्वामी यद्वा गणानां विघ्नजातानाम् ईं लक्ष्मीं श्यति तनूकरोतीति गणेशः, तस्य पादौ एव अब्जं तत् । गृणात्युपदिशति आत्मकल्याणमिति गुरुः, "कृग्रोरुच्चे" (उणादि 1-24) ति उप्रत्ययः, ऋकारस्योत्त्वञ्च तं। सरः अमृतसरो यस्या अस्तीति सरस्वती, तां च नत्वा अहं श्रीकोण्डभट्टः वैयाकरणभूषणं कुर्वे। न च

आत्मनाम गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥

इति स्मृतिविरोधेन स्वनामोच्चारणमनुचितम्, न च श्रेयस्कामस्यैव स्वनामोच्चारणं दोषकृन्न तु उदासीनस्येति न दोष इति वाच्यम्, निषेधाश्च वलीयांस इति न्यायेन निषेधस्य सर्वविषयकत्वात् श्रेयसि केन तृप्यत इत्यनुभवसिद्धन्यायेन सर्वस्यापि श्रेयस्कामत्वादिति वाच्यम्। कूपखानकन्यायेन स्वनामोच्चारणजन्यदुरितस्य मङ्गलजन्यपुण्येनापनोदनात्।

ननु "समाप्तिकामो मङ्गलमाचरेत्" इत्यादिश्रुत्या समाप्तिं प्रत्येव मङ्गलस्य हेतुत्वसिद्धेः उक्तदुरितनाशं प्रत्यहेतुत्वमिति चेन्न। "रामो द्विर्नाभिभाषते, गोनर्दीयस्त्वाहे"ति शिष्टैः कृतस्य स्वनामोच्चारणस्य दर्शनेन स्वकीर्त्यनुवृत्तये प्रतिज्ञाद्यतिरिक्तत्वेनोक्तस्मृतौ सङ्कोचेन चादोषादिति।"असौ नामाहमस्मीति स्वनाम परिकीर्तयेदि"ति मनूक्तेरभिवादे च नामोच्चारणस्य प्रत्यवायाजनकत्वाच्च। भूष्यतेऽनेनेति भूषणम्, करणे ल्युट्। वैयाकरणानां भूषणम् वैयाकरणभूषणम्। अत्र "कर्मणि चे"(पा. 2-2-14) त्यनेन षष्ठीसमासनिषेधो न, तस्य "उभयप्राप्तौ" (पा. 2-3-66) इत्यनेन विहितकर्मषष्ठीस्थले एव प्रवृत्तेः, 'उभयप्राप्तौ' (पा. 2-3-66) इत्यस्य च कर्तृकर्मोभयवाचकप्रयोगे प्रवृत्या प्रकृते उभयोः प्रयोगाभावेनाप्रवृत्तेः "कर्तृकर्मणोः कृती"(पा.2-3-65) त्यनेनैवात्र षष्ठी बोध्या। यद्वा शेषषष्ठ्या समासः।

3. प्रारिप्सित[१]प्रतिबन्धकव्यूहो[२]पशमनाय[३] विरचितं श्रीपतञ्जलिस्मरणरूपं[४] मङ्गलं[५] शिष्यशिक्षार्थं निबध्नन्[६] चिकीर्षितं प्रतिजानीते-

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः।
तत्र निर्णीत[७] एवार्थः संक्षेपेणेह कथ्यते॥ 1॥[८]

देवान्तरं[९] त्यक्त्वा फणिन एव स्मरणं तु तस्य प्रकृतशास्त्रनिर्मात्रभ्यर्हितत्वेनेष्टतर[१०] त्वादित्याहुः। उद्धृत इत्यत्रास्माभिरिति शेषः। "भाष्याब्धेः शब्दकौस्तुभ उद्धृतः" इत्युपादानं[११] च तत्रत्यकथनस्याधुनिककल्पितत्वेन पाणिनीयानामश्रद्धेयत्वव्युदासाय[१२]। तस्याश्रद्धेयत्वे[१३] च[१४] तन्मूलकत्वादेतस्याप्य-श्रद्धेयत्वं[१५] स्यादिति भावः। तत्र[१६] निर्णीत[१७] इत्युपादानं[१८] चेतोऽप्यधिक[१९] विजिज्ञासुभि[१] रस्मत्कृता-[२] च्छब्दकौस्तुभादवधेयमिति[३] ध्वनयितुम्।

---

[१] त1,त3,द3-प्रारीप्सित

[२] त4,द5,के2,भ2,ज1,म-प्रत्यूह,भ1,द7,- "व्यूह" नास्ति, अ4- प्रत्यूहव्यूहो

[३] त2-व्यूहशमनाय, द1-व्यूहोपशमनार्थं,

[४] त2-श्रीपतञ्जलिस्वरूपं

[५] अ3- "मङ्गलं" नास्ति

[६] अ3-निबन्धन्, के2,अ4-निबद्ध्नन्,द3-निबन्ध्नन्

[७] त1,त5-वर्णित

[८] म,अ4-"इति" अधिकम्

[९] भार1,त1,के2,अ4,1900,1915,द2,भ2,म-देवतान्तरं

[१०] अ3-इष्टत्वादिति, ब1,भार1,1900,भ1,द7,ब3,म-तम, के2,अ4- निर्मातृभ्योऽभ्यर्हितत्वेनेष्टतर

[११] त1-इत्युपपादनं,के2-इत्याद्युपादानं

[१२] के2-पाणिनीयाश्रद्धेयत्वपर्युदासाय,त2-पाणिनीयाश्रद्धेयत्वव्युदासनाय,अ4-पाणिनीयत्वाश्श्रद्धेयत्वपर्यु-दासाय

[१३] त1-तस्या अश्रद्धेयत्वे, अ1-पाणिनीयानामश्रद्धेयत्वे

[१४] त2--"च" नास्ति

[१५] जो2-तन्मूलकत्वात्तस्याप्यश्रद्धेयत्वं, त5-तन्मूलकत्वादस्याप्यश्रद्धेयत्वं, अ3,त1-एतस्या अप्यश्रद्धे-यत्वं, जै,ब1-"अपि" नास्ति (अ3 मध्ये "तस्याश्रद्धेयत्वे च तन्मूलकत्वात्" नास्ति)

[१६] अ1- "तत्र" नास्ति

[१७] त1,त5-वर्णित

[१८] भार1,1900,1915,म,अ4-इत्याद्युपादानं

[१९] त4-अधिकं

प्रारब्धुमिष्टं प्रारिप्सितम्। प्राङ्पूर्वकाद् रभधातोः सनि द्वित्वे "अत्र लोपोऽभ्यासस्ये"(पा.7-4-58)ति अभ्यासलोपे प्रारिप्स इति। अस्मात् कर्मणि क्तः। तस्य प्रतिबन्धकम्।

ननु अत्र कस्य प्रतिबन्धकमुच्यते प्रारम्भस्य, इच्छायाः, विषयस्य वा, प्रारिप्सितपदेन एषामेवोपस्थानात्। नाद्यः, तस्यावच्छेदकतया उपस्थितस्य प्रतिबन्धकेन साक्षात्संबन्धाभावात्। न द्वितीयः, तत्राप्युक्तदोषात्। नापि तृतीयः, विषयस्य स्वरूपतः प्रतिबध्यत्वाभावात् इति चेन्न, विशिष्टविषयस्य, लक्षणया समाप्तिविशिष्टस्य वान्वयेऽदोषात्। प्रारम्भेच्छायाः प्रतिबन्धेऽपि इष्टसिद्धेः, तत्प्रतिबन्धकोच्छेदस्येच्छाविषयत्वेन तस्या अपि अन्वये बाधायोगाच्च। तस्य प्रतिबन्धकस्य व्यूहः, समूहः, प्रतिबन्धकस्य दुरितरूपस्य मानसत्त्वेन बहिरिन्द्रियाविषयत्वेनानेकविघ्नसम्भावनया व्यूहेति। तस्योपशमः समुच्छेदस्तस्मै। विरचितं श्रद्धातिशयप्रयोज्यचित्तवृत्तिरूपं मङ्गलम्। मङ्गनं मङ्गः, गत्यर्थकमगि धातोर्घञ्। गतिश्चेह प्राप्तिरूपा, प्राप्तिश्च समाप्तिरूपा विघ्नध्वंसप्राप्तिरूपा वा, तं लाति आदत्ते प्रार्थयितारं प्रापयतीत्यर्थे मङ्गोपपदात् लाधातोः "आतोऽनुपसर्गे क" (पा. 3-2-3) इति कप्रत्यये मङ्गलपदं निष्पद्यते। मङ्गलम् विघ्नध्वंसम्प्रति हेतुरिति ग्रन्थकृतोऽभिमतमिति व्यूहोपशमायेत्युक्त्या प्रतीयते। एतन्मते ग्रन्थसमाप्तिस्तु बुद्धिप्रतिभादिद्वारा जायते। केचित्तु मङ्गलं समाप्तिं प्रति कारणम् , विघ्नध्वंसस्तु द्वारम्। द्वारत्वं हि तज्जन्यत्वे सति तज्जन्यजनकत्वरूपम्। तथाहि विघ्नध्वंसे हि मङ्गलजन्यत्वं मङ्गलजन्यसमाप्तिजनकत्वं च वर्ततेऽतस्तस्य द्वारत्वमक्षतम्। स्मरणरूपमिति॥ ननु आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमिति शिष्टोक्त्या स्मरणस्य मङ्गलत्वानुपपत्तिरिति चेन्न। स्मरणस्य मङ्गलत्वाभावेऽपि वस्तुनिर्देशात्मकमङ्गलेन रूपितत्वात् । अत एव स्मरणरूपमित्युक्तम्। स्मरणम् रूप्यते येनेति व्युत्पत्तिः। तथा च वस्तुनिर्देशात्मकमङ्गलेन वस्तुनः स्मरणं जायत इत्यदोषः। यद्वा वस्तुनिर्देशपदं मङ्गलरूपवस्तुज्ञानपरम् , स्मरणस्यापि तादृशज्ञानरूपत्वेन

---

[1] अ1,भार1,द1,ब1,1900,द3,भ1,भ2,1915-जिज्ञासुभिः

[2] द1-"कृतात्" नास्ति,के2,अ4-कृतशब्दकौस्तुभा---

[3] त2-दवसेयमिति, अ4-शब्दकौस्तुभादाववधेय

मङ्गलत्वोपपत्तिः। अथवा मङ्गलस्य त्रैविध्यमेवेति नियमाभावः त्रिविधभिन्नस्यापि सम्भवात्। तथा च किं नाम मङ्गलमिति जिज्ञासायाम् विघ्नभिन्नत्वेसति विघ्नध्वंस-प्रतिबन्धकाभावभिन्नत्वे सति प्रारिप्सितग्रन्थविघ्नध्वंसासाधारणकारणत्वम्। विघ्नेऽतिव्याप्तिवारणाय प्रथमं सत्यन्तम् । विघ्नध्वंसप्रतिबन्धकाभावेऽतिव्याप्ति-वारणाय द्वितीयं सत्यन्तम् ।कारीरीयागेऽतिव्याप्तिवारणाय प्रारिप्सितेति। ईश्वरादौ साधारणकारणेऽतिव्याप्तिवारणाय असाधारणेति। कार्यमात्रम्प्रति यत्कारणम् तत्साधारणं कारणम् ।ईश्वरादेः सर्वं कार्यं प्रति कारणत्वात् साधारणकारणत्वम्। कार्यविशेषं प्रति घटादिविशेषं प्रति यत्कारणं तदसाधारणम्। यथा दण्डादि। आशीर्वादनमस्कारवस्तुनिर्देशान्यतमत्वं समाप्तिप्रतिबन्धकीभूतदुरितविशेषध्वंस-हेतुत्वं वा मङ्गलत्वम्। शिष्यशिक्षायै इति॥ मानसिकमङ्गलस्य स्वभिन्नव्यक्ति-दुर्बोधतया मङ्गलकर्तव्यत्वशिक्षा, शिष्या अपि ग्रन्थरचनारम्भे एवं मङ्गलं कुर्युरित्यात्मिका न सम्भवेदतस्तादृशशिक्षाप्रयोजकं मानसिकमङ्गलानुकूलं वाक्यमारचितमिति भावः। निबध्नन् ग्रन्थघटकीकुर्वन् , कर्तुमिच्छाविषयीभूतं प्रतिजानीते – कर्तव्यत्व-प्रकारकज्ञानजन्येच्छाबोधकं वाक्यमुच्चारयति फणिभाषितेत्यादिना॥ फणिना पतञ्जलिना भाषितं यद्भाष्यमिति विग्रहः।

भाष्यलक्षणं यथा-

सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः। इति।

भाष्यमेवाब्धिरिति रूपकम्। ततः। कुं भूमिं स्तुभ्नाति कुस्तुभो विष्णुः समुद्रो वा, तस्यायं तत्र भवो वा कौस्तुभः महामणिः। शब्द एव कौस्तुभः शब्दकौस्तुभः। यथा कौस्तुभो मणिरर्थप्रकाशकस्तथा शब्दकौस्तुभग्रन्थोऽपि व्याकरणार्थप्रतिपादकः इति ध्वन्यते। उद्धृतः भाष्यप्रतिपाद्यविषयान् बुद्ध्या सङ्गृह्य तत्प्रतिपादकतया निर्मितः।

ननु "सर्वे विघ्नाः शमं यान्ति गणेशस्तव पाठतः" इत्याद्युक्त्या श्रीगणेशस्मरणस्य तदितरदेवस्य वा स्मरणं विहाय श्रीफणिस्मरणमनुचितमित्यत आह - देवान्तरं त्यक्त्वेति॥ अन्यो देवः देवान्तरम्। त्यक्त्वा स्मृत्यविषयीकृत्य। फणिनः पतञ्जलेः स्मरणं कर्तव्यतां नीतम् अभ्यर्हितत्वात् श्रद्धेयत्वात्। अभ्यर्हितत्वे हेतुमाह – प्रकृतशास्त्रेति॥ प्रकृतशास्त्रं व्याकरणशास्त्रं तस्य निर्माता पतञ्जलिः।

श्रीपतञ्जलेरभावे ग्रन्थकृतः शास्त्रेषु प्रवेशानुपपत्तिः, ततश्चास्य ग्रन्थस्य निर्माणे अशक्तिः स्यात्। यतश्च तन्निर्मितभाष्याद्यध्ययनेन लब्धप्रतिभो दीक्षितः ग्रन्थ-निर्माणशक्तिरूपः कृतः, तत एवाव्यवधानेनोपकारकतया श्रद्धेयत्वेन श्रीफणी एव स्मर्यत इति भावः। इष्टतरत्वादिति॥ फणिनः, तद्भिन्नदेवतान्तरस्य च द्वैराश्यं बुद्धौ कृत्वा तरप्प्रत्ययोऽत्र बोध्यः। उद्धृत इति॥ कर्तुरनिर्देशादाह - अस्माभिरिति शेषः। भट्टोजिदीक्षितैः। पदकृत्यमाह - भाष्याब्धेरित्यादि। पाणिनीयानां मुनित्रयातिरिक्त-वचसि श्रद्धाभावस्यासत्त्वेन, भट्टोजीदीक्षितकृतस्यास्य ग्रन्थस्य श्रद्धेयता न स्यादित्याशङ्क्याह – भाष्याब्धेरित्यादिना। भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्त्या शब्दकौस्तुभोक्ताः अर्थाः न दीक्षितकल्पिताः , किन्तु भाष्यकारेणैव प्रतिपादिताः। ततश्च शब्दकौस्तुभे भाष्याशयस्यैव प्रतिपादनमिति शब्दकौस्तुभोक्तार्थस्य ग्राह्यत्व-मक्षतम्। व्यतिरेकमुखेनास्य ग्रन्थस्य श्रद्धेयत्वमाह – तन्मूलकत्वादिति॥ तन्मूलकस्य, तस्यापि दीक्षितग्रन्थस्यापि। शब्दकौस्तुभस्य भाष्यमूलकत्वेन तु श्रद्धेयत्वम्, श्रद्धेयकौस्तुभमूलकत्वेन अस्यापि श्रद्धेयत्वमिति बोध्यम्। श्रद्धेयत्वं स्वाभीष्टसाधकत्वेन ग्राह्यत्वम्। नन्वेवं सति इतः पूर्वेषां शब्दकौस्तुभादीनाम-नुपयोगस्स्यादित्यत आह - तत्र निर्णीत इति। वैयाकरणसिद्धान्तानामिह संक्षेपेणोक्तत्वादेतन्मात्राध्ययनेन निखिलार्थावगमाभावः। तथा च पूर्णसिद्धान्त-ज्ञानाय तदध्ययनस्य काम्यत्वेनोपयोगः।

3. प्रकरणसङ्गतिः, धात्वाख्यातार्थविषये वैयाकरणमतम्

**4.** अत्र भवद्भिर्भाष्यकारादिभिः [१] सप्रमाणमुपपादितान् श्रीभर्तृहरिगुरु [२] चरण-प्रभृतिभिरतितरां विशदीकृतानपि वैयाकरणाभिमतपदार्थान् विकल्पत्र(ग्र) [३] स्त-चित्तत्वान्न सम्यगधिगन्तुमीशते[४] दूषयन्ति च,

अतस्तानेव[५] निपुणतरमुपपादयन्नाह[१]-

---

[१] अ1-अत्र भगवद्भिर्भाष्कारादिभिः, वा2-भाष्यकारादिति भावः

[२] द4-गुह

[३] वा2,भार1,त1,त3,जै,ब1,1900,द2,-ग्रस्त

[४] जो2-त्रस्तत्वान्न समधिगन्तुमीशते,भ1-सम्यगन्तुमीशते, त5,अ4-सम्यगवगन्तुमीशते

[५] त1,त4,अ4- ततस्तानेव

फलव्यापारयोर्धातुराश्रये तु[२] तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्॥ 2॥

तत्रापि प्रायशो वाक्यस्य[३] सुप्तिङन्तसमुदायत्वात्[४], सुबन्तानां च प्रायः[५] क्रिया[६]विशेषणत्वाद् धातोश्च क्रियावाचकत्वेन[७] पुरःस्फूर्तेः[८] कत्वादिच्छावशाद् वा प्रथमतो धात्वर्थनिरूपणमिति बोध्यम्। धातुः स्मृत इत्यन्वयः। वाचकत्वेनेति शेषः। तत्र विक्लित्त्यादिफलं[९] तत्तद्रूपेण वाच्यम्[१०]। तद्वा[११]चकतापि तत्तद्रूपेण।

### 3.1 विशिष्टशक्तौ दोषप्रदर्शनम्

फलविशिष्ट[१२]व्यापारे एक[१३]शक्तौ चैकदेशत्वात् फलस्य तत्र[१४] पदार्थान्तरान्वयो न स्यादित्यादि[१५] वक्ष्यते। फलव्यापारयोः[१६] साध्यसाधनभावस्तु संसर्गः, अतो जनकत्वांश[१७]शक्तिं विनापि फलजनकत्वं व्यापारे[१८] सुलभम्।

एकपदोपस्थाप्ययोरपि[१] कृतीष्टसाधनतावादे[२] कृतीष्टसाधनत्वयोः कृतिवर्तमानत्वयो-

---

[१] त1,त5-निपुणतरमुपपादयिष्यन्नाह

[२] जो2-च, त2-"तु" नास्ति

[३] अ3- "वाक्यस्य" नास्ति

[४] जो2-समुदायरूपत्वात्,के5-सुबन्ततिङन्तसमुदायात्मकत्वात्

[५] त1,भ2,द5,त5,जा1,ब2-प्रायशः

[६] द2-"क्रिया" नास्ति

[७] अ1-क्रियावाचित्वेन

[८] 1900,त5-पुरस्फूर्ति

[९] म-विक्लित्त्यादिकं फलं

[१०] अ1,त2,द1-तत्र फलं विक्लित्त्यादि तत्तद्रूपेण वाच्यम्, 1900-फलं विक्लित्त्यादि तत्तद्रूपेण वाच्यम्,के5-विक्लित्त्यादिकं फलं,द7- तत्र विक्लृत्त्यादि

[११] अ4- "तत्" नास्ति

[१२] द1-विशिष्टे,के5-विफलविशिष्ट

[१३] अ1- "एक " नास्ति

[१४] अ3,त1- "तत्र " नास्ति

[१५] जो2,द4-न स्यादिति

[१६] के5,त2,त5- फलव्यापारयोस्तु

[१७] वा2,भार1,त1,त2,ब1,जो2,1900,द3,1915,म-जनकत्वांशे,के5-जनकत्वांशेऽपि

[१८] म-व्यापार

र्वा यथा परेषामन्वयः तथास्माकमपीति न कश्चिद्दोषः।

ननु भाष्यकारादयः व्याकरणाभिमतान् पदार्थान् सम्यक् प्रतिपादितवन्तः। तेनैव सिद्धान्तावगमे ग्रन्थान्तरस्यानुपयोगापत्तिरत आह- अत्र भवद्भिः भाष्यकारादिभिरिति। भाष्यकारादिभिरुक्ता अपि न प्रामाणिकाः स्युरित्याह – सप्रमाणमिति॥ भाष्यकारस्तु स्वयम्प्रमाणम् इत्यपि बोध्यम्। ननु तेषां सूक्ष्मत्वेन दुर्ज्ञेयत्वमित्यत आह - श्रीभर्तृहरिगुरुचरणप्रभृतिभिरिति। विशदीकृतान् स्पष्टार्थ-प्रतिपत्तिफलकव्याख्यानोपेतान्। वैयाकरणाभिमतान् वैयाकरणानामभिमतान् इष्टान् पदार्थान् धात्वर्थादीन्। विकल्पो मतभेदः धात्वर्थादिविषये फलमेव धात्वर्थः, व्यापार एव धात्वर्थः,विशिष्टव्यापार एव धात्वर्थः इत्यादिरूपो यो मतभेदः तेन त्रस्तं अयं सिद्धान्तःएवेत्यनिश्चितं चित्तं येषां, तेषां भावस्तस्माद् हेतोः उक्तमपि सिद्धान्तं सम्यक् याथार्थ्येन अधिगन्तुं व्याख्यानं विना ज्ञातुं न शक्नुवन्ति। किं च अन्यमतप्रभावेण च वैयाकरणसिद्धान्तान् दूषयन्ति च। अतस्तान् वैयाकरणसिद्धान्तान् निपुणतरमेव सारल्येन सामस्त्येन चोपपादयितुमुपक्रमते – फलव्यापारयोर्धातुरित्यादिना॥ यद्यपि वैयाकरणाभिमतोऽर्थः स्फोट एव। स्फुटत्यर्थोऽस्मादिति स्फोटोऽर्थवाचकः शब्दः। स च शब्दब्रह्मात्मकः वर्णादिरूपव्यञ्जकभेदाद् अष्टविधो भवति - वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, अखण्डपदस्फोटः, अखण्डवाक्यस्फोटः, वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटश्च। एतेषु वाक्यस्फोटस्यैव मुख्यत्वम् लोके तस्यैवार्थ-बोधकत्वात्। एवं सति धात्वादिविभागस्यासत्त्वेन धात्वर्थादिनिरूपणपरोऽयं ग्रन्थो निष्फल इति। अत्रोच्यते - यद्यपि वाक्यस्फोटस्यैव मुख्यत्वम् तथापि अनन्त-वाक्यानां शक्तिग्रहाय वाक्येषु पदानि पदेषु प्रकृतिप्रत्ययावन्वयव्यतिरेकाभ्यां तत्तदर्थाश्च शास्त्रकारैः कल्पिताः। तथा च शास्त्रीयप्रक्रियानिर्वाहकतया कल्पिताः स्फोटा अपि सिद्धान्तसिद्धास्तथा च प्रकृतिप्रत्यययोः तदर्थयोश्च विचारो न निष्फल इति बोध्यम्, तेषामर्थवत्त्वं कल्पितमिति तु अन्यत्। कल्पितेन प्रकारेणाकल्पितस्य स्फोटस्यैव ग्रहणम्।

---

[१] त1-एकपदोपात्तयोरपि

[२] अ1,अ4,ब1,1900,ब2- "कृतीष्टसाधनतावादे" नास्ति, के5-कृतीष्टसाधनतावा,

नन्वेवं सत्यपि धात्वर्थस्य प्रथमं निरूपणे किं बीजमिति जिज्ञासायामाह – तत्रापीत्यादिना॥ प्रायशो वाक्यस्येति॥ वैयाकरणमते तिङन्तद्वयस्यापि वाक्यत्वसंभवेनाह-.प्रायश इति॥ तादृशवाक्यस्यैव प्रथममस्तु व्याख्यानमिति चेन्न, तेषामनन्तत्वात्। सुबन्तस्य आदौ कथं न व्याख्यानं कृतमित्यत आह – सुबन्तानामिति॥ सिद्धान्ते व्यापारमुख्यविशेष्यकबोधस्य स्वीकारात् सुबन्तार्थो विशेषणम्। न च विशेषणत्वेऽपि तद्याख्याने बाधकाभाव इति वाच्यम्, प्रधानकार्यं सर्वतो बलवदिति न्यायात् विशेषणव्याख्यानबुद्धेर्बाधः। धात्वर्थनिरूपणस्यौचित्यमाह – धातोश्चेति॥ वक्ष्यमाणरीत्या धातोरेव क्रिया-वाचकत्वम्। पुरः स्फूर्तिकत्वादिति प्रधानीभूतक्रियावाचकत्वेन, प्रथमतो बुद्धि-विषयत्वात्। ननु विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् विशेषणीभूत-सुबन्तार्थस्यैवादौ व्याख्यानौचित्यमिति अरुचेराह – इच्छावशादिति॥ इच्छायाः सर्वतो बलीयस्त्वात्।

धातुः फलव्यापारयोः स्मृतः। वाचकत्वं सप्तम्यर्थः। विषयसप्तमी एषा। ईश्वरीयज्ञानविषयतायाः सर्वत्र विद्यमानत्वात्। एवमेव आश्रये इत्यत्रापि वाचकत्वमेव सप्तम्यर्थः। तथा च विभक्त्यर्थे वाचकत्वे फलस्य व्यापारस्य च निरूपितत्वसम्बन्धेनान्वयः, यद्यपि तदुभयनिष्ठवाच्यताया एव निरूपितत्व-सम्बन्धेन वाचकतायामन्वयस्यौचित्यम् , तथापि धर्मनिरूपिते धर्मिनिरूपितत्व-मपीत्यम्युपगमः। विभक्त्यर्थस्य वाचकत्वस्य स्वरूपसम्बन्धेन धातावन्वयः, तथा च फलव्यापारोभयनिरूपितवाचकतावान् धातुः स्मृतः। एवमेव आश्रयनिरूपित-वाचकतावन्तस्तिङः स्मृताः। पूर्वत्र स्मृत इत्यस्यात्रापि सम्बन्धेन विभक्ति-विपरिणामेन चान्वयः।वाचकत्वेनेति॥ वैशिष्ट्यन्तृतीयार्थः, वाचकत्वविशिष्टो धातुः स्मृतः, धातुः व्यापारवाचक इति स्मृतिविषयीभूतः व्याकरणस्यानादित्वात् पूर्वैराचार्यैः स्मृतः। मयापि तेन रूपेण स्मर्यमाणः।

अत्रेदं बोध्यम् - फलव्यापारयोरित्यत्र द्विर्वचननिर्देशेन द्वन्द्वनिर्देशेन च फलनिरूपिता व्यापारनिरूपिता च धातौ पृथक् शक्तिः नतु विशिष्टव्यापारे एकेति प्राचीनमतम् ।पृथगुपस्थितौ सत्यामेव स्तोकं पाक इत्यादौ फलस्य पदार्थत्वेन तत्र स्तोकादेरभेदान्वयः। ग्रामादेश्च भेदेनान्वयः। फलविशिष्टे व्यापारे धातोः शक्तिस्वीकारे

फलस्यैकदेशत्वेन स्तोकादेरन्वयानुपपत्तिः। पदार्थैकदेशत्वेन "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेने"ति न्यायविरोधात्। नित्यत्वस्य घटत्वान्वयतात्पर्येण नित्यो घटः इति प्रतीतिवारणाय पदार्थः पदार्थेनान्वेतीति व्युत्पत्तेः अवश्यस्वीकर्तव्यत्वात्। तथा च घटत्वस्य पदार्थैकदेशत्वेन तत्र नित्यत्वस्यान्वयो न, उक्तव्युत्पत्ति-विरोधात्।

पदार्थत्वञ्च पदनिष्ठशक्तिग्रहाधीनोपस्थितीयमुख्यविशेष्यताश्रयत्वम्। प्रकारताश्रयत्वम् पदार्थैकदेशत्वम्। मुख्यत्वञ्च प्रकारत्वासामानाधिकरण्यम्। ननु एकपदोपस्थितयोः फलव्यापारयोराकाङ्क्षाभास्यसम्बन्धेनान्वयानुपपत्तिः, विभिन्न-पदजन्योपस्थितयोरेवान्वयौचित्यादिति चेन्न। न्यायनये लिङ्पदोपस्थितयोः कृतीष्ट-साधनत्वयोः तिङ्पदोपस्थितयोः कृतिवर्तमानयोश्चान्वयदर्शनेन तादृशनियमा-भावात्।

नागेशभट्टास्तु फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले धातोः शक्तिं स्वीकुर्वन्ति। फले व्यापारे च पृथक् शक्तिस्वीकारे तु फलोद्देश्येन व्यापारस्य व्यापारोद्देश्येन च फलस्य बोधापत्तिः। उद्देश्यविधेयभावान्वयबोधप्रयोजक-पृथगुपस्थितेः सत्त्वात्।

ननु एतन्मतेऽपि शक्तिद्वयस्वीकारे गौरवम् ,अन्यतरविशेष्यकबोधं प्रति कर्तृकर्मप्रत्ययान्यतरसमभिव्याहारस्य कारणत्वस्वीकारे च गौरवम्, स्तोकादेरन्वयानुपपत्तिश्चेत्यतः एकवृन्तगतफलद्वयवत् धातोरेकैव फले व्यापारे च खण्डशः शक्तिरितिपक्षो युक्तः। तत्र विक्लित्त्यादि फलमिति॥ कारिकायां फलपदेन विक्लित्त्यादिफलं गृह्यते। वाच्यताया अनुगमायाह – तद्रूपेणेति॥ विक्लित्तित्वादि-रूपेण। एवञ्च कर्तृभेदप्रयुक्तभेदवद्व्यापारभेदेन फलव्यक्तिभेदेन वाच्यत्वभेदेऽपि तदवच्छेदकविक्लित्तित्वादेरेकत्वेन वाच्यताया ऐक्यमिति भावः। तथा चोक्तम् -

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति॥

यदुद्देश्येन प्रवृत्तिस्तत्फलम् , इतरेच्छानधीनेच्छाविषयत्वमिति फललक्षणं फलति। साधने फलेच्छाधीनेच्छाविषयत्वेन नातिव्याप्तिः। तथा चोक्तं हरिणा-

यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः।
तत्प्रधानं फलन्तेषां न लाभादि प्रयोजनम्॥ (वा.प.तृ.उप.18) इति।

"स्वरितञितः"(पा. 1-3-72) इति सूत्रेऽपि एतादृशस्यैव फलस्य ग्रहणम्। तादृशफलस्यैव धातुवाच्यत्वे विक्लित्त्यनुकूलव्यापारसत्त्वे तादृश-फलस्यानुत्पत्त्या तण्डुलादेः कर्मत्वानुपपत्तिः, फलाश्रयत्वाभावात् तादृश-फलाश्रयस्य कर्तुरपि कर्मत्वापत्तेश्च।अतः धातुवाच्यं फलं न तादृशं किन्तु विक्लित्यादिरूपम्। अत आह - तत्र विक्लित्यादिफलमिति॥ फलपदस्य लोके तथार्थप्रतीतावपि धात्वर्थफलन्तु पारिभाषिकमेव। तथा च तद्धात्वर्थजन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वं फलत्वम्। जन्यत्वञ्च जन्यत्वप्रकारकप्रतीति-विषयत्वम्। तेन सत्तादौ नाव्याप्तिः, सत्तादेर्नित्यत्वेऽपि आरोपितजन्यत्व-स्वीकारात्। प्रतीतिविषयत्वञ्च, भ्रमप्रमासाधारणज्ञानविषयत्वम्। विभागादौ अतिव्याप्ति-वारणाय विशेष्यदलम्। विभागस्य गम्धात्वर्थव्यापारजन्यत्वेऽपि तज्जन्योप-स्थितिविषयत्वाभावात्। तदर्थव्यापारेऽतिव्याप्तिनिरासाय विशेषणदलम्। तत्त्वञ्च विक्लित्त्यादीनामक्षतम्।

इदानीं वाचकतावच्छेदकमपि निश्चिनोति – तद्वाचकतापीति॥ तद्वाचकता, तत्तत्फलवाचकता पच्यादिनिष्ठा तदवच्छेदकम् - पच्त्वादिकमेव। तथा च पच्त्वादिना वाचकतापि अवच्छिन्ना नातो व्यभिचारादिदोषः। तथा च फलत्वेन या वाचकता सा तु धातुत्वावच्छिन्ना।विक्लित्तित्वेन या वाच्यता तन्निरूपिता वाचकता सा पच्त्वादिनैवेति बोध्यम्। फलविशिष्ट इत्यादि तु व्याख्यातम्। ननु फलव्यापारयोर्धातुवाच्यत्वेऽपि तयोः परस्परसंबन्धांशे शक्त्यभावात् तादृशसंसर्गस्याभानापत्तिरित्यत आह – साध्यसाधनभाव इति॥ साध्यं (जन्यं) फलम् , साधनं(जनकं) व्यापारः, तयोर्भावः स एव संसर्गः। स च जन्यजनकभावः। स च आकाङ्क्षाभास्यः, अतस्तत्र न शक्तिः, अन्यलभ्यत्वात् ।तदाह - अतो न जनकत्वांशे इति॥ अयमाशयः- यो ह्यर्थोऽन्यथा नोपलभ्यते तत्रैव शक्तिः स्वीक्रियते , फलव्यापारौ नान्यपदेन लभ्येतेऽतस्तत्र धातोः शक्तिः, तयोश्च यः जन्यजनकभावरूपः सम्बन्धस्तस्याकाङ्क्षयैव लाभात् तत्र न शक्तिः। सम्बन्धो द्विविधः शक्तिभास्यः, आकाङ्क्षाभास्यश्च। आकाङ्क्षा च पद-समभिव्याहाररूपा। यथा घटघटत्वयोर्यः समवायः संसर्गः स शक्त्या एव प्रतीयते।

यश्च पदार्थयोः संसर्गः स आकाङ्क्षाभास्यः। यथा राज्ञः पुरुष इत्यत्र राजपदार्थ-पुरुषपदार्थयोर्यः स्वस्वामिभावः संसर्गः, स आकाङ्क्षाभास्य उच्यते। तथा चात्र जन्यजनकभावस्याकाङ्क्षयैव प्रतीत्या तत्र शक्तिकल्पनमनुचितमिति भावः।

ननु फलव्यापारयोः धातुरूपैकपदप्रतिपाद्ययोर्जन्यजनकभावेनान्वयानुपपत्तिरित्यत आह – एकपदोपस्थाप्ययोरपीत्यादिना॥ एकपदं धातुरूपं पदं ,शक्तं पदमिति स्वीकारात्। तदुपस्थाप्ययोः फलव्यापारयोः। एकपदोपस्थाप्ययोरपि आकाङ्क्षाभास्यसंसर्गेणान्वये दृष्टान्तमाह - कृतीष्टसाधनतावाद इत्यादिना। वादे इति न्यायमते, नत्वस्मन्मते। अस्माकं मतन्तु वक्ष्यमाणम्।

नैयायिकनये लिङः सर्वत्र कृतौ इष्टसाधनत्वे च शक्तिः, तत्र कृतौ इष्टसाधनत्वस्यान्वयः, तथा च घटमानयेत्यादौ इष्टसाधत्ववद् व्यापारानुकूलकृतिमानिति बोधः। पचतीत्यादौ तिबर्थकृतिवर्तमानत्वयोः एकपदोपस्थाप्ययोरपि परस्परमन्वयस्तथैव फलव्यापारयोरपि एकपदोपस्थाप्ययोरपि तथान्वयः। तथा च दोषाभावः।

### 3.2 व्यापारनिरुक्तिः

**5.** अथ कोऽयं व्यापारः? न तावत् फलप्रयोजक[१]क्रिया, आत्माश्रयात्[२]। क्रियात्वस्यैव[3] तत्त्वात्। दण्डादिव्यापारस्यापि धात्वर्थत्वापत्तेश्च[४]। न चेष्टापत्तिः, धातूपात्तव्यापाराश्रयत्वेन दण्डादेः कर्तृत्वापत्तेः[५]। तथा च "दण्डेन देवदत्तः[६] पचति" प्रथमापत्तेः[७]। न चेयं[८]मनभिहिते करणे[९] एव[१०] तृतीयेति[१] वाच्यम्। दण्डादेः

---

[१] अ3-प्रयोजन, के5,ज1,अ4-प्रयोजिका,भ1-प्रयोजनक

[२] ब1,जो2,त4,भ2,त्रि-आत्माश्रयत्वात्

[३] के5-"एव" नास्ति,भ1-क्रियाश्रयस्यैव

[४] द1,द4,के5,म-धात्वर्थतापत्तेश्च

[५] के5-कर्तृतापत्तेश्च,भ1,म-कर्तृतापत्तेः

[६] के5-देवदत्तो दण्डेन,ज1-"देवदत्तः" नास्ति

[७] त2-प्रथमापत्तिः

[८] के5-न चैवम्

[९] अ1-ऽधिकरणे

[१०] त4,भ1,अ4-"एव" नास्ति

कर्तृत्वे[२] करणत्वस्यैवासंभवात्। "आकडारादेका संज्ञा" (पा. 1-4-1) इति नियमनात्[३]। अन्यथा "दण्डेन दण्डः करोति[४]" इत्यपि[५] स्यात्। न च "आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना।[६]आत्मानमात्मना हंसि[७]" इत्यादिवदिष्टापत्तिः, औपाधिकभेदमादायैवात्र[८] कर्तृत्व[९]कर्मत्वाद्युपपादनस्य[१०] "कर्मवत्कर्मणा तुल्यक्रिय" (पा. 3-1-87) इति सूत्रे भाष्ये[११] कृतत्वात्[१२]।

न चागत्या निरवकाशा करणसंज्ञा[१३] कर्तृसंज्ञां बाधिष्यत इति वाच्यम्, गतेर्वक्ष्यमाणत्वात्।

---

क्रमप्राप्तफलविषये किञ्चिदुक्त्वा धात्वर्थव्यापारविषये जिज्ञासते - अथ कोऽयं व्यापारः। अस्ति भवतीत्यादौ व्यापारानुभवाभावात् सर्वसाधारण्येन तत्प्रतीत्यर्थं तत्स्वरूपविशेषनिर्धारणायाशङ्कते - अथ कोऽयं व्यापारः॥ योऽयं धात्वर्थतया इष्यते व्यापारः सः अस्त्यादिसाधारणः किं स्वरूपः। लक्षणमाह - फलप्रयोजिका क्रिया। फलं विक्लित्त्यादि, तत्प्रयोजिका क्रिया व्यापारः, व्यापारेणैव फलं जायते इत्यर्थः। लक्षणमिदं खण्डयति – आत्माश्रयादिति॥ अत्र लक्ष्या क्रिया, तद्बोधकलक्षणेऽपि तस्याः प्रवेशात् आत्माश्रय इतिभावः। नहि फलप्रयोजकत्वमात्रं लक्षणम्। काष्ठैः पचतीत्यादौ काष्ठादावपि फलप्रयोजकत्वात्। अतस्तन्निवारणाय लक्षणे क्रियेति वक्तव्यमेव। तथा सति आत्माश्रयो दोषः।

---

[१] भ1-न चेयमनभिहितेन करणतृतीयेन

[२] के5,ब3,अ4- कर्तृत्वेन

[३] त2,वा2-नियमानात्, ,अ1,अ3,त4,जो2,ब1,के5,भ1,भ2,1915-नियमात्

[४] के5-पचति

[५] त2-इति

[६] ब1- "इति" इत्यधिकम्,के5-सृजस्यात्मनमात्मना

[७] अ1-हन्ति

[८] भ1,द7-औपाधिकभेदमादायैव चात्र

[९] भ1-कर्तृ

[१०] के5-उपपादानस्य, अ4-उपादानस्य

[११] अ1- "सूत्रे भाष्ये" नास्ति

[१२] अ1-स्फुटीकृतत्वात्, त1,त4-उक्तत्वात्

[१३] अ3,द1-निरवकाशकरणसंज्ञा

क्रियासापेक्षग्राहकत्वाल्लक्षणस्य । तदाह क्रियात्वस्य तत्त्वात् ।क्रियालक्षणत्वात्। दोषान्तरमाह- दण्डादिव्यापारस्यापीति। यथा फलप्रयोजकत्वं कर्तृव्यापारे तथैव दण्डादिव्यापारेऽपि तदस्त्येव।स्वस्वान्तरव्यापारैः प्रधानक्रियाजन्यफलनिष्पाद-कत्वम् सर्वेषामपि कारकाणाम्।न चेष्टापत्तिः। दण्डादेरपि कर्तृत्वापत्तेः। धात्वर्थ-व्यापाराश्रयस्यैव कर्तृत्वात्। धात्वर्थव्यापारस्यैव लक्षणस्य प्रस्तुतत्वात्। तदाह - न चेष्टापत्तिरित्यतः, स्यादित्यन्तेन। उक्तरीत्या दण्डस्य कर्तृतापत्तौ दण्डेन देवदत्तः पचतीत्यादौ धात्वर्थव्यापाराश्रयत्वेन दण्डस्यापि कर्त्तृत्वापत्तिः। तथा च दण्डेन करोतीत्यर्थे दण्डः करोति इति स्यात्। ननु प्रकृते करणत्वस्यानभिधानात् "कर्तृकरणयोस्तृतीये" (पा.2-3-18) त्यनेन तृतीयैव स्यान्न तु प्रथमा। पचतीत्यत्र कर्तरि तिङिति कर्तुरेवाभिहितत्वम्, करणस्य चानभिहितत्वमेवेति चेन्न। उक्तरीत्या दण्डादेः कर्तृत्वे दण्डादेः करणत्वाभावेन तृतीयाया अप्राप्तेः। न च उभयसंज्ञेति वाच्यम्। "आकडारादेका संज्ञे" (पा.1-4-1) ति नियमेन एकस्या एव संज्ञाया औचित्यात्। उभयसंज्ञास्वीकारे दोषमाह - दण्डो दण्डेन करोतीत्यपि स्यात्॥ कर्तृसंज्ञायां दण्डः, करणसंज्ञायां दण्डेनेत्यस्य सम्भवात्।

एकस्यैव संज्ञाभेदं दर्शयति - न चात्मानमात्मना वेत्सि, सृजस्यात्मान-मात्मना आत्मानमात्मना हंसीति॥ अत्र आत्मा एक एव आत्मानमिति कर्तृसंज्ञया आत्मनेति करणसंज्ञया, वेत्सीति कर्तृरूपेण च व्यवहृतः इति पूर्वपक्षिणः आशयः, तथा च दण्डो दण्डेन करोतीत्यपि स्यादिति।

इष्टापत्तिं परिहरति – औपाधिकभेदमादायैवात्रेत्यादिना॥ यथा आत्मानं जानातीत्यादौ आत्मानौ, उपहितौ शरीरात्मा अन्तरात्मा च तथा अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति। तथा शरीरावच्छिन्न आत्मा चान्यः। तत्राद्यः कर्म, द्वितीयः कर्तेति अभिन्नस्यैवात्मनः शरीराद्युपाधिभेदाद् भेदः, आकाशमेकमेव घटाद्युपाधिभेदाद् घटाकाशं मठाकाशमिति भिन्नं प्रतीयते तद्वत्। प्रकृते परमात्मानमुद्दिश्येयमुक्तिः, हे भगवन् त्वं आत्मना आत्मानं वेत्सि, अत्र अविद्यावृत्त्यवच्छिन्नं चैतन्यम् करणम्, वृत्तिं विना सर्वविषयकज्ञानासंभवात्। उपाधिरहितं चैतन्यं कर्म, अविद्योपहितं चैतन्यं कर्तृ।

आत्मानमात्मना हंसि इत्यत्र शरीरावच्छिन्नं चैतन्यं शिशुपालादिरूपम् हननकर्म, तत्र शरीरस्यैव शिशुपालादिसंज्ञा, तस्यैव नाशे तदवच्छिन्नचैतन्यस्य नाश इत्युपचर्यते। सङ्कल्पात्मकमनोवृत्त्यवच्छिन्नं चैतन्यं करणम्। मायोपहितः श्रीकृष्णादिः कर्तृचैतन्यमिति रीत्यौपाधिकभेदमादाय एकस्यैव भिन्नात्मना प्रतीतिमादाय भेदव्यवहारः। न तु वास्तविकभेदप्रयुक्तः। तदेतत्सर्वं कर्मवदिति सूत्रे स्पष्टम्।तत्र हि- कर्मवदिति सूत्रे तुल्यक्रिय इत्युक्तम्, तुल्यत्वं हि सादृश्यम्, तच्च भेदनिबन्धनम्, न च प्रकृते भेदोऽस्ति कर्मणः कर्तृत्वविवक्षायां कर्मस्थक्रियाया एव कर्तृस्थत्वात्, तथा च सूत्रमिदमसमञ्जसम्। तत्राह - वास्तविकभेदाभावेऽपि औपाधिकभेदोस्त्येव। कर्मत्वावस्था एका कर्तृत्वावस्था अन्या। तद्भेदौपाधिकमवस्थाभेदसमानाधिकरणं क्रियाभेदमाश्रित्य तुल्यत्वोक्तिरिति। एवञ्चावस्थाभेदेन क्रियाभेदात्कर्मस्थक्रियातुल्यक्रियत्वं कर्तुरस्तीति तद्भाष्याशयः।

करणसंज्ञया कर्तृसंज्ञाया बाध इति शङ्कते - न चागत्या इति॥ उक्तक्रियात्वस्य धात्वर्थत्वे सर्वत्रापि कर्तृसंज्ञायां प्राप्तायां येन नाप्राप्ते इति न्यायेन करणसंज्ञया कर्तृसंज्ञाया बाध इति भावः। अगतिरत्र उपायान्तराभावः। खण्डयति – गतेर्वक्ष्यमाणत्वादिति॥कारकाणां वैवक्षिकत्वस्वीकारेण कर्तृत्वाविवक्षायां करणत्वस्य सावकाशत्वात्। तथा वक्ष्यते -

वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः॥

तत् करणत्वादि , इदमित्थन्तया कथयितुमशक्यम् , तदेवाह - स्थाल्या पच्यते इति। स्थाल्यां पचतीति स्थाल्या अधिकरणत्वेऽपि करणत्वविवक्षायां स्थाल्या पच्यत इति दर्शनात्।

**6.** नापि[१] यदनन्तरमव्यवधानेन फलोत्पादः[२] सा क्रिया। यथौदनं[३] पचतीत्यत्र विक्लेदनम्[४]। अधिश्रयणादीनां तज्जनकतया क्रियात्वमौपचारिकम्। उक्तं च-

---

[१] म-ननु

[२] "कर्मणा तुल्यक्रिय इति सूत्रे भाष्ये कृतत्वात्" इत्यधिकम्

[३] त2-यदौदनं

[४] द3,भ2,द5-विक्लेदना

अनन्तरं फलं यस्याः कल्पते[1] तां क्रियां विदुः।

प्रधानभूतां तादर्थ्यादन्यासां तु[2] तदाख्यया[3]॥ (वा.तृ.क्रि.15)

इतीति[4] वाच्यम्। संभवति मुख्यत्वे गौणतायाः[5] अन्याय्यत्वात्, काष्ठादिक्रियाया अप्यव्यवहितपूर्ववर्तित्वेनोक्तदोषाच्च[6]। आरब्धेऽपि पाके क्रियाया भावित्वात्, पक्ष्यतीति प्रयोगापत्तिश्च[7]।

---

॥क्रियालक्षणान्तरमाह- नापि यदनन्तरमव्यवधानेन फलोत्पादः सा क्रियेति॥ फलोत्पत्तये काष्ठादीनामावश्यकत्वेऽपि न कारकैः स्वरूपसद्भिरेव फलोपकारः, किन्तु व्यापारं द्वारीकृत्यैव। व्यापारश्चाव्यवधानेनैव फलं जनयतीति लक्षणसमन्वयः। उदाहरणमाह यथा- ओदनं पचतीत्यत्र विक्लेदनम् ॥ विक्लेदनम् - विक्लित्त्यनुकूलो व्यापारः। स चाव्यवधानेन फलं जनयति। ननु विक्लित्यनुकूलव्यापारस्यैव क्रियात्वम्, तत्रापि योऽव्यवधानेन फलोपकारकः तस्यैव धात्वर्थत्वम्, स च फूत्कारादीनामेव अथवा चरमव्यापारस्यैव, न तु अधिश्रयणादीनाम्, तेषां व्यवधानेन फलसाधकत्वादत आह - अधिश्रयणादीनामिति। अधिश्रयणादयो व्यापाराः यद्यपि फलजनकाः, किन्तु किञ्चिद् व्यवधानेनैव। अतस्तेषां क्रियात्वानुपपत्तिरतस्तेषामौपचारिकं व्यापारत्वम्, विक्लित्तिजनकाग्निसंयोगादौ एव साक्षात्फलजनकत्वात् तत्र मुख्यं व्यापारत्वम्। अन्यत्र गौणमिति भावः। उक्तञ्च-

अनन्तरफलं यस्याः कल्पते तां क्रियां विदुः।

प्रधानभूतां तादर्थ्यादन्यासां तु तदाख्यया॥ (वा.प.तृ.क्रि.15)

यस्याः क्रियायाः अनन्तरं फलं कल्पते जायते, विवक्ष्यते इति वा, तां प्रधानभूतां क्रियां विदुः। अन्यासां तत्पूर्वतनानाम् मधिश्रयणादीनां तादर्थ्यात् तादृशक्रिया-फलार्थतया तदाख्यया क्रियात्वेन व्यवहारः, तन्मात्रमेव न तु वास्तविकक्रियात्वम्।

---

[1] त1,त2,त4,भ2,के5,ब3,अ4-कल्प्यते

[2] त2--"तु" नास्ति

[3] के5,म,अ4-तदाख्यता,भ2-तदाख्ययापि

[4] अ1,भार1,द1,त1,त2,जै,ब1,के5,1900,भ2,1915-इति

[5] त2--"च" अधिकं

[6] भ2-उक्तदोषप्रसङ्गाच्च

[7] त2,भार1,जो2,1900,1915,द2,भ1-प्रयोगापत्तेश्च

खण्डयति – सम्भवतीत्यादि॥ अधिश्रयणादीनामपि मुख्यमेव क्रियात्वमिति गौणत्वेन क्रियात्वव्यवहारोऽयुक्त इति भावः। दोषान्तरमाह- काष्ठादिक्रियाया इति। काष्ठादिक्रियाया अपि अव्यवधानेनैव फलजनकत्वेन तत्राप्यतिव्याप्तेः। न चेष्टापत्तिः। कर्तृव्यापारे एव तादृशक्रियात्वस्येष्टत्वात्।

आरब्धेऽपि इति। अयमाशयः, अव्यवधानेन फलनिष्पादकत्वमन्तिमाग्निसंयोगरूपक्रियायामिति तस्यैव मुख्यं क्रियात्वम्, तदनुरोधेनैव कालव्यवस्था। तथा च यत्राधिश्रयणादिना पाक आरब्धस्तत्र पचतीति प्रयोगो युक्तः, किन्तु उक्तव्यापारस्याविद्यमानत्वेन भावित्वेन च पक्ष्यतीति प्रयोगापत्तिरिति बोध्यम्।

7. अथ पचतीत्यनुगतव्यवहारादस्ति पचित्वं जातिः, सैव क्रिया[१]। न च क्रियायाः साध्यत्वं न स्यात्। नास्त्येव,[२] किं तु तदाश्रयाणामेव साध्यत्वम्। उक्तं च-

जातिमन्ये क्रियामाहुरनेक[३]व्यक्तिवर्तिनीम्[४]।
असाध्या व्यक्ति[५]रूपेण सा साध्येवोपलक्ष्यते[६] ॥ (वा.तृ.क्रि.20)

इतीति[७] चेन्न। दण्डादिव्यापारस्यापि फलानुकूलत्वेनोक्तदोषात्[८]। तत्र[९] जातिर्नास्तीति चेत्, तर्हि "दण्डः पचति" इत्यपि न स्यात्। एतेन चरमव्यापार[१०]वर्तिनी जातिः क्रियेति निरस्तमिति[११] दुर्निरूपमेव[१२] क्रियात्वमिति चेन्न।

---

[१] त5-सैव च क्रिया

[२] भ2-"पाकायते इत्यादौ सिद्धस्यैव पाकस्य साध्यत्वमिति न क्रियात्वव्यभिचारः, पचतीत्यादौ तु असिद्धमेव पाकादि साध्यत्वेनाभिधीयत इति वयं परिष्कुर्मः" इति टिप्पणी

[३] भ1-रन्येक

[४] अ4-व्यक्तिसंश्रयां

[५] भ1-व्यक्त

[६] अ3-लभ्यते,भ1-लक्ष्य

[७] भार1,त1,त2,जै,1900, के5,द3,भ2,1915,म,अ4-इति

[८] त1,के5,भ1,1915-दोषत्वात्, द5-दोषप्रसङ्गात्

[९] भ1-तच्च,म-तत्र च

[१०] द1-चरमफलव्यापार

[११] भार1,1900-निरस्तम्। त2-निरस्तम्। तस्मात् दुर्निरूपमेव

[१२] अ1- "एव" नास्ति, भार1,1900-तस्मात् तद्वर्तिरूपमेव,भ1-दण्डर्निरूपमेव

भावनाभिधः[१] साध्य[२]त्वेनाभिधीयमानो व्यापारविशेषः क्रिया।
उक्तं च वाक्यपदीये-

यावत्सि[३]द्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते॥ (वा.तृ.क्रि.1) इति[४]।

वक्ष्यति च[५] ग्रन्थकारोऽपि-

व्यापारो भावना सैवोत्पादना[६] सैव च क्रिया। (वै.सि.का.5) इति।

न च साध्यत्वेनाभिधाने[७] मानाभावः। "पचति, पाकः, करोति, कृतिः"[८] इत्यादौ[९] धात्वर्थावगमाविशेषेऽपि[१०] क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वात्। तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं रूपं साध्यत्वं[११], तदेवासत्त्वभूतत्वम्[१२]। [१३]भावनायाः प्रत्ययार्थतावादेऽपि[१४] पचति पाकभावनेत्यादौ[१५] तथा दर्शनेनास्य[१६] तथात्वावश्यकत्वात्[१७]। अत एव वक्ष्यति "साध्यत्वेन क्रिया तत्र[१८]" (वै.सि.का.15)

---

[१] म-भावनाभिधा
[२] द7-भावनाभिधसाध्य
[३] म-यवत्सि....
[४] जै- "इति " नास्ति
[५] त2,भार1,1900- "च" नास्ति
[६] त2--"सैवोत्पादना"नास्ति
[७] त1-साध्यत्वाभिधाने
[८] त1- "पचति पाकं करोति "
[९] जो2-इति
[१०] ब1-धात्वर्थाविशेषावगमेपि
[११] भ1-सासाध्यत्वं
[१२] अ3- तदेव चासत्त्वभूतम् , वा2-तदेव साध्यरूपत्वम्(इत्यपि पाठान्तरम्?) जो2-तदेवासत्त्वभूतम् भ2- "नात्र अस्त्यादि क्रियान्तराकाङ्क्षा, पाक इत्यादौ तु अस्ति नष्टो वेत्यादि क्रियान्तराकाङ्क्षेति न साध्यत्वमिति विवेकः " इति टिप्पणी
[१३] भ2- "मीमांसकमते " इति टिप्पणी
[१४] जो2- "अपि " नास्ति, के5,म-प्रत्ययार्थत्ववादेऽपि, ब2-प्रत्ययार्थतावच्छेदेपि, भ2,द5- "च"अधिकं
[१५] त1,त5- पाकानुकूला भावनेत्यादौ
[१६] 1900- दर्शनेनास्याः, भ2-तथा दर्शनेन-साध्यत्वदर्शनेन, अस्य – अस्य व्यापारस्य इति टिप्पणी
[१७] भ1,द7- तथावश्यकत्वात् भ2- तथात्व- साध्यत्वस्येत्यर्थः इति टिप्पणी
[१८] जो2- "धातुरूप " इत्यधिकम्

इत्यादि। व्युत्पादयिष्यते चैतदुपरिष्टात्। स च व्यापार आत्मनिष्ठः प्रयत्नः, शरीरादीनां च[१] फूत्कारादिः[२], तद्वत्येव[३] पचतीति[४] व्यवहारात्।

यथा घटोऽयं घटोऽयमित्यनुगतव्यवहारानुरोधेन घटत्वजातिसिद्धिस्तथैव पाकक्रियायाः स्वत एव फूत्काराद्यवयवभेदेन कर्तृभेदेन च भिन्नत्वेऽपि तत्र पचतीत्यनुगतव्यवहारेण तत्रैका जातिः पचित्वरूपा स्वीक्रियते, सा जातिरेव क्रियेति लक्षणान्तरमुपक्षिपति – अथेत्यादिना॥ अनुगतव्यवहारः। मात्राद्युपदेशेन यं कञ्चित् घटं ज्ञातवतः, सर्वत्रापि अज्ञातास्वपि घटव्यक्तिषु घटोऽयं घटोऽयमिति अनुगताकारा प्रतीतिर्जायते। सा च सर्वघटादिव्यक्तीनामज्ञातत्वात् नोपपद्येतेत्यतः तादृशानुगतप्रतीत्युपपादनाय मात्राद्युपदेशेन गृहीतपदार्थे कश्चन धर्मोऽपि ज्ञानविषयो भवतीति मन्तव्यम् , यः सर्वास्वपि व्यक्तिषु वर्तमानः। यद्यपि घटव्यक्तयो भिन्नाः अज्ञाताश्च, अथापि तत्र विद्यमानो धर्मः कम्बुग्रीवादिमत्त्वेनोपलक्षितः मात्राद्युपदेशसमये ज्ञातः।अत एव अज्ञातं घटादिकमवलोकयतोऽपि कस्यचित् तत्र विद्यमानधर्मज्ञानवशात् घटोऽयमिति प्रतीतिः भवति। स च धर्मः घटत्वजातिरूप एव। एवमेव अधिश्रयणादिक्रियासमुदाये कस्मिंश्चित् मात्राद्युपदेशेन पचिक्रियाज्ञानवतः सर्वत्रापि तादृशसमुदाये पचतीति प्रतीतिर्जायत इति तादृशानुगतप्रतीतिसिद्ध्यर्थं पचित्वं जातिरेका मन्तव्येति भावः। ननु पचित्वस्य जातिरूपस्य क्रियात्वे तत्र साध्यत्वप्रतीत्यनुपपत्तिः, क्रियाया वक्ष्यमाणरीत्या साध्यस्वभावत्वात् इति शङ्कामुत्थाप्य समादधाति - न च क्रियाया इत्यादिना॥ पचित्वस्य जातिरूपस्य क्रियात्वे तस्य नित्यत्वात् साध्यत्वमिष्टं न स्यादित्यर्थः। पचित्वस्य क्रियारूपस्य साध्यत्वाभावे इष्टापत्तिमेव प्रदर्शयति – नास्त्येवेति॥ नन्वेवं "साध्यत्वेनाभिधीयते, साध्यत्वेन क्रिया तत्र धातुरूप निबन्धने"त्यादिना क्रियायाः साध्यत्वेनाभिधानम् असङ्गतं स्यादित्यत आह - किन्तु तदाश्रयाणामिति॥ जातिरूपस्य नित्यत्वेन न साध्यत्वं, किन्तु पचित्वाश्रयाणाम् फूत्काराधिश्रयणाधःश्रयणादीनामेव साध्यत्वं,

[१] जै- "च " नास्ति

[२] त1,त5-फूत्करणादिः, ब2-फूत्कारादि

[३] भ2-तद्वत्येव-फूत्कारादिमत्येवेत्यर्थः इति टिप्पणी

[४] अ3-पचतीत्यादि

यथा घटत्वादेर्नित्यत्वेऽपि घटत्वाश्रयाणां घटादीनाम् अनित्यत्वम् तद्वत्। तत्र वाक्यपदीयकारवचनं प्रमाणत्वेनोपन्यस्यति-उक्तश्चेति॥ जातिमन्ये क्रियामाहुरिति॥ नित्यत्वे सत्यनेकसमवेतत्वं जातेर्लक्षणम्। अनेकव्यक्तिषु वर्तते या सा अनेकव्यक्ति-वर्तिनी, तामनेकव्यक्तिवर्तिनीं जातिं पचित्वादिरूपामन्ये क्रियामाहुः। यद्यपि सा न साध्या, अथापि व्यक्तिरूपेण आश्रयव्यक्तीनां साध्यत्वेन, सा जातिरपि साध्या इवोपलक्ष्यते - साध्यरूपत्वेन सर्वबुद्धिविषया भवति। तथा च जातिः क्रिया इति। तदेतत् लक्षणं निराकरोति - इति चेन्नेति। अयमाशयः - यत्र पचतीति प्रयोग-स्तत्र पचित्वं जातिरित्यभ्युपेयम् , पचतीति प्रयोगः विक्लित्त्यनुकूलव्यापारमात्रे, तथा सति दण्डादिव्यापारेऽपि विक्लित्त्यनुकूलत्वसत्त्वेनोक्तरीत्या तत्रापि पचित्वजातिः स्यात्। तथा च तस्यैव धात्वर्थत्वेन धात्वर्थव्यापाराश्रयत्वस्य दण्डे सत्त्वात् कर्तृत्वापत्तिरूपः पूर्वोक्तदोषस्तदवस्थ एव। अत्र काष्ठादीत्येव शोभनम्, पचतीत्यस्य प्रसङ्गात्। अथवा दण्डशब्देन प्रज्वलनोपयोगि काष्ठस्यैव ग्रहणमिति न दोषः। ननु दण्डादिव्यापारे पचित्वजातिर्नास्तीति मत्वा शङ्कते - तत्र जातिर्नास्तीति चेदिति॥ शङ्कामपनुदति - तर्हि इति। अयमाशयः- कर्मकर्तृप्रक्रियायां यथा कर्मणः कर्तृत्वं तथा सौकर्यातिशयद्योतनार्थं करणस्य कर्तृत्वविवक्षायां काष्ठानि पचन्तीति विवक्षित-प्रयोगस्तत्र काष्ठानामेव कर्तृत्वम्। तत्र काष्ठादिव्यापारस्यैव पचित्वरूपस्य धात्वर्थत्वमिति तदाश्रयत्वात् काष्ठादेः कर्तृत्वं सिध्यति। यदि काष्ठादिव्यापारे पचित्वरूपजातेरस्वीकारस्तदा काष्ठादेः कर्तृत्वानुपपत्तिरतः काष्ठादिव्यापारेऽपि पचित्वमस्त्येवेति बोध्यम्। चरमव्यापारवर्तिनी जातिः क्रियेति ॥ चरमो व्यापारः यः साक्षात्फलजनकः,यथा विक्लित्तिजनकव्यापारेषु अधःश्रयणम् , तत्र वृत्तिर्या जातिः सैव क्रियेतीत्यपि लक्षणमलक्षणमेव, अधिश्रयणादीनामपि क्रियात्वेनाभिमतानां क्रियात्वाभावप्रसङ्गरूपदोषस्योक्तत्वात्। एवञ्च क्रियात्वं दुःखेनापि निरूपयितुम् अशक्यमिति पूर्वपक्षः।

स्वशास्त्रीयसिद्धान्तानुरोधेन समाधत्ते – भावनाभिध इत्यादिना॥ क्रिया सुनिरूपैव। तथा हि - भावनाभिधः साध्यत्वेनाभिधीयमानो व्यापारविशेषः क्रिया। भावना अभिधा यस्याः सा, भावनापरपर्याया, साध्यत्वेनाभिधीयमाना क्रिया। क्रिया लक्ष्या, इतरत् लक्षणम्। साध्यत्वेनेत्यत्र प्रकारत्वं तृतीयार्थः। तथा च

साध्यत्वनिष्ठप्रकारतानिरूपकप्रतीतिविषयव्यापारविशेषत्वं क्रियात्वम्। तत्र वाक्यपदीयकारसम्मतिमाह - यावत्सिद्धमसिद्धं वेत्यादिना॥ सिद्धं भूतकालावच्छिन्नम्, अपाक्षीदित्यादौ। असिद्धं भूतकालानवच्छिन्नं , वर्तमानकालावच्छिन्नम्, भविष्यत्कालावच्छिन्नम् च। यथा पचति पक्ष्यतीत्यादौ। यत् साध्यत्वेनाभिधीयते सा क्रिया। तत्र हेतुमाह –आश्रितेति॥ आश्रितम् अधिश्रयणाद्यवयवक्रमरूपं पौर्वापर्यं यया सा आश्रितक्रमरूपा, तस्या भावस्तस्मात्। क्रियतेऽवयवशः या सेति व्युत्पत्तेः। अस्त्यादौ अपि आरोपितक्रममादाय क्रियात्वं बोध्यम्।

भूतकालावच्छिन्नतदितरकालावच्छिन्नोभयसाधारणत्वे सति, आश्रितक्रमरूपत्वे सति, साध्यत्वप्रकारकप्रतीतिविषयक्रियात्वम् व्यापारत्वमिति फलति। अपाक्षीदित्यादौ पचति पक्ष्यतीत्यादौ च धात्वर्थीभूतक्रियात्वसङ्गमनाय प्रथमसत्यन्तम् , स्वरूपपरिचयाय आश्रितक्रमेति। घटादावपि दोषः स्यादित्यतः साध्यत्वेत्यादि। इदं च परिष्कृतं साध्यत्वं घटादौ नास्तीति न तत्रातिव्याप्तिः।

पूर्वोक्तक्रियालक्षणे प्रमाणमाह -व्यापारो भावना सैवोत्पादना सैव च क्रिया इति॥ क्रियाया एव व्यापारभावनादिपदैर्विवरणात् अयमेवार्थः प्रमाणितो भवति इति भावः। तथा चोक्तं व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया। अनयोश्चैकवाक्यता पूर्वोक्तार्थस्वीकार एव भवति।

ननु घटादीनामपि अवयवशः क्रियमाणत्वेन क्रियात्वापत्तिः, किञ्च क्रियायां साध्यत्वप्रतीतौ मानाभाव इत्याशङ्कते- न चेति। मानमाह - पचति पाकः, करोति कृतिरिति॥ पचति पाक इत्युभयत्र एक एव धातुः, तदर्थश्चाविशिष्ट एकस्तथापि, पचतीत्यत्र क्रियान्तराकाङ्क्षा न भवति, भवति च पाकः इत्यत्र भवतीत्यादेः क्रियान्तरस्य, अतोऽयं निर्णयः यदनयोः क्रिययोरस्ति कश्चन विशेषः, स विशेषः एव साध्यत्वादिप्रतीतौ मानम्, तदाह - धात्वर्थावगमाविशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षादर्शनस्यैव मानत्वादिति॥ इदानीं तल्लक्षणमाह- तथा चेति॥ पाकः इत्यत्र भवत्यादि क्रियान्तराकाङ्क्षा जायते, अतः पाक इत्यत्र प्रतीयमानक्रियायां क्रियान्तराकाङ्क्षोत्थापकता वर्तते, तस्यां क्रियायां यः उत्थापकतावच्छेदको धर्मविशेषः स एव सिद्धत्वम्, तच्च लिङ्गसंख्यान्वयित्वम्।

पचतीतिप्रतीतक्रियायां क्रियान्तराकाङ्क्षा नास्ति, अतस्तस्यां क्रियायां क्रियान्तराकाङ्क्षोत्पादकता नास्ति, तथा चास्यां क्रियायां क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदको धर्मः कश्चन मन्तव्यो येन क्रियान्तराकाङ्क्षा नैव जायते, स एव धर्मः साध्यत्वरूपो लिङ्गसंख्यानन्वयित्वरूपश्च इति बोध्यम्।

तदाह तदेवासत्त्वभूतत्वम् - सत्त्वं लिङ्गसंख्यायोगि, तद्भिन्नमसत्त्वम्। अद्रव्यम्। ये मीमांसकाः भावनां प्रत्ययार्थत्वेन लिङाद्यर्थत्वेन मन्यन्ते तन्मतेऽपि प्रत्ययार्थीभूतव्यापारस्य एवंविधसाध्यत्वमेवानुभूयते। तदेवाह- भावनाया इति॥ भावनायाः यः प्रत्ययार्थत्व- वादः, भावना तिङर्थ इति यो वादः पक्षः तत्र। पचति पाकभावना इत्यादौ पचतीत्यत्र तथा दर्शनम् - क्रियान्तरानाकाङ्क्षा दर्शनम् - पाकात्मभावना(जायते) इत्यत्र क्रियान्तराकाङ्क्षादर्शनञ्च। अतस्तत्रापि साध्यत्वेन क्रियायाः प्रतीतिर्मन्तव्या। क्वचित् पुस्तके पाकभावेनेति पाठः। तत्र वैशिष्ट्यं तृतीयार्थः। पाकः फलम् तस्य भावः स्थितिः, पाकस्थितिफलिका पचिक्रियेति भावः इति तदर्थः। अत एवेति। प्रकृत्युपस्थाप्यक्रियायाः साध्यत्व-स्वीकारादेव।

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥ (वा.प.तृ.क्रि.47)

तत्र पाकादि शब्दे साध्यत्वेन प्रतीयमाना या क्रिया सा धातुरूपनिबन्धना, धातुरूपं स्वरूपं निबन्धनं ज्ञापकं यस्याः सा धातुस्वरूपेण प्रतिपादनीया, तस्याः क्रियाया यः सिद्धभावः सिद्धत्वम् , स घञादिनिबन्धनो घञादिप्रतिपाद्यः इति कारिकार्थः। अयं ग्रन्थो धातोर्व्यापारार्थकत्वपक्षीयो बोध्यः। स च व्यापार इति॥ योऽयं धात्वर्थो व्यापारः स फूत्कारादिरूपः, यत्नरूपश्च। तत्र यत्नरूपो व्यापार आत्मनिष्ठः फूत्कारादिश्च शरीरादिनिष्ठः, फूत्कारादीनामात्मनिष्ठत्वासम्भवात्। तथैवानुभवात्। शरीरादीत्यत्र आदिपदेन इन्द्रियादिर्गृह्यते। यदा जानातीत्याद्युच्यते तदा वृत्तिरूपं ज्ञानं मनोनिष्ठमेव, वृत्तेरन्तःकरणधर्मत्वात्। एवमेव यदा पश्यामि जिघ्रामीत्याद्युच्यते तदा चक्षुरादिनिष्ठ एव व्यापार इति बोध्यम्। तत्रानुभवमाह- तद्वत्येव पचतीति॥ तद्वत्येव - तादृशव्यापारवति शरीरादौ एव पचतीति व्यवहारः। तिबर्थः आश्रयः स च व्यापारस्य। पचतीत्युक्तौ फूत्कारादिव्यापाराश्रयतया शरीरादेरेव भानम्, यत्नस्य तथात्वे, आत्मन एवाश्रयत्वप्रतीतिः।

### 3.3 फूत्कारत्वादीनां शक्यतावच्छेदकत्वे नानार्थतापत्तिनिराकरणम्

**8.** अथैवमपि सर्वैतत्साधारणधर्मस्याभावाच्छक्यतावच्छेदकाभावे कथं स[१] शक्यः? न च तत्त्वं[२] तत्त्वमेवावच्छेदकं, नानार्थत्वापत्तेः[३], नानाशक्त्यापत्तेश्च।

ननु शक्यतावच्छेदकतयैवानुगतस्य [तस्य][४] सिद्धिः यथा कारणतावच्छेदकत्वादिना[५]। अत एव जलशब्द[६] शक्यतावच्छेदकतया जलत्वसिद्धि[७]रिति लीलावत्युपाये[2] उक्तम्[८]। द्रव्यानुगतबुद्ध्या द्रव्यत्वस्य गुणपद[९]शक्यतावच्छेदकतया गुणत्वस्य च[१०] सिद्धिरित्यपरैः[११]। तच्च[१२] जातिरुपाधिर्वेत्यन्यदेतदिति चेन्न। येन रूपेण[१३] बोध[१४]स्तस्यैव[१५] शक्यतावच्छेदकत्वात्। कल्प्यमानधर्मपुरस्कारेण च न[१६] शाब्दबोधः[१७]।

---

[१] अ3- "स" नास्ति

[२] त2,1900,1915 - "तत्त्वं " नास्ति, भ2- एधोपकर्षणत्वफूत्कारत्वाधःसन्तापनत्वादिकमित्यर्थः इति टिप्पणी

[३] अ3- नानार्थकतापत्तेः, द1,भ1,द7-नानार्थतापत्तेः

[४] अ1,अ3,भार1,द1,त1,त2,ब1,1900,द3,भ2,1915 - "तस्य " इत्यधिकम्, त5-अनुगतस्य त्वस्य, भ2- तस्य – व्यापारत्वस्य इति टिप्पणी

[५] भ1-कारणतावच्छेदत्वादिना

[६] अ1,म-जलपद,त5-"जलशब्द" नास्ति

[७] त2,जो2-जलत्वजातिसिद्धि,भ1,द7-जठरत्वसिद्धि

[८] म-लीलावत्युपाध्यायैरुक्तम्

[९] अ4-गुणशब्द

[१०] म-"च" नास्ति।

[११] त2,भार1,1900,1915-परे

[१२] अ3-तद्वत्, जो2-तत्र

[१३] भ2-अत्र च फूत्कारत्वादिरूपेणैव बोध इति फूत्कारत्वादेरेव शक्यतावच्छेदकत्वम् न तु व्यापारत्वादेः कल्प्यमानधर्मस्य शक्यतावच्छेदकत्वम् इति टिप्पणी

[१४] अ4- येन रूपेण शाब्दबोध

[१५] ब1-स्तथैव

[१६] त5-"न" नास्ति

[१७] वा2-शाब्दबोध्य, जो2-शाब्दो बोधः,ज1-शब्दबोधः

न च कारणतावच्छेदकत्वादिनापि[1] जातिः न सिद्ध्येत्। येन रूपेण कारणता[2]बोधस्तस्यैव कारणतावच्छेदकत्वौचित्यादिति वाच्यं, कल्प्यमानलघुरूपेण कारणत्वे संभवति गुरुरूपेण तदस्वीकारेण तत्र क्षत्यभावात्। अत्र च[3] सिद्ध[4]रूपेण बोधस्यानुभवसिद्धत्वात्। तथा कार्यकारणभावावश्यकत्वे कल्प्यमानधर्मेणापि कार्य-कारणभावान्तरकल्पने गौरवमिति न[5] तत्कल्पनं युक्तम्[6]। अन्यथा सैन्धवादिपद-वाच्यतावच्छेदकत्वेनाप्यश्वादिवृत्तिधर्मान्तरकल्पनापत्तेः। अश्वत्वादिनैव[7] प्रतीते-स्तत्कल्पना न युज्यत इति चेत्, समैवात्रापि[8] फूत्कारत्वयत्नत्वादिनैव[9] प्रतीतिरिति दिक्[10]।

---

अथैवमपि - आत्मनिष्ठस्य यत्नस्य फूत्कारादेश्च पचिशक्यत्वे। सर्वैतत्साधारणेति॥ सर्वेषामेतेषां फूत्कारादीनां यः साधारणो धर्मः तस्य सर्वानुगतस्याभावात्। यो हि सर्वानुगतः अन्यूनोऽनतिरिक्तो धर्मः स एव शक्यतावच्छेदकः। तस्याभावे स उक्तलक्षणो व्यापारः कथं शक्यः कथं धातुवाच्यः स्यात्। कर्तृभेदेन स्वरूपभेदेन चानेकत्वेन स्वतोऽनुगमाभावेन अनुगमकस्य कस्याप्यभावेन च कः शक्यः को न शक्य इति निर्धारणाभावेन शक्तेरनिश्चये शक्यस्याप्यनिर्णय इत्यर्थः। घटादिस्थले घटत्वस्यैकस्य शक्यतावच्छेदकत्वेन तेन रूपेण सर्वेषां घटानां बुद्धिविषयत्वेन तेषु घटपदस्य शक्तिर्निर्णीयते। तथा च शक्तेरपि भवति अनुगमः। तथा चोक्तं भट्टपादैः— आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।

शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यति॥ (त.वा.3-1-6-12)

---

[1] अ1- "अपि" नास्ति

[2] अ1-कारता, अ3-कारणतावच्छेदक, 1915-कारणताव

[3] त1,त5-"च" नास्ति, ब1-अत्र तु

[4] भ1-सिद्धि

[5] भ1- "न" नास्ति

[6] द3-तत्कल्पनं न युक्तम्

[7] ज1-अश्वत्वादिनेव

[8] द1-मैवम् अत्रापि, ज1- स एवात्रापि

[9] ज1-फूत्कारत्वफलत्वादिनैव

[10] जै-अन्यथा सैन्धवादिपदवाच्यतावच्छेदकत्वेनाप्यत्नत्वादिनैव प्रतीतिरिति दिक्।

भावानां पदार्थानामानन्त्येऽपि नानात्वेऽपि एकं घटत्वादिरूपमनुगमकं कृत्वा शब्दो घटादिशब्दः सुकरसम्बन्धः, सुकरः सुज्ञेयः सम्बन्धः शक्तिरूपो यस्य, शब्दस्य अनन्तघटेषु शक्तिरूपः सम्बन्धः सुखेन ज्ञातुं शक्यः। अत्र कथं न शक्य इति नञ्घटितः पाठोऽयुक्तः।

न च तत्वं तत्त्वमवच्छेदकमिति॥ तत्त्वम् – फूत्कारत्वादिकम्। अवच्छेदकम् - व्यावर्तकम्। फूत्कारत्वादयो नाना। तथा च शक्यता नानाधर्मावच्छिन्ना। एवञ्च नानाधर्मावच्छिन्नशक्यतानिरूपितैकधर्मावच्छिन्नशक्ततावत्त्वेन नानार्थतापत्तिः। अनुगमकस्यैकधर्मस्याभावे नानाशक्त्यापत्तिश्चेत्यत आह - नानार्थतापत्तेः नानाशक्त्यापत्तेश्चेति॥ ननु शक्यतावच्छेदकतयैवेति॥ अयं भावः - यथा घटं प्रति दण्डस्य कुलालादेश्च कारणत्वम्, कारणतावच्छेदकं दण्डत्वकुलालत्वादिना नानाविधः। तेषामनुगमको धर्मः कारणतावच्छेदकत्वम्। तथा च कारणतावच्छेदकतया दण्डत्वादेरनुगमः, तथा प्रकृते फूत्कारत्वादेर्नानात्वेऽपि पचादिशक्यतावच्छेदकतया तेषामनुगमेन न नानार्थतापत्तिर्नापि शक्तिनानात्वापत्तिरिति भावः। दृष्टान्तमाह - अतएवेत्यादिना। जलत्वं जातिरिति सिद्धान्तः। तत्साधनन्तु मुक्तावल्यामित्थमस्ति - जन्यस्नेहजनकतावच्छेदकतया जन्यजलत्वजातिसिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धिरिति।

लीलावत्युपाये जलपदशक्यतावच्छेदकतया जलत्वजातिः साधिता। जलपदशक्याः यावत्यो जलव्यक्तयः। शक्यता तासु , तदवच्छेदकं जलत्वं जातिरूपम्। तथैवात्र पच्शब्दशक्यतावच्छेदकतया फूत्कारत्वादि शक्यतावच्छेदकमिति भावः। द्रव्यत्वादिजातिसाधनप्रकारमन्यमतेन दर्शयन् स्वाभिप्रायं साधयति – द्रव्यानुगतबुद्ध्या द्रव्यत्वस्येति॥ इदं द्रव्यमिदं द्रव्यमित्यनुगतबुद्धिप्रयोजकतया सकलद्रव्यसमवेतायाः जातेः सिद्धिः। तस्या एकत्वेन सर्वत्र विद्यमानतया सर्वत्रापि एकाकारबुद्धेः समुदयः। गुणपदशक्यतावच्छेदकतया गुणत्वसिद्धिः॥ गुणपदस्यापि स्वार्थवाचकतया तदर्थे विद्यमानं गुणत्वं शक्यतावच्छेदकम्, तद् विना गुणपदशक्यताननुगम एव स्यादिति प्रकृतेऽपि यथोक्तं तथा स्वीकार्यम्। तच्च – पचादिशक्यतावच्छेदकतया अनुगतं फूत्कारत्वादिरूपम्। जातिरूपम् - जातिलक्षणा-

क्रान्तत्वात् ।उपाधिर्वेति॥ व्यावर्तको धर्मः। यन्मते नित्यत्वघटिताया जातेरस्वीकारस्तन्मतेनेदम्। अद्वैतमते ब्रह्मणोऽतिरिक्तस्य मिथ्यात्वस्वीकारात्।

खण्डयति- चेन्नेति॥ तथाहि- घटपदेन पटबोधः कस्मान्न भवतीति प्रश्ने उत्तरम् घटपदम् घटत्वेनैव स्वार्थबोधकम् । घटत्वेनेत्यत्र वैशिष्ट्यम् तृतीयार्थः। तथा च घटपदेन घटत्वविशिष्ट एव बोध्यते न तु घटत्वाविशिष्टः पटादिः।एवमेव पचादिपदम् फूत्कारत्वादिनैव स्वार्थव्यापारं बोधयति, अतः ते एव फूत्कारत्वादयः धर्माः अवच्छेदकाः स्वीकार्याः, न तु शक्यतावच्छेदकत्वादीनामनुगमकत्वमिति भावः। शक्यतावच्छेदकत्वेन शक्यतावच्छेदकानामनुगमकत्वे तेन रूपेणैव शाब्दः स्यादिति तन्नेष्टमित्याह - कल्प्यमानधर्मपुरस्कारेणेति। अनुभवविरोध एव मानम्। अथवा कल्प्यमानो धर्मः व्यापारत्वम् तेन रूपेण न शाब्दबोधः। फूत्कारत्वादिना एव बोधस्यानुभवसिद्धत्वात्।

ननु शक्यतावच्छेदकत्वेनानुगमाभावे दण्डत्वादीनामपि कारणतावच्छेदकतया जातित्वासिद्धिः। या या कारणता सा सा किञ्चिद्धर्मावच्छिन्नेति व्याप्त्या घटादिकं प्रति या दण्डादिनिष्ठा कारणता तयापि यत्किञ्चिद्धर्मावच्छिन्नया भाव्यमिति कारणतावच्छेदकतया दण्डत्वादिजातिसिद्धिः उक्ताभिप्रायस्वीकारे नोपपद्यत इति शङ्कते - न च कारणतावच्छेदकतयेति॥ नन्वेवं सति दण्डत्वादेः कथं सिद्धिरित्यत आह - येन रूपेण कारणतेति॥ यथा येन रूपेण शक्यता स एव शक्यतावच्छेदकः तथैव येन रूपेण दण्डत्वादिरूपेण कारणताबोधस्तदनुभवः, स एव दण्डत्वादिः कारणतावच्छेदकः इति। घटम्प्रति दण्डः कारणमिति कार्यकारणभावे दण्डनिष्ठकारणताया दण्डत्वेनैवानुभव इति दण्डत्वादिसिद्धिरिति भावः। तथा च कारणतावच्छेदकत्वेन दण्डत्वादेः साधनपरम् मतमपास्तं स्यादिति शङ्कितुराशयः। खण्डयति – कल्प्यमानलघुरूपेणेति॥ कल्प्यमानो धर्मः, दण्डत्वादिः, तेन रूपेण कारणत्वे सम्भवति। गुरुरूपेण - कारणतावच्छेदकत्वशक्यतावच्छेदकत्वादिरूपेण। तदस्वीकारे द्रव्यत्वादेः फूत्कारत्वादेरस्वीकारे। तत्र अनुगमकधर्मे क्षतिः - अवच्छेदकत्वानुपपत्तिस्तस्या अभावो राहित्यम्।

अत्र चेति॥अयमाशयः। फूत्कारत्वादीनामस्ति सिद्धरूपत्वम्, फूत्कारादिषु फूत्कारत्वादेः स्वतः सिद्धत्वात्। यथा घटादौ घटत्वादि स्वयं सिद्धमेव, तथा तेन

रूपेण फूत्कारत्वादिरूपेण बोधोऽनुभवसिद्धः, तथैव कार्यकारणभाव आवश्यकः। यथा घटत्वविशिष्टबोधं प्रति घटत्वविशिष्टोपस्थितिः कारणमिति तथैव फूत्कारत्व-विशिष्टबोधं प्रति फूत्कारत्वविशिष्टोपस्थितिः कारणमित्येव कार्यकारणभाव इति तदाह- आवश्यकत्वे इति॥ कल्प्यमानेति॥ एतदपेक्षया अन्यधर्मरूपेणेत्यर्थः। अनेनैव निर्वाहे धर्मान्तरेण तथा स्वीकारे गौरवम्।

अन्यथास्वीकारे दोषमाह - अन्यथेति। सैन्धवादिपदम्, घोटक-लवणान्यतरबोधकं तथा अश्वत्वेन, लवणत्वेन वा प्रकरणादिना बोधः, शक्यता-वच्छेदकम् भिन्नम् अश्वत्वम्, लवणत्वं वेति। यदि शक्यतावच्छेदकत्वेनापि धर्मान्तरस्य साधनं क्रियते तथा सैन्धवादिपदवाच्यतावच्छेदकत्वेन अश्वादिवृत्ति-धर्मान्तरम् अन्यतरत्वम्, अन्यद् वोपकल्प्येत न तु अश्वत्वादिकमेव, तथा च अनुभवविरोध एव। यदि चानुभवबलादत्र अश्वत्वादिनैव प्रतीतिरित्युच्यते तदा प्रकृतेऽपि फूत्कारत्वादिनैव प्रतीतिरिति समानमेव समाधानम्, अन्यतर-त्वादिजगत्प्रवेशेन गुरुभूतमिति ध्येयम्।

9. इदं च[१] तार्किकरीति[२]मनुरुध्य। वस्तुतः[३] कारणतावच्छेदकत्वादिनापि[४] न[५] जातिसिद्धिरिति "व्यापारो भावने[६]" (वै.सि.का.5) ति कारिकायां वक्ष्यत इति कथमेतदिति चेन्न[७]। तत्तद्रूपेणैव तस्य[८] शक्यत्वात्। अत एव पचतीत्यादौ फूत्कारत्वा[९]-धःसन्तापनत्वयत्नत्वादि[१०]भिर्बोधः सर्वसिद्धः संगच्छते[१]। न च नानार्थता, बुद्धि-स्थत्वादेः[२] शक्यतावच्छेदकानां[३] तदादाविवानुगमकस्य सत्त्वात्। उक्तं च हरिणा -

---

[१] अ1- "च" नास्ति

[२] अ1,जो2-वार्तिक

[३] त2,म,अ4--"तु" अधिकं

[४] त1,त5-कारणतावच्छेदकत्वेनापि

[५] जै- "न" नास्ति

[६] अ1-भावनासैवेति

[७] त1-"न" नास्ति

[८] त4,अ4-तस्य तस्य

[९] द1-फूत्काराधः

[१०] ज1-फलत्वादि

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।

बुद्ध्या प्रकल्पितोऽभेदः[४] क्रियेति व्यपदिश्यते[५]॥ (वा.तृ.क्रि.4)इति।

क्रमजन्मनामेषां व्यापाराणां समूह[६] एकत्वं(एकत्व) बुद्ध्या[७] संकलनात्मिकया[८] प्रकल्पितः[९]। स च समूहः स्वभावतो गुणभूतैरवयवैर्युक्त इत्यर्थः।

एवं च सर्वेषां कारकाणां व्यापारा वाच्याः। यदा [यो]यस्य[१०] बुद्धिस्थस्तदा[११] सोऽभिधीयते तदैव[१२] तदाश्रयः कर्ता। अत एव "काष्ठं पचति[१३], स्थाली पचति" इति संगच्छते। एवं च[१४] "काष्ठेन पचति" इत्यपि[१५] नानुपपन्नं, तदा तद्व्यापारस्य धात्वर्थत्वाविवक्षणात्[१६]। एतेन[१७] काष्ठक्रियाया वाच्यत्वे तृतीया न स्यात्,अवाच्यत्वे प्रथमा न स्यादित्यादिकमपास्तमिति न कश्चिद्दोष इति ध्येयम्। एतस्य[१८] धातुवाच्यत्वे मानं तु वक्ष्यते।

---

[१] त1,त5-यत्नत्वादिभिर्बाधाः सर्वसिद्धाः सङ्गच्छन्ते।, अ4- "यत्नत्व" नास्ति

[२] अ1-बुद्धिसत्त्वादादेः

[३] 1915-शक्यतावच्छेदकादीनां

[४] अ1,ब1,1900,द2,ब3-प्रकल्पिताभेदः

[५]जै- तदादावि(वानुगमकस्य सत्त्वात्। उक्तं च हरिणा-गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पितोऽभेदः क्रियेति व्यपदि)श्यते – ()कोष्टकान्तर्गतः ग्रन्थः नास्ति।

[६] अ4-समूहः

[७] अ1,त2,ब1,1900,अ4-एकत्वबुद्ध्या

[८] त1,त5,जा1-संवलनात्मिकया, ब2-संकलना........., म-सकलनामिकया, अ4- संकल्पनात्मिकया

[९] अ1- प्रकल्पिताभेदो यस्य, त2,ब1,1900,द3,ब3 -प्रकल्पितोऽभेदो यस्य, अ4- प्रकल्पितः अभेदः यस्य सः समूहः।

[१०]1900,ब3-यो यदा यस्य, त1,1915-यदा यो यस्य, ब1,द3,भ2,द5-यदा यस्य यो, अ1,जो2-यदा यो("यस्य" नास्ति),म-यश्च

[११] अ4-बुद्धिस्थत्वं तदा

[१२] ब1-तदेव,ब2-"तदैव" नास्ति

[१३] भ2,द7-"अपि" नास्ति

[१४] त2-एतेन

[१५] जो2,भ1-इति

[१६] 1915-धात्वर्थाविवक्षणात्

[१७] त1-तेन

[१८] त5-एतस्या

अयं[१] प्रत्यय[२]वाच्य एवेति मीमांसकाः। अयं न[३] वाच्यः, किं त्वेतद्विशेषः[४] कृतिरिति नैयायिकाः। तत्रापि वक्ष्यते[५]।

---

इतःपूर्वं कारणतावच्छेदकतया यथा जातिसिद्धिः तथैव शक्यतावच्छेदकतयापि जातिसिद्धिरिति उक्तम्॥ तेनैव च व्यापारस्य प्रतीतिरित्युक्तम्, सा चेयं नैयायिकरीतिः, तदाह - इदञ्च तार्किकरीतिमनुरुध्येति॥ एषा च तार्किकरीतिः वैयाकरणेन भवता नाभ्युपेयत एव। व्यापारो भावनेतिकारिकाव्याख्यायां भवता खण्ड्यमानत्वात् इति तदेवाह - वस्तुत इति॥ व्यापारो भावनेति कारिकाव्याख्याने कारणतावच्छेदकत्वेन न जातिसिद्धिरित्युक्तम्। तत्र हि "एवं कारणतावच्छेदकत्वं स्वरूपसंबन्धविशेष इत्यपि निष्प्रमाणम्। अतो न तदवच्छेदकत्वेनापि जातिसिद्धिरित्युक्तम्।" तद्याख्यानन्तु तत्रैव विधास्यते। तथा च कथं तेनरूपेणात्र शक्यतावच्छेदकत्वनिर्णयः। शङ्कामपनुदति – तत्तद्रूपेणैवेति॥ फूत्कारत्वादिरूपेणैव, तस्य व्यापारस्य शक्यत्वम् धातुवाच्यत्वम्। तत्तद्रूपेण व्यापारस्य शक्यत्वे प्रमाणमाह- अत एव पचतीत्यादौ इति॥ अयमाशयः - यच्छब्दोच्चारणानन्तरं येन रूपेण योऽर्थः प्रतीयते तेन रूपेण सोऽर्थः तस्य वाच्य इति सामान्यनियमेन पचतीत्युक्तौ कदाचित् फूत्कारत्वेन फूत्कारः, कदाचित् अधः संतापनत्वादिना अधः सन्तापनादेः प्रतीतिरनुभवसिद्धा, अतः पच्धातोः फूत्कारत्वादिना फूत्कारादयो वाच्याः। तत्रेदं बोध्यम्, पचादिधातौ द्विविधो धर्मः, धातुत्वम्। पच्त्वादिविशेषश्च। तत्र धातुत्वेन व्यापारो वाच्यः पचादिधातूनाम्। तथा चोक्तम् - सिद्धान्तकौमुद्यां भावकर्मप्रक्रियायाम् - 'सा च धातुत्वेन सकलधातुवाच्या भावार्थकलकारेणानूद्यते। नन्वेवं सति सर्वधातूनां पर्यायतापत्तिः क्रियात्वेन क्रियावाचकत्वाविशेषादित्यतः पच्त्वेन फूत्कारादीनामपि विशेषरूपाणां तत्तद् धातुवाच्यत्वेन प्रत्ययः, स चोक्तरीत्या अनुभवगम्यः तथा सति न पर्यायतापत्तिरिति बोध्यम्।" इति।

---

[१] त2--"च" अधिकं

[२] 1915-प्रयत्न

[३] भ2,द5-अयं तु न

[४] ब2-"किं तु" नास्ति, ज1- अयं तु वाच्यः एतद्विशेषः

[५] "तत्रापि वक्ष्यते" नास्ति

ननु पूत्कारत्वादिनानाधर्मेण यदि शक्यता तदा फूत्कारादिनिष्ठा शक्यता फूत्कारत्वादिनानाधर्मावच्छिन्ना जाता। पचादिधातूनां फूत्कारादयोऽर्थाः वाच्याः, शक्या इति यावत्। शक्यता च तेषु व्यापारेषु, तत्र विद्यमानाः फूत्कारत्वाधःसन्तापनत्वादयो धर्माः शक्यतावच्छेदकाः, शक्यता च फूत्कारत्वादिनानाधर्मावच्छिन्ना। शक्यता निरूपिता शक्तता - सा च शक्तपचादिनिष्ठा, तदवच्छेदको धर्मः पच्त्वरूप एक एव । तथा च फूत्कारत्वादिरूपनानाधर्मावच्छिन्नशक्यतानिरूपितैकधर्मावच्छिन्नशक्ततावत्त्वं पचादिधातौ, एवं सति नानाधर्मावच्छिन्नशक्यतानिरूपितैकधर्मावच्छिन्नशक्ततावत्त्वरूपं नानार्थत्वमापद्यमानं भवतीति मनसि निधायाशङ्कते - न च नानार्थतापत्तिरिति॥ न च पचादीनामुक्तरीत्या नानार्थकत्वमिष्टम् इति वाच्यम्। पचतीति स्थले फूत्कारत्वादिप्रकारकबोधस्य निरपेक्षतया जायमानस्य बाधापत्तेः। नानार्थत्वेनाभिमतहर्यादिस्थले प्रकरणादिना एकैकधर्मप्रकारकबोधस्य जायमानत्वेनात्र तदभावेन नानार्थत्वस्यास्वीकारात्।

अननुगमदोषं वारयति – बुद्धिस्थत्वादेरिति॥ तदादिवदिति॥ अयमाशयः - तदादिशब्देभ्यः चैत्रत्वादिरूपेण चैत्रादिबोधोऽनुभवसिद्धः। स चानुगमकधर्माभावे अनुपपन्नः। अतो बुद्धिविषयतावच्छेदकत्वं तदनुगमकधर्ममङ्गीकृत्य तेनानुगतीकृत्य चैत्रत्वाद्यवच्छिन्नेषु चैत्रादिषु तदादीनां शक्तिः।

अत्रेदं बोध्यम् - तदादिशब्दानां न तावत् चैत्रत्वाद्यवच्छिन्ने शक्तिः, किन्तु बुद्धिविषयतावच्छेदकत्वोपलक्षितचैत्रत्वाद्यवच्छिन्ने शक्तिः, तैः बुद्धिविषयस्यैव बोधात्। तथा च नानुभवविरोधः, यद्यपि चैत्रत्वादयो नाना धर्मा अननुगताः, किन्तु तेषु बुद्धिविषयतावच्छेदकत्वमेकमेव। बुद्धिरिष्टसाधनत्वबुद्धिः। चैत्रादौ इष्टसाधनत्वस्य विद्यमानत्वात्। तद्विषयश्चैत्रादिः, विषयता चैत्रादौ विषयतावच्छेदकं चैत्रत्वादि। अवच्छेदकत्वं चैत्रत्वादौ सर्वत्रेति समन्वयः। एवमेव प्रकृतेऽपि पचादिधातूनां बुद्धिस्थत्वोपलक्षितफूत्कारत्वाद्यवच्छिन्ने शक्तिः इति बुद्धिः (फूत्कारादिसमूहविषयकसङ्कलनात्मकैकबुद्धिः), पचादिधातुप्रयोक्तृसमवेताः तत्स्थत्वोपलक्षिता ये फूत्कारत्वादयो धर्मास्तदवच्छिन्ने शक्तिरिति भावः। बुद्धिस्थत्वम् - बुद्धिविषयत्वम् । तच्च भिन्नं भिन्नमिति हेतोः तेन बुद्धिविषयतावच्छेदकत्वस्य परिग्रहः। तस्यैक्यात् चैत्रत्वादीनामनुगमो बोध्यः। तथा च अननुगतनानाधर्मा-

वच्छिन्नशक्यतानिरूपितैकधर्मावच्छिन्नशक्ततात्वमेव नानार्थत्वम्। यथा हर्यादौ। प्रकृते चानुगमसत्त्वान्न दोष इत्यवधेयम्।

तथा चोक्तम् – गुणभूतैरवयवैरिति॥ क्रमेण जन्म उत्पत्तिर्येषां ते क्रमजन्मानः, तेषां फूत्कारादिव्यापाराणां समूहः, क्षणनश्वराणामपि तेषां सङ्कलनात्मकैकत्व-बुध्या, अवयवानां भेदेऽपि प्रकल्पितः अभेदः एकत्वं यत्र समूहे सः सङ्कलनात्मक-बुद्धिकल्पितः समूह एव क्रिया। स च समूहःगुणभूतैरवयवैः फूत्कारादिभिः युक्तः उपलक्षितः क्रियेति व्यपदिश्यते व्यवह्रियते च। तथार्थमाह- क्रमजन्मनामि-त्यादिना॥ ननु फूत्कारादीनां पचादिधात्वर्थत्वे काष्ठानि पचन्तीत्याद्यनुपपत्तिः; फूत्कारादेः काष्ठादिनिष्ठत्वाभावेनाकर्तृत्वादित्यत आह - एवञ्च सर्वेषां कारकाणां व्यापारा वाच्या इति॥ पचादिधातूनां कर्तृव्यापार एवार्थः। यदा देवदत्तादिः शुद्धः कर्ता तदा तद्वृत्तयः फूत्कारादयो वाच्याः। यदा च सौकर्यातिशयादिप्रकाशनाय इतरेषां कारकाणां कर्तृत्वविवक्षा, तदा तद्वृत्तयो व्यापारा अपि धातुवाच्या एव। परन्तु सर्वेषां कारकाणां व्यापारा सर्वदा न धातुवाच्याः। अपि तु यदा यो यस्य बुद्धिस्थः यस्मिन्काले यत्कारणस्थो व्यापारः बुद्धिस्थः सौकर्यातिशयप्रकाशनाय प्रयोक्तृबुद्धिविषयः, तदा सः कर्तृत्वाभिमतकारकस्थो व्यापारो धातुवाच्यः, तदाश्रयस्य काष्ठादेः कर्तृसंज्ञेति भावः। उदाहरणमाह- काष्ठं पचतीति। काष्ठमित्यत्र प्रज्वलनात्मकः काष्ठनिष्ठो व्यापारो धातुनोच्यते, तदाश्रयत्वात् काष्ठानि कर्तॄणि। स्थाली पचतीत्यत्र स्वस्मिन् समावेशनात्मको व्यापारः धातुवाच्यस्तदाश्रयत्वात् स्थाली कर्त्री। काष्ठव्यापारस्य धात्वर्थत्वाविवक्षायान्तु करणत्वेन तृतीयायां सत्यां काष्ठैः पचतीत्यपि। उक्ताशयविस्फोरणेन समागतामापत्तिमपहरति – एतेनेति॥ उक्ताभिप्रायेण। निरस्तम् निराकृतम्। विवक्षया उभयोरपि साधुत्वस्वीकारात्। एतस्य उक्तव्यापारस्य। धातुवाच्यत्वे व्यापारो धात्वर्थ इति विषये। वक्ष्यते इति ॥ सर्वनामाव्ययादीनामिति कारिकाव्याख्यानावसरे।

अयं प्रत्ययवाच्य इति॥ अयं व्यापारः आख्यातप्रत्ययवाच्यः न तु धातुवाच्य इति मीमांसकाः कुमारिलभट्टमण्डनमिश्रादयः । अयं प्रयत्नवाच्य इति पाठान्तरम्। अयं व्यापारः प्रयत्नपदेनाभिधीयत इति मीमांसकाभिप्राय इति व्याख्यातव्यम्। अत्र प्रत्ययवाच्य इत्येव पाठः युक्तः। अयं व्यापारो न वाच्यः,

किन्तु व्यापारविशेषः कृतिरात्मसमवेता एव वाच्या इति नैयायिकाः। इदानीं वाच्यत्वविषयको विचारो वाचकविशेषजिज्ञासानपेक्षयैवेति ध्येयम्। इदानीं वाचकनिर्णयायाह- तत्रापि वक्ष्यते॥ व्यापारो भावनेत्यादि कारिकाव्याख्यानावसरे।

### 3.4 आश्रयः आख्यातार्थ इति सिद्धान्तप्रदर्शनम्

**10.** आख्यातस्य [१] न कर्ता वाच्यः, कृतिमतो व्यापारवतो वा कर्तृत्वेन तच्छक्तावनन्तकृत्यादौ[२] शक्यतावच्छेदकत्वे गौरवादिति नैयायिकाद्युक्तं[३] दूषणम्[४] अस्मन्मताज्ञानादिति ध्वनयन्नेव स्वमतमाह- आश्रये त्विति[५]। आश्रये फलाश्रये व्यापाराश्रये च[६]। फलव्यापारयोर्धातुलभ्यत्वादाश्रय[७]मात्रमर्थः, अनन्यलभ्यस्य[८] शब्दार्थत्वात्। तथा चाश्रयत्वमेव शक्यतावच्छेदकम्, अतो[९] नोक्तदोषावकाश इति भावः।

अत एव कृतिविशिष्टवाचि[१०]तृचः कृतिवाचककृधातुयोगे कर्तेत्यत्राश्रयपरत्वमिति नैयायिकाः[११]।एवं[१२] कृत्प्रत्ययस्थले भावनांशस्याक्षेप[१३]लभ्यत्वादाश्रयमात्रमर्थ इति मीमांसका[१४] मन्यन्ते।

---

[१] जै-अथ आख्यातस्य

[२] अ1-वनन्ततत्तत्कृत्यादेः, त4-कृत्यादेः

[३] अ3,भ1,द7-नैयायिकोक्तं

[४] त1,त5-नैयायिकाद्युक्तदूषणम्, म-नैयायिकाद्युक्तमस्मन्मताज्ञानादिति

[५] त1,त5-आश्रयेति

[६] वा2,त4,द4-वा

[७] भ2,त्रि,द5-लभ्यत्वात्तदाश्रय

[८] अ4- अनन्यलभ्यस्यैव

[९] अ3,भ1-इति

[१०] 1900,1915,अ4-कृतिविशिष्टकर्तृवाचि

[११] त1,त5-नैयायिकः

[१२] जो2-एवं च

[१३] अ1-स्याक्षेपावादे

[१४] भ1,द7-"मीमांसकाः"नास्ति, भ2-लभ्यत्वात्तदाश्रयमात्रमर्थं मीमांसका, ज1- मात्रमर्थं मीमांसका मन्यन्ते

आख्यातस्येति॥ आख्यातपदमत्र तिङ्परम्। तस्य कर्ता नार्थः, गौरवात्। तथाहि - कर्तुराख्यातवाच्यत्वे, कर्तृत्वमेव शक्यतावच्छेदकं स्यात् , कर्तृत्वञ्च कृतिमत्त्वं व्यापारवत्त्वं वा, कृतिमत्त्वं कृतिः, व्यापारवत्त्वं व्यापारः, कृतेर्व्यापारस्य च नानात्वेन शक्यतावच्छेदकनानात्वमेव स्यात् , तथा चाननुगमः। अननुगमे च शक्तेरननुगमः। तथा चानन्तेषु शक्यतावच्छेदकत्वकल्पनायां गौरवम् इत्येवं प्रकारेण नैयायिकैर्यद्दूषणं दत्तं तत्खण्डयति - अस्मन्मताज्ञानात् इति॥

मूले स्वमतमाह - आश्रये इति॥ अत्र मूलाभिप्रायं विस्फोरयन् स्वमते लाघवप्रदर्शनपूर्वकं नैयायिकमतं खण्डयति - आश्रये फलाश्रये व्यापाराश्रये च॥ ननु कृतिमात्रे शक्तौ लाघवमित्यत आह – फलव्यापारयोर्धातुरिति॥ धातोः फलव्यापारयोः शक्तिरिति फलव्यापारयोर्धातुलभ्यत्वेनाख्यातस्य तत्र शक्तिकल्पनं नोचितम् , अनन्यलभ्यो हि शब्दार्थ इति न्यायात्। पौनरुक्त्यदोषप्रयुक्तोऽयं न्यायः। तथा च आश्रयमात्रमर्थ इति वैयाकरणमते गौरवाभावः। आश्रयस्य शक्यत्वे तद्वृत्ति आश्रयत्वं शक्यतावच्छेदकम्।

ननु आश्रयत्वस्य शक्यतावच्छेदकत्वे, तस्याधारत्वरूपत्वेन निरूपकाधेयभेदात् सम्बन्धभेदाच्च भेदे शक्तेरानन्त्यादननुगमः इति चेन्न। आश्रयस्य निरूपकभेदेन भिन्नत्वेऽपि आश्रयत्वस्याखण्डोपाधिरूपस्य निरूपकाद्यनपेक्षत्वे-नाभेदात्। तथा च न शक्त्यननुगमः। इदमेव नैयायिकानां वैयाकरणमताज्ञानम्।

आश्रयस्य आख्यातबोध्यत्वं नैयायिकमीमांसकाभ्युपगतमेवेति नैयायिक-मीमांसकौ स्वमते अवतारयति - अत एव कृतिविशिष्टवाचीति ॥ नैयायिकमते तृच्प्रत्ययस्य कृतिविशिष्टः कर्तार्थः। यथा पक्तेत्यस्य विक्लित्त्यनुकूलव्यापारा-नुकूलकृत्याश्रय इत्यर्थः। तत्र विक्लित्त्यनुकूलव्यापारः धात्वर्थः, कृत्याश्रयश्च तृजर्थः, अनुकूलत्वं संसर्गः।तथा कर्तेत्यत्र कृधातोरेव कृतिः अर्थ इति तृचः कृत्याश्रयार्थकत्वे कृत्यनुकूलकृत्याश्रय इति बोधः स्यात् । ततश्च कृतेः द्विःभान-मङ्गीकार्यं, यच्चानुभवविरुद्धमिति नैयायिकैः तत्र कृतेः धात्वर्थत्वं तृचः आश्रय-मात्रार्थकत्त्वं च स्वीक्रियते। न तु कृतिविशिष्टाश्रयार्थकत्वं, कृतेः धातुनैव लाभात्। एवमेव मीमांसकाः कर्तृकृत्प्रत्ययस्थले सर्वत्र भावनायाः आक्षेपाल्लाभेन आश्रय-

मात्रं कर्तृकृदर्थं इति स्वीकुर्वन्ति। तद्वन्ममापि मते आख्यातस्य आश्रयमात्रमर्थः, इति सर्वमवदातम्।

3.5 आश्रयस्य अन्यलभ्यत्वमिति शङ्का – तन्निरासश्च

**11.** अथाश्रय आख्यातार्थ इत्यत्र मानाभावः। तत्प्रतीतिश्चा[१] क्षेपाल्लक्षणया वोपपद्यते[२]। प्रथमान्तपदेन तदुपस्थितिसत्त्वात् देवदत्तः पाकानुकूलकृतिमान्, एकदेवदत्ताश्रयको [पाकानुकूलो][3] वर्तमानो व्यापार इति वा[४] बोधोपपत्तावन्यलभ्यत्वेन शक्तिकल्पनाऽयोगाच्चेति[५] चेदत्र वदन्ति[६] -

कर्त्रादेरवाच्यत्वे युष्मदि समानाधिकरणे मध्यम इति पुरुषव्यवस्था[७] न स्यात्[८], कर्तुरवाच्यत्वेन[९] सामानाधिकरण्याभावात्। देवदत्तः पचतीत्यादौ कर्तरि तृतीया, पच्यते तण्डुल इत्यादौ[१०] द्वितीया च[११] स्यात्, कर्त्राद्यनभिधानेन[१२] तयोर्दुर्वारत्वात्। ननु तन्निष्ठसंख्याभिधानात् तद[१३]भिधानम्। एवं[१४] युष्मदस्तिङुपात्तसंख्यान्वयिवाचकत्वं[१५] सामानाधिकरण्यमपीति चेन्न, तिङ्वाच्यसंख्यायाः कुत्रान्वय इत्यनिश्चयात्। तथा च कर्तृप्रत्ययेऽपि[१६] संख्याया उभयत्रान्वये[१] उभयोरप्यभिधेयत्वं स्यात्। न च

---

[१] अ3-तत्प्रतीतिस्त्वा

[२] द4,ज1-चोपपद्यते

[3] अ1,अ4- "पाकानुकूलो" इत्यधिकं

[४] अ3,त2,ब1,1900,भ1,भ2,1915- "वा" नास्ति

[५] अ3-योगादिति

[६] जो2-चेन्न

[७] द1,भ2,त्रि,द5,ब2-मध्यमपुरुष इति व्यवस्था

[८] ज1-मध्यमपुरुष इति व्यवस्थानवत्

[९] त4,अ4-कर्त्रादेरवाच्यत्वेन

[१०] त4,अ4-इत्यादौ कर्मणि

[११] अ1- "च" नास्ति

[१२] त1,भ1,त5-कर्त्राद्यनभिधाने

[१३] ब1-तत्तद

[१४] त1,त5-"एवं"नास्ति

[१५] जो2-संख्यान्वयित्वात्

[१६] ब3-"अपि"नास्ति, अ4- कर्तृप्रत्ययस्थलेपि

कर्त्रैकत्वेनैव[२] संख्याभिधीयत इति शङ्क्यम्, तथा शक्तेरबोधनात्[३]। विशेषणतया कर्तुर्वाच्यत्वसिद्धेश्च, शक्यतावच्छेदकेऽपि गौरवाच्चेति[४]। किं च कृत्तद्धितसमासैः संख्यानभिधानात्[५] तत्रैवं[६] कर्तुरनभिधाने[७] "देवदत्तः पाचकः" इत्यादौ तृतीयाद्यापत्तेः[८]।

---

अथ आश्रय आख्यातार्थ इति॥ यद्यपि आख्यातपदम् तिङन्तपरम्, "आख्यातमाख्यातेन क्रियासातत्य' इति वार्तिके तथैव प्रयोगात् , "भावप्रधानमाख्यातमि'ति निरुक्तेऽपि आख्यातपदं तिङन्तपरमेव। क्वचित्तु लक्षणया तिङ्परत्वम् धातुपरत्वञ्च प्राचीनकाले, तथापि इदानीं तत् तिङ्प्रत्ययपरम्। इदानीमुपलभ्यमानेषु सर्वेषु शाब्दबोधग्रन्थेषु आख्यातशब्दस्य तिङ्क्षेव प्रयोगात्। मानाभाव इति॥ लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति नियमेन प्रमाणाभावे कथमिदम्। ननु आख्यातोच्चारणे नियमतः आश्रयप्रतीतिरेव तत्र मानमिति चेन्न। तत्प्रतीतेः प्रकारान्तरसिद्धत्वात्।

तस्याः प्रकारान्तरसिद्धिमेवोपपादयति – तत्प्रतीतिश्चेति॥ आक्षेपादिति॥ आक्षेपोऽनुपपत्तिरर्थापत्तिरिति यावत्। यथा पीनोऽयं देवदत्तो दिवा न भुङ्क्ते इत्यत्र दिवाऽभुञ्जानस्य देवदत्तस्य भोजनं विना पीनत्वानुपपत्त्या रात्रिभोजनं कल्प्यते। एवमेव प्रकृते आख्यातार्थः भावना कृतिर्वा। आश्रयं विना भावनाया स्थित्यनुपपत्त्या आश्रय आक्षिप्यते। तथा च आश्रये शक्तिं विनैव तत्प्रतीत्युपपत्तौ आश्रये शक्तेरभ्युपगमो निरर्थकः। अर्थापत्तिप्रमाणमिदमेवोच्यते। अर्थस्यापत्तिः कल्पनमिति विग्रहे अर्थापत्तिशब्दः प्रमारूपे अर्थे वर्तते। अर्थस्यापत्तिर्ययेति विग्रहे अर्थापत्तिशब्दः प्रमाणपरोऽपि।

---

१ अ3,भ1- "अपि" अधिकं

२ अ1-कत्रेकत्यत्वेनैव, अ3,भ1-कर्त्रैकत्वत्वेनैव, द1-कर्तृत्वेनैव, अ4-कर्तृगतत्वेनैव

३ द3-शक्तेरवबोधनात्,ज1-तथा तथा शक्तेरबोधनात्

४ त1,त4,त5- "इति" नास्ति

५ जो2-असंख्याभिधानात्

६ त1,1900,1915-तत्रैव

७ त1-कर्तुरनभिधानात्

८ अ3-तृतीयाद्यापत्तिः

उपपाद्यज्ञानेन उपपादककल्पनमर्थापत्तिः, उपपाद्यज्ञानम् भावनाज्ञानम्, तेन उपपादक ज्ञानम्, आश्रयज्ञानमिति समन्वयः। घटपदादाकाशबोधवारणाय वृत्तिज्ञानजन्योपस्थितेरेवकारणत्वेन आक्षिप्तभावनाया शाब्दबोधविषयत्वा-सम्भवादित्यरुचेराह – लक्षणया वेति॥ कर्तुराश्रयस्य प्रतीतेर्लक्षणया सम्भवादिति सम्बन्धः। आख्यातस्य भावनायां शक्तिः आश्रये च लक्षणा स्वीक्रियते। ननु एतन्नोचितं , युगपद् वृत्तिद्वयज्ञानासंभवेन लक्षणायाः स्वीकारस्यानौचित्यात्। अथ गङ्गायां मीनघोषौ स्त इति प्रयोगसाधनाय युगपद्वृत्तिद्वयमप्यङ्गीकार्यमेवेति चेदस्तु। तथापि अत्र आश्रये लक्षणा वक्तुं न शक्या, अन्वयाद्यनुपपत्तिरूपलक्षणा-बीजाभावात्। इमामेवारुचिमादायाह - प्रथमान्तपदेन तदुपस्थितिसत्त्वादित्यादि॥ देवदत्तः पचति इत्यत्र नैयायिकैः प्रथमान्तार्थविशेष्यकबोधस्वीकारेण तन्मते बोधमाह - देवदत्तः पाकानुकूलकृतिमान् इति। तिङः कृतिरर्थः, कृतेश्च देवदत्तरूपा-श्रये अन्वयः इति प्रथमान्तपदेनाश्रयलाभः।

मीमांसकमते व्यापारमुख्यविशेष्यकबोधस्वीकारादाह - एकदेवदत्ताश्रयको वर्तमानो व्यापार इति॥ एतन्मते तिङो व्यापारोऽर्थः। आश्रयस्यापि उक्तरीत्या उप-स्थितिस्तस्य देवदत्तस्याश्रयस्य व्यापारेऽन्वयः। संख्याकालयोश्च क्रमेण आश्रये व्यापारे चान्वय इति बोध्यम्। एवञ्च आश्रयस्य प्रथमान्तपदेन आक्षेपादिना वा लाभे अन्यलभ्यत्वात् तत्राश्रये शक्तिकल्पनमयुक्तमित्यभिप्रायः।

वैयाकरणमतावलम्बिनामत्र मतमाह - अत्र वदन्तीत्यादिना॥ उक्तरीत्या कर्तुराख्यातावाच्यत्वे "युष्मदि उपपदे समानाधिकरणे मध्यम"(पा.1-4-105) इति सूत्रेण पुरुषव्यवस्था न स्यात्। तथा हि - समानाधिकरणे युष्मदि मध्यमः इत्यर्थः। समानम् अधिकरणम् एकं वाच्यं यस्य तत् समानाधिकरणम्। केन सामाना-धिकरण्यमिति जिज्ञासायां तिङामिह ग्रहणम् । अर्थात् तिङो यो ह्यर्थः स एव यदि युष्मदस्तर्हि तत्र मध्यमः। अत एव कौमुद्यां वृत्तौ लिखितम् "तिङ्वाच्य-कारकवाचिनि युष्मदि" इति। यदा तिङः कर्ता अर्थः तदा त्वं पचसि इत्यादौ तिङ्वाच्यः कर्ता, स एव युष्मदोऽपि वाच्यः, तथा च तिङ्सामानाधिकरण्यस्य युष्मदि सत्त्वात् भवति मध्यमपुरुषव्यवस्था। एवमेव "अस्मद्युत्तमः"(पा. 1-4-107) इत्यत्रापि पुरुषव्यवस्था। कर्तुरवाच्यत्वे इयं पुरुषव्यवस्था नोपपद्येत।

दोषान्तरमाह- देवदत्तः पचतीत्यादौ कर्तरि तृतीयेति॥ उक्तानुक्तव्यवस्था तिङ्कृत्तद्धितसमासैर्भवति। तथा च प्रकृते पचतीत्यत्र तिङाभिधानं भावनायाः, तस्यामेव तिङो विधानात्। एवं सति कर्तुरनुक्तत्वात् "कर्तृकरणयोस्तृतीये"(पा.2-3-18)त्यनेन कर्तरि तृतीयापत्तिः। पच्यते तण्डुल इत्यत्र आश्रये कर्मणि प्रत्ययस्य विधानाभावेन कर्मणोऽनुक्तत्वेन कर्मणि द्वितीयापत्तिश्च स्यादिति। वैयाकरणमते तु उभयत्रापि कर्तरि कर्मणि एव प्रत्ययविधानेन तयोस्तिङोक्ततया प्रथमैवेत्यदोषः, कर्तुः कर्मणश्चानुक्तत्वे एव तृतीयाद्वितीयाप्रवृत्तेः। अयमाशयः- आख्यातस्य कर्तरि कर्मणि वा विधाने उक्तत्वानुक्तत्वव्यवस्था स्वत एव भवति। कर्तरिप्रत्यये कर्तुरभिधानात् उक्ते सर्वत्र प्रथमेति नियमात् तत्समानाधिकरणदेवदत्तादिपदेभ्यः प्रथमैव। कर्मादौ प्रत्यये सति कर्तुरनभिधानात् तृतीया, एवमेव कर्मप्रत्ययस्थलेऽपि। नैयायिकादिमते इयं व्यवस्था नोपपद्यते, तन्मते आख्यातस्य कर्त्रादावविधानात्।

अतः नैयायिकः स्वमते उक्तत्वानुक्तत्वव्यवस्थां पुरुषव्यवस्थां च साधयितुं प्रकारान्तरमाश्रयते - ननु तन्निष्ठसंख्याविधानादित्यादिना॥ तन्निष्ठेति॥ कर्तृकर्मनिष्ठेत्यर्थः। कर्तृनिष्ठा संख्या यदि आख्यातेनोच्यते तदा कर्तुरभिधानम्। कर्मनिष्ठा संख्या यदि आख्यातेनोच्यते तदा कर्मणोऽभिधानम्। आख्यातस्य संख्यारूपोऽर्थः तैरपि स्वीक्रियत एव। द्वितीयं दोषमुद्धरति - एवं युष्मद इति॥ न तावदत्र सामानाधिकरण्यं समानार्थकत्वरूपमपि तु तिङ्वाच्यसंख्यान्वयिवाचकत्वरूपम्। तिङो वाच्या या संख्या तदन्वयी आश्रयः, कर्तृरूपः कर्मरूपो वेति। तादृशार्थवाचकत्वम् युष्मदि। त्वं पचसि इत्यत्र समन्वयो यथा – अत्र तिङ् सिः, तदर्थः संख्या एकत्वम् , तदन्वयी युष्मदर्थः, तद् वाचकत्वं युष्मच्छब्दे। नैयायिकोक्तं खण्डयति– नेति॥ यत्त्वया तिङ्वाच्यसंख्यान्वयिवाचकत्वं सामानाधिकरण्यमुक्तम्, तन्नोचितम्। तिङ्वाच्यायाः संख्याया अन्वयिनोऽनिश्चयात् तस्याः कुत्रान्वयः इति जिज्ञासाया असमाधानात्। तथा चेति॥ कर्तृप्रत्ययेऽपि निर्णयाभावेन। उभयत्र कर्तृकर्मोभयत्र अन्वये निर्बाधे, उभयोः कर्तृकर्मणोरपि अभिधानापत्तिः। अथेदानीं नैयायिकः परिष्कृत्य स्वमतमाह - कर्त्रैकत्वेनैव संख्येति॥ न तावत् संख्यामात्रमाख्यातार्थः किन्तु कर्त्रैकत्वं कर्मैकत्वं च तदर्थः, तथा चाभिधानोपपत्तिः इति। तदपि खण्डयति - तथा शक्तेरबोधादिति॥ आख्यातस्य कर्त्रैकत्वमर्थः अनुशासनात् अनुभवाद् वा?

नाद्यः। तथाविधानुशासनस्यासत्त्वात्। द्वितीये दोषमाह – विशेषणतयेति॥ आख्यातस्य कर्त्रैकत्ववाचकत्वे एकत्वे कर्तुर्विशेषणतया वाच्यत्वापत्तिः। तथा च कर्ता आख्यातार्थ इति सिद्धं नः समीहितम् । ननु विशेषणतया वाच्यत्वसिद्धौ अपि विशेष्यतया वाच्यत्वासिद्धेर्न तव समीहितसिद्धिरित्यत आह - शक्यतावच्छेदकेऽपि गौरवादिति॥ कर्त्रैकत्वस्य शक्यत्वे, शक्यतावच्छेदके कर्तृत्वादेः प्रवेशेन तस्य नानात्वेन त्वदुक्तरीत्यैव गौरवात्।

अभिधानव्यवस्थायां संख्याभिधानस्य प्रयोजकत्वे, कृदादौ अभिधानव्यवस्था-नुपपत्तिरिति तन्मते दोषान्तरमाह -किञ्च कृत्तद्धितसमासैः संख्यानभिधानादिति॥ कृत्प्रत्ययः, कर्तरि कृदित्याद्यनुशासनात् कर्त्रादौ न तु संख्यायाम् , तद्धितोऽपि अपत्यादौ एव न तु संख्यादौ विधीयते समासोऽपि संख्यामनपेक्ष्यैवेति। तथा च कृदादिस्थले अभिधानाव्यवस्थैव, तत्र संख्याभिधानस्य वक्तुमशक्यत्वात्। तथा सति त्वन्मते देवदत्तः पाचक इत्यत्र कर्तुरनभिधाने सति तृतीयापत्तिः, अनभिहितस्य कर्तुः सत्त्वात्।

**12.** वस्तुतस्तिङ्स्थले[१] कर्तुरवाच्यत्वे [पचमान इत्यादि][२] कृत्यपि तन्न स्यात्, युक्तेस्तुल्यत्वात्। लकारस्य वाचकस्योभयत्रैकत्वात्। आदेशानां वाचकत्वे च[३] "हरेऽव, विष्णोऽव, रामम्" इत्यादौ "सर्वे सर्वपदादेशाः" **(म.भा.1-1-20)**[3] इति[४] न्यायाद्[५] वाक्यपदस्फोटयोः सिद्ध्यापत्तेः,अपसिद्धान्ताच्च।

न च कृति[६] कर्तु[१]रवाच्यत्वे इष्टापत्तिः, समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय व्युत्पत्तिभङ्गापत्तेः; जञ्जभ्यमानाधिकरणो[4]**(मी.3-4-9-20)**च्छेदप्रसङ्गाच्च[२]।

---

[१] अ4-वस्तुतस्तु तिङ्स्थले

[२] भार1,त4,1900,1915,अ4-कर्तुरवाच्यत्वे पचमान इत्यादौ, अ1,द1,द2,त1,ब1,भ2,ब3-कर्तुर-वाच्यत्वे पचमान इत्यादि त2,त5- कर्तुरवाच्यत्वे पच्यमान इत्यादि, म-कर्तुरवाच्यत्वे पच्यमान इति कृत्यपि

[३] जो2,1900,1915- "च" नास्ति, त2-"च" इति आदेशानामित्यनन्तरं वर्तते।

[४] अ1-इत्यादि

[५] वा2,1900,1915-न्यायेन

[६] जो2- "कृति" नास्ति

शानचा कर्तुरुक्तत्वाच्छ्रुत्या[3] पुरुषार्थत्वमिति सिद्धान्तस्यैवम्[4] असंभवात्[5]। तस्मादवश्यं कर्तृकर्मणोर्वाच्यत्वम् अभ्युपेयमिति[6]।

---

अथ तिङ्क्षु कृत्सु च अभिधानव्यवस्थायां भेदः अवश्यं स्वीकरणीयः। "द्व्येकयो" (पा. 1-4-22) रित्यादिना तिङ्क्षु संख्यावाचकत्वोपदेशात् तत्र कर्तृकर्मगतसंख्याभिधानमेव कर्तृकर्मणोरभिधानमिति युक्तम्। कृद्भिःसंख्याभिधाने प्रमाणाभावात् तथा अनुभवाभावाच्च तत्र कर्त्राद्यभिधाने एव प्रमाणोपलम्भाच्च कर्त्राद्यर्थकत्वमेव कृतामभ्युपेयते। तथा च संख्याकर्त्राद्यन्यतराभिधानमेव अभिधानव्यवस्थाप्रयोजकमिति पाचको देवदत्त इत्यादौ न दोषः। तत्र कृतामाश्रयवाचकत्वस्वीकारात्। एवञ्च तत्र कर्तुरभिधानेन नोक्तदोष इति चेदाह – वस्तुत इति॥ अयमाशयः। त्वन्मते तिङ्स्थले कर्तृबोधाभावे पचमान इत्यादि शानजादिस्थलेऽपि कर्तृबोधो न स्यात्। न च तिङां शानचश्च भेद इत्यदोष इति वाच्यम्। उभयत्रापि स्थानिनो लकारस्यैक्यात्। स्थानिनां वाचकत्वस्यैव भवद्भिस्सिद्धान्तितत्वात्। तन्नेति॥ तत् कर्तृवाचकत्वम्, अभिधानं वेति उभयोरपि प्रस्तुतत्वात्। तदाह -युक्तेस्तुल्यत्वात् कर्त्रवाचकत्वरूपा युक्तिः, तस्याः तुल्यत्वात् उभयत्रापि लकारस्य वर्तमानत्वात्। इदानीं स्वरूपभेदेन वाचकत्वभेदे त्वाह - आदेशानां वाचकत्वे इति॥ आख्यातस्थले तिङ्, पचमान इत्यत्र शानच्, उभयोः स्वरूपभेदेन युक्तेस्तौल्याभावः। आदेशानां वाचकत्वे दोषमाह - हरेऽव विष्णोऽव इत्यादाविति॥ "सर्वे सर्वपदादेशा" इति न्यायात् हरे अव इत्यस्य हरेऽव इत्यादेशः, विष्णो अव इत्यस्य विष्णोऽव इत्यादेशः, तथा च हरेऽवेत्यादेशस्यैव वाचकत्वाभ्युपगमे तादृशवाक्यपदयोरेव वाचकत्वरूपस्फोटत्वापत्तिस्तव मते च स्यात्। न चेष्टापत्तिस्तदाह – वाक्यपदस्फोटयोस्सिद्ध्यापत्तेरपसिद्धान्तापत्तेः॥ वाक्यपदस्फोटस्वीकारे तवैवापसिद्धान्त इति भावः।

---

[१] अ1- "कर्तुः" नास्ति

[२] द1- "च" नास्ति

[3] 1900,द7-च्छक्त्या

[४] जै- सिद्धान्तः। तस्यैव, 1900-सिद्धान्तस्यैव, त1- "ति सिद्धान्त" नास्ति,भ1-सिद्धान्तमस्यैवम्

[५] 1900- संभवात्

[६] अ3,वा2,भार1,द1,त1,त2,त4,ब1,जो2,1900,1915,द2,द3,भ1,भ2-उपेयमिति, अ1-उपेयम्, जै-उपेयत्वमिति

कृति कृदन्तस्थले कर्तुरवाच्यत्वे कृतः शानजादेः कर्ता न वाच्य इति स्वीकारे। इष्टापत्तिः कृति कर्तुरवाच्यत्वे दोषाभाव इत्यर्थः। इष्टापत्तिमपहरति – समानाधिकरणप्रातिपदिकेति॥

अयमाशयः - समानाधिकरणं च तत् प्रातिपदिकम् च तयोरर्थयोरिति विग्रहः। समानधर्मिरूपार्थवतोः प्रातिपदिकार्थयोः अभेदेनान्वय इति व्युत्पत्तिः। प्रातिपदिकयोः सामानाधिकरण्यञ्चैकविभक्तिकत्वादिरूपम्। तत्प्रतिपाद्ययोरर्थयोरभेदान्वयः इति व्युत्पत्तिः। तस्याः भङ्गः तिरस्कारः तस्यापत्तेः। शानचः कर्तृवाचकत्वाभावे पचमानो देवदत्तः इत्यत्र तादृशव्युत्पत्तिबलाज्जायमानस्य अभेदान्वयस्यानुपपत्तिरेव स्यात् ।कृतेः भावनायाः वा शानजर्थत्वे तस्याः समवायरूपभेदसम्बन्धेनान्वयापत्तेः। अतः उक्तव्युत्पत्तिबललभ्याभेदान्वयबोधस्य तत्र साधनाय। शानजादेः कर्तुवाचकत्वमावश्यकम्।

कर्तुरवाच्यत्वे दोषान्तरमाह जञ्जभ्यमानाधिकरणेति॥ दर्शपूर्णमासप्रकरणे स्थितमिदम्। "जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू"इति। इदमधिकरणं जञ्जभ्यमानाधिकरणम्।

जञ्जभ्यमानो जृम्भां कुर्वाणः मयि दक्षक्रतू इति शब्दघटितं मन्त्रमनुब्रूयादित्यर्थः। शानचा कर्तुरुपस्थितौ कर्तुः श्रौतत्वात् तद्घटितेन वाक्येन पुरुषसंस्कारार्थता प्राप्नोति, क्रतुप्रकरणे पठितत्वात् क्रत्वर्थत्वमपि प्राप्नोति, इति पूर्वोक्तस्य मन्त्रोच्चारणस्य शुद्धपुरुषसंस्कारद्वारा पुरुषार्थत्वम् , प्रकरणेन क्रत्वर्थत्वम्, अथवा क्रतुविशिष्टपुरुषसंस्कारेण क्रतुयुक्तपुरुषार्थत्वमिति सन्देहः। तत्रायं पूर्वपक्षः - प्रकरणापेक्षया वाक्यस्य बलीयस्त्वेन पुरुषार्थत्वमेव युक्तम्। बलाबलन्यायश्च "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षादि"त्याकारकः। एवं प्राप्ते उत्तरम् - यत्र वाक्यप्रकरणयोर्विरोधस्तत्र वाक्येन प्रकरणस्य बाधः। यत्र तु न विरोधस्तत्रोभयोः समावेशः, न तु बाध्यबाधकभावः। तथा च वाक्यघटकशानचा कर्तुरुपस्थापनेऽपि क्रतुसंयुक्तपुरुषसंस्कारकत्वेन क्रतुसंस्कारोऽपि सिद्ध्यतीति तदधिकरणतात्पर्यम्। शानचः कर्तृवाचकत्वाभावे अधिकरणस्योच्छेदः स्यादिति। निश्चितमाह - तस्मात् कर्तृकर्मणोर्वाच्यत्वमिति। आख्यातस्य कर्ता कर्म च

वाच्यमिति मीमांसकेन अवश्यमभ्युपेयमिति शानजादिकृत्सु कर्तुरवाच्यत्वे इष्टापत्तिः न युक्तेति भावः।

3.6 कर्तृसंख्याभिधानमेव कर्तुरभिधानमिति नैयायिकमतम्

**13.** अत्र नैयायिकाः- कर्तृसंख्याभिधानादेव तदभिधानं वाच्यम्। न च तदन्वय-नियमे मानाभावः, भावनान्वयिन्येव तदन्वयात्। संख्याभावनयोः समानपदोपात्त-त्वेनैकान्वयित्वस्योचिततत्वात्[१]।भावनायाश्चेतरा[२] विशेषणीभूतप्रथमान्तपदोपस्थाप्य एवान्वयः, तथैवाकाङ्क्षितत्वात्[३]।

एवं कृदादावपि कर्त्राद्यभिधानादेवाभिधानव्यवस्था[४], अन्यतरानभिधाने तृतीयेति[५] तु[६] सूत्रार्थः। तस्मान्नोक्तानुपपत्तिः[७]। कृत्प्रत्ययस्थले च कर्तुरवाच्यत्वेऽभिधान-व्यवस्थानापत्तेः[८]। न च कृत्यभिधानादभिधानम्[९], कर्मप्रत्ययस्थलेऽप्यापत्तेः। [१०]मित्रा पक्त्री, गतं पुरमिति लिङ्गविशेषेण [११] सामानाधिकरण्यानापत्तेर्वा तत्र [१२] वाच्यता[१३]स्वीकारः, समानाधिकरणस्यैव विशेषणस्य [१४]समानलिङ्गत्वात्। अन्यथा "राज्ञः[१५] स्त्री" इत्यादावपि[१] प्रसङ्गात्।

---

[१] त1,त4-नैकान्वयित्वस्यैवोचिततत्वात्, म-स्यौचित्यात्

[२] अ1-भावनाश्चेतरा

[३] त4-तस्यैव तथाकाङ्क्षितत्वात्, अ4- तस्यैव कथाचाकाङ्क्षितत्वात्

[४] द2-कर्त्राद्यभिधानव्यवस्था

[५] जै-अन्यतराभिधानात् कर्तुरभिधानमिति,ब3-कर्तृतत्संख्यान्यतरानभिधाने तृतीयेति

[६] अ3,त2,जो2,1900,त्रि- "तु" नास्ति

[७] त1,त5- "तस्मान्नोक्तानुपपत्तिः" नास्ति

[८] अ1-व्यवस्थानुपपत्तेः

[९] भार1-कृत्यभिधानात्तदभिधानम्

[१०] द2-चैत्रेण पच्यत इत्यत्रापि कृतिभानमाख्यातात् तृतीयार्थश्च वृत्तित्वमित्येवंवादिनैयायिकमते दूषणाभिधानमिदम्, तदस्वीकारे त्वाह- मित्रेति इति टिप्पणी दृश्यते

[११] अ3-लिङ्गविशेष, भार1-लिङ्गत्वाविशेषेण, अ1,जो2,जै-लिङ्गविशेषण

[१२] त1-तत्र तेन, त4-तत्र कर्तुः, अ4-तत्र कर्तृ

[१३] त4-वाच्यत्व,त5-तत्र तु न वाच्यता

[१४] द2-"विशेष्य" इत्यधिकम्

[१५] अ3- "पुरुषः" अधिकं

एवमाख्यातार्थस्य प्रथमान्तार्थे एवान्वयव्युत्पत्तेः "पक्त्वा तृप्यति" इत्यत्र पाकानुकूला कृतिस्तृप्यतीति[२] बोधः स्यात्। तथा चानन्वयः[३]। अतः कृति कर्ता अवश्यं वाच्यः। लकारस्यैकस्य वाचकत्वेऽपि शानजादौ[४] कर्तरि लक्षणा, न शक्तिः। येनानेकार्थता स्यात्। तृजादेः परं शक्तिरिति न दोषः। आदेशानां वाचकत्वेऽपि न दोषः[५]। "हरेऽव" इत्यादौ च प्रत्येकं पदानाम् अवधृत[६]शक्तिकानां तत्तदर्थो[७]पस्थापनद्वारा वाक्यार्थबोधकत्वसंभवान्न[८] वाक्यस्फोटादिः[९]। अत्र[१०] त्वनुपपत्त्या कर्तर्येव[११] शक्तिरित्याहुः।

---

अत्र नैयायिका इति॥ पूर्वमभिधानव्यवस्थार्थं संख्याभिधानेन कर्तुरभिधानमुक्तम् , तत्र दोषोऽपि दत्तः। इदानीं प्रदत्तदोषोद्धारपूर्वकं नैयायिकमतमुत्थापयति – कर्तृसंख्याभिधानादेवेति॥ देवदत्तः पचतीत्यादौ तिपा या संख्या उच्यते सा कर्तृगता एव। तथा कर्तृगतायाः सङ्ख्यायाः आख्यातेनाभिधाने प्रथमैव। यदा कर्मणि प्रत्ययस्तत्र कर्मगता संख्या आख्यातेनोच्यते तदा कर्मणोऽभिधानात् कर्मणि प्रथमैव कर्तुश्चानभिधानन्तत्रेति तृतीयैवेति भावः।

ननु संख्याया अन्वयः कुत्र कर्तरि कुत्र कर्मणि उभयत्र वेति नियामकाभाव इति शङ्कते - न च तदन्वय-नियमे मानाभावः इति॥ तदन्वयनियमे संख्यान्वय-नियमे मानाभावः।

---

१ अ1,द1-वति-

२ अ1-स्तृप्यत इति, अ4-तृप्यतीत्येव

३ त2-चान्वयः

४ अ3-शानजादेः

५ जो2- "आदेशानां वाचकत्वेपि न दोषः" नास्ति

६ अ1-अधृत

७ द2-"तत्" नास्ति

८ जै-तत्तत्पदार्थोपस्थापनाद्वारार्थबोधकत्वे संभवान्न, त1-तत्तदर्थोपस्थापनद्वारा वाक्यार्थादबोधकत्वसंभवान्न,त5- वाक्यार्थाबोधकत्वसंभवान्न

९ अ3,भ1-स्फोटादि

१० अ4-अन्यत्र

११ जो2-कर्त्रर्थे

प्रमाणाभावाच्च न त्वदुक्तिसम्भवः। इति चेन्मानमाह – भावनान्वयिन्येवेति॥ भावनाया अन्वयी कर्ता, तत्रैव संख्यान्वयस्यौचित्यात्। औचित्ये युक्तिमाह - संख्याभावनयोः समानप्रत्ययोपात्तत्वेनेति॥ आख्यातेनैवैतन्मते संख्या भावना-(कृतिः) च उच्येते। इदमेव समानप्रत्ययोपात्तत्त्वं नाम। तथा च समाना-भिधानश्रुत्या उभयोरपि तत्र कर्तरि अन्वयः। ननु छात्रौ इव मैत्रः पठतीत्यत्र छात्रयोरपि भावनान्वयः स्यादित्याशङ्क्य समाधत्ते- भावनायाश्चेति॥ यद्यपि भावनायाः प्रथमान्तार्थे एवान्वयः किन्तु उक्तदोषसद्भावात् इतराविशेषणीभूते प्रथमान्तार्थे एवान्वयः। तथा च छात्रौ इव मैत्रः पठतीत्यादौ छात्रयोः इवार्थसादृश्ये विशेषणत्वेन इतराविशेषणीभूतत्वाभावात् न तत्र भावनाया अन्वयः, किन्तु तथाभूते मैत्रे एवान्वयस्तदनुसारेणैव एकवचनादि। तथैवाकाङ्क्षितत्वात्-प्रधानानुरोधादित्यर्थः। कृत्स्थलीयां व्यवस्थामाह - एवं कृदादाविति॥ तत्र हि तृजादीनामाश्रये कर्त्रादौ एव विधानम्, तृजादिभिः कर्तुरभिधानादेवाभिधानमि-त्यदोषः। ननु क्वचित्संख्याभिधानेन, क्वचित्कर्तुरभिधानेन वाभिधानव्यवस्थायां “कर्तृकरणयोस्तृतीये”(पा.2-3-18)ति सूत्रमसमञ्जसमेव स्यादत आह - अन्यतरा-नभिधाने तृतीयेति॥ अनुक्ते कर्तरि तृतीयेत्यर्थस्तस्य सूत्रस्य, इदानीमर्थान्तरं क्रियते - अनुक्ते कर्तरि अनुक्तायां कर्तृगतसंख्यायां च तृतीयेत्यर्थः। तथा च सूत्रस्य सामञ्जस्यम्। तदाह – तस्मान्नोक्तानुपपत्तिरिति॥ अभिधानव्यवस्था-नुपपत्तिर्नेत्यर्थः। कृत्प्रत्ययस्थले अभिधानव्यवस्थार्थं कर्तरि शक्तिरिति उक्तमपि अनुपपत्त्या पुनरपि साधयति - कृत्प्रत्ययस्थले इति॥ यदि कृत्स्थले कर्ता वाच्यो न स्यात्तदा अभिधानव्यवस्था न स्यात्। तस्मात्तत्र कृतां कर्तरि शक्तिरिति भावः।

इदानीमभिधानव्यवस्थामन्यथयति - न च कृत्यभिधानादभिधानमिति॥ कृत्स्थले कृतः कृतौ शक्तिः, तदभिधानेनैव अभिधानव्यवस्थास्तु। तत्र दोषमाह - कर्मप्रत्ययस्थलेऽपीति॥ कर्मप्रत्ययस्थलेऽपि कृतौ शक्तौ तदभिधानेन कर्तु-रभिधानात् अनुक्तत्वाभावेन कर्तरि तृतीयानापत्तेः। यदि च कर्मणि प्रत्ययस्थले फले एव कृत्प्रत्ययः, तथा सति फलाभिधानेन तत्राभिधानमित्युच्यते, तदा अभिधानव्यवस्थाप्रयोजकद्वैविध्यापत्तिः। कृतः कर्तृकर्मान्यतरवाचकत्वसाधकं प्रयोगोदाहरणमाह - मित्रा पक्री गतं पुरमिति॥ अयमाशयः - मित्रा इति कस्याश्चन

नाम, पक्त्री - पाककर्त्री। अत्र उभयत्रापि लिङ्गविशेषप्रतीतिरस्ति। आद्ये स्त्रीलिङ्गस्य, मित्रा इति, पक्त्री - पाककर्त्री इति। अन्यत्र क्लीबत्वस्य लिङ्गविशेषस्य प्रतीतावपि सामानाधिकरण्यमस्ति। सामानाधिकरण्यम् अभेदः। मित्रा पक्त्री इत्यत्र अभेदान्वयः। सामानाधिकरण्याय लिङ्गाश्रयस्य ऐक्यमपेक्ष्यते। आश्रयं विना लिङ्गभानानुपपत्तेः। आश्रयश्च तृज्रूपकृदर्थः, तत्रैव लिङ्गान्वयः। तदपेक्षयैव अभेदान्वयः। आश्रयस्य कर्तृरूपस्य कृद्वाच्यत्वाभावे, उक्तस्थले सामानाधिकरण्यस्य अनापत्तिरेव स्यादिति भावः। एवमेव गतम् पुरम् इत्यत्रापि लिङ्गाश्रयस्य कर्मणः कृद्वाच्यत्वमभ्युपेयम्। अन्यथा सामानाधिकरण्यं न स्यात्। सामानाधिकरण्याभावे समानलिङ्गत्वानुपपत्तेरिति ग्रन्थाशयः। गतमित्यत्र कर्मणि क्तप्रत्ययः। तस्मात् कर्तृकर्मान्यतरवाचकत्वं कृतां मन्तव्यम्। तदाह – वाच्यतास्वीकारः॥ समानाधिकरणत्वाभावेऽपि समानलिङ्गत्वस्वीकारे राज्ञः स्त्री इत्यत्रापि समानलिङ्गत्वापत्तिः। राज्ञः स्त्री इत्यत्र भेदेनान्वयात् न समानलिङ्गकत्वम्। पुनरपि कृतः कर्तृवाचकत्वं पोषयति - एवमाख्यातार्थस्येति। नैयायिकनये आख्यातार्थः कृतिः, तस्य प्रथमान्तार्थे एवान्वयनियमः, तथा च देवदत्तः पचतीत्यादौ पाकानुकूलकृतिमान् देवदत्त इति बोधः। तथा पक्ता तृप्यतीत्यादौ आख्यातार्थस्य तृप्त्यनुकूलकृतेः प्रथमान्तार्थे तृजर्थे पाककर्तरि अन्वयः। तथा च बोधः तृप्त्यनुकूलकृतिमान् पाककर्तेत्याकारकः। कृतः कर्तृवाचकत्वाभावे तृचः कृतिरर्थः, तथा च उक्तनियमेन पक्तेति प्रथमान्तपाककृतौ एव तृप्यतीत्याख्यातार्थकृतेरन्वयापत्तिः। एवञ्चानिष्टबोधापत्तिस्तदाह - पक्ता तृप्यतीत्यत्रेति॥ अनिष्टापत्तिनिवारणायाह - अतः कृति कर्तेति॥ कृति कृत्स्थले। शानच्स्थले लकारस्य कर्तरि शक्तिः, आख्यातस्थले तस्य कृतौ शक्तिरिति नानार्थकत्वमापाद्य निराकरोति - लकारस्यैकस्य वाचकत्वे इति॥ स्थानिनो वाचका इत्येषां पक्षः। एकस्यैव लकारस्य, आख्यातस्थले शानचि च सत्त्वम्। अर्थभेदेन नानार्थत्वम् बोध्यम्। नानार्थत्वमपहरति - कर्तरि लक्षणेति। आख्यातस्थले कृतौ शानचि कर्तरि लक्षणा। अत उभयत्रापि कृतिशक्तत्वेन न नानार्थत्वम्। उक्तरीत्या तृजादेः कर्तरि शक्तिः। ननु आदेशानां वाचकत्वेऽनिस्तार एवेत्यत आह - आदेशानां वाचकत्वेऽपि इति। आदेशानां वाचकत्वे सर्वे सर्वपदादेशा इति न्यायेन हरे अव इत्यस्य स्थाने हरेऽवेत्यादेश इति

सर्वपदादेशस्वीकारे हरेऽव इत्यस्य वाचकत्वे वा तव. मतेऽनिष्टवाक्यस्फोट-स्वीकारापत्तिः, हरेऽवेत्यादेः वाक्यात्मकवाचकत्वरूपस्फोटत्वात् इतिपूर्वोक्तं दोष-मपहरति - प्रत्येकं पदानामिति। हरेऽवेत्यादौ सर्वादेशेऽपि प्रतिपदमवधृतशक्तिकानाम्, तत्तदर्थानां हरे इति पदार्थस्य अव इति पदार्थस्य च उपस्थापनेन, उपस्थित्या च वाक्यार्थस्य बोधसम्भवेन वाक्यस्फोटासिद्धेः। उक्तरीत्या पदैः पदार्थोपस्थित्यैव निर्वाहे वाक्यशक्तेरस्वीकारात्। अत्र तु तृजादौ ।अनुपपत्त्या अभेदान्वयानुपपत्त्या। कृतौ शक्तिस्वीकारे पक्ता देवदत्त इत्यादौ अभेदान्वयो न स्यादिति।

### 3.7 तत्रैव नव्यनैयायिकमतम्

**14.** [१]भावनान्वयिनि संख्यान्वय इत्यसंगतम्। न[२] पचतीत्यत्र भावनानन्वयिन्येव[३] कर्तरि तदन्वयेन व्यभिचारात्। संख्यायाः प्रत्ययार्थत्वाद्[४] भावनायाश्च[५] धात्वर्थत्वस्य[६] वक्ष्यमाणत्वात् समानपदोपात्तत्वस्याभावाच्च। विशेष्यतया आख्यातजन्य[७]संख्याबोधं[८] प्रति तेनैव संबन्धेन भावनाप्रकारक[९]बोधसामग्रीत्वेन हेतुत्वपर्यवसानेन[१०] गौरवाच्च। समानपदोपात्ता[न्वय्य]न्वयित्व[११]मपेक्ष्य समानपदोपात्तत्वस्यैव[१२] लाघवेन संख्या-न्वय[१३]नियामकत्वौचित्याच्च[१४]।

---

[१] अ1- "अत्रोच्यते" इत्यधिकं

[२] त1,त5,अ4- "न" नास्ति

[३] 1915-भावनान्वयिन्येव

[४] म-प्रत्ययार्थत्वबलात्

[५] अ1- "च" नास्ति

[६] अ1- "च" अधिकं

[७] अ3- "जन्य" नास्ति

[८] त1-संख्यावबोधं, त्रि-संख्याप्रकारकबोधं

[९] म-प्राकारक

[१०] अ3,त2,द7,ब3-पर्यवसाने

[११] अ1- समानपदोपात्तान्वय्यन्वयित्व, 1900-समानपदोपस्थितान्वयित्व

[१२] त1-समानपदोक्तेत्यस्यैव,त5-समानपदोक्तत्वस्यैव

[१३] अ1- "अन्वय" नास्ति

[१४] अ1-नियामकतौचित्याच्च

भावनान्वयनियामकस्यैव "तद्धेतो"रिति न्यायेन संख्यान्वयनियामकत्वौचित्याच्च[१]। भावनान्वयिनि संख्यान्वय[२] इतिवत् संख्यान्वयिन्येव भावनान्वय इत्यस्यापि[३] सुवचत्वाच्च। तस्मात् प्रथमान्तपदोपस्थाप्य एव संख्यान्वयः[४], प्रथमान्तपदोपस्थाप्यत्वमेव नियामकम्।

किं चैवं सति विशेष्यतासंबन्धेनाख्यातार्थसंख्या[५] प्रकारकबोधं प्रति इतराविशेषणक[६]प्रथमान्तपदजन्योपस्थिति[७]विषयतया कारणमिति लघुभूतः कार्य[८]-कारणभावः फलितः। "नारायण इव नरो हन्ति" "चन्द्र इव मुखं[९] दृश्यते" इत्यत्र नारायणे चन्द्रे च संख्यान्वयवारणाय इतराविशेषणेति[१०]। चैत्रेण सुप्यत इत्यत्र चैत्र-निष्ठः स्वाप[११] इति बोधाद्[१२] विशेष्ये स्वापे तद्वारणाय प्रथमान्तेति[१३]। वस्तुतस्तु[१४] तवापि कुत्र कर्ता वाच्यः, कुत्र कर्मेत्यत्र[१५] नियामकाभावाच्छबादिकं[१६] द्योतकं वाच्यम्। तथा[१७] च ममापि कुत्र संख्यान्वय इत्यत्रापि तदेव द्योतकमिति न

---

[१] अ1-नियामकतौचित्याच्च, अ3,त1- "भावनान्वय"इत्यादिवाक्यं सर्वं नास्ति

[२] ब1-संख्यान्वयनि(यामकत्वौचित्याच्च। भावनान्वयिनि संख्यान्वय) इतिवत्—अत्र () कोष्ठकान्तर्गतः ग्रन्थः नास्ति

[३] त1,त5-इत्यपि

[४] भ1,द7- "संख्या"नास्ति

[५] त1,भ1,त5- विशेष्यतासंबन्धेनाख्यातार्थसंख्यातार्थसंख्या

[६] अ3,भार1,त4,1900,1915,अ4- "क" नास्ति

[७] अ1-स्थिते

[८] द4-"कार्य" नास्ति

[९] त1-चन्द्रवन्मुखं

[१०] जै-इतराविशेषणतेति

[११] 1900-चैत्रनिष्ठस्वापः

[१२] वा2-बोध्यं

[१३] जै-प्रथमान्ततेति

[१४] त4 - "तु" नास्ति

[१५] अ1- "कर्म " नास्ति

[१६] भ1-नियामकाभावाद्यत्र शबादिकं

[१७] त1,त5-यथा

काप्यनुपपत्तिः। एवं कृदादिसाधारण्याय मुख्यभाक्तसाधारणकृत्यनभिधा[१]नात् कर्तुरनभिधानं कार्यमिति[२] व्यवस्थात्राश्रयणीया[३]। कर्मप्रत्यये च फलमेवार्थः, कृते-स्तृतीयया लाभात्। एवं च फलानभिधानमेव कर्मानभिधानम्[४]। यद्यप्येवं कृत्प्रत्यये प्रागुक्तरीत्याऽनभिधानव्यवस्था[५] कर्तृवाच्यत्व[६]साधिका न भवति, तथापि[७] "देवदत्तः पाचकः" इत्यादि[८]सामानाधिकरण्यानुपपत्त्याद्येव[९] तत्साधकं द्रष्टव्यम्। शेषं प्राग्वदे-वेति[१०] पुनस्तन्नवीनाः[११]।

---

खण्डनप्रकारं प्रस्तुवन्नाह - भावनान्वयिनीति। पूर्वं प्राचीनैः नैयायिकैर्यदुक्तम् संख्याया भावनान्वयिनि प्रथमान्तार्थेऽन्वय इति, तन्नोचितम्, नियमस्य व्यभिचारात्। व्यभिचारस्थलमाह - न पचतीति। अयमाशयः- नैयायिकाः आख्यातार्थकृतेः प्रथमान्तार्थेऽन्वयमिच्छन्ति, अतस्तेषां मते तादृशभावनान्वयिनि प्रथमान्तार्थे संख्यान्वयः इति सिद्ध्यति।परन्तु आख्यातार्थकृतेः प्रथमान्तार्थेऽ-न्वयनियमः न पचतीत्यादौ व्यभिचरितः।यतः तत्र भावनायाः साक्षात्प्रथमान्तार्थे नान्वयः, अपि तु नञर्थाभावे। विक्लित्त्यनुकूलकृत्यभाववान् देवदत्तादिरिति बोधे आख्यातार्थकृतेः अभावे अन्वयः। तत्र च अभावे संख्यान्वयो नेष्टः अपि तु देवदत्ते। तथा चात्र तस्य नियमस्य व्यभिचारः।व्यभिचारपदस्य व्यवस्थाया अभावोऽर्थः।

---

[१]द4-"फलवाचकत्वाभ्युपगमवैयर्थ्यापत्तेश्च। विवेचयिष्यते चैतदुपरिष्टात्। न च तत्तद्व्युत्पत्तिग्रहशालि-पुरुषशाब्दबोधानुरोधेनोदाहृतकार्यकारण भावद्वयमप्यावश्यकम्, परं" इति ग्रन्थः अग्रे वर्तमानः अत्र दृश्यते। अयमत्र असम्बद्धः।

[२] के3,अ4-स्वीकार्यमिति

[३] अ3,त1,त2,त4,भार1,द1,द2,जो2,जै,ब1,भ2- व्यवस्थाश्रयणीया,
1900,ब3,त्रि- कर्तुरनभिधानमिति व्यवस्थाश्रयणीया

[४] वा2- "फलानभिधानमेव कर्मानभिधानम्" इत्यस्य स्थाने "फलाभिधानम्" इत्येवास्ति

[५] के5,द2,अ4-प्रागुक्तरीत्याभिधानव्यवस्था

[६] जै-वाच्यत्वा

[७] अ3- "तथापि" नास्ति

[८] अ1-इत्यादौ

[९] द3-नुपपत्तिरेव

[१०] अ1-प्राग्वदिति

[११] जो2,द2,त्रि-पुनस्तत्र नवीनाः

तदाह - भावनानन्वयिनि इति॥ न पचतीत्यादौ भावनाया अन्वयः नञर्थाभावे। संख्यायाश्च आख्यातार्थे कर्तरि, तथा च त्वदुक्तस्य नियमस्य व्यभिचारः। न वा त्वन्मते भावनायाः संख्यायाश्च समानप्रत्ययोपात्तत्वम्, भावनायाः धात्वर्थत्वेऽपि संख्यायाश्च प्रत्ययार्थत्वात्। अतस्त्वन्मते समानप्रत्ययोपात्तत्वमूलकः भावनान्वयिनि संख्यान्वयनियमोऽपि न सम्भवति। तदेवाह - संख्यायाः प्रत्ययार्थत्वादित्यतः, अभावाच्चेत्यन्तेन ग्रन्थेन। मम मते तु कर्तृकर्मणोः संख्यायाश्च समानप्रत्ययोपात्तत्वमस्ति तेन कर्तृप्रत्यये कर्तरि कर्मप्रत्ययस्थले कर्मणि च संख्यान्वयः। आख्यातेनैवोपस्थानात्। ननु मन्मते नैवमस्तीत्यत आह- विशेष्यतयेति॥ ज्ञानस्थले कार्यकारणभावो विषयनिष्ठप्रत्यासत्या आत्मनिष्ठप्रत्यासत्या च भवति। प्रत्यासत्तिः सम्बन्धः। यत्र ज्ञानं कार्यम्, ज्ञानं कारणम्, तत्र कार्यं कारणञ्च विषयतासम्बन्धेन विषये वर्तते। विषयता च त्रिविधा, प्रकारे प्रकारता विशेष्ये विशेष्यता, संसर्गे च संसर्गता च। अतः ज्ञानरूपं कार्यं कारणञ्च, प्रकारतारूपविषयतासम्बन्धेन, प्रकाररूपे विषये, विशेष्यतारूपविषयतासंबन्धेन विशेष्ये संसर्गताख्यविषयतासम्बन्धेन संसर्गे च वर्तते। आत्मनिष्ठप्रत्यासत्या तु समवायसम्बन्धेनैव ज्ञानमात्मनि तिष्ठतीति रीत्या कार्यकारणभावः। अतः स एव कार्यतावच्छेदकः, कारणतावच्छेदकश्च।

तथा च नैयायिकमते भावनान्वयिन्येव संख्यान्वयस्वीकारेण, शाब्दबोधे भावनान्वयिनः कर्तुरेव विशेष्यत्वम्, भावनायाः संख्यायाश्च प्रकारत्वम्। एवञ्च स बोधः संख्याप्रकारको भावनाप्रकारकः कर्तृविशेष्यकश्च। देवदत्तः पचतीत्यत्र वर्तमानपाकानुकूलकृतिमानेकत्वविशिष्टो देवदत्त इति बोधः। अयञ्च बोधो विशेष्यतासम्बन्धेन कर्तरि वर्तते, अतः मूलोक्तकार्यकारणभावो विशेष्यतयेति। विशेष्यतासम्बन्ध एव कार्यतावच्छेदकः, कारणतावच्छेदकश्च। तथा चोक्तसंख्याप्रकारकोऽयं शाब्दबोधो विशेष्यतासम्बन्धेन कर्तरि वर्तते। तादृशविशेष्यतासम्बन्धेन कर्तुरुपस्थितिः कर्तरि वर्तमाना हेतुः। किन्तु सा उपस्थितिः उपस्थितित्वेन नैव हेतुः, किन्तु भावनाप्रकारकबोधसामग्रीत्वेन हेतुः। यत एतन्मते संख्याया भावनान्वयिन्येव कर्तरि अन्वयः तथा च भावनाप्रकारकबोधम्प्रति अपि कर्तुरुपस्थितिरावश्यकी। अत उक्तं विशेष्यतयाख्यातेत्यादि। अस्मिँश्च कार्य-

कारणभावे स्वीक्रियमाणे गौरवम् , कार्यकारणभावे संख्याया भावनाया उपस्थितेस्तादृशसामग्रीत्वेन च हेतुत्वप्रवेशात्। तस्मान्न नैयायिकमतं शोभनम्।

यदि कृतिरेव भावनापदार्थस्तदा तदन्वयिनि कर्तरि संख्यान्वयः सम्भवति। तथा च, समानपदोपात्तान्वयित्वं संख्यान्वये नियामकमपि सम्भवत्येव। तत्राह – समानपदोपात्तान्वयित्वमपेक्ष्येति॥ समानपदोपात्तत्वात् आख्यातेन बोध्यत्वात् कृतेः संख्यायाश्च कर्तरि अन्वय इत्येव निर्वाहे गुरुभूतस्य समानपदोपात्तान्वयित्वस्य नियामकत्वे गौरवमिति भावः। इदानीं भावनान्वयिनि संख्यान्वयपक्षस्य निराकरणमन्यप्रकारेण करोति – भावनान्वयनियामकस्येति॥ विनिगमनाविरहेण - भावनान्वयिनि संख्यान्वय इत्यस्य साधिकायाः युक्तेः अभावेन। अतः संख्यान्वयिनि भावनान्वय इत्यपि वक्तुं शक्यमिति भावः। विनिगमनाविरहमेव दर्शयति - भावनान्वयिनि संख्यान्वय इतिवदिति॥ स्पष्टम्। संख्यान्वयिनि भावनान्वय इत्यपि स्यादिति त्वदुक्तनियमो न सम्भवति। नवीननैयायिकः प्राचीनमतं खण्डयन् स्वाभिप्रायमाह - तस्मात् प्रथमान्तपदोपस्थाप्य एव संख्यान्वयः इति। देवदत्तः पचतीत्यादौ प्रथमान्तपदम् देवदत्त इत्यादि। तदुपस्थाप्ये देवदत्तादौ एव संख्यान्वय इत्येव युक्तम्। तस्मात् संख्यान्वये प्रथमान्तपदोपस्थाप्यत्वं नियामकम्।

ननु संख्यायाः प्रथमान्तपदोपस्थाप्ये अन्वयस्वीकारे नारायण इव नरो हन्तीत्यादौ नारायणादावपि संख्यान्वयः स्यात्, तस्य प्रथमान्तपदोपस्थाप्यत्वाविशेषादित्यत आह - किञ्चैवं सति॥ पूर्वनियामकस्वीकारे सति दोषसद्भावात् नियमे किञ्चिन्निवेशनीयमिति भावः। निवेशनमाह – विशेष्यतासंबन्धेनेति। नैयायिकमते विशेष्यतासम्बन्धेन शाब्दबोधः प्रथमान्तार्थे तस्य शाब्दबोधे मुख्यविशेष्यत्वात्। तथा च संख्याप्रकारकप्रथमान्तार्थविशेष्यकबोधम्प्रति न हि केवलप्रथमान्तार्थोपस्थितिः कारणम्, अपि तु इतराविशेषणप्रथमान्तार्थोपस्थितिः। इतरस्मिन् न विशेषणम् यत्प्रथमान्तपदं तज्जन्योपस्थितिः कारणम्। यद्यपि पदं न विशेषणम् अपि तु पदार्थ एव, तथापि प्रयोजकत्वात् पदस्यापि विशेषणत्वेन इदमुक्तम्। विषयतया विशेष्यतया। विषयनिष्ठप्रत्यासत्या कार्यकारणभावोऽयमिति बोधनाय विषयतयेत्युक्तम्। लघुभूत इति। विशेष्यतयाख्यातजन्यसंख्याप्रकारकेत्याद्युक्तकार्यकारणभावापेक्षयायं कार्यकारणभावो लघुरित्यर्थः। नारायण इव

नरो हन्तीति। नारायणे चन्द्रे चेति। चन्द्रनारायणयोः सादृश्यसम्बन्धेन नरे मुखे च विशेषणतया इतराविशेषणत्वाभावात्। इतराविशेषणपदजन्यमात्रोक्तौ दोषमाह - चैत्रेण सुप्यत इति। अत्र स्वापस्य विशेष्यत्वेन सुप्यते इत्यस्य इतराविशेषणत्वेन तज्जन्यबोधविषये स्वापे संख्यान्वयापत्तिरतः प्रथमान्तपदेति ।सुप्यत इत्यस्य इतराविशेषणत्वेऽपि प्रथमान्तत्वाभावात्। ननु स्वापस्यासत्त्वरूपत्वेन अयोग्यतयैव तत्र संख्यान्वयाभाव इति चेन्न। अलक्ष्ये लक्षणापत्तेरेव दोषात्। वक्ष्यमाणरीत्या हतशायिकाः शय्यन्त इत्यादौ भाष्यकारेण साध्यक्रियायामपि संख्यान्वयस्य प्रदर्शितत्वाच्च।

नवनैयायिको वैयाकरणमते दूषणमभिधत्ते – वस्तुतस्तु इति। अयमाशयः- वैयाकरणमते समानपदोपात्तत्वेन आख्यातार्थसंख्याया आख्यातार्थे कर्तरि कर्मणि वा अन्वय इति स्वीक्रियते, तत्र कुत्र कर्तरि प्रतीते अन्वयः कुत्र च कर्मणि। वाच्यत्वानिर्णयात्। ननु शबादिकं नियामकम्। यत्र शप्श्यनादि तत्र कर्ता वाच्यस्तत्रैव संख्यान्वयः। यत्र च यगादिकं तत्र कर्मवाच्यं तत्र च संख्यान्वयः, इति चेन्ममापि नैयायिकमते तदेव द्योतकम्। शबादिसत्त्वे कर्तरि यगादिसत्त्वे कर्मणि च संख्येति दोषाभावः। शब्दादिकमित्यपपाठः।

कृदादिसाधारण्यायेति । अयमाशयः- कृत्स्थलेऽपि कृतिरेव कृतोऽर्थः, तदभिधानेनैव कर्तुरभिधानं तदनभिधाने च कर्तुरनभिधानम्। ननु यत्र शानचः कर्तरि लक्षणा रथो गन्ता इत्यत्राचेतने कृतेर्बाधो वा, तत्र कथमभिधानानभिधानव्यवस्थेति चेन्न। मुख्यभाक्तकृतेर्ग्रहणेन दोषाभावात्। पक्तेत्यादौ कृतिर्मुख्यत्वेन वाच्या, रथो गच्छतीत्यादौ शानजादौ च मुख्यत्वाभावेऽपि, भाक्तकृतेः स्वीकारः, भाक्तपदेन शक्यसम्बन्धिलक्षणाभ्युपगमेन विशेषणतया गृहीतत्वमर्थः। तथा च तत्रापि कृतेर्लक्ष्यांशे प्रवेशेनाभिधानानभिधानव्यवस्थाया नानुपपत्तिरिति भावः।

कर्मकृत्प्रत्यये व्यवस्थामाह - कर्मप्रत्यये फलमेवार्थ इति। कृतेरिति। तत्र कृतिः तृतीयया लभ्यते, अन्यलभ्यत्वेन न कृतौ प्रत्ययः। तथा च फलाभिधानेन कर्मणोऽभिधानम्। फलानभिधाने कर्मणोऽनभिधानम्। अनया रीत्या

कृत्स्थले यद्यपि अनभिधानव्यवस्था सम्भवति, ततश्च अनभिधानव्यवस्थार्थं कृतां कर्तृवाचकत्वस्वीकारो व्यर्थः, तथापि देवदत्तः पाचकः इत्यादौ अभेदान्वया-नुपपत्तिरेव कृतां कर्तृवाचकत्वसाधिकेत्याह – वस्तुतस्त्वित्यारभ्य तत्साधक-मित्यन्तं यावत्।

3.8 पूर्वोक्तनैयायिकमतनिरासः

**15.** अत्रोच्यते – विशेष्यतासंबन्धेन आख्यातार्थसंख्याप्रकारकबो[धं] प्रत्याख्यात-जन्याश्रयोपस्थिते[१]र्हेतुत्वं लाघवादिति कर्तृकर्मणोस्तिङ्वाच्यत्वमावश्यकम्। न तु त्वदुक्तरीत्या[२] प्रथमान्तपदजज्ञानं[३] तथा। एतादृशाकाङ्क्षायाः पदद्वयघटितत्वेन गुरु-त्वात्[४]। इतराविशेषणत्व[५]घटितत्वेन[६] सुतरां गौरवाच्च।

न चाख्यातस्य भावनामात्रवाचकत्वग्रहवतस्तादृश[७] बोधानुरोधेन उक्त[८] कार्य-कारणभावस्तवाप्या[९]वश्यक इति वाच्यम्। एवं हि[१०] [११]यत्नस्य धातुवाच्यत्व[१२]ग्रहवतः पाकानुकूलकृति[१३]मानिति बोधानुरोधेन धात्वर्थ[१४]प्रकारकशाब्दबोधे प्रथमान्त-पदजन्योपस्थिति[१५]र्हेतुरित्यस्याप्या[१]वश्यकत्वेन "रथो[२] गच्छति, जानाति, करोति"

---

[१] जै-जन्योपस्थिते

[२] ज1-तद्रीत्या

[३] भार1,त्रि-प्रथमान्तपदजं ज्ञानं त1,जो2,त5,1915-प्रथमान्तपदज्ञानं, द1,द3,के3,के5,1900,अ4-प्रथमान्तपदजन्यज्ञानं

[४] ज1,ब2-गौरवात्

[५] त1,त5-इतरविशेषणत्व,ब2 -"त्व" नास्ति

[६] द1-घटितेन

[७] वा2-ग्रहवतमादृश

[८] अ4-बोधानुरोधेन नोक्त

[९] भ1-तथाप्या, ज1-तदप्या

[१०] अ1- "हि" नास्ति

[११] अ3-"कृतेः फलस्य च" अधिकं

[१२] अ4- धातुवाचकत्व

[१३] 1900,त्रि -वृत्ति

[१४] अ3-"फलस्यैव साक्षात् कर्मणि" अधिकं

[१५] अ1-स्थिते

इत्यादौ धात्वर्थस्य साक्षाद् रथादौ भानसंभवेन[3] आख्यातस्याश्रयत्व[4] लक्षणाभ्युपगमानापत्तेः[5]। "रथेन ग्रामो गम्यते" इत्यादौ धात्वर्थफलस्यैव साक्षात् कर्मणि भानसंभवात् कर्माख्यातानां फलवाचकत्वाभ्युपगम[6]वैयर्थ्यापत्तेश्च[7]। विवेचयिष्यते चैतदु[8]परिष्टात्।

---

पूर्वोक्तं मतद्वयं खण्डयति- अत्रोच्यते इत्यादिना ।वैयाकरणमते आख्यातार्थसंख्या आख्यातार्थकर्तरि विशेषणतयान्वेतीति स्वीक्रियते। संख्यां प्रति कर्तुः कर्मणश्च विशेष्यता। अतः आख्यातार्थसंख्याप्रकारको बोधो विशेष्यतासम्बन्धेन कर्तरि कर्मणि वा भवति। तदाह - आख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातजन्याश्रयोपस्थितिः कारणमिति कार्यकारणभावः। पूर्वोक्तवादिसम्मतकार्यकारणभावापेक्षयात्र लाघवम्। तथा चैतत्कार्यकारणभावार्थं कर्तुः कर्मणश्चाख्यातार्थत्वं मन्तव्यम्। त्वन्मते आख्यातार्थसंख्याप्रकारकबोधं प्रति प्रथमान्तपदजन्याश्रयोपस्थितिः कारणमिति कार्यकारणभावःआख्यातप्रथमान्तेति पदद्वयघटित इति गुरुभूतः। चन्द्र इव मुखमित्यादौ संख्यान्वयदोषवारणाय इतराविशेषणीभूतप्रथमान्तपदजन्योपस्थितिः कारणमिति इतराविशेषणत्वघटितकार्यकारणभावः स्वीकार्य इत्यतिगौरवम्।

ननु यो ह्याख्यातस्य भावनावाचकत्वग्रहवान् तेन स्वीकृतः कार्यकारणभावः निराकर्तुं न शक्यते, तद्रीत्यापि युष्माभिश्चिन्तनीयम्।ततश्च तन्मते अस्मदुक्त एव कार्यकारणभावः भवतापि स्वीकरणीय एवेति वदन्तं नैयायिकं प्रतिबन्द्या उत्तरयति - एवं हीत्यादिना॥ एवं चेत् यस्य हि यत्र धात्वर्थः तद्रीत्यापि अस्माभिश्चिन्तनीयम्।

---

[1] अ3,1900,भ2,1915-"अपि" नास्ति

[2] द3- "रथो" नास्ति

[3] जै,द3-भानासंभवेन, ब3-भावनासंभवेन

[4] त्रि-आश्रयत्वे

[5] जो2-लक्षणानभ्युपगमापत्तेः, अ4-लक्षण उपगमानापत्तेः

[6] अ1-वाच्यत्वाभ्युपगम

[7] अ3-फलवाचकत्वाभ्युपगमानापत्तेश्च, अ4- वैयर्थापत्तेश्च

[8] द3,भ1-चेदमु

तत्पक्षे विशेष्यतया धात्वर्थयत्नप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावः शाब्दबोधोपपत्तये स्वीकार्यः। स्वीकृते चास्मिन् पक्षे लाघवमपि। तदेवाह - रथो गच्छति इत्यादिना॥ आख्यातस्य यत्नार्थकत्वे रथादौ अचेतने यत्नादिबाधेन तत्र व्यापारे, जानातीत्यादौ आश्रये च लक्षणा अभ्युपगन्तव्या नैयायिकैः।

इदानीं यस्य मते चेतनाचेतनसाधारणभावनाया धात्वर्थत्वम्, तस्याश्च रथादौ साक्षात् सत्त्वेन लक्षणाभ्युपगमो व्यर्थः। रथेन ग्रामो गम्यते इत्यादौ धात्वर्थस्य फलस्य ग्रामादावन्वयसम्भवेन पुनः आख्यातस्य फले शक्तिकल्पनमपि निरर्थकम् । एवं विभिन्नासु व्युत्पत्तिषु यत्र लाघवं स एव पक्षः आश्रयणीय इति वैयाकरणमते एव लाघवस्य सत्त्वात् वैयाकरणमतमेव आदरणीयं सर्वैरित्या-कूतम्।

**16.** न च तत्तद्व्युत्पत्ति[१]ग्रहशालि[२]पुरुषशाब्दबोधानुरोधेनोदाहृत[३] कार्य[४]कारणभावद्वय-मप्यावश्यकम्, परं त्वाख्यातस्य कर्तरि शक्तावनन्त कृत्या[५]दाववच्छेदकत्वा-पत्तावतिगौरवं[६] परमतिरिच्यत इति वाच्यम्। भावना[७]श्रयत्वस्यैवाखण्ड[८]शक्ति-रूपस्यावच्छेदकतायाः प्रागुक्तत्वेन एतद्गौरवस्य[९] स्ववासनामात्रकल्पितत्वादिति[१०]। अपि चैवं कृतामपि कर्तृवाचकत्वं न स्यात्, गौरवस्य साम्यात्।

अथ "चैत्रो गन्ता" इत्यत्राभेदा[११]न्वयाद् अवश्यं कर्ता वाच्यस्तत्रा[१]भ्युपगन्तव्यः।

---

[१] त2-तद्व्युत्पत्ति

[२] अ1-ग्रहण

[३] के5-अनुरोधो उदाहृत

[४] अ1-कार्यकार्य

[५] 1900,त्रि -वनन्तवृत्त्यादा,के5-शक्त्या अनन्त

[६] के5-अतीव गौरवं

[७] अ4-"भावना" नास्ति

[८] अ1-भावनाश्रयत्वस्यावखण्ड

[९] ब1-तद्गौरवस्य

[१०] के5- "इति"नास्ति

[११] के5-इत्यादावप्यभेदा,भ1,द5-इत्यादौ भेदा

न च "चैत्रो गच्छति" इतिवद् गन्तेत्यत्राप्याश्रयतया कृतेश्चैत्रा[२]न्वयाद्धेत्वसिद्धिः, समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेः। भेदेनान्वयबोध[३] एकपदोत्तरविभक्ति[४]विरुद्धविभक्तिमत्पदजन्योपस्थितेर्हेतुत्वाच्च[५]। चैत्रो गन्तेतिवच्चैत्रे गन्तेत्यापत्तेश्चेति[६] चेद् –

अत्रोच्यते। "घटो न[७], राज्ञः सुतस्य[८] धनं,[९] पचतिकल्पं चैत्रः, पचतितरां मैत्रः[१०]" इत्यादावभेदबोधादर्शनात् भेदेन[११] बोधदर्शनाच्च उक्तकार्यकारणभावद्वयस्यापि व्यभिचारः।

न चात्रायोग्यत्वान्नान्वयः, कृत्यपि तथा[१२] सुवचत्वात्[१३]। एवं च[१४] "पचतिकल्पं मैत्रः" इत्यादाविव[१५] नामार्थत्वेऽप्याश्रयाश्रयिभावेनान्वयः संभवत्येव।

---

नैयायिकः स्वयं तं निर्दुष्टं कर्तुं प्रवर्तते - न चेत्यादिना। सा सा व्युत्पत्तिरिति तत्तद्व्युत्पत्तिः, कर्मधारयसमासः। अथवा तस्याः तस्याः व्युत्पत्तेरिति षष्ठी समासः। समासत्त्वात् विभक्तेर्लुक्, तस्यास्तत्तद्व्युत्पत्तेः ग्रहः। तेन शालन्ते शोभन्ते ये ते तत्तद्व्युत्पत्तिग्रहशालिनस्ते च पुरुषा इति विग्रहोऽत्र बोध्यः।

---

[१] "तत्र"नास्ति

[२] त1,त5-कृतेश्चैत्रत्वा

[३] 1900,1915-भेदान्वयबोधे

[४] भ1- "विभक्ति"नास्ति

[५] त2-जन्योपस्थितिर्हेतुत्वात्

[६] अ1- "चेति" नास्ति

[७] द2-घटः पटो न

[८] 1900-सूतस्य

[९] द1-"एवं" इति अधिकं

[१०] ब1,1900,ब3-पचतितरां चैत्रः,पचतिकल्पं मैत्रः

[११] त1,1900-इत्यादावभेदबोधात् भेदेन, त4-इत्यादावभेदान्वयबोधदर्शनात् भेदेन

[१२] अ3-"तथा" नास्ति

[१३] त2-सुवचनत्वात्

[१४] अ1,त2,वा2,1900,द2,त्रि - "च" नास्ति

[१५] 1900-इत्यादावपि

अत्रायं विशेषः। पूर्वं सः इत्यस्य द्वितीयपक्षे तस्येत्यस्य "नित्यवीप्सयो" (पा. 8-1-4)रित्यनेन द्वित्वे "तत् सु तत् सु व्युत्पत्ति सु" इति, "तत् ङस् तत् ङस् व्युत्पत्ति ङस्" इति वा अलौकिको विग्रहः, बहुवचनान्तेन वा। प्रथमान्तेन कर्मधारयः षष्ठ्यन्तेन षष्ठीतत्पुरुषो वा। ननु अत्र तत् सु तत् सु इत्यत्र समुदाये प्रथमान्ततदादित्वाभावात् , तत् ङस् तत् ङस् इति समुदाये च षष्ठ्यन्ततदादित्वाभावात् कथमुक्तसमासद्वयप्राप्तिरिति चेदत्रोच्यते - स्थाने द्वित्वमिति पक्षे स्थानिवद्भावेन, तत् सु इत्यत्र वर्तमानस्य प्रथमान्ततदादित्वस्य तत् ङस् इत्यत्र च वर्तमानस्य षष्ठ्यन्ततदादित्वस्य, तत् सु तत् सु - तत् ङस् तत् ङस् इति समुदाये लाभात् समासस्य सम्भवः। न च द्विःप्रयोगो द्विर्वचनमिति पक्षेऽनिर्वाहः, आद्यतच्छब्दे प्रकृतित्वबुद्ध्या अन्त्यप्रत्यये प्रत्ययत्वबुद्ध्या, प्रथमान्ततदादित्वस्य षष्ठ्यन्ततदादित्वस्य च सौलभ्यात्। अत एव "अपादाने पञ्चमी" (पा.2-3-28)ति सूत्रस्थः अन्यान्यप्रादुर्भावादिति भाष्यकारीयप्रयोगोऽपि सङ्गच्छते। तथा व्युत्पत्तिग्रहभेदेनोक्तं कार्यकारणभावद्वयं यद्यपि आवश्यकं तथापि आख्यातस्य कर्तरि शक्तिर्नाभ्युपेया। तथा सति शक्यतावच्छेदकं कर्तृत्वमेव वाच्यम्। कर्तृत्वञ्च कृत्याश्रयत्वरूपमेव। तच्च कृतिरूपम्। पुरुषभेदेन कृतेर्नानात्वादनन्तकृतिषु शक्यतावच्छेदकत्वकल्पनायां गौरवम्। अनेन वैयाकरणमते कटाक्षप्रक्षेपः। कर्तृशक्तिवादी स्वमते दूषणमिदं निराकरोति – भावनाश्रयत्वस्येत्यादिना॥ कर्तरि भावनाश्रये (कृत्याश्रये) आख्यातस्य शक्तिस्वीकारे भावनाश्रयत्वमेव अवच्छेदकं वाच्यम्। तथा सति नास्माकं मते त्वदुक्तदोषः, आश्रयत्वस्य अखण्डोपाधिरूपस्यैकस्य सम्भवात्। त्वया प्रदर्शितदूषणस्य मन्मताज्ञानविजृम्भितत्वेन स्वकपोलकल्पितत्वात्।

त्वन्मतेनैव त्वदुक्तखण्डनमुच्यते - अपि चेति॥ नैयायिकस्त्वं तृजादीनां कर्तरि शक्तिमभ्युपगच्छसि। तथा सति कर्तृत्वमेव शक्यतावच्छेदकं त्वया वाच्यम्। एवञ्च त्वदुक्तरीत्या अनन्तकृतिरूपस्य कर्तृत्वस्य शक्यतावच्छेदकत्वेऽतिगौरवापत्तिरतस्त्वन्मतमपि गौरवग्रस्तमिति कृतां वाचकत्वमतं त्वदीयं न सङ्गच्छेत। कृतां कृतौ शक्तौ देवदत्तादौ तदन्वयानुपपत्तिरेव कृतां कर्तृवाचकत्वसाधिकेति नैयायिकोत्तरं मनसि निधाय स्वमतं स्थापयति - अथ चैत्रो गन्तेत्यादिना॥

अयमाशयः। चैत्रो गन्तेत्यादौ अभेदान्वयाय तृचः कर्तरि शक्तिः। तथा सति तृजर्थाश्रयस्याभेदेन चैत्रादावन्वयः, अन्यथा तृजर्थकृतेः चैत्रादावन्वयानुपपत्तिरेव स्यात् इति तदुत्तरम् अन्वयानुपपत्तिरूपं खण्डयति - न च चैत्रो गच्छति, इतिवद् गन्तेत्यादिना॥ चैत्रो गच्छतीत्यत्र यथा त्वन्मते आख्यातस्य कृतौ शक्तिः तस्याः कृतेः समवायेनाश्रये प्रथमान्तार्थेऽन्वयः तथैव तृजादीनामपि प्रथमान्तार्थे समवायेनान्वयोपपत्तेरनुपपत्तिरूपस्य हेतोरसिद्धिः। तथा चानुपपत्तिरूपहेतोरभावात् तृजादीनां कर्तरि शक्त्यसिद्धिरिति भावः।

अथ नैयायिकः कृतां कर्तरि शक्तिसाधकोपायमाह – समानाधिकरणेति॥ अन्वयानुपपत्तेरभावेऽपि समानाधिकरणनामार्थयोरभेदान्वयः इति नियमेन तृजादीनां कर्तृवाचकत्वाभावे पक्ता चैत्र इत्यादौ अभेदान्वयानुपपत्तिरूपस्य हेतोः सत्त्वेन तृजादीनां कर्तृवाचकत्वमभ्युपेयमिति भावः। कृतौ शक्तिस्वीकारे भेदेनैव प्रथमान्तार्थेऽन्वयापत्तौ उक्तव्युत्पत्तिविरोधः स्यादिति।

ननु तत्र भेदान्वय एव अस्त्वित्यत आह - भेदान्वयबोध इति॥ राजा पुरुष इत्यादौ भेदान्वयबोधवारणाय भेदेनान्वयबोधे एकपदोत्तरविभक्तिविरुद्धविभक्तिमत्पदजन्योपस्थितेर्हेतुत्वं स्वीक्रियते। तथा च राजा पुरुष इत्यत्र एकं पदं राजा इति, तदुत्तरविभक्तिः सुविभक्तिः, तद्विरुद्धा विभक्तिः अमादिः, तादृशविभक्तिमत्पदं पुरुष इति नास्ति। अतोऽत्र न भेदान्वयः। राज्ञः पुरुष इत्यत्र विभिन्नविभक्तिकत्वेन भेदान्वयबोधो जायते। तथा पक्ता देवदत्त इत्यादौ अपि उभयोः प्रथमान्तत्वेन विरुद्धविभक्तिमत्पदजन्योपस्थितेरसत्त्वात् न भेदान्वयः इति बोध्यम्।

किञ्च तृचः कृत्यर्थकत्वे दोषान्तरमपि अस्ति। तदाह - चैत्रो गन्तेतिवदिति॥ तृजादीनां कृतौ शक्तिस्वीकारे समवायेन कृत्याश्रयत्वात् चैत्रो गन्तेति यथा प्रयोगः, तथैव कृत्यधिकरणत्वविवक्षायां चैत्रे गन्तेति प्रयोगोऽपि स्यादतः कृतां कर्तर्येव शक्तिरिति। अत्रेदानीं वैयाकरणः समाधत्ते – अत्रोच्यते इति॥ कृतां कर्तरि शक्तिसिद्ध्यर्थं समानाधिकरणनामार्थयोरभेदान्वयः इत्ययं नियमोऽभेदान्वयप्रयोजकः, भेदान्वयबोधे एकपदोत्तरेति नियमश्च यौ स्वीकृतौ भवता, तयोरुभयोरपि उक्तयोर्नियमयोर्व्यभिचारः।

व्यभिचारस्थलमेव दर्शयति - घटो न, राज्ञः सुतस्य धनम् ,पचतिकल्पं चैत्रः, पचतितरां मैत्रः इति॥

तत्र घटो नेत्यत्र घटस्य नञश्च नामत्वस्य एकविभक्तिकत्वरूप-सामानाधिकरण्यस्य सत्त्वेऽपि अभेदान्वयो नास्ति। पचतिकल्पम् चैत्रः, पचतितराम् मैत्र इत्यादावपि अभेदान्वयो नास्ति इति प्रथमाया व्युत्पत्तेर्व्यभिचारः।

राज्ञः सुतस्य धनमित्यत्र राज्ञः सुतस्येत्यत्र व्यधिकरणषष्ठ्यौ इमे। अत्र हि भेदान्वयप्रयोजिकायाः विरुद्धविभक्तिमत्पदजन्योपस्थितेरभावेऽपि भेदान्वयसत्त्वेन द्वितीयाया व्यभिचारः इति भावः।

अथ नैयायिकः उक्तदोषं वारयति - न चात्रायोग्यत्वान्नान्वयः इति॥ पक्ता देवदत्त इत्यादौ नामार्थव्युत्पत्त्या अभेदान्वयानुरोधेन कर्तृवाचकत्वं कृतां साधितम्।

घटो नेत्यादिप्रदर्शितस्थलेषु अभेदान्वययोग्यताविरहात् नाभेदान्वयः, शाब्दबोधं प्रति योग्यताज्ञानस्य कारणत्वात्। घटो नेत्यत्र नञर्थाभावे घटाभेदा-न्वयस्य बाधितत्वात्, तत्र प्रतियोगितया घटस्याभावेऽन्वयः। एवमेव सर्वत्राप्यूह्यम्।

यद्यत्रायोग्यत्वात् व्युत्पत्तिद्वयस्य सङ्कोचेन रक्षा कृता तर्हि अयोग्यत्वादेव कृत्स्थलेऽपि नामार्थव्युत्पत्तेः सङ्कोचः स्यात्। ततश्च तद्व्युत्पत्तिबलात् तृजादीनां कर्तृवाचकत्वमसिद्धमेवेति भावः। तदाह - कृत्यपि तथा सुवचत्वादिति॥ यथा घटो नेत्यादौ अयोग्यत्वात् नामार्थव्युत्पत्तिबाधस्तथा, तृजादीनां कृतिवाचकत्वेऽ-योग्यत्वात् नाभेदान्वय इति वक्तुं शक्यत्वात्।

तदेवोपपादयन्नाह - एवञ्च पचतिकल्पं मैत्र इति॥ अयमाशयः- पचति-कल्पमित्यत्र उभयोर्नामत्वेऽपि यथा कल्पबन्तनामार्थविशेष्यभूतायाः आख्यातार्थ-कृतेराश्रयाश्रयिभावेन भेदसंबन्धेन प्रथमान्तार्थेन्वयः, तथा च व्युत्पत्तिबाधो यथा तथा, पक्ता देवदत्त इत्यादावपि कृतेर्नामार्थत्वेऽपि, आश्रयाश्रयिभावेनैव अन्वयोऽस्तु, उक्तस्थलानुरोधेन सङ्कुचितायाः नामार्थव्युत्पत्तेर्विरोधस्याकिञ्चि-त्करत्वात्।

**17.** न चात्राख्यातस्य[१] कर्तरि[२] लक्षणा। एवं हि[३] पक्त्वा गच्छतीतिवत् पचतिकल्पं गच्छतीत्यापत्तेः। किं चात्रैव[४] नामार्थाख्यातार्थयो[५]रभेदान्वयस्य[६] क्लृप्तत्वात् तदनुरोधाच्चैत्रः पचतीत्यत्रा[७]भेदानुभवाच्चा[८]ख्यातस्य कर्तृवाचकत्वापत्तौ सिद्धं नः समीहितम्।

न च कल्पबादेरेव कर्तरि लक्षणा, तथा सत्याचार्यकल्पावाचार्यकल्पा[९] इतिवद् द्विवचनादेरपि कर्तृद्वित्वादि[१०]विवक्षायामापत्तेः[११]। न च सुब्विरुद्धतिङन्तो[१२]-प(तिङ्प)स्थाप्यत्वेन कृतेर्भेदेनैवान्वय इति वाच्यम् ।

स्तोकं पचतीत्यादौ स्तोकपाकयोरभेदबोधानापत्तेः। तस्माद् भेदेन नामार्थ[१३]प्रकारकबोधे सार्थक[१४]सुब्निपात[१५]जन्यैवो[१६]पस्थितिर्हेतुरिति[१७] हेतुहेतुमद्भावाद् आख्यातार्थेनाभेद[१८]बोधो दुर्वार इति वक्ष्यामः।

---

[१] अ3-नचाख्यातस्य, के5-आख्यातार्थस्य, त2-आख्याते

[२] त4,अ4-कर्तृ,के3-कर्म

[३] के3,के5,अ4, अ1-एवं सति

[४] के5-"न"इति अधिकं

[५] भार1,त4,1900,1915-नामाख्यातार्थयोः, त1-नामार्थयोः

[६] भार1-पूर्ववाक्ये "कर्तरि" इत्यारभ्य "अभेदान्वयस्य" इति पर्यन्तं नास्ति

[७] के5-पचतीत्यादाव

[८] भ1-भेदान्वयानुरोधाच्चा, द2-भेदान्वयानुभवाच्चा

[९] त2-"आचार्यकल्पा" इति नास्ति,ज1,अ4-"आचार्यकल्पौ" नास्ति

[१०] जै,भार1,1900,ब3-कर्तृत्वादि, अ1,त1,त5-कर्तृद्वित्व

[११] द4- "न च कल्पबादेरेव कर्तरि लक्षणा, तथा सत्याचार्यकल्पावाचार्यकल्पा इतिवद् द्विवचनादेरपि कर्तृद्वित्वादिविवक्षायामापत्तेः। " नास्ति,म-कर्तृद्वित्वादि विवक्षायां द्विवचनाद्यनापत्तेः

[१२] अ1-तिङ्

[१३] 1915-नामार्थक

[१४] अ3-समानार्थक

[१५] के5-सुबन्तनिपात

[१६] के5-जन्यो

[१७] जै- "हेतुरिति" नास्ति, ब1-हेतुरित्येव, अ1-स्थितिरिति हेतुरिति

[१८] त1,त5-आख्यातार्थानां भेद, के3,त4,अ4-आख्यातार्थानामभेद

पचतिकल्पम् मैत्र इत्यादौ आख्यातस्य कृतौ शक्तिस्तस्याश्च प्रथमान्तार्थे आश्रयाश्रयिभावेनान्वयदृष्टान्तेन पक्ता देवदत्त इत्यादावपि कृतौ शक्त्यभ्युपगमे आश्रयाश्रयिभावेनान्वयापादनं यत्कृतं तन्निवारयति - आख्यातस्य कर्तरि लक्षणे-त्यादिना॥ अयमाशयः- पचतिकल्पमित्यादौ कृतौ शक्तिः, कर्तरि लक्षणा, तथा च तत्र लक्ष्यार्थेन कर्त्राऽभेदान्वय एव। तथा च न समानाधिकरणप्रातिपदिकार्थयो-रभेदान्वय इति व्युत्पत्तिभङ्गः। ततश्च पूर्वोक्तदृष्टान्तदार्ष्टान्तिकभावेन तृजादीनां कृति-वाचकत्वापत्तिर्नास्ति। किन्तु कर्तृवाचकत्वमेवेति। तत्र दोषमाह - पक्ता गच्छती-तिवदिति॥ यथा त्वन्मते गमनानुकूलकृतिमान् पाकानुकूलकृतिमदभिन्नःइति बोधतात्पर्येण पक्ता गच्छति इति, तथा गमनानुकूलकृतिमदभिन्नः ईषदूनपाका-नुकूलकृतिमानित्यर्थे पचतिकल्पं गच्छतीति प्रयोगापत्तिः स्यात्। अत्रापि उक्तरीत्या लक्षणया आख्यातेन कर्तुर्लाभात् तथा बोधसम्भवात्।

वैयाकरणो नैयायिकमतं निरस्य स्वमतं स्वीकारयति अत्रैवेति॥ पचतिकल्पं चैत्र इत्यत्र उभयोर्नामत्वेन नामार्थव्युत्पत्त्या तिङर्थकर्तृचैत्रयो-रभेदान्वयो मन्तव्यः। एकोऽयं प्रथमोऽनुरोधः।पचति चैत्र इत्यादौ तिबर्थकर्तरि चैत्रादेरभेदान्वयानुभव इति द्वितीयोऽनुरोधः। तथा च तत्राभेदान्वयाय आख्यातस्य कर्तृवाचकत्वस्वीकारे नः वैयाकरणानां समीहितं सिद्धमेव। न च तत्र लक्षणया कर्तुः प्रतीत्या अभेदान्वयः, अनुपपत्तिं विनैवाभेदप्रतीतौ लक्षणाया अनवसरात् , लक्षणाया अन्वयानुपपत्तेरेव बीजत्वात्।

लक्षणापक्षमेवाह - न चात्र आख्यातस्य कर्तरि लक्षणेति॥ लक्षणया कर्तृप्रतीतौ उक्ताभेदान्वयः उपपद्यत इति भावः। खण्डितमपि उपायान्तरेण खण्डयति - एवं हि पक्ता गच्छतीतिवदिति॥ यथा पक्ता गच्छतीति प्रयोगे तिबर्थस्य लक्ष्यभूतस्य तृजर्थकर्त्रा सामानाधिकरण्यं तथैव पचतिकल्पम् गच्छति इति सामानाधिकरण्येन प्रयोगः स्यात् उभयत्रापि उभयोः कर्त्रोः अभेदस्य अबाधात्। यथा पक्ता गच्छतीत्यत्रैतन्मते प्रथमान्तार्थस्य प्राधान्यस्वीकारेण गमनानुकूलकृतिमदभिन्नः पाकानुकूलकृत्याश्रयः इति बोध एकवाक्यता च। तथैव, पचतिकल्पं गच्छतीत्यत्र तिङः कर्तरि लक्षणायां पचतिकल्पमित्यस्य प्रथमान्तत्वेन गमनानुकूलकृतिमदभिन्नः पाकानुकूलकृतिमानिति बोधः

स्यात्। एकवाक्यता च स्यात्। वैयाकरणमते तु एकवाक्यतापत्तिर्न, तन्मते व्यापारस्यैव मुख्यविशेष्यकत्वेनात्रोभयोरपि व्यापारयोर्विशेष्यत्वेन एकविशेष्यकत्वरूपैकवाक्यत्वाभाव इति न दोषः।

ननु पचतिकल्पमित्यत्र कल्पबादेरेव कर्तरि लक्षणया नास्ति दोष इत्युच्यते - न च कल्पबादेरेव कर्तरि लक्षणेति॥ आदिना तरबादिसंग्रहः। कल्पबादेरेव कर्तरि लक्षणया कर्तृप्रतीतिरस्तु। तथा सति तिङां कृतिवाचकत्वमक्षतमेव। तथा च पचतिकल्पं गच्छति इत्यत्र गच्छतीति तिपः कर्तरि न लक्षणा, तथा च न तत्रोक्तरीत्याऽभेदान्वयः किन्तु भेदान्वय एव। तिबर्थकृतेः कर्तरि भेदस्यैव सत्त्वात्। दोषमाह - तथा सति इत्यादि॥ आचार्यकल्पौ, आचार्यकल्पा इति यथा भवति, तथा पचतिकल्पमित्यादौ अपि कल्पबादेः कर्तरि लक्षणायां कर्तुः सत्त्वरूपेण द्वित्वादिविवक्षायां द्विवचनादेरप्यापत्तिः। सिद्धान्ते तु कल्पबादेरसत्त्वार्थकत्वेन द्वित्वाद्यन्वयायोगात् न द्विवचनाद्यापत्तिः।

पचतिकल्पं गच्छतीत्यत्रोक्ताभेदान्वयं वारयति - न च सुब्विरुद्धतिङन्तोपस्थाप्यत्वेनेति॥ पचतिकल्पं गच्छतीत्यत्र कर्तृबोधकत्वेनाभेदान्वयानापत्तिरूपो दोषो दत्तः, स च नास्ति, सुब्विरूद्धेति न्यायेन भेदान्वयसामग्रीसत्त्वात्। नामार्थव्युत्पत्तिमूलकसुब्विरुद्धतिङन्तोपस्थाप्यस्य भेदेनान्वयस्यौचित्यात्। प्रकृते च सुब्विरुद्धा विभक्तिः गच्छतीत्यत्र तिङ् तदन्तं गच्छतीति तदुपस्थाप्या कृतिस्तस्या भेदेनैवान्वयो युक्तः, यद्यपि तिङा एव कृतिरुपस्थाप्यते, तथापि प्रयोगाभिप्रायेणेदं बोध्यम्। तस्मादुक्तरीत्या आपाद्यैकवाक्यतापत्तिरूपो दोषो मम मते नास्ति।

नैयायिकस्य मतमिदं खण्डयति - स्तोकं पचतीति॥ अत्र स्तोकादेः पाकादावभेदान्वयो भवति, त्वदुक्तनियमस्वीकारे प्रकृते सुब्विभक्तिः स्तोकमित्यत्र अम् विभक्तिः तद् विरुद्धा विभक्तिः पचतीत्यत्र तिविभक्तिस्तदुपस्थाप्यत्वेन भेदान्वय एव स्यादतः व्यभिचारोऽस्या व्युत्पत्तेः।

इदानीं भेदान्वयप्रयोजककार्यकारणभावमाह - तस्माद् भेदेनेति॥ भेदान्वयप्रयोजकनियममुक्त्वा अभेदान्वयस्थलमभिव्यञ्जयति – नामार्थप्रकारकबोधे

इति॥ राज्ञः पुरुष इत्यत्र जायमानो राजप्रकारकषष्ठ्यर्थस्वत्वविशेष्यको बोधः, तत्र सार्थकः सुप् ङसिति, तज्जन्योपस्थितिः स्वत्वोपस्थितिरतः अत्र भेदान्वयबोधो जायते, एवमेव घटो नेत्यत्र निपातजन्याभावोपस्थितिरस्तीति भेदान्वयः। यत्रसार्थकसुप्जन्योपस्थितिर्नास्ति, यथा नीलो घट इत्यत्र नीलपदोत्तरसुपः, सु इत्यस्य साधुत्वार्थकत्वेन सार्थकत्वाभावात्। तत्र न भेदान्वयः, अपि तु अभेदान्वयः। एवञ्च आख्यातस्थलेऽपि उक्तभेदान्वयसामग्र्यभावात् न भेदान्वयोऽपितु अभेदान्वय एवेति वक्ष्यामः शाब्दबोधस्थले।

**18.** यत्तु चैत्रे[1] गन्तेति स्यादिति तन्न, चैत्रे[2] गच्छतीत्यस्याप्यापत्तेः। यदि चा[3]ख्यातार्थस्य प्रथमान्तोपस्थाप्ये[4] एवान्वयः, तदात्रापि कृदर्थप्रकारक[5]शाब्दबोधं प्रति समानाधिकरणपदजन्योपस्थितिर्विषयतया हेतुरिति[6] कार्यकारणभावोऽस्तु। कार्यकारणभावान्तरकल्पनागौरवं[7] चाख्यातार्थभावनान्वयाय प्रथमान्तपदजन्योपस्थिति[8]हेतुत्वकल्पनेऽपि तुल्यम्। कृदर्थवद्[9]भेदबोधे वक्ष्यमाण[10]सिद्ध कार्यकारणभावेन निर्वाहोपपत्तेरिति दिक्। पक्तेत्यादौ तृजर्थकृतेर्न नामार्थत्वमपि[11], तृजन्तस्यैव नामत्वात्। पाकाद्यनुकूला कृतिरेव[12] हि[13] नामार्थः, न तु[14] शुद्धा[15]। तथा च

[1] त5-चैत्रो
[2] त5-चैत्रो
[3] जै-यदि त्वा
[4] अ1,अ3,जो2,त4,के3,भ1,त5,अ4-प्रथमान्तपदोपस्थाप्ये
[5] त1-कृदर्थप्रकार
[6] भ2,द5-कारणमिति
[7] अ1- कल्पनं , त1,त5-कल्पने गौरवं
[8] के5,के3,अ4-जन्योपस्थितेः
[9] त1-कृदर्थवाद
[10] ज1-बोधवक्ष्यमाण
[11] अ1- "तु " इत्यधिकं
[12] त1,त5- पाकाद्यनुकूलकृतिरेव
[13] भ1- "हि"नास्ति
[14] जै- "तु " नास्ति
[15] ज1-सिद्धा

नामार्थस्य "विशेष्ये[1] विशेषणम्" इति न्यायेनैव चैत्रादावन्वय[2] इत्यपि[3] केचित्[4]। अथैवमपि मित्रा पक्त्रीति[5] लिङ्गेन[6] सामानाधिकरण्यात्[7] तत्र[8] कर्ता वाच्य इति चेन्न, तस्य साधुत्वार्थमप्यु[9]पपत्तेः वस्त्वव्यवस्थापकत्वात्[10]। एतादृशानां विशेष्यनिघ्नत्वस्य सर्वसिद्धत्वात्। अन्यथा शुक्लादिपदानां द्रव्ये[11]ऽपि शक्त्यापत्तेः।

---

कृतेः तृजाद्यर्थत्वे चैत्रादेः कृत्यधिकरणत्वेन चैत्रे गन्ता इत्यापत्तिः दत्ता, तदेव स्मारयन् नैयायिकाभिप्रायं अनुवदति - यत्तु चैत्रे गन्तेति स्यादिति॥ तन्मते दोषमुद्भावयति - चैत्रे गच्छतीत्यापत्तेरिति॥ तिङोऽपि कृति वाचकत्वाविशेषात्। नैयायिकः स्वमते दूषणमुद्धरति - आख्यातार्थस्य कृतेः प्रथमान्तोपस्थाप्येऽन्वय इति॥ प्रथमान्तपदोपस्थाप्ये आश्रये एवान्वयः न तु सप्तम्यन्तार्थे। तथा च चैत्रे गन्तेत्यापत्तिर्नास्ति इति। वैयाकरणः पुनः आक्षिपति – अत्रापि कृदर्थेति॥ भवता आख्यातार्थकृतेः आश्रयतया अप्रथमाविभक्त्यन्तेऽन्वयवारणाय तस्याः प्रथमान्तोपस्थाप्ये एवान्वय इति यथा नियमः आश्रीयते तथा कर्तृकृतां कृत्यर्थकत्वेऽपि कृदर्थप्रकारकशाब्दबोधं प्रति समानाधिकरणपदजन्योपस्थितिः कारणम् इति व्युत्पत्त्याश्रयणेन चैत्रे गन्तेति प्रयोगः वारयितुं शक्यः, अत्र समानाधिकरणपदस्यासत्त्वात्। नन्वेवं कार्यकारणभावान्तरकल्पने गौरवमिति चेदाह – कार्यकारणभावान्तरकल्पनागौरवञ्चेति॥ तव मते आख्यातार्थो भावना, तस्याश्च प्रथमान्तार्थे एवान्वयः, तथा चैवंविधबोधोपपत्तये कार्यकारणभावान्तरं

---

[1] जो2- "विशेष्ये" नास्ति,ज1-विशेष्यविशेषणम्

[2] के5-चैत्रादावभेदान्वयः

[3] अ3,वा2,त1,त5,जो2,त4,द3,भ1-इति

[4] अ3,1900,द3,भ1,द7-कश्चित्, भार1-इत्यपि भाव केचित्

[5] त4-पक्त्री पक्तृतो

[6] के4-"लिङ्गेन"नास्ति

[7] त1,त4,त5,अ4-समानाधिकरणतया,के3-सामानाधिकरणतया, त2-सामाधिकरण

[8] म- "तत्र" नास्ति

[9] के3,अ4-साधुत्वार्थमित्युपपत्तेः,म-साधुत्वार्थत्वेप्युपपत्तेः

[10] के5,म-वस्तुव्यवस्थापकत्वाभावात्

[11] के5-द्रव्यत्वेऽपि

त्वया स्वीकार्यम्। आख्यातार्थकर्तृवादिनामस्माकं मते तादृशगौरवं नास्ति। एवं गौरवे सत्यपि भवता कृत्यर्थकत्वमेव तिङः स्वीक्रियते। तथैव कृतामपि कृतिवाचित्वमस्तु। कार्यकारणभावान्तरं प्रकल्प्य तत्र प्रसक्तं दोषं वारयतु । कार्यकारणभावस्वरूपन्तु मूले उक्तमेव। उपस्थितेर्हेतुत्वेति पाठो ज्यायान्।

कृदर्थवदिति॥ पक्ता चैत्रः इत्यत्र यथा कृदर्थस्याश्रयस्य चैत्रादौ अभेदान्वयः तथैव आख्यातस्थलेऽपि तिङः कर्तरि शक्तिस्वीकारेणाभेदान्वयस्य निर्वाहः। उभयत्राभेदान्वयबोधं प्रति एकविधस्यैव कार्यकारणभावस्य स्वीकारात्। वक्ष्यमाणेति॥ विशेष्यतया प्रथमान्तप्रकारकबोधं प्रति आख्यातजन्यकर्तृकर्मोपस्थितिः कारणमिति रीत्येत्यर्थः।

केचिन्मतमुपस्थापयति - पक्ता इत्यादाविति॥ अयमाशयः – नामार्थव्युत्पत्त्या पक्ता देवदत्त इत्यादावभेदान्वयाय तृचः कर्तृवाचकत्वं स्वीक्रियते। कृतिवाचकत्ववादी नामार्थव्युत्पत्तेरत्राविषयत्वं ब्रूते – पक्तेत्यादाविति॥ सुबन्तं नामेति पक्षे पक्तेत्येव नाम, न तु तृज्मात्रम्। तेन च तृजर्थकृतेर्न नामार्थत्वम्। किन्तु पाकानुकूलकृतेरेव नामार्थत्वम्। तथा च नामार्थव्युत्पत्त्या तृजादीनां कर्तृवाचकत्वसाधनमयुक्तमिति भावः। पक्ता चैत्र इत्यादौ अन्वयप्रकारमाह - तथा च नामार्थस्येति॥ अन्वयविधौ द्विविधो हि क्रमः। एकत्र द्वयं त्रयमिति, तत्रापि विशेषणम् - तत्रापि विशेषणमिति वा। द्वितीयमिदमेव विशेष्ये विशेषणमित्यप्युच्यते। आद्यो यथा - छत्री, वासस्वी, कुण्डली देवदत्त इति। अत्र एकत्र देवदत्ते छत्री वासस्वी कुण्डलीत्यादीनि विशेषणानि। व्यावर्त्यभेदेन सर्वाणि विशेषणानि चरितार्थानि भवन्ति। द्वितीयो यथा - नीलघटवद् भूतलमिति। अत्र भूतले घटो विशेषणम्, घटे च नीलो विशेषणम्। तद्वत् पक्ता चैत्र इत्यत्र पक्ता इत्यस्य पाकानुकूला कृतिरर्थः। तत्र धात्वर्थपाकस्यानुकूलत्वसम्बन्धेन कृतौ अन्वयः। कृतेश्च समवायसम्बन्धेन चैत्रादावन्वयः। एवं च सति न नामार्थयोः साक्षादन्वयः। तथा च न नामार्थव्युत्पत्तिबलादभेदान्वयानुरोधेन कृतां कर्तृवाचकत्वसाधनसम्भवः। अयञ्च मतविशेषो न तु वैयाकरणमतम्। यद्वा विशेष्यीभूतनामार्थकृतेः चैत्रादौ अन्वय इति नामार्थव्युत्पत्तिविषयतैवेति केचित्। कृतां कर्तृवाचकत्वं प्रकारान्तरेण साधयति - अथ एवमपि मित्रा पक्रीति लिङ्गेनेति॥ पूर्वं व्याख्यातमेतत्।

तथाहि - मित्रायाः पक्त्रीत्यनेन सामानाधिकरण्यमनुभूयते। समानलिङ्गत्वमप्यस्ति। लिङ्गाश्रयत्वेन तृचः कर्तृवाचकत्वमावश्यकम्। तथा सत्येव लिङ्गसामानाधिकरण्येन प्रतीतिसम्भव इति भावः। खण्डयति - तस्य साधुत्वेति॥ तस्य लिङ्गप्रत्ययस्य । प्रयोगसाधुत्वमात्रार्थकत्वं तस्य। लिङ्गस्यापि प्रातिपदिकार्थत्वमिति मतेनेदम्। तथा च स्त्रीप्रत्ययेन लिङ्गाप्रतीत्या पक्त्रीति लिङ्गाश्रयत्वान्यथानुपपत्त्या लिङ्गसामानाधिकरण्याय च कर्तृवाचकत्वसाधनमयुक्तमिति भावः। यतः साधुत्वार्थकत्वमत एव अस्य कृतां कर्तृवाचकत्वासाधकत्वम्। लिङ्गादिसामानाधिकरण्येन कर्तृवाचकत्वं खण्डयति - एतादृशानां विशेष्यनिघ्नत्वस्येति॥ एतादृशानां पक्त्रीत्यादीनां, विशेष्यनिघ्नत्वस्य विशेष्यसमानलिङ्गकत्वस्य, सर्वसिद्धत्वात् सर्वैरनुभूयमानत्वात्। विशेष्यं निघ्नन्ति तल्लिङ्गकत्वमनुभवन्ति इति विशेष्यनिघ्नानि। न तु स्वलिङ्गबोधकानीति यावत्। अन्यथेति॥ विशेष्यनिघ्नत्वाभावे, स्वातन्त्र्येण स्वलिङ्गबोधकत्वे। शुक्लादिपदानामिति॥ गुणमात्रपराणां शुक्लादिपदानां शुक्लो घट इत्यादिप्रयोगदर्शनेन द्रव्यवाचकत्वापत्तिः। अयमाशयः। मित्रा पक्त्रीत्यादौ सामानाधिकरण्यबलात् कृतां कर्तृवाचकत्वसाधने शुक्लो घटः, शुक्लं वस्त्रं, शुक्ला शाटीत्यादौ द्रव्यलिङ्गसामानाधिकरण्यात् शुक्लादिशब्दानां द्रव्यवाचकत्वापत्तिः। एतच्च नैयायिकानां मीमांसकानां च मते। तैः शुक्लादिशब्दानां द्रव्यवाचित्वानङ्गीकारात्।

**19.** रूपमात्रे शक्तौ शक्यतावच्छेदकलाघवस्य[1] नीकं(लं)[2] रूपमित्यादौ केवलरूपे प्रयोगस्य च[3] पक्ता[4] जातः पाठको[5] जात इत्यादौ[6] कृतां[7] केवलकृतौ[8] शक्ति-

---

[1] जै-लाघवत्रस्य,के4-शक्यतावच्छेदकस्य लाघवस्य

[2] "नीलं" इत्येव अन्यत्र सर्वत्रोपलभ्यते

[3] त2- "च" नास्ति

[4] के5-वक्ता

[5] के3,अ4-पाको

[6] अ1- "केवल" इत्यधिकं

[7] अ1- "केवलरूपे प्रयोगः स च पङ्क्तौ जातः पाठको जात इत्यादौ" इत्यधिकं

[8] त1,त4,अ4-कृतौ च, के4-केवलं कृतौ

साधकेनाविशेषात्[1]। अत एव "सामानाधिकरण्यं नैकविभक्तिनिर्देश्यत्वमर्थ-साधकम्[2]। प्रयोगस्य वस्त्वव्यवस्थापकत्वादि[3]" ति द्वित्वप्रत्यक्षविचारे गुणोपायेऽ5-प्युक्तम्[4]।

किं चैवं समानाधिकरणस्य[5] विशेषणस्य[6] विशेष्य[7] समानलिङ्गत्व[8] नियम[9] वत् तादृशस्यैव विशेषणस्य विशेष्य[10] समानवचनत्वनियमादाख्यातस्यापि कर्तृकर्म-वाचकता[11] दुर्वारा। अन्यथा देवदत्ताः[12] पचतीत्यादेरप्यापत्तेः[13]। न च चैत्रो मैत्रश्च[14] गच्छतः सुन्दरावित्यादौ[15] व्यभिचारान्नायं नियमः, क्षुदुपहन्तुं शक्यं[16]6, शैत्यं हि यत्सा प्रकृतिर्जलस्ये7त्यादौ तस्यापि तुल्यत्वात्। भोक्ता तृप्यतीत्यादौ च[17] कृतः कृतिमात्रवाचकत्वेऽपि[18] नानुपपत्तिः[19]। न[20] पचति चैत्र इत्यत्र

---

[1] त1,त5-शक्तिसाधनेनाविशेषात्, त4,अ4- शक्तिसाधने अविशेषात्, ब1- "अत एव सामानाधिकरण्यं नैकविभक्तिनिर्देश्यत्वमर्थसाधकेनाविशेषात्"इति वाक्यमसंबद्धं दृश्यते।

[2] द7-साधकत्वम्

[3] जै-वस्त्ववस्थापकत्वात् , त2-वस्त्ववस्थापकत्वस्य

[4] के4-गुणोपाये उक्तम्

[5] जै-सामानाधिकरणस्य, त्रि -समानाधिकरण , म-सामानाधिकरण्यस्य

[6] द2,द4- "विशेषणस्य " नास्ति

[7] ब1-विशेष्यस्य

[8] अ1-लिङ्गकत्व

[9] ज1-"नियम" नास्ति

[10] के5,म-विशेष्यत्व

[11] जै-कर्तृकर्मकर्तृवाच्यचकता

[12] त1,त4,जो2-देवदत्तः

[13] अ1-"आदेरपि" नास्ति, अ3-देवदत्ताः पचन्तीत्यादेरप्यापत्तेः, के3,के5-देवदत्तः पचतीत्यादेरना-पत्तेः,भ2,ज1-देवदत्तः पचन्तीत्यादेरप्यापत्तेः

[14] अ3-मैत्रो चैत्रश्च

[15] के5-"एव"इति अधिकं

[16] अ4-अशक्यं

[17] ब1- "च "नास्ति

[18] भार1-कृतिमात्रावाचकत्वेऽपि

[19] त1,त5-नानुपपत्तेः

[20] जो2,1915 -न च

प्रतियोगिता[१] संबन्धेन नञर्थ इव सामानाधिकरण्यसंबन्धेन[२] कृदर्थकृतावप्याख्यातार्थ[३] कृत्यन्वयसंभवात्। न त्वाधारतया[४] तिङर्थकृतिबोधे प्रथमान्तपदजन्योपस्थिते[५]र्हेतुत्वं सुवचम्। न पचति चैत्र इत्यादावनन्वयापत्तेः[६]। अस्तु वा अत्र[७] कृतः कर्तरि लक्षणा, अतो नानुपपत्तिः। न च केवलकृतौ प्रयोगात् तत्र शक्तिनिर्णये[८] सत्येव तद्वति लक्षणा युज्यत इति वाच्यम्, पक्ता जात इत्यादौ परेषां पचतीत्येवोक्ते[९] केवल[१०]कृतिबोधवत् केवलं पक्तेत्येवोक्ते च[११] केवलकृतौ प्रयोगात्। अन्यथाख्यातस्यापि कर्तृवाचकतापत्तेः। वस्तुतस्तु "पश्य मृगो धावति, पश्य[१२] नृत्यति, नृत्यति[१३] भवति, पचति भवती"[१४]त्यादौ धावनादिभावनाया दर्शनादौ[१५] विशेषणतयाऽन्वयबोधानुरोधाद्[१६] वक्तुरपि तथैव तात्पर्याद् भाष्यकारैरपि तथैवाभ्युपगमेनैतादृशेष्वेकवाक्यता[१७] प्रतिपादनाच्च नाख्यातार्थ[१८]भावनाप्रकारकबोधं[१] प्रति

---

[१] अ3-प्रतियोगित्व

[२] अ1-सामानाधिकरण्येन संबन्धेन, द1-सामानाधिकरण्यग्रहसंबन्धेन

[३] के5-कृताव्याख्यातार्थ, ज1-कृतावाख्यातार्थ

[४] अ1,ब1,1900,त्रि,ब3,के3,के5-चाधारतया, त4-वाधारतया

[५] ज1-पदोपस्थिते

[६] जै-इत्यादावन्वयापत्तेः,द3-इत्याद्यनन्वयापत्तेः

[७] त1,त4,ब1,1900,1915,अ4-तत्र, अ1- "अत्र" नास्ति

[८] के5-प्रयोगापत्तिनिर्णये

[९] जै-पचतीत्येवोक्तेः

[१०] जो2- "केवल" नास्ति

[११] त1-केवलपक्तेत्येवोक्तेश्च, त4- केवलपक्तेत्येवोक्ते च, जै-केवलं पक्तेत्येवोक्ते पचतीत्येवोक्तेश्च

[१२] त5-"पश्य" नास्ति

[१३] अ3,भ1-"नृत्यति" नास्ति

[१४] अ1- " नृत्यति भवति " नास्ति, अ3,भ1-भवति पचति, वा2,भार1,1900,1915- "पश्य मृगो धावति,पश्य नृत्यति भवति, पचति भवति ", त1-"पश्य मृगो धावति, नृत्यति भवति, पचति", द1-"पश्य मृगो नृत्यति, नृत्यति भवति, पचति भवति ", त4-"पश्य मृगो धावति,पश्य नृपतिर्नृत्यति, पचति भवति ",द5,त्रि- "पश्य मृगो धावति नृत्यति, नृत्यति भवति ,द7-भवतिपचतीत्यादौ,त5-मवतीत्यादौ

[१५] भ1-धावनादिभावनादौ

[१६] जो2-न्वयबोधात्

[१७] के5-वाक्यत्व

[१८] ज1-प्रतिपादनाचानाख्यातार्थ

प्रथमान्तपदजन्योपस्थितेः कारणत्वम्,[२] व्यभिचारात्। चैत्रः पचतीत्यत्र नैयायिकानां तथान्वयबोधस्तु[३] तादृशव्युत्पत्त्यनुरोधात्। अत एव[४] मीमांसकादय[५] श्चैत्रनिष्ठा[६] भावनेति भावनाविशेष्यकमेव[७] बोधमाहुः। तस्मान्न तथा कार्यकारणभाव[८]मूलिका कृतां कर्तरि[९] शक्तिर्युक्ता[१०], किं तु चैत्रः पाचक इत्य[११]भेदान्वयानुरोधात्[१२]। स चाख्यातेऽपि सम इति स्यादेव तत्रापि[१३] कर्त्रादिवाचकत्व[१४]मिति विभावयामः[१५]।

---

ननु शुक्लादिशब्दानामुभयवाचकत्वेन द्रव्येऽपि शक्त्यापत्तेरित्यापत्तिदानमनुचितमित्यत आह - रूपमात्रे इति॥ रूपमात्रपरत्वे शुक्लत्वादि जातिरूपं शक्यतावच्छेदकमेकमेव। द्रव्यवाचकत्वे तु शुक्लत्वादि तत्तद् गुणवाचि एवेति नानाशक्यतावच्छेदकस्वीकारे गौरवम्। तद्वत् लाघवात् पाठको जात इत्यादावपि कृतां कृतौ एव शक्तिः, कृतित्वस्य जातिरूपस्य शक्यतावच्छेदकत्वे लाघवात्। सामानाधिकरण्यं परिष्कृत्य तस्यार्थासाधकत्वमाह -अत एव सामानाधिकरण्यमिति॥ अत एव - मित्रा पक्त्रीति सामानाधिकरण्यस्य कृतां कर्तृवाचकत्वासाधकत्वादेव। एकविभक्तिनिर्देश्यत्वम् समानविभक्तिकत्वमूलकत्वम् , मित्रा पक्त्री -

---

[१] अ1-शाब्दबोधं,त5-प्रकारबोधं

[२] त4-कारणत्व

[३] त1-तथैवान्वयबोधस्तु

[४] अ1- एव हि

[५] अ1,जो2-मीमांसका

[६] के5,अ4-निष्ठ

[७] त1,त5-भावनाविशेष्यमेव, अ1,जो2-भावनाविशेष्यक, के5,अ4- " तत्र " इति अधिकम्

[८] जो2-"भाव" नास्ति

[९] जो2-"कर्तरि" नास्ति

[१०] के5-कृतां शक्तिः कर्तरि युक्ता

[११] जै-इत्यत्रा

[१२] म-यानुरोधनात्

[१३]अ3,भ1-"तत्रापि" नास्ति, वा2-"तत्रापि" इत्यारभ्य "आख्याते शक्त्येति"पर्यन्तं दशाधिकवाक्यात्मकः ग्रन्थः नास्ति

[१४] के5-पाचकत्व

[१५] द1,म-भावयामः

त्यादौ यथा नार्थसाधकम् तथा प्रकृते कर्तृवाचकत्वसाधकं न भवतीत्यर्थः। हेतुमाह - प्रयोगस्य वस्त्वव्यवस्थापकत्वात् इति॥ प्रयोगः शब्दोच्चारणम् , तस्य देशकाल-कर्त्रादिभेदेनानियतत्वात्। अयमर्थः गुणोपाये निरूपितः। एवञ्च एकविभक्तिनिर्देश्यत्वा-भावेऽपि पचति देवदत्त इत्यादावभेदान्वये बाधकाभावो बोध्यः। समानविभक्ति-कत्वस्यास्वीकारात्।

इदानीं फलमाह – किञ्चेति॥ एकविभक्तिनिर्देश्यत्वरूपसामानाधिकरण्या-भावेऽपि देवदत्तः पचतीत्यत्राभेदान्वयः। तादृशसामानाधिकरण्यस्यासाधकत्वादि-त्यनेन कथनेनेष्टसाधनेऽभिहितेऽपि प्रकारान्तरेणेष्टं साधयति - किञ्चैवं समानाधिकरणेति॥ समानाधिकरणविशेषणस्य – अभेदस्थलीयविशेषणस्य, यथा विशेष्यसमानलिङ्गकत्वनियमः, अन्यथा नीलं घटः इत्यपि स्यात्। तथैव तादृश-विशेषणस्य विशेष्यसमानवचनत्वनियमोऽपि मन्तव्यः। समानाधिकरणविशेषण-स्थले समानवचनकत्वनियमादेव देवदत्तः पचतीत्यादौ आख्यातस्थलेऽपि विशेषण-विशेष्ययोः प्रथमान्ततिङन्तयोः समानवचनत्वमावश्यकम्। अत्र हि आख्यातार्थ-कर्तरि देवदत्तादेरभेदान्वय इति समानाधिकरणविशेष्यविशेषणभावः। एतादृशाभेदान्वयसिद्ध्यर्थमेवाख्यातस्य स्थलभेदेन कर्तृकर्मान्यतरार्थबोधकत्वं सिद्धं भवति।

समानाधिकरणविशेषणस्थले समानवचनत्वनियमास्वीकारे दोषमाह – अन्यथेति॥ अन्यथा समानाधिकरणविशेषणस्थले समानवचनकत्वनियमा-स्वीकारे। देवदत्ताः पचतीत्यादेरिति॥ उक्त नियमास्वीकारे विभिन्नवचनकत्वे बाधकाभावात् तथा प्रयोगापत्तिः। वैयाकरणमते आख्यातार्थकर्तरि देवदत्तादि-कर्तृविशेषस्य अभेदेनान्वयात् उक्तनियमेन समानवचनत्वस्यौचित्यान्न दोष इति बोध्यम्। ननु समानवचनत्वनियमेन आख्यातस्य कर्तृकर्मवाचकत्वं कथं सिध्यती-त्यत्रोच्यते - देवदत्ताः पचतीति। रामेण ग्रामाः गम्यते इत्यादि प्रयोगापत्तिवारणाय समानवचनत्वनियमः। समानवचनत्वनियमसिद्ध्यर्थञ्च समानाधिकरणविशेष्य-विशेषणभावः आवश्यकः। तदर्थं च आख्यातस्य कर्तृकर्मवाचकत्वाभ्युपगमः, इति क्रमशो ध्येयम्। उक्तनियमव्यभिचारमाह - न च चैत्रो मैत्रश्च गच्छतः सुन्दरौ इत्यादाविति॥ गच्छतः इति द्विवचनम् , चैत्रः इत्यादौ एकवचनम् , तथा

चोक्तसमानाधिकरणविशेषणस्थलेऽपि विभिन्नवचनकत्वदर्शनेन नियमस्य व्यभिचारः। तुल्यन्यायेनाक्षेपं समादधाति - क्षुदपहन्तुं शक्यमित्यादिना॥ समानाधिकरणविशेषणस्थले सामानाधिकरण्यस्य समानलिङ्गकत्वप्रयोज्यत्वं समानवचनत्वनियमस्य दृष्टान्तरूपेण पूर्वमुक्तम्। तादृशदृष्टान्तस्य क्षुदपहन्तुं शक्यं, शैत्यं हि यत्सा प्रकृतिर्जलस्येत्यादौ व्यभिचारेण दार्ष्टान्तिकस्यापि व्यभिचारतौल्यम्, यथा समानलिङ्गकत्वनियमस्य लक्ष्यानुरोधात् क्वचित् सङ्कोचः तथा समानवचनत्वनियमस्यापि क्वचित्सङ्कोच इति भावः। अत एव वेदाः प्रमाणम् , विंशतिर्ब्राह्मणा इत्यादयः प्रयोगाः व्युत्पत्तिवादादौ साधिताः। क्षुत्प्रतिहन्तुं शक्यमिति॥ अयं प्रयोगः भाष्यकारीयः। अत्र शक्यमिति कर्मणि प्रत्ययः, कर्मणः सामान्यविवक्षायां शक्यमिति नपुंसकलिङ्गनिर्देशः, पुनः कर्मविशेषजिज्ञासायां क्षुद् उपतिष्ठते, कर्मण उक्तत्वेन क्षुधः प्रथमैवेति प्रक्रिया। अत्र क्षुधः स्त्रीलिङ्गत्वेऽपि शक्यमित्यनेन विभिन्नलिङ्गकेन सामानाधिकरण्यम्। एवमेव शैत्यमित्यत्रापि जलस्य यत् शैत्यं सा जलस्य प्रकृतिरिति नपुंसकलिङ्गशैत्यपरोऽपि तच्छब्दः प्रकृतिलिङ्गतां स्त्रीलिङ्गतां धत्ते। उद्देश्यप्रतिनिर्देशयोरैक्यमापादयन् सर्वनाम तत्तल्लिङ्गभाग् भवतीति नियमात्। तथा चात्रापि समानलिङ्गकत्वस्य व्यभिचारः। एवञ्च नायं नियमः सार्वत्रिकः, किन्तु औत्सर्गिक एव। तत्तत्स्थलभेदेन तस्य स्वीकारसङ्कोचौ यथा तथा समानवचनकत्वनियमस्यापि तस्याप्यौत्सर्गिकत्वात्।

ननु तृजादीनां कृतिवाचकत्वे भोक्ता तृप्यतीत्यादौ अन्वयो न स्यात्। धात्वर्थोऽत्र भोगः, स च ज्ञानरूपस्तस्य कृतौ अन्वयायोगः, ज्ञानजन्या भवेदिच्छा, इच्छाजन्या भवेत्कृतिरिति उक्त्या कृतेर्ज्ञानाजन्यत्वेन ज्ञानजन्यत्वासम्भवादिति मनसि निधायाह - भोक्ता तृप्यतीति॥ अयमाशयः- कृतेर्जनकं ज्ञानमन्यत् , भोगात्मकज्ञानमन्यत् ।तत्प्रति कृतेर्जनकत्वे बाधकाभावः। मनुष्यो हि यथा कृतिं करोति तथैव सुखदुःखान्यतरसाक्षात्काररूपं भोगं प्राप्नोतीति कृतेर्भोगजनकत्वदर्शनात्। तदाह – नानुपपत्तिरिति॥ न पचति चैत्र इति॥ अत्र न च पचतीति पाठोऽपि पुस्तकान्तरे लभ्यते स नोचितः, ग्रन्थलायने काठिन्यापादकत्वात्। न पचति चैत्र इत्यत्र आख्यातार्थकृतेर्नञर्थाभावे प्रतियोगितासम्बन्धेनान्वयो यथा, तथैव पक्ता गच्छतीत्यादौ अपि आख्यातार्थकृतेः तृजर्थकृतौ अभेदेनान्वयोऽस्तु

कृतेरेकत्वात्। तथा च प्रथमान्तार्थे कृतेरन्वयोऽनुपयुक्त इति भावः। तथा चाधारतया तिङर्थकृतिबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावो वक्तुमनर्ह एव। उभयोः कृत्योः सामानाधिकरण्यसम्बन्धेनान्वयात्। आधारतयेति॥ समवायसम्बन्धेनेत्यर्थः। आत्मनिष्ठप्रत्यासत्त्या कार्यकारणभावाभिप्रायेणेदम्। यद्वा आधारतयेत्यस्य विषयतयेत्यर्थः। बोधोपस्थित्योरुभयोरपि विषयतासम्बन्धेन विषयकृतिनिष्ठत्वेन विषयत्वस्य सम्बन्धरूपत्वमुक्तम्। तथा चोक्तरीत्या सामानाधिकरण्यसम्बन्धेनाख्यातार्थकृतेः कृदर्थकृतौ अन्वयोपपत्तौ उक्तकार्यकारण-भावो न सुवचः, तदाह न तु सुवचमिति॥ यद्वा भोक्ता तृप्यतीत्यादौ एव उभयोः कृत्योः परस्परान्वयायायं ग्रन्थः। अन्वयप्रकारस्तु उक्त एव। उक्तप्रकारं खण्डयति - न पचतीति॥ आख्यातार्थकृतेः प्रथमान्तार्थेऽन्वयास्वीकारे प्रकृते कृदभावेन द्वितीयकृतेरभावात् अनन्वयापत्तेः। अगत्या अभावद्वारा प्रथमान्तार्थे एवान्वयात्। भोक्ता इत्यत्र तृचः कर्तरि लक्षणास्वीकारेण अन्वयोपपत्तेरित्युच्यते - अस्तु वा तत्र कृत इति॥

कर्तरि लक्षणापक्षे आशङ्कते - न च कृतौ इति॥ अयमाशयः- यथा गङ्गायां घोष इत्यत्र शक्यस्य प्रवाहस्य प्रसिद्धत्वेन शक्यसम्बन्धरूपा लक्षणा तीरे क्रियते, कृत्स्थले च कृतः कृतौ शक्तेरदर्शनेन शक्यार्थानुपस्थितौ शक्यसम्बन्धरूपा लक्षणा कर्तरि न स्यादित्यर्थः। तदाह - केवलकृतौ प्रयोगात्॥ केवलकृतौ न तु कर्तरि। कृत्याश्रये प्रयोगात् कृतौ शक्तिनिर्णये हि शक्यसम्बन्धिनि कर्तरि लक्षणा उपयुज्यते इत्यर्थः। प्रयोगस्याभिधानियामकत्वमिति बोध्यम्। केवलकृतौ कृतः प्रयोग-स्थलमाह - पक्ता जात इत्यादि॥ पक्ता जात इत्यत्र केवलायाः कृतेर्बोधः, जात इत्यत्राकर्मकत्वेन "गत्यर्थाकर्मके" (पा.3-4-72)ति सूत्रेण कर्तरि क्तः। तेनाश्रयोपस्थितिस्तत्र। पक्तेति तृजर्थस्य कृतिमात्रस्यान्वयोपपत्तौ, कर्तृप्रतीते-रनावश्यकत्वात्। परेषामिति॥ नैयायिकानां पचतीत्येवोक्ते आश्रयाद्यनुपस्थितेः केवलकृतेरेव बोधः, आख्यातस्य कृतौ शक्तिस्वीकारात्। केवलपक्तेति प्रयोगेऽपि केवलकृतेरेव बोधः प्रसिद्धः तथा सति उक्तस्थले शक्यसम्बन्धरूपा लक्षणा कर्तरि सम्भवतीति भावः। यदि हठात् कृतां कर्तरि शक्तिः स्वीक्रियते तर्हि बाधकाभावात् तन्न्यायाच्च आख्यातस्यापि कर्तर्यापत्तेः। तदाह - अन्यथा आख्यातस्यापि इति॥

निष्कृष्टसिद्धान्तमाह – वस्तुतस्त्विति॥ पश्य मृगो धावतीत्यादौ व्यापारमुख्य-विशेष्यकबोधस्वीकारे एव भाष्यसिद्धैकवाक्यतोपपत्तिर्नान्यथेति, शाब्दबोधोपपत्तये नैयायिकोक्तः कार्यकारणभावो नादरणीयः इति मनसि निधायाख्यातस्य कर्तृ-वाचकत्वं साधयति - पश्य मृगो धावतीति॥ अत्र शाब्दबोधो यथा - मृगकर्तृकोत्कट-धावनकर्मकं त्वत्कर्तृकं प्रेरणाविषयीभूतं दर्शनमिति। पश्य नृत्यति भवती-त्यत्र विशिष्टनर्तनकर्तृकभवनकर्मकं दर्शनमिति बोधः। पचति भवति इत्यत्र पाककर्तृका भवतिक्रियेति बोधः।एतेषु बोधेषु कस्या अपि क्रियाया प्रथमान्तार्थेऽन्वयादर्शनेन आख्यातार्थभावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावो नैयायिकोक्तो न साधुरिति भावः। न च नैयायिकमते प्रथमान्तार्थे एव भावनाया विशेषणतयान्वयेऽस्तु उक्तः कार्यकारणभाव इत्यत आह- धावनादिभावनाया दर्शनादौ विशेषणतयान्वयबोधानुरोधादिति॥ पश्य मृगो धावतीत्यादौ धावना-त्मकभावनाया दर्शने अन्वयो न तु मृगपदार्थे प्रथमान्तार्थे। तदाह - वक्तुरपि तथैव तात्पर्याद् इति॥ न तावदत्र मृगकर्मकदर्शनं प्रतिपिपादयि-षितम् । अपि तु मृगकर्तृकधावनमेव दर्शनान्वयित्वेन वक्तुरभिमतम्। ननु वक्तु-स्तथा तात्पर्ये प्रमाणाभावः इत्यत आह - भाष्यकारैरपि तथैवाभ्युपगमात्॥ ननु तादृशं वाक्यं भाष्यकारेण कण्ठतो न कुत्राप्युक्तमित्यत आह – एतादृशेष्वेकवाक्य-ताप्रतिपादनाच्चेति॥ अयमाशयः- भाष्यकारेण पचति भवतीत्यादौ एकवाक्यता स्वीकृता, सा च बोधस्य प्रथमान्तार्थमुख्यविशेष्यकत्वेन सम्भवतीति। तथा च भूवादि(पा.1-3-1) सूत्रस्थं भाष्यम् - "का तर्हीयं वाचो युक्तिः, पचति भवति, त्वं पचसि भवति, पक्ष्यति भवतीति। सैषा वाचो युक्तिः। पच्यादिक्रियाः भवति-क्रियायाः कर्त्र्यो भवन्ति" इति। तेन चाहत्यैव पचाद्यर्थक्रियाकर्तृकभवन-क्रियायाः प्राधान्यं प्रतिपाद्यते। पश्यति नृत्यति भवतीत्यादौ प्रथमान्त-स्याभावेन त्वदुक्तकार्यकारणभावोऽपि न संलग्नो भवति।

इदानीं स्वसम्मतबोधस्य स्ववासनामूलकत्वमाह - चैत्रः पचतीत्यत्र नैयायिकानामित्यादिना॥ तथा बोधे स्वस्वव्युत्पत्तिरेव हेतुरिति भावः। अत एवेति॥ बोधस्य स्वस्वव्युत्पत्त्यनुरोधादेव। चैत्रः पचति इत्यत्र भावनाविशेष्यको बोधो मीमांसकमते। अत्रापि व्युत्पत्तिरेव मूलम्। तस्मादिति॥उक्तस्थलेषु

प्रदर्शितबोधोपपत्तये उक्तकार्यकारणभावस्यावश्यकत्वेन नैयायिकोक्तकार्यकारणभावे निरस्ते, भेदान्वयबोधे एकपदोत्तरविभक्तिविरुद्धविभक्तिमत्पदजन्योपस्थितिः कारणमिति कार्यकारणभावमूलिका नामार्थव्युत्पत्तिः। तथा च कृतां कर्तरि शक्तिरिति पक्षो न युक्तः, अन्यथासिद्धेः। कृतां कर्तरि शक्तिसाधकः देवदत्तः पाचक इत्यत्राभेदान्वयानुरोध एव, न तु उक्तकार्यकारणभावादिः। एवञ्च यथा कृत्स्थलेऽभेदान्वयानुरोधात्कर्तरि शक्तिः, तथैव देवदत्तः पचतीत्यत्र देवदत्ताभिन्नैककर्तृको विक्लित्यनुकूलो वर्तमानो व्यापार इत्यभेदान्वयानुरोधेन आख्यातस्य कर्तरि शक्तिर्मन्तव्यैव। अत्र आख्यातार्थकर्तरि देवदत्तादेरभेदान्वयः। एवं रीत्या आख्यातस्य भावनायां न शक्तिः किन्तु कर्तर्येव शक्तिरिति भावयामः।

**20.** केचित्तु कर्तुरवाच्यत्वे पचतीत्यत्र पाककर्तुर्मानस एकत्वसंशयः स्यात्। ननु[१] कर्तुरनुपस्थितौ धर्मिज्ञानाद्यभावात्[२] कथं संशयः? लक्षणया तदुपस्थितौ चैकत्वविशिष्टे लक्षणाभ्युपगमान्न[३] संशय इति चेन्न, मनसा तदुपस्थितिसंभवात्। न चोप[४]स्थितत्वात् संख्यान्वयोऽपि स्यादिति कथं संशय इति वाच्यम्, शाब्दोपस्थितस्यैव नैयायिकैः शाब्देऽन्वयाङ्गीकारात्[५]।

न च लक्षणयोपस्थिते[६]संख्यान्वयस्य सुवचत्वान्न[७] संशय इति[८] वाच्यम्, न्यायनये[९] सर्वत्र लक्षणायां[१] बीजाभावात्। प्रथमान्तपदादनुपस्थितेस्तदन्वयासंभवाच्चे[२]ति वदन्ति[३]। अधिकं वक्ष्यमाणरीत्यावधेयमिति दिक्।

---

[१] जै-न च, अ4- ननु च

[२] अ3-धर्मिज्ञानाभावात्

[३] त1,त5- "न" नास्ति

[४] म- न च तदुप

[५] भ1- शाब्देनाङ्गीकारात्

[६] व1,द1,1900-लक्षणयोपस्थितेः

[७] त2-सुवचनत्वात्

[८] त2-"संभवात्। न चोपस्थितत्वात् संख्यान्वयोऽपि स्यादिति कथं संशय इति वाच्यम्, शाब्दोपस्थितस्यैव नैयायिकैः शाब्देऽन्वयाङ्गीकारात्। न च लक्षणयोपस्थिते संख्यान्वयस्य सुवचत्वान्न संशय इति" इति ग्रन्थः आवृत्तः

[९] के5,म-न्यायमते

## 3.9 मीमांसकमतविमर्शः, निराकरणञ्च

मीमांसकास्तु "अनभिहित"(पा.2-3-1) इत्यस्याबोधित [४] इत्यर्थः। बोधश्च शक्त्याक्षेपाद् वा। स चाख्याते आक्षेपात्। कृति[५] तु[६] शक्त्या। अत एव कर्त्रधिकरणे[७] (मी.3-4-4-12) भट्टैरुक्तम्[8]-

"यादृशस्तु[८] गुणभूतः[९] कर्तात्रावगम्यते[१०], न[११] तादृशेन विना[१२] भावनोपपद्यत[१३] इति अर्थापत्त्यानुमानेन वा[१४] शक्ता गमयितुम्[१५]" इत्यादिना।

ननु कृत्याक्षेपा[१६]दाख्याते[१७] शक्त्येति वैपरीत्यं किं न स्यादिति चेन्न, प्रधानीभूतया[१८] भावनया[१९] कर्तुराक्षेपस्य युक्तत्वात्। भावनाया आक्षेपलभ्यत्वे च[२०] प्राधान्यानुपपत्तेः। एवं कृत्यपि प्राधान्यात् कर्तुर्वाच्यत्वमावश्यकमिति[२१] युक्तस्तेनाक्षेपः।

---

[१] के5,म-बीजलक्षणायां

[२] त1- प्रथमान्तपदादनुपस्थिते तदन्वयसंभवाच्चे, त4- प्रथमान्तपदादनुपस्थितेस्तदन्वयसंभवाच्चे

[३] त2- "वदन्ति " नास्ति

[४] के3-इत्यस्यानवबोधित

[५] अ1-कृते

[६] अ3-"तु" नास्ति

[७] जै-सर्वत्राधिकरणे

[८] द5,ज1-यादृशश्च

[९] अ3,के4-गुणीभूतः

[१०] अ1,द2- "अत्र " नास्ति,के4-कर्तात्राह्यवगम्यते

[११] के4-"न"नास्ति

[१२] के4- "कर्त्रा"इति अधिकं

[१३] के4-भावनान्नोपपद्यत

[१४] द7-चा

[१५] भार1, अ1,ज2,ब2,-शक्त्या गमयितुं, त4,के3,अ4-शक्तावगमयितुं, 1900,1915-शक्तानुगमयितुं

[१६] त2-कृतिवाक्षेपा

[१७] के3-दाख्यातेन

[१८] के3-प्रधानभूततया,के5-प्रधानभूत

[१९] त1 -प्रधानीभूतायाः भावनायाः,त5-प्रधानभूतायाः भावनायाः

[२०] त1,त4,के5,म,अ4- "च" नास्ति

[२१] ब3-कर्तुर्वाच्यत्वे यथाकथंचित् भावनाक्षेपमावश्यकमिति

उक्तं च[१] "यदि कर्त्रा धात्वर्थेन वा[२] भावना गम्येत[३], ततः[४] पाचक[५] पाठकादिपदे[६]ष्विव तिरोहितस्वरूपावगम्येत[७]। प्राधान्यात्तु[८] शब्दार्थत्वाध्यव[९]सानम्" इति। पदाद-नुपस्थितस्य[१०] कर्तुः कथं शाब्दबोध विषयत्वमिति[११] चेत्, अत्र नामार्थनिर्णये वक्ष्यते। तस्मान्नाख्यातस्थले[१२] कर्तृकर्मणी वाच्ये, अभिधानव्यवस्थायाः प्रकारान्तरेणो-पपत्तेरिति वदन्ति[१३]।

---

शैलीभेदेन आख्यातस्य कर्तृवाचकत्वमुच्यते – केचित्त्वित्यादिना॥ अयमाशयः- आख्यातस्य कर्तृवाचकत्वे, आख्यातेन कर्तृसंख्ययोरुपस्थितौ, समानप्रत्ययोपात्तत्वेन परस्परान्वयेन, पचतीत्यादौ एकत्वविशिष्टस्यैककर्तुर्भाना-दनेकत्वादिकोटिकसंशयाभावः। कर्तुरवाच्यत्वे तु आख्यातेन संख्योपस्थितावपि, कर्तुः अनुपस्थितत्वात् कर्तरि संख्याभानाभावेन, कर्ता एकः अनेको वेति संशया-पत्तिः, तदाह - मानसः एकत्वसंशय इति॥

कर्त्रा चक्षुरादिसंन्निकर्षाभावादाह - मानस इति॥ ननु एकस्मिन् धर्मिणि नानाकोटिकं ज्ञानं संशय इति संशयलक्षणं, तथा च संशयोपपत्तये सामान्यरूपेण धर्मिण उपस्थितिरपेक्ष्यते, प्रकृते च धर्मिणः कर्तुरनुपस्थितिरेवेति संशयापादान-मयुक्तमिति प्रतिपादयन्नाह - ननु कर्तुरनुपस्थिताविति॥ अनुपस्थिताविति आख्यातस्य कर्तृवाचकत्वाभावात्। ननु आख्यातस्य भावनायां शक्तावपि लक्षणया

---

[१] अ1- "च" नास्ति

[२] त1,म- "वा" नास्ति

[३] अ1,वा2,द1,त4,1915-भावनावगम्येत, त1-भावना अवगम्यते, अ4-भावना अनुपगम्येत

[४] त1-ततश्च

[५] भ1-पाचकादि

[६] म- "पद" नास्ति, अ4- पाचकपाकादिष्विव

[७] त1-वगम्यते

[८] अ1- "तु" नास्ति

[९] अ1-शब्दार्थत्वादव

[१०] त5,अ4-पदानुपस्थितस्य

[११] त2-शाब्दबोधत्वमिति

[१२] द1-तस्मान्नाख्यातार्थस्थले

[१३] जो2- "वदन्ति" नास्ति

कर्तुरुपस्थितौ, तत्रैकत्वानेकत्वादिसंशयः स्यादिति चेन्न, एकत्वविशिष्टे कर्तरि लक्षणा-स्वीकारे कर्तरि संख्याविशेषस्य एकत्वस्य दर्शनेन संशयानुपपत्तेः विशेषधर्मज्ञानस्य संशयनिवर्तकत्वात्। लक्षणां विनैव धर्मिण उपस्थितिं साधयति - मनसा तदुप-स्थितिसत्त्वात् इति॥

संशयार्थं धर्मिण उपस्थितिमात्रमपेक्ष्यते , सा च मनसा वा अन्यथा वा स्यादिति भावः। मनसोपस्थितौ दोषमाह - न चोपस्थितत्वादिति॥ मनसा उपस्थिते कर्तरि आख्यातार्थसंख्यान्वये उक्तरीत्या संशयानापत्तिः। समाधानमाह – शब्दोपस्थितस्यैवेति॥ घटपदादेकसम्बन्धिज्ञानमुद्रया उपस्थिताकाशादेः शाब्दबोध-वारणाय तद्विषयकशाब्दबोधं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीनतद्विषयकोपस्थितिः कारणम् इति कार्यकारणभावो नैयायिकादिभिः स्वीक्रियते। तथा च मनसा कर्तुरुपस्थितौ तस्य संख्यान्वयित्वेन शाब्दे भानायोगात्। मनसोपस्थितस्यापि कर्तुः शब्दादनुपस्थितत्वात्।ननु तत्र कर्तरि लक्षणा अस्तु। लक्षणया कर्तुरुपस्थितिः, शब्दोपस्थितिरिव। तथा च तत्र संख्यान्वये, संशयाभावः इति चेत्तत्राह - न्यायनये सर्वत्र लक्षणायां बीजाभावात्॥ ननु आख्यातार्थसंख्यान्वयानुपपत्तिरूपबीजसत्त्वे लक्षणास्त्वित्यत आह – प्रथमान्तपदादनुपस्थितेरिति ॥ नैयायिकैः प्रथमान्तपदा-दुपस्थिते एव संख्यान्वयस्य स्वीकारात्। प्रकृते तु लक्षणया उपस्थिते कर्तरि अन्वयस्यापादनात्। वक्ष्यमाणरीत्येति॥ आख्यातार्थसंख्यान्वयविचाररीत्येत्यर्थः।

मीमांसकास्तु इति॥ अनभिहिते इति॥ अनभिहिते(पा.2-3-1) इत्यधिकार-सूत्रात्मकानभिहितपदार्थनिर्वचनमेतत्। अबोधितघटकबोधपदार्थमाह - बोधश्चेति। शक्तिप्रयोज्यः आक्षेपप्रयोज्यो वा बोध इत्यर्थः। बोधपदार्थनिर्वचनफलमाह - स चेति॥ सः बोधः। पचतीत्यादौ आख्यातस्य भावनायां शक्तिः कर्तुराक्षेपाल्लाभ इति मीमांसकैः स्वीकारात् । कृति पक्तेत्यादौ। तत्र कृतां कर्तरि शक्तिः, भावनाया आक्षेप इति तेषां मतम्। मीमांसकमतमिदं भट्टाभिमतमित्याह - अत एव कर्त्रधिकरणे भट्टैरुक्तम् इति॥ अत्र आख्याते। यादृशः गुणभूतः भावनायां विशेषणीभूतः कर्ता, सिद्धान्तभूतशाब्दबोधमादायेदम्। तादृशेन कर्त्रा विना भावना न उपपद्यते, कर्तारं विना भावनाप्रतीत्यनुपपत्तेः, तस्मात् भावनाप्रतीत्यन्यथा-नुपपत्त्या अनुमानेन वा अनुगमयितुं बोधयितुं शक्यते कर्तेति शेषः। अनुमानाकारश्च -

भावना क्वचिदाश्रिता गुणत्वात् , रूपादिवत् । एवञ्च आख्यातस्थलेऽपि अभिधानानभिधानव्यवस्थोपपत्तिः। देवदत्तः पचतीत्यादौ शक्त्या अभिधानाभावेऽपि आक्षेपात्तदभिधानात् प्रथमैव। आक्षेपाज्जायमानस्यापि बोधस्य ग्रहणात्।

मीमांसकमतमाशङ्कते - ननु कृति आक्षेपादिति॥ कृति कर्ता शक्त्या, आख्याते आक्षेपात् लभ्यते इति तेषां मतम् , वैपरीत्यमेव कुतो न , कृति आक्षेपात् आख्याते शक्त्या कर्ता लभ्य इति। वैपरीत्यबाधकमाह – प्रधानीभूतयेति॥ ननु आक्षेपे प्राधान्यं न प्रयोजकमपि तु अन्यथानुपपत्तिरेवेत्यत आह - भावनाया आक्षेपलभ्यत्व इति॥ कर्त्रा भावनाया आक्षेपे शाब्दबोधे भावनायाः प्राधान्यं न स्यात्। तस्मादाख्यातस्थले भावनामुख्यविशेष्यकबोधोपपत्तये भावनाया एव वाच्यत्वमावश्यकम्। तया च कर्तुराक्षेपस्तस्य शाब्दबोधे विशेषणतयैव भानात्। एवमेव प्राधान्यानुरोधेन पक्ता देवदत्त इत्यादौ कर्तुः प्राधान्येन प्रतीतये कृतः कर्तरि शक्तिः, तत्र शाब्दबोधेऽप्रधानीभूतायाः भावनाया एवाक्षेपः इति भावः। उक्तञ्चेति॥ यथा कृत्स्थले कृद्वाच्यकर्त्रा भावनाया आक्षेपे पाचकपाठकादिपदेषु तिरोहितस्वभावा एव भावना प्रतीयते, तिरोहितः कर्तृविशेषणतया प्रतीतः स्वभावो यस्याः सा। तथैव आख्यातस्थलेऽपि कर्त्रा भावना आक्षिप्येत , तदा अत्रापि सा न प्राधान्येन प्रतीयेत , किं तर्हि तिरोहितस्वभावैव प्रतीयेतेति भावः। ननु आख्यातस्थलेऽपि तिरोहितस्वभावैव क्रिया प्रतीयतामित्यत आह - प्राधान्यात्तु शब्दार्थत्वाध्यवसानमिति॥ भावनाया प्राधान्येन शाब्दबोधविषयत्वम् , भावप्रधानमाख्यातमिति निरुक्तात्। ननु भावनया कर्तुराक्षेपे, आक्षिप्तस्य शाब्दे भानायोगात्कर्तुः शाब्देऽभानापत्तिरिति शङ्कते – पदादनुपस्थितस्येति॥ पदनिष्ठशक्तिग्रहाधीनोपस्थित्यविषयस्येत्यर्थः। कथं शाब्दबोधविषयत्वम्। शाब्दबोधविषयत्वाभाव एव स्यादिति भावः। अस्य समाधानमन्यत्रोक्तमिति – नामार्थनिर्णये वक्ष्यते इति॥ तत्र हि एकमित्यस्य जातिरित्यर्थस्तदा गामानय इत्यादौ कथमानयनाद्यन्वयः, पदाज्जातेरेवोपस्थानात्। इत्याद्युक्त्वा आक्षेपाद् व्यक्तिलाभेनान्वयः प्रतिपादितः। तत्र उक्तदोषमनुभूय "अत्र वदन्ति निरूढलक्षणया जातिव्यक्त्योरभेदाद् वा व्यक्तेर्लाभ" इत्यादिना समाधानमुक्तम्। स्वमतमुपसंहरति –तस्मादित्यादिना॥ "अनभिहिते" (पा.2-3-1)इत्यस्य शक्त्या आक्षेपाद्वा जायमानबोधाविषयत्वरूपमर्थं

स्वीकृत्य अभिधानानभिधानव्यवस्थायाः सिद्धत्वेन कर्तरि कर्मणि वा आख्यातस्य शक्तिस्वीकारो व्यर्थ इति भावः। इदं भाट्टमीमांसकमतम्।

**21.** अत्रोच्यते- यथाकथञ्चिद् भावनाक्षेपमात्रेण प्रत्यायितत्वम्[१] अभिधानव्यवस्थायां नोपपादकम्[२]। कर्मप्रत्ययेऽपि[३] भावनाया विना आश्रयम् अनुपपत्तेः[४]। कर्तुराक्षेपात्[५] कर्त्रभिधाने तृतीयानापत्तेः। आख्याते शक्त्या कृत्याक्षेपादिति वैपरीत्यस्य[६] दुर्वारत्वाच्च[७]। यत्तु तथा सति प्राधान्येन[८] भानं[९] न स्यादिति तन्न, आक्षेपलभ्य[१०]स्यापि प्राधान्येन भाने बाधकाभावात्। अन्यथा प्राधान्यानुरोधाद् व्यक्तेर्वाच्यत्वस्वीकारापत्तौ[११] आकृत्यधिकरणं[१२](मी.1-3-9-30)दत्तजलाञ्जलि[१३] स्यादिति[१४]।

ननु कर्त्रा स्वस्वरूप[१५]निरूपकत्वेन भावनाया आक्षेपाद् गुणत्वम्, जात्या[१६] तु लोके परिच्छेद्यतयाऽवगतं द्रव्यं तथैवाक्षिप्यत इति न गुणत्वमिति चेन्न, एतादृशविशेषस्याप्रयोजकत्वेन[१७] गुणत्वादावनियामकत्वात्[१८]। भवद्रीत्या व्यक्तेरिव

[१] जो2-प्रत्यापितत्वं

[२] के3,म,अ4-न प्रयोजकम्, के5-न प्रतियोजकम्

[३] ज1-"अपि" नास्ति

[४] के3-अनियमानुपपत्तेः

[५] के4-कर्तुराक्षेपेण

[६] के5- "अपि"इति अधिकं, अ1-वैपरीत्ये तस्य

[७] जो2-दुर्वारच्च,भ2,द5-दुर्वाच्यत्वाच्च, अ4 -दुर्वारत्वापत्तेश्च

[८] के5-प्राधान्येनास्य

[९] अ4- भावना

[१०] के5,म-आक्षेपगम्य

[११] अ1,त2-स्वीकारापत्त्या,

[१२] त5-वाकृत्यधिकरणं

[१३] जै-दत्तजलाञ्जलिः, जो2-दत्ताञ्जलि

[१४] 1915-स्यात्।

[१५] के4- "स्वरूप"नास्ति,भ1-"रूप"नास्ति

[१६] के5,म-जात्यादौ

[१७] भ1-त्वात्

[१८] त5-गुणत्वादावपि नियामकत्वात्

कर्तुः परिच्छेद्यत्वादाक्षिप्तस्यापि व्यक्तिवद्विशेष्यत्वा[१]पत्तेश्च। किं च देवदत्तादिः शक्तिविशेषरूपो वा कर्ता न भावनानिरूप्यः[२], [३]घटत्ववदखण्डत्वात्। कर्तृत्वं तद्घटितमिति चेद्[४] घटत्वमपि[५] घटघटितमेवेति[६] विशेषोपपादनञ्च[७] धन्धनम्[८]। अथ घट इत्यत्रापि नास्त्येव घटादेर्विशेष्यत्व[९]प्रतीतिः, किं तु घटत्वादेरिति[१०] चेत्, सत्यम्। एवं[११] हि व्यक्तौ पदार्थान्तरान्वयो न स्यात्, विशेष्यतयानुपस्थितत्वेनाकाङ्क्षा-विरहात्। किं च न भवत्प्रतीत्यैव[१२] वस्तुसिद्ध्यसिद्धी[१३], किं तु सकल[१४] साधारण-या[१५]। [१६]तादृशी[१७] च न[१८] व्यापारेऽपि[१९], नैयायिकैः कर्तृविशेष्यकबोधा[२०]भ्युप-गमात्[२१]। एवं घटपदादि[२२] स्थलेऽपि। तस्माद्विशेष्यत्वादि[२३] बोधो भवतामेव

---

[१] अ3,भ1,द7-व्यक्तिवद्विशेष्यतापत्तेश्च, जै-व्यक्तिवद्विशेष्यकत्वा,के4-व्यक्तित्वाविशेष्यत्वापत्तेश्च

[२] त1,त5-भावनादिरूप्यः

[३] के3- "कर्तृत्वस्य" इति अधिकं

[४] के4,म- "चेद्"नास्ति, त5-चेन्न

[५] अ3,वा2,भार1,द1,द4,त1,त5,ब1,के4,द3,भ2-घटत्वत्वमपि

[६] जो2- "चेत् " इति अधिकं

[७] के4,वा2,भार1,द1,द2,द4,त1,त2,त4,जो2,1900,भ1,अ4- "च " नास्ति, अ1-विशेषोपादानं च

[८] वा2,1900-दन्ध्रणम्, भार1,द1,त1,त4,द3,1915-दन्धनम्,के3,के5-दण्डनम्, के4-दधनम्, द4-दन्ध्रनम्,त5,द7-धंधनम्

[९] जै-र्विशेष्यकत्व

[१०] अ4,त1,जो2,त5-घटत्वादेरेवेति चेत्

[११] के3-सत्येवम्

[१२] त1,त5- "एव " नास्ति

[१३] के5-वस्तुसिद्ध्यति

[१४]त4-किञ्च न भवतां प्रतीत्या वस्त्वसिद्धिः,किन्तु सकललोक, के3,अ4--सकललोक

[१५] जै,द2-साधारणतया,के5,ज1,म,अ4- साधारण्या

[१६] अ3-"न" अधिकं

[१७] त2-तादृशे

[१८] द4-वन

[१९] जै-व्यापारोऽपि, त4,अ4-व्यापारे

[२०] द5,ज1-विशेष्यबोधा

[२१] अ1-बोधाङ्गीकारात्

[२२] के5,द2,अ4-पटादि, द5-घटादिपदस्थलेपि

[२३] के5- "आदि " नास्ति

तादृशाव्युत्पत्तिवशा[1] जायमानो न वस्तुव्यवस्थापक इति[2] स्फुटतरं[3] भावार्थाधिकरणदूषणे[10] वक्ष्यते।

---

अथ तन्मतं खण्डयति – अत्रोच्यत इति॥ आक्षेपलभ्यत्वमभिहितत्वमिति स्वमते परिष्कृत्याभिधानव्यवस्था या त्वया साधिता सा न समीचीना। कर्तृप्रत्ययस्थले अभिहितपदस्य उक्तार्थस्वीकरणेन कथञ्चिदेवंविधव्यवस्थास्वीकारेणेष्टसाधनेऽपि कर्मप्रत्ययस्थले दोषादित्याह - कर्मप्रत्ययस्थलेऽपि इति॥ कर्मणि प्रत्यये भावनाप्रतीतिरस्त्येवेति तया कर्तुराक्षेपेण अभिधानात् रामेण पच्यते तण्डुलः, इत्यादौ रामेणेत्यत्र तृतीयानापत्तिः, त्वद्रीत्यानभिहितकर्तुरभावात्। मीमांसकमतं प्रकारान्तरेण खण्डयति - यत्तु इत्यादिना॥ अयमाशयः- प्राधान्यानुरोधेन न कर्त्रा भावनाया आक्षेपः, भावनाया आक्षिप्तत्वे तस्याः शाब्दबोधे प्राधान्यं भज्येतेति यदुक्तम् तन्न समीचीनम् । कुत इति चेदाह – आक्षेपलभ्यस्यापि॥ कर्त्रा आक्षिप्ताया अपि भावनायाः प्राधान्ये बाधकाभावात्। न हि आक्षिप्तस्य प्राधान्यानुपपत्तिरिति राजाज्ञया सिद्धम्। वैपरीत्ये बाधकमाह – अन्यथेति॥ अयमर्थः- आकृतिः (जातिः) पदार्थः इति मीमांसकनये। आकृत्यधिकरणे तत्तैर्व्यवस्थापितम्। तथा सति घटमानयेत्यादौ जातेरानयनासम्भवात् जात्याक्षिप्तव्यक्तेर्यथा प्राधान्येन भानं तथैव आक्षिप्तापि भावना प्राधान्येन भासेत, आक्षिप्तस्याप्राधान्यमेवेति नियमाभाव इति। अन्यथा गामानयेत्यादौ प्राधान्येन बोधाय व्यक्तेर्वाच्यत्वावश्यकत्वेन जातेर्वाच्यत्वप्रतिपादकाकृत्यधिकरणोच्छेद एव स्यादिति।

आकृत्यधिकरणन्यायं मीमांसकः स्वमतेनोपपादयति - ननु कर्त्रा स्वस्वरूपनिरूपकत्वेनेति॥ आक्षेपाल्लाभस्य समानत्वेऽपि, भावनाया गुणत्वमाक्षेपेण लाभात्। जात्या व्यक्तेर्लाभेऽपि, तस्याः प्राधान्यमेवेति तदाह – कर्त्रा स्वस्वरूपेति॥ कर्तृत्वं भावनानिरूपितमेव, भावनामन्तरेण कर्तृस्वरूपानुपपत्तिः, अतः निरूपकत्वरूपं भावनाया गुणत्वमेव अप्राधान्यमेव, अतो तस्या आक्षेपोऽनुचितः। व्यक्तेराक्षेपेऽपि न गुणत्वम्। किन्तु प्राधान्यमेव तदाह - जात्या तु लोके परिच्छेद्य -

---

[1] अ3-व्युत्पत्तिबला

[2] के5- "इति" नास्ति

[3] के4,अ4- "स्फुटतरं" नास्ति

तयेति॥ जातिर्घटादिव्यक्तिं व्यवच्छिनत्ति - व्यावर्तयति । घटादिपदवाच्यत्वेन व्यवस्थापयति। किञ्च घटत्वादिना घटादिद्रव्यम् एव घटादिशब्देनावगम्यते न तु पटादि। अतः घटत्वादिना परिच्छेद्यतया विशेष्यतया व्यक्तिप्रतीतिरिति तस्याः प्राधान्यम्, न तु गुणत्वम् , विशेषणत्वमिति भावः।

उक्ताशयं खण्डयति – एतादृशविशेषस्येति॥ निरूपकत्वेन आक्षिप्तायाः भावनाया गुणत्वम् , परिच्छेद्यतया आक्षिप्ताया व्यक्तेः विशेष्यत्वमिति यो विशेषः त्वया स्वीकृतः तस्य गुणत्वादौ नियामकत्वाभावः। स्वकपोलकल्पितत्वात्। भावनया कर्तुरपि परिच्छेद्यत्वेनैव आक्षेपात् तस्यापि त्वन्मते प्राधान्यापत्तेः। परिच्छेद्यपरिच्छेदकभावस्य विवक्षितत्वात्। तदाह – व्यक्तिवद्विशेष्यत्वापत्तेश्चेति॥ यत् भावनाया कर्तृस्वरूपनिरूपकत्वेन गुणत्वमुक्तं तदपि खण्डयति – किञ्चेति॥ यथा घटत्वमखण्डं न निरूपकापेक्षम्। तथैव देवदत्तादिरपि अखण्ड एव, निरूप्य-स्वभावत्वाभाववानेव अतो न भावनानिरूप्य इति भावः। ननु देवदत्तत्वादिना न कर्तुराक्षेपः, किं वा न तेन रूपेण भावनाया आक्षेपः इत्यत आह - शक्तिविशेषरूपः कर्ता वेति ॥तादृशकर्ता वा न भावनानिरूप्यः। कर्तृत्वस्य भावनानिरूप्यत्वमाह - कर्तृत्वं तद्घटितमिति॥ कर्तृत्वं हि भावनाश्रयत्वरूपम्। अतः भावनां विना कर्तृत्वासिद्धेः कर्तृत्वस्य भावनानिरूप्यत्वसिद्धिरिति भावः। घटत्वेऽपि तौल्य - मस्तीति घटत्वस्य व्यक्तिनिरूप्यत्वापत्तौ त्वदुक्तरीत्या घटत्वनिरूपकत्वेन व्यक्तेरपि गुणत्वापत्तिः। तस्मादयं ते विशेषो न गुणत्वादिसाधक इति बोध्यम् । एतदेवाह - घटत्वमपि घटघटितमेव॥ घटत्वन्नाम घटस्य भावः, इति व्युत्पत्त्यैव घटत्वस्वरूपे घटघटितत्वमायातीति ध्येयम्।

अथ घट इत्यत्रापि इति॥ घट इत्युक्तौ जायमाने बोधे घटनिष्ठघटत्वस्यैव विशेष्यता, स्वाभिप्रायवशाद् वा आकृत्यधिकरणन्यायवशाद्वा स्यात्। न चान्वया-नुपपत्तिः। घटोऽस्तीत्यादौ अन्वयाबाधात्। द्वितीयं खण्डयति - एवं हि व्यक्तौ पदार्थान्तरान्वयो न स्यादिति॥ घटादेर्विशेषणत्वे तस्य पदार्थत्वाभावेन घटमानयेत्यादौ आनयनादिपदार्थस्यान्वयानुपपत्तिः। पदार्थान्तरान्वयबोधं प्रति विशेष्यतया पदार्थोपस्थितेः कारणत्वात्। प्रथमं खण्डयति - न भवत्प्रतीत्यैवेति॥ स्वाभिप्रायवशेन वस्तुसाधनायोगात्। वस्तुसिद्धौ तर्हि किं गमकमित्यत आह –

किन्त्विति॥ सकलसाधारणतया सर्वेषामविरोधेनैव वस्तुसाधनमुचितम्। प्रकृते च घटापेक्षया घटत्वादेर्विशेष्यत्वं त्वत्प्रतीतिमात्रवेद्यम् , नान्यैस्तथा स्वीक्रियमाणम्। तादृशी च न व्यापारेऽपि इति॥ व्यापारेऽपि विशेष्यत्वप्रतीतिः न सर्वसाधारणतया अस्ति, मीमांसकस्य तव मते व्यापारमुख्यविशेष्यकबोधस्वीकारेऽपि नैयायिकैः कर्तृ (प्रथमान्तार्थ)मुख्यविशेष्यकबोधस्य स्वीकारात्। एतदेवाह - नैयायिकैः कर्तृविशेष्यकेत्यादिना॥ ननु शाब्दबोधे व्यापारे विशेष्यत्ववादिनो वैयाकरणस्ये - यमुक्तिः वदतो व्याघातात्मिकेति चेन्न, मीमांसकमतस्य हीनत्वबोधने एव तात्पर्यात्।

एवं घटादिपदस्थलेऽपि - घटादिस्थलेऽपि घटत्वविशेष्यत्वे सर्वसाधारण-प्रतीतिर्नास्ति, किन्तु घटनिष्ठविशेष्यत्वे एव। तथा च पूर्वं यदुक्तं तत्तुच्छम्। उपसंहरति – तस्मादित्यादिना॥ घटत्वादिनिष्ठविशेष्यत्वेन घटत्वादिबोधो भवद्व्युत्पत्तिसिद्धः न तु सर्वजन साधारणः। अतस्तेन न वस्तुसिद्धिः।

भावार्थाधिकरण इति॥ तत्र हि "नव्यास्तु जातिगुणक्रियासाधारण्येन एकशक्तौ सम्भवन्त्यामनेकतत्कल्पने गौरवात्। अस्तु धर्मत्वेन तेषां वाच्यता, परन्तु तत्र प्रकृत्यर्थो व्यक्तिरेव प्रकार इत्युक्तम्। सा च स्वेतरावृत्तित्वावच्छिन्न-निखिलस्ववृत्तित्वसम्बन्धेन प्रकार इति। तद् न ।उक्तसम्बन्धेन वैयाकरणमते घटत्वे बाधितत्वादिति।" व्याख्यास्यते च तत्रैवायं ग्रन्थः।

**22.** अथ भावनया कर्तुराक्षेपो युक्तः, न तु कर्त्रा भावनायाः, कर्मप्रत्ययस्थले भावनाप्रत्ययानुपपत्ते[१]रिति चेन्मैवम्[२], कर्तृकर्मोभाभ्यामाक्षेपसंभवात्। न चोभयोरा-क्षेपकत्व[३]कल्पने गौरवम्, तवाप्यु[४]भयोराक्षेप्यत्व[५]कल्पने गौरवात्। कर्मकर्तृकृत्सु[६] तदाक्षेपाय त्वया[७]प्येवं[१] स्वीकर्तव्यत्वाच्चेति।

---

[१] के4-भावनाप्रत्ययानुपपत्त्यापत्तेः

[२] के5-चेन्नैवम्

[३] त1,त4,त5 -चोभयोरप्याक्षेपकत्व

[४] वा2-तथाप्यु

[५] त1,त4,त5,अ4 -भयोरप्याक्षेप्यत्व

[६] अ1,अ3,जो2-कर्तृकर्मकृत्सु, ज1-कर्मकृत्सु

[७] अ1-तदा

यत्तु "कर्तरि कृत्" (पा.3-4-67) इति व्याकरणस्य कृत्प्रत्ययस्थले कर्तरि शक्तिपरिच्छेदकस्य सत्त्वात् कर्तृवाच्यत्वा[२]वश्यकत्वात्[३] तेन[४] कृत्प्रत्ययस्थले भावनाक्षेपो युक्तः, तिङ्स्थले च[५] तदभावान्न कर्तुर्वाच्यत्वमायातीति[६],

तदापाततः[७]। तिङ्स्थलेऽपि[८] "लः कर्मणि" (पा.3-4-69) इति[९] सूत्रस्य कर्तरि शक्तिपरिच्छेदकस्य[१०] सत्त्वात्। "कर्तरि कृत्" (पा. 3-4-67) इति कर्तृग्रहणस्यैव[११] अत्रानुवृत्तेः[१२]। अनन्य[१३]लभ्यत्वादेश्चोभयत्रापि[१४] तुल्यत्वात्।

अथ "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा. 3-4-69) "तिप्तस्झि" (पा.3-4-78) "द्व्येकयोर्द्विवचनैकवचने" (पा.1-4-22) इत्येतेषाम् एकवाक्यतया[१५] विधाने-न[१६] कर्तुरेकत्वेऽभिधेये लकारैकवचनं तिबादि[१७] प्रयोक्तव्यमित्यर्थ[१८] पर्यवसानात् कर्तुर्वाच्यत्वं[१९]-

---

[१] अ4-आक्षेप्यत्वाय तवाप्येवम्

[२] अ3-कर्तृवाच्यता,भ1-कर्तुर्वाच्यता,त5,द7-कर्तुर्वाच्यत्वा

[३] जो2,त2-कर्तुर्वाच्यत्वावश्यत्वात्, त4,अ4-कर्तुर्वाच्यत्वस्य आवश्यकत्वाच्च

[४] के3- "तेन" नास्ति

[५] भार1,ब2-तिङः स्थले च

[६] त1,त4,त5-कर्तुर्वाच्यत्वमपीति

[७] अ1-तदप्यापाततः

[८] भार1,ब2-तिङः स्थलेऽपि

[९] अ3-"इति" नास्ति

[१०] 1915-शक्तिपरिच्छेदस्य

[११] ज1-कर्तृग्रहस्यैव, अ4- कर्तृग्रहणस्य

[१२] त1,त5-तत्रानुवृत्तेः

[१३] के4-अनन्ये, त2-अन्य

[१४] अ1-"अपि"इति नास्ति

[१५] के4- "अत्र लः कर्मणि च भावे चाकर्मकेभ्यः"इति अधिकम्

[१६] त1-एकवाक्यतयाभिधानेन

[१७] त1,त5-तिङादि, अ4- तिबादिप्रत्ययादि

[१८] जै-प्रयोक्तव्यमित्यर्थः

[१९] त5-कर्तुरवाच्यत्वं

न सूत्रादायाति[१], किं तु तत्संख्याया एवेति चेन्मैवम्, द्विवचनादिसंज्ञा ह्यादेश[२]निष्ठा, ततश्च तद्विधिना[3] "द्व्येकयो" (पा. 1-4-22) रित्यस्यैकवाक्यता। न च तत्र कर्तरी-त्यस्ति[४] यद् द्वित्वादिविशेषणतया[५] कथञ्चिद् योज्येत[६]।

ननु लविधितिबादिविध्योरप्ये[७]कवाक्यतास्तीति[८] चेत्, तर्हि इयं वाक्यैकवाक्यता[९], न तु [१०] पदैकवाक्यता, आदेशविधेर्लविधिलभ्यलकारानुवादेन प्रवृत्तेः [११] लविधौ [१२] कर्तृग्रहणम्। स च[१३] द्विवचन[१४]संज्ञाविनिर्मुक्त एवेति[१५]। तस्माद्[१६] वाक्यनिष्पत्त्य-नन्तरं तेनैकवाक्यता।[१७]

"लःकर्मणी" (पा.3-4-69)ति वाक्यं चार्थं विनाऽनिष्पन्नं[१८]यमर्थं[१९]मादाय निष्प-द्यते, स एव वाच्य इति कर्तुर्वाच्यत्वं[१] दुष्परिहरमिति वदन्ति[२]। स्फुटमन्यत् मनोरमायाम्[11]।

---

[१] भ2,द5,जा1-सूत्रादायातीति, अ4-आयातमिति

[२] वा2-स्वादेश

[३] जै-तत्तद्विधि

[४] जै-कर्तरीस्ति

[५] त1-द्व्येकत्वादिविशेषणतया

[६] जै-कथंचित् ज्ञायते, त1-कथं द्योत्येत

[७] के4,त2- "अपि"नास्ति

[८] के4-वाक्यता नास्तीति

[९] भार1,ब3-तर्हि वाक्यैकवाक्यता सा

[१०] के4-"तु"नास्ति

[११] अ4-प्रवृत्तत्वात्

[१२] जो2-"च" इत्यधिकं,द2- "हि"इत्यधिकम्, 1915-प्रवृत्ते.। लविधौ

[१३] त1-"च" नास्ति, अ1-तच्च,

[१४] अ1,भार1,जो,1900,भ1,अ4-द्विवचनादि, त5-सद्विवचनादि

[१५] अ1-विनिर्मुक्तमेवेति

[१६] के3-तद्

[१७] त4-"तदापातत" इत्यारभ्य "तेनैकवाक्यता।लःक" इत्यन्तः ग्रन्थः सप्ताष्टवाक्यात्मकः अत्र नास्ति,परन्तु अग्रे "सकर्मके" "ऽप्येवं" इति पदखण्डयोर्मध्येऽस्ति।

[१८] 1915-विना निष्पन्नं

[१९] अ1-यदर्थ

मीमांसका स्वमतं पुनरुज्जीवयन्ति – अथेत्यादिना॥ भावनया आख्यातवाच्यया कर्तुराक्षेपः कर्तारं विना भावनायाः अनुपपत्तेः। वैपरीत्यै दोषमाह- न तु कर्त्रेति॥ कर्मस्थले कर्तुरप्रतीतौ भावनाक्षेपानुपपत्तिः। तत्रोपपत्तिमाह - कर्तृकर्मोभाभ्यामाक्षेपेति॥ कर्मणि प्रत्यये कर्मणा आक्षेपः, कर्तरि कर्त्राक्षेपः इति भावः। भावमजानानो गौरवमाह –उभयोरिति॥ कर्त्रा कर्मणा चाक्षेपे आक्षेपकद्वय- कल्पने गौरवात्। कृत्स्थले मीमांसकस्याभिप्रायमाविष्करोति यत्त्विति॥ कृत्स्थले कृतां कर्तरि शक्तिः, कर्त्रा च भावनाक्षिप्यते इति मीमांसकमतम्। तत्र कर्त्रा भावनाक्षेपः; न तु भावनया कर्तुराक्षेप इत्यत्र विनिगमकमाह - कर्तरि कृदिति॥ "कर्तरि कृत्"(पा. 3-4-67) इति सूत्रं कृतः कर्तरि शक्तिपरिच्छेदकम् । कर्तरि इति विषयसप्तमी, विषयता च वाचकत्वरूपा। तथा च कर्तृवाचकः कृदिति बोधस्तेन कृतः कर्तृवाचकता। तथा च कृद्वाच्येन कर्त्रा भावनाया आक्षेपः।

ननु आख्यातस्थलेऽपि कर्त्रा एव भावनाक्षिप्यतामिति चेदाह - तिङ्स्थले च तदभावादिति॥ मीमांसकमते तिङः न कर्तरि शक्तिरपि तु भावनायाम्। कर्तरि लस्य विधायकाभावात् । तस्मात् तिङ्स्थले कर्तुरवाच्यत्वेन, न तेन भावनाक्षेपः। इति। तत् खण्डयति - तदापाततः, तिङ् स्थलेऽपीति॥ "लः कर्मणि च भावे चाकर्मकेभ्य" (पा. 3-4-69) इति सूत्रम् । लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च, अकर्मकेभ्यो भावे कर्तरि च स्युरिति तदर्थस्तेन तिङोऽपि कर्तृवाचकत्वं सिद्धम्। ननु अत्र सूत्रे कर्तरि इत्यस्याभावे तिङां कर्तृवाचकत्वानुपपत्तिरत आह - कर्तरि कृदिति॥ कर्तृग्रहणस्यात्रानुवृत्तेः। अत्र लः कर्मणि चेति सूत्रे। ननु कर्तुः कर्मणश्च धात्वर्थाश्रयत्वरूपत्वेन तत्त्वस्य धातुनैव लाभादन्यलभ्यत्वेन तत्र तिङां कृताञ्च कथं शक्तिरिति चेन्न। फलव्यापारयोः धातुलभ्यत्वेऽपि, आश्रयस्य धातुना लभ्यत्वाभावेनानन्यलभ्यत्वात्। तदाह - अनन्यलभ्यत्वादेश्चोभयत्र तुल्यत्वात्॥ उभयत्र तिङ्स्थले कृत्स्थले च। आदिना "कर्तरी"(पा. 3-4-67) त्यनुशासनस्येत्यर्थः। "लः कर्मणि चे"(पा. 3-4-69)ति सूत्रेण तिङां कर्तृवाचकत्वं न सिध्यति इति पुनः मीमांसक आह - अथ लः कर्मणि चेत्यादिना। अयमाशयः – अप्रामाण्यज्ञाना-

[१] द5,ज1-कर्तृवाच्यत्वं

[२] अ3-"वदन्ति" नास्ति

नास्कन्दितलक्ष्यसंस्कारकमहावाक्यार्थबोधोपपत्तये "लः कर्मणि चे"(पा.3-4-69)ति, "तिप्तस्झी"(पा. 3-4-78)ति "द्व्येकयो"(पा. 1-4-22)रित्यादिसूत्राणामेकवाक्यता भवति, अन्यथा सर्वेषामनुपयोगापत्तिः स्यात्। सा यथा – धातोरित्यधिकाराल्लभ्यते। धातोः कर्तुः कर्मणश्चैकत्वादावभिधेये लकारैकवचनादि तिबादि प्रयोक्तव्यमित्याकारिका। एतया चैकवाक्यतया तिङो न कर्तृवाचकत्वमपि तु संख्यावाचकत्वमेवायाति कर्तुरेकत्वेऽभिधेये इत्युक्तत्वात् तथा चोक्ताक्षेपव्यवस्थानुपपत्तिरिति भावः।

तच्चिन्त्यम् – "तान्येकवचनद्विवचने"(पा. 1-4-102) ति विहितद्विवचनादिसंज्ञा हि तिबाद्यादेशनिष्ठा। ततश्च द्विवचनादिसंज्ञकतिबादिविधिना "द्व्येकयो"(पा. 1-4-22) रित्यस्यैकवाक्यतास्तु। न च तिबादिविधौ कर्तरि इत्यस्ति यद् द्वित्वैकत्वादिविशेषणतया कथञ्चिन्नीयेत। ननु "लः कर्मणि चे"(पा. 3-4-69)- ति सूत्रे "कर्तरि कृदि"(पा. 3-4-67) त्यतोऽनुवृत्तं कर्तृग्रहणं तिबादिविधावस्त्येव लविधितिबादिविध्योरप्येकवाक्यतास्वीकारादिति चेत् सत्यम्। वाक्यैकवाक्यता हि सा। न तु पदैकवाक्यता। "लःकर्मणि"(पा. 3-4-69) इति विहितलकारानुवादेन तिबाद्यादेशविधेः प्रवृत्तत्वात्। तथा च लविधौ श्रूयमाणं कर्तृग्रहणं कथं संख्यां विशिनष्टु। ततश्च कर्तरि यदेकत्वमिति व्याख्या कथमपि न संभवत्येव। तदेतत्सर्वं अथ लः कर्मणि चेत्यत आरभ्य - कथञ्चिद् योज्येतेत्यन्तं यावत् वर्तमानस्य सारः। कर्तुरेकत्वेऽभिधेये इति॥ प्रथमपुरुषकर्तुरेकत्वेऽभिधेये लकारप्रथमपुरुषैकवचनम्। तथा – तादृशकर्तुर्द्वित्वेऽभिधेये लकारस्य तादृशद्विवचनमित्यादि क्रमेणार्थः। इदानीं तादृशैकवाक्यताभावमाह – द्विवचनादिसंज्ञेति॥ "तान्येकवचनद्विवचनबहुवचने"(पा. 1-4-102) त्यादि सूत्रेण आदेशीभूततिङां द्विवचनादिसंज्ञा क्रियते। तथा चानेन विधिना "द्व्येकयो"(पा. 1-4-22)रित्यस्यैकवाक्यता। एवञ्च एकत्वे एकवचनमित्यादिस्तदर्थः। तत्र च कर्तरि इत्यस्य सम्बन्ध एव नास्ति। अतः कर्तरि यदेकत्वमित्यर्थः कथमपि वक्तुं न शक्यम्।

इदानीं संख्यायां कर्तुर्विशेषणत्वं पुनरपि मीमांसकः साधयन्नाह - ननु लविधितिबादिविध्योरिति॥ "लः कर्मणि चे"(पा. 3-4-69)ति "तिप्तस्झी"(पा. 3-

4-78)त्यनयोरेकवाक्यत्वे "कर्तरी"(पा.3-4-67)त्यनेनापि संबन्धे कर्तरि यदेकत्वमित्युक्तोऽर्थो लभ्यत एवेति भावः। तत् खण्डयति - इयं वाक्यैक-वाक्यतेति। पदैकवाक्यता नाम निरूप्यनिरूपकभावापन्नविषयताप्रयोजकपद-घटितत्वरूपा। यथा "तस्मिन्नि"(पा. 1-1-66) ति सूत्रघटकस्य पूर्वस्य इत्यस्य इकः इत्यनेन, निर्दिष्टे इत्यस्य च अचीत्यनेन विशेष्यविशेषणभावः सम्बन्धः। विशेष्यविशेषणनिष्ठा विषयता च निरूप्यनिरूपकभावापन्नेति समन्वय ऊह्यः।

उपजीव्योपजीवकभावापन्नबोधप्रयोजकत्वरूपा वाक्यैकवाक्यता संज्ञाविधि-शास्त्रयोः। संज्ञाशास्त्रं विधिशास्त्रस्य उपजीव्यम् - उपकारकं भवति। विधिशास्त्रमु-पजीवकमुपकार्यं भवति। यथा "वृद्धिरादैज्"(पा. 1-1-1) "वृद्धिरेची"(पा. 6-1-68) ति सूत्रयोः शास्त्रजन्यबोधयोरुपजीव्योपजीवकभाव इति बोध्यम्। प्रकृतेऽपि लविधिलभ्यलकारानुवादेनैव तिबादिविधेः प्रसक्तत्वात्। तथा चोपकार्योप-कारकभावोऽस्त्येवेति वाक्यैकवाक्यता।

ननु "लः कर्मणि चे"(पा. 3-4-69) त्यत्र कर्तरि इत्यनुवर्तते, तत्रैव संख्याविध्युपस्थितौ कर्तरि यदेकत्वमित्यर्थोऽस्त्वित्यत आह – लविधाविति॥ "लः कर्मणि चे"(पा. 3-4-69) ति सूत्रे इत्यर्थः।

कर्तरि इत्यस्यानुवृत्तौ लकारः कर्तरि स्यादित्येकवाक्यतयाऽर्थबोधेनाकाङ्क्षायाः निवृत्तेः तदानीं तदा संख्याविध्यपेक्षाया अभावेन संख्याविध्येकवाक्यताया अभावेन लकारस्य द्विवचनादिसंज्ञायोगाभाव एव। ननु महावाक्यार्थसमये सर्वेषां सर्वैः सम्बन्धे तथास्त्वित्यत आह – तस्मात् इति॥ उक्तवाक्यार्थबोधे सति संख्यायां कर्तृविशेषणत्वायोगात् तेनैकवाक्यतेति। महावाक्यार्थसमये तेन द्विवचनादि-विधिनेत्यर्थः। तत्र सम्बन्धेऽपि लकारस्य कर्तृवाचकत्वे निष्पन्ने जातसंस्कारो न निवर्तते इति न्यायेन तथात्वस्य त्यागे मानाभावः।

उपसंहरति - लः कर्मणि इति वाक्यमिति॥ अर्थं विना कर्तरि इति बोधितं कर्तृरूपमर्थं विना। अनिष्पन्नं शाब्दबोधासमर्थं। यमर्थं कर्तृरूपमादाय, निष्पद्यते शाब्दबोधं जनयति स एव कर्तृरूपोऽर्थो वाच्यः। तथा च तिङां कर्तृवाचकत्वं परिहर्तुं न शक्यते। मनोरमायाम् उक्तमेतत् पूर्वमेव।

**23.** वस्तुतस्तु "लः कर्मणी"(पा.3-4-69)त्यस्य "द्व्येकयो" (पा.1-4-22) रित्यने-नैकवाक्यत्वे लकारः संख्यावाचको निरर्थको[१] वा स्यात्। न चैवं[२] युक्तम्। एवं हि[३] तिबादिवच्छानचोऽपि कर्तृसंख्या वाच्या स्यात्, न स्या[४]च्च कर्ता, तिबादि[५]-वच्छानजादीनामपि लादेशत्वात्।

अथ "कर्तरि[६] कृद्" (पा.3-4-67)इत्यत एव[७] तत्र[८] कर्ता वाच्य इति चेन्न[९], तेन "शय्यमाने आस्यमाने चायं[१०] गत" इत्यादौ भावे, "क्रियमाण[११]" इति कर्मणि च[१२] शानचो[१३] दौर्लभ्यापत्तेः, विधायकाभावात्। अथ कर्तैव वाच्यः[१४], कर्मभावादौ च शानचो[१५] लक्षणेति चेन्न, "कर्तरी" (पा.3-4-67)ति[१६] व्याकरणस्यार्थनियामकस्या-तिक्रमेण[१७] स्वेच्छामात्रेण लक्षणायामसाधुतापत्ते र्वक्ष्यमाणत्वात्[12]। न च "लटः शतृशानचौ" (पा.3-2-124) इत्यस्यात्मनेपदविधायकैः सममेकवाक्यतया "भाव-कर्मणो" (पा.1-3-13) रित्यनेनेष्टसिद्धिः, सकर्मकेऽप्येवं[१८] सति भावे शानजापत्तेः।

---

[१] अ1-अनर्थको

[२] अ1-चेदं

[३] त1-तर्हि

[४] ब1-"न स्या" नास्ति,के4- "स्यात्"नास्ति, त5-स्यात् तस्माच्च

[५] जै-दिवादि

[६] भ1-"कर्तरि"नास्ति

[७] के4-इत्यत्रैव

[८] अ3,त1,के4,के3,द3,अ4-"तत्र" नास्ति

[९] त1-"न" नास्ति

[१०] त5-वायं

[११] के4-क्रियमाणे, ज1-क्रियया

[१२] 1900-"च" नास्ति

[१३] के3- "आदौ"इति अधिकं

[१४] ब1-वाचव्यः

[१५] त2-शानचोप-

[१६] अ4-कर्तरि कृदिति

[१७] अ1- नियामकस्यातिक्रमणे, त1-नियामकःस्यादितिक्रमेण

[१८] भार1,त1,जो2,ब1,के4,द2,1915-सकर्मकेभ्योऽप्येवं

अस्माकं पुनर्भावे चाकर्मकेभ्य इत्युक्तत्वान्न[१] दोषः[२]। किं चैक[३]वाक्यतया कर्मभावरूपार्थलाभेन[४] निराकाङ्क्षतया[५] "कर्तरि कृदि" (पा.3-4-67)त्यस्याविषयतया[६] कर्तरि स न स्यात्। तथात्वे[७] वा[८] घञादिरपि[९] कर्तरि स्यात्। अपि च "भावकर्मणो" (पा.1-3-13)रित्यस्य[१०] भावकर्मणोर्यो लकारस्तस्यात्मनेपदमेवादेश इत्यर्थो न त्वया वक्तुं शक्यः, लकारस्यानर्थकत्वात्[११]। यदात्मनेपदं तद्भावकर्मणोरेवेत्यपि न, कर्तर्यात्मनेपदाभावापत्तेः। भावकर्मणोरर्थयोरात्मनेपदं स्यादित्यर्थे चोक्त[१२]सूत्रादेव तङादेः[१३] कर्मवाचकता, "शेषात् कर्तरि परस्मैपदम्" (पा.1-3-78) इत्यस्माच्च[१४] कर्तृवाचकता तिङादेः[१५] स्यात्। सकर्मकेभ्योऽपि भावे शानजापत्तिश्चेति दिक्।

तस्मादापातत[१६] एव[१७] एकवाक्यतया भावकर्मार्थलाभ इति। तस्मात् कर्तृकर्मशानचो योगेनानूद्य विधीयमानं कर्तृकर्म[१८]संस्कारकमिति जञ्जभ्यमानाधिकरणे(मी.3-4-9-20) स्थितमसंभवदुक्तिकतामापद्येत[१९]इति ध्येयम्।

---

[१] अ4-इत्युक्तेर्न

[२] के4,म-इत्युक्तत्वान्नोक्तदोषः

[३] जै-चैष

[४] द1-लाभे

[५] जो2-निराकाङ्क्षत्वात्

[६] जै-"तया" नास्ति

[७] जै-तथाप्येत्वे

[८] द2-च

[९] त1-यङादेरपि,त5-यङादिरपि, अ4-स्वतन्त्रादिरपि

[१०] त1,के4-"भावकर्मणोरित्यस्य" नास्ति

[११] ब2-लकारस्यानर्थत्वात्

[१२] के4,अ4-तूक्त

[१३] त2,त5,अ4-तिङादेः

[१४] अ3- "च " नास्ति

[१५] अ3-तेङादेः, के4-इति सूत्रात् तिङादेः कर्तृवाच्चकता

[१६] अ1-आपात

[१७] त1-"एव" नास्ति

[१८] अ4-कर्तृकर्मक

[१९] अ1-स्थितभवदुक्तिकतामापद्येत

निष्कृष्टमर्थमाह – वस्तुतस्त्विति॥ अभिनिवेशिनो मतमाह - लःकर्मणि इति ॥ उभयोरेकवाक्यत्वे पूर्वरीत्या संख्याया विशेष्यत्वेन संख्याया एव वाच्यत्वम्। अन्यमतेनाह - निरर्थको वेति॥ नैयायिकमते प्रथमान्तेनैव संख्याया लाभसंभवात्। संख्यावाचकत्वमतमपाकरोति न चैवं युक्तम्। संख्यावाचकत्वपक्षो न युक्तः। खण्डनयुक्तिमाह - एवं हि तिबादिवदिति॥ यथा त्वया तिबादेः संख्यावाचकत्वं स्वीकृतम् तथैव शानचोऽपि स्यात्। उभयोरपि लस्थानिकत्वाविशेषात्। कर्तृवाचकत्वञ्च न स्यात्।

शानचः कर्तृवाचकत्वे प्रमाणमाह - अथ कर्तरि कृत् इत्यत एवेति॥ "लटः शतृशानचावि" (पा.3-2-124)ति सूत्रे कर्तरि कृत् इति लभ्यते। तथा च कर्तरि शानज् इति बोधे शानचः कर्तृवाचकत्वमेव। खण्डनमाह- चेन्नेति॥ अयमाशयः - "कर्तरि कृत्"(पा.3-4-67)इत्यस्य कुत्र प्रवृत्तिरिति चिन्त्यते। अयं "कर्तरि कृत्" (पा.3-4-67) कृद् वाक्यशेषः, यत्रार्थाकाङ्क्षा अनिर्दिष्टार्थेषु ण्वुलादिषु, तत्रैवोपस्थितः सार्थको भवति। यत्र तु शानजादयः लकारस्थानिकास्तत्र स्थान्यर्थाभिधानसमर्थस्यैवादेशतेति न्यायेनैव अर्थाकाङ्क्षाया निवृत्तेस्तत्र "कर्तरि कृदि" (पा.3-4-67)त्यस्य प्रवृत्तेरनुपयोग एवेति शानज्विधौ नायं प्रवर्तते। शानजादिविधौ कर्तरि कृदित्यस्योपस्थितौ दोषमाह - तेन शय्यमाने आस्यमाने चायं गतः इति॥ अत्र शीङ् धातोः, आस् धातोश्च भावे शानज् भवति। भावे शानचि "सार्वधातुके यगि" (पा.3-1-67)ति यकि, "अयङ् यि क्ङिति " (पा.7-4-22)इति सूत्रेणायङादेशे मुकि च सति शय्यमाने इति, यकि मुकि आस्यमाने इति च। एवमेव क्रियमाण इत्यत्र कर्मणि शानच्। शानज्विधौ कर्तरि कृदित्यस्य प्रवृत्तौ तु कर्तरि एव शानचो विधाने भावे कर्मणि च तदप्रवृत्तौ उक्तप्रयोगाणामनुपपत्तिरेव।

तदाह – विधायकाभावात्॥ तदर्थे शानचो विधायकस्याभावात्। हठमाश्रित्याह - अथ कर्तैव वाच्यः कर्म भावादाविति॥ शानज्विधौ कर्तरि कृदित्युपतिष्ठताम्। तेन शानचः कर्तरि शक्तिः। ननूक्तप्रयोगाणामनुपपत्तिरत आह – कर्मभावादाविति॥ कर्मणि क्रियमाण इत्यादौ। भावे शय्यमान इत्यादौ। शानचो लक्षणैवेत्यर्थ व्याकरणस्य शक्तिग्राहकत्वानुपपत्त्या परिहरति - कर्तरि इति॥

अयमाशयः- कर्तरि कृदित्यनुशासनम् , कर्तरि शानचो विधायकम्। तेन बोधितमर्थं विहाय स्वेच्छया लक्षणया तादृशार्थपरत्वे शानचो असाधुत्वापत्तिः। न चैवं सति लक्षणोच्छेदः, अनुशासनातिरिक्तेऽर्थे तीरादौ गङ्गादिपदेषु लक्षणायाः सावकाशत्वात्। तत्र च शिष्टप्रयुक्तत्वादपि साधुत्वाबाधात्। अत्र तु स्वेच्छैव प्रयोजिकेति। दोषस्तदाह – स्वेच्छामात्रेणेति॥ मात्रपदेन शिष्टप्रयोगो व्यावृत्तः। शानचो भावकर्मवाचकत्वं पुनः साधयितुम् प्रयतते - न च शतृशानचौ इत्यस्येति॥ " लटः शतृशानचावप्रथमासमानाधिकरणे " (पा.3-2-124)इत्यस्य "भावकर्मणो"(पा.1-3-13)रिति सूत्रेणात्र एकवाक्यता क्रियते। तथा च भावकर्मणोरर्थयोः आत्मनेपदम् शानज्रूपं जायते, इति फलितोऽर्थः। तथा सति भावे कर्मणि च शानचि सति उक्तरूपाणि साधूनि। अस्यानौचित्यमाह - सकर्मकेभ्योऽप्येवं सति इति॥ "भावकर्मणो"(पा.1-3-13)रित्यत्र धातोः सम्बन्धे धातुमात्रादेव भावे कर्मणि च शानजापत्तौ यथा अकर्मकेभ्यो भावे शानच् , तथैव सकर्मकेभ्योऽपि भावे अकर्मकेभ्यश्च कर्मणि शानजापत्तेरिति भावः। न चैवं सति वैयाकरणमतेऽप्यनिस्तारः, निस्तारप्रकारस्योक्तत्वात्। तदाह - अस्माकं पुनरिति॥ अस्माकं वैयाकरणानां मते इति शेषः।" लः कर्मणि चे"(पा.3-4-69)ति सूत्रेणैव व्यवस्था, तथा च अकर्मकेभ्यो भावे कर्तरि च लकारविधानात् , तदादेशस्य शानचोऽपि, कर्तरि कर्मणि भावे च विधानप्राप्त्या सर्वक्लेशनिस्तार इति बोध्यम्।

ननु सकर्मकेषु कर्मणा सम्बन्धसत्त्वात् न तेभ्यो भावे प्रत्यय इत्यरुचेराह – किञ्चेति॥ "भावकर्मणो"(पा.1-3-13)रित्यनेन "लटः शतृशानचा"(पा.3-2-124) वित्यस्यैकवाक्यत्वे शानचः कर्मभावरूपार्थनिर्णयेन अर्थांशे आकाङ्क्षाया असत्त्वेन "कर्तरि कृदि" (पा.3-4-67) त्यप्रवृत्तौ शानचः कर्तृवाचकत्वानुपपत्तिः।

अर्थाकाङ्क्षाया निवृत्तौ अपि कर्तरि इत्यस्य प्रवृत्तिस्वीकारे दोषमाह - तथात्वे वा॥ आकाङ्क्षायाः निवृत्तौ अपि प्रवृत्तिस्वीकारे। "भावे" (3-3-18) इत्यस्यार्थनिर्णायकत्वेऽपि "कर्तरि कृदि"(पा.3-4-67) ति सूत्रं प्रवर्तेतैवेति घञोऽपि कर्तृवाचकत्वापत्तिः। इदानीं स्वमतस्थापनायै भावकर्मणोरित्यनेनैकवाक्यताश्रयणं यत्कृतं सिद्धान्ती तत्खण्डयन्नाह - अपि चेति॥ एकवाक्यतालभ्यमर्थं दोषोद्घाटनपूर्वकमाह - भावकर्मणोर्यो लकारस्तस्य स्थाने आत्मनेपदमेवादेशः इति॥

तथा सति लकारस्यानर्थक्यापत्तिः, अर्थनिर्णायकाभावात्। न च "लःकर्मणिं चे"(पा.3-4-69)त्यनेकैकवाक्यत्वेन लकारस्य कर्त्रर्थकत्वेन लकारस्यानर्थकत्वकथनासङ्गतिरिति वाच्यम्। इदानीं तेनैकवाक्यत्वाभावात्। नियमान्तरमपि सम्भवतीत्याह यदात्मनेपदमिति॥ तादृशनियमाभावं साधयति - कर्तरि इति॥ भावकर्मणोरेवेति नियमेन आत्मनेपदस्य भावकर्मणोरेव विधानात्। एवकारेण कर्त्रादेर्व्यवच्छेदात्।

भावकर्मणोरर्थयोरात्मनेपदं स्यादिति नियमांशानिवेशनायायमर्थः। तृतीयस्यार्थस्यापि दुष्टत्वं ज्ञापयति – उक्तसूत्रादिति॥ "भावकर्मणो" (पा.1-3-13) रिति सूत्रादेव तङोऽपि आत्मनेपदत्वात् तेन सूत्रेणात्मनेपदस्य कर्मवाचकत्वसाधनात्।

ननु लकारस्य कर्तृवाचकत्वासिद्धिरित्यत आह - शेषात्कर्तरि परस्मैपदमिति॥ तेन सूत्रेण कर्तृवाचकत्वसिद्धिरिति भावः। एवं निर्वाहेऽपि सकर्मकेभ्योऽपि भावेऽर्थे शानजापत्तेरनिराकरणमेव। तथा पूर्वदोषानुसरणमेव।

तस्मात् उक्तयुक्तेः। आपाततः दोषगुणौ अविचिन्त्येत्यर्थः। एवञ्च "भावकर्मणो" (पा.1-3-13) रित्येकवाक्यतया भावकर्मार्थकत्वसाधनमयुक्तमिति भावः। तस्मात् "लः कर्मणि" (पा.3-4-69) इत्यस्यैवार्थव्यवस्थापकत्वात्। कर्तृकर्मशानच इति॥ तदर्थकशानचः योगेन जञ्जभ्यमानेत्यत्र प्रयोगेण। अनूद्य शानजर्थं कर्तृरूपमनूद्य उद्दिश्य। विधीयमानं कर्तृकर्मसंस्कारं मन्त्रोच्चारणम्। कर्तुः कर्मणः क्रतुरूपस्य च संस्कारकमविरोधादिति। पूर्वत्र एतदधिकरणं व्याख्यातम्।

3.10 भट्टपादोक्ताभिधानव्यवस्थायाः अनुवादः तत्खण्डनम् च

**24.** यदपि भट्टैरुक्तं[13] कर्तृविशिष्ट[1]संख्याभिधानात् कर्तुरभिधानम्[2]। न च विशेषणतया कर्तुरप्य{कर्तुर}[3] भिधेयत्वं स्यादिति वाच्यम्।

---

[1] अ3- "विशिष्ट" नास्ति,भ1,द7-कर्तृकर्मविशिष्ट

[2] त1,त5- कर्तृविशिष्टसंख्यानभिधानात् कर्तुरनभिधानम्

[3] {कर्तुर} – अयमपपाठः स्वीकृतमूलमातृकायामस्ति।अन्यत्र क्वापि नास्ति। त4- "कर्तुरपि" इत्यत्र "अपि" नास्ति

विशिष्टग्रहणं नेष्टमगृहीतविशेषणम्।
अभिधानभिधाने[१] तु न केनचिदिहाश्रिते॥ (मी. 3-4-4-13)[14]

तथा च भावनया[२] प्रत्यायितस्य[३] कर्तुर्विशेषणत्वसंभवान्न[४] दोषः[५]। न च[६] भावनाक्षेप्य-त्वस्याविशेषात् पचतीत्यत्र कर्तैव, पच्यते इत्यत्र कर्मैव संख्यायां[७] विशेषणमिति नियमो न स्यादिति शङ्क्यम्, यतः

यस्यापि कारकं वाच्यं तस्याप्येतत् प्रसज्यते।
न चोभयाश्रयं दोषमेकश्चोद्यो विचारयन्॥ (मी.3-4-4-13)[15] इति[८]।

ननु शब्दोपस्थितस्यैव[९] शाब्दबोधे भानाङ्गीकाराद्[१०] भावनयाक्षिप्तस्यैव[११] कर्तुः कथं[१२] शाब्दबोधविषयत्वमिति[१३] चेन्न[१४], तद्वाचकशब्दस्यैव भावनयाक्षेपात्[१५]। अर्था-क्षेपकस्यैव[१६] शब्दाक्षेपकत्वात्। अनुपपत्तेस्तुल्यत्वात्। तथा च[१७] तद्वाचकशब्दादेव कर्तृकर्मणोर्बोधः।

तदुक्तम् -

---

१ वा2-"अभिधानभिधाने"इत्यारभ्य अग्रे "भावनयाक्षेपात्" इति पर्यन्तं ग्रन्थः नास्ति। के4,त1,त4-अभिधानाभिधाने,त5-अनभिधानाभिधाने

२ त2-भावनाया

३ ब1-भावनाप्रत्यायितस्य, भ2-तथा च प्रतीतत्वमेव आक्षेपपदार्थ इति भावः इति टिप्पणी

४ द4- "न्न " नास्ति, त2-प्रत्यापितकर्तुः विशेषणत्वसंभवान्न

५ अ1-"न च" इत्यारभ्य "न दोषः" इत्यन्तं नास्ति

६ के5- "न च"नास्ति, अ4- "न"नास्ति

७ भ1-संख्यायाः, अ4-"कर्मैव" इत्यधिकम्

८ के4- "इति"नास्ति

९ जै-शब्दोपस्थापितस्यैव

१० के5,म-भावनाङ्गीकारात्

११ के4,त2,द3- "एव"नास्ति

१२ अ3-भावनाक्षिप्तस्य कुतः कथं च

१३ के5-विषयत्वं स्यादिति

१४ त2,भ1-चेत्

१५ जै-भावनतयाक्षेपात्

१६ भ2,ज1-अर्थाक्षिप्तस्यैव,त5-अर्थाक्षेपस्यैव

१७ के4,म- "तथा च" नास्ति

सर्वाख्यातेषु कर्त्रादेरिष्टा[16] नैवाभिधेयता।

या तु तेभ्यः प्रतीतिः[१] सा[२] संयोगान्तरतो भवेत्॥ (मी.3-4-4-13) [17]इति।
लक्षणैव वाक्षेपशब्दार्थः[३]। सा[४] चाश्रयत्वादिना[५]। अत एव नाम[६]जात्यादिभिः प्रश्नोत्तर-भावः कर्तृकर्मणोः[७]संगच्छते। तस्मान्नाभिधानव्यवस्थानुपपत्तेः[८] कर्तुर्वाच्यत्व[९]मिति। कृदादौ चाभिधानयुक्तिरेव तत्साधिका। अतोऽन्यलभ्यत्वसंभवेऽप्यगत्या[१०] तद्वाच्यत्व-स्वीकार इति न प्रागुक्ता प्रतिबन्दिरपि। कर्तृतत्संख्यान्यतरानभिधाने [११]तृतीयेत्याश्रीयत इति[१२]।

---

यदपि भट्टैरुक्तमिति। आख्यातेन कर्तृसंख्याभिधीयते तेन चाभिधान-व्यवस्थेति। ननु कर्तृविशिष्टसंख्याया अभिधाने नागृहीतविशेषणन्यायेन कर्तुरपि वाच्यत्वापत्तिरिति चेत् समाधानमाह – विशिष्टग्रहणमिति॥ अगृहीतविशेषणं विशिष्ट-ग्रहणं न इष्टम्।यस्य विशिष्टस्य विशेषणं न गृहीतं तस्य विशिष्टस्य न ग्रहणमित्यर्थः। तथा च वाच्यत्वविशिष्टकर्तृविशिष्टायाः संख्यायाः अभिधानेन व्यवस्था नाद्रियते। तथात्राह -अभिधानभिधाने इति। अभिधा अभिधानम्, अनभिधानञ्चेति विग्रहः। पूर्वोक्तरीत्या नाश्रिते। अनाश्रयणमेवाह - तथा च भावनयेति॥ अयमाशयः- आख्यातेन भावनाभिधीयते , भावनया च कर्ताक्षिप्यते। तथा च भावनयाक्षेपलभ्यस्य कर्तुर्विशेषणत्वेऽपि न वाच्यत्वापत्तिरिति। भावनया कर्तुराक्षेपमाक्षिपति - न च भावनाक्षेप्यत्वस्याविशेषादिति। भावनायाः उभयत्रापि सत्त्वात् नियमाभावात्

---

[१] जै-"तेभ्यः प्रतीतिः" नास्ति

[२] अ1-स्यात्

[३] अ1-वाक्षेपार्थः वशब्दार्थः

[४] द7-स

[५] ब1-चाश्रयत्वादिति

[६] त2- "नाम " नास्ति

[७] के4- "कर्तृकर्मणोः" नास्ति

[८] द3-व्यवस्थानानुपपत्तेः

[९] के4-कर्तृवाच्यत्व

[१०] जो2-"संभव" नास्ति(लभ्यत्वेऽप्यगत्या इति पाठः), त्रि-संभवेप्यनन्यगत्या, ज1-संभवोप्यगत्या

[११] त1,ब1,1900-"वाच्यत्वे" इत्यधिकम् असंबद्धं च, के4- "तत् "नास्ति

[१२] भ1-तृतीत्यादिश्रीयते

उभयत्रापि उभयोराक्षेपसंभवाद्दोषः। तथा च पचतीत्यत्र कर्तृविशिष्टसंख्यायाः, पच्यते इत्यत्र कर्मविशिष्टसंख्याया वाक्षेप इत्यनियम एवेति भावः। समाधानमाह – यतः। यस्यापि कारकं वाच्यमिति। यस्य वैयाकरणस्य मते आख्यातस्य कारक (कर्तृकर्म) वाचकत्वं स्वीक्रियते, तत्रापि विनिगमकाभावस्य सत्त्वादनियम एव। दोषस्यास्योभयाश्रयत्वे तुल्यत्वे। विचारे कृते नैकस्यैव चोद्यता दोषार्हता।

यश्चोभयोर्दोषः परिहारः समस्तयोः।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥ इति शिष्टोक्तेः।

आक्षिप्तस्य शाब्दबोधे भानं न भवतीति मनसि निधायाशङ्कते - ननु शब्दोपस्थितस्यैवेति॥ एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति नियमेन यथा हस्तिपकज्ञानेन हस्तिनः स्मरणम् , तथैव घटपदात्तत्संबन्धिन आकाशस्योपस्थितौ घटपदादाकाशस्य शाब्दे भानापत्तिः।अतस्तद्वारणाय तत्पदजन्यतद्विषयकशाब्द-बोधवारणाय तत्पदनिष्ठवृत्तिज्ञानाधीनोपस्थितिः कारणमिति कार्यकारणभावः स्वीक्रियते। तथा चाकाशोपस्थितेः पदनिष्ठवृत्तिज्ञानाधीनत्वाभावात् घटपदा-दाकाशस्य शाब्दबोधे न भानापत्तिः। तथा सति । भावनया कर्तुराक्षेपे । शाब्दबोधे भानानुपपत्तिरित्याह – शब्दोपस्थितस्यैवेति॥ कथं शाब्दबोधविषयत्वम् वृत्तिग्रहाधीनत्वाभावात् इति चेद्वाचकशब्दाक्षेप एव, नार्थाक्षेप इत्यभिप्रायेणाह - तद्वाचकशब्दस्यैव भावनयाक्षेपात् इति। प्रक्रियामाह – अर्थाक्षेपस्यैवेति। यो हि अर्थमाक्षिपति स एव वाचकशब्दमप्याक्षिपति। प्रकृते भावना कर्तारं विना अनुपपन्ना सती कर्तारमाक्षिपति, तथा सत्यपि शाब्दबोधविषयत्वानुपपत्तिरस्त्येवेति तयैव भावनया कर्तृवाचकपदस्याक्षेपः इति भावः। तथा च कर्तृकर्मवाचक-पदोपस्थितौ ज्ञाने तन्निष्ठवृत्तिज्ञानाधीनकर्तृकर्मोपस्थितौ शाब्दबोधे भानोपपत्तिरिति भावः। तदाह - तद्वाचकशब्दादेव कर्तृकर्मणोबोधः इति॥ तदुक्तम् –

सर्वाख्यातेषु कर्त्रादेरिष्टा नैवाभिधेयता।
या तु तेभ्यः प्रतीतिः सा संयोगान्तरतो भवेत्॥ (मी.3-4-4-13)

सर्वेषु आख्यातेषु उच्चार्यमाणेषु कर्त्रादेरभिधेयता आख्यातनिष्ठशक्तिग्रहाधीनो-पस्थितिविषयता नैव इष्टा, मीमांसकमते आख्यातस्य भावनायां शक्तिस्वीकारात्। तेभ्यो या प्रतीतिः आख्यातेभ्य या कर्त्रादिप्रतीतिः, सा न शक्तिसाध्या किन्तु

संयोगान्तरतो भवेत्। संयोगान्तरम् उक्तरीत्या वाचकपदाक्षेपः। तस्माद् भवेत्। उपायान्तरमाह - लक्षणा वा आक्षेपशब्दार्थः॥ तादृशतात्पर्यानुपपत्तेर्लक्षणाबीजस्य सत्त्वात् । सा च लक्षणा न व्यापाराश्रये, किन्तु आश्रयत्वेन आश्रयमात्रे, व्यापारादेरन्यलभ्यत्वात् - आख्यातेन तल्लाभात्। अत एवेति॥ आश्रयत्वेनाश्रये लक्षणास्वीकारादेवेत्यर्थः। नामजात्यादिभिरिति॥ पचतीत्युक्ते एकाश्रयिका पचिक्रियेति बोधे कः आश्रयः, किंजातीयः स इति जिज्ञासा जायते, पच्यते इत्यत्र आश्रयविशेषरूपकर्मजिज्ञासा जायते, लक्षणया सामान्यत आश्रयोपस्थितौ विशेषजिज्ञासासम्भवात्। कर्तुरनुपस्थितौ आख्यातेन व्यापाराद्युपस्थितौ कस्येति जिज्ञासा स्यात्। ननु कर्तुर्लक्षणादिना लाभेऽपि आख्यातेन व्यापारोपस्थितौ कस्मिन् सः व्यापारः, कस्य वा व्यापार इति जिज्ञासा स्यादिति चेन्न। सामान्यतो लक्षणया आश्रयोपस्थितौ कस्मिन्नित्यादिजिज्ञासाया अनुपपत्तेः। अपि च उक्तविशेषजिज्ञासाया एवौचित्यात्।

इदानीं स्वमतं पोषयति - तस्माद् नाभिधानव्यवस्थानुपपत्तेरिति॥ अयमाशयः - आक्षेपात् लक्षणया वा कर्तुरुपस्थितौ, तेनैव च अभिधानव्यवस्थाया उपपद्यमानत्वेन, अभिधानव्यवस्थानुपपत्या कर्तुराख्यातवाच्यत्वं यदुक्तं वैयाकरणैः तन्न समीचीनम्। न च त्वन्मते लक्षणादिना कर्तुरुपस्थितावपि प्रत्ययवाच्यत्वा-भावेन कथमभिधानव्यवस्थेति वाच्यम्। मन्मते अनभिहितेत्यस्याबोधित इत्यर्थ-करणात्। बोधश्च शक्त्या आक्षेपात् लक्षणया वेत्यर्थकरणात्।

नन्वेवं कृदादिस्थले कर्तृवाचकत्वानुपपत्तिस्तव मते इत्यत आह - कृदादौ इति॥ कृत्स्थले कृतां कर्तरि शक्तिः भावनाया आक्षेपः इति मीमांसकमतम्। अत एव पक्ता पाचक इत्यत्र कर्तृविशेष्यको बोधः। शानजादिना च कर्तुरभिधानेन पक्ता इत्यत्र प्रथमेति तत्राभिधानव्यवस्थार्थं कर्तरि शक्तिः। आक्षेपाल्लाभेऽपि उक्तयुक्तेः।

ननु तत्रापि भावनायामेव कृदादयो विधीयन्ताम्, कर्तुरेवाक्षेपादिना लाभो लभ्यतामित्यत आह - अन्यलभ्यत्वसंभवेऽपि॥ भावनया कर्त्रादिलाभेऽपि। अगत्या अन्यथा अभिधानव्यवस्थानपत्त्या। तद् वाच्यत्वस्य कर्तृकर्मणोः कृद्वाच्यत्वस्येत्यर्थः। वाच्यत्वाभावे अभिधानव्यवस्थाया अगतिः। तथा चोक्तम् -

अभिधानन्तु प्रायेण तिङ्कृत्तद्धितसमासैरिति। न च अनभिहितः इत्यस्याबोधित इत्यर्थकरणेन न दोष इति वाच्यम् , तस्याप्यगतिकगतित्वात्। कर्तृतत्संख्यान्यतराभिधाने इति॥ आख्यातस्थले कर्तृसंख्यानभिधाने रामेण पच्यते इत्यादौ तृतीया, अभिधाने प्रथमा, रामः पचतीति। कृत्स्थले कर्तरि कृतां विधानात् कर्तुरभिधानात् प्रथमा पक्ता देवदत्त इति। देवदत्तेन पक्वमित्यत्र कर्तुरनभिधाने तृतीयेति। प्रतिबन्दिरिति॥ समानविरोध्युत्तरम्। यदि मीमांसकः कृतां कर्तृवाचकत्वमभिप्रैति तदा आख्यातेऽपि तथेत्येवंरूपा या प्रतिबन्दिः सापि न, उभयत्र वैषम्ये हेतोः सत्त्वात्।

3.11. कर्तृकर्मणोराख्यातार्थत्वे सामानाधिकरण्यमेव प्रमाणम्

**25.** अत्रेदं प्रतिभाति – "देवदत्तः पचति, पच्यते तण्डुल" इत्यादि[१] सामानाधिकरण्यादाख्यातस्य कर्तृकर्मवाचकत्वम्। न चेदमसिद्धम्[२], अन्यस्मिन्[३] पचति[४] "देवदत्तः पचती"त्यप्रयोगेण[५] तस्यानुभवसिद्धस्य विना हेतुं कर्तृ[६]-वाच्यत्वभीत्यैवापलापायोगात्।[७] "त्वं पचसी"त्यादौ[८] युष्मच्छब्दसामानाधिकरण्यस्यानुभव[९]मनुसरता सूत्रकृतानूद्य तदनुसारेण[१०] पुरुषव्यवस्थाया "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः[११]"(पा.**1-4-105**) इत्यादिना कृतत्वाच्च।

अन्यथा नीलो घटः, देवदत्तः पक्ता, ऐन्द्रं दधि, चित्रगुर्देवदत्तः, पिङ्गाक्षी गौः,स्तोकं पचति,ज्योतिष्टोमेन यजेतेत्यादावपि तदपलापापत्तौ[१] बहु व्याकुली स्यात्[२]।

---

[१] के4-इति

[२] के5-न चेदमप्यसिद्धम्

[३] अ1-अस्मिन्

[४] अ4-"सति" इत्यधिकम्

[५] के5,त5 –त्यप्रयोगात्, अ4- पचतीत्यत्र प्रयोगेण

[६] अ3-कर्तृत्व

[७] अ1-कर्तृवाच्यत्वभीत्येवापलपितुमशक्यत्वात्

[८] के5-त्वं पचसि इति, त2-त्वं पचेत्यादौ

[९] द3,भ2,द5-सामानाधिकरण्यानुभव

[१०] अ4-सूत्रकृदनुसारेण

[११] जो2-"समानाधिकरणे स्थानिन्यपि मध्यमः" नास्ति

न च पदार्थानामभेदबोधे[3] समानविभक्तिमत्पदोपस्थाप्यत्वं तन्त्रम्, तच्चात्र नास्तीति कारणबाधान्न[4] सामानाधिकरण्यमिति वाच्यम्,[5] राज्ञः सुतस्य धनमित्यादावति-प्रसक्तत्वेन[6] राजपुरुषो, धान्येन धनी[7], स्तोकं पचति, ज्योतिष्टोमेन यजेते[8]त्यादावप्र-सक्तेश्च[9] अस्य[10] अतन्त्रत्वात्[11]। अथ विरुद्धार्थक[12] विभक्तिराहित्यं तन्त्रम्। सुप्तिङोश्च[13] न विरोधः[14]। एवं च[15] विशेष्यतासंबन्धेनाभेदसंबन्धक[16] तन्नामार्थ[17]-प्रकारकशाब्दबोधं प्रति तन्नामोत्तरसार्थकविभक्त्युपस्थित्यकालिक[18] [19] तन्नाम[20]-समभिव्याहृतपदजन्योपस्थितिः कारणमिति कार्यकारणभावः फलितः। स्तोक-मित्यादौ द्वितीयात्व[21] भेदार्था साधुत्वमात्रार्था वा। यद्वा[22] विरुद्धरूपेणानुप-

---

[1] अ1-तपलापपत्तौ

[2] त1,के5,त5-"इति" अधिकं

[3] जै-बोधे इत्यनन्तरं "न च पदार्थानामभेदबोधेन समानविभक्तिमत्पदोपस्थाप्यत्वं तन्त्रम्, सर्वत्र नास्तीति कारणबाधान्न सामानाधिकरण्यमिति वाच्यम्," इत्ययं ग्रन्थः अधिकः अनावश्यकश्च।

[4] त1-नास्ति कारणाभावान्न, के4-नास्तीति कारकाणां बाधान्न, अ1,के5,म- कारणाभावान्न

[5] त1-"न" इत्यधिकं

[6] जो2-वतिव्याप्तत्वेन

[7] त1-धनवान्

[8] द4-यजते

[9] अ1-त्यादौ चातिप्रसक्तेश्च,भ1- "प्रसक्तत्वेन" इत्यत्र "न" इत्यारभ्य "प्रसक्ते" पर्यन्तं ग्रन्थः नास्ति

[10] अ1-अस्व, त4-"अस्य" नास्ति

[11] अ1,भार1,1900-तन्त्रत्वात्

[12] त1,त2,त4,ज1-"क" नास्ति, त5-विरुद्धार्थे

[13] अ1-तिप्तिङोश्च

[14] भ1-सुप्तिङोश्चरविरोधः

[15] त1-"च" नास्ति

[16] ज1-सम्बन्धिक

[17] जै-संबन्धकृतन्नामार्थ, त1,त5-संबन्धकं नामार्थ, त4-संबन्धकनामार्थ

[18] ब2-त्यकालक

[19] अ1-कालीक, त1,त5-कालीन,भ2-राज्ञस्सुतस्य धनमित्यादिनिरासाय अकालिकेति इति टिप्पणी

[20] वा2-तन्नामा, द2,द3,द4,त्रि- तन्नामोत्तरविभक्तिविजातीयसुब- अ1--"विभक्ति" इत्यधिकम्

[21] त1-"त्व" नास्ति

[22] ज1-यद्वाच्या

स्थितिस्तत्र तन्त्रमिति[१] चेत्, तर्हि देवदत्तः पचतीत्यत्राप्यभेदबोधो[२] दुर्वार इति सिद्धं नः समीहितम्। आख्यातस्य [३]शक्तिकल्पना च[४] कृतां कर्तृशक्त्या तुल्या[५], परं त्वाख्यातार्थभावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति[६] नैयायिकोक्त[७]कार्यकारणभावान्तरस्य भावनाविशेष्यक[८]कर्तृविशेषणकबोधाय[९] मीमांसकी-यस्य च तस्याकल्पना [१०] लाघवमस्माकमतिरिच्यते [११]। एतेन भिन्नाभ्यां धर्माभ्यामेकधर्मिबोधक[१२]त्वलक्षणं सामानाधिकरण्यमसिद्धम्[१३]। संभवदन्यादृशं तु न वार्यत इति मन्द[१४]प्रतारण मपास्तम्।

---

वैयाकरणः स्वप्रतिभानेन स्वाभिप्रायं प्रस्तौति - अत्रेदं प्रतिभाति ॥ वैयाकरणमते आख्यातस्य कर्तरि कर्मणि च शक्तिः। तत्र प्रतिभानप्रकारमाह - देवदत्तः पचतीति। देवदत्तः पचतीत्यत्र कर्तुः सामानाधिकरण्यम् - अभेदः। आख्यातवाच्ये आश्रये देवदत्ताभिन्नैकाश्रयकः वर्तमानकालिको विक्लित्यनुकूलो व्यापार इति बोधः। अस्मिन् शाब्दबोधे आख्यातार्थाश्रये देवदत्तादेरभेदान्वयोऽनुभवसिद्धस्तेनाख्यातस्य कर्तृवाचकत्वं सिद्धं भवति। नन्विदं स्वकपोलकल्पितमेवेत्यत आह - न चेदमसिद्धमित्यादिना॥ अन्यस्मिन् पचति इति॥

---

[१] 1900-तन्नमिति

[२] अ1-पचतीत्यत्राभेदो

[३] के5,म- "कर्तृ"इति अधिकं, अ4- "कर्म" इत्यधिकम्

[४] त्रि-शक्तिकल्पनापि, अ4- "च" इत्यारभ्य "तस्याकल्पना" इति पर्यन्तं नास्ति

[५] त1-तुल्यं

[६] त1-प्रथमान्तपदजन्योपस्थितेः कारणत्वमिति, जै,त5,ज1-प्रथमान्तपदजन्योपस्थितेः कारणमिति

[७] के4-नैयायिकैरुक्त

[८] जो2-"क" नास्ति

[९] त1-बोधे, के5,म,त5-बोधे च

[१०] त1,त5-मीमांसकोक्तस्य चाकल्पना,के5,म- मीमांसकोक्तस्य च तस्याकल्पना,के4- "च"नास्ति, अ1-तस्य कल्पनालाघवं,द3-तस्यातस्याकल्पनात्

[११]जो2-"अस्माकं" नास्ति

[१२] द4- "क " नास्ति

[१३]त1-सामानाधिकरण्यं सिद्धमसिद्धं, त4-सामानाधिकरण्यं सिद्धं, जै-सामानाधिकरणमसिद्धं

[१४] त5-मीमांसक

पचतीति शत्रन्तात् सप्तमी। अन्यस्मिन् देवदत्तभिन्ने पचति, यत्र पाककर्ता देवदत्त-भिन्नस्तत्र देवदत्तः पचतीति प्रयोगापत्तिः। यदि आख्यातार्थः कर्ता (आश्रयः) तदा तस्मिन् देवदत्तभिन्नस्याभेदेनान्वयः। तथा च देवदत्तभिन्नकर्तृकः पाकः इति बोधः तेन न तत्र देवदत्तस्यान्वयः सम्भवति, देवदत्तभिन्नकर्तृके पाके देवदत्तकर्तृकत्वा-संभवात्। यदि कर्ता आख्यातार्थो न स्यात्तदा भावनया कृत्या वा आख्यातवाच्यया आश्रयमात्रस्याक्षेपे देवदत्तादेरपि आश्रयत्वेनान्वययोग्यतासत्त्वात्, उक्तदोषापत्तिरिति बोध्यम्। तादृशप्रयोगस्यानुभवारूढत्वेन तस्य कर्तृवाचकत्वं विनानुपपन्नत्वेन। विना हेतुं। कर्त्रवाचकत्वहेतुमनुक्त्वा। कर्तृवाच्यत्वभयेन तस्य कर्तृवाच्यत्वस्य योऽपलापः अस्वीकारः, तस्य अयोगात् असिद्धेः।

त्वं पचसि इत्यादाविति॥ युष्मच्छब्दसामानाधिकरण्यमिति॥ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः इति सूत्रे समानाधिकरणपदमस्ति। समान-मधिकरणं वाच्यम् यस्येति विग्रहः। अन्यपदार्थो युष्मच्छब्दः। केन सादृश्यमिति जिज्ञासायां प्रत्यासत्या, तिङेव गृह्यते। तथा च तिङ्सामानाधिकरण्यं युष्मदि। एवञ्च तिङ् वाच्यकारकवाचित्वं स्वीक्रियते। तादृशसामानाधिकरण्यमनुसरता मन्यमानेन श्रीमता पाणिनिना, अनूद्य तादृशं सामानाधिकरण्यं युष्मदि मत्वा, तदनुसारेण तिङः उक्तं सामानाधिकरण्यं युष्मदि चेन्मध्यमः इत्येवं रीत्या पुरुषव्यवस्था तेन सूत्रेण कृता। इयं च पुरुषव्यवस्था तिङामाश्रयशक्तिं विना नोपपद्यते। अन्यथा अनुभवसिद्धाभेदान्वयस्यापलापे नीलो घट इत्यादावपि अभेदान्वयस्य योऽपलापः अस्वीकार्यत्वं, तस्य आपत्तिः।

ननु देवदत्तः पचतीत्यत्र यदि अभेदान्वयानुभवः तर्हि आख्यातस्याश्रये शक्तिस्वीकारः, अभेदान्वयानुरोधेन आश्रयस्य आख्यातवाच्यत्वस्योक्तत्वात्। परन्तु तत्र अभेदान्वय एव दुर्लभः, तत्प्रयोजकस्य समानविभक्तिकत्वस्याभावादिति मनसि निधाय शङ्कते- न चेति॥ पदार्थानामभेदबोधे इति॥ यत्र यत्राभेदान्वय-बोधस्तत्र तत्र समानविभक्तिकत्वम् इति नियमः, देवदत्तः पचतीत्यत्र समान-विभक्तिकत्वाभावेनाभेदान्वयाभावः इति भावस्तदाह - तच्चात्र नास्ति इति॥ समानविभक्तिकत्वस्याभेदान्वये तन्त्रत्वं खण्डयति - राज्ञः सुतस्य धनमिति॥ अत्र समानविभक्तिकत्वस्य सत्त्वेऽपि अभेदान्वयो नास्तीति अभेदान्वयबोधे

समानविभक्तिकत्वस्यातन्त्रत्वम्। राज्ञः सुतस्येति व्यधिकरणषष्ठ्यौ। अन्वयव्यभिचारं प्रदर्श्य व्यतिरेकव्यभिचारं दर्शयति - राजपुरुष इत्यादि॥ राजपुरुष इत्यत्र सम्बन्धिनि लक्षणाभ्युपगन्तृमतेनेदम्। अत्र समानविभक्तिकत्वाभावेऽपि राजसम्बन्ध्यभिन्न इत्यभेदान्वयः। धान्येन धनी ।अत्र प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया तस्याश्चाभेदोऽर्थः। तथा च धान्याभिन्नं यद् धनं तद्वानित्यभेदान्वयः समानविभक्तिकत्वाभावेऽपि। स्तोकं पचतीत्यत्र स्तोकस्याभेदेन पाके, समानविभक्तिकत्वाभावेऽप्यभेदान्वयः। ज्योतिष्टोमेन यजेतेत्यत्र ज्योतिष्टोमाभिन्नयागेनेष्टं भावयेदित्याकारकः समानविभक्तिकत्वाभावेऽपि अभेदान्वयः। तथा च अभेदान्वयबोधस्य समानविभक्तिकत्वं न तन्त्रमिति भावः। तथा च यत्र यत्र समानविभक्तिकत्वं तत्र तत्र अभेदान्वय इति व्याप्तिः कर्तुं शक्यते। एवञ्च अभेदान्वयस्यास्यां व्याप्तौ व्यापकत्वेन क्वचित् समानविभक्तित्व - रूपस्य व्याप्यस्याभावेऽपि अभेदान्वयः, यथा धूमाभावेऽपि अयोगोलके विद्यमानस्यापि वह्नेर्धूमापेक्षया व्यापकत्वमिति बोध्यम्।समानविभक्तिकत्वस्यातन्त्रत्वमुक्तरीत्या उक्तम्।

इदानीमभेदान्वयस्य प्रयोजकमुपायान्तरमुच्यते - अथ विरुद्धार्थकविभक्तिराहित्यं तन्त्रमिति॥ विरुद्धो भिन्नार्थो यस्याः सा तस्या अभाव इत्यर्थः। अभिन्नार्थकविभक्तिकत्वम्। नीलो घटः, इत्यत्र उभयत्रापि विभिन्नार्थकविभक्तेरभावेनाभेदान्वयः। ननु देवदत्तः पचतीत्यत्र विरुद्धविभक्तिकत्वसत्त्वेनोक्त – प्रयोजकस्याभावादभेदान्वयबोधानुपपत्तिरित्यत आह - सुप्तिङोश्च न विरोध इति॥ यद्यपि स्वरूपतस्तयोर्देवदत्त इत्यत्र प्रथमायाः पचतीत्यत्र तिपोऽस्ति भेदस्तथापि, अर्थतो भेदाभाव एव। यतः आख्यातस्य कर्तृवाचकत्वं स्वीकृतम्। प्रथमायाश्च आख्याताभिहितकारकार्थकत्वम् अभिहिते प्रथमा इति वार्तिकात्। तथा च एकार्थकत्वरूपविरुद्धविभक्तिराहित्यस्य विद्यमानत्वेनाभेदान्वये बाधाभावः।

कार्यकारणभावमाह - एवञ्च विशेष्यतासम्बन्धेनेति॥ विषयनिष्ठप्रत्यासत्या कार्यकारणभावोऽयम्। विशेष्यतासम्बन्धेन अभेदसंबन्धकः तत्तन्नामार्थप्रकारकशाब्दबोधः कार्यम् , तन्नामोत्तरसार्थकविभक्त्युपस्थित्यकालिकतन्नामसमभिव्याहृतपदजन्योपस्थितिस्तेनैव सम्बन्धेन कारणम्। नीलो घट इत्यत्र विशेष्यता-

सम्बन्धेनाभेदसम्बन्धकतन्नामार्थप्रकारकशाब्दबोधः घटे वर्तते, अत्राभेदान्वयस्य स्वीकारात् घटस्यात्र विशेष्यत्वाच्च। तत्र घटे तन्नामोत्तरनीलपदोत्तरा विभक्तिः सार्थिका नास्ति, विशेषणविभक्तिः साधुत्वार्थिकेति पक्षस्वीकारात्। सार्थिका विभक्तिः - राज्ञः पुरुष इत्यादौ राजपदोत्तरङसादिविभक्तिरस्ति। तथा च सार्थकविभक्तेरभावेन नीलनामसमभिव्याहृतघटपदजन्या उपस्थितिरपि घटे विशेष्यतासम्बन्धेन वर्तते। कार्यकारणभावे सार्थकविभक्त्युपस्थित्यकालिकेत्यनुक्तौ राज्ञः पुरुष इत्यादावपि तादृशोपस्थितेः सत्त्वात् अभेदान्वयस्यासत्त्वेनान्वयव्यभिचारापत्तिः स्यादतस्तन्निवेशस्तथा सति पुरुषपदोपस्थितेः सार्थकविभक्त्युपस्थितिकालिकत्वेन न व्यभिचारः। समूहालम्बनोपस्थितौ पुरुषोपस्थितेः समानकालिकत्वं बोध्यम्। स्तोकं पचतीत्यत्रापि व्यवस्थार्थं चिन्तयन्नाह - स्तोकमिति ॥ क्रियाविशेषणानां कर्मत्वमिति नियममादाय अभेदार्थेति। स्तोकमित्यत्र फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मत्वम्, धात्वर्थफलमपि कर्मैवोक्तयुक्तेस्तयोश्चाभेदान्वय इति मत्वाह – द्वितीयात्वभेदार्थेति॥

विशेषणविभक्तिः साधुत्वार्थकेति मतमादायाह - साधुत्वमात्रार्था वेति॥ मात्रशब्देन कर्मत्वादिव्यावृत्तिः। तथा च यथा नीलो घट इत्यत्र विशेषणविभक्तेः साधुत्वार्थकत्वेऽपि अभेदान्वयस्तथैवात्र स्तोकपदार्थस्य धात्वर्थपाकेन अभेदान्वय इति। तथा चोक्तकार्यकारणभावसत्त्वादत्रापि निर्वाहः। न च कर्मत्वार्थकत्वे सार्थकविभक्तिसत्त्वेन कथमत्र उक्तकार्यकारणभाव इति वाच्यम् , उक्तरीत्या कर्मत्वस्याभेदे पर्यवसानेनाभेदस्य धर्म्यतिरिक्तत्वाभावेन, विभिन्नरूपार्थकत्वरूप - सार्थकत्वाभावात् । अथवा इमामेवारुचिमादायाह - साधुत्वमात्रार्था वेति॥ ननु क्रियाविशेषणानां कर्मत्वं क्लीबत्वञ्चेत्यनुशासनात् द्वितीयाया कर्मत्वार्थकत्वे सार्थकविभक्त्युपस्थितिकालिकत्वेन पचपदजन्यपाकोपस्थितेः सत्त्वात्कथमभेदान्वय इत्यत आह – यद्वा विरुद्धरूपेणानुपस्थितिस्तत्र तन्त्रमिति॥ यद्वा विरुद्धरूपेणोपस्थितिस्तत्र तन्त्रमिति क्वचित्पाठोऽयमयुक्तः। विरुद्धरूपेणानुपस्थितिरित्यर्थकः पाठो ज्यायान्। स्तोकं पचतीत्याद्यर्थं विभिन्न एव कार्यकारणभाव इत्यर्थः। यथा व्युत्पत्तिवादे अभेदश्च प्रातिपदिकार्थे स्वसमान-

विभक्तिकेन पदेनोपस्थापितस्य भासते इत्युक्तम्। तथा सति स्तोकं पचतीत्यत्र समानविभक्तिकत्वाभावेन दोषः। एवमेव धान्येन धनवानित्यादौ अपि दोषः।

स्तोकं पचति मृदु पचतीत्यादौ विरुद्धविभक्त्यवरुद्धपदोपस्थापितस्यापि स्तोकमृद्वादेर्धात्वर्थपाकादौ अभेदान्वयोऽपि व्युत्पत्तिसिद्धः। तदनुरोधेन च द्वितीयाद्यन्तपदधातुपदयोःसमभिव्याहारस्याप्यभेदान्वयबोधौपयिकाकाङ्क्षात्वमुपगम्यते। तदभिप्रायेणात्रापि भिन्नमेवाभेदान्वयप्रयोजकमाह – विरुद्धरूपेणानुपस्थितिरिति॥ राज्ञः पुरुष इत्यादौ विरुद्धराजत्वपुरुषत्वरूपेणोपस्थितेः सत्त्वान्न भवति अभेदान्वयबोधः। स्तोकमित्यत्र स्तोकस्य पाकेऽभेदान्वयस्य व्युत्पत्तिसिद्धत्वेन विभिन्नरूपेणोपस्थितेरभावेन साधुत्वमेव। विरुद्धरूपेण अभेदान्वयप्रतिबन्धकरूपेणेत्यर्थः।

स्तोकं पचतीत्यादावभेदान्वयबोधाय, विरुद्धरूपेणानुपस्थितेस्तन्त्रत्वे स्वाभिप्रायं वैयाकरणः साधयति – तर्हीति॥ देवदत्तः पचतीत्यादावपि विरुद्धरूपेणोपस्थितेरभावेनाभेदान्वयस्याबाधात् आख्यातस्य कर्तृवाचकत्वे तेन चाभेदान्वयबोधे च बाधकाभावस्तदाह - सिद्धं नः समीहितम्। समीहितम् अभेदान्वयफलकमाख्यातस्याश्रयवाचकत्वम्।

स्वमते लाघवमाह - आख्यातस्य शक्तिकल्पनेत्यादिना॥ वैयाकरणमते "लःकर्मणी"(पा. 3-4-69)ति सूत्रे कर्तरीत्यनुवृत्तेः, आख्यातस्य "कर्तरि कृदि"(पा. 3-4-67) त्यनुशासनेन कृतामपि आश्रयवाचकत्वं समानमिति तयोस्तुल्ययोगक्षेमत्वम्। तथा चाख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्विशेष्यतासम्बन्धेन कारणमित्यादिरूपः कार्यकारणभावः। नैयायिकस्य मते प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारेण, आख्यातार्थभावना(कृति)प्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावः। एवमेव मीमांसकमते आख्यातार्थभावनाविशेष्यकबोधस्य स्वीकारेण कर्तृप्रकारकाख्यातार्थभावनाविशेष्यकबोधे आख्यातजन्यभावनोपस्थितिः कारणमिति कार्यकारणभावस्य स्वीकारः। तथा चोक्तकार्यकारणभावास्वीकाराद् वैयाकरणमते लाघवम्।

ननु नैयायिकमीमांसकोभयमतेऽपि वैयाकरणसम्मतकार्यकारणभावास्वीकारेण साम्येऽपि वैयाकरणमते लाघवोक्तिरसङ्गतेति चेदत्रेत्थं बोध्यम्। पचति भवति, पक्ष्यति भवति, पश्य मृगो धावतीत्यादौ भाष्यसिद्धा एकवाक्यता। सा च नैयायिकमतमीमांसकमतसिद्धकार्यकारणभावस्वीकारे अनुपपन्ना स्यात्। वैयाकरणास्तु भावनाप्रकारकबोधं प्रति विशेष्यतासंबन्धेन धातुजन्यभावनोपस्थितिः कारणमिति कार्यकारणभावं स्वीकुर्वन्ति। तथा चोक्तं लाघवमिति लाघवपदं प्रकृते एकवाक्यतानुपपत्तिपरमिति न कश्चिद् दोषः। एतेनेति॥ विरुद्धरूपेणानुपस्थितेस्तन्त्रत्वात्। भिन्नाभ्यां नीलो घट इत्यादौ नीलत्वघटत्वादिधर्माभ्याम्, एकधर्मिणो घटादेः बोधकत्वमुभयत्राप्यस्ति अतस्तत्राभेदः। अस्य यत्खण्डनं केनापि कृतम् तदपास्तम्। स्तोकं पचति देवदत्तः पचतीत्यादौ अभेदान्वयबोधोपपत्तये तथा स्वीकारौचित्यस्य प्रतिपादनात्।

अन्यादृशमिति॥ समानविभक्तिकत्वादिरूपम् न वार्यते इति। एतदपि निरस्तमेव, स्तोकं पाकः, धान्येन धनवानित्यादावभेदान्वयबोधानुपपत्तेः। समानविभक्तिकत्वज्ञानस्याभेदान्वयप्रयोजकत्वे देवदत्तः पचतीत्यदौ अभेदान्वयो न स्यात्तेन चाख्यातस्याश्रय वाचकत्वं हीयेत्। यन्मतम् उक्तयुक्त्या निरस्तम् तन्मतम् मन्दानां प्रतारणमात्रम् मन्दधीलुण्ठनमित्यर्थः।

### 3.12 आक्षिप्तकर्त्रा सामानाधिकरण्याङ्गीकारे अरुणाद्यधिकरणोच्छेदप्रदर्शनम्

**26.** अथास्तु सामानाधिकरण्यम्, किं तु भावनाक्षिप्तकर्त्रा[१] भविष्यतीत्यसकृद्वार्त्तिके[18] एवोद्घोषितमिति[२] चेन्न, आक्षेपो हि यद्याख्यातार्थ[३]भावनयानुमानम्, तर्हि धूमोऽयं ज्वलतीत्यादाविव तदसंभव एव। मैत्रादिपदयोगे[४] तदसंभवाच्च[५]। लक्षणा चेत्[६], तर्हि

---

[१] त5,ब2-कर्ता

[२] त1,त5-भविष्यतीति वार्तिके एवासकृदुद्घोषितमिति

[३] त1,त5-"यदि" नास्ति

[४] त1,त5,त्रि-मैत्रादिपदप्रयोगे

[५] के5- "मैत्रादिपदयोगे तदसम्भवाच्च"नास्ति, त5- तस्यासम्भवाच्च

[६] ब3- लक्षणेति चेत्

पिङ्गाक्ष्यादियौगिकेष्व[१]पि द्रव्यवाचित्वं न स्यात्, मूलयुक्तेः सामानाधिकरण्यस्योक्तरीत्यै[२]वोपपत्तेः। द्रव्यवाचकत्वसाधकान्तरस्य[३] चाभावात्[४]। प्रत्युत संबन्धादिगुणवाचित्वे[५] एव साधकमुपलभ्यते[६]। तथा हि - घटपदाद् घटत्वप्रकारक[७]-घटविशेष्यक[८]बोधवद् दण्डी इत्यादौ[९] दण्डसंबन्धवानिति प्रतीतिः सर्वसिद्धा। तत्राकृत्यधिकरण(मी.1-3-9)न्यायेन निष्कृष्टघटत्ववत् संबन्धमात्रं वाच्यं[१०] स्यात्। किं च "तदस्यास्त्यस्मिन्निति मतुप्"(पा.5-2-94)[११], "सास्य देवते"(पा.4-2-24)त्यादावस्येत्यर्थे मतुबादिविधानम्[१२], अस्येत्यत्र[१३] प्रत्ययार्थत्वात् संसर्गः प्रधानमिति तत्रैव तेषां[१४] विधिः स्यात्। तथा च, मतुबर्थे[१५] विहितबहुव्रीहेरपि स एव वाच्यः स्यात्। उक्तं चारुणाधिकरण[१६](मी 3-1-6)वार्तिके[19]-

> बहुव्रीहिः[१७] समासोऽयं[१८] मतुबर्थे विधीयते।
> अस्यात्रेति[१९] च संबन्धे मत्वर्थीयः प्रवर्तते[१]॥ (मी.3-1-6-12) इति[२]।

---

[१] के4-योगेष्व

[२] त1,के5-क्तयुक्त्यै

[३] त1,त5-साध्यान्तरस्य

[४] जै-वाभावात्, के5-"च"नास्ति, अ1-अभावाच्च

[५] त1,के5-गुणवाचकत्वे, अ1-गुणवाचित्वस्य एव,भ1-प्रस्तुतसंबन्धादि गुणवाचित्वे, भ2-सम्बन्धादिर्यो गुणः इति टिप्पणी

[६] जो2-साधकमुपलक्ष्यते

[७] भ1-घटप्रकारक

[८] के4-"विशेष्यक"नास्ति, ज1- "क" नास्ति

[९] भ2-निरवच्छिन्न इति टिप्पणी

[१०] जो2-"वाच्यं" नास्ति

[११] त1-"इति" इत्यधिकं

[१२] अ1-मतुबादीनां विधानं, 1915-मतुबादिविधानम्।

[१३] त1,1900-अस्त्येत्यत्र

[१४] जो2-"तेषां" नास्ति

[१५] त1-मतुबर्थ

[१६] त1,त5-चारुणाधिकरणे

[१७] त2,भार1,द1,जो2,ज1-बहुव्रीहि

[१८] के4-समासो हि

[१९] त1-अस्यास्तीति

युक्तं चैतत्, अत एव देवदत्तस्य गोमत्त्वमित्यत्र त्वप्रत्ययस्य संसर्गबोधकत्वं संगच्छते। घटत्वमित्यादौ पदार्थीभूतघटत्वबोधकत्ववत्[3]।

न च प्रकृतिजन्यबोध[4]प्रकार[5]स्त्वप्रत्ययार्थः,संसर्गस्तु विशेष्यः। तथा च[6] कथं त्वार्थ इति वाच्यम्, आकृत्यधिकरण(मी.1-3-9)न्यायेन घटत्वस्यैव वाच्यत्वात्, तत्रेवोपपत्तेः[7]। आक्षेपितव्यक्तौ[8] तस्य प्रकारत्वं[9] वात्रापि[10] समम्।

उक्तं च[11] - "यदि [च][12] मतुपा संबन्धो[13]ऽभिहित[14]स्ततः प्रकृतिप्रत्ययौ सहार्थं ब्रूत [15] इति गोमत्प्रातिपदिका [16] दुत्पन्नो भावप्रत्ययः संबन्धमभिधातुमर्हति, नान्यथा" [20] इत्यादिना। प्रतीयते च[17] सर्वत्र संबन्धः [18] पाचकत्वं पाठकत्व [19] मौपगवत्वमित्यादिषु[21] इति।

---

[1] के5-प्रदर्शितः

[2] के4-"इति"नास्ति

[3] भ2-यथा घटत्वं वाच्यम् घटत्वमेव प्रकारः तथा सम्बन्धो वाच्यः, सम्बन्ध एव च प्रकार इत्यर्थो अवसेयः। इति टिप्पणी

[4] अ1-प्रकृतिजन्यबोधे,1915-बोध्य

[5] अ3- "प्रकार" नास्ति, त1-प्रकारक

[6] भ2-प्रत्ययार्थत्वादित्यर्थः इति टिप्पणी

[7] 1900,भ1,1915 -तत्रैवोपपत्तेः

[8] के4-"तु"इति अधिकं

[9] 1900-प्रकारकत्वं

[10] अ1,अ3,ब1,1900,के5,त2,द4,भ1,भ2,1915,म,अ4-चात्रापि, ज1-"वा" नास्ति, भ2-गोमत्त्वमित्यादौ इति टिप्पणी

[11] द2- "च" नास्ति

[12] [च]- अयं तन्त्रवार्तिके प्रकाशिते उपलभ्यते,यद्यपि मातृकासु नास्ति।

[13] द4-संवेधो

[14] भ1-संबन्धोहित

[15] जै-कृत, 1915-ब्रूते

[16] म-प्रादिपदिका

[17] द7-"च" नास्ति

[18] भ2-क्रियाक्रियावतोरत्र सम्बन्धः प्रतीयते इति टिप्पणी, म-सम्बन्धवाचकत्वं

[19] ब1-पाकत्वं, जो2-पावकत्वं

देवदत्तः पचतीत्यत्राभेदान्वयबोधस्यान्यथोपपत्तिमाह - अथ अस्तु सामानाधिकरण्यमिति॥ त्वया सामानाधिकरण्याय कर्तरि आख्यातशक्तिः स्वीक्रियते , तत्राख्यातस्य भावनायां शक्तिः , भावनया च कर्तृरूप आश्रय आक्षिप्यते , तेन कर्त्रा च सामानाधिकरण्यं भविष्यति। खण्डयति - आक्षेपो हि यदीति॥ मतभेदेनाक्षेपपदार्थं विवृणोति - आक्षेपो यदि इति॥ धूमेन वह्निरनुमीयते यत्र वह्निः प्रत्यक्षो नास्ति। यदा तु धूमोऽयं ज्वलतीति प्रत्यक्षमस्ति तदा तत्रानुमानानुपयोग एव , अग्नेः प्रत्यक्षादि सिद्धत्वात्। तथैवाख्यातार्थभावना क्वचिदाश्रिता गुणत्वादित्यनुमानमपि व्यर्थम् , प्रयुक्तमैत्रादिपदेनैवाश्रयलाभात्।

आक्षेपो लक्षणेति पक्षं खण्डयति - लक्षणाचेदित्यादिना॥ अत्र शक्तिमनादृत्य लक्षणालाभश्चेत् क्वचित् लक्षणापक्षमनादृत्य शक्तिस्वीकारो असङ्गत एव स्यात्। तत्स्थलमाह - पिङ्गाक्ष्यादि यौगिकेष्वपीति॥ लक्षणयैवैकधर्मि-बोधकत्वरूपसामानाधिकरण्यनिर्वाहे तत्र शक्तिस्वीकारो निष्फल इति भावः। तत्रायं विशेषः - ज्योतिष्टोमे "अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाति "इति श्रूयते। तत्रारुणशब्दो गुणपरः , आकृत्यधिकरणन्यायात्। तृतीयया गुणनिष्ठं करणत्वमुच्यते , तादृशगुणस्य साक्षात्क्रयणकरणत्वासम्भवेऽपि स्वाश्रयद्रव्यद्वारा आरुण्यस्यापि करणत्वोपपत्तिः। तत्र आश्रयत्वेन जिज्ञासायां प्राकरणिकसर्व-द्रव्याक्षेपे , प्रकरणापेक्षया वाक्यस्य बलीयस्त्वेन , आरुण्यवाचकपदघटितवाक्य-घटकैकहायनीपिङ्गाक्ष्यादिपदशक्यद्रव्ये गोरूपे आरुण्यस्यान्वय इति तदधिकरणा-भिप्रायः। न च कारकाणां परस्परान्वयानौचित्यमिति वाच्यम्। भेदसम्बन्धेनैव परस्परान्वयनिषेधे तात्पर्यात्। प्रकृते च तादात्म्येनैवान्वयात्। एकहान्यादिपदानां सम्बन्धमात्रसाधुत्वबोधकमेव "अनेकमन्यपदार्थे"(पा. 2-2-24) इत्यनुशासनम्। तथा च तत्र द्रव्यलाभाय लक्षणा। लक्षणां विहाय द्रव्यवाचित्वानुपपत्तिरेव । मूलयुक्तेः। पञ्चम्येषा , द्रव्यबोधकयुक्तेः , तादृशयुक्तिप्रयोज्यसामानाधिकरण्यस्य उक्तरीत्या लक्षणया एवोपपत्तेः।

ननु द्रव्यवाचकसाधकान्तरसद्भावादस्तु तथेत्यत आह – द्रव्यवाचक-साधकान्तरस्य चाभावात्॥ न च "अनेकमन्यपदार्थे"(पा. 2-2-24) इति अनुशासनमत्र प्रमाणमिति वाच्यम् , तेन सम्बन्धमात्रस्यैव अनुशासितत्वात्।

तदेवाह - प्रत्युत सम्बन्धादिगुणवाचित्व एव साधकमिति॥ साधकम् अनुशासनम्। तथाहीति ॥ घटः इत्युक्तौ घटत्वप्रकारको घटविशेष्यको बोधो जायते , तथैवानुभवात्। तद् दृष्टान्तेनाह – दण्डीति॥ अत्रापि दण्डसम्बन्धस्यैव प्रकारत्वादाह – दण्डसम्बन्धवानिति प्रतीतिरिति॥ दण्डसम्बन्धवानित्येव बोधः। तत्र तादृशबोधानुपपत्तिमाह – तत्राकृत्यधिकरणन्यायेनेति॥ सर्वस्यापि शब्दस्य आकृतिर्जातिरेव वाच्या लाघवादित्याकृत्यधिकरणतात्पर्यम् । आकृतिपदेन पदार्थे विशेषणीभूतमात्रमुच्यते , तच्च गुणक्रियासम्बन्धादिरूपमेव। तथा च तन्न्यायेन यतः घटपदेन घटत्वोपस्थितिः , अतस्तदेव च तद् वाच्यम्। तथैव दण्डीत्यत्रापि दण्डसम्बन्धवति दण्डसम्बन्धस्यैव विशेषणत्वात् दण्डसम्बन्धस्यैव वाच्यतेति भावः। नचात्र प्रमाणाभाव इत्याह – किञ्चेति॥ सूत्राणि एवात्र मानानीति॥

तथा हि – "तदस्यास्त्यस्मिन्निति मतुबि"(पा. 5-2-94) ति मतुब् विधायकम् , "सास्य देवते"(पा.4-2-24)ति अणादि विधायकम्। पूर्वसूत्रे अस्य अस्मिन्नित्युक्तत्वेन अस्त्युपाधिकतत्तत्प्रादिपदिकप्रकृतिकप्रथमान्तान्मतुबादयः अस्येति षष्ठ्यर्थे अस्मिन्निति सप्तम्यर्थे च साधवः इति तदर्थः। सास्येत्यस्य च देवतोपाधिकतत्तत्प्रादिपदिकप्रकृतिकप्रथमान्तात् अस्येति षष्ठ्यर्थे अणादयः भवन्ति इति तदर्थो जायते। तथा चास्मिन्नर्थे अस्येति सम्बन्धस्यैव प्रत्ययार्थत्वमायाति। तदाह मूले - अस्येत्यत्र प्रत्ययार्थत्वात् संसर्गः प्रधानमिति॥ तथा च मतुबादीनां सम्बन्धार्थकत्वं सिद्धम्। बहुव्रीहेरपि मतुप् समानार्थकत्वमाह - तथा च मतुबर्थे बहुव्रीहेरपीति॥ बहुव्रीहेरपि सम्बन्धार्थकत्वमेव , सम्बन्धस्यैव तत्र शब्दशक्त्या प्रतीतेः। वार्तिकमत्र पठति – उक्तञ्चारुणाधिकरणवार्तिके इति॥

बहुव्रीहिः समासोऽयं मतुबर्थे विधीयते।
अस्यात्रेति च सम्बन्धे मत्वर्थीयः प्रवर्तते॥ इति। (त.वा.3-1-6-12)

स्पष्टोऽर्थः। पूर्वोक्तमनुभावयति – युक्तञ्चैतदिति॥ अत एव देवदत्तस्य गोमत्त्वम् इति॥ गोमत् इत्यत्र मतुप् प्रत्ययः। मतुपः सम्बन्धोऽर्थः। तस्य सम्बन्धस्य त्वप्रत्ययेनाभिधानम्। तत्र दृष्टान्तमाह - घटत्वमित्यादौ इति॥ घटस्य भावो घटत्वम् , घटवृत्तिरसाधारणो धर्मो घटत्वम् , स एव त्वप्रत्ययार्थः। प्रकृतिजन्यबोधे प्रकारीभूतो भाव इति नियमात् घटत्वमित्यत्र प्रकृतिः घट इति , तज्जन्यो

बोधः घटत्वप्रकारको घटविशेष्यकः , तत्र बोधे प्रकारीभूतम् घटत्वमिति , स एव त्वप्रत्ययार्थः। अत्र प्रकारीभूतेति[1] पाठो युक्तः॥

ननु घटत्वमित्यत्र घटे विशेष्ये घटत्वस्य प्रकारत्वादस्तु त्वप्रत्ययार्थत्वम्। इह गोमत्त्वमित्यत्र मतुबन्तेन प्रकृतिभूतेन उक्तरीत्या सम्बन्धस्यैव विशेष्यतया प्रकारत्वाभावेन कथं त्वप्रत्ययार्थत्वमिति शङ्कते - न चेत्यादिना॥ स्पष्टोऽर्थः। संसर्गस्तु विशेष्यः , मतुपः अस्येति निर्देशात् सम्बन्धार्थकत्वात्। समाधानमाह – आकृत्यधिकरणन्यायेनेति॥ अयमाशयः – "जात्याकृतिव्यक्तयः पदार्थ"(न्या.2-2-68) इति गौतमसूत्रेण घटत्वविशिष्टो घटः घटशब्दस्यार्थ इति नैयायिकमतम्। मीमांसकास्तु विशिष्टे शक्तिस्वीकारे उभयत्र शक्तिस्वीकारे गौरवम्। अनन्तव्यक्तिषु शक्तिकल्पनायामननुगमे प्राप्ते घटत्वस्यैकस्यानुगमकत्वम्। तस्मात् लाघवाद् घटादिपदानां घटत्वादिजातौ एव शक्तिः। घटत्वस्यैक्येन नाननुगमादिदोषोऽपि। अत्र जातिपदं गुणक्रियाद्युपलक्षणम्। अयमेवार्थः आकृत्यधिकरणे प्रतिपादितः। तत्राप्येवमाशङ्कितं - घटादिपदानां जातेरेव वाच्यत्वे तस्या एव विशेष्यतया भाने घटत्वमिति त्व प्रत्ययानुपपत्तिरिति। अतस्तत्र त्वप्रत्ययोपपत्तये घटत्वादिना आक्षिप्तव्यक्त्यपेक्षया घटत्वादीनां प्रकारत्वमाश्रितम्। तथा इहापि मतुबर्थसम्बन्धेनाक्षिप्तगोसम्बन्धिदेवदत्ताद्यपेक्षया सम्बन्धस्य प्रकारत्वमादाय गोमत्त्वमित्यत्र त्वप्रत्ययोपपत्तिरिति समानन्यायः।

तदेवोक्तम् – आक्षेपितव्यक्ताविति॥ उक्तञ्चेति॥ यदि मतुप्प्रत्ययेन सम्बन्धस्याभिधानम् , तदैव गोमत्प्रातिपदिकादुत्पन्नो भावप्रत्ययः सम्बन्धाभिधाने समर्थः स्यात्। ननु सम्बन्धिवाचकत्वेऽपि सम्बन्धस्य सम्बन्धिनि प्रकारतया भानात् त्वप्रत्ययार्थत्वं स्यादेवेति चेन्न , मतुपो द्रव्यमात्रार्थकत्वे सम्बन्धस्य प्रकृतिप्रत्ययार्थसम्बन्धस्य शक्तिं विनैव संसर्गतया भानसंभवे प्रकारत्वाभावे त्वप्रत्ययार्थत्वानुपपत्तिरिति तात्पर्यात्। सम्बन्धस्य प्रत्ययार्थत्वे तु आक्षिप्तव्यक्त्यपेक्षया प्रकारत्वेन त्वप्रत्ययार्थत्वोपपत्तेः। नान्यथेति॥ अन्यथा

[1] पदार्थीभूत इत्येव पाठः सर्वत्रोपलभ्यते। युक्तश्च। अस्य व्याख्या (भ2)मातृकायां कृता इत्थं – यथा घटादिशब्दानां घटत्वमेव वाच्यं घटत्वमेव प्रकारः , तथा संबन्धो वाच्यः संबन्ध एव च प्रकार इत्यर्थोऽवसेयः इति।

द्रव्यमात्रपरत्वे। सम्बन्धप्रतीतिमुदाहरति - प्रतीयते इत्यादिना॥ पाचकत्वम् पाठकत्वम् औपगवत्वम्। पाचकेत्यस्य पाककर्ता , पाठकेत्यस्य पाठकर्ता , औपगव इत्यत्र उपगुसम्बन्ध्यपत्यम् इत्यादिरर्थः। एभ्यः भावार्थकत्वप्रत्यये सम्बन्धस्यैव प्रतीतिः , स च सम्बन्धः पाकाश्रययोः पाठाश्रययोः समवायादिः। औपगव इत्यादौ च जन्यजनकभावादिः। तस्यैव च प्रकारत्वात् त्वप्रत्ययार्थत्वमिति भावः। वस्तुतस्तु पाचकादिशब्दाः क्रियाप्रवृत्तिनिमित्तका एव अतस्तत्र त्वप्रत्ययेन क्रियैव उच्यते।

**27.** किं च, एकहायन्यादिशब्दविग्रहेऽप्येकं हायनमस्याः, चित्रा गावो यस्य, विश्वे देवा देवता अस्येत्यादौ प्रत्ययार्थ[१]संबन्धप्राधान्येन विवरणदर्शनात्[२] तस्यैव वृत्ति-वाच्यत्वमवसीयते[३]।

उक्तं च[22]-

यस्मिन्नन्यपदार्थे च बहुव्रीहिर्विधीयते।

तत्रापि प्रत्ययार्थत्वात् संबन्धस्य प्रधानता॥ **(त.वा.3-1-6-12)** इति।

न च गोमानित्यादौ संबन्धिप्रतीति[४]र्न स्यादिति शङ्क्यम्, उभयाश्रितेन संबन्धेनाक्षेपात् तदुपपत्तेः[५] तव[६] कर्तृवत् संबन्धवच्चेति। यत्तु[23] मतुबादेर्न[७] संबन्ध[८]सामान्यं वाच्यम्[९], पर्यायतापत्तेः[१०]। न[११] विशेषः। स[१२] हि संबन्धिरूप[१३] एव। सोऽपि नानभिहितः

---

[१] त1-प्रत्ययार्थः

[२] भ1-विवरणप्रदर्शनात्

[३] के5,म-मास्थीयते

[४] द2-"सम्बन्धपदेन सह सम्बन्धिप्रतीतिः" इति टिप्पणी,त5,ज1- सम्बन्धप्रतीतिः

[५] त1,जो2.त5,ब3-"तत्" नास्ति

[६] भ1-न च

[७] के4-यत्तु न मतुबादेः

[८] के4-सम्बन्धि

[९] जो2-"वाच्यं" नास्ति

[१०] के4-पर्यापितापत्तेः

[११] द7-न च, त5-"न" नास्ति

[१२] अ4-न

[१३] अ1-सम्बन्धरूप

शक्नोति तं[१] व्यावर्तयितुम्, अतः सोऽप्यभिधातव्यः। तथा च गोरूपस्यैकस्य[२] संबन्धिनः प्रातिपदिकादुक्तत्वेऽपि संबन्धस्योभयनिरूप्यत्वात् सोऽप्यभिधातव्यः संबन्धश्चेति शक्तिद्वयकल्पनापत्तिरित्यतिगौरवम्[३]। आवश्यकसंबन्धिनैवा[४]क्षेपात्[५] तद्वो[६]धोपपत्तावन्यलभ्यत्वं च।

उक्तं च -

सर्वत्र यौगिकैः[७] शब्दैर्द्रव्यमेवाभिधीयते।
न हि संबन्ध[८]वाच्यत्वं संभवत्यति[९]गौरवात्॥ (त.वा.3-1-6-12)

किं च[१०]-

संबन्धिनैव संबन्धः[११] प्रत्येतुं यदि शक्यते।
पुनस्तस्याभिधा[१२] शक्तिं कः श्रुतेः[१३] परिकल्पयेत्॥ (त.वा.3-1-6-12)

इति[१४]।

किं च -

विभक्तिवाच्यरूपेण संबन्धो नावगम्यते।
रूपान्तरेण वक्तव्य इति[१५] नास्ति च लक्षणम्॥ (त.वा.3-1-6-12)

षष्ठ्यादिभिर्हि[१]सत्त्वभूतः संबन्धोऽभिधीयते न तथा मत्वर्थीयेन[२]।

---

[१] भ1-शक्तो नित्यं
[२] जै-गोरूपस्यैव(वै)कस्य, द1,के4-गोरूपस्यैक-
[३] ब2-अतिगौरवम्
[४] त1-आवश्यकसंबन्धित्वेनैवा,के4-सम्बन्धेनैव
[५] जै-क्षिपात्
[६] त5-"तत्" नास्ति
[७] भ1-योगकैः
[८] जै-संबन्धि
[९] अ3-संभवत्यपि
[१०] द4- "किंच" नास्ति
[११] के4-सम्बन्धं
[१२] भार1-भिधां
[१३] ब2-श्रुते
[१४] जो2-"इति" नास्ति
[१५] जै-वक्तव्यमिति

सत्त्वभूतसंबन्ध[3] वाच्यत्वे च न प्रमाणम्। तस्मादनुशासनत्यागावश्यकत्वे[4] तु अस्त्वर्थाक्षिप्त[5] एव स[6] इति।

---

सम्बन्धस्य वाच्यत्वे युक्त्यन्तरमप्याह – किञ्चेति। एकं हायनं यस्या इत्यादिविग्रहाः मूलोक्ता एव। अत्र सर्वत्रापि अस्येति षष्ठ्या विग्रहेण षष्ठ्यर्थः सम्बन्ध एव बहुव्रीह्यादिवृत्तिलभ्यः। वृत्तिः पञ्चधा – कृत्तद्धितैकशेषसनाद्यन्त-धातुरूपा । समस्यमानपदार्थापेक्षया भिन्नार्थाभिधायिका वृत्तिः। वृत्यर्थावबोधकं वाक्यं विग्रहः। स च लौकिकः , अलौकिकश्च। राज्ञः पुरुष इति लौकिकः , राजन् ङस् पुरुष सु इत्यलौकिकः। अस्येत्यनेन विग्रहे वृत्तेरपि सम्बन्ध एव वाच्य इति भावः। उक्तञ्चेति॥ सम्बन्धस्य वाच्यत्वे मानमाह –

यस्मिन्नन्यपदार्थे बहुव्रीहिर्विधीयते।

तत्रापि प्रत्ययार्थत्वात् सम्बन्धस्य प्रधानता॥ (त.वा.3-1-6-12)

"अनेकमन्यपदार्थे" (पा.2-2-24) इति सूत्रेण बहुव्रीहिसमासो वृत्तिघटक-पदार्थापेक्षया अन्यस्मिन् पदार्थे सम्बन्धादौ विधीयते। तत्रापि बहुव्रीह्यर्थेऽपि। सम्बन्धस्य प्रधानता। तत्र हेतुमाह – प्रत्ययार्थत्वादिति॥ विग्रहे अस्येत्यादिदर्शनेन षष्ठ्याद्यर्थे बहुव्रीहेर्विधानात् षष्ठ्यादि प्रत्ययार्थस्य प्राधान्यम्।अथवा तत्रापि मतुबादावपि । प्रत्ययार्थस्य मतुबाद्यर्थस्य सम्बन्धस्य प्रधानतेति। तदाह - न च गोमान् इत्यादाविति॥ यदि बहुव्रीहेरिव मतुबादेरपि सम्बन्धोऽर्थः तर्हि गोमानित्यत्र गोसम्बन्धस्यैव प्रतीतिः स्यात् , गोसम्बन्धिनो देवदत्तादेः प्रतीतिर्न स्यादिति शङ्काशयः। समादधाति – उभयेति॥ सम्बन्धो हि द्विष्ठः उभयाश्रितः सम्बन्धिद्वयाश्रितो भवति। तेनोभयाश्रितेन सम्बन्धिन आक्षेपात् तत्प्रतीतिः। सम्बन्धिनोऽभावे सम्बन्धस्याप्यभावापत्तेः। तव कर्तृवत् । यथा तव मीमांसकादि-

---

[1] त3- "हि" नास्ति

[2] भ1,द7-मत्वर्थेन

[3] के4-सत्त्वभूतस्य वाच्यत्वे

[4] जै-त्यागावश्यत्वे

[5] त1,के5,अ4-सत्यर्थाक्षिप्त,के4-वस्त्वर्थाक्षिप्त पूर्वं "तु" अपि नास्ति। भार1,1900-तु अर्थाक्षिप्त, अ1-न मत्वर्थाक्षिप्त

[6] अ3-स इव, त1-"सः" नास्ति

मते आख्यातार्थभावनया कर्तुराक्षेपः। सम्बन्धवच्चेति॥ यथा सम्बन्धिना त्वया सम्बन्धाक्षेपः , यथा च भावनायाः कर्तुराक्षेपश्च क्रियते तद्वत्। सम्बन्धिवाचकत्वे सम्बन्धस्याक्षेपः।

सम्बन्धस्य वाच्यत्वं खण्डयतःवार्तिककारस्य मतमनुवदति - यत्तु इत्यादिना॥ सम्बन्धसामान्यस्य मतुबर्थत्वे मतुप्सम्बन्धयोः पर्यायत्वापत्तिः। उभयोरपि सम्बन्धार्थकत्वात्। समानप्रवृत्तिनिमित्तद्वारैकार्थकत्वस्यैव पर्यायत्वात्। ननु सम्बन्धविशेषः स्वस्वामिभावादिरूप एव मतुबर्थोऽस्तु इति चेत् तत्र दोषमाह - स हीति ॥ विशेषरूपत्वे तस्य सम्बन्धिरूपत्वमेव स्यात् सम्बन्ध्यंशे सम्बन्धस्यापि प्रवेशात्, यद्वा स्वस्वामिभावादिसम्बन्धस्य स्वरूपेणैव सम्बन्धिनि सत्त्वेन सम्बन्धिरूपत्वमापद्यते। सोऽपि सम्बन्ध्यपि। अनभिहितः मतुपा अनुपस्थापितः। सम्बन्धं व्यावर्तयितुं न शक्नोति। तस्मात्सम्बन्धव्यावृत्तये मतुपा सम्बन्धिनोऽभिधानमावश्यकम्।

उपसंहरति - तथा चेति॥ गोमान् इत्यत्र प्रतीयमानो यः स्वस्वामिभावसम्बन्धः, तस्य गोरूप एकः सम्बन्धी गोरूपप्रातिपदिकादुक्तः, द्वितीयो देवदत्तादिः , सम्बन्धी मतुपा वक्तव्यः। तत्र हेतुमाह – सम्बन्धस्योभयसम्बन्धिनिरूप्यत्वात् निरूपकाभावे तस्यानुपपत्तेः। एवं सति मतुबादिना सम्बन्धिनः , सम्बन्धस्य चाभिधानेऽतिगौरवमेव स्यात्। एवं सति को निर्णय इति जिज्ञासायामाह – आवश्यकेति॥ सम्बन्धिनि शक्तिस्तेन च सम्बन्धाक्षेपः , न तु तस्य वाच्यत्वम्। न च सम्बन्धे शक्तिस्तेन च सम्बन्धिन एवाक्षेपोऽस्त्विति वाच्यम्। सम्बन्धिनः प्रतीतेः सर्वानुभवसिद्धत्वात्।

अत्र प्रमाणमाह -

सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते।
न हि संबन्धवाच्यत्वं संभवत्यतिगौरवात्॥ (त.वा.3-1-6-12)

यौगिकैर्गोमानित्यादिभिः , द्रव्यमेव सम्बन्धी एव अभिधीयते मतुबादिना उच्यते। सम्बन्धनिष्ठवाच्यत्वं न हि सम्भवति। तत्र हेतुमाह - अतिगौरवात्। गौरवन्तु प्रदर्शितमेव। अत्र सम्बन्धवाच्यत्वमिति पाठो युक्तः।

पुनरपि तत्राह-

संबन्धिनैव संबन्धः प्रत्येतुं यदि शक्यते।
पुनस्तस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेत्॥ (त.वा.3-1-6-12)

मतुबादिना सम्बन्धिनोऽभिधानम् , सम्बन्धिना चाक्षेपात्सम्बन्धोपस्थितिः। तथा चान्यलभ्यत्वात् पुनस्तत्रसम्बन्धे श्रुतेः मतुबादेः शक्तिं कः कल्पयेत्। तथा च सम्बन्धिनि शक्तिः , सम्बन्धस्यान्यथैवोपस्थितिरिति भावः।

पुनरपि सम्बन्धस्य विभक्त्यवाच्यत्वमाह -

विभक्तिवाच्यरूपेण संबन्धो नावगम्यते।
रूपान्तरेण वक्तव्य इति नास्ति च लक्षणम्॥ (त.वा.3-1-6-12)

विभक्तिः मतुप्सूत्रे अस्येति षष्ठी , तद्वाच्यो न सम्बन्धः अपि तु सम्बन्धी , तद्धितादौ विशिष्टशक्तिस्वीकारात्। रूपान्तरेण आक्षिप्तत्वरूपेण स वक्तव्यः उपस्थापनीयः। तस्य विभक्तिवाच्यत्वे प्रमाणाभावमाह - इति नास्ति च लक्षणमिति॥ सम्बन्धस्य विभक्तिवाच्यत्वे प्रमाणाभावः , आक्षेपादेव तस्य लाभेन अन्यलभ्यत्वात्।

षष्ठी वाच्यः सम्बन्धः , मतुप्सूत्रेऽपि अस्येति षष्ठी , तत्रापि सम्बन्ध एव वाच्यः स्यादतस्तयोर्वैलक्षण्यमाह – षष्ठ्यादिभिरिति॥ आदिना द्वितीयादय उपपदविभक्तयः। ता अपि सम्बन्धबोधिकाः , षष्ठ्यपवादत्वात्। एतासां विभक्तीना-मर्थः सम्बन्धरूपः , असत्त्वात्मक एव। राज्ञः इत्यत्र यो हि सम्बन्धः प्रतीयते तत्र लिङ्गसंख्याद्यप्रतीतेः।

मत्वर्थीयेन प्रत्ययेन तथा असत्त्वभूतः सम्बन्धोऽभिधातुं न शक्यते, शब्दशक्तिस्वाभाव्यात्। यथा कर्मत्वशब्दोपस्थाप्यं कर्मत्वं न विभक्तिवाच्यताव-च्छेदकम् , अत्र चोपस्थापितं कर्मत्वं विभक्तिवाच्यतावच्छेदकम् , तद्वदत्रापि बोध्यम् । अस्येति षष्ठ्या तादृशसम्बन्धः प्रतीयताम्। मतुपा तु न तथा प्रत्याययितुं शक्यते इति भावः। न च षष्ठ्या सत्त्वभूत एव सम्बन्धः प्रतीयतामित्यत आह – सत्त्वसम्बन्धवाच्यत्वे न प्रमाणम्। ननु अस्येत्यनुशासनस्य का गतिरित्यत आह – तस्मादनुशासनत्यागावश्यकत्वे त्वाक्षिप्त इति । अस्येति इति अनुशासनस्य सम्बन्धसमर्पकत्वेऽपि मतुबादिशब्दशक्तिस्वभावेन न सम्बन्धो वाच्यः , अपि तु आक्षेपादेव सम्बन्धलाभ इति बोध्यम्।

**28.** यत्तु[24] भावप्रत्ययः संबन्धं न वदेदिति तन्न[१],

यदा[२] स्वसमवेतोऽत्र[३] वाच्यो नास्ति गुणोऽपरः।

तदा गत्यन्तराभावात् संबन्धो वाच्य आश्रितः॥ **(त.वा.3-1-6-12)**

गोमत्पदे हि[४] गावो[५] मतुबर्थे[६] विशेषणम्। तासां पुरुषावृत्तित्वात्[७] न त्वप्रत्ययेन[८] ग्रहणम्, तस्य समवेतगुणाभिधायकत्वात्[९]। तथा चागत्या[१०] र्थप्राप्तसंबन्धाभिधायकस्त्वप्रत्यय इत्याश्रीयते। यदप्येकं[११] हायनमस्या[१२] इति विग्रहे संबन्धप्राधान्य[१३]दर्शनात् तस्य समासार्थतेति[१४]।

तत्रोच्यते[१५]-

अभिधेयो बहुव्रीहेर्यद्यप्यस्येति[१६] कथ्यते।

तथापि प्रथमान्तेन[१७] तुल्योऽसौ संप्रतीयते[१८]॥ **(त.वा.3-1-6-12)**

तथा चार्थदर्शनानुसारेण[१९] चित्राणां गवामयमित्येव विग्रहो द्रष्टव्य इति स्थितं वार्त्तिके[१][25]।

---

[१] के4-"तन्न"नास्ति

[२] त1-यथा

[३] भ2-अत्र-सम्बन्धे इति टिप्पणी

[४] अ3-तु

[५] के4-गावोऽत्र

[६] अ1-मत्वर्थे

[७] जो2-पुरुषार्थत्वात्,भ1-पुरुषवृत्तित्वात्, भ2 – पुरुषावृत्तित्वात्-पुरुषासमवेतत्वात् इति टिप्पणी

[८] द1-त्वप्रत्यय

[९] अ1-स्वसमवेतगुणाभिधायकत्वात् , त1,के5-गुणाभिधायित्वात्

[१०] त1-चार्थगत्या

[११] त1-यद्यप्येकं

[१२] भ2,ज1-हायनं यस्या

[१३] भार1-सम्बन्धाप्राधान्य

[१४] त1-समार्थतेति, जै-समासार्थतातेति

[१५] अ1,त1,के5,जो2-अत्रोच्यते

[१६] त1-यद्यस्येति

[१७] जै-प्रथमंतेन

[१८] त1,त5-तुल्यो नूनं प्रतीयते, अ4-"इति" इत्यधिकम्

[१९] त1,त5-चार्थवर्णनानुसारेण,के4-चार्थदर्शनानुरूपेण

तच्चिन्त्यम्[२]। द्रव्यमपि न[३] सामान्यतोऽभिधेयम्[४], पर्यायतापत्ते[५]स्तुल्यत्वात्। न विशेषतः[६]। स हि संसर्गः[७], प्रातिपदिकार्थो वा? आद्ये अप्रतीतस्यानभिहितस्य विशेषकत्वासंभवाद् वाच्यत्वापत्तिः[८]। द्वितीयपक्षः[९] संसर्गवादिनोऽपि तुल्यः, संसर्गेऽपि गवां व्यावर्तकतया[१०] विशेषणत्व[११]संभवात्। तथा च गोविशिष्ट इतिवद् गोसंबन्ध[१२] इति बोधः संभवत्येव। [ननु][१३] उभयनिरूप्यः[१४] संबन्ध उभयबोधं विना कथं बुध्यतामिति चेन्न, संबन्धप्रत्यक्षे[१५] हि[१६] यावत्संबन्धिप्रत्यक्षं[१७] कारणम् न तु शाब्दे, गोसंबन्ध इति वाक्याद्[१८] बोधानापत्तेः[१९]। तर्हि गोसंबन्ध इति वाक्यवदा श्रयाक्षेपनियमो न स्यादिति चेन्न, षष्ठ्यर्थे विहितमतुबादेः ह्य[२०] सत्त्वभूत एव संबन्धोऽभिधेयः[२१]। अत एव[२२] संबन्धानामनेकत्वे[२३] तुल्यलिङ्गत्वेऽपि[१] च दण्डीत्ये-

---

[१] त1-तार्किके, द7-वार्तिकं
[२] द4-तद्
[३] त1,त5-न द्रव्यमपि
[४] अ1- सामान्यतोऽभिधेयः,के4-सामान्यतोऽभिधीयते
[५] के5-पर्यायापत्ते
[६] त1,त5-विशेषः
[७] जो2-सम्बन्धः
[८] अ1-वाच्यत्वापत्तेः, त1,त2-वाच्यतापत्तिः
[९] ज1-द्वितीयः पक्षः
[१०] जै-व्यावर्ततया-
[११] भ1-विशेषण,ज1-व्यावर्तकताविशेषणत्व-
[१२] अ1-गोसम्बन्धविशिष्ट
[१३] त1,त5 - ननु (अयमुपयुक्त इति अत्र योजितः)
[१४] जै-संभवत्येव उभयनिरूप्यः।
[१५] जै-प्रप्रत्यक्षे
[१६] द1- "हि" नास्ति
[१७] जै-प्रत्यक्ष्यं, भ1-सम्बन्धप्रत्यक्ष
[१८] भार1-वाक्य-
[१९] जै-वाक्याधानापत्तेः
[२०]अ4- "हि" नास्ति
[२१] भ1-सम्बन्धेयः
[२२] के4-"सम्बन्धोऽभिधेयः। अत एव"नास्ति
[२३] त1,के5-संबन्धानामनन्तत्वे, अ4-मनेकत्वेपि

कवचनम्, दण्डी[२] दण्डि[३] दण्डिनीत्यादि[४]लिङ्गभेदप्रयोगाश्चोपपद्यन्ते[५]। संबन्धिनां तथाविधत्व एव तादृशप्रयोगाणां[६] दर्शनात्।

एवं च[७] संबन्धे लिङ्गसंख्यान्वयासंभवात् अन्यथानुपपन्नलिङ्गसंख्यादिभिरेवाक्षेपः संबन्धिनः, आख्यातसंख्ययेव[८] कर्त्रादेः।

यद्वा भावनाशब्दोपात्तभावनायाः कर्त्रनाक्षेपकत्वेऽप्याख्यातोपात्ताया[९] असत्त्वभूतत्वेन तदाक्षेपकत्ववत् संबन्धपदोपात्तसंबन्धस्य संबन्ध्यनाक्षेपकत्वेऽपि[१०] मतुबुपात्तस्य[११] संबन्धस्यापि[१२] तत्स्यात्[१३]।

अत एव विभक्तिवाच्यरूपेणेति प्रागुक्तमपास्तम्। तथानवगत्यसिद्धेः[१४]। किं च[१५], लिङ्गसंख्यानन्वयित्वम्[१६] असत्त्वभूतत्वं षष्ठ्यादावर्थसिद्धम्[१७]। प्रत्ययार्थ-लिङ्गसंख्यादेः प्रत्ययार्थ एव[१] अन्वयासंभवात्[२]।

---

[१] जो2- "अपि" नास्ति

[२] अ1-दण्डि दण्डी, अ3, त1,त5-"दण्डी" नास्ति

[३] म-"दण्डि" नास्ति

[४] के5,त2,ब3-"दण्डि" नास्ति, दण्डिनीति

[५] अ1,भार1,द1,त1,जो2,जै,ब1,1900,त2,1915,म-प्रयोगश्चोपपद्यते

[६] अ1-तथाविधत्वे एतादृशप्रयोगाणां

[७] के4- "एवं च"नास्ति, अ4-"च" नास्ति

[८] त1,त5-संख्यैव, जै-संख्ययैव,त2-आख्यातेनेव

[९] अ3- कर्त्रनाक्षेपकत्वेप्याक्षेपाख्यातोपात्तायाः, त2-कर्त्रनाक्षेपकत्वमप्याख्यातोपात्तायाश्च,1915-कर्त्रानाक्षेपकत्वेप्याक्षेपाख्यातोपात्तायाः

[१०] त1- "संबन्धि" नास्ति,भ1-सम्बन्धिनाक्षेपकत्वेपि,त5- सम्बन्धस्यानाक्षेपकत्वेपि

[११] अ1,वा2-मतुबुपात्त

[१२] त2- "संबन्धस्य" नास्ति

[१३] अ1-तत्सत्वात्, जो2-तुल्यत्वात्

[१४] के5,म-तथानवगम्यसिद्धेः,भ2-तथानवगतिः-असत्त्वभूतसम्बन्धानवगतिः,तस्याः असिद्धेः उक्तरीत्या लिङ्गसंख्यानन्वितसंबन्धस्य भानात् सम्बन्धस्यैव सम्बन्ध्याक्षेपकत्वसम्भवात् इति टिप्पणी, द7 – तथा च गत्यसिद्धेः

[१५] के5,म- "किं च" नास्ति

[१६] अ1-"एव" इत्यधिकं, त2-लिङ्गसंख्यान्वयित्वम्

[१७] त1-असत्त्वभूतषष्ठ्यावपिसिद्धम्

सुपां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेश्च। एवं च नासत्त्वभूतत्वं(न सत्त्वभूतत्वं)[३] षष्ठ्या वाच्यमिति विभक्तिवाच्यरूपेणेति रिक्तं[४] वचः।

तस्मात् संबन्धवाच्यत्वे दोषाभावादनुशासनाद्यनुरोधेन[५] तस्य वाच्यत्वसिद्धेः[६]

संबन्धेनैव[७] संबन्धी प्रत्येतुं यदि[८] शक्यते।

पुनस्तस्याभिधाशक्तिं[९] कः श्रुतेः परिकल्पयेत्॥ (त.वा.**3-1-6-12)**

इति[26] गाथा मयापि सुपठा[१०]।

---

सिंहावलोकनन्यायेन पुनरपि भावप्रत्ययस्य त्वप्रत्ययस्य सम्बन्धार्थकत्वमाशङ्कते - यत्तु भावप्रत्यय इति॥ यदि सम्बन्ध एव मतुबाद्यर्थस्तदा गोमत्वमि - त्यत्र त्वप्रत्ययेनसम्बन्धाभिधानमनुचितम् , तस्य प्राधान्येनैव प्रतीतेः , त्वार्थस्य विशेषणीभूततया प्रतीत्या इहास्य प्राधान्येन त्वार्थत्वानुपपत्तेः। तदेतत्खण्डयति – तन्नेति॥

यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः।

तदा गत्यन्तराभावात् संबन्धो वाच्य आश्रितः॥ (त.वा.3-1-6-12)

यथा घटत्वमित्यत्र प्रकृत्यर्थे घटे समवेतो घटत्वमेव त्वप्रत्ययार्थः , तथा गोमत्त्वम् इत्यत्र घटत्वादिवत् गुणस्य जातेर्वाऽभावे तु त्वप्रत्ययार्थोऽनुपपन्नस्तदाह - यदा स्वसमवेतोऽत्रेति। अत्र गोमत्त्वमित्यत्र। अपरो गुणादिर्न समवेतः स्वामिनि देवदत्तादौ, तदा त्वार्थभानायोगे प्राप्ते अगतिकगतिकतया सम्बन्ध एव त्वार्थ इति नियमतो वक्तव्यम्। तदेव प्रतिपादयति- गोमत्पदे गावो मतुप्प्रकृत्यर्थीभूताः,

---

[१] त1,त5- "प्रत्ययार्थ एव " इत्यस्य स्थाने "तत्रैव, के5- प्रत्ययार्थसूत्रे एव

[२] त1,ब1,1900,म,भ1,1915-अन्वयसंभवात्

[३] अ1-न सत्त्वभूतत्वं

[४] अ4-रूपेणातिरिक्तं

[५] त1-शासनानुरोधेन

[६] 1915-सिद्धेः।

[७] जै-संबन्धिनैव

[८] त1-यदि प्रत्येतुं

[९] के5,त1,त5,म-कुतस्तस्याभिधाशक्तिं

[१०] अ1-सुवचा

मतुबर्थे देवदत्तादौ विशेषणम्। न ताः देवदत्तादौ पुरुषे सन्ति, अतो न गावः त्वप्रत्ययार्थतया स्वीकर्तुं शक्यन्ते। त्वार्थस्य सम्बन्धिनि वृत्तित्वावश्यकत्वात्। स्वसमवेतगुणस्यैव त्वार्थत्वाच्च। तदाह – तस्येति॥ त्वप्रत्ययस्य समवेतो यो गुणस्तस्याभिधायकत्वात्। तथा च गोमत्वमित्यत्र अगत्त्या सम्बन्धस्यैव त्वार्थता , आक्षिप्तव्यक्त्यभिप्रायेण तस्य प्रकारीभूतत्वमपि। स्थलभेदेन दूषणमाह - यदप्येकं हायनमिति॥ अत्र बहुव्रीहिसमासः। यस्येति विग्रहे षष्ठ्यर्थस्य सम्बन्धस्य प्राधान्य-प्रतीत्या सम्बन्धस्यैव समासार्थता समासवाच्यता स्यादिति। समाधत्ते - तत्रोच्यते इति॥

अभिधेयो बहुव्रीहेर्यद्यप्यस्येति कथ्यते।

तथापि प्रथमान्तेन तुल्योऽसौ संप्रतीयते॥ इति। (त.वा.3-1-6-12)

यद्यपि मतुप्सूत्रे अस्येति विगृह्यते। तत्र षष्ठ्या सम्बन्ध एव प्रतीयते , तस्यैव बहुव्रीहिसमासबोध्यता स्यात्। तथापि स सम्बन्धो न बहुव्रीहिपदाभिधेयः। ननु अस्येत्यादिश्रुत्या प्रतीयमानतया तस्य वाच्यत्वमस्त्वित्यत आह - तथापि प्रथमान्तेन तुल्योऽसौ सम्प्रतीयते ॥ तथापि यस्येत्यनेन सम्बन्धस्य प्रतीतावपि न तस्य समासार्थत्वम्। तत्र हेतुमाह - प्रथमान्तेनेति ॥ वृत्तिसमानार्थकत्वं विग्रहत्वम्। तत्र यथा चित्रा गावो यस्येति विग्रहः। तथैव चित्राणां गवामयमित्यस्यापि तद् विग्रहत्वम्। तथा च चित्राणां गवामयमित्यस्य यतः सम्बन्धिपरत्वम् , तथैव वृत्तेरपि सम्बन्धिपरत्वमेव। तदुक्तम् तथा चार्थदर्शनानुसारेण चित्राणामिति॥ अर्थ दर्शनम् लोकानुभवः , स च चित्रगुरित्यादौ सम्बन्धिप्रतीत्यात्मकः। इदमेव तुल्यत्वम् , यद् वृत्तिविग्रहयोः समानार्थत्वम्। इदं च वार्तिके स्पष्टम्। सम्बन्धि-पक्षमेतन्निराकरोति - तच्चिन्त्यम् इति॥ सम्बन्धिनो द्रव्यस्य वाच्यत्वं विकल्प्य दूषयति - द्रव्यमपि न सामान्यतोऽभिधेयमिति॥ सामान्यतोऽभिधाने दोषमाह – पर्यायतापत्तेरिति॥ बहुव्रीहेः मतुबादेश्च सम्बन्धसामान्यपरत्वे सम्बन्धमतुबादि-शब्दानाम् पर्यायत्वापत्तिः, एकार्थकत्वात्। विशेषतोऽभिधानमाक्षिपति - न विशेषत इति॥ विशेषतःचेत् संसर्गरूपो वा प्रातिपदिकार्थो वा? आद्यं खण्डयति - आद्ये इति॥ यदि सम्बन्धः अप्रतीतःस्यात् , केनापि अभिहितश्च न स्यात् तदा विशेषको व्यावर्तको न स्यात् , सम्बन्धस्य सम्बन्धिव्यावर्तकत्वौचित्यात्। व्यावृत्तिलाभार्थं

वाच्यत्वमावश्यकम्। ननु संसर्गरूपत्वे द्रव्याभिधायित्वपक्षानुपपत्तिरिति चेन्न , संसर्गस्य सम्बन्धिनिरूप्यत्वेन तदादायैव संसर्गस्य पर्यवसानात्। द्वितीयपक्षोऽपि उक्तयुक्त्याद्यपक्षसमान एव। इदानीं संसर्गपक्षं संस्तौति - संसर्गेऽपि इति॥ संसर्गपक्षेऽपीत्यर्थः। व्यावर्तकतया सम्बन्धिपरिच्छेदकतया सम्बन्धिनि विशेषणत्वं सिद्धम्। तेन संसर्गस्य वाच्यत्वे दोषाभावः। प्रतीतिसाम्येन संसर्गपक्षं प्रस्तावयति - तथा चेति॥ सम्बन्धिवाचकत्वे - यथा गो विशिष्टो देवदत्तादिः, तथैव गोसम्बन्ध इति प्रतीतौ बाधकाभावः। सम्बन्धिप्रतीतिस्तु अर्थादेव।

सम्बन्धपक्षे दोषमाह - उभयनिरूप्य इति॥ सम्बन्धस्यानुयोगिप्रतियोगिसापेक्षतयेत्यर्थः। तथा च केवलस्य संबन्धस्य वाच्यतानुपपन्ना। उक्तानुपपत्तिं सर्वसम्मतानुभवेन खण्डयति - सम्बन्धप्रत्यक्षे हि इति॥ प्रत्यक्षं हि संयोगादिसन्निकर्षेण जायते। सम्बन्धेन सह षड्विधस्य सन्निकर्षस्य साक्षादभावेन सम्बन्धप्रत्यक्षानुभवानुपपत्तौ सम्बन्धिद्वारैव सम्बन्धः सन्निकर्षः प्रतिपाद्य इति सम्बन्धिप्रत्यक्षेणैव सम्बन्धप्रत्यक्षं जायते। तथा च सम्बन्धप्रत्यक्षं प्रति सम्बन्धिप्रत्यक्षं कारणमिति कार्यकारणभावः। नतु शाब्दबोधे। शाब्दबोधे पदार्थोपस्थितेः कारणता। सा च पदनिष्ठशक्तिग्रहेण यद्यस्ति , तदा तद्विषयकः शाब्दो भवत्येव। तथा च बहुव्रीहिस्थले मत्वर्थीयस्थले वा यद्यस्ति सम्बन्धोपस्थितिः , तदा तन्मात्रबोधो भवत्येवेति भावः। तदस्वीकारे दोषमाह - गो सम्बन्ध इति॥ सम्बन्धमात्रबोधस्तवमते नैव स्यात्।

ननु सम्बन्धप्रतीतौ सम्बन्धिभानानावश्यकत्वे गोमानित्यादौ सम्बन्ध्याक्षेपो न स्यादिति शङ्कते - तर्हि इति॥ शाब्दबोधे सम्बन्धमात्रभाने गोसम्बन्ध इत्यत्र यथा सम्बन्धिनो नाक्षेपः , तथैव गोमानित्यादौ मतुपा सम्बन्धोपस्थितावपि सम्बन्धिन आक्षेपो न स्यादित्यर्थः। खण्डनमाह- चेन्नेति॥ अस्येत्याद्यर्थे मतुप् विधीयते , सम्बन्धवाच्यत्वपक्षे मतुबादेः सम्बन्ध एव वाच्यः , सोऽपि असत्त्वभूत एव।

असत्त्वभूतत्वफलमाह- अत एवेति॥ दण्डीत्यत्र सम्बन्धानामनेकत्वम्। दण्डदण्डत्वादेः , दण्डस्य संयोगः दण्डत्वस्य च स्वाश्रयसंयोगः, इत्येवमादयः

सम्बन्धाः। सम्बन्धानेकत्वेऽपि दण्डीत्यत्र इनोऽसत्त्वभूतसम्बन्धार्थत्वे न बहुवचनमिति ग्रन्थाशयः।

ननु एकत्वविवक्षायां दण्डीत्येकवचनम् द्वित्वबहुत्वविवक्षायां दण्डिनौ दण्डिन इत्यादि प्रयोगानामनुपपत्तिरित्यत आह - दण्डी , दण्डि , दण्डिनी इति॥ संबन्धस्यासत्त्वेऽपि संबन्धेनाक्षिप्तसम्बन्धिगतद्वित्वादि समादाय द्विवचनादि-प्रयोगाः। तदाह - लिङ्गभेदश्चोपपद्यते। आक्षिप्तसंबन्धिस्वभावमाह - संबन्धिनां तथाविधत्व इति॥ तथात्वसत्त्वरूपतया लिङ्गसंख्यायोग्यत्वम् तादृशप्रयोगाणां द्विवचनादिघटितानां लिङ्गविशेषणानाञ्चेत्यर्थः। दर्शनमनुभवः। यद्यपि सम्बन्धस्योभय-निरूप्यत्वेन सम्बन्धिन आक्षेपः पूर्वमुक्तः , तथापि प्रकारान्तरेणापि तत्साधयति – एवञ्च सम्बन्ध इति॥ सम्बन्धस्यासत्त्वरूपतया तत्र लिङ्गसङ्ख्यान्वयस्यानौचित्येऽपि उक्तस्थलेषु प्रतीयमानलिङ्गसंख्यान्वयानुरोधेन संबन्धिन आक्षेपः। तस्य च सत्त्वरूपतया तत्र लिङ्गाद्यन्वयो जायते। दृष्टान्तमाह – आख्यातेति॥ संख्या आख्यातार्थः, तया च स्वान्वयाय यथा कर्तुराक्षेपः तथैव लिङ्गेन संख्यया च संबन्धिन आक्षेपः। तत्र तयोरन्वयः। सम्बन्धस्य द्वैविध्येनाक्षेपप्रकारमाह - यद्वेति ॥ भावनादिशब्दोपात्ता भावना न कर्तारमाक्षिपति , किन्तु यदा सा भावना आख्याते-नाभिधीयते तदा सा कर्तारमाक्षिपति यथा, तथा सम्बन्धादिपदेनोपस्थापितः सम्बन्धो न सम्बन्धिनमाक्षिपति , किन्तु मतुबादिनाभिहितः सम्बन्धः सम्बन्धिन-माक्षिपति , शब्दशक्तिस्वभावात्। एतत्सर्वं यद्वेत्यारभ्य मतुबुपात्तसंबन्धस्यापि तत्स्यादित्यन्तेन प्रतिपादितम्। इदानीं मतुपः सम्बन्धार्थकत्वं स्थिरयति - अत एवेति॥ विभक्तिवाच्यरूपेणेत्यादि कारिकया संबन्धस्य विभक्तिः अस्येत्यादि-विभक्तिः , तद्वाच्यत्वरूपेणावाच्यत्वं यदुक्तं तदपास्तम् , पूर्वरीत्या संबन्धस्य वाच्यत्वव्यवस्थापनात्। तदाह - तथानवगत्यसिद्धेः। वाच्यत्वसिद्धौ तदनव-गत्यसिद्धेः।

षष्ठ्यर्थस्यासत्त्वरूपत्वमुपस्थापयति – किञ्चेति॥ स्पष्टम्। हेतुमाह – प्रत्ययार्थलिङ्गसंख्यादेरिति॥ यदि षष्ठ्यर्थःसत्त्वभूतः स्यात्तदा राज्ञोः पुरुषः , राज्ञां पुरुष इत्यादौ प्रतीयमानद्वित्त्वादेस्तत्रैवान्वयः स्यात् , समानाभिधानश्रुतेः। किन्तु तथा न भवति। प्रकृत्यर्थे राजाद्यर्थे एव अन्वयः। तत्र नियममाह – प्रकृत्यर्थान्वितेति॥

फलितमाह -' एवञ्चेति। अत्र विभक्तिवाच्यरूपेणेति रिक्तं वचः इति सुपाठः। विभक्तिवाच्यरूपेण सम्बन्धोनावगम्यते इति यदुक्तं कारिकया तद्वचो रिक्तम् न युक्तम्। तस्मादिति॥ उक्तयुक्तेः। सम्बन्धो वाच्य एवेति भावः।

संबन्धेनैव संबन्धी प्रत्येतुं यदि शक्यते।

पुनस्तस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेत्॥ (त.वा.3-1-6-12)

इति तद्विपरीतरूपेण गाथा प्रमाणवाक्यम् , मयापि संबन्धवाच्यत्ववादिनापि। संबन्धेन अस्येत्यर्थीभूतसम्बन्धेन संबन्धी प्रत्येतुं आक्षेपादिना यदि शक्यते, तदा संबन्धे शक्तिरस्तु सम्बन्धिनस्तद्वारा लाभात् तत्र शक्तिं कः कल्पयेत् ? अनन्यलभ्यो हि शब्दार्थ इति न्यायात्।

3.13 भावप्रत्ययस्य समवेतगुणग्राहकत्वनियम इति मतस्य खण्डनम्

**29.** यत्तु[27] भावप्रत्ययस्य समवेत[१]गुणग्राहकत्वनियम इत्यादि[२] तन्न। घटादिपदेऽपि घटत्वस्यैवा[३]कृत्यधिकरण(**मी.1-3-9**)न्यायेन वाच्यत्वस्वीकारेण तदनुरोधेन भाव-प्रत्ययस्य प्रकृत्यर्थवाचकत्वस्वीकारस्यैव लाघवादुचितत्वात्। संबन्धस्य प्रकृत्यर्थता-नङ्गीकारे [४] त्वार्थत्वानापत्तेरपरिहारात्। प्रकृत्यर्थ [५] समवेतवाचकत्वस्वीकारेऽति-[६]गौरवापत्तेः[७]। उक्तन्यायेन घटत्वत्वस्यैव[८] घटपदोत्तरत्वार्थत्वापत्तेश्च[९]। [ननु][१०] प्रकृत्यर्थमात्र [११] वाचकत्वे वैयर्थ्यापत्तिः [१२], प्रकृत्यैवार्थोपस्थितिसिद्धेरिति [१] चेन्न, प्रकृत्या[२]भिधानेऽपि घटत्वादेराक्षिप्तद्रव्ये विशेषण[३]त्वेनैव तत उपस्थितिः[४], त्वेन[५]

---

[१] जै-सममेत

[२] अ1 इति

[३] भ1-घटपटत्वस्यैव

[४] अ3-प्रत्ययार्थतानङ्गीकारे, त1,द2 –प्रकृत्यर्थत्वानङ्गीकारे,त2-प्रकृत्यर्थस्यानङ्गीकार

[५] अ1-"वाचकत्व" इति अधिकं, त1-प्रत्यर्थ

[६] त1,के5,त5-स्वीकारे हि

[७] द3-अतिगौरवात्

[८] त1,त2,त5,ब3-घटत्वस्यैव,द7-घटपटत्वस्यैव

[९] त1,के5-घटपदोत्तरार्थतापत्तेश्च, अ1,द2,द3,द4,भ1,अ4-घटपदोत्तरत्वार्थतापत्तेश्च

[१०] द4,जै,1900-"ननु" इत्यस्ति। स्वीकृतमातृकायां नास्ति। अपेक्षितं चैतत्।

[११] जो2-"मात्र" नास्ति

[१२] अ1-त्ववैयर्थ्यापत्तेः

प्राधान्येन बोधार्थं[६] पुनरुच्यत इत्युपपत्तेः। "प्रकृतिप्रत्ययौ[७] सहार्थमि"ति न्यायेन त्वार्थत्वे[८] विशेष्यत्वस्य[९] न्यायसिद्धत्वात्। किं चैवं घटादिपदे[१०] द्रव्यत्वादेर्दण्डीत्यादौ पुरुषगतरूपादेश्च तदुत्तरत्वाद्यर्थतापत्तिः[११]। द्रव्यत्वादिकं[१२] घटपदजन्यप्रतीतौ न[१३] प्रकार इति चेदाक्षेपपक्षे संसर्गोऽपि न प्रकार इति[१४] तुल्यम्। वक्ष्यते चैतदुपरिष्टात्। चित्राणां गवामयमिति विग्रह इत्यादिकं[१५] च स्फुटतरं समासशक्तौ निराकरिष्यते।

तस्मादुक्त[१६] युक्तिभिः संसर्ग एव वाच्यो मतुबादेः स्यादिति तदर्थे[१७] विहितबहुव्रीहेरपि[१८] तन्मात्रवाचकत्वे अरुणाधिकरणं (मी.3-1-6) दत्तजलाञ्जलि[१९]

---

[१] अ1-प्रकृत्यैवार्थोपस्थितिरिति, त1-प्रकृतित एवार्थोपस्थितेरिति, जै- प्रकृत्यैवार्थोपस्थितिसिद्धिरिति,के5-प्रकृत्यैवार्थोपस्थितेनेति

[२] के4-प्रकृत्य-

[३] त5- आक्षिप्तद्रव्यविशेषण---

[४] अ1-उपस्थितेः

[५] अ3-सत्त्वेन, वा2,भ1-तत उपस्थितित्वेन, त1,ब2-तदुपस्थितिः तेन, के5-तदुपस्थितिः।त्वेन, ब1,1900,त2,भ2,1915-तत उपस्थितत्वेन, जै-तदुपस्थितिः।त्वेन, के4-तत्तदुपस्थितिः। त्वेन,द2-तत उपस्थितेः,त5,अ4-तदुपस्थितत्वेन

[६] ब2-बोधार्थः

[७] अ4- "न" इत्यधिकम्

[८] के5-त्वार्थत्वेऽपि

[९] 1900-विशेष्यत्वस्या

[१०] त2-घटादिपदैः

[११] अ1-तदुत्तरत्वाद्यर्थतापत्तेः

[१२] त1,त5- "तु" इत्यधिकं

[१३] अ4-घटपदजन्यबोधेन

[१४] भ1-"इति"नास्ति

[१५] त1,त5-विग्रहादिकं च

[१६] जो2- "युक्त" इत्यधिकं, के5-तस्मादुक्तयुक्तिसंसर्ग

[१७] वा2,त1,जो2,1900,1915-तदर्थ

[१८] जै-बहुव्रीहिरपि

[१९] अ1-दत्तजलाञ्जलिः, के5,म-दत्तजलाञ्जलिकः

स्यात्, पूर्वपक्षस्यैवा[1]संभवादिति समासशक्तौ [2]वक्ष्यामः। प्रस्थितं च गुणाधिकरणेन (मी.2-2-9)। तद्धितस्य द्रव्यानभिधायकत्वे[3] वाजिनामिक्षयो[4] र्वाक्यविनियोज्यत्व[5]-साम्यात्। न[6] च तद्धितार्थसंबन्धाक्षिप्तद्रव्यविधिरेव श्रौतः, वाजिनं च[7] न[8] तथेति वाच्यम्।

एवं ह्याख्याते कर्तुराक्षेपावश्यकत्वेन[9] "नानृतमि"(मी.3-4-4)ति[10] निषेधस्यापि श्रुत्या पुरुषार्थत्व[11]संभवेन कर्तुरवाच्यत्वसाधनायास[12]वैयर्थ्यापत्तेः[13], सिद्धान्त-सिद्ध्यसंभवेन "कर्त्रधिकरणो"(मी.3-4-4)च्छेदप्रसङ्गाच्च।

---

भावप्रत्ययस्त्वादिः तदर्थः समवेतो गुणः जातिगुणादिरूपः इति यदुक्तम् पूर्वकारिकयोः तन्नोचितमित्याह - यत्तु इत्यादिना॥ आकृत्यधिकरणन्यायः लाघवाज्जातिवाच्यत्वप्रतिपादकन्यायः। तेन घटादिपदानां घटत्वादौ शक्तिः। यदा घटत्वमेव घटादिपदानां वाच्यम् , तदा समवेतवाचकत्वे प्रकृत्यर्थसमवेतवाचकत्वे स्वीकार्ये घटपदात्त्वप्रत्ययस्य न घटत्वमर्थः स्यात्स्याच्च घटत्वत्वमेव। तस्माद् भावप्रत्ययस्य प्रकृत्यर्थवाचकत्वमेव न्याय्यम्। अयमेवानुरोधः। समवेतगुण-वाचकत्वापेक्षया प्रकृत्यर्थवाचकत्वे लाघवमेव। समवेतगुणवाचकत्वज्ञाने प्रकृत्यर्थस्य समवायस्य गुणस्य च भानात्। यतो लाघवम् अत एव उचितत्वम्।

---

[1] के5- "एव" नास्ति

[2] अ1-"निराकरिष्यते" इत्यधिकं

[3] जो2,जै-द्रव्यानभिधायत्वे, त1-द्रव्यानभिधायकत्वेन

[4] त्रि-वाजिनेमिक्षयोः

[5] जै-विनियुज्यत्व

[6] द7-"न" नास्ति

[7] भार1- "च " नास्ति

[8] जै,के5,भ1- "न" नास्ति। प्रायः अन्यत्र सर्वत्रास्ति। जै-पाठ एव युक्त इति संभाव्यते।

[9] त2-कर्तुराक्षेपावश्यकत्वे

[10] त1,त5-नानृतं वदेदिति

[11] ब1- "एवं हि "इत्यारभ्य "पुरुषार्थत्व "पर्यन्तं नास्ति, जो2- "त्व "मात्रं नास्ति

[12] अ3-साधनप्रयास

[13] द1-वैयर्थ्यापत्तिः

इदानीं मतुबर्थविचारायोच्यते – संबन्धस्येति॥ गोमानित्यादौ सबन्धार्थत्वाभावे गोमत्त्वमित्यत्र संबन्धस्य त्वार्थत्वानुपपत्तिः। समवेतगुणवाचकत्वेऽप्ययमपि दोषो वाच्यः। घटत्वत्वस्यैवेति पाठो युक्तः। उक्तन्यायेन समवेतवाचकत्वन्यायेन।

ननु लाघवात्त्वप्रत्ययस्य प्रकृत्यर्थवाचकत्वे प्रकृत्यर्थस्य प्रकृत्यैव लाभेन भावप्रत्ययस्य नैरर्थक्यापत्तिरितिमत्त्वाह – प्रकृत्यर्थमात्रेति॥ मात्रपदं साकल्ये। सर्वस्य प्रकृत्यर्थस्य त्वार्थत्वे नैरर्थक्यमिति भावः। सिद्धान्ते तु विशेषणीभूतस्य प्राधान्येन भावप्रत्ययार्थत्वे नोक्तदोषः। खण्डयति – चेन्नेति॥ प्रकृत्या घटत्वादि उपस्थाप्यते , तेन च व्यक्तेराक्षेपः। तत्रैव घटत्वादि विशेषणतया भासते। भावप्रत्ययेन प्राधान्येनोपस्थितिरित्याह – प्रकृत्याभिधानेऽपीत्यादिना॥ भावप्रत्ययस्य प्रकृत्यर्थापेक्षया घटत्वादेः प्राधान्येनाभिधाने न्यायमाह - प्रकृतिप्रत्ययाविति। विशेष्यतासंबन्धेन प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावः। भावप्रत्ययस्य समवेतगुणवाचकत्वे पुनरपि दोषमाह – किञ्चेत्यादिना॥ अयमाशयः- यथा घटादौ घटत्वादिसमवेतम् , तथैव द्रव्यत्वादिकमपि, घटादेर्द्रव्यत्वात्। दण्डीत्यादौ यथा दण्डादिः तथैव संबन्धिगतं रूपादि अपि समवेतम्। तथा च घटादिपदोत्तरभावप्रत्ययार्थतया द्रव्यत्वादेः प्रतीतिः स्यादित्याक्षेपः। यदि आपादितदोषवारणाय प्रकारतया भासमानस्यैव भावप्रत्ययार्थत्वम् , द्रव्यत्वादेः घटादौ वर्तमानत्वेऽपि न प्रकारतया भानमित्युच्यते , तथा संबन्धस्यापि प्रकारत्वाभावेन त्वार्थत्वानुपपत्तिः। वक्ष्यते इति॥ भावप्रत्ययार्थनिर्णये अत्र गुणस्य प्रकारत्वम् न संबन्धस्येति वक्ष्यते।

ननु चित्राणां गवामयमिति विग्रहे संबन्धिन एव विशेष्यतया प्रतीतिः इति वृत्तौ अपि तस्यैवप्राधान्येन प्रतीतिरस्त्वित्यत आह – चित्राणामिति॥ षष्ठ्याद्यर्थे एवानुशासनलाभात्। तादृशप्रतीतेर्बाधितत्वात्। उपसंहरति – तस्मादिति॥ तस्मादित्यस्यैव व्याख्यानम् उक्तयुक्तिभिरिति॥ दत्तजलाञ्जलीति॥ तत्रापि सम्बन्धवाचकत्वापत्तौ सम्बन्धिवाचकत्वप्रतिपादकाधिकरणोच्छेदापत्तिः। संबन्धिवाचकत्वस्वीकारे फलमाह - प्रस्थितं च गुणाधिकरणेनेत्यादि॥ वाजिनामिक्षयोरत्रवैषम्यमुपपादयति - न चेत्यादिना। सम्बन्धवाचकत्वे सम्बन्धिन आक्षेपाल्लाभे , वैश्वदेवीत्यादौ अपि द्रव्यवाचकत्वाभावेऽपि संबन्धशक्त्या आक्षेपलब्धस्य आमिक्षा-

द्रव्यस्य श्रौतत्वम् वाजिनस्य च समाख्यालभ्यत्वेन न तथात्वमिति शङ्का। समाधानमाह - एवं हीति॥ आख्यातवाच्या भावनेति तन्मतम्। तेन कर्तुराक्षेपे नानृतमिति निषेधस्यापि पुरुषार्थत्वापत्तिः। तथा च क्रत्वर्थत्वोपपादनाय भावना-वाचकत्वाय कर्तुराख्यातवाच्यत्वाभावाय कर्त्रधिकरणे कृतःप्रयासो वैफल्यमेव प्राप्नुयात्। वस्तुतस्तु तत्र क्रतुविशिष्टपुरुषसंस्कारस्यैव प्रतिपादनेन न दोष इति वैयाकरणमतम्।

3.14 प्राधान्येन प्रतीयमानत्वं शब्दवाच्यत्वे बीजम् इति मतस्य खण्डनम्

**30.** यत्तु प्राधान्येन प्रतीयमानत्वमेव शब्दवाच्यत्वे बीजम्। तच्चाख्यातेषु भावनाया[28] यौगिकेषु द्रव्याणामेवास्ति[29],न तु कर्तृसंबन्धादेः। घटारुणादिपदेषु च[१] जातिगुणयोरपि तदस्त्येव। "सत्त्वप्रधानानि नामानि" इति निरुक्तस्मृते[२]"ररुणा-धिकरण" **(मी.3-1-6)** एव तृतीयार्थसंख्यादेर्गुणेऽन्वयप्रतिपादनेन तुल्यतया जाति-गुणयोः संख्यान्वयित्वरूपसत्त्वभूतत्वात्[३] प्राधान्यसिद्धेः। तृतीयान्तपदेषु[४] जातावेव[५] लिङ्गसंख्यान्वयाभ्युपगमात्। तथा च तादृशेष्वेव प्राधान्यसाम्ये[६] आकृत्यधिकरणं **(मी.1-3-9)** शक्य[७]विशेषनियामकमावश्यकमेवेति[८] न तद्धानिरपीति[९]। तत् तुच्छम्, तृतीयान्ते यौगिकार्थसंबन्धस्यापि सत्त्वभूतताया[१०] गुणतुल्यतया[११] दुर्वारत्वात्, प्राधान्याद् "आकृत्यधिकरण" **(मी.1-3-9)** न्यायेन[१२] वाच्यतापत्ते[१]रिति[२]।

---

[१]जो2,अ4- "च " नास्ति

[२] अ1-निरुक्ते

[३] अ4-संख्यान्वयित्वरूपसत्त्वभूतत्वसत्त्वात्

[४] अ1-तृतीयादिपदेषु, के4-पदे

[५] अ4-जात्यावेव

[६] ज1- तादृशे च प्राधान्यसाम्ये

[७] जै-वाक्य

[८] त1-नियामकमेवेति

[९] भ1-तद्धानिरूपाति

[१०] अ3-सत्त्वभूतसंबन्धतायाः

[११] त2-गुणतुल्यताया

[१२] वा2-प्राधान्यायेन

तस्माद् वैश्वदेव्यामिक्षा, पिङ्गाक्षी गौः, दण्डी देवदत्तः,पाचको देवदत्त[३] इति सामानाधिकरण्यस्य विनैवानुपपत्तिप्रतिसंधानं शब्दादेव प्रतीतेस्तदनुसारेण[४] द्रव्यवाचित्वमास्थेयम्। तच्च सममाख्याते[५]ऽपीति कर्तृकर्मवाचकत्व[६] मवर्जनीय-मेवे[७]ति। अत एव चित्रा गावो यस्येति संबन्धप्राधान्यदर्शनेऽपि चित्रगुर्देवदत्त इति समासे[८] सामानाधिकरण्यानुरोधाद्[९] द्रव्यवाचित्वं विग्रहसमासयोरेतदंशे[१०] वैलक्षण्यं[११] चाश्रीयत इति वक्ष्यते[30]।

## 3.15 पदानां द्रव्यवाचित्वे आकृत्यधिकरणविरोधपरिहारः

अथैवं नीलो घट इति सामानाधिकरण्यात्[१२] घटादिपदानामपि द्रव्यवाचकत्वे "आकृत्यधिकरण"(मी.1-3-9)विरोधः। मैवम्। घटादिपदे[१३] हि[१४] घटत्वस्य वृत्त्य-विषयत्वे[१५] शाब्दे[१६] भानायोगाद् घटत्वांशे वृत्तिकल्पनावश्यकत्वे[१७] "नागृहीत-विशेषण[१८]"न्यायेन जातिमात्रवाचित्व[१९]सिद्धौ द्रव्य[२०]माक्षिप्यत इति युक्तम्[१]।

[१] के4-वाच्यतापत्ति

[२] द4- "यौगिकार्थ" इत्यत्र कार्थ इत्यारभ्य "वाच्यतापत्तेरिति" पर्यन्तं नास्ति

[३] त1,1900,त5- "पाचको देवदत्तः" नास्ति

[४] जै-प्रतीयते। तदनुसारेण

[५] जै-समाख्याते

[६] त3,के4,त5-वाचित्व

[७] के5,म- "एव"नास्ति,भ1-कर्तृकर्मवाचकत्वमर्जनीयमेवे

[८] के5,म- "समासे"नास्ति

[९] जै-समानाधिकरण्यानुरोधाद्, त3-सामानाधिकरण्यानुरोधि

[१०] के4-एतदेशे

[११] भ1-वलक्षणां

[१२] वा2,त1,के4,त3,ब1,1900,1915-सामानाधिकरण्यानुरोधात्

[१३] अ1-घटपदे

[१४] अ4-नील

[१५] अ1-हि-अधिकं

[१६] बार-"तु" इत्यधिकं

[१७] के5,म-नावश्यकत्वेन

[१८] भार1,त1,त3,द4-विशेषणा, के5-नानुगृहीत

[१९] भ1-वाचकत्व, अ4-वाच्यत्व

[२०] त1,त5-"मात्र" इत्यधिकं

प्रकृते च प्रकृत्यर्थतावच्छेदकस्यैव प्रकृतिशक्त्यो[२]पस्थितत्वात्[३] तदुपलक्षणी[४]कृत्य शक्तौ दोषाभावाद् द्रव्यवाचित्वमास्थीयते। उक्तं च[31]-

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।

शब्दः सुकरसंबन्धो न च[५] व्यभिचरिष्यति॥ (त.वा.**3-1-6-12**) इति[६]।

यदि[७] च घटादिपदेऽपि[८] उपलक्षणत्व[९]मभ्युपेयते, तदा केवलव्यक्तिवाच्यत्वमपि[१०] सुसङ्गममेवेति[११] वक्ष्यते[32]। एवं च केवलव्यक्तिवाच्यत्व[१२]पक्षं[१३] वा[१४] आश्रित्य सामानाधिकरण्यं नानुपपन्नमिति[१५][33] सिद्धान्तरीत्यापि द्रष्टव्यम्[१६]। वस्तुतो गोमानित्यत्र गोसंबन्धीति बोधात् संबन्धी[१७] वाच्यः। वाच्यतावच्छेदकः संसर्गः[१८] संबन्धत्वं [१९] परम्परयोपलक्षणम्, तदादौ बुद्धिविशेषवत्[२०]। न च तच्छाब्दे[२१]

---

[१] के4-इत्युक्तम्

[२] जै-प्रकृतिसत्यो

[३] अ1-प्रकृतिशक्त्योपस्थापितत्वात्

[४] के4-उपलक्षणं

[५] अ1-न वा, भ1-"च"नास्ति

[६] ज2- "इति" नास्ति

[७] भार1-यदा

[८] जै-घटादिपदेष्वपि

[९] के4- "त्व"नास्ति,के5-मुपलक्षणत्वमुपेयते

[१०] अ1,त2-वाचकत्वमपि, अ3-केवलव्यक्त्यवाचित्वमपि, त1,त5-वाचित्वमपि

[११]अ1,त1,के4,त5,1915-सुगममेवेति, त3,के5,द4,1900,त2,द5,द3,ज1,ब3,म-सुसङ्गतमेवेति, जो2-सुसङ्गतमिति

[१२] अ4-"वाच्यत्व"नास्ति

[१३] अ4-वाचकत्वपक्षं

[१४] 1900,के4,1915-"वा" नास्ति, द5,ब3,ज1-च

[१५] अ1-नानुपपन्नमेवेति

[१६] के5,म- "इति"इति अधिकं

[१७] त1,त3,के4-गोसम्वन्धी

[१८] त3-"संसर्गः" नास्ति, के4,भ1-सम्बन्धः

[१९] द4- "परं " अधिकम्

[२०] अ4-विशेषात्

[२१] त2-तच्छब्दे, अ4-तच्छाब्दबोधे

[२२] के4-तच्छब्दविषयः,के5-तच्छाब्दबोधविषयो

विषयो[१], येन घटत्वप्रतिबन्दी[२] स्यात्, संबन्धप्रकारकबोधस्यैवानुभवसिद्धत्वात्। अत एव दण्डित्वमित्यादौ त्व[३]प्रत्ययस्य संबन्ध[४]बोधकत्वं संगच्छत इति[५]।

---

संबन्धस्य शब्दवाच्यत्वमाक्षिपति - यत्तु प्राधान्येनेति॥ यो हि प्राधान्येन प्रतीयते स शब्दवाच्यः इति वादिन आशयः। भावप्रधानमाख्यातमिति निरुक्तात् भावनाया एव प्राधान्यप्रतीत्या सा भावना वाच्या। यौगिकेषु पिङ्गाक्षी इत्यादिषु द्रव्यस्यप्राधान्याद् द्रव्यमेव वाच्यम्। विशेष्यतया वाच्यम्। न कर्तृसम्बन्धादेरिति॥ पाचक इत्यादि यौगिकेषु कर्तुः सम्बन्ध इति विग्रहः। तथा च पाचक इत्यादौ पाककर्त्रोर्यः सम्बन्धस्तत्र न शक्तिरेवमेव गोमानित्यादौ अपि। द्रव्यस्यैव तत्र विशेष्यतया प्रतीतेः निरुक्तेन बोधितत्त्वात्।

ननु आकृत्यधिकरणन्यायेन घटादिपदानां जातिगुणादिवाचकत्वेन कथमुक्तनियमोपपत्तिस्तेषां प्राधान्येनैव प्रतीतेरित्याह - घटारुणादिपदानामिति॥ तत् प्राधान्यम्, जात्यादीनामेवेति शेषः।

तदेवोपपादयति - सत्त्वप्रधानानि इति॥ अनया स्मृत्या तृतीयान्त-मरुणयेत्यादि। तृतीयार्थः संख्यादिः, तस्य स्वार्थे गुणेऽन्वयप्रतिपादनेन जातिगुणयोः संख्यान्वयः। तथा च जात्यादेरपि संख्यान्वयित्वरूपसत्त्वत्वम्। तृतीयान्तपदेषु प्रयुक्तेषु तदुपस्थापितायाम् जातौ एव। लिङ्गसंख्यान्वयाभ्युपगमात् लिङ्ग-संख्यान्वयस्वीकारात्। एतत्पूर्वान्वयि। प्राधान्यसिद्धौ जातावेव तदन्वयः संख्या-न्वयाभ्युपगमादिति युक्तः पाठः। तथा च जात्यादौ संख्याद्यन्वयेन तेषां सत्त्व-रूपेण प्रधानत्वमादाय शब्दवाच्यत्वोपपत्तिः। तदाह - तादृशेषु इति॥ अतः अरुणाधिकरणस्य शक्यनिर्धारणपरत्वं सिद्धम्। उक्तरीत्या जात्यादीनामपि

---

[१] के4-तच्छब्दविषयः,के5-तच्छाब्दबोधविषयो

[२] त3-प्रतिबन्धं

[३] के5- "त्व"नास्ति

[४] अ1,के4,द3-संसर्ग

[५] अ3,भ1,द7-इति दिक्

तत् तुच्छमिति॥ तत् यदुक्तम् तुच्छम् , वक्ष्यमाणहेतोः। यया युक्त्या जात्यादेः सत्त्वरूपप्राधान्ये वाच्यत्वमास्थितम् तयैव युक्त्या संबन्धस्यापि सत्त्वरूपत्वापत्तौ वाच्यत्वापत्तिः। तदेतदाह - तृतीयान्ते यौगिकार्थेति॥ तृतीयान्तम् अरुणया पिङ्गाक्ष्या इत्यादि। तत्र यौगिकस्य शब्दस्य प्रतिपाद्यः यः संबन्धः तस्य उक्तरीत्या सत्त्वभूततायाः द्रव्यरूपतायाः, दुर्वारत्वात् अवश्यं प्राप्तत्वात् , प्राधान्यादाकृत्यधिकरणन्यायेन प्रसिद्धेन संबन्धिवाचकत्वं न्यक्कृत्य संबन्धस्य वाच्यतापत्तिः, यस्य त्वया खण्डनं कृतं तदापत्तिरिति भावः। तस्मादिति॥ संबन्धवाचकत्वापत्तेः वैश्वदेव्यामिक्षा, पिङ्गाक्षी गौः, दण्डी देवदत्तः, पाचको देवदत्तः इत्यादौ आमिक्षया द्रव्यरूपया वैश्वदेव्याः, गवा पिङ्गाक्ष्याः, देवदत्तेन दण्डिनः, देवदत्तेन पाचकस्य द्रव्यस्य सामानाधिकरण्यस्य अभेदस्य समानविभक्तिकत्वस्य वा दर्शनेन वैश्वदेव्यादियौगिकशब्दानां द्रव्यवाचकत्वमेव स्वीकार्यम्। ननु तत्र सर्वत्र द्रव्ये लक्षणैव स्यादित्यत आह – अनुपपत्तिप्रतिसंधानं विनैव शब्दादेव प्रतीतेः॥ अन्वयानुपपत्तिर्लक्षणाबीजम्, तदभावात् लक्षणां विनैव शब्दादेव शक्त्यैवेत्यर्थः। फलितमाह – तदनुसारेणेति॥ लक्षणाबीजाभावेन, सामानाधिकरण्यानुरोधेन वेत्यर्थः। द्रव्यवाचित्वमास्थेयम् नतु संबन्धार्थकत्वम्। उक्तं सर्वमाख्यातेऽपि योजयति - तच्च सममाख्यातेऽपीति॥ यथा उक्तस्थलेषु द्रव्यवाचकत्वं तथा आख्यातेऽपि तिङादावपीति आश्रयवाचकत्वम्। तदाह – कर्तृकर्मवाचकत्वमवर्जनीयमेवेति॥ देवदत्तः पाचक इत्यत्रेव देवदत्तः पचतीत्यत्रापि सामानाधिकरण्यादिसत्त्वात्।

बहुव्रीहावपि तथात्वं योजयति - अत एवेति॥ सम्बन्धप्राधान्यदर्शनेऽपि विग्रहे यस्येत्युक्त्या षष्ठ्यर्थसम्बन्धप्राधान्यदर्शनेऽपि।चित्रगुर्देवदत्तः इति समासे । सामानाधिकरण्यानुरोधात् - देवदत्तेनाभेदानुरोधात् द्रव्यवाचित्वम्। ननु विग्रहसमासयोरेवं सति वैषम्यं स्यादत आह – विग्रहेति॥

ननु सर्वत्र द्रव्यवाचित्वे आकृत्यधिकरणन्यायोऽनुपपन्न इत्यत आह - अथैवं नीलो घट इति सामानाधिकरण्यादिति॥ आकृत्यधिकरणन्यायतात्पर्यमाह - घटादिपदे इति॥ घटादिपदानां घटत्वादौ शक्त्यभावे शाब्दबोधे भानानुपपत्तिः स्यादतः घटत्वादौ वृत्तिः कल्प्यैव। वृत्तिकल्पनावश्यकत्वेनेति पाठ उचितः। तथा

च नागृहीतविशेषणा बुद्धिर्विशेष्यमधिगच्छतीति न्यायेन जातिशक्तौ अपि द्रव्यं विशेष्यमाक्षिप्यते। इति युक्तम् तन्न्यायतात्पर्यम्। अन्यथा विशेष्यविशेषणसापेक्षः स न्यायो हीयेत। प्रकृते नीलो घट इत्यादौ प्रकृत्यर्थतावच्छेदकस्य घटत्वादेः एव प्रकृतिशक्त्या घटेत्यादिरूपया उपस्थितिरिति तत्तात्पर्यम्। उपस्थितं घटत्वादि उपलक्षणीकृत्य घटादिपदानां द्रव्यवाचित्वे न दोषः। तदाह – शक्तौ दोषाभावात् शक्त्यानन्त्यादिदोषाभावात्। अयं चाकृत्यधिकरणन्यायः लाघवमूलक एव। प्रकृत्यर्थतावच्छेदकमुपलक्षणत्वेनस्वीकृत्य द्रव्यवाचित्वे तन्न्यायसाफल्यमिति भावः।

उक्तञ्च -

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसंबन्धः न च व्यभिचरिष्यति॥ इति। (त.वा.3-1-6-12)

एकं जात्यादिरूपम्। तदुपलक्षणत्वेन फलमाह न चेति॥ घटत्वादेरुपलक्षणत्वस्वीकारे व्यक्तिमात्रवाचकत्वेऽपि दोषाभाव इत्याह- यदि चेत्यादिना॥ केवलव्यक्तिपक्षे सामानाधिकरण्यं सुतरां सिद्धमित्याह – एवञ्चेत्यादिना॥ मतुप् स्थलेऽपि द्रव्यवाचकत्वमेव निमित्तमाह - गोसम्बन्धीति बोधात्। सम्बन्धिवाचकत्वे शक्यतावच्छेदकमाह - संसर्गः इति॥ ननु संबन्धो नाना, तथा च न लाघवमित्यत आह – सम्बन्धत्वमिति॥ परम्परया - अवच्छेदकतावच्छेदकतया। तदादौ नानावच्छेदकेऽपि। इष्टे साधनबुद्धेरेव परम्परया अवच्छेदकत्वेन नानार्थतापहारो यद्वत्। ननु घटादिस्थले अवच्छेदकस्य घटत्वादेः शाब्दे भानवत् सम्बन्धत्वस्यापि भानापत्तिरत आह- न चेति॥ तदभाने अनुभव एव प्रमाणमित्यत आह – सम्बन्धप्रकारकेति॥ स्पष्टम्।

**31.** न च कर्तृकर्मादि[१]वाचकशब्दानां शक्तिवाचकत्वाद् देवदत्तादिपदैः[२] सामानाधिकरण्यासंभव [३] एवेत्यसिद्धो हेतुरिति वाच्यम्, शक्तिमत्कारकमिति

---

[१] ज1-कर्तृकर्मादौ

[२] जो2-देवतादिपदैः

[३] के4-सामानाधिकरण्यासम्भवात्

पक्षाश्रयणेन शक्तिमतामेव कर्त्रादिपदवाच्यत्वात्। अत एव "देवदत्तः कर्ता कारकः[1] कर्म" इति सामानाधिकरण्यं संगच्छते। उक्तं च[2][34] "साक्षात् सूत्रकृतैव युष्मद-स्मदादि[3]शब्दसामानाधिकरण्यमुट्टङ्कितं सूत्रादिषु"। तथोक्तं च[4] भाष्ये[35]-

"सुपां कर्मादयोऽप्यर्थाः[5] संख्या चैव तथा[6] तिङाम्।"[36] इति।

अत एव "आश्रये त्वि"(वै.सि.का.2)ति मूलमपि न "लः कर्मणि"(पा.3-4-69)इति सूत्रविरुद्धम्। अन्यथा "कर्तरि कृत्"(पा. 3-4-67) इत्यनुशासनाच्छानजादेः शक्तिमात्रवाचकत्वे सामानाधिकरण्यापलापापत्तेश्च[7]।

"नित्याः षड् व्यक्तयोऽन्येषाम्"(वा.तृ.सा.35)

इति वाक्यपदीयेऽन्यमतत्वेनैव[8] शक्तिपक्षोत्थापनात्[9], तत्पक्षस्य[10] सिद्धान्तासम्मतत्वाच्च[11]। "धातुनोक्तक्रिये नित्यम्"[12] इत्यादिवक्ष्यमाण[13]वाक्यपदीयादिभि[14] र्भावनाश्रय [त्व]स्य[15] कर्तृत्वेन, फलाश्रय[त्व]स्य[16] कर्मत्वेन[17] प्रतीतेः[18] स्वातन्त्र्येण शक्तिप्रत्ययस्यैवासिद्धेश्च।

---

[1] जो2,त3-कारकं

[2] द4- "च " नास्ति

[3] जो2-युष्मदादि

[4] त1,त3,त5,जो2-तथा चोक्तं

[5] ज1-कर्मादयोप्यर्थो

[6] त3,त2-"तथा" नास्ति

[7] के5- सामानाधिकरण्योपलापापत्तेः

[8] त1- न्यतमत्वेनैव,भ2,द5-वाक्यपदीयेत्वन्यमतत्वेनैव

[9] के4-शक्तिपक्षोपादानात्,म-शक्तिपक्षोद्भावनात्, अ4-शक्तिपक्षोत्भावनात्

[10] त1-"स्य" नास्ति

[11] भ1-सिद्धान्तसमानत्वाच्च

[12] त1,त3-नित्य

[13] के5- "वक्ष्यमाण"नास्ति

[14] भार1-इति वाक्यपदीयादिभि

[15] अ3,वा2,भार1,द1,द2,द4,ब1,1900,भ1,भ2,1915-भावनाश्रयत्वस्य, के5- भावनाश्रयस्य च

[16] अ1,वा2,भार1,द1,द2,द4,ब1,1900,के4,भ1,भ2,1915-फलाश्रयत्वस्य, के5,म- तत्फलाश्रयस्य, अ3- "कर्तृत्वेन फलाश्रयस्य " नास्ति

[17] अ4-"कर्तृत्वेन...कर्मत्वेन"इत्यस्य स्थाने"कर्तृत्वे तथैव तत्" इत्यस्ति

[18] जो2- "प्रतीतेः " नास्ति

तद्वृत्तौ कोमुदीकारेणोक्तम् तिङ्वाच्यकारकवाचिनि युष्मदीत्यादि। शक्तिमद्वाचकत्वं कर्तृकर्मप्रत्ययानाम्। अत्र भाष्यमपि मानमित्यत आह - तथोक्तञ्च भाष्ये सुपां कर्मादयोऽप्यर्थाः इति॥ सुपां सुब्विभक्तीनां कर्मादयः, अर्थाः वाच्याः, कर्मादय इत्यत्र करणादि गृह्यते। सुबित्युपलक्षणम् आख्यातादेरपि। तिङां संख्यापि वाच्येति कारिकार्थः।

आख्यातस्य कर्तृवाचकत्वे सूत्रमपि प्रमाणमित्याह - अत एव इति॥ अत एव आख्यातस्य शक्तिमद्वाचकत्वादेव। आश्रये तु तिङः स्मृता इति मूलग्रन्थोऽपि "लः कर्मणी"(पा.3-4-69)ति सूत्रेण न विरुद्धः। उभयोरेकवाक्यत्वात्। अन्यथेति॥ कर्त्रादि पदानां शक्तिमात्र(कर्तृत्वादि)परत्वे "कर्तरि कृदि"(पा.3-4-67) त्यत्र कर्तृपदस्य धर्म(कर्तृत्व)मात्र परत्वेन शानचोऽपि कर्तृत्वरूपशक्तिवाचकत्वं स्यात् , तथा सति देवदत्तः पचमान इत्यादौ अनुभूयमानसामानाधिकरण्यानुपपत्तिरेव स्यात्। न च "कर्तरि कृदि" (पा.3-4-67)त्यनेन आश्रयार्थकत्वसिद्धौ कथं सामानाधिकरण्यासिद्धिः, भावप्रधानिर्देशस्वीकारेण तथोक्तेः। शक्तिः कारकम् इति पक्षस्य भिन्नमतत्वे वाक्यपदीयकारस्य सम्मतिमाह - नित्याः षड्शक्तयोऽन्येषामिति॥ शक्तयः इति मूलपाठः।

नित्याः षट् शक्तयोऽन्येषां भेदाभेदसमन्विताः।
क्रिया संसिद्धयेऽर्थेषु जातिवत्समवस्थिताः॥ इति।(वा.तृ.सा.35)

अन्येषां वादिनां मतेऽर्थेषु कर्तृत्वादिरूपाः कारकशक्तयो नित्याः षट् चेति।

कर्ता कर्म करणञ्च सम्प्रदानं तथैव च।
अपादानाधिकरण इत्याहुः कारकाणि षट्॥इति।

ताश्च पृथक्भूता अपि स्वाश्रयार्थेन भेदाभेदसमन्विताः। यदि ताः स्वाश्रयेण भिन्नास्तदा आश्रयः शक्तिरहितः स्यात्। अभिन्नाश्चेत् अर्थभेदादयो न स्युः। तस्मात् कथञ्चिद् भेदेन व्यवहारार्थं कल्पितेन भेदेन पारमार्थिकेनाभेदेन च संबन्धिताः।

अत्रैव दार्ढ्यायाह - धातुनोक्तक्रिये नित्यमिति॥ यदा यदीयः व्यापारो धातुनोच्यते तदा सः कर्तेति भावः। अनेन व्यापाराश्रयस्य कर्त्तुरेव प्रत्ययार्थत्वमायाति न तु व्यापारमात्रस्य। तथैव फलाश्रयस्यैव कर्मत्वप्रतीतिः। तेन प्रत्ययानां शक्तिवाचकपक्षस्यास्थिततत्वम् सिद्ध्यति। स्वातन्त्र्येणेति॥ शक्तिमत्पक्षेऽपि

ब्राह्मण" इत्युत्तरं च संगच्छते। तथा च[1] प्रतीतेः, पाकानुकूलकृतिमान्, पचतीति[2] पाचक इति विवरणाच्च शक्तिपरिच्छेदात्[3] कर्तृकर्मणी वाच्ये एव। अन्यथा भावनापि वाच्या न स्यात्।

---

नीलो घट इत्यादौ सामानाधिकरण्यानुरोधात् नीलादिपदानां द्रव्य(व्यक्ति)वाचकत्वं यथा तथैव देवदत्तः पचतीत्यादौ आख्यातार्थकर्तरि देवदत्तादेरभेदान्वयानुरोधेन, आख्यातस्य कर्तरि कर्मणि वा शक्तिरिति मन्यमानं प्रति हेतोरसिद्धिं ब्रूते - न च कर्तृकर्मादि वाचकेत्यादि॥ "लः कर्मणी"(पा.3-4-69) ति सूत्रेण तिङ् कर्तरि कर्मणि वा विधीयते, अतस्ते तिङादयः कर्तृकर्मान्यतर-वाचकाः। तेषां शब्दानां शक्तिः कारकमिति पक्षमादाय कर्तृत्वादिरूपशक्तिपरत्वे देवदत्तादिभिः सामानाधिकरण्यं न स्यात् ।तथा च सामानाधिकरण्यानुरोधरूपो हेतुरसिद्धः यद्बलेन तिङादेशानामाश्रयवाचकत्वं मन्यते। तदाह - हेतुरसिद्ध इति॥ शक्तिमदिति॥ उक्तहेतुहेतुमद्भावस्य शक्तिमत्कारकमिति पक्षाभिप्रायेण स्वीकारात्। तथा सति सामानाधिकरण्यरूपो हेतुः सिद्धः।

उक्त पक्षस्य साधकमाह - अत एव देवदत्तः कर्तेति॥ कर्तेत्यत्र कर्तृवाचकपदम् तृच् , तस्य शक्तिमत् कर्तृरूपोऽर्थः, अत एव देवदत्तेनाभेदा-न्वयः, कर्तृत्वरूपार्थवाचकत्वे देवदत्त इत्यनेन सामानाधिकरण्यानुपप-त्तिरेव स्यात्। एवमेव कारकः कर्म इत्यत्रापि। करोति क्रियां निर्वर्तयतीति कारकः। ण्वुलः शक्तिमद्वाचकत्वे एव देवदत्तेन सामानाधिकरण्यम्। देवदत्तापेक्षया कारकः इति पुंलिङ्गःनिर्देशः। कर्म इत्यत्रापि कर्मणि आश्रये एव मन् प्रत्ययः, अत एव कारकेण सामानाधिकरण्यम्। अत्र कारकः उभयत्रान्वयी। आश्रयवाचकत्वे प्रमाणमाह - उक्तञ्च साक्षादिति॥ साक्षादित्यस्य साक्षात्स्ववचनेनैव न तु अनुमाना-दिना। तदेवाह - सूत्रकृतैव युष्मदस्मदादीति॥ सूत्रमिदं पूर्वं व्याख्यातम्। युष्मदादिसामानाधि-करण्यम् आख्यातस्य। सूत्रकृता युष्मद्युपपदे इति सूत्रे उक्तम्। तेनापि आख्यातस्याश्रयवाचकत्वं तिङादीनां सिद्धं भवति। अत एव

---

[1] ब1-"च" नास्ति, द4-पूर्ववाक्ये "प्रतीतिः " इत्यारभ्य "तथा च " पर्यन्तं नास्ति

[2] अ1-पचति, ज1- पचतीत्यत्र

[3] जै-विचरणाशक्तिपरिबिदात्

न चैवम् "आश्रये त्वि"(वै.सि.का.2)ति मूलं सूत्रविरुद्धं स्यात्, सूत्रे कर्तृत्व-कर्मत्वाभ्यां वाच्यत्वावगमात्। न च भावनांशस्य धातुलभ्यत्वादाश्रय इत्येव सूत्रस्य भावार्थ इति वाच्यम्, अन्यवाच्यस्यापि तथात्वस्य[१] त्वयैवोपपादनात्।[२] अवाच्य-त्वेऽपि वाच्यतावच्छेदकत्वस्य[३] अकारणत्वेऽपि[४] कारणतावच्छेदकत्व[५] वदलक्ष्यत्वे-ऽपि[६] लक्ष्यतावच्छेदकत्ववत् सुलभत्वाच्चेति शङ्क्यम्। भावनाया वाच्यता[७]-वच्छेदकत्वे[८] अनन्तपदार्थेषु शक्यतावच्छेदकत्वापत्तौ[९] गौरवात्। आश्रयत्वस्य चा[१०]खण्डशक्तिरूपत्वात्।[११] तस्माद् "देवदत्तः पचति, पच्यते तण्डुल" इति सामानाधिकरण्यात् कर्तृकर्मणी वाच्ये एवेति सिद्धम्।

अपि च पचतीत्यत्र[१२] व्यापारस्येव[१३] कर्तुरपि प्रतीतिः सर्वानुभवसिद्धा[१४]। अत एव पचतीत्येव[१५] श्रुते[१६] "कः [१७]कीदृशः किं जातीय" इति प्रश्नः, "चैत्रो[१८] घनश्यामो

---

[१] भ1-"त्वस्य" नास्ति

[२] अ1--"आश्रयत्वस्य चाखण्डरूपत्वात्" इत्यधिकं

[३] अ3- "त्व" नास्ति

[४] वा2- "अकारणत्वेऽपि" नास्ति, त1-अकरणत्वेऽपि, जो2-अकारणेऽपि

[५] त1,के4- "त्व"नास्ति

[६] जो2-लक्ष्येऽपि

[७] द4- "कारणतावच्छेदकत्व" इत्यत्र "वच्छेदकत्व" इत्यारभ्य "वाच्यता" पर्यन्तं नास्ति

[८] 1900-वाच्यतावच्छेदकत्वेन

[९] त1-शक्तावच्छेदकापत्तौ

[१०] त2- "च"नास्ति

[११] द3-"तस्याश्चोपलक्षणत्वं शक्तौ संसर्गतया तत्प्रतीतिसिद्धेरन्यलभ्यत्वात् न च तत्र आकृत्यधिकरणन्यायप्रवृत्तिरित्याद्युक्तप्रायम्" इत्यधिकम्, भ2,ब3 -"तस्याश्चोपलक्षणत्वं शक्तौ संसर्गतया तत्प्रतीतिसिद्धेरन्यलभ्यत्वात् न तत्राधिकरणन्यायप्रवृत्तिरित्याद्युक्तप्रायम्" इत्यधिकम्

[१२] भ1-"वा" इत्यधिकं

[१३] ज1- व्यापारस्य च, म- "साहित्य" नास्ति

[१४] अ1,त2-सर्वसिद्धा

[१५] अ1--"एव" नास्ति

[१६] वा2-"च" इत्यधिकं

[१७] अ3- "कः" नास्ति

[१८] त2- "मैत्रो" इत्यधिकम्, अ4-देवदत्तो

विशेषणतया शक्तेः प्रवेशात् शक्तिपरत्वमायात्येवेत्यत आह – स्वातन्त्र्येणेति॥ इतराविशेषणतयेत्यर्थः। प्रकृते शक्तेराश्रये विशेषणत्वम्।

शक्तिप्रत्ययैस्यैवासिद्धेरिति पाठो ज्यायान् ।प्राधान्येन शक्तिबोधक-प्रत्ययस्यैव असिद्धश्चेत्यर्थः।

इदानीमाश्रयेत्विति मूलग्रन्थमाक्षिपति - न चैवमपि आश्रयेत्विति ॥ अयमाशयः- इतः पूर्वं शक्तिमत्कारकमिति पक्षमादाय ग्रन्थः प्रवृत्तः, तन्मते आश्रयेत्विति मूलग्रन्थः सङ्गच्छते शक्तिमत आश्रय परत्वात्। यदा तु "लःकर्मणी" (पा.3-4-69)ति सूत्रे भावप्रधाननिर्देशानुरोधेन कर्तृत्वकर्मत्वपरत्वं कर्तृकर्मपदयोराश्रित्य लकारस्य कर्तृत्वकर्मत्वार्थकत्वमभ्युपगम्यते तदा आश्रये तु तिङः स्मृता इति मूलग्रन्थः उक्त सूत्रविरुद्धः इति। तदेवाह – कर्तृकर्मत्वाभ्यामि-त्यादिनेति॥ अत्र कर्तृत्वकर्मत्वयोरिति पाठो युक्तः। अथवा प्रकृत्यादित्वात्तृतीया। यद्वा कर्तृत्वकर्मत्वे निश्चित्य वाच्यत्वे इत्यर्थः, ल्यब्लोपे पञ्चमीति। न च भावनांशस्येति फलस्याप्युपलक्षणम्। उक्तरीत्या कर्तृत्वकर्मत्वयोर्लकारार्थत्वे, कर्तृत्वस्य व्यापाररूपतया कर्मत्वस्य फलरूपतया च तयोर्धातुलभ्यत्वेन तत्र लकारविध्यनुपपत्त्या सूत्रे कर्तृकर्मपदयो- राश्रयमात्रपरत्वेन तिङ आश्रयार्थकत्वेन न सूत्रविरोध इति भावः। तदाह - आश्रये इत्येव सूत्रस्य भावार्थः इति॥ अभिमतोऽर्थः।

खण्डयति - अन्यवाच्यस्यापि इति। त्वया वैयाकरणेन तिङां कर्तृवाचक-त्वस्वीकर्त्रा, अन्यवाच्यस्यापि धातुवाच्यस्यापि फलव्यापारयोः आख्यातस्य कर्तृ-कर्मवाचकत्वे विशेषणतया धातुना लभ्यत्वेऽपि कर्तृकर्मान्यतरवाचकलकार-वाच्यत्वस्वीकारात्।

अत आह – तथात्वस्येति। वाच्यत्वस्येत्यर्थः, यद्वा द्वौ ब्राह्मणौ इत्यादौ द्विशब्देनैव द्वित्वोक्तौ अपि औ विभक्तेस्तथात्वस्य तद्योतकत्वस्येत्यर्थः। अयञ्च धूलिप्रक्षेपः तन्मताज्ञाननिबन्धनः। वैयाकरणैः फलव्यापारयोर्धातुलभ्यत्वेन आश्रयमात्रे तिङां शक्तिस्वीकारात्। द्वितीयपक्षोऽप्ययुक्त एव। वाच्यवाचक-भावस्यैव प्रस्तुतत्वात्।

ननु यथा व्यक्तिशक्तिवादेऽवाच्यस्यापि जात्यादेर्वाच्यतावच्छेदकत्वम् अकारणेऽपि दण्डत्वादौ कारणतावच्छेदकत्वम् , अलक्ष्येऽपि तीरत्वादौ च लक्ष्यतावच्छेदकत्वं, तद्वद् भावनाश्रये शक्तिस्वीकारे अवाच्यायामपि भावनायां वाच्यतावच्छेदकत्वमस्त्विति चेन्न। भावनायाः प्रति व्यक्तिभिन्नतया अवच्छेदकत्वे गौरवात्।

कर्तृकर्मणोर्वाच्यत्वं प्रकारान्तरेणोपस्थापयति - अपि च पचतीति॥ येन शब्देनोच्चारितेन योऽर्थः प्रतीयते स तस्य वाच्य इत्यनुभवसिद्धन्यायेन यथा पचतीत्युक्तौ व्यापारप्रतीतिस्तस्यैव कर्तुरपि प्रतीतिर्जायते, तस्मात् कर्ताऽपि वाच्य इति भावः। तदाह – सर्वानुभवसिद्धेति॥ ननु नैयायिकादयः आख्यातस्य कृतौ शक्तिमभ्युपगच्छन्ति, न तु कर्तरि इत्यत आह - अत एवेति॥ पचतीत्यत्र कर्तुः सामान्यतः प्रतीतेरेव। सन्देहम्प्रति सामान्यतो धर्मिणो ज्ञानमपेक्ष्यते। यदि पचतीति श्रुते सामान्यतः कर्तुः प्रतीतिर्न स्यात् तदा कः कर्तेति सन्देहो न स्यात्। जिज्ञासाया विशेषविषयकत्वेन सामान्यज्ञानं विना तस्या अनुपपत्तेः। तस्मात् कर्तृकर्मान्तररूप आश्रयो वाच्य इति भावः। सामान्यतो ज्ञाते सति आश्रये, कः कर्तेत्यादिरूपः प्रश्नः, चैत्रः घनश्यामः ब्राह्मण इत्याद्युत्तरं सङ्गच्छते। तदेतन्मूल उक्तमेव। क इति संज्ञाप्रश्नः। अतश्चैत्रेति संज्ञया उत्तरम्। कीदृशः इति गुणादिसादृश्यप्रश्नः, अतः घनश्याम इति मेघसादृश्येन उत्तरम्। किं जातीय इति जातिप्रश्नः, अतो ब्राह्मणत्वजात्या उत्तरम् ब्राह्मण इति। प्रतीतेर्विवरणाच्चेष्टमर्थमाह – प्रतीतेरिति॥ प्रतीतिरुक्ता। विवरणं दर्शयति – पाकानुकूलकृतिमानिति॥ तत्समानार्थकपदान्तरेण तदर्थकथनं विवरणम्। पाचक इत्युक्तौ पाकानुकूलकर्तुः प्रतीतिः। एवमेव पचतीति पाचक इत्यस्य विवरणम्। एवञ्च उक्तस्थलेषु विवरणविव्रियमाणभावः प्रतीयते, विवरणविव्रियमाणयोः समानार्थकत्वनियमेन पचतीत्यत्रापि कर्तुः प्रतीतिरावश्यकी। तथा चानेन विवरणेन आख्यातस्य कर्तरि शक्तेः परिच्छेदो निश्चयस्तस्मात्। तदाह - कर्तृकर्मणी वाच्ये आख्यातवाच्ये इति॥ ननु उक्तरीत्या कर्तुःप्रतीत्या, धातुवाच्य एव कर्ता स्यादिति चेन्न, प्रतिवादिनां कर्तुराख्यातवाच्यत्वसन्देहस्यैव सत्त्वात्। प्रतीतिविवरणादिभिरपि यदि कर्तृकर्मणो-रवाच्यत्वं तर्हि भावनाया अपि वाच्यत्वं न स्यादित्याह - अन्यथा भावनापीति॥

**32.** कर्तृकर्मणोर्भावनयैवाक्षेपसंभवेना[१]न्यलभ्यत्वान्न तयोर्वाच्यत्वमिति चेन्न। कर्तृ[२]-कर्मभ्यां[३] कृदादाविव भावनाया एवाक्षेपसंभवादस्तु[४] तयोरेव वाच्यत्वम्, मास्तु च भावनाया इत्यप्यापत्तेः[५]। विवेचितं चैतदधस्तात्।

एतेन कर्तृकर्मणोर्विवरणं तात्पर्यार्थविवरणम्। बोधविवरणयोर्व्युत्पत्त्यनुसारि[६]त्वेनार्थानिर्णायकत्वं[७] वा, पाक[८]मित्यशब्दार्थकर्मत्वविवरणवदुपपद्यत एवैतदपीति वा[९], इतरेतरद्वन्द्वे[१०] साहित्य[११]विवरणवद् वा[१२] नार्थ[१३]निर्णायकतेत्यादिक[१४]मपास्तम्। एवं च तुल्ययुक्त्या कर्तृकर्मणोर्वाच्यत्व मावश्यकमेवे[१५]ति दिगिति विभावयामः[१६]। "लः कर्मणि"(पा.3-4-69)इत्यस्य कालसंख्याभावना[१७]पुरस्कारेण प्रवृत्तौ विध्यादौ कृदादौ[च] [१८] तद्वाच्यत्वापत्ते[१९]र्भावनाया धातुलभ्यत्वाच्चेत्यतः कर्त्रादिपुरस्कारेण प्रवृत्तौ तदादेशत्वाच्छानजादिवत् तिङस्तदर्थवत्त्वं[१] दुर्वारमित्यपि वदन्ति।

---

[१] जै-भावनैवयैवाक्षेपासंभवेन,के5,अ4-संभवात्

[२] द4- " कर्तृ " नास्ति

[३] जै,त2-कर्माभ्यां

[४] त2-एवाक्षेपसंभवादतस्तयोरेव

[५] अ1,भार1,त1,त3,जो2,1900,के4,द3-इत्यस्याप्यापत्तेः, त2 -इत्यापत्तेः

[६] भ1-त्त्यनुसार

[७]वा2,त3,जो2,1900,1915-त्वेनार्थनिर्णायकत्वं, त1-त्वे नार्थानिर्णयत्वं

[८] त2-धाक

[९] त2-च

[१०] ज1- इतरेतरद्वन्द्वं

[११] अ1,भार1,त3,जै,के4,त2,ज1,ब2-"साहित्य" नास्ति, अ3,भ1,द7- " साहित्य " इत्यस्य स्थाने " समुच्चयांश " इत्यस्ति, अ4-" साहित्य " इत्यस्य स्थाने " साहित्यांश " इत्यस्ति

[१२] के5- "साहित्यविवरणवद्वा " इत्यस्य स्थाने "अपि परत्वात्" इति वर्तते, त2- "वा"नास्ति

[१३] के4-विवरणवन्नानार्थ

[१४] अ1,जो2-नार्थनिर्णायकमित्यादिक,के5,अ4- निर्णायकत्वमित्यादिक

[१५] के5,अ4- "एव"नास्ति

[१६] द1-भावयामः

[१७] त3,अ4-भावनादि

[१८] त1,त3,भ2-"च" इत्यधिकं युक्तं च

[१९] के4-च वाच्यत्वापत्तेः, के5,अ4-च तद्वाच्यत्वापत्तेः

भावतिङां[२] धात्वर्थानुवादक[३]मात्रत्वान्न[४] तदर्थोऽत्र वर्णितः। अथैवं लडादिभिस्तत्र वर्तमानत्वं[५] न बोध्येतेति[६] चेन्न, तस्य धात्वर्थव्यापारविशेषणतया तिङो द्योतकत्वात्[७]। वाचकत्वपक्षेऽप्यगत्यानुभवानुरोधेन[८] विधायकबलेन[९] च तथा स्वीकारात्।

---

इदानीं पुनः कर्तृकर्मणोरवाच्यत्वम् आक्षिपति – कर्तृकर्मणोरिति॥ अयमाशयः - पचतीत्यादौ या आश्रयप्रतीतिः सा न वाच्यतया, अपि तु धातुवाच्यतया प्रतीयमानभावनया तदाक्षेपादेव। तथा चान्यलभ्यतया नाख्यातस्य कर्तृकर्मणोः शक्तिः। एतत् खण्डयति – चेन्नेति॥ यथा कृदादौ तृचि कर्त्रादिभिः भावनाया आक्षेपः, तथैवाख्यातवाच्यकर्तृकर्मभ्यां भावनायाःआक्षेपःस्यात् , न तु वाच्यत्वम्। पौनरुक्त्यमपहरति – विवेचितमिति॥ ननु तत्स्मरणमात्रेण न पौनरुक्त्यदोषापनोद इति चेन्न। दोषस्वीकारेणापि दोषहानस्यानुभवसिद्धत्वात्।

एतेन कर्तृकर्मणोर्विवरणमिति। एतेन उक्तरीत्या कर्तृकर्मणोर्वाच्यत्वव्यवस्थापनेन। अपास्तमित्यनेनान्वयः। अपास्तत्वहेतुरुक्त एव। निरसनीयमाह – कर्तृकर्मणोरित्यादिना॥ विवरणेनाख्यातस्याश्रयवाचकत्वं यत्साधितन्तदयुक्तम्, विवरणस्य तात्पर्यार्थविषयकत्वेन स्वोक्तार्थासाधकत्वात् तदेवाह – बोधविवरणयोरिति॥ बोधः शाब्दबोधः।

यथा मीमांसकमते भावनाविशेष्यकः, नैयायिकमते प्रथमान्तार्थमुख्यविशेष्यकः। विवरणम् - पचतीत्यस्य पाकं करोति इति। बोधविवरणयोः स्वस्वव्युत्पत्त्यनुसारेणैवेष्टसाधकत्वम्। व्युत्पत्तिः स्वस्वशास्त्रजसंस्कारः।

---

१ वा2,भार1,द1,द2त1,त3,ब1,1900,1915-दर्थकत्वं, जो2-दर्थत्वं

२ अ3,भ1-भावतिङः

३ के5,त्रि,अ4 -धात्वर्थानुवादकत्व

४ भ3- आरम्भादेतावत्पर्यन्तं ग्रन्थः नास्ति

५ त3-वर्तमानत्वादिकं, अ4- वर्तमानत्वादि तत्

६ द1,के4-न बोध्यतेति, ज1-नैव बोध्येतेति

७ त2- "त्वात्"नास्ति

८ त5- अनुभवविरोधेन

९ 1900-विधायकवचनेन

तदनुसरतीति विग्रहः। यथा मीमांसकाः नैयायिकाश्च स्वस्वसंस्कारवशादेव तथा बोधमभ्युपगच्छन्ति। न तेषामनुरोधेन वैयाकरणैः स्वसिद्धान्तः परिहीयते। एवमेव पचतीत्यत्र पाकं करोतीति विवरणेन ति इत्यस्य करोतीति यत्नार्थककृधातुना विवरणेन यत्नार्थकत्वं नैयायिकैः स्वीक्रियते। इदमेव स्वस्वव्युत्पत्त्यनुसारित्वम्। तेनैवार्थनिर्णायकत्वम् स्वसम्मतार्थनिर्णायकत्वम्। न तु सर्वसाधारण्येन, परस्परमविश्वासात्। अथवा अर्थानिर्णायकत्वमिति नञ्घटितः पाठः, बोधविवरणयोरर्थानिर्णायकत्वमिति। बोधविवरणयोः स्वानुभवानुरूपत्वेन अर्थस्य सर्वसम्मतस्य अनिर्णायकत्वमिति भावः। विवरणस्य तात्पर्यार्थविवरणत्वमाह – पाकमिति॥ पचतीत्यत्र पाकं करोतीति विवरणम्। तत्र पाकमिति द्वितीयान्तम्। द्वितीयायाः कर्मत्वमर्थः। तच्च पचतीत्यत्र विव्रियमाणे कस्यापि पदस्य नार्थस्तथापि विवरणे दृश्यतेऽतः तद् विवरणं तात्पर्यार्थविवरणमेव, तेन च न वाच्यत्वनिर्णय इति भावः। अत्र विवरणस्य नार्थसाधकत्वम् तात्पर्यार्थपरत्वात् व्युत्पत्यनुसारित्वाच्चेति हेतुद्वयं बोध्यम्। एतदपीति॥ येन विवरणेनाख्यातस्य आश्रयवाचकत्वं साधितम् तद् विवरणमपि। उपपद्यते तात्पर्यार्थविवरणत्वेनापि सङ्गच्छत इत्यभिप्रायः। तथा च नोक्तविवरणेनाख्यातस्य कर्तृकर्मवाचकत्वसिद्धिः। विवरणस्य पुनरपि तात्पर्यार्थपरत्वं दर्शयति - इतरेतरद्वन्द्वे इति॥ धवखदिरौ इतीतरयोगद्वन्द्वः। अस्य विवरणं चद्वयेन भवति धवश्च खदिरश्चेति। तथा च विवरणे चद्वयेन समुच्चयांशद्वयं प्रतीयते, द्वन्द्वे चैक एव समुच्चयः। अतः अत्रापि समुच्चयांशविवरणं तात्पर्यार्थविवरणमेव। यतो विवरणस्य न शब्दार्थमात्रपरत्वम्, अपितु उक्तरीत्या तात्पर्यार्थपरत्वमपि। अतस्तस्य न वाच्यत्वनिर्णायकत्वमिति यदुक्तं तदपास्तम्। उक्तयुक्तिभिः आख्यातस्य कर्तृकर्मवाचकत्वसिद्धेः। एतदेवाह – तुल्ययुक्त्येति॥ तुल्ययुक्तिः कृदादौ कर्तृवाचकत्वयुक्तिरुभयत्रापि समानैवेति कर्तृकर्मणोर्वाच्यत्वे बाधकाभावः। आदिना तद्धितसंग्रहः। यथा वैयाकरण इत्यत्र "तदधीते तद् वेदे"(पा.4.2.59) त्यनेन अण् प्रत्यये व्याकरणाध्ययनकर्तुः प्रतीतिः, तथैव व्याकरणमधीते इति विवरणेऽपि कर्तृप्रतीतिराख्यातेनोपपाद्या, अन्यथा विग्रहत्वभङ्गः स्यात्। विशेष्यविशेषणभावव्यत्यासस्तु शब्दशक्तिस्वभाव्यात्। ननु "लः कर्मणि चे"(पा. 3.4.69) ति सूत्रेण कालसंख्याभावनार्थकत्वेन लविधानं स्यादित्यत आह - लः कर्मणीति॥

अस्यायमाशयः - तिङां कर्तृकर्मसंख्याकाला अर्थाः इति वक्ष्यते। तत्र सन्देहः। किमेतेऽर्थाः "लः कर्मणी"(पा.3.4.69)ति सूत्रेण लकारवाच्यत्वेन बोध्यन्ते , अन्यथा वा? लकारवाच्यत्वेन बोध्यन्ते चेत् पचतीत्यत्र प्रतीयमान- भावनाया अपि लवाच्यत्वं स्यात्। आद्ये दोषमाह - लः कर्मणीति॥ न तावत् सूत्रमिदं कालसंख्याभावनावाचकत्वं लकारस्य बोधयितुं शक्तम्। सूत्रस्य तथाविधाने सामर्थ्याभावात् , तथाविधाने दोषान्तरसत्त्वाच्च। तदेवाह - विध्यादौ इति॥ अस्य सूत्रस्य कालादिपुरस्कारेण कालादिवाचकत्वेन, प्रवृत्तौ शाब्दबोध- जनकत्वे, पचेदित्यादौ विधिस्थलेऽपि कालादिप्रतीत्यापत्तिः, कृदादौ पच्यमान इत्यादौ अपि कालादिप्रतीत्यापत्तिः। न च पचमानः इत्यत्र संख्यायाः कालस्य च वाच्यत्वे दोषाभावः, तत्र पचमान इत्यत्र वर्तमानकालस्य एकत्वदिसंख्यायाश्च प्रतीतेरा- वश्यकत्वादिति वाच्यम्। "लःकर्मणि चे"(पा.3.4.69)ति सूत्रेण काल- सामान्यबोधनेन पचमान इत्यदौ कदाचिद् भूतकालस्यापि बोधापत्तेः। न च तथा सति "वर्तमाने लट्" (पा.3.2.123) इत्यस्य वैयर्थ्यापत्तिः, तेन 'लः कर्मणी' (पा.3.4.69)ति सूत्रस्य कालाबोधकत्वस्यैव सिद्धेः। न च सामान्यविशेष- भावेनानेन स्वविषये "लःकर्मणी"(पा.3.4.69)ति बाधेन सार्थक्योपपत्तौ "लःकर्मणी"(पा.3.4.69)त्यस्य कालबोधकत्वज्ञापकत्वानुपपत्तिरिति वाच्यम् , तथा सति विध्यादौ अपि कालभानापत्तेः। तस्मात् "लःकर्मणी"(पा.3.4.69)ति सूत्रं कालादिबोधने प्रमाणम्। किञ्च भावनाबोधकत्वे पचमान इत्यादौ लकारस्थानिकेन शानजादिनापि भावनाप्रतीत्यापत्तौ कर्तृवाचकत्वानुपपत्तिः। भावनाया लकारवाच्यत्वमपाकरोति - भावनाया धातुलभ्यत्वाच्चेति। अतः पूर्वोक्त- दोषात्। 'लः कर्मणी"(पा.3.4.69)ति सूत्रस्य कर्त्रादिपुरस्कारेण कर्त्रादि- बोधकत्वेनेत्यर्थः। प्रवृत्तौ तादृशबोधजनकत्वे। तदादेशत्वात् तिङः, शानजादौ यथा कर्तृवाचकत्वं तथा तिङः तदर्थकत्वं कर्त्रादिवाचकत्वं दुर्वारम् अवर्जनीयम्। इति वदन्ति वैयाकरणाः। कालसंख्यादीनां वाच्यत्वन्तु वक्ष्यते। ननु तिङर्थ- निरूपणप्रसङ्गे तिङर्थभावस्य निरूपणमावश्यकमित्यत आह – भाव- तिङामिति॥ "लः कर्मणी"(पा.3.4.69)ति सूत्रेण लकारस्य त्रिविधा अर्थाः सूचिताः कर्ता कर्मभावश्चेति, तत्र कर्तृकर्मणोर्वाच्यत्वविषये बहूक्तम्। भावविषये

वक्तव्यस्याभावादित्यर्थः। अत्र भावपदेन असत्त्वभूता क्रिया। सा च धातुवाच्यैव भूयते इत्यादौ तिङानूद्यते। तस्याः निरूपणं धात्वर्थनिरूपणेनैव गतार्थम्। ननु तिङां द्योतकत्वे, भूयते अभूयतेत्यादौ वर्तमानत्वादिबोधो न स्यादित्याशङ्कते - अथैवं लडादिभिरिति॥ यदि धात्वर्थानुवादकत्वं तदा कालस्य धातुवाच्यत्वाभावेन , तिङादिद्योत्यत्वाभावेन च कालप्रतीतिर्न स्यादिति शङ्का। उत्तरमाह – चेन्नेत्यादिना॥ कालस्तु व्यापारे विशेषणम्। तिङा च कालविशिष्टव्यापारद्योतनेन नागृहीतन्यायेन कालस्यापि द्योतनम्। ननु स्वसमभिव्याहृतपदीयशक्त्य-भिव्यञ्जकत्वं हि द्योतकत्वम्। तथा च कालनिरूपितशक्त्याश्रयस्यानिर्णये तिङा विशेषणतया कालद्योतकत्वानुपपत्तिरिति चेन्न। कालोऽपि धात्वर्थ इति स्वीकारात्। वाचकत्वपक्षेऽपि कालप्रत्ययं साधयति - वाचकत्वपक्षेऽपि इति॥ अन्यस्य वाचक-स्याभावोऽगतिः। अनुभवबलेन भूयते इत्यादौ वर्तमानत्वादिप्रतीतिबलेन। ननु कालबोधम्प्रति तथानुशासनस्याभावे आक्षिप्तस्य शाब्दबोधे भानायोगेन च काल-बोधानुपपत्तिरित्यत आह - विधायकबलेन च॥ विधायकं शास्त्रं "वर्तमाने लडि"-(पा.3.2.123)त्यादि तद्बलेन च कालप्रतीत्युपपत्तिः। चो हेतौ। यतोऽनु-शासनबलमतस्तिङां कालबोधकत्वम्।

### 3.16 भावलकारे संख्यान्वयविमर्शः

**33.** अथैवं कथं तत्र संख्याप्रत्ययोऽपीति चेन्न, तस्या उत्सर्गलभ्यत्वात्[१]।तथाहि - भावलकारे हि संख्यान्वयिकर्तृकर्मणोरप्रतीतेस्तत्रत्या[२] संख्यानन्वितैव[३]। न च भावनायामेव तदन्वयो[४]ऽस्त्विति शङ्क्यम्[५], तस्या लिङ्गसंख्यान्वयायोग्यत्वेनैव धातुनोपस्थापनात्[६]। एतदेवा[७]सत्त्वभूतत्वम्। न च भाव[८]तिङर्थसंख्याभावनयो-

[१] म-तस्योत्सर्गलभ्यत्वात्

[२] अ4-प्रतीतेस्तत्र

[३] त1-संख्या नान्वितैव

[४] द1-तदन्वयनियमो

[५] अ1-वाच्यम्

[६] अ1-धातुना उपस्थानात्

[७] अ1-अत एवा

[८] भ2-भावे

धात्वर्थ एवान्वय इति कुसुमाञ्जलावुक्तं युक्तम्[१], धात्वर्थबहुत्वे "मैत्रेण स्थीयते, सुप्यत[२]" इत्याद्यनापत्तेर्बहु[३]वचनापत्तेश्च[४]। "बहुषु बहुवचनम्"(पा.1-4-21) इत्यनुशासनस्या[५]वर्जनीयत्वात्। अन्यथैकवचनमपि न[६] स्यात्। तथा च संख्यानन्वये[७] साधुत्वमात्राय प्रत्ययाभिधाने प्राप्ते प्रथमोपस्थितत्वादेकवचनमेव कल्प्यते[८], अव्ययानाम[९]संख्यत्वेन[१०] तदनुरोधेन भाष्ये[37] तथैव व्यवस्थितेः[११]।

अथवा[१२] "द्विबह्वोर्द्विवचनबहुवचने इत्येव[१३] सूत्रं कर्तव्यम्। द्वित्व[१४]विवक्षायां बहुत्वविवक्षायां च[१५] द्विवचनबहुवचने भवत इत्यर्थः। यत्र च[१६] न तयोर्विवक्षा तत्र साधुत्वार्थमे[१७]कवचनं भवति, न त्वेकत्वादि(त्वेकत्व)विवक्षापेक्षा[१८]"[38]। एवं च[१९]

---

[१] भ1-"युक्तम्" नास्ति

[२] भ2- "शय्यते " अधिकं

[३] त1-इत्यनापत्तेश्च बहु,के5-इत्याद्यनापत्तेश्च बहु

[४] त2-बहुवचनाद्यापत्तेश्च

[५] जो2-इत्यस्या

[६] के5-अन्यथा तन्न स्यात्

[७] द4-संख्यान्वये

[८] ब3,त्रि,द7-कल्पते

[९] त5-अन्वयानाम

[१०] द1-संख्यत्वे

[११] ब2- तथैव स्थितिः, अ4-तथैव स्थितेः

[१२] म-अथैवं

[१३] के5,अ4- "एव"नास्ति

[१४] द3-द्वित्वादि

[१५] 1915- "द्विबह्वोर्द्विवचनबहुवचने इत्येव[१५] सूत्रं कर्तव्यम्। द्वित्व[१५]विवक्षायां बहुत्वविवक्षायां च"नास्ति, तत्स्थाने "द्विबह्वोः" इति वर्तते।
ब2- अथवा द्विबह्वोर्द्विवचनबहुवचने प्राप्ते प्रथमोपस्थितत्वात् एकवचनमित्येव सूत्रं कर्तव्यम् द्वित्वविवक्षायां बहुत्वविवक्षायां च

[१६] त1-"च" नास्ति

[१७] त2-"मे"नास्ति, भ3-साधुत्वार्थकमे

[१८] अ3-विवक्षापेक्षणं,भ2-त्वेकत्वविवक्षापेक्षा, अ4-त्वेकत्वापेक्षा नाप्येकत्वादिविवक्षापेक्षा

[१९] भार1-"च" नास्ति

प्रकृतेऽप्येकत्वादि[१] विवक्षाविरहेऽपि[२] साधुत्वार्थमेकवचनमुपपद्यत[३] इति न कश्चिद् दोषः। "उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्ते" इत्यत्र भावे बहुवचनश्रवणं[४] कथमिति[५] चेत्, सत्यम्[६]। भाष्यकारवचनाद[39]त्रैव बहुवचनं साध्विति हि[७] प्रामाणिकाः।

## 3.17 तिङर्थवर्णनम्

तिङ इति। आदेशिनोऽर्थेनार्थवत्त्वमादायेदं, बोधकत्वं शक्तिरित्य[८]भिप्रायेण वा[९]। निरूपितस्थले विशेषणविशेष्यभावं व्युत्पादयति[१०] - फले इत्यादि।

फले विक्लित्त्यादौ[११]। प्रधानं विशेष्यः[१२]। विक्लित्ति[१३]र्व्यापारे[१४] विशेषणमित्यर्थः[१५]।

तिङर्थः[१६]। कर्तृकर्मसंख्याकालाः। [१७]तत्रापि कर्तृकर्मणी व्यापारफलयोर्विशेषणे[१८], संख्यात्वनयोः।

---

[१] अ1--"आदि" नास्ति

[२] अ3- "च "अधिकं

[३] जो2-मुत्पद्यत

[४] त2-बहुवचननश्रवणम्, द6- भावे च बहुवचनश्रवणं, ज1-इत्यत्राभावे बहुवचनश्रवणं

[५] त2- "कथम्" नास्ति

[६] त्रि,त5-"सत्यम्" नास्ति

[७] अ3,द1,अ4-"हि" नास्ति

[८] जै,के5,द2,म,अ4-तत्त्वमित्य

[९] अ3- "वा " नास्ति

[१०] के4-उत्पादयति

[११] के4-विक्लिस्यदौ (फले इति नास्ति)

[१२] म-विशेष्यः (प्रधानं इति नास्ति), अ4-"व्युत्पादयति" इत्यारभ्य "विशेष्यः" इति पर्यन्तं नास्ति

[१३] के4-विक्लिप्ति

[१४] के5,म-व्यापारेऽपि

[१५] जो2-विक्लित्तिः विशेषणं व्यापारे इत्यर्थः

[१६] वा2,1900,1915-तिङर्थाः

[१७] ब2- "तत्रापि कालाः।" इत्यधिकम्

[१८] ज2-विशेषणम्

ननु भूयते इत्यादौ कथमेकत्वप्रतीतिरिति शङ्कते - अथैवं कथन्तत्र संख्याप्रत्ययोऽपीति॥ प्रत्यायकस्याभावात्। प्रतीतिप्रकारकमाह - तस्या उत्सर्गलभ्यत्वात्॥ धात्वर्थव्यापारस्य लिङ्गसंख्यानन्वयित्वरूपासत्त्वभूतेन संख्याविशेषान्वयायोगेऽपि संख्यासामान्यमादाय अपदं न प्रयुञ्जीतेति अपदस्य प्रयोगानौचित्येन साधुत्वाय एकवचनस्यौत्सर्गिकत्वात्। तदेवोपपादयति - भावलकारे ही-ति॥ अयमाशयः - भूयत इत्यादौ लकारो भावो विधीयते। आख्यातेन च न कर्तृकर्मणोः प्रतीतिः। तथा सति संख्यान्वयः कुत्र स्यात् अन्वयिनोऽभावात्। अतस्तत्रत्या संख्यानन्वितैव। भावे एकत्वानन्वयेऽपि औत्सर्गिकत्वादेकवचनम्। भावनायां संख्यानन्वयस्तु अयोग्यत्वादेव। अयोग्यत्वन्तु असत्त्वरूपत्वात्। एतदेव मूले – नचेति एतदेवासत्त्वभूतत्व मित्यन्तेनाह। इदानीं प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति न्यायानुग्रहमाशङ्कते - न च भावतिङर्थसंख्याभावनयोरिति। सुप्यते इति भावार्थकस्तिङ्। तस्यार्थद्वयम् - भावः(क्रिया) एकवचनोपस्थाप्यमेकत्वम्। तयोश्च प्रकृतिभूतधात्वर्थे एवान्वयः उक्तन्यायानुरोधात्। इदञ्च कुसुमाञ्जलावुक्तम्। तत्र हि आख्यातार्थसंख्यान्वयविचारे इत्थमुक्तम् - संख्यापि तावदियं भावनानुगामिनी यं यं भावनान्वेति तं तं संख्यापीति स्थितेः। ततश्च प्रथमान्तनिर्दिष्टेनैव भावनान्वीयत इति तस्या अन्वय योग्यतानियमात् संख्यापि तदनुगामिनी तेनैवान्वीयत इति नातिप्रसङ्गः।इति। अत्र यद्यपि कर्त्रादावेवान्वयः इत्येवायाति , तथापि भावनानुगामिनीति कथनेन भावनान्वयद्वारैवान्वयस्योक्ततया भावनायां संख्यान्वयः प्रतीयत एव। एतत्खण्डयति - धात्वर्थबहुत्व इत्यादिना। अयम्भावः- भावतिङर्थसंख्याया धात्वर्थभावनान्वये, धात्वर्थव्यापारस्य फूत्कारादेर्बहुत्वेन बहुवचनापत्तिः स्यात्। ननु अनुशासनाभाव इत्यत आह - बहुषु बहुवचनमिति॥

"बहुषु बहुवचनमि"(पा.1-4-21)त्यस्य प्रवृत्तौ बाधकाभावः। अनुशासनस्यानादरे एकवचनानापत्तिरपि। एवं सति किं वक्तव्यमित्यत आह - तथा च संख्यान्वये इति॥ उक्तभावतिङर्थसंख्याया दोषात् धात्वर्थभावनायामनन्वय एव। तथा सति एकवचनं निरर्थकमेव साधुत्वोपयोगि औत्सर्गिकं जायते। ननु साधुत्वमात्रार्थकत्वे द्विवचनाद्यपि स्यादत आह - प्रथमोपस्थितत्वादिति। विभक्तिगणनायां

लौकिकगणनायाञ्चैकवचनस्यैव प्रथमतो बुद्धिविषयत्वात्। भाष्यमत्र मानमाह – अव्ययानामिति॥ अव्ययमसंख्यं भवति। तत्र संख्याभावात् एकवचनाद्यनुपपत्तौ औत्सर्गिकं साधुत्वोपयोगि एकवचनमित्येकवचनव्यवस्था भाष्यकृता कृता, तथैवात्र व्यवस्था कार्या।

अव्ययलक्षणं यथा -

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम्॥

इयञ्चाथर्वणश्रुतिः। त्रिषुलिङ्गेषु सर्वासु च विभक्तिषु सर्वेषु वचनेषु च यन्नव्येति विकारं न प्राप्नोति किन्तु एकप्रकारकं भवति तदव्ययम्। अत्र विभक्तिवचनशब्दौ कारकसंख्यापरौ अन्यतरग्रहणवैयर्थ्यात्। यद्वा यत् तद् इति हेतुपरमव्ययम् , यस्मान्न व्येति विकारं न प्राप्नोति तदव्ययं महासंज्ञाकारणात्। प्रकारान्तरमाह – अथवेति॥ संख्याविधिसूत्रद्वयम् – "द्व्येकयोर्द्विवचनैकवचने" (पा.1.4.22), " बहुषु बहुवचनमि"(पा.1.4.21)ति तत्र न्यासान्तरं क्रियते। एकस्मिन्नित्यपनीय एकवचनमिति सूत्रं कर्तव्यम् , ततो द्विबह्वोर्द्विवचनबहुवचने इत्येवं कर्तव्यम् , तेन द्वित्वबहुत्वयोर्द्विवचनबहुवचने भविष्यतः। एकवचनन्तु एकस्मिन्नपि भविष्यति अलिङ्गसंख्येभ्योऽव्ययेभ्यश्च। तथा चौत्सर्गिकत्वमेकवचनस्य।

ननु "कर्मणि द्वितीये" (पा. 2-3-2)त्यादिना कर्मादिषु द्वितीयादीनां नियतत्वात् कथमेकवचनमव्ययेभ्यः स्यात् , नैष दोषः, एतदर्थमेव एकवचनमित्येतत् क्रियतेऽप्राप्तप्रापणार्थम्। एकवचनमित्यारम्भसामर्थ्यादेकवचनं भविष्यतीति।

भाष्ये तु (पा.1-1-37) "इदञ्चाद्यत्वे अतिबहु क्रियते एकस्मिन्नेकवचनम्। द्वयोर्द्विवचनम्। बहुषु बहुवचनमिति। कथं तर्हि एकवचनमुत्सर्गतः करिष्यत" इत्याद्युक्तम्। उक्तोऽर्थः कैयटेनोक्तः। यत्र च न तयोर्विवक्षेति नकारघटितः पाठः। नकाररहितः पाठोऽयुक्त एव। यत्र तयोर्द्वित्वबहुत्वयोर्नविवक्षा , अव्ययादौ भावलकारादौ च। तत्र साधुत्वार्थमेकवचनमेव। एतादृशैकवचनोपपत्तये उपसंहरति – प्रकृतेऽपीति॥ भावलकारस्थलेऽपि भावलकारस्य भावार्थकत्वेन तत्र च एकत्वाद्यप्रतीतावपि साधुत्वार्थमेकवचनम्।

साध्यक्रियायामपि बहुत्वादिप्रतीतिं संसाध्य खण्डयति - उष्ट्रासिका आस्यन्ते, हतशायिका शय्यन्ते इति॥ उष्ट्राणां यादृशानि आसनानि, हतानां यादृशानि शयनानि तादृशानि देवदत्तादिकर्तृकाणि आसनानीत्यर्थः। धात्वर्थनिर्देशे ण्वुल्। यद्यपि कृदभिहितो भावो द्रव्यवत्प्रकाशते इति नियमेनासिकाः शायिका इत्यत्र बहुवचनं सिद्धं तथापि आस्यन्ते, शय्यन्ते इत्यत्र बहुत्वमनुपपन्नमेव। न चात्रकर्मण्येव लकारोऽस्तु इति वाच्यम् , धातुद्वयस्याप्यकर्मकत्वेन तदसम्भवात्। तथा च उक्तोदाहरणे भावेऽपि बहुत्वदर्शनेन औत्सर्गिकैकवचनकथनासङ्गतिः। यद्वा भावाख्यातस्थले औत्सर्गिकैकवचनसाधने प्रकृते कथं बहुवचनोपपत्तिः इत्यत आह - भाष्यकारवचनादत्रैव बहुवचनं साध्विति॥ तत्त्वबोधिनीकारस्तु प्रायोवादमेव मन्यते। वस्तुतस्तु मूले प्रारम्भे एव क्रियाया असत्त्वभूतत्वमुक्तम्। अत एवात्रापि मूलकारो ब्रूते - प्रामाणिका इति॥

तिङ इति॥ आश्रये तु तिङः स्मृता इति मूलघटकमिदम्। परमत-मादायाह- आदेशिन इति। आदेशिनः स्थानिनस्ते एवार्थवन्त इति परेषां मतम्। तद्रीत्या स्थानिनोऽर्थवत्वमादायाह - तिङ इति॥ स्वमतेनाह – बोधकत्वम् । लोके बोधकत्वम्। तच्च आदेशानामेव, अर्थबोधनाय तेषामेव प्रयोगात्। निरूपितस्थले इति॥ निरूपितयोः पूर्वं व्याख्यातयोः फलव्यापारयोर्मध्ये कस्य विशेषणत्वं कस्य विशेष्यत्वमिति जिज्ञासायामाह - फले प्रधानमिति॥ अत्र निरूपितत्वं सप्तम्यर्थः। तस्य प्रधानपदार्थे प्राधान्येऽन्वयः। प्राधान्यं विशेष्यत्वम्। तथा च फलनिरूपित-प्राधान्यवान् व्यापारः। व्यापारस्य विशेष्यत्वे फलस्यार्थिकं विशेषणत्वम्। फलस्यानुकूलत्व(जनकत्व)सम्बन्धेन व्यापारेऽन्वयः। तदाह - फले इत्यतः इत्यर्थ इत्यन्तेन। यद्यपि मूलकारिकायां कर्तृकर्मणोरेवाख्यातार्थत्वं प्रतीयते, तथापि संख्याविधेयकवाक्यतया संख्यायाः वर्तमाने लडित्याद्येकवाक्यतया कालस्य चाख्यातबोध्यत्वं मनसि निधायाह - तिङर्थः कर्तकर्मसंख्याकालाः इति॥ तिङर्था-नामुक्तानामन्वयप्रकारं सयुक्तिप्रतिपादयति - तत्रापि कर्तृकर्मणी इति॥ अनयोः फलव्यापारयोरन्वयः तत्रैव तयोराकाङ्क्षितत्वात्। अत्र व्युत्क्रमेणैवान्वयः, कर्तुः व्यापारे कर्मणश्च फलेऽन्वयः। संख्यायाश्च कर्तृप्रत्यये कर्तरि कर्मप्रत्यये कर्मणि अन्वयः। समानप्रत्ययोपात्तत्वात्। तिङा उभयोरपि अभिधानात्।

### 3.17.1 कालस्तु व्यापारे एव विशेषणम्

**34.**कालस्तु व्यापारे एव, तथैवानुभवात्[१]। कर्तृकर्मणोः समानपदोपात्तत्वेन अन्तरङ्गत्वेना[२]न्वये तु पचतीत्यादौ तयोरेव वर्तमानत्वप्रत्ययः[३] स्यात्। न च तथा कस्यचिदनुभव इति[४] वदन्ति[५]।

वस्तुतो "वर्तमाने लट्"(पा.3-2-123) इत्यत्राधिकारा[६]द्धातोरित्येव[७] लभ्यते, तत्र[८] धातोर्वर्तमानत्वं न तदानीं[९] विवक्षितमिति[१०] तदर्थस्य वाच्यम्[११], तदर्थोऽपि प्राधान्याद् व्यापार एव गृह्यत इति[१२] न कर्तृकर्मफलेषु, तदन्वयः[१३]। जानातीत्यत्रापि ज्ञानस्यैव फलानुकूलव्यापारत्वेन[१४] तत्रैव तदन्वयः। कर्तृकर्मणोरन्वये[१५]चातीतक्रिये[१६] कर्तरि पचतीत्यापत्तेः। अपाक्षीदित्यनापत्तेश्च। इतोऽपि व्यापार[१७]-वर्तमानतादशायां[१८] विक्लित्त्यादि[१९]रूप[१]फलस्य भावित्वात् पक्ष्यतीति प्रयोगापत्तेः पचतीत्यनापत्तेश्च न फलेऽप्य[२]न्वयः।

---

[१] जै-तथैवानुभावात्
[२] अ1,के5,अ4-अन्तरङ्गतया
[३] अ3-वर्तमानत्वादौ प्रत्ययः, के5,म-वर्तमानत्वप्रतीतिः
[४] त2- "इति" नास्ति
[५] द2- "वदन्ति"नास्ति
[६] त2-वर्तमाने लिडि पराधिकारा
[७] त1,त3,द4-"एव" नास्ति
[८] त1,त5-तेन
[९] त्रि -तदा
[१०] जो2-"न तदानीं विवक्षितमिति" नास्ति
[११] द5-वाच्यत्वम्
[१२] अ1--"इति" नास्ति
[१३] त्रि-तदनन्वयः
[१४] अ1,जै-व्यापारवत्वेन
[१५] अ3-रनन्वये
[१६] त3,के4,द5-"अपि" इत्यधिकं
[१७] अ3-व्यापारता, त1,त5,त्रि-व्यापारस्य
[१८] 1915,त5,त्रि-वर्तमानदशायां, ब3- वर्तमानतादक्षायां
[१९] के4-विक्लिस्यादि

समानप्रत्ययोपात्तत्वमेवान्तरङ्गत्वम्। अन्तरङ्गत्वाच्च तयोरेवान्वयः स्यात्। इष्टापत्तिं परिहरति - न च तथा कस्यचिदनुभवः॥ अनुभवाभावश्च निरूप्यते।

व्यापारस्य कालान्वयित्वं सप्रमाणमाह - वस्तुतो वर्तमाने लडिति॥ कालविधिसूत्रम् "वर्तमाने लडि"(3-2-123)ति। तत्र धातोरित्यधिकाराल्लभ्यते। ननु अधिकाराल्लब्धे धातौ एव वर्तमानत्वान्वयोस्त्वित्यत आह - तत्र धातो वर्तमानत्वं नेति॥ धातुपदस्य शब्दरूपतया तत्र कालान्वयासम्भव इति भावः। तदानीं अधिकाराद् धातुपदोपस्थितिकाले। अन्वयाधारमाह - इति तदर्थस्येति॥ इतिर्हेतौ। तदर्थस्य धात्वर्थस्य वाच्यम् , वर्तमानत्वम्। ननु फलमपि धात्वर्थस्तदाह - तदर्थोऽपि प्राधान्याद् व्यापार एव गृह्यते। सिद्धान्ते व्यापारस्यैव प्राधान्य-स्वीकारात्। अयमाशयः - "वर्तमाने लडि"(3-2-123) इत्यत्र धातोरित्यधिकारा - ल्लब्धम्। तद्धातुपदं स्वार्थं वदत् प्राधान्याद् व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः। व्यावृत्तिस्थलमाह - न कर्तृकर्मफलेषु इति॥ ननु यत्र न व्यापारस्तत्र कालान्वया-नुपपत्तिरित्यत आह - जानतीत्यत्रापि इति॥ धातोर्व्यापारार्थकत्वमनिवार्यमिति भावः। जानातीत्यादावपि ज्ञानात्मको व्यापारोऽस्त्येव। आवरणभङ्गानुकूलो व्यापारो जानातेरर्थः। तच्च ज्ञानं वृत्तिरूपम्। तथा च वृत्या घटाद्यावरणं निवर्त्यते। तथा चोक्तम् -

बुद्धितत्स्थाचिदाभासौ द्वावेतौ व्याप्नुतो घटम्।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्॥

धिया वृत्या, अज्ञानमावरणं नश्येदित्यर्थः। ननु समानप्रत्ययोपात्तत्वेन कर्तृकर्मणोरेव कालान्वयोऽस्त्वित्यत आह - कर्तृकर्मणोरन्वये चेति॥ तत्र कर्तरि कालान्वये दोषमाह - अतीतक्रिये कर्तरि इति॥ कर्तरि कालान्वये व्यापारेऽतीतेऽपि कर्तुर्वर्तमानत्वेन पचतीत्यापत्तेः, अपाक्षीदित्यनापत्तेश्च। व्यापारान्वये तु व्यापारस्यातीतत्वेन अपाक्षीदित्यस्यैवौचित्यम्। कर्मणि कालान्वयेऽपि दोषोऽयम्। कालस्य फलेऽन्वये दोषमाह- इतोऽपि व्यापारवर्तमानदशायामिति॥ इतोऽपि एवमेवेत्यर्थकमिदम्। यद्वा हेत्वर्थकम्। वक्ष्यमाणदोषादेव। दोषमाह - व्यापारवर्तमानेति॥ नापि वर्तमानत्वादेः फलेऽन्वयः व्यापारस्य वर्तमानत्वेऽपि फलस्यावर्तमानत्वेन भावित्येन च पचतीत्यनापत्तेः, पक्ष्यतीत्यापत्तेश्च। व्यापारे

मतान्तरेऽपि यागपाकोद्देश्यककुण्डमण्डप[१] तण्डुल[२] क्रयणादियत्नव्यापारावादाय[३] "यागाय[४] यतत[५]" इतिवत् "पाकयागादि[६] करोतीति वा, यजति पचतीति वा[७]" प्रयोगवारणायाधःसंतापर्न[८]यत्नसाधारण्याय च प्रयोजकताविशेषस्यैव संबन्धस्याभ्युपेत - व्यत्वात्[९]।

अतिप्रसक्तव्यापारादि[१०] व्यावृत्तमाख्यातशक्यतावच्छेदकमेव[११] वदिष्याम इति चेत्, तर्हि[१२] तदेवामवा[१३] तीययत्नव्यावृत्त[१४] मस्त्विति दिक्। एवं गच्छत्यादेरप्यु-त्तरदेश[१५]संयोगानुकूलः क्रियारूपो[१६] व्यापार एव धात्वर्थ इति[१७] तत्रैव वर्तमानत्वा-न्वयः। एवं त्यज्यादे[१८]रप्यवधेयम्[१९]।

---

कालान्वयमाह - कालस्तु इति॥ तथैवानुभवात्। ननु समानप्रत्ययोपात्तत्वेन संख्यावत् कर्तरि कर्मणि वान्वयोऽस्त्विति चेदत्राह – समानपदोपात्तेनेति॥

---

[१] अ1,अ3-मण्टप, जै-चण्डप, जो2-मण्डपादि, त2-कुण्डलमण्डप

[२] भ1,द7-"तण्डुल" नास्ति,त्रि- तन्दुल

[३] अ1,जो2-व्यापारमादाय,भ2-फलव्यापारावादाय

[४] अ1,अ3,वा2,भार1,द,त3,जै,1900, के4,भ2,1915-यागाद्यर्थं, के5,म,अ4-पाकयागाद्यर्थं, द4-यागार्थं,भ1,द7,ब2-यागाद्यर्थे

[५] जै-यतयत

[६] द3-पाकयज्ञादिकं

[७] अ1,द4,भ1-पचति यजतीति वा

[८]अ1,जै,भार1,त3-वारणायाद्याधःसन्तपन,अ3-वारणायाधःसन्तपन, द1-वारणायाधोऽधस्सन्तापन,भ3-वारणायाद्यधःसन्तापन

[९] त1,1900,त2-पेयत्वात्, अ3,द3,1915-अभ्युपेतत्वात्

[१०] ब1,ज1-"आदि" नास्ति

[११] अ1--"इति" अधिकं

[१२] अ1--"तर्हि" नास्ति

[१३] त1-"मवा" नास्ति

[१४] त2-आमवातीयत्वप्याव्यापावृत्त

[१५] अ4- "उत्तरदेश" इति नास्ति

[१६] भ1-अनुकूलक्रियारूपो

[१७] के5-इत्येव

[१८] 1900,1915,के4-त्यजादे

[१९] त1-रप्यधेयम्

एतेन धात्वर्थे[3] एव[4] वर्तमानत्वान्वयः, न तु[5] व्यापारे, आमवातजडीकृतकलेवर-स्योत्थानानुकूलयत्नसत्त्वेनोत्तिष्ठतीति[6] प्रयोगापत्तेरिति[7] सिद्धान्तलेशोक्त[8]-मपास्तम्[9], धात्वर्थफलान्वये[10] बाधकानामुक्तत्वात्। यदि च फलव्यापारयोर्धात्वर्थत्वं स्वीकृत्य[11] [12]व्यापारे तदन्वयोऽभ्युपेयते, तदास्मन्मतमेव सिद्धम्। एवमपि[13] चिर-विनष्टे[14] घटे नाशस्य विद्यमानत्वेन[15] नश्यतीति प्रयोगापत्तिरित्युपक्रान्तासिद्ध्या-पत्तेश्च। व्यापारस्याविद्यमानत्वेन तथा प्रयोगासंभवात्। पचतीत्यादौ पाकानु-कूलकृतौ वर्तमानत्वान्वयानुभवविरोधाच्च। आमवातजडीय[16]यत्नश्च[17] नोत्थान[18]-प्रयोजकः, किं तु तदुद्देश्यक इति नाति[19]प्रसङ्गः। अत एव तत्रोत्थानाय यतते, नोत्तिष्ठतीति[20] प्रयोगः, न वोत्थानं[21] करोतीति प्रयोगः[22]।

---

[1] जो2,के4,त2-"रूप" नास्ति
[2] के4- "अपि"नास्ति
[3] अ1--"फले" इत्यधिकं
[4] के4-धात्वर्थेनैव
[5] त3,के4-"तु" नास्ति
[6] त2-सत्त्वेन तिष्ठतीति
[7] त3,के4,भ1,द7-प्रयोगापत्तिरिति
[8] अ1-लेशसङ्ग्रहोक्त
[9] के5,म-मप्यपास्तम्
[10] अ3-धात्वर्थरूपफलान्वये, त2-"धात्वर्थ" नास्ति,फलान्वे
[11] ब3-पुरस्कृत्य
[12] अ1,के4,त2-प्रधाने व्यापारे, 1915 - व्यापारो
[13] अ1--"अपि" नास्ति, जो2-अपि च
[14] अ1,1900,त2,द2,भ3,1915-"अपि" इत्यधिकं
[15] भ2,ज1-विद्यमानत्वात्
[16] के4,त1,त3,1915,ज1,ब3-जडीकृत
[17] अ1,द3,ज1,ब3-यत्नस्तु
[18] जो2-"प्रयोजन" इत्यधिकं
[19] त2 -नास्ति
[20] के4,वा2,भार1,द1,द4,त1,त2,त3,1900,भ1,1915-तीत्येव
[21] वा2,ब2-तूत्थानं, अ3,जै,द1,द4,त1,त2,त3,1900,1915,भ1,भ2,भ3-चोत्थानं
[22] वा2-"प्रयोगः" नास्ति

कालान्वयस्वीकारे दोषमाक्षिप्य प्रतिखण्डयति - एतेन धात्वर्थे एव वर्तमानत्वान्वय इति॥ एतेन पूर्वोक्तदोषेण। आक्षेप्स्यमानदोषनिराकरणेन वा धात्वर्थोऽत्र फलम् , न तु व्यापार इत्यत्र व्यापारस्याभिधानात्। अयमाशयः - यदि कालान्वयो व्यापारे क्रियते तदा आमवातजडीकृतकलेवरस्य तथानुकूलव्यापारसत्त्वाद् अयमुत्तिष्ठतीति प्रयोगापत्तिरूपो दोष इति सिद्धान्तलेशकाराभिप्रायः। आमो रोगविशेषस्तेन जडीकृतं शिथिलीकृतं कलेवरं शरीरं यस्य तस्येत्यर्थः। कले शुक्रे वरं श्रेष्ठम् , हलदन्तात्सप्तम्या अलुक्। एतेन मतमिदमपास्तम्। अपास्तत्वप्रयोजकमाह - धात्वर्थफलान्वये इति॥ उक्तत्वात् इति॥ फलान्वये पचतीत्यत्र पक्ष्यतीत्यापत्ति-रूपस्य दोषस्योक्तत्वात्। सिद्धान्तलेशे धात्वर्थेऽन्वयः उक्तः। यदि धात्वर्थपदेन व्यापार एव गृह्यते तदा नास्ति कोऽपि दोष इत्याह - यदि चेत्यादिना॥ कालस्य फलान्वये दोषान्तरमाह – एवमपीति॥ अपिः दोषान्तरसमुच्चायकः। चिरं विनष्टः, चिरविनष्टः गम्यदीनामुपसंख्यानम् इत्यनेन सुप्सुपेत्यनेन वा समासः। सामग्री-बलादविलम्बितनाशप्रतियोगिन्यपि घटे नाशस्य ध्वंसस्य सत्त्वेन। ध्वंसस्या-नन्तत्वात्। तादृशनाशरूपस्य फलस्य वर्तमानत्वात् फलवर्तमानत्वाभिप्रायेण घटो नश्यतीति प्रयोगापत्तिरिति भावः। तथा सति उपक्रान्तस्य प्रकरणप्राप्त-स्योचितस्येत्यर्थः। अनशदिति प्रयोगस्यासिद्धत्वापत्तिः। तस्माद् व्यापारे काला-न्वयः कार्यस्तदाह- व्यापारस्याविद्यमानत्वेनेति॥ तथा प्रयोगस्य नश्यतीति प्रयोगस्य असम्भवात्। नाशानुकूलो व्यापारो णश् धातोरर्थः। स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानरूपः। संयोगादिरूपसामग्रीसमवधानस्य दण्डेऽपि सत्त्वात् घटो नश्यतीत्यत्र दण्डो नश्यतीति प्रयोगवारणाय प्रतियोगित्वविशिष्टेति। तथा सति दण्डे नाशप्रतियोगित्वाभावान्न दोषः। अतस्तस्यां सामग्र्यां सत्यां घटो नश्यति, तदत्यये नष्ट इत्यादि प्रयोगव्यवस्थेति ध्येयम्। कालस्य व्यापारान्वयमनुभावयति - पचतीत्यादौ पाकानुकूलकृताविति॥ कृतौ एव वर्तमानत्वादेरन्वयस्यानुभवसिद्धत्वमिति भावः। फलेन्वये तादृशानुभव-विरोधः स्यात्। अनुकूलव्यापारे(यत्ने) वर्तमानत्वाद्यन्वयफलमाह –आमवात-जडीकृतयत्नश्चेति॥ उत्त्थानं ऊर्ध्वदेशसंयोगः, तज्जनको व्यापारस्तादृशे रोगिणि नास्ति अशक्तेः, किन्तु तादृशोत्थानोद्देश्यक एव। अनुकूलव्यापारसत्त्वे एव

उत्तिष्ठतीति प्रयोगो न तु तदुद्देश्यकव्यापारे इति ग्रन्थाशयः। तत्रत्यप्रयोगमाह - उत्थानाय यतते, नोत्तिष्ठतीत्येव प्रयोगः॥ अत्र मतान्तरसम्मतिमाह - मतान्तरे इति॥ यदा यागो नारब्धः, किन्तु तत् सामग्री संघटनादि क्रियते तदा यागाय यतते इत्येव प्रयोगो न तु यजते इति तद्वदिहापि। यागस्य पाकः पुरोडाशादिस्तदुद्देश्यकः, तत्फलकः, कुण्डमण्डपादितण्डुलादिक्रयणादिरूपौ यत्नव्यापारौ आदाय यागाद्यर्थं यतते इति समासार्थः। तत्र तादृशप्रयोगायोगं साधयति - इतिवत् पाकयागादिकरोतीति॥ यत्र पाकाद्युद्देश्येन प्रवृत्तिः, यतते इत्येव प्रयोगः। न तु पचति यजतीत्यादिः। हेतुमाह - पचतीति प्रयोगवारणायेति॥ पचादिधातूनां न केवलव्यापारे शक्तिरपि तु फलानुकूलव्यापारे एव शक्तिः। तथा तत्र अनुकूलव्यापारस्यासत्त्वात् न तथा प्रयोगः, अत एवाह – प्रयोजकताविशेषेति॥ प्रयोजकताविशेषः फलव्यापारयोः सम्बन्धः।तेन चाधःसन्तापनादीनामपि धात्वर्थत्वं सिद्ध्यति, तेषां फलप्रयोजकत्वात्। ननु पूर्वोक्ताः क्रयणादिव्यापारा अपि फलप्रयोजनका एवेति चेन्न, यागादिकं प्रति तेषां हेतुत्वेऽपि फलम्प्रति अन्यथासिद्धतया कारणत्वानुपपत्तेः। व्यावृत्तिविधिमाह – अतिप्रसक्तेति॥ अतिप्रसक्तः पाकादिफलकतण्डुलक्रयणादिव्यापाराणां यजादिधातुवाच्यत्वावगमः, तादृशवाच्यत्वव्यावृत्तमेव पचादिधातूनां शक्यतावच्छेदकं फूत्कारत्वादिकम् फलजनकतावच्छेदकत्वविशिष्टं वदिष्यामः वयं मीमांसका इति शेषः।

ननु पूर्वोक्तव्याख्यानस्य किं फलमित्यतः आह - तर्हि तदेवेति॥ यथा तत्र फलप्रयोजकत्वविशिष्ट एव व्यापारस्तथैव उत्तिष्ठतीत्यादौ अपि उत्थानप्रयोजकव्यापार एव वाच्यस्तथा च आमवातजडीकृतकलेवरव्यापारे उत्थानप्रयोजकत्वाभावेन तत्र उत्तिष्ठति इति प्रयोगानवसरः, रोगिणो व्यापारस्योत्थानरूपफलाजनकत्वात्। भूषणसारे तु परयत्नस्याज्ञानादप्रयोगः, किञ्चिच्चेष्टादिना तदवगतौ चायमुत्तिष्ठति शक्त्यभावात् फलन्तु न जायते इति लोकप्रतीतेरिष्टत्वादित्युक्तम्। सार्वत्रिकनियममाह - एवं गच्छत्यादेरपीति॥ गम् धातुरुपलक्षणम्। सर्वधातूनां संयोगादिरूपफलानुकूलो व्यापार एव वाच्य इति विवेकः। तस्मिन् व्यापारे एव च वर्तमानत्वाद्यन्वयः। त्यजादेरिति॥ विभागजनकव्यापारस्त्यजादेरर्थः। तत्र विभागजनको व्यापारस्त्यजादेरर्थः। तत्रापि तस्मिन् व्यापारे कालान्वयः।

### 3.18 पचतीत्यादौ बोधप्रदर्शनम्

**35.** इत्थं च "पचति, पच्यत" इत्यत्रैकाश्रयकः[१] पाकानुकूलो वर्तमानो व्यापार इति बोधः। एकाश्रयिका या[२] विक्लित्ति[३]स्तदनुकूला साम्प्रतिकी भावनेति च । अत्र[४] कर्मणः फलद्वारा व्या[५]पारेऽन्वयः[६]। कर्मवाचकतण्डुलादिपदसमभिव्याहारस्थले[७] आख्यातोपस्थापितकर्मणस्तण्डुलादिभिः[८] सममभेदान्वयः। एवं कर्तृप्रत्ययस्थले कर्तर्यपि बोध्यम्[९]।

तथा च[१०] "तण्डुलं पचति चैत्र" इत्यत्र[११] एकतण्डुलाश्रयिका[१२] या विक्लित्ति[१३]-स्तदनुकूलैकचैत्रा[१४] भिन्नाश्रयिका[१५] वर्तमाना[१६] भावना, "तण्डुलः पच्यते[१७] चैत्रेणे"त्यत्र चैकचैत्राश्रयिका[१८] एकतण्डुलाभिन्नाश्रयिका या विक्लित्ति[१९]स्तदनुकूला साम्प्रतिकी भावनेति बोधः। "नश्यती"त्यत्रापि व्यापार एव तदन्वयः। स च प्रति-

---

[१] के4- "पक्ताश्रयकः"इति अधिकं

[२] द4-"या"नास्ति

[३] के4-विक्लिप्ति, त5-विक्लुत्ति

[४] के4,त2- "अत्र"नास्ति

[५] ब1-"एकाश्रयिका" इत्यारभ्य "व्या"पर्यन्तं ग्रन्थः नास्ति , त2-"व्या"नास्ति

[६] ज1-व्यापारे अन्वयम्

[७] अ1,भार1,द1,त1,त3,त2,जै,ब1,1900,के4,द2,द3,भ1,भ2,म-"च" इत्यधिकं, के5,अ4-समभिव्याहारे च, द4-"वा" इत्यधिकं, म-"स्थले" नास्ति

[८] त्रि-तन्दुलादिभिः

[९] भ2-बोध्यः,ज1-बोधः

[१०] अ1-"तथा च" नास्ति

[११] अ1-"इत्यत्र" नास्ति

[१२] अ4-एकतण्डुलाभिन्नाश्रयिका

[१३] के4- विक्लिप्ति

[१४] अ1,के5,भ3,म,अ4-देवदत्ता

[१५] वा2-चैत्राश्रयिका

[१६] अ1-वर्तमानकालिका

[१७] त2-"पच्यते"नास्ति

[१८] भ1- "या विक्लित्तिः " इत्यारभ्य "चैकचैत्राश्रयिका " पर्यन्तं ग्रन्थः नास्ति

[१९] के4- विक्लिप्ति,त5-विक्लुत्ति

योगिता[1] सहितनाशसामग्री। अतस्तस्यां सत्यां[2] नश्यति[3], अतीतायां[4] नष्ट इत्याद्युपपद्यते[5]। जायत इत्यादि[6]षड्भावविकारेषु नाशस्यापि गणितत्वा[7]दुत्पत्तिवत् सोऽपि चरमक्षण[8]संबन्ध एव, तद्दशायां नश्यति, तदत्यये नष्ट इत्यपि[9] अत एव संगच्छत इत्यप्पय्यदीक्षिताः[10]।

---

पदार्थानुक्त्वा वाक्यार्थमाह – इत्थञ्चेत्यादिना॥ वैयाकरणानां व्यापारस्यैव शाब्दबोधे प्राधान्येन भानं तदनुरोधेनाह - तण्डुलैकाश्रयकः इति॥ अत्र आख्यातार्थसंख्यायाः कर्तरि अन्वयः। चैत्रादेराख्यातार्थे आश्रयेऽन्वयः, कालस्यापि व्यापारेऽन्वयः। धात्वर्थफलस्यानुकूलत्वसम्बन्धेन व्यापारेऽन्वय स्तदाह -एकाश्रयक इति॥ कर्मणि प्रत्ययेऽपि व्यापारस्यैव प्राधान्येन भानम् । अत्रायं विशेषः – तण्डुलादिप्रकृत्यर्थस्य अमर्थाश्रयेऽन्वयः। अमर्थाश्रयस्य निष्ठत्वसंबन्धेन विक्लित्तिरूपे फले फलस्य चानुकूलत्वसम्बन्धेन व्यापारेऽन्वयः। शेषं पूर्ववत्। शाब्दबोधाकारस्तु मूले एव उक्तः, शेषं स्पष्टम्। अत्र पचतीत्येव पाठो ज्यायान्, अस्यैव शाब्दबोधदर्शनात्। घटो नश्यतीत्यत्र नाशः चरमक्षणसम्बन्धः। क्षणे चरमत्वञ्च स्वाधिकरणक्षणप्रागभावानधिकरणत्वम्, तथा च घटाभिन्नश्रयको नाशानुकूलो व्यापार इत्याकारकः शाब्दबोधः। स च प्रतियोगित्वविशिष्टनाश सामग्रीसमवधानम्। तादृशसामग्रीसमवधानरूपस्थित्यात्मके व्यापारे कालान्वयः। अत एव तस्यां सत्यां नश्यति तदत्यये नष्टः, तद्भावित्वे नङ्क्ष्यतीति प्रयोगः। शेषं स्पष्टम्।

---

[1] त1-प्रतियोगिना,अ4-प्रतिभिन्नायोगिता

[2] त2-"सत्यां"नास्ति

[3] द3-नश्यतीति

[4] त1,के4,द3-"तस्यां" इत्यधिकम्

[5] अ1-"आदि" नास्ति

[6] के5,म-इति

[7] म- परिगणतत्वा

[8] ज1-परमक्षणं----

[9] त2-"अपि"नास्ति

[10] त5-अप्पयदीक्षिताः, ज1-इत्यप्पदीक्षिताः

ननु नाशस्य नित्यत्वेन कथं तत्र कालान्वय इति चेदाह – जायत इत्यादि॥ जायते अस्ति विपरिणमते वर्द्धते, अपक्षीयते विनश्यतीति षड्भावविकारा यास्कोक्ताः। विनश्यतीत्यनेन नाशग्रहणात्।

36. "नश्यति, नङ्क्ष्यति[१], नष्ट" इत्यादिषु[२] प्रत्ययेन[३] यथायथं वर्तमाना[४], भविष्यन्ती[५], अतीता[६] चोत्पत्तिः[७] प्रतियोगित्वं च[८] लक्ष्यते। तथा च तादृशोत्पत्तिमन्नाशप्रतियोगीति बोधः।

अत एव नाशस्य नित्यत्वात् "सर्वदा नश्यति, श्वो नङ्क्ष्यति[९] पटादौ[१०] परश्वो नङ्क्ष्यति[११], प्रपूर्वदिन[१२]नष्टे[१३] पूर्वेद्युः[१४] नष्ट इत्यापत्ति[१५]र्निरस्ते"ति नैयायिकनव्याः।

"आकाशोऽस्ती"त्यादौ चैकाकाशाभिन्नाश्रयकः[१६] स्वस्वरूपधारणानुकूलो वर्तमानो व्यापार इत्यादि स्वय[१७]मूह्यम्।

---

[१] 1900-नक्ष्यति,त2-सङ्क्ष्यति

[२] द1,1900,के5,अ4--इत्यादि

[३] के5-प्रत्ययेषु

[४] म-वर्तमान

[५] अ1,त2,द3,भ1,भ2,1915-भविष्यती

[६]जो2-नङ्क्ष्यति नश्यति नष्ट इत्यादिषु प्रत्ययेन यथायथं भविष्यन्ती वर्तमाना अतीता, द1,त1,जै,1900,म-भविष्यत्यतीता

[७] के5-त्वोत्पत्तिः,म-चोत्पत्ति,अ4-तावदुत्पत्तिः

[८] त2-"च"नास्ति

[९] अ3,द1,जै,ब1,1900,द3,भ1,1915-नश्यति, के5- "श्वो नङ्क्ष्यति" -"या" नास्ति

[१०] ब3-घटादौ

[११] म-नङ्क्ष्यतीति

[१२] वा2,जो2,1900,के4,भ2-प्रपूर्वदिने, अ1-"प्र" नास्ति

[१३] 1915-प्रपूर्वदिननष्टं

[१४] ब1,1900,के4-परेद्युः ,1915- पूर्वेद्युनष्ट

[१५] अ1-इत्याद्यापत्ति

[१६] अ3-चैकाकाश्रयकाभिन्नाश्रयकः,दं7,म– चैकाकाशाभिन्नाश्रयिकः

[१७] ब3-स्वरूप...

### 3.19 धात्वर्थप्राधान्ये प्रमाणप्रदर्शनम्

नन्वत्र फलं न भावनायां विशेषणम्, विशेष्यतासंबन्धेन प्रकृत्यर्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुताया[१] अन्यत्र क्लृप्तत्वात्, भावनायाश्च प्रत्ययार्थत्वाभावादिति चेत्, मैवम्[२], [३]धातुभिन्नप्रकृत्यर्थप्रकारकबोधे[४] एव तस्या[५] हेतुत्वात्।

फलव्यापारयोर्भिन्न [६] शक्तिवादिभिर्नैयायिकनव्यादिभि [७] रप्येवमेवाभ्युपेयत्वात्। तथापि धात्वर्थप्राधान्ये किं मानमिति चेत्, "भावप्रधानमाख्यातम्" (नि.अ1.पा1) इति निरुक्त[८]वचनमेव। वस्तुतो[९] बोधे व्युत्पत्तिग्रहः कारणम्। तथा च व्युत्पत्त्यनुसारेणैव बोधः। एवं च आख्यातार्थ[१०]कालकर्तृ[११]धात्वर्थफलप्रकारक[१२]शाब्दबोधे[१३] धातुजन्यभावनोपस्थितिर्विषयतया[१४] हेतुरिति[१५] कार्यकारणभावरूपाकाङ्क्षा वाच्येति न कश्चिद् दोषः।

---

इदानीं नश्यतीत्यादिप्रयोगोपपत्तय आह – नश्यतीति॥ नश्यति इत्यत्र "वर्तमाने लडि"(पा.3-2-123)ति वर्तमाने लट् लकारः, नङ्क्ष्यतीत्यत्र "लृट् शेषे

---

[१] अ3-हेतुतया

[२] के5,म-चेन्न

[३] के5-पन्थाधातु

[४] के5-शाब्दबोधे, ज1-धातुभिन्नाप्रकृत्यर्थप्रकारकबोधे

[५] जै,ब1,त2,भ2,द5-तस्य

[६] के4-फलव्यापाराभिन्नं

[७]के5,-नैयायिकै,द4-इतः पूर्वं पञ्चमे वाक्ये नित्यत्वादित्यत्र "त्वात्" इत्यारभ्य नैयायिकनव्यादिभिः इत्यन्तम् अत्र नास्ति चेदपि पुटान्तरे अत्रत्यत्वेन प्रदर्शितम्

[८] भ3- "एकतण्डुलाभिन्नाश्रयिका" इत्यत्र "न्नाश्रयिका" इत्यारभ्य "निरुक्त" इति पर्यन्तं ग्रन्थः नास्ति

[९] जो2-वस्तुतस्तु

[१०] जै,त3-संख्यान्याख्यातार्थ,द3,भ2,द6-संख्याभिन्नाख्यातार्थ

[११]के5,म,अ4-"कालकर्तृ"नास्ति, भ3-कालाख्यातार्थकर्तृधात्वर्थफलप्रकारकशाब्दबोधे,द5-एवं च कारकाख्यातार्थकर्तृ

[१२] के5-प्रकारण

[१३] त2-बोधकबोधे

[१४] अ1-स्थितेर्विषयतया, जो2- "विषयतया" नास्ति

[१५] भार1,त1,त3,के4,त5-कारणमिति

चे"(पा. 3-3-13) ति भविष्यति लृट्। नष्ट इत्यत्र भूते क्तः। एवञ्च उक्तस्थलेषु ये प्रत्ययास्तेषां कालविशेषो वाच्यः, तादृशकालविशिष्टा उत्पत्तिर्लक्ष्या, प्रतियोगित्वमपि तल्लक्ष्यम्। यथा नश्यतीत्यत्र लड्वाच्यो वर्तमानकालः, वर्तमानोत्पत्तिः लक्षणया लक्ष्यते, प्रतियोगित्वमपि प्रत्ययलक्ष्यम्। अत्र उभयत्र लक्षणायां नैकविधः शक्यसम्बन्धरूपो लक्षणा सम्बन्धः सम्भवति, तथापि विवक्षावशात् भिन्नोऽपि सम्बन्धः प्रत्याय्य एवेति ग्रन्थस्याशयः।

लक्षणास्वीकारफलमाह – तादृशेति॥ तादृशवर्तमानोत्पत्तिमन्नाश-प्रतियोगी घटादिः। धात्वर्थनाशे उत्पत्तेरन्वयः, उत्पत्तौ च वर्तमानत्वादेरन्वयः। नाशस्य प्रतियोगितया प्रथमान्तार्थेऽन्वयः। एतन्मते प्रथमान्तार्थमुख्य-विशेष्यकबोधस्य स्वीकारात्। तथा च वर्तमानाद्युत्पत्तिमन्नाशप्रतियोगीति शाब्दबोधः मूलोक्तो जायते।

लक्षणाप्रकारश्चेत्थं बोध्यम् - प्रत्ययो लडादिः, तस्य शक्यार्थो वर्तमानत्वादिः तत्सम्बन्धी स्वावच्छिन्नोत्पत्तिमन्नाशप्रतियोगी। सम्बन्धश्च स्वाव-च्छिन्नोत्पत्तिमन्नाशप्रतियोगित्वम्। अत्र सम्बन्धिघटकनाशस्य धातुलभ्यतया तत्र लक्षणानुपयोगं दृष्ट्वा नाशं विहाय वर्तमानोत्पत्तौ प्रतियोगित्वे च लक्षणेति मत्वा प्रतियोगित्वञ्च लक्ष्यते इत्युक्तम्।

ननु नाशस्य सदा विद्यमानत्वेन सदैव नश्यतीति वर्तमानप्रयोगापत्ति-रित्यत आह - अत एवेति॥ उत्पत्तौ कालान्वयादेव। नाशस्य धात्वर्थस्य नित्यत्वादनन्तत्वात् सर्वदा वर्तमाने भविष्यति च नश्यतीति प्रयोगापत्तिः। श्वो नश्यति पटादौ सप्तमी एषा। पटादेः श्वोनाशे विवक्षिते, तादृशनाशस्य परश्वो विद्यमानत्वेन परश्वो नङ्क्ष्यतीति प्रयोगापत्तिः।

भूतकालस्यापि साङ्कर्यमाह - पूर्वदिवसे नष्ट इति॥ प्रपूर्वदिवसे नष्टे घटादौ। परेद्युः परस्मिन्नहनि। एद्युस् प्रत्ययः। परेद्युर्घटो नष्टः इति प्रतीत्यापत्तिः, पूर्वदिनावच्छिन्ननाशस्य परदिनावच्छिन्नतया प्रतीतिः स्यादिति भावः। पूर्वपरेद्यु-श्शब्दसान्निध्येन तदवच्छिन्ननाशप्रतीत्यनुरोधेन नष्ट इति प्रतीतिर्बोध्या। तेन च नाशस्य विद्यमानत्वेन नश्यतीत्येव स्यान्न तु नष्ट इति दोषारोपो नेति ध्येयम्।

ननु आकाशस्य नित्यत्वेन कालपरिच्छेदेन आकाशोऽस्तीति प्रयोगानुपपत्तिरत आह – आकाशोऽस्तीत्यादौ इति॥ अयमभिप्रायः – आकाशोऽस्तीत्यत्र धात्वर्थः सत्ता, तस्याश्च नित्यत्वेन कालापरिच्छेदात् लडर्थासङ्गतिरिति प्रश्ने स्वरूपधारणानुकूलव्यापार एवास्धातोरर्थः। स च व्यापारः आश्रयतारूपः। तत्रैव कालान्वयः। ननु आश्रयताया आकाशरूपतया आकाशस्य च नित्यतया सदोषस्तदवस्थ एवेति चेन्न। पञ्चीकरणप्रक्रियया आकाशस्यापि अनित्यत्वात् ब्रह्मव्यतिरिक्तस्य सर्वस्यापि भावस्य जायते अस्तीत्यादि षड्विधभावविकारोपेतत्वाच्च।

धात्वर्थव्यापारे विशेषणतया फलान्वयमाक्षिपति - नन्वत्र फलं नेति॥ फले प्रधानं व्यापार इति मूलोक्त्या फलस्य विशेषणतया व्यापारेऽन्वयः। स चायुक्तः, विशेष्यतासम्बन्धेन प्रकृत्यर्थप्रकारकबोधम्प्रति प्रत्ययजन्योपस्थितेः कारणत्वात्। अन्यत्र घटमित्यादौ। तथाहि - विशेष्यतासम्बन्धेन घटात्मकप्रकृत्यर्थप्रकारकबोधः अमर्थकर्मत्वे, तत्र च विशेष्यतासम्बन्धेन अम्प्रत्ययजन्योपस्थितिरपि वर्तते। शक्तिः कारकमिति पक्षेनेदम्। तन्मते कर्मत्वमेवामर्थः। प्रकृते च धातुरूपप्रकृत्यर्थप्रकारकशाब्दबोधो व्यापारे तत्र प्रत्ययजन्योपस्थितिः विशेष्यतासम्बन्धेन नास्तीति कारणाभावेन फलप्रकारकव्यापारविशेष्यकशाब्दबोधानुपपत्तिरिति भावः। तदाह - भावनायाश्च प्रत्ययार्थत्वाभावादिति॥

दोषमपहरति – मैवमिति॥ कार्यकारणभावे प्रकृतौ धातुभिन्नत्वनिवेशेन दोषाभावादित्यर्थः, तथा च प्रत्ययजन्योपस्थितेः धातुभिन्नप्रकृत्यर्थप्रकारकबोधम्प्रत्येव हेतुत्वात्। नैयायिकैरपि एवं स्वीकृतमित्याह – फलव्यापारयोर्भिन्नशक्तिवादिभिरिति॥ यस्य नैयायिकस्य मते फले व्यापारे च भिन्ना शक्तिः तन्मतेऽपि एवं रीतेः स्वीकारात्।

फलप्रकारकबोधं स्वीकृत्य तत्र मानं पृच्छति तथापि धात्वर्थप्राधान्ये किं मानमिति॥ धात्वर्थो व्यापारः तस्य प्राधान्ये। मान जिज्ञासायाम्। समाधानमुच्यते – भावप्रधानमाख्यातमिति॥ अत्र आख्यातपदं तिङन्तपरम्। केचित्तु धातुपरमेवाख्यातपदम्। चत्वारिपदजातानि नामाख्यातोपसर्गनिपाताश्चेति निरुक्तात् इत्याहुः।

वस्तुतस्तु भावकालकारकसंख्याश्चत्वारोऽर्थाः आख्यातस्य, तत्र भावः प्रधानमिति भाष्योक्तेश्चाख्यातपदं तिङन्तपरमेव। तथा च व्यापारस्य प्राधान्ये निरुक्तमिदं मानम्।

ननु यदि निरुक्तं व्यापारप्राधान्ये प्रमाणं तदा नैयायिकैरपि व्यापार-मुख्यविशेष्यको बोध इष्यताम् , न तु प्रथमान्तार्थ मुख्यविशेष्यक इत्यत आह - वस्तुतो बोधे व्युत्पत्तिग्रहः कारणम् इति॥ व्युत्पत्तिरनुभवः, स चानेकशिष्टानुगृहीतत्वे सति लाघवमूलकः।

तथा च स्वमते कार्यकारणभावं दर्शयति - एवं चेत्यादिना॥ कार्यकारणभावः स्पष्टः। कार्यकारणभावरूपा आकाङ्क्षेति। अर्थनिष्ठा आकाङ्क्षेति मत्वेदम्। यद्वा प्रवृत्तिं प्रति इच्छायाः कारणत्वेन तादृशबोधं प्रति एतादृशस्य कार्यकारणभावस्य आकाङ्क्षा बोधमिच्छुभिः कार्येत्यर्थः।

3.20 भावनायाः प्रथमान्तार्थविशेषणत्वनिरासः

**37.** ननु भावना फलांश[१]विशेष्यास्तु[२], प्रथमान्तार्थविशेषणं तु कुतो न स्यात्, भावनाप्रकारकशाब्दबोधं प्रति प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावस्य सुवचत्वात्।

न च "भावप्रधानमाख्यातम्" (नि.अ**1**.पा.**1**) इति वचनविरोधः, आख्यातार्थ[३] भावनाया धात्वर्थे प्राधान्यमात्रस्य तदर्थत्वात्[४]। अन्यथा "सत्त्वप्रधानानि नामानि" (नि.अ**1**.पा**1**) इति शेष[५]वचनविरोधात्। एवं च पचतीत्यत्र पाकानुकूलकृतिमान् देवदत्त इति शाब्दबोध इति[६] नैयायिकाभ्युपगतमेव[७] कथं नाभ्युपेयत[१] इति चेत्,

---

[१] भार1,द2,त5-फलांशे, के5- "अस्तु " नास्ति,त2-फलांशविशेषणमस्तु

[२] भ1-विशेषास्तु

[३] जै-आख्यातान्तार्थ,के5,अ4-आख्यातान्तार्थात्

[४] भ1-प्राधान्यमात्रतदर्थत्वात्

[५] अ3,त3,जो2,जै,के5,द3,भ1,अ4-विशेष

[६] भ1- "शाब्दबोध इति"नास्ति

[७] के5,म-नैयायिकाभ्युपगतेः, त्रि- नैयायिकाभ्युपगतशाब्दबोधः,

मैवम्, एवं ह्याख्यातार्थकर्तु[२] रनन्वयापत्तेः[३]। आख्यातार्थ[४] प्रथमान्तार्थयो[५] रभेदान्वया[६]भ्युपगमेऽपि[७] "पक्ता गच्छती"तिवत् "पचतिकल्पं गच्छति" इत्यापत्तेः। ईषदसमाप्त[८] पाककर्ता गच्छतीत्यन्वयसंभवात्। सिद्धान्ते च[९] क्रिययोः परस्परानन्वया[१०]न्नातिप्रसङ्गः।

---

प्रथमान्तार्थप्राधान्यवादी शङ्कते - ननु भावनेत्यादिना[११] ॥ भावना फलांशविशेष्या अस्तु इतिच्छेदः। फलापेक्षया भावनाविशेष्या स्यात् किन्तु प्रथमान्तार्थं प्रति सा भावना विशेषणं स्यादिति भावः। नैयायिकमतमिदम्। तदभिप्रायेण कार्यकारणभावमाह - भावनाप्रकारकबोधम्प्रति इत्यादिना॥ एतन्मते शाब्दबोधे भावनाप्रकारतया भासते, प्रथमान्तार्थो विशेष्यतयेति स्वीकारेणायं कार्यकारणभावः। उक्तकार्यकारणभावविरोधमाह - न चेत्यादिना॥ भावप्रधानमाख्यातमिति निरुक्तवचनेन तिङन्तस्थले, व्यापारस्यैव प्राधान्यं बोध्यते, ततश्च विरोधः। विरोधं परिहरति - आख्यातार्थः भावना, धात्वर्थः फलम्। तत्र धात्वर्थफलापेक्षया आख्यातार्थभावनायाः प्राधान्यमित्यत्रैव तादृशनिरुक्तवचनस्य तात्पर्यान्न तेन विरोध इति भावः। नैयायिकमते भावना आख्यातार्थ इति न विस्मर्तव्यम्। उक्तार्थास्वीकारे दोषमाह – अन्यथेति॥ अयमाशयः – भावप्रधानमाख्यातमिति निरुक्तस्य यदि भावकालकारकसंख्यासु व्यापारस्य

---

[१] भार1,त3-"शाब्दबोध इति नैयायिकाभ्युपगतमेव कथं नाभ्युपेयते " इत्यस्य स्थाने "नैयायिकाभ्युपगत एव शाब्दबोधः कथं नाङ्गीक्रियते ", त1,त5-"नैयायिकाभ्युपगम एव शाब्दबोधः कथं नाङ्गीक्रियते ", जै-"नैयायिकाभ्युगमो व शाब्दबोधः कथं नाङ्गीक्रियते ", के4- नाङ्गीक्रियते इत्यस्ति

[२] के5,अ4- एवं व्याख्यातार्थकर्तुः

[३] त1-रन्वयापत्तेः

[४] अ3,भार1,द1,त1,त3,1900,के4,के5,म,भ1-"अर्थ" नास्ति

[५] भ1-प्रथमान्तयोः

[६] 1900,द 5 - "अन्वय" नास्ति

[७] के5,म- "अपि" नास्ति

[८] द1,भ3-ईषदपरिसमाप्त

[९] के5,अ4- "च"नास्ति

[१०] द3-परस्परमनन्वया

[११] ननु भावनेत्यस्य ग्रन्थभागस्य उद्देश्यं वैयाकरणमते एव प्रथमान्तार्थविशेष्यत्वे दोषकथनम्। स्पष्टतायै द्र. 37 खण्डस्य टिप्पणी।

माख्यातमिति निरुक्तस्य यदि भावकालकारकसंख्यासु व्यापारस्य प्राधान्यमित्यर्थः, तथा च भावप्रधानत्वं तिङर्थनिष्ठप्रकारतानिरूपितविशेष्यताशालिभावप्रतिपादकत्वमिति फलितोऽर्थः, तदा सत्त्वप्रधानानि नामानि, इति शेषवचनम् विरुद्धमेव स्यात्, वाक्यस्फोटस्यैव सिद्धान्तितत्वेन आख्यातघटितस्य वाक्यत्वेन नामपदस्य स्वातन्त्र्येण कुत्राप्यप्रयोगात् व्यापारस्यैव सर्वत्र प्राधान्यात्। तथा च नामपदस्य सत्त्वप्रधानत्वबोधकं सत्त्वप्रधानानीति निरर्थकमेव स्यात्। तथा चानया रीत्या उक्तार्थकरणे विरोधः स्यादिति। तद्वारणाय इदं निरुक्तं पदस्फोटार्थनिरूपकमेवेति मन्तव्यम्। तथा सति न विरोधः। तथाहि – भावप्रधानमाख्यातम् इति पचतीत्यादिपदजन्यबोधनियामकम् , सत्त्वप्रधानानीति नामपदजन्यबोधनियामकमिति द्वयोरपि विभिन्नविषयकत्वेन नास्ति विरोध इति प्रतिभाति। नामपदेन कृदन्तप्रकृतिकविभक्त्यन्तानि, यद्वा उपसर्गनिपातभिन्नानि सुबन्तानि। अत एव नामाख्यतोपसर्गनिपाताश्चेत्यत्र पदचतुष्टयविभागः संगच्छते। सत्त्वप्रधानानीति लक्षणं नामानीति लक्ष्यम्। सत्त्वं द्रव्यम् लिङ्गसंख्यान्वयि। तथा च द्रव्यनिष्ठविशेष्यताकबोधजनकानि नामानि। सत्ता द्रव्यम् लिङ्गम् संख्या च नामार्थः। सत्त्वं द्रव्यं प्रधानं यत्रेति विग्रहः।

नैयायिकमतमारोप्य खण्डयितुं प्रयतते – एवञ्चेति॥ सर्वदोषनिराकरणे सति प्रथमान्तार्थमुख्यविशेष्यको नैयायिकसम्मतो बोधो मन्तव्य इति पूर्वपक्षिण आशयः। खण्डयति – मैवम्। एवं हीति॥ नैयायिकरीत्या उक्तशाब्दबोधस्वीकारे आख्यातार्थकर्तुः कुत्रान्वयः। न तावद्धात्वर्थपाके, फलात्मकपाके कर्तुरनन्वयात् , नापि कृतौ, एकस्यैव कर्तुः कृतौ विशेषणत्वविशेष्यत्वयोरापत्तेः। ननु आख्यातार्थकर्तुरिति कथनासङ्गतिः, नैयायिकनये कर्तुराख्यातर्थत्वाभावादिति चेन्न। स्वपक्षाभिप्रायेणास्य प्रस्तावात्। आख्यातार्थकर्तुः प्रथमान्तार्थस्य च सामान्यविशेषभावेन परस्परमभेदान्वय इति स्वीकृत्याह – आख्यातेति॥ तथाविधोऽभेदान्वयो न युक्तः प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति नियमविरोधात्। वस्तुतस्तु तन्मते कर्तुराख्यातार्थत्वाभावेनोक्तदोषाप्रसक्तिरेव। अतः वज्रलेपायितं दोषमाह - पक्ता गच्छतीतिवदिति॥ पक्ता गच्छतीत्यत्र तृचः कर्तार्थः, तथा च पाककर्ता पक्तेत्यस्यार्थः। तथा चाख्यातस्य कर्त्रर्थकत्वस्य पक्षितत्वेन गमनानुकूलकृतिमदभिन्नः पाकाश्रयः

आपाद्यमानं बोधमाह – ईषदसमाप्तेति॥ कल्पबर्थ ईषदसमाप्तिः। तिङः कर्तार्थः। अत आह पाककर्ता। अत्र धात्वर्थः पाकः तिङर्थः कर्तेति ध्येयम्। उक्तरीत्या आख्यातस्य नैयायिकमते कर्तृवाचकत्वाभावेऽपि प्रथमान्तार्थस्य प्राधान्य-स्वीकारेणोक्तस्थले एकवाक्यतयान्वयस्य सुस्थत्वं बोध्यम्। तथा च अत्र देवदत्त इत्यादि प्रथमान्तपदमध्याहार्यमेव। तथा च ईषदसमाप्तपाकानुकूलकृतिमदभिन्नो गमनानुकूलकृतिमदभिन्नो देवदत्त इति बोधापत्तिः। ननु वैयाकरणमते कथं निस्तार इत्यत आह - सिद्धान्त इति॥ वैयाकरणसिद्धान्त इत्यर्थः। वैयाकरणा हि व्यापारमुख्यविशेष्यकबोधमभ्युपगच्छन्ति। तथा च पचतिकल्पमित्यत्र एककर्तृको वर्तमानकालिक ईषदसमाप्तो विक्लित्यनुकूलो व्यापारः, गच्छतीत्यत्र च एककर्तृको वर्तमानकालिकः संयोगानुकूलो व्यापार इति पृथगेव बोध इति नैकवाक्यता सम्भवस्तदाह - क्रिययोरनन्वयात् ॥ उभयोरपि विशेष्यतया भानेन विशेष्य-विशेषणभावेन परस्परान्वये आकाङ्क्षाविरहात्।

### 3.21. भावनायाः प्रथमान्तार्थविशेषणत्वे दोषान्तरप्रदर्शनम्

**38.** किं च[१] पचतिकल्पम्, पचतःकल्पम्, पचन्तिकल्पमित्यपि न स्यात्। सुबर्थ-संख्यायाः प्रकृत्यर्थे[२] प्रधाने कर्तर्येवान्वयात् तद्द्वित्वबहुत्वाभ्यां[३] द्विवचनाद्यापत्तेः[४]। आचार्यकल्पावाचार्यकल्पा इतिवत्। सिद्धान्ते च भावनायाः संख्यान्वया-योग्यत्वात्[५] संख्याया अप्राप्तावौत्सर्गिकमेकवचनमेवेत्यु[६]पपद्यते। अपि च[७] "नृत्य[८]-क्रियां पश्ये"त्यभिप्रायेण "पश्य[९] नृत्यती"ति प्रयुज्यमानं वाक्यमपि न सिध्येत्[१०]।

---

[१] के5,म- "किं च" नास्ति

[२] त2-प्रत्यर्थे

[३] अ1,द1,जो2,1900-द्वित्वबहुत्वाभ्यां, अ3,भार1,त3,जै,द3,भ1,भ2-तद्विबहुत्वाभ्यां, त2-न द्विबहुत्वा-भ्यां, त5,म- तद्धितद्वित्वबहुत्वाभ्यां

[४] त2-द्विबहुवचनाद्यापत्तिः

[५] जो2-संख्यान्वयायोगात्

[६] 1900-"इति" नास्ति

[७] जै-"अपि च" नास्ति

[८] के5,म,अ4-नृत्त

[९] 1915-"पश्य" नास्ति

[१०] त2-स्यात्

क्रियां पश्ये"त्यभिप्रायेण "पश्य[१] नृत्यती"ति प्रयुज्यमानं वाक्यमपि न सिध्येत्[२]। किं च,[३] मुख्यतः प्रथमान्तार्थस्य विशेष्यत्वा[४]भ्युपगमे "पश्य मृगो[५] धावती"ति भाष्याद्यभ्युपेत[६]मेकं वाक्यं[७] न स्यात्[८]। प्रथमान्तार्थमृगस्य धावनक्रिया[९]विशेष्य-त्वात्[१०]तस्यैव दृशिक्रियायामन्वये[११] कर्मत्वाद् द्वितीयापत्तेः[१२]। न च सत्यां द्वितीयायामप्रथमासमानाधिकरणत्वाच्छानज्[१३] दुर्वार इति वाच्यम्[१४], एवमपि द्वितीयाया दुर्वारत्वात्। एवं चैतादृशवाक्याभाव[१५] एव स्यात्।

किं च[१६] "अपाक्षीद् देवदत्तोऽवेही" त्यत्र शत्रादेः प्रसङ्गाभावाद् देवदत्तमिति द्वितीया[१७] दुर्वारैव। न चात्र प्राक्[१८] तमिति[१९] कर्माध्याहर्तव्यम्, उत्कटधावन-क्रियाविशेषस्यैव दर्शनकर्मतयान्वयस्य[२०] प्रतिपिपादयिषितत्वात्[२१] कर्माध्याहारे

---

[१] 1915-"पश्य" नास्ति

[२] त2-स्यात्

[३] वा2-"एवं ह्याख्यातार्थ" इत्यारभ्य "किं च" पर्यन्तं उपदशवाक्यात्मकः ग्रन्थः नास्ति

[४] के4,द5,ज1-विशेष्यता

[५] त2- "पश्य मृगो"नास्ति

[६] के5,म,अ4-भाष्याद्युपगत

[७] अ1,अ3,त1,1900,त5-मेकवाक्यं

[८] जै-"प्रयुज्यमानं" इत्यारभ्य "न स्यात्" पर्यन्तं नास्ति

[९] त3,के4- "क्रिया" नास्ति

[१०] वा2,द1,त3,1900-विशेष्यत्वाभ्युपगमे, के5,म-धावने क्रियाविशेष्यत्वात्

[११] के5,म,अ4-क्रियान्वये

[१२] त2-कर्मत्वार्थद्वितीयापत्तेः

[१३] त1,त5-सामानाधिकरण्याच्छानज्, 1900,भ2-करणत्वाच्छता, भ1-सामानाधिकरणश्छानज्

[१४] त्रि-"वाच्यम्" नास्ति

[१५] त2-वाक्यस्याभाव

[१६] के4- "किं च"नास्ति

[१७] अ3-द्वितीयापत्तिः

[१८] त2- "प्राक्"नास्ति

[१९] त्रि-प्राकृतमिति

[२०] भार1-दर्शनकर्मतान्वयस्य

[२१] भ3-प्रतिपादयिषितत्वात्

तदसंभवापत्तेः, तं पश्येति वाक्यभेदापत्तेश्च। एकवाक्यत्वे भाष्य[१]कारादिभिः साधुत्व[२]कथनात्। तस्मात् क्रियाया एव कर्मत्वेनान्वयः[३], तद्वाचकश्च[४] धातुर्न प्रातिपदिकम्, अतो[५] न द्वितीया। तथा च धात्वर्थभावनाप्रकारकशाब्द[६]बोधं प्रति कृज्जन्योपस्थितिवद् धातुजन्यभावनोपस्थिति[७]रपि कारणं कल्प्यते[८]। अत एव "पक्त्वा व्रजती"त्यादौ पाकक्रिया व्रजनक्रियायां[९] सामानाधिकरण्योत्तरकालादि-संबन्धेन विशेषणम्, अतस्तल्लाभे क्त्वादेर्भावे विधानं संगच्छत इति वक्ष्यत इति दिक्॥ **2**॥

---

नैयायिकनये प्रथमाप्रकृत्यर्थे संख्यान्वयनियमात् पुनरपि तन्मते दूषणमाह - किञ्च पचतिकल्पमिति॥ सुबर्थेति॥ सुप् - पचतिकल्पमित्यत्र अमिति, तदर्थः संख्या, एकत्वादौ एकवचनादिविधानात्। तस्याः संख्यायाः प्रकृत्यर्थे कल्पान्तार्थे, प्रधाने तिङर्थसंख्यापेक्षया प्रधाने तिङर्थकर्तरि। प्रथमान्तेन कर्तुरुपस्थापनात्। यद्वा वैयाकरणः स्ववासनया आख्यातार्थकर्तरि संख्यान्वयार्थमापादयति। कल्पपः पचतीति प्रकृतिः, तद्घटकेन तिपा उपस्थितः कर्ता प्रकृत्या उपस्थापित इति बोध्यम्। तत्र योग्यत्वात्कर्तरि एकत्वद्वित्वाद्यबाधे सति पचतिकल्पे पचतिकल्पानि इत्यपि स्यादिति भावः। दृष्टान्तमाह - आचार्यकल्पौ इति॥ अत्र यथा द्वित्वाद्यबाधात् आचार्यपदार्थे प्रकृत्यर्थेऽन्वयेन द्विवचनादि, तथैवात्रापि स्यादिति भावः। सिद्धान्ते वैयाकरणसिद्धान्ते। भावनायाः धात्वर्थभावनायाः असत्त्व-भूतायाः। संख्यान्वयेति। आख्यातार्थसंख्यान्वय इत्यर्थः।

---

[१] जो2-महाभाष्य

[२] त2-साधक

[३] के5,म-कर्मत्वेनैवान्वयः, भ1-एव च कर्मत्वेनान्वयः

[४] त1,त2,त5- "च" नास्ति, अ4- तद्वांश्च

[५] जो2-इति

[६] त2- "शाब्द"नास्ति

[७] के5,त2- "वत् धातुजन्यभावनोपस्थिति"नास्ति, त5,अ4-धातुजन्योपस्थिति

[८] जै,द4,भ1,ब3-कल्पते

[९] वा2- "पाकक्रिया व्रजनक्रियायां" इत्यस्य स्थाने " पाकक्रियायां "इत्येवास्ति

वैयाकरणमते धात्वर्थः फलव्यापारौ, कर्तृकर्मसंख्याकालाः आख्यातार्थः। प्रत्ययार्थीभूतायाः सङ्ख्यायाः प्रकृत्यर्थं प्रति विशेषणत्वौचित्येऽपि प्रकृते तत्रान्वयासम्भवः, भावनायाः असत्त्वरूपत्वात्। तदाह - संख्याया अप्राप्तौ॥ साधुत्वार्थमेकवचनं पचतिकल्पमित्यादौ। अपि च नृत्यक्रियामिति॥ नृत्यक्रियां पश्येत्यभिप्रायेण पश्य नृत्यतीति पाठ आवश्यकः। अत्र एककर्तृकवर्तमानकालिकनर्तनकर्मकं प्रेरणाविषयीभूतं दर्शनमिति बोधः व्यापारप्राधान्ये एव उपपद्यते। प्रथमान्तार्थप्राधान्ये तु न स्यात् , नर्तनकर्तुः दर्शनकर्तुश्चाध्याहृतप्रथमान्तार्थत्वेन प्राधान्येन पृथग् वाक्यार्थबोधापत्तेः नर्तनाश्रयो मयूरादिः, दर्शनाश्रयो युष्मदर्थ इत्येव बोधात्। इदानीं तमेव दोषम् भाष्यविरोधेन संयोजयति - किञ्च मुख्यतः इति॥ मुख्यत इति सार्वविभक्तिकस्तसिः। मुख्यपदार्थस्य अभेदेन विशेष्यत्वेऽन्वयः। तथा च प्रथमान्तार्थनिष्ठमुख्यविशेष्यत्वस्वीकार इति प्रतिफलति। मुख्यत्वञ्च प्रकारत्वासामानाधिकरण्यरूपम्। तच्च नैयायिकमते एव, न तु वैयाकरणमते। वैयाकरणैः तादृशी विशेष्यता भावनायामेव स्वीक्रियते। भाष्यसिद्धैकवाक्यत्वस्थलविरोधेनापि तन्मतं खण्डयति – पश्य मृगो धावतीति॥ अत्र उत्कटधावनमेव दर्शनान्वयित्वेन काम्यम् , तत्तु व्यापारमुख्यविशेष्यकत्वे एव सम्भवति, मृगकर्तृकोत्कटधावनकर्मकं दर्शनमित्येव बोधस्तद् वाक्यादभिमतः। प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारे मृग इति प्रथमान्तम् , अध्याहृतं त्वमिति च प्रथमान्तम्। तदर्थस्य प्राधान्यापत्तौ धावनाश्रयो मृगः, दर्शनाश्रयस्त्वमिति पृथगेवार्थबोधः स्यात्। तथा सति भाष्यविरोधः स्पष्ट एव। वैयाकरणमते तु मृगकर्तृकोत्कटधावनकर्मकं दर्शनमित्येकवाक्यतयैव शाब्दबोधः इति न तद्विरोधः। ननु धावनाश्रयस्य दर्शनान्वयेन न वाक्यभेद इत्यत आह- प्रथमान्तार्थमृगस्येति॥ दर्शनान्वये सति कर्मत्वेन मृगपदाद् द्वितीयापत्तिः स्यात्। तथा सति तादृशवाक्यस्वरूपस्यैव हानिः। धावनानुकूलकृतिमन्मृगकर्मकदर्शनाश्रयः त्वमित्यर्थे पश्य मृगं धावतीति वाक्यस्यैव सम्भवात्। वैयाकरणमते तु नेयमापत्तिः, तन्मते धावनस्यैव कर्मतया तद्वाचकधातोरप्रातिपदिकत्वात्। ननु तार्किकमतेऽपि न द्वितीयापत्तिरूपो दोषः, धावनक्रियाविशिष्टमृगस्यैव कर्मतया मृगशब्दस्य तादृशविशिष्टावाचकत्वेन कर्मावाचकत्वात्। अत एव "श्रुत्वा

ममैतन्माहात्म्यं तथा चोत्त्पत्तयः शुभाः,जानामि सीता जनकप्रसूता," इत्यादिषु सीताशब्दादुत्पत्तिशब्दाच्च न द्वितीयेति चेन्न। नीलगुणविशिष्टघटादेः कर्मत्वविवक्षायां नीलं घटमानयेत्यादौ द्वितीयाद्यनापत्तेः। न चेष्टापत्तिः, "अनभिहिते" (पा.2-3-1) इति सूत्रस्थभाष्यविरोधात्। तत्र हि - अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैरिति परिगणनाभावे भीष्यगुणविशिष्टस्य कर्मत्वविवक्षायां कटशब्दादुत्पन्नद्वितीयया कर्मत्वस्योक्ततया भीष्मशब्दाद् द्वितीया न स्यादिति परिगणनमित्युक्तम्। प्रकृते द्वितीयया कर्मत्वस्योक्तत्वेऽपि परिगणितैरनुक्तत्वेन भीष्मनिष्ठकर्मत्वस्यानुक्तत्वेन द्वितीया साधिता। विशिष्टस्य कर्मत्वे प्रत्येकं कर्मत्वाप्रयोजकत्वे भीष्मं कटं कुरु इत्येतत्परकभाष्यस्यासङ्गत्यापत्तिः। पूर्वेक्तस्थलेषु आर्षत्वादेव द्वितीयार्थे प्रथमा। वस्तुतस्तु यत्र प्रत्येकं कर्मणः पूर्वं क्रियया सम्बन्धः। तत्र प्रत्येकं कर्मसत्त्वात् सर्वेभ्यः कर्मवाचकेभ्यः द्वितीया। पश्चाच्च विवक्षावशात् परस्परमभेदान्वयः। यत्र च विशिष्टस्य कर्मत्वविवक्षा तत्रोभयोः प्रत्येकं कर्मावाचकत्वेन प्रातिपदिकार्थे प्रथमैवेति सुगमोऽयं पन्थाः।

इदानीं समाधानाभासं प्रतीत्य ब्रूते - न च सत्यां द्वितीयायामिति ॥ मृगपदोत्तरद्वितीयाप्रसङ्गे इत्यर्थः। शतृशानज्विधौ लडर्थकर्तुः अप्रथमासामानाधिकरण्येन विशेषितत्वात् मृगपदस्य द्वितीयान्तत्वे तदापत्त्या द्वितीया न भविष्यतीति शङ्कितुराक्षेपः।

अयं भावः। "लटः शतृशानचावप्रथमासमानाधिकरणे" (पा.3.2.124) इति पाणिनिसूत्रम्। तेन अप्रथमा सामानाधिकरण्ये शतृशानचौ विधीयेते। अप्रथमा द्वितीयादिः, ताभिः सामानाधिकरण्यं शत्राद्यन्तेन विवक्षितम्। तथा च यदा द्वितीयान्तेन शत्राद्यन्तस्य सामानाधिकरण्यं समानविभक्तिकत्वं समानार्थकत्वं वा स्यात्तदा शत्रादयो भवन्ति, पचन्तं पश्येत्यादौ। प्रथमासामानाधिकरण्ये तु नेति सूत्रार्थः।

ननु "वसन् ददर्श" इत्यादौ प्रथमासामानाधिकरण्ये शतुरनुपपत्तिरिति चेन्न, सति प्रयोगे क्वचित् प्रथमासामानाधिकरण्येऽपि शत्रादेर्ज्ञापकसिद्धत्वात्। "वर्तमाने लडि"(पा.3.2.123)त्यनुवर्तमाने पुनर्लड्ग्रहणेनैवं ज्ञापितत्वात्।तथा

चोक्तरीत्या मृगस्य दर्शनान्वये मृगपदाद् द्वितीयापत्तौ अप्रथमासामानाधिकरण्यसत्त्वात् शतृप्रत्ययो दुर्वारः इति शङ्कितुराशयः।

शतुरापादनेन स्वमतं व्यवस्थापयन्तं खण्डयति – एवमपीति॥ शतृप्रत्यये धावन्तं मृगं पश्येत्येव वाक्यस्वरूपं स्यान्न तु "पश्य मृगो धावती"ति। ननु "अर्थैकत्वादेकं वाक्यं साकाङ्क्षञ्चेद् विभागे स्यादि"(मी.द.2-1-14-46))ति जैमिनिसूत्राद् विच्छिद्यपाठे साकाङ्क्षत्वे सत्येकार्थप्रतिपत्तिजनकत्वमेकवाक्यत्वमित्यर्थो लभ्यते। प्रकृते तमित्युक्ते कमित्याकाङ्क्षासत्त्वाद् यथाकथञ्चिद् वाक्यद्वयस्य धावनानुकूलकृतिमन्मृगकर्मकदर्शनरूपैकार्थप्रतिपादकत्वाच्च न वाक्यभेदप्रसङ्ग इत्यरुचेराह – किञ्चेति॥ अपाक्षीद् देवदत्तोऽवेहीति॥ अत्र देवदत्ताभिन्नैककर्तृकभूतकालावच्छिन्नपाककर्मकं प्रेरणाविषयीभूतं ज्ञानमित्येकवाक्यतया बोधो जायते। स च प्रथमान्तार्थमुख्यविशेष्यकत्वे न सम्भवेत् , उक्तरीत्या भूतकालिकपाकाश्रयो देवदत्तः, ज्ञानाश्रयःत्वमिति पृथगेव बोधापत्तेः।

प्रथमान्तार्थप्राधान्यवादी पुनरपि स्वाभिमतं साधयति - न चात्र प्राक्तमिति॥ अत्र पश्य मृगो धावतीति वाक्ये, प्राक् पश्येत्यादेः प्राक्। तम् पश्य मृगो धावतीति जायते। अत्र दोषमाह – तमिति॥ कर्मपदाध्याहारे दर्शने मृगस्यैव कर्मत्वेनान्वयापत्तौ उत्कटधावनस्य कर्मतया दर्शनान्वयित्वेन प्रतिपादयितुमिष्टस्य दर्शनान्वयानापत्तेः। तं पश्येति॥ प्रतिपादितमधस्ताद्। तत्रैकवाक्यतायां प्रमाणमाह - एकवाक्यत्वे भाष्यकारादिभिरिति॥ उपसंहरति – तस्मादिति॥ प्रथमान्तार्थप्राधान्ये दोषसत्त्वात् भाष्यविरोधाच्च उत्कटधावनात्मकक्रियाया एव दर्शने कर्मत्वेनान्वये एव एकवाक्यत्वसिद्धिः। धावनवाचको धातुर्धावतीति। अत्र मूले धातुपदस्य धातुघटितपरत्वात्। यद्वा धातुपरमेव। धावतीत्यत्र सृधातुः। तस्य "पाघ्राध्मे" (पा.3.1.137) ति सूत्रेण धौ इत्यादेशः। ननु धातुर्वा तद्घटितं धावतीति वा गृह्यताम् ।तदर्थस्य कर्मत्वे ततो द्वितीयापत्तिरत आह - न प्रातिपदिकमिति॥ "अर्थवदि" (पा.1.2.45) ति प्रातिपदिकसंज्ञाविधायके अधातुरिति पर्युदासेन धावतीत्यस्य प्रातिपदिकत्वाभावः। तथा च "कर्मणि द्वितीये" (पा.2.3.2) ति सूत्रे प्रातिपदिकाधिकारात् द्वितीयाया अप्राप्तिरिति भावः।

वैयाकरणः स्वानुभवसिद्धं कार्यकारणभावमाह - तथा च धात्वर्थभावनेति॥ "पश्य मृगो धावती"त्यत्र उक्तरीत्या भावनाप्रकारको भावनाविशेष्यको बोधः स्वीकृतः। तादृशबोधम्प्रति विशेष्यतासम्बन्धेन धातुजन्योपस्थितिः कारणम्। तथा च प्रकृते विशेष्यतासम्बन्धेन शाब्दबोधः दृशधात्वर्थे ज्ञाने, तत्रैव दृशधातुजन्योपस्थितिरपि विशेष्यतासम्बन्धेन वर्तते। तथा च कार्यकारणयोः सामानाधिकरण्यात् उक्तकार्यकारणभावोपपत्तिः। दृष्टान्तमाह – कृज्जन्योपस्थितिवदिति॥ पाचक इत्यत्र विक्लित्यनुकूलव्यापाराश्रयः इति भावनाप्रकारको बोधः। सोऽयं बोधो विशेष्यतासम्बन्धेन कृदर्थ आश्रये। तथा च विशेष्यतासम्बन्धेन भावनाप्रकारकबोधम्प्रति कृज्जन्योपस्थितिः कारणमिति कार्यकारणभावः फलति। अत्र भावनाप्रकारकबोधत्वेनैव सादृश्यं ग्राह्यं न तु सर्वांशे। उपस्थितेः धातुजन्यत्वेन कृज्जन्यत्वेन वा कार्यकारणभावे प्रवेशेन वैषम्यात्।

अत एवेति॥ भावनाप्रकारकबोधस्य, तत्प्रकारकबोधम्प्रति कार्यकारणभावान्तरस्य च स्वीकारादेवेत्यर्थः। पक्त्वा व्रजतीति॥ पाककर्तृकर्तृकं तदुत्तरकालिकं वर्तमानकालिकं व्रजनमिति बोधः। अतस्तल्लाभे इति॥ तस्य व्रजनक्रियायां पाकक्रियाया उक्तसम्बन्धेन विशेषणत्वलाभे। क्त्वादेः॥ आदिना तुमुनो ग्रहणम्। भावे विधानं सङ्गच्छते। भावनाप्रकारकबोधस्वीकारे एव क्त्वाद्यर्थस्य उक्तसंबन्धेनान्वयोपपत्तिः। भावनाप्रकारकबोधानभ्युपगमे, तादृशबोधस्यैवाप्रसिद्ध्या त्वाद्यर्थस्य क्रियाभूतस्य अनन्वयापत्तौ भावे विधानासङ्गतिरिति भावः।

## 4. आश्रयस्य फलव्यापारयोरन्वये व्यवस्था

**39.** तत्राश्रयस्य क्व फलेऽन्वयः, क्व च[1] व्यापार इत्युपोद्घातसंगत्या निरूपयति[2]-

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः।
व्यापारे शप्श्नमाद्यास्तु[3] द्योतय[4]न्त्याश्रयान्वयम्॥3॥

[1] भ1- "च" नास्ति,त5-वा

[2] त2-निरूप इति

[3] के5-शपाद्यास्तु

[4] के5-बोधयन्त्या

तङादयः फले आश्रयान्वयं द्योतयन्ति, शबादयस्तु व्यापारे। अथ शबादयो न द्योतकाः, किं तु वाचका एव। लकारविधान[1]स्य तत्तदर्थ[2]पुरस्कारेणै(णे)व[3] "कर्तरि शबि" (पा.3-1-68) ति[4] शपोऽपि[5] तत्तदर्थपुरस्कारेणैव विधानात्। तस्माच्छबेव वाचकः, लकारस्तु द्योतक इति वैपरीत्यं किं न स्यादिति। यत्त्वाशीर्लिङि लिटि चादादि[6]जुहोत्यादिषु च शबाद्यभावात् तत्तत्प्रतीति[7]र्न स्यात्, अतो लकार एव वाचको युक्त इति तन्न, तिङामभावेऽपि[8] शबादिसन्निधानमात्राद्[9] अशाम्यकारि[10] गच्छेत्यादौ तत्प्रतीतेस्तवाप्युक्तदोषतादवस्थ्यादिति चेत्, मैवम्[11]। अत्र लुप्तं स्मृतं[12] बोधकमिति[13] [14]परमते, शिष्यमाणं[15] लुप्यमानार्थाभिधायीत्यस्मन्मते[16] च[17] समाधानस्य सुकरत्वात्।

यद्वा "कर्तरि शबि" (पा.3-1-68) त्यत्र सार्वधातुक इत्यनुवर्त्य[18] कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यादित्यर्थः। तथा च[19] सार्वधातुकस्य

---

[1] के4,अ4- "विधान" नास्ति

[2] जो2,के4-तदर्थ, त2-तत्तर्थ

[3] वा2,भार1,द1,द4,त3,जै,ब1,जो2,1900,1915-पुरस्कारेणेव

[4] अ1,ब1,भ2,द5,ज1-त्यादिना

[5] अ1,भार1,त3,के4,भ2,त5,द5,ज1-शबादेरपि

[6] वा2,1900,1915-चादादिषु

[7] त2,द2,द3,भ1-तत्प्रतीति

[8] अ1-तिङभावेपि

[9] के5,म-सन्निधानात्

[10] त्रि-अवाम्यकारि

[11] त2- "मैवम्"नास्ति

[12] जो2,ब3-लुप्तस्मृतं

[13] भ1,द7-लुप्तं बोधकं स्मृतमिति, त्रि – लुप्तस्मृतबोधकमिति,

[14] अ1-स्मृतबोधकमिति, अ3-लुप्तं बोधकं स्मृतमिति

[15] अ1-शिष्यमाणा

[16] जै-त्यस्मिन्मते

[17] त1-वा

[18] त5-इत्यनुवृत्त्य

[19] भ2-"सार्वधातुक इत्यनुवर्त्य" इत्यारभ्य "तथा च" पर्यन्तं ग्रन्थः नास्ति

कर्त्रर्थत्वावश्यकत्वे[1] शबादीनां द्योतकत्वमात्रं कल्प्यते[2] लाघवादिति[3]। एवं यगादावप्यूह्यम्।

---

आश्रये तु तिङः स्मृताः इति मूलकारिकायां तिङामाश्रयवाचकत्वमुक्तम्। तत्र आश्रयार्थः फलाश्रयः कर्म, व्यापाराश्रयः कर्ता च गृह्यते, तत्र क्व कर्मरूप आश्रयः, क्व च कर्तृरूप आश्रय इति शङ्कते – तत्राश्रयस्येति॥ भावप्रधानबोधस्वीकारेण कर्मरूपस्य आश्रयस्य फलेऽन्वयात्, कर्तृरूपस्य व्यापारेऽन्वयादाह - आश्रयस्य क्व फले इत्यादि॥

उपोद्घात सङ्गत्येति॥ षोढा सङ्गतिर्यथा -

सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।
निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते॥

स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः। प्रकृतार्थोपपादकत्वमुपोद्घातः। हेतुता कारणता प्रसिद्धैव। कारणे कार्ये वा ज्ञाते किमस्य कार्यं कारणं वेति जिज्ञासोदयेन उपजीव्यत्वोपजीवकत्वयोर्हेतुतायामन्तर्भावः, प्रतिबन्धकीभूतजिज्ञासानिवृत्तिकालावच्छिन्नावश्यवक्तव्यत्वमवसरः, यथा कः धात्वर्थः इति जिज्ञासानिवृत्तौ तिङर्थस्यावश्यवक्तव्यत्वमवसर संगतिः। निर्वाहकैक्यम् एकप्रयोजकप्रयोज्यत्वम्। कार्यैक्यमेककार्यानुकूलत्वम्। प्रकृते प्रकृतस्य अन्वयप्रकारकस्योपपादकत्वादुपोद्घातसंगतिः।

उपोद्घातसंगत्या शबादीनां द्योतकतां निरूपितुमाह – फलव्यापारयोरिति॥ तत्रेति॥ आश्रयान्वयजिज्ञासायामित्यर्थः। फलव्यापारयोरिति निर्धारणे षष्ठी। यद्वा मध्ये इत्यध्याहारे शेषषष्ठी। तङादयः धातूपस्थाप्ययोः फलव्यापारयोर्मध्ये फले आख्यातार्थस्य कर्मरूपाश्रयस्यान्वयं द्योतयन्ति तात्पर्यं बोधयन्ति। फलाश्रयस्य कर्मत्वात्तद्योतकाः कर्मद्योतकाः भवन्तीत्यर्थः। शबादयस्तु व्यापारे आख्यातार्थस्य कर्तृरूपस्याश्रयस्यान्वयं द्योतयन्ति। व्यापाराश्रयस्य कर्तृत्वात्तद्योतकाः कर्तृद्योतका भवन्तीत्यर्थः। तदाह - तङादय इत्यादिना॥ इदानीं वाचकत्वसंशयमुत्थापयति -

---

[1] ब2-कर्त्रर्थत्वावश्यकत्वं

[2] द4-कल्पते

[3] अ1-"इति" नास्ति

अथ शंबादयो नेति॥ "कर्तरि शबि"(पा.3.1.68)ति सूत्रे कर्तरीति श्रवणात् कर्तरि शबादयो भवन्तीत्यर्थसंन्देहाद् शबादयः कर्तृवाचका न वेति सन्देहः। संशयाकार-मनुभावयति – "कर्तरि शबि"ति शपोऽपि तत्तदर्थेति॥ कर्त्रादिरूपार्थ-पुरस्कारेण वाचकत्वेनेत्यर्थः।

दृष्टान्तमाह – लकारविधानस्येति॥ यथा "लःकर्मणी" (पा.3.4.69) त्यनुशासनेन लकारस्य कर्त्राद्यर्थे विधानम् , तथा कर्तरि शबित्यत्रापि कर्तरि इत्यादि-श्रवणात् तत्तदर्थे विधानमस्त्विति शङ्का। ननु उभयविधाने कस्य वाचकत्वम्। कस्य द्योतकत्वमित्यत आह - तस्माच्छबेव वाचकः, लकारस्तु द्योतक इति॥ शबादिवाचकत्वं व्यभिचारयति - यत्त्वाशीर्लिङि चादादिष्विति ॥ चादिषु इति पाठोऽपपाठः। "लिङाशिषि"(पा.3.4.116) इत्यनेन आर्धधातुकसंज्ञायां शबाद्य-भावात्। अदादिषु "अदिप्रभृतिभ्यः शप"(पा.2.4.72) इत्यनेन शबादे-र्लुग्विधानात् "जुहोत्यादिभ्यः श्लु"(पा.2.4.75)रित्यनेन श्लुविधानाच्च शबाद्यभावेऽ पि कर्त्रादिप्रतीत्या व्यतिरेकव्यभिचारात् शबादीनामेव द्योतकत्वं वाच्यम्। यद्वा शबादीनां वाचकत्वस्वीकारे उक्तस्थलेषु शबाद्यभावेन कर्त्रादिप्रतीतिर्न स्यादित्यभि-प्रायः। तदाह - लकार एव वाचको न तु शबादिः॥

तन्नेति॥ यथा उक्तस्थलेषु शबादिवाचकत्वव्यभिचारस्तथैव लकारनिष्ठ-वाचकत्वमपि व्यभिचरितमिति आह - तिङामभावेऽपीति।॥ अशामि, अकारि इत्यत्र तिडामभावेऽपि कर्तृप्रतीत्या, शबादीनामेव वाचकत्वं न तु तिङामित्यर्थः। अशामि इति शम् धातोः भावे लुङ्। "भावकर्मणो(पा.1.3.13)"रिति तङ्। अडागमे च्लौ तस्य चिणादेशेऽनुबन्धलोपे वृद्धौ, "चिणो लुगि(पा.6.4.104)"ति सूत्रेण तशब्दस्य लुकि अशामि। अकारीति॥ कृधातोः कर्मणि लुङ् शेषं पूर्ववत्। अत्र तिङोऽभावेऽपि शबादिसत्त्वात्कर्तृकर्मादिप्रतीतिरिति शबादीनामेव वाचकत्वं न तु लकारस्य वाचकत्वमिति यो दोषो दत्तः स तदवस्थ एवेति भावः।

मतमिदं खण्डयति – मैवमिति॥ परमतमादाय समाधानमाह - लुप्तं स्मृतं बोधकमिति॥ ये खलु स्थानिनां वाचकत्वं मन्यन्ते तन्मते आदेशादिना अपहृतस्य स्थानिनः स्मरणेनैवार्थबोधो यथा, तथैवात्रापि तिङाम् अभावेऽपि तत्स्मरणेन

बोधः। स्वमते निर्वाहमाह – शिष्यमाणमिति॥ यथा एकशेषे शिष्यमाणेनैके-नैवानेकार्थबोधस्तथैवात्रापि शिष्यमाणेन तिङर्थबोधः सुलभ इति भावः।

सिद्धान्तमाह - यद्वा कर्तरि शबिति॥ कर्तरीति अनुवर्तमानं सार्वधातुके इत्यत्र विशेषणम्। कर्तरीति विषयसप्तमी, वाचकत्वं तदर्थः। तथा च कर्तृवाचके सार्वधातुके शबिति सूत्रार्थः। तथा सति सार्वधातुकस्य तिङ एव कर्तृवाचकत्वं सिद्धमिति नास्ति कोऽपि दोषः। एवं सति शबादीनां द्योतकत्वमायाति। तदाह - शबादीनां द्योतकत्वमात्रं कल्प्यत इति॥ शबादीत्यत्रादिपदकृत्यमाह - एवं यगादाविति॥ पच्यते इत्यादौ। तत्रापि यगादीनामेव द्योतकत्वम्।

**40.** तङ्[१] परस्मैपदिभ्य एवोत्पन्नः, उपसर्गादि[२]प्रयुक्तो न चेत्। अत[३] एधते[४] निविशते इत्यादिव्यावृत्तिः। [चिणादय इति।][५] आदिना "कुषिरजोः प्राचां श्यन्नि" **(पा.3-1-90)**ति[६] श्यन्, परस्मैपदे च द्योतके। यथा कर्मस्थभावकेषु रज्यति[७] घटः स्वयमेवेत्यादौ।[८] [एवं][९] चिण्वदिट्, यथा कारिष्यते घट इत्यादौ।[१०]

---

[१] त2- "तङ्" नास्ति

[२] जो2-उत्सर्गादि

[३] भार1,त1,त3,1900,के4,के5,म,त2,1915-अत एव

[४] त2-धत्ते

[५] अयमधिकपाठः ब1,ब3-मातृकायामुपलभ्यते। उपयुक्तः आवश्यकश्चेति योजितः।

[६] के5,अ4-कुषिरजोः प्राचामित्यादिना

[७] अ1-रज्यते

[८] वा2,त1,ब1,जो2,ब2,त5-"कुषिरजोः प्राचां श्यन्नि"(पा.3-1-90)ति श्यन्, परस्मैपदे च द्योतके। यथा कर्मस्थभावकेषु रज्यति घटः स्वयमेवेत्यादौ।" नास्ति

[९] द3-" एवं" इत्यधिकम्

[१०] अ3,अ4,भार1,के4,के5,भ1,भ2,द5 -" चिण्वदिट्, यथा कारिष्यते घट इत्यादौ। " नास्ति,
"आदिना "कुषिरजोः प्राचां श्यन्नि"(पा.3-1-90)ति श्यन्, परस्मैपदे च द्योतके। यथा कर्मस्थभावकेषु रज्यति घटः स्वयमेवेत्यादौ। चिण्वदिट्, यथा कारिष्यते घट इत्यादौ।" इत्यस्य स्थाने
1900 - "आदिना चिण्वदिट्, यथा कारिष्यते घट इत्यादौ।"कुषिरञ्जोः प्राचां श्यन्नि"(पा.3-1-90)ति श्यन्, परस्मैपदे च द्योतके। तथा कर्मस्थभावकेषु रक्ष्यति घटः स्वयमेवेत्यादौ।" इत्यस्ति।
त्रि- "आदिना चिण्वदिट्, यथा कारिष्यते घट इत्यादौ।"कुषिरञ्जोः प्राचां श्यन्नि"(पा.3-1-90)ति श्यन्, परस्मैपदे च द्योतके। यथा कर्मस्थभावेषु रक्ष्यति घटः स्वयमेवेत्यादौ।" इत्यस्ति।

लिडादा[1]वप्येवं रीत्या प्रकरणाद्येव द्योतकमिति। एतेनाख्यातस्य कर्तृकर्मभावेषु शक्तौ पचतीत्यादौ सर्वत्रैव [2] भावनावत् [3] कर्तृकर्मभावानां [4] प्रत्ययापत्तिः, शक्तिसत्त्वादिति[5] निरस्तम्। यगादेस्तात्पर्यग्राहकत्वकथनादिति ध्येयम्॥3॥

5.शबादीनां तत्तद्द्योतकत्वस्य पूर्वोक्तस्य उत्सर्गत्वम्

नन्वेवं "पच्यते ओदनः स्वयमेव" इत्यादौ "क्रमादमुं नारद इत्यबोधि सः" इत्यादौ च[6] व्यभिचारः, कर्माविवक्षायां[7] कर्तरि लकारे सति[8] "कर्मवत्[9] कर्मणा तुल्यक्रियः" (पा. 3-1-87) इत्यनेन यगात्मनेपदचिण्चिण्वदिटामतिदेशेन[10] यगादिसत्त्वेऽप्याश्रयस्य फलेऽनन्वयात्। "अबोधी"त्यत्रापि बुध्यतेः कर्तरि लुङ्[11], "दीपजने" (पा.3-1-61)त्यादिना[12] चिण्, "चिणो लुक्"(पा.6-4-104) इति तस्य लुग् इत्यभ्युपगमेऽपि फलेऽनन्वयादित्याशङ्क्याह-

---

1915-"आदिना चिण्वदिट्, यथा कारिष्यते घट इत्यादौ।"कुषिरञ्जोः प्राचां श्यन्नि'(पा.3-1-90)ति श्यन्, परस्मैपदे च द्योतके। यथा कर्मस्थभावकेषु रज्यति घटः स्वयमेवेत्यादौ।" इत्यस्ति।

द2-"आदिना चिण्वदिट्, यथा कारिष्यते।"कुषिरजोः प्राचां श्यन्नि"(पा.3-1-90)ति श्यन्, परस्मैपदे च द्योतके। यथा कर्मस्थभावकेषु रज्यति घटः स्वयमेवेत्यादौ।" इत्यस्ति।

त2- "आदिना "कुषिरजोः प्राचां श्यन्नि'(पा.3-1-90)ति श्यन्, परस्मैपदे च द्योतके। यथा कर्मस्थभावकेषु रज्यति घटः स्वयमेवेत्यादौ। चिण्वदिट्, यथा कारिष्यते घट इत्यादौ।" नास्ति

[1] त1,त3,जो2,त5-लिङादौ

[2] जै,जो2,अ4- "एव" नास्ति

[3] अ1-भावना

[4] के5,म-कर्तुरभावानां

[5] भ1-शक्तिमत्वादिति

[6] जै,जो2,वा2,1900,त्रि,द7- "च" नास्ति

[7] जो2-कर्मादिविवक्षायां, अ1-कर्मविवक्षायां

[8] त2- "सति" नास्ति

[9] भ1- "कर्मवत्"नास्ति

[10] अ1-यगात्मनेपदचिण्वदिटामतिदेशेन, अ4-......मितिदेशेन

[11] त3-लुङि,त2-लङ्

[12] द4-पूर्ववाक्ये यगात्मनेपद चिण्चिण्वदिटामित्यत्र " चिण्चिण्वदिटामि" त्यारभ्य " दीपजनेत्यादिना" पर्यन्तं नास्ति

उत्सर्गोऽयं कर्मकर्तृ[१]विषयादौ विपर्ययात्।
तस्माद् यथोचितं ज्ञेयं द्योतकत्वं[२] यथागमम्॥ 4॥

कर्मकर्तृविषयादौ "क्रियते घटः स्वयमेव"[३] "पच्यते ओदनः स्वयमेव" इत्यादौ। क्रमादित्यादि [४] पदग्राह्यम्। शाब्दबोधस्तु पूर्वोक्त [५] सामान्यविशेषज्ञानहेतुका [६], एकनारदाभिन्नविषयकं[७] यज्ज्ञानं तदनुकूला, एककृष्णाभिन्ना[८]श्रयिकातीता भावनेति। "पच्यते ओदनः स्वयमेव" इत्यत्र चैकौदनाभिन्नाश्रयिका पाकानुकूला भावनेति बोधः[९]। इत्थमन्यत्राप्यूह्यम्[१०]। यथोचितमिति।[११] अननुगतमेव तत्तद्वचनानुसारेणेत्यर्थः[१२]। वस्तुतः[१३] सकर्मकधातुसमभिव्याहृत[१४] भावसाधारणविधिविधेय[१५] यक्किण्त्वेन कर्मद्योतकतेति बोध्यम्। 4।

---

ननु तङः फलाश्रय(कर्म)द्योतकत्वे एधते, निविशते इत्यादावपि तद्योतकत्वापत्तिरत्रापि तङः सत्त्वादित्यत आह - तङ् परस्मैपदिभ्य एवोत्पन्न इति॥ ननु परस्मैपदिभ्यः परस्मैपदमेव न तु तङिति चेन्न। कर्मणिप्रत्यये परस्मैपदिभ्योऽपि तङुत्पत्तेः। "भावकर्मणो"(पा. 1-3-13)रिति सूत्रात्। परस्मैपदिभ्य एवोत्पन्न -

---

[१] द3-कर्तृकर्म

[२] त2-द्योतकन्तु

[३] भार1,त1,1900,1915- "इत्यादौ" इत्यधिकम्

[४] अ1-क्रमादमुमित्यादि, 1900-क्रमादित्याद्यादि

[५] द2-पूर्वोत्तर

[६] द7-हेतुकारक

[७] द3-विषयं

[८] त2-तदनुकूलाभिन्ना

[९] भ3- इदं वाक्यं नास्ति

[१०] भ2,द5-एवमन्यत्राप्यूह्यम्

[११] द3- "सकर्मकधातुसमभिव्याहृतभावसाधारणविधिविधेयौ यौ यक्किणौ तत्त्वेन कर्मद्योतकतेत्यर्थः, पच्यते ओदनः स्वयमेव , क्रमादमुं नारद इत्यबोधि स इत्यादौ तु न भावसाधारणविधिविधेयौ यक्किणौ , किन्तु आतिदेशिककर्मवत्कर्मणातुल्यक्रिय इति विधिविधेयौ इति न तत्र व्यभिचारः" इत्यधिकम्

[१२] अ3-तत्तद्वचनानुसारेण चेत्यर्थः

[१३] अ1-वस्तुतस्तु

[१४] त3- "धातु" इत्यधिकम्

[१५] द6-विधिविषय

स्तङ् कर्मद्योतक इत्यर्थः। तेन एधत इत्यादौ तङ्गत्त्वेऽपि न कर्मप्रतीतिः। एधधातोरात्मनेपदित्वात्। नन्वेवमपि निविशत इत्यादौ परस्मैपदिभ्य एव तङः सत्त्वात् कर्मद्योतकत्वापत्तिः स्यादित्यत आह - उपसर्गादिप्रयुक्तो न चेदिति॥ उपसर्गादिनिमित्तकत्वाभावे सति परस्मैपदिभ्य एवोत्पन्नस्तङ् कर्मद्योतक इति परिष्कारेणादोषात्। निविशते इत्यादौ "नेर्विशः" (पा.1.3.17) इति सूत्रेण न्युपसर्गवतो विश आत्मनेपदविधानेनोक्ततङोऽभावात्।

तङ् यक्किणादय इति कारिकास्थमादिपदं विवृणोति - आदिना चिण्वदिति॥ आदिपदेन चिण्वदिड् ग्राह्य इति भावः। आदिग्रहणफलमाह - यथा कारिष्यते घट इत्यादाविति॥ कृ धातोः कर्मणि लृट्। तङ्। मध्ये स्यः। "स्य सिच् सीयुट् तासिसु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च" (पा.6.4.62) इति सूत्रेण चिण्वदतिदेश इडागमश्च। तेन वृद्धौ इडागमे सति षत्वादौ कारिष्यते इति प्रयोगोपपत्तिः। कर्मण उक्तत्वात् घट इति प्रथमा। अत्र चिण्वदिटः सत्त्वात्कर्मणः प्रतीतिरिति भावः।

द्योतकान्तरमाह – "कुषिरञ्जोः प्राचां श्यन् परस्मैपदं चे"(पा.3.1.90)ति सूत्रम्। अनयोः कर्मकर्तरि न यक् किन्तु श्यन् परस्मैपदं च भवतः इति सूत्रार्थः। रज्यति वस्त्रम्। अत्र कर्तृद्योतकं सूत्रविहितं परस्मैपदम्, श्यन् प्रत्ययश्च। श्यन्परस्मैपदे इति द्वन्द्वः। द्योतके इति द्विवचनान्तम्। श्यन् द्योतकः, परस्मैपदञ्च द्योतकम्।

ननु कर्मणि प्रत्ययेऽपि कर्तृप्रत्ययस्थल इव चक्रे कर्ता इत्यादौ रूपाविशेषात् तङाद्यभावे कर्माप्रतीतिरेव स्यादित्यत आह - लिडादावप्येवं रीत्येति॥ यगादेरभावेऽपि प्रकरणादिनैव तत्र कर्मप्रतीतिरिति भावः।

एतेनेति॥ कर्मादिद्योतकत्वनिर्धारणेनेत्यर्थः। आख्यातस्य तिङः। "लः कर्मणी"(पा.3.4.69)ति सूत्रादिति शेषः। पचतीत्यादौ भावनावदिति। यथा पचतीत्यत्र पच् धातुना भावनाप्रतीतिस्तस्य भावनायां शक्तेः,तथैव आख्यातस्य, कर्तृकर्मभावेषु शक्तिसत्त्वात् पचतीत्यादौ तेषां प्रतीत्यापत्तिः स्यादिति शङ्का। समादधाति - यगादेस्तात्पर्यग्राहकत्वकथनात् इति॥ तदभावेन उक्तापत्तेरयोगात्।

ननु उक्तकारिकया यत्र यत्र तङादयस्तत्र तत्र कर्मप्रतीतिरित्येव व्याप्तिरुपलब्धा, सा व्याप्तिरसमीचीना "पच्यते ओदनः स्वयमेव" इत्यादौ तेषां सत्त्वेऽपि कर्माप्रतीतेरन्वयव्यभिचारात् इति मनसि निधाय शङ्कते - नन्वेवं पच्यते ओदनः स्वयमेवेति॥ यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते इति सिद्धान्ताद् देवदत्तादेर्व्यापारो न विवक्षितः, ओदनस्यैव कर्तृत्वं विवक्षितं तदेदमुदाहरणम्। ओदनः स्वयमेव पच्यते, अत्र निष्पत्त्याश्रयीभवनमेव धात्वर्थः। तदाश्रयत्वादेव ओदनस्य कर्तृता। "कर्मवत्कर्मणा तुल्यक्रिय" (पा.3.1.87)इति सूत्रेण कर्मवत्त्वातिदेशात् तङादयः। तेषां सत्त्वेऽपि कर्माप्रतीतिरित्यन्वयव्यभिचारात् पूर्वोक्तायाः व्याप्तेरसाधुतेति भावः। अबोधीति॥ प्रक्रिया मूलोक्तैव। अत्रापि आश्रयस्य फलेऽनन्वयात् व्यभिचार इत्यत आह - उत्सर्गोऽयं कर्मकर्तृविषयादौ इति॥

यो हि पूर्वकारिकाया अभिप्रायः, तङादयः कर्मद्योतकाः, शबादयः कर्तृद्योतका इत्याकारकाः, स उत्सर्गः, असति बाधके स्वसाफल्याय प्रवर्तमानः। औत्सर्गिकत्वे हेतुमाह – कर्मकर्तृविषयादाविति॥ विषये स्थले । विपर्यय उक्तो व्यभिचारः। तङादिसत्त्वेऽपि आश्रयस्य फलानन्वयरूपः। ननु तर्हि अव्यवस्था प्राप्तेत्यत आह – तस्मादिति॥ उक्तविपर्ययसत्त्वात्। यथागमं यथाशास्त्रं यथाबोधं वेति। शास्त्रार्थस्य सूक्ष्मत्वादाह –यथोचितमिति॥ बोधानुसारेण शास्त्राविरोधेन च निश्चय औचित्यम्।

द्योतकत्वं तात्पर्यग्राहकत्वम्। ज्ञेयम् निश्चेयम्। तदेतदाह मूले – कर्मकर्तृविषयादावित्यतो बोध्यमित्यन्तेन॥ नारद इत्यबोधि स इत्यस्य बोधाकारमाह - शाब्दबोधस्तु इति॥ आगच्छन्तं नारदं श्रीकृष्णो भगवान् प्रथमतः त्विषां चय इति सामान्येन, ततः शरीरीति विशेषरूपेण ज्ञातवानित्यर्थः। न च अबोधीत्यस्य सकर्मकत्वात् नारद इत्यत्र द्वितीयापत्तिरिति वाच्यम्, निपातेन कर्मत्वाभिधानेनानुक्तकर्मणोऽभावात्।

यदि तु भाष्ये अभिधायकतिङादिपरिगणनेन निपातेनाभिधानस्य अभिधानप्रयोजकत्वकथनमनुचितमित्युच्यते तदा चयत्विषामित्यत आरभ्य नारद

इत्यन्तो भागो ज्ञानाकारपरस्तथा च तादृशज्ञानपरस्य तादृशवाक्यस्य कर्मत्वेऽपि प्रातिपदिकत्वाभावेन न द्वितीयापत्तिरिति बोध्यम्। तङादिसत्त्वेऽपि कर्मणोऽप्रतीतिः तदभावेऽपि तत्प्रतीतिरिति। तङादीनामनिर्णायकत्वेनानुगमाभावेऽपि शास्त्रमेवानुगमकम्।

अनुगमप्रकारमाह - वस्तुतस्तु इति॥ धारणया ज्ञानेन सह वर्तते इति साधारणः। भावार्थे विधानविषयकधारणया सह प्रवर्तमानो विधिः कर्मार्थे विधिः भावकर्मोभयार्थकप्रत्ययज्ञानप्रयोज्यचिण्यगादिविधायक "सार्वधातुके यक्"(पा.3-1-67) "भावकर्मणो" (पा.1.3.13) रित्यादिविधयः,तद् विधेयम् यत् तङ् यगादि, तत्कर्मद्योतकमित्यर्थः। सकर्मकधातुसमभिव्याहृतत्वम् यगादावन्वेति। तथा च पच्यते ओदनः स्वयमेवेत्यत्र कर्मवत्वातिदेशेनैव तङादि विधानम्, न स विधिर्भावकर्मोभयसाधारण इति भावः।

6. धातोर्व्यापारवाचकत्वव्यवस्थापनम्

**41.** अथ "सूची[1]कटाह"न्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य[2] "फलव्यापारयो" (वै.सि.का.2)रिति प्रति[3]ज्ञातं धातोर्व्यापारवाचकत्वं[4] व्यवस्थापयति-

व्यापारो भावना सैवोत्पादना[5] सैव च क्रिया[6]।
कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थो[7] इष्यते॥ 5॥

पचति पाकमुत्पादयति पाकानुकूला भावनेत्यादि[8]भावनावाचकपदैर्विवरणात्[9] सा[10] वाच्यैवेति[1] भावः।व्यापारपदं[2] फूत्कारादीनामयत्नानामपि[3] वाच्यतां बोधयितुम्[4]।

---

[1] त5-सूचि
[2] त2-मुपवर्णयन्
[3] द4-"प्रति" नास्ति
[4] के4-व्यापारवत्त्वं, द4,द3-व्यापारवाचित्वं
[5] त2-सैवोत्पादिनी
[6] त2-सैव च न क्रिया
[7] त2-यत्नार्थ
[8] जै-"विवरणस्थ" इत्यधिकम्
[9] भ3-पदविवरणात्
[10] अ4-"सा" नास्ति

बहुकालसाध्यं कटाहं निर्माति। अयमेव सूचीकटाहन्यायः। प्रकृते च अल्पायाससाध्यम् अल्पवादिविप्रतिपन्नञ्च शाब्दबोधमुपवर्ण्य बहुकालायाससाध्यं बहुवादिविप्रतिपन्नञ्च फलव्यापारयोर्धातुवाच्यत्वं प्रतिज्ञातं वादिमतनिरसनपूर्वकं व्यवस्थापयति - व्यापारो भावना इति॥

व्यापारो भावना। सा एव भावना उत्पादना, सा भावनैव क्रिया। यत्नमात्रं न धात्वर्थः, कृञोऽकर्मकतापत्तेरिति कारिकार्थः।

विशेषतस्तु व्याख्यास्यते। मीमांसकैर्भावनायाः वाच्यत्वं स्वीक्रियते न तु भावनायाः व्यापारत्वम्। अतस्तान्प्रति उभयोरैक्यं प्रतिपादयितुं कारिकायां भावना-व्यापारयोः पर्यायत्वमुक्तम्।

व्यापारो भावना सैवेत्यादिपूर्वार्धेन यो "गुणभूतैरवयवैरि"त्याद्युक्त-लक्षणलक्षितोऽर्थस्तद्वाचकव्यापारपदं भावनादिपदैर्विव्रियते। विव्रियमाणस्य विवरणसमानार्थकत्वेन धातोर्भावनावाचकत्वसिद्धिरित्यभिप्रायः। तत्रोद्देश्यविधेय-योरैक्यमापादयतः सर्वनाम्नः पर्यायेणान्यतरलिङ्गकत्वस्य "शैत्यं हि यत्सा प्रकृतिर्जलस्ये"त्यादि बहुषु स्थलेषु दर्शनात् न "सा" इति स्त्रीलिङ्गनिर्देशा-नुपपत्तिः। पुंल्लिङ्गत्वेऽपि "सोऽचि लोपे चेदि"(पा.6.1.134)ति लोपेन वृद्ध्या च साधुत्वात्। विवरणेन भावनाया वाच्यत्वं, व्यापारादीनाञ्च परस्परं पर्यायत्वं साधयन्नाह – पचतीति॥ पाकमुत्पादयति पाकानुकूला भावनेति विवरणेन धात्वर्थतया उत्पादना भावनादिपदव्यपदेश्योऽर्थः प्रतीयते। न चैतद् विवरणम् तिङो बोध्यम्। पाकमुत्पादयति इति विवरणे तिङः श्रवणात्। धातुमात्रस्यैव विवरणौचित्यात्।

ननु या क्रिया भावना सैवोत्पादनापि च सा स्मृता इत्युक्तेऽपि क्रियाया भावनात्वलाभे किमिति व्यापारपदमुपात्तमत आह – व्यापारपदमिति॥ तथा च व्याप्रियते अनेनेति करणव्युत्पन्नेन, भावव्युत्पन्नेन वा व्यापारपदेन फलानुकूलानां यावतामधिश्रयणादीनां भावनात्वलाभाय तदुपादानम्। क्रियापदेन तु कृतिपदवत् यत्नमात्रार्थकत्वस्यापि सम्भवेन तन्मात्रस्यैव तद्विवरणेन भावनात्वलाभः स्यादिति बोध्यम्। व्यापारपदोपादानफलमाह - अत एवेति॥ स्पष्टम्।

च यत्नार्थक[१]करोतिना विवरणात् किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेश्च यत्न एवार्थः[२]। अत एव पचतीत्यत्र यत्नानुभवः[3] सर्वसिद्धः संगच्छते।

नन्वेवं कथं[४] रथो गच्छतीत्यादि[५] प्रयोगः? तत्र यत्नस्य बाधादि[६]ति चेन्न, [७]अनुकूलव्यापारे लक्षणया प्रयोगात्। विद्यते इत्याद्यनुरोधा[८]दाश्रयत्व[९] एव वा[१०] लक्षणा। तथा च गमनाश्र[११]यबोध एव तत्र।

अत एवान्यदीयगमनानुकूलनोदनादिमति[१२] न गच्छतीति[१३] प्रयोग इति[१४]। तस्माद् व्यापारो वाच्य इति मतं[१५] न सम्यगित्याहुः।

---

वक्ष्यमाणग्रन्थमवतारयति - अथ सूचीकटाहन्यायेनेति॥

ननु फलव्यापारयोर्धातुवाच्यत्वं प्रतिज्ञाय सिद्धान्ततया तत्प्रतिपाद्य विरोधि -मतनिरासमकृत्वैव शाब्दबोधनिरूपणमसङ्गतमित्यत आह - एवं सूचीकटाहेति॥

युगपत् सूचीकटाहापेक्षिणौ लौहकारसमीपे गत्वाहतुः, मम सूचीं विधेहि, कुरु मे कटाहमिति। शिल्पी तु अल्पकालसाध्यत्वात् प्रथमं सूचीं निर्माय ततः

---

[१] अ1-कृत्यर्थ, अ3-यत्नार्थ

[२] त2-एवाख्यातार्थः

[3] अ1-यत्नार्थानुभवः

[४] अ1-"कथं" नास्ति

[५] जो2-गच्छतीति,भ2-गच्छतीत्यादिः

[६] भ2-तत्र यत्नस्य चेतननिष्ठत्वेन अचेतने रथे बाधादिति टिप्पणी

[७] अ4-"तत्र" इत्यधिकम्

[८] भ3-इत्यनुरोधा

[९] अ3-इत्यनुरोधाश्रय, द3-इत्याद्यनुरोधादाश्रय

[१०] त5,द6-"वा" नास्ति

[११] त2-गमाश्रय, अ4-गमनाश्रयत्वबोध...

[१२] अ1-नोदनादिमते

[१३] अ4-संगच्छन्तीति

[१४] अ4-"इति" नास्ति

[१५] अ1--"मतं" नास्ति,अ4-तत्

## 6.1 तिङन्ते व्यापारावाचित्ववादिनां नैयायिकानां मतविमर्शः, खण्डनञ्च

अत्र नैयायिकाः- व्यापारो वाच्य इत्ययुक्तम्[5], व्यापारत्व[6]स्योपाधित्वेन शक्यतावच्छेदके(कत्वे)[7] गौरवात्[8]। फूत्कारत्वादेरपि[9] गुरु[10]त्वादननुगतत्वाच्च नावच्छेदकत्वम्[11]। किं तु कृतित्वस्यैव जातिरूपतया लाघवेन शक्यतावच्छेदकत्वौचित्यात् कृतिरेव वाच्या वक्तव्या। किं च करोतेर्यत्नार्थकत्वं तावदावश्यकम्, यत्नजन्यत्वाजन्यत्वप्रति[12]संधानात् पटाङ्कुरयोः कृताकृत[13]व्यवहारात्।

तदुक्तमाचार्यैः[40]-

कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः पूर्वा परस्मिन् सैव[14] भावना॥ (न्या.कु.5-9)इति।

कृतित्वस्यैव लाघवेन शक्यता[15]वच्छेदकत्वौचित्याच्च[16]। व्यापारस्य कृञर्थत्वे च कारकमात्रं कर्तृपदार्थः स्यात्। करोत्यर्थ[17]भूताश्रयस्यैव[18] कर्तृपदार्थत्वात्[19]। इत्थं

---

[1] अ1-वाच्येति
[2] अ3-व्यापारादिपदं
[3] अ4-....यत्नानाम् मपि
[4] जो2-वाच्यत्वबोधकम्. त्रि-वाच्यतां बोधयति
[5] अ1-इति न युक्तम्, भार1,त1,त3,के4,त5-इत्यसङ्गतम्, त2-इत्युक्तम्
[6] के4- "त्व"नास्ति
[7] त3,अ4-च्छेदकत्वे
[8] त2-शक्यतावच्छेदकत्वं "गौरवात्"नास्ति
[9] भार1,त3-फूत्कारादेरपि
[10] अ1-गुण
[11] द2- न शक्यतावच्छेदकत्वम्, 1915-नावच्छेदकम्
[12] जो2-प्रतीति
[13] जो2-कृतत्व
[14] त2-"सैव"नास्ति,भ1- स च
[15] के4-शक्यत्वा
[16] अ1-शक्यतावच्छेदकत्वाच्च
[17] अ3-करोतीत्यर्थ
[18] अ1-करोत्यर्थमात्राश्रयस्यैव
[19] अ4-"करोत्यर्थभूताश्रयस्यैव कर्तृपदार्थत्वात्"इति नास्ति

अत्र प्राभाकराः प्राचीनाः - फलमेव धात्वर्थः। पचिगमित्यजिप्रभृतीनां विक्लित्ति-संयोग-विभागादिरूपं फलमेवार्थः। भावना तु न आख्यातार्थः सर्वत्र किन्तु लिङि एव। नव्यास्तु पुरुषप्रवृत्तिरूपा आर्थीभावना चाख्यातार्थः। आख्यातार्थवर्तमानत्वादिकन्तु भावनायामेवान्वेति समानप्रत्ययोपात्तत्वात् इत्याहुः।

प्राचीननैयायिकास्तु फलं धात्वर्थः कृतिराख्यातार्थ इति वदन्ति। केचित्तु फलव्यापारौ धात्वर्थः। कृतिराख्यातार्थ इति वदन्ति। अन्ये च व्यापारो धात्वर्थः फलं द्वितीयार्थ इति वदन्ति। एतान् मतभेदान् निराकर्तुमग्रिमो ग्रन्थः।

इदानीं फलं धात्वर्थः कृतिराख्यातार्थ इति नैयायिकमतं खण्डयितुमुपस्थापयति - अत्र नैयायिका इति॥ यद् वैयाकरणैर्व्यापारस्य वाच्यत्वमुक्तन्तदयुक्तम्। हेतुमाह – व्यापारत्वस्योपाधित्वेनेति॥ फलव्यापारयोरिति कारिकया व्यापारस्य धात्वर्थत्वं यदुक्तं तदयुक्तमित्यर्थः। ननु नैयायिकैः व्यापारस्य धात्वर्थत्वं न स्वीक्रियते किन्तु तस्य प्रत्ययार्थत्वमेवेति आक्षेपानुपपत्तिरिति चेन्न। व्यापारस्य वाच्यत्वखण्डने एव तात्पर्यात्। तस्य प्रत्ययार्थत्वमपि नाङ्गीक्रियते। व्यापारस्थाने लाघवात् कृतेरेव वाच्यत्वस्येष्टत्वात्। व्यापारस्य वाच्यत्वे, शक्यतावच्छेदकं व्यापारत्वं वाच्यम्। तथा सति गौरवमित्याह - शक्यतावच्छेदके गौरवात् इति॥ ननु व्यापारत्वस्य जातिरूपतया न गौरवमित्यत आह – व्यापारत्वस्योपाधित्वेनेति॥ जातिरूपत्वे तु गौरवं नास्त्येव, किन्तु तस्य जातिरूपत्वमेव व्याहतम्, साध्यत्वेनाभिधीयमानक्रियात्वरूपतया सखण्डत्वेन जातिरूपत्वाभावात्। व्यापारत्वस्यैव शक्यतावच्छेदकत्वे सर्वेषामपि धातूनां पर्यायत्वापत्तिश्च। व्यापारत्वेन व्यापारवाचकत्वाविशेषात्। ननु पचतीत्यादौ फूत्कारत्वाधिश्रयणाधःसन्तापनयत्नत्वादिरूपेण व्यापारबोधस्यानुभवसिद्धत्वेन फूत्कारत्वाद्येव शक्यतावच्छेदकमस्तु इत्यत आह - फूत्कारत्वादेरपि गुरुत्वादिति॥ गुरुत्वं कृतित्वापेक्षया। ननु फूत्कारत्वादेर्जातिरूपत्वे न गुरुत्वदोष इत्यत आह – अननुगतत्वाच्चेति॥ अननुगतत्वं शक्यतावच्छेदकनानात्वम् , तच्च फूत्कारत्वाधःसन्तापनत्वादिभेदेन बोध्यम्। स्वमतमाह - किन्तु कृतित्वस्यैवेति॥ कृतित्वस्यैकस्य जातिरूपतया लाघवमित्यर्थः। तस्मात् कृतिरेव वाच्या।

ननु तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानुगमकत्वमस्तु इत्यरुचेराह - किञ्च कृधातोर्यत्नवाचकत्वमावश्यकम् इति॥ तत्र हेतुमाह – यत्नजन्यत्वेति॥ पटः कृतः अङ्कुरः कृतः इत्यत्र कृत इत्यस्य यत्नजन्यः इत्यर्थः, तत्र कुलालादेः कृतेः सत्त्वात्। बीजादिना अङ्कुरः कृत इत्यत्र अचेतने कृतेर्बाधात्, व्यापारजन्यत्वमेव कृतित्वं वाच्यम्। सोऽयं कृताकृतत्वव्यवहारो यत्नार्थकत्वे एव सम्भवतीत्यर्थः।

आचार्याणामत्रानुमतिमाह -

कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना॥ इति।(न्या.कु. 5-9)

कर्तृरूपव्यवस्थया कृताकृतविभागेन यत्नः कृतिरेव परस्मिन् मीमांसकमते सा कृतिरेव भावनापदेनोच्यते।अन्यत्र अचेतनकर्तृके लक्ष्यः व्यापार एव भावनेति व्याख्यान्तरम्।

यत्र चेतनः कर्ता कुलालादिना घटः कृतः इत्यादौ तत्र घटादौ यत्नजन्यत्वरूपं कृतत्वम्। अङ्कुरः कृत इत्यादौ ईश्वरकृतिजन्यत्वेऽपि चैत्रादिकृतिजन्यत्वाभावेन न यत्नजन्यत्वरूपं कृतत्वमपि तु अकृतत्वमेव बीजादिव्यापारजन्यत्वरूपमेवानुभवसिद्धम्।

कृञोऽयत्नार्थकत्वे दोषमाह - व्यापारस्य कृञर्थत्वे इति॥ अयमाशयः। यदा कृञ्धातोः कृतिरर्थः तदा तु फलानुकूलकृत्याश्रयत्वस्य कर्तरि एव सत्त्वेन प्रधानीभूतकृत्याश्रयस्य कर्तृसंज्ञेति नान्यत्र कर्तृत्वप्राप्तिः। यदा तु व्यापारो धात्वर्थः तदा कृधातोस्तृचि कर्तेति पदम् निष्पद्यते, तस्य च व्यापारा- श्रयत्वमर्थः। तथा सति सर्वेषामपि कारकाणां स्वस्वव्यापाराश्रयत्वेन कर्तृत्वापत्तेः। तदेवाह – करोत्यर्थभूताश्रयस्येति॥ करोत्यर्थो व्यापारः। पुनरपि कृतेः कृधात्वर्थत्वं प्रतिपादयन्नाह – इत्थञ्चेति॥ पचतीत्यस्य पाकं करोतीति यत्नार्थककरोतिना विवरणेन विव्रियमाणस्य पचादिधातोरपि यत्नार्थकत्वमेव। ननु करोतीति विवरणं धातोरेवेत्यत्र विनिगमकाभाव इत्यत आह- किं करोतीति॥ प्रश्नोत्तरयोः समानविषयकत्वनियमेन किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्यापि यत्नविषयकत्वावश्यकत्वेन यत्नस्य वाच्यत्वमभ्युपेयमित्यर्थः। अत एवेति॥ विवरणादिभिः धातोर्यत्नार्थ-

त्वादेवेत्यर्थः। उक्तरीत्या यत्नार्थत्वस्यानुभवसिद्धत्वमाह – यत्नानुभवः सर्वसिद्ध इति॥

इदानीं धातूनां चेतनधर्मयत्नार्थकत्वे रथो गच्छतीत्यचेतनकर्तृप्रयोगानुपपत्तिमाशङ्क्याह - नन्वेवं कथं रथो गच्छतीत्यादिप्रयोग इति॥ कृतेकृञर्थत्वे तस्याश्चेतनधर्मत्वेन रथादावचेतने बाधात् रथो गच्छतीत्यादिप्रयोगानुपपत्तिः। तदाह - यत्नस्य तत्र रथादौ बाधात् इति॥

तादृशप्रयोगोपपादनायाह – चेन्नेति॥ रथो गच्छतीत्यादौ धातोर्व्यापारे लक्षणास्वीकारेण दोषाभाव इत्यर्थः। व्यापारनिराकरणपरस्य व्यापारे लक्षणास्वीकारे पराजयः इत्यत आह - विद्यते इत्याद्यनुरोधादिति॥ सत्तार्थकविदधातोः कृत्यर्थकत्वानुपपत्तिः, विदर्थसत्ताया नित्यत्वेन तस्या अनुकूलत्वसम्बन्धेन कृतावन्वयायोगात्। अतस्तत्र आश्रयत्वे लक्षणा। तथा च सत्ताश्रयबोधः। तथैवात्रापि आश्रयत्वे लक्षणां स्वीकृत्य गमनाश्रयबोधः स्वीकार्यः। एवमेव जानातीत्यत्र ज्ञानजनकताया जन्यताया वा कृतौ बाधात्। इच्छतीत्यादौ कृतावनन्वयस्य, नश्यतीत्यादौ कृतावनन्वयस्य चापत्तिः। अतः उक्तेषु आश्रयत्वे प्रतियोगित्वे च लक्षणा। जानाति, इच्छति इत्यत्र ज्ञानेच्छानिरूपिताश्रयतावान् देवदत्तः इति बोधः।

अत्रेत्थं बोध्यम् - अत्र कृतेर्धात्वर्थत्वं चिन्त्यते , आख्यातार्थत्वं वेति सन्देहे धात्वर्थत्वमेवेति निर्णयः। कृधातोः कृञर्थत्वदृष्टान्तेन पच्यादिधातूनामर्थनिर्णयप्रस्तावात्।

ननु नैयायिकमते कृतेराख्यातवाच्यत्वसिद्धान्तेन, तस्या धातुवाच्यत्व - विचारानुपपत्तिरिति चेन्न। तटस्थस्य नैयायिकेतरस्यात्र पूर्वपक्षित्वात्। अत एव यद्रीत्या नैयायिकैर्व्यापारत्वस्याख्यातवाच्यतावच्छेदकत्वं निरस्य कृतित्वस्य तद्व्यवस्थापितं तद्रीत्यैव धातोः कृतित्वमात्रं शक्यतावच्छेदकं भविष्यतीति तटस्थाशङ्कां निराकरोतीति प्रकृतकारिकाव्याख्याने दर्पणग्रन्थः सङ्गच्छते। वस्तुतः अत्र विवरणवाक्यगतकृञर्थः क इत्येव विचारः। अत एवेति॥ आश्रयत्वस्य लक्ष्यत्वादेव। तत्र रथो गच्छतीत्यत्र गमनाश्रयो रथ इत्येव बोधः।

अत एव रथो गच्छतीत्यत्र गमनाश्रय इति बोधस्वीकारादेव। अन्यदीयं देवदत्तीयं यद् गमनं, तादृशगमनानुकूलप्रेरणावति यज्ञदत्ते न गच्छतीति प्रयोगः अपि तु गमयतीत्येव। नोदना प्रेरणा। अन्यथा, गमनानुकूलकृतेः प्रेरणारूपायाः, प्रयोजककर्तरि विद्यमानत्वेन तत्रापि गच्छतीति स्यादेव।

42. अत्र वदन्ति - लक्ष्यतावच्छेदकत्वस्येव[१] शक्यतावच्छेदकत्वस्यापि गुरुणि[२] स्वीकारे बाधकाभावः[३]। तयोर्वैषम्ये बीजाभावात्।

अथ कारणतावच्छेदकत्वप्रतियोगितावच्छेदकत्व[४]वच्छक्यतावच्छेदकत्वं[५] स्वरूपसंबन्धविशेषः[६]। स च[७] संभवति लघौ गुरौ न कल्प्यते[८]। अत एव लघुधर्म[९] एव कारणतावच्छेदकः[१०] कल्प्यते। शक्यतावच्छेदकत्वं च स्वरूपसंबन्धविशेषो न[११] लक्ष्यतावच्छेदकत्वमिति[१२] चेन्न।

स्वरूपसंबन्धो यदि[१३] तत्तत्स्वरूपम्, तदा गुरुधर्मस्वरूपाणामपि[१४] सत्त्वात् किमनुपपन्नम्[१५]? अथातिरिक्तः, तदापि तद्वल्लक्ष्यता[१६]वच्छेदकत्वमपि स्वरूप-

---

[१] अ4-.......च्छेदकवत्

[२] त्रि-गुरुणे

[३] अ1-बाधकाभावात्, त्रि- स्वीकारबाधकाभावः।

[४] 1915-"त्व" नास्ति

[५] द1-क्यतावच्छेदकं, अ4- "अपि" इत्यधिकम्

[६] ब1-अथ कारणतावच्छेदकत्वं प्रतियोगितावच्छेदकत्वं स्वरूपसंबन्धविशेषः

[७] द5- "स च" नास्ति

[८] भ3-गुरौ तदभावात्, त5-गुरौ लघौ न कल्प्यते, द7- लघु गुरौ न कल्पते

[९] वा2,द1,त1,जो2,ब1,1900-लघुर्धर्म, भ2- लघुधर्मःदण्डत्वादिः इति टिप्पणी

[१०] आ1,अ3,त2-लघुधर्मे एव कारणतावच्छेदकत्वं कल्प्यते

[११] अ4-"न" नास्ति

[१२] ब1-लक्ष्यतावच्छेदकः कल्प्यते शक्यतावच्छेदकमिति चेन्न

[१३] जो2-संबन्धोऽपि,अ4-......सम्बन्धो हि यदि

[१४] जो2-"अपि" नास्ति

[१५] भ1-कथमनुपपन्नम्

[१६] द5-तद्वत्तुल्ययुक्त्या लक्ष्यता, म,अ4-तद्वदेव लक्ष्यता

संबन्धविशेष इति कथं[१] गुरुधर्मेषु[२] तत्स्वीकारः? वृत्तिज्ञानकार्यतावच्छेदकत्वस्योभयत्रापि तुल्यत्वात्।

किं च, गुरुधर्मेष्ववच्छेदकत्वास्वीकर्त्रा[३] तदभावः[४] स्वीकार्यस्तद्वरमवच्छेदकत्वस्वीकार एव, भावकल्पनायां लाघवात्। अन्यत्र क्लृप्ताभावस्य संबन्धमात्रं[५] कल्प्यते[६] लाघवादिति[७] चेत्,[८] अन्यत्र कल्प्यमानावच्छेदकत्वस्यैव संबन्धः स्वीक्रियताम्,[९] लाघवात्[१०]।

वस्तुतस्तादृश[स्व][११]रूप[१२]संबन्धस्या[१३]तिरिक्तस्य स्वीकारे प्रमाणं सुधीभिश्चिन्त्यम्[१४]। अत[१५] एवावच्छेदकत्वमन्यूनानतिरिक्तवृत्तित्वमिति वदन्ति[१६]। तदपि गुरुधर्मे[१७] निर्बाधम्[१८]।[१९]

एवं नानार्थस्थले लघुधर्माव[च्छिन्ने][२०] शक्तिः अपरत्र[१] निरूढ[२]लक्षणेत्यप्यपास्तम्[३]।

---

१ वा2-"न" इत्यधिकम्

२ अ1-गुरुफलेषु

३ जै-स्वीकर्त्रात्

४ के4- "स्वीकर्त्रा तदभावः"नास्ति

५ अ4-सम्बन्धमपि मात्रं

६ अ3-संबन्धमात्रकल्पने

७ द4- "लाघवात्" नास्ति

८ अ3,वा2-"न" इत्यधिकम्

९ त2-स्वीक्रियते

१० अ4-"लाघवात्" इति नास्ति

११ "स्व" इत्यपेक्षितं सर्वास्वन्यमातृकास्वस्ति। अत्रैव नास्ति।

१२ त2-"रूप"नास्ति

१३ जै-संबन्धातिरिक्तस्य

१४ 1900,म-चिन्तनीयम्

१५ अ4- "अत" नास्ति

१६ "यदि" इत्यधिकम्

१७ जै-गरुधर्मेण

१८ द3-निराबाधम्

१९ द4,द3,भ2,द5-"तस्य व्यापकत्वस्वीकारात्" अधिकं

२० "च्छिन्ने" इत्यपेक्षितं सर्वास्वन्यमातृकास्वस्ति। अत्रैव नास्ति।, अ1,त2,अ3-च्छिन्न एव

एवं प्रतियोगितावच्छेदकत्वमपि स्वरूपसंबन्धविशेष[४] इत्यपि निरस्तम्। गौरवप्रतिसंधानदशायामपि कम्बुग्रीवादि [५] मान् नास्तीति प्रतीतेर्गुरु-धर्मोऽप्यवच्छेदक इत्यन्ये[६]।

तच्चिन्त्यम्[७]। कम्बुग्रीवादिमान् नास्तीत्यादाववच्छेदकत्वस्य संसर्गतया प्रवेशात्। तदवगाहिज्ञानस्य चाप्रतिबध्यत्वात्[८]।

किं चैवं धर्मितावच्छेदकशालिज्ञानं प्रतिबन्ध्यम्[९]। प्रकृते च[१०] धर्मिता-वच्छेदकानवगाहनान्न[११] दोष इति।

किं च, कम्बुग्रीवादिमत्त्वस्य प्रतियोगितावच्छेदकतया [१२] भानमप्य-सिद्धम्[१३]। किं तु प्रमेयो घटो नास्तीत्यादौ प्रमेयत्वादिवत्[१४] प्रतियोगि-विशेषणत्वेन[१५] भानमात्रम्।

न चैवं कम्बुग्रीवादिमत्प्रति[१६]योगिकाभाववत्ता[१]बोधस्यैव पर्यवसानाद् यत्किञ्चिद्घ-टवत्यपि तथा प्रयोगापत्तिः, कम्बुग्रीवादिमत्त्वसमव्याप्त [२] धर्मावच्छिन्नप्रति-

---

[१] त1;त5-शक्तिरित्यत्र, अ1-शक्तिः परत्र

[२] वा2,त1,1900,1915,भ2-निरूढा,ज1-"निरूढ" नास्ति

[३] अ1,जो2,भ1-णेत्यपास्तम्

[४] द5-स्वरूपसंबन्ध इति

[५] के4- "आदि" नास्ति

[६] त2-इत्यप्यन्ये

[७] त्रि-इत्येतच्चिन्त्यम्

[८] ब1,द1,भ1,त्रि- --प्रतिबन्ध्यत्वात्, जै-तवगाहिज्ञानस्य वा प्रतिबन्ध्यात्, त5- वाप्रतिबध्यत्वात्

[९] वा2,त1,त3,1900,द2,द4,भ2,भ3,1915-प्रतिबध्यम्, ज1,द5- प्रतिबध्यात्

[१०] त5-चा

[११] जै-नवग्राहान्न

[१२] अ3- "अवच्छेदकतया " नास्ति

[१३] अ1- किंच कम्बुग्रीवादिमत्प्रतियोगिकाभावस्यैव अवगाहनात्तस्य प्रतियोगितावच्छेदकतया भानमप्य-सिद्धम्

[१४] जै-प्रमेयादिवत्

[१५] भ2,द5-विशेषणवत्त्वेन

[१६] त्रि- कम्बुग्रीवादिमत्त्वस्य प्रति

योगिताकत्वसंबन्धेन कम्बुग्रीवादिमत्प्रतियोगिकाभावस्यैवावगाहनात्[३]। अत एव न यत्किञ्चित्कम्बुग्रीवादिमति कम्बुग्रीवादिमान् नास्तीति शब्दः प्रमाणम्[४]। प्रमाणं च[५] घटसामान्यशून्ये इति रामकृष्णभट्टाचार्याः।

एवं कारणतावच्छेदकत्वं स्वरूपसंबन्धविशेष इत्यपि[६] निष्प्रमाणम्, अतो न तदवच्छेदकत्वेनापि जातिसिद्धिः। तस्मान्नोक्तलाघवानुरोधात् कृतित्वमेव वाच्यता-वच्छेदकमिति[७] युक्तम्। वक्ष्यते चा[८]ऽन्यदुपरिष्टात्।

---

धातोर्व्यापारवाचकत्वे व्यापारत्वस्य शक्यतावच्छेदकत्वे च गौरवं प्रदर्श्य, कृतित्वमेव शक्यतावच्छेदकं लाघवात् तैः व्यवस्थापितम्, रथो गच्छतीत्यादौ चाचेतने कृतेर्बाधात् व्यापारे च लक्षणा तैः स्वीकृता। तत्र व्यापारत्वस्य लक्ष्यतावच्छेदकत्वम्। तटस्थस्य धातुवाच्यतावच्छेदकत्वम्, नैयायिकस्याख्या-तवाच्यतावच्छेदकत्वमिति ध्येयम्। व्यापारे लक्षणावादिमते यथा गुरुभूतस्य सखण्डोपाधिरूपस्य व्यापारत्वस्य लक्ष्यतावच्छेदकत्वम् तथा व्यापारस्य धातुशक्यत्वेऽपि व्यापारत्वस्य शक्यतावच्छेदकत्वे गौरवाभाव इति भावः। गुरुणीति॥ शक्तिलक्षणयोरुभयोरपि धात्वर्थसम्बन्धत्वाविशेषात्, गुरुधर्मावच्छिन्ने लक्षणाया इव शक्तेरपि सम्भवात्।

ननु तेषां कृतित्वापेक्षया गुरुत्वमेव बाधकमत आह – तयोरिति॥ समनियतस्य गुरुधर्मस्य लघुधर्मस्य च सत्त्वे लघुधर्मे एवावच्छेदकत्वं कल्प्यते, न तु गुरुधर्मे, गौरवात्। प्रकृते व्यापारादिषु लक्षणायां तादृशनियममनादृत्य यथा गुरुषु व्यापारत्वादिषु लक्ष्यतावच्छेदकत्वं त्वया स्वीक्रियते, तथा व्यापारस्य

---

[१] के4- "वक्ता"नास्ति

[२] भ2-समभिव्याप्त

[३] द7-प्रतियोगिकाभावावगाहनात्

[४] वा2-" प्रमाणम्" नास्ति

[५] अ4- "च"नास्ति

[६] जो2-इति

[७] के4-वाच्यतावच्छेदकत्वम्

[८] अ1-वा

शक्यत्वे व्यापारत्वस्य शक्यतावच्छेदकत्वे च बाधकाभावो विनिगमकाभावादिति। अत एवाह – बीजाभावादिति॥ तादृशधर्मस्याभावात् संभवति लघुधर्मे इत्यस्य विषयाभावादिति भावः।

इदानीं शक्यतावच्छेदकत्वस्य गुरौ धर्मे स्वीकर्त्राशयं खण्डयितुं वैषम्यं दर्शयति - अथ कारणतावच्छेदकत्वप्रतियोगितावच्छेदकत्वेति॥ प्रत्यक्षं प्रति महत्त्वं कारणमिति कार्यकारणभावे कारणतावच्छेदकं महत्त्वत्वं वक्तव्यम्। कारणतावच्छेदकत्वं महत्त्वत्वे। प्रत्यक्षं प्रति अनेकद्रव्यं कारणमित्ययमपि कार्यकारणभावः सम्भवति, तत्रानेकद्रव्यत्वे कारणतावच्छेदकत्वं न भवति। इदमवच्छेदकत्वं स्वरूपसम्बन्धविशेष एव। एवमेव प्रमेयो घटो नास्तीत्यत्र प्रतियोगितावच्छेदकत्वं घटत्वे, प्रमेयत्वविशिष्टघटत्वे च सम्भवति। 'सम्भवति [समनियते] लघौ गुरावि'त्यस्य स्वरूपसम्बन्धविशेषरूपमवच्छेदकत्वं लघुधर्मे सम्भवति, गुरुणि न तत्कल्पयेदित्यर्थः। एवञ्च सम्भवत्तदवच्छेदकताकधर्मापेक्षया यो गुरुः स तदवच्छेदकत्वाभाववानिति व्याप्तिः फलति। तथा उक्तस्थले स्वरूपसम्बन्धविशेषरूपमवच्छेदकत्वं महत्त्वत्वघटत्वादिषु लघुषु सम्भवति चेत् गुरुषु अनेकद्रव्यत्वप्रमेयत्वविशिष्टघटत्वादिषु न कल्प्यम्, उक्तनियमविरोधात्। इदमेवाह - कारणतावच्छेदकत्वेत्यत आरभ्य अत एवेत्यन्तेन ग्रन्थेन।

तथा च असम्भवल्लघुभूततदवच्छेदके गुरुणि यथा लक्ष्यतावच्छेदकत्वं त्वया कल्प्यते, तथैव शक्यतावच्छेदकत्वस्य स्वीकारे तुल्यत्वमेव। ननु शक्यतावच्छेदकत्वं स्वरूपसम्बन्धविशेष इति तत्र सम्भवति समनियते लघौ धर्मे गुरौ तदभावादिति नियमाप्रसक्तिरिति शङ्कते – शक्यतावच्छेदकत्वमिति॥ शक्यतावच्छेदकत्वस्य विकल्पगौरवमपहरति - स्वरूपसंबन्धो यदीति॥ शक्यतावच्छेदकत्वं स्वरूपसम्बन्धविशेषः; तत्तत्स्वरूपम् आश्रयादिरूपम्, तदा तत्तत्स्वरूपस्वीकारे आश्रयाणां स्वरूपात्मकानां गुरुत्वात् अगत्या गुरुणि अपि स्वीकारावश्यकत्वेन न तन्नियमप्रसक्तिर्लघोरसम्भवात्। अतिरिक्तत्वपक्षेऽपि न दोष इत्याह - अथातिरिक्त इति॥ अतिरिक्तत्वपक्षे लक्ष्यतावच्छेदकत्वमपि स्वरूप-सम्बन्धविशेष एवेति यथा त्वन्मते व्यापारत्वादौ तदस्ति तथा व्यापारत्वादेः शक्यतावच्छेदकत्वमस्तु। तदेवाह - कथं गुरुधर्मेषु तत्स्वीकार इति॥ किञ्च यथा

गङ्गायां घोष इत्यत्र गुरोरपि गङ्गातीरत्वादेरवच्छेदकत्वं तथैव व्यापारत्वादेरपि शक्यतावच्छेदकत्वमस्तु। उभयोः समानत्वमाह – वृत्तिज्ञानकार्यतेति॥ वृत्तिज्ञानम् तत्तदर्थनिरूपितवृत्तिज्ञानम्। तच्च शक्तिज्ञानं लक्षणाज्ञानं वा। तदीयं कार्यम् आद्ये शक्यार्थविषयकं शाब्दज्ञानम् अन्ते लक्ष्यार्थविषयकं तत्। तादृशवृत्तिज्ञानकार्यता शक्यार्थविषयकज्ञाने लक्षयार्थविषयकज्ञाने च, तदीयकार्यतावच्छेदकत्वम् परम्परया शक्यतावच्छेदके लक्ष्यतावच्छेदके च व्यापारत्वे समानमेवेति तदाशयः। एतदेवाह – तुल्यत्वादिति॥ उक्ताभिप्रायं द्रढयति - किञ्च गुरुधर्मेष्विति॥ गुरुधर्मे अवच्छेदत्वाभावकल्पनापेक्षया लाघवात्तत्रावच्छेदकत्वकल्पनमेवोचितम्। अभावकल्पनापेक्षया भावकल्पनाया औचित्यात्।

न चोक्तन्यायस्य निर्विषयत्वापत्तिः, प्रमेयो घटो नास्तीत्यादौ तन्न्यायस्य प्रवृत्तेः। इदानीम् उभयोः वैषम्यं पुनरपि आशङ्कते – अन्यत्रेति॥ अन्यत्र शक्यतावच्छेदकत्वे। क्लृप्ताभावस्य क्लृप्तोऽभावः अवच्छेदकत्वाभावो यस्येति विग्रहः। व्यापारत्वादेः शक्यतावश्छेदकत्वं नास्तीत्यर्थः।

सम्बन्धत्वमात्रकल्पनमेवेति शङ्कामपनुदति - अन्यत्र कल्प्यमानेति॥ अन्यत्र कल्प्यमानमवच्छेदकत्वमेव सम्बन्ध इति यः स्वरूपसम्बन्धः स एवावच्छेदकः एवमस्तु बाधकाभावादिति भावः। किञ्च अवच्छेदकत्वस्य स्वरूपातिरिक्तत्वमेव नास्तीत्युच्यते - वस्तुतस्तु इति॥ अवच्छेदकत्वस्य स्वरूपसम्बन्धविशेषातिरिक्तत्वमेव नास्ति, कुतस्तत्पक्षीयदोषप्रसक्तिरिति।

अवच्छेदकत्वं परिष्करोति - अत एवावच्छेदकत्वमिति॥ अवच्छेदकत्वम् अन्यूनातिरिक्तवृत्तित्वरूपमेव, न तु गुरुवृत्तित्वाभाववद्रूपम्। तथा सति गुरुणि अपि सत्त्वे बाधकाभाव इत्यर्थः। तदेवाह - तदपि गुरुधर्मे निर्बाधमिति॥

एवं नानार्थस्थले इति॥ एवम् अन्यूनानतिरिक्तवृत्तित्वस्यैवावच्छेदकत्वस्य स्वीकारे सति नानार्थस्थले लघुधर्मावच्छिन्ने शक्तिरिति लघुधर्मादरो न युक्तः इति भावः। अवच्छेदकधर्मस्यावच्छेद्यापेक्षया सामनैयत्यस्यैवावश्यकत्वात्।

केचन इत्थं वदन्ति - सम्भवति लघौ गुरुणि तदभवादिति नियमेन नानार्थकहर्यादिस्थले विष्णुत्वसूर्यत्वेन्द्रत्वादेः शक्यतावच्छेदकत्वे अनौचित्यम्।

अतः एकस्यैव विष्णुत्वाद्यन्यतमस्यावच्छेदकत्वमस्तु। तथा च विष्णुत्वावच्छिन्ने एव शक्तिः लाघवात्, इन्द्रत्वावच्छिन्ने तादृशबोधस्यानुभवसिद्धत्वेन निरूढलक्षणैव न तु शक्तिः। रीतिमेनां विहाय गतेरन्यस्या अभावादिति। अपास्तमिति ॥ अयमाशयः। एकधर्मावच्छिन्ने निरूढलक्षणेति स्वीकारे अनेकशक्यतावच्छेदकत्व-रूपस्य नानार्थकत्वस्यानुपपत्तिः। हर्यादिनानार्थकस्थले विष्णुत्वेन्द्रत्वादिषु नानाऽवच्छेदकम्। उक्ताभिप्राये नैतदुपपद्यते। किञ्च विष्णुत्वादेः षोडशविधत्वे कस्यावच्छेदकत्वं कस्यानवच्छेदकत्वमित्यत्र विनिगमकत्वाभावः।न च वाच्यं हरिपदवाच्यत्वमेव लघुभूतं शक्यतावच्छेदकमिति, वाच्यत्वस्य जातिभिन्नतया प्रतिव्यक्तिभिन्नतया चाभीप्सितलाघवानुपपत्तेः। एवं प्रतियोगितावच्छेदकत्वमपीति॥ घटो नास्तीत्यादिस्थले घटत्वादिप्रतियोगितावच्छेदकम्। प्रतियोगितावच्छेदकत्वं घटत्वादौ। तादृशप्रतियोगितावच्छेदकत्वं स्वरूपात्मकमेवेति (घटत्वादि-स्वरूपात्मकमेवेति)। तन्नोचितम्। स्वरूपात्मकत्वे तत्स्वीकारवैफल्यात् धर्मे धर्मिभावप्रतीतिविरोधाच्चेति।

इदानीं सम्भवति लघाविति न्यायस्य व्यभिचारमनुभवबलादाख्यापयति – गौरवप्रतिसन्धानदशायामिति॥ भ्रमत्ववारणायाह – गौरवेति॥ लाघवभ्रमेण तथा प्रतीतिः च अवच्छेदकगौरवज्ञाने बाधिता स्यादिति अतः गौरवेत्याद्युक्तम्। गुरुभूतकम्बुग्रीवादिमत्त्वस्य ज्ञानकालेऽपि कम्बुग्रीवादिमान् नास्तीत्याकारिका कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावप्रतीतिः। तद्बलात् गुरुधर्मस्य कम्बुग्रीवादिमत्त्वस्यावच्छेदकत्वमिति तन्न्यायव्यभिचारः। खण्डयति – तच्चिन्त्यमिति॥ कम्बुग्रीवादिमत्त्वस्य न प्रतियोगितावच्छेदकधर्मतया भानम्, किन्तु संसर्गतयैव। धर्मगौरवस्यैव तन्न्यायविषयत्वं न तु संसर्गस्येति ग्रन्थाशयः।

तथा हि - तद्वत्ताबुद्धिं प्रति तदभाववत्ताज्ञानं प्रतिबन्धकमिति प्रतिबध्यप्रतिबन्धकभावः। अत्र (धर्मज्ञानस्य) धर्मितावच्छेदकशालिज्ञानस्यैव प्रतिबध्यांशे प्रवेशः न तु संसर्गस्येति भावः। तथा चात्र दोषो नास्ति। तदाह - प्रकृते चेति॥ अवच्छेदकस्य कम्बुग्रीवादिमत्त्वस्य उक्तरीत्या संसर्गतया भानात्। ननु अत्र प्रमाणाभाव इत्यत आह – किञ्चेति॥ कम्बुग्रीवादिमत्त्वस्य कम्बुग्रीवादिमा-न्नास्तीत्यत्र प्रतीयमानस्य प्रतियोगितावच्छेदकतया न भानम्, गौरवात्।

उदाहरणमाह - प्रमेयो घटो नास्तीत्यादौ प्रमेयत्वम्। यद्यप्यत्र प्रमेयत्वं प्रतीयते तथापि तन्न प्रतियोगितावच्छेदकम्, प्रमेयत्वावच्छिन्नप्रतियोगिताकभेदस्य अप्रसिद्धेः। तद्वदत्रापि गौरवात् न तथा प्रतीतिः। यदि कम्बुग्रीवादिमत्त्वस्य प्रतियोगितावच्छेदकत्वं न स्वीक्रियते तदा सामान्याभावो धर्तुं न शक्यते। तदा दोषमाह - न चैवमिति॥ तदभावे प्रतीतिमाह – कम्बुग्रीवादिमत्प्रतियोगिकेति॥ तथा सति यत्किञ्चिदभाव एव प्रतीयेत न तु सर्वकम्बुग्रीवादिमदभावः। तथा च यत्किञ्चिद् घटवति भूतलादौ अपि तथा प्रतीत्यापत्तिः। समाधानमाह – कम्बुग्रीवादिमत्त्वसमव्याप्तेति॥ समव्याप्तो धर्मः, घटत्वादिः। शेषं स्पष्टम् । फलमाह - अत एवेति॥ शब्दः तथा वाक्यम् न प्रमाणम् प्रमाजनकम्। सामान्याभावे एव समनियतधर्मावच्छिन्नप्रतियोगिकाभावौचित्यात्।

एवमिति॥ स्वरूपसम्बन्धविशेषत्वे सम्भवतीति न्यायेन लाघवात् कारणतावच्छेदकतया वाच्यतावच्छेदकत्वेन, कृतित्वसिद्ध्यापत्तिरिति भावः। निष्प्रमाणत्वे फलमाह - न कृतित्वमवच्छेदकमिति॥

### 6.2 कृञादेः फलावाचकतावादिमतानुवादः, खण्डनञ्च

**43.** नन्वस्तु तर्हि धातोः केवलव्यापारवाचकता, फलं कर्मप्रत्ययार्थः[१]। संयोगरूपफलभाने[२] गम[३]धातोर्विभागभाने[४] त्यज[५]धातोः[६] समभिव्याहारस्य नियामकत्वाच्च[७] न[८] "ग्रामं गच्छति, त्यजती"[९]त्यनयोर्विभागसंयोगबोधन[१०]दोषप्रसङ्ग[११] इति[१]

[१] भ2-कर्मप्रत्ययो-द्वितीया, कर्माख्यातं च इति टिप्पणी

[२] अ3-भावने

[३] भार1,त1,त3,त2-गमि

[४] 1915-विभागभागे

[५] भार1,त1,त3,त2,त5-त्यजि, अ3-त्यज्

[६] जै-संयोगरूपफलभागेन गमधातोः विभागभागेनेज्यत्यजधातोः

[७] भ3-"च" नास्ति

[८] अ1-"न" नास्ति

[९] जो2-न त्यजति गच्छती

[१०] अ1,भार1-बोधेन, त3,त2,ज1-बोधे न

[११] भ2-त्यजतीत्यनयोः विभागसंयोगबोधेन पर्यायतापत्तिदोषप्रसङ्गः इति टिप्पणी

नैयायिकप्राचां[2] मतमपि[3] यद्यपि, त्यजि[4]गामिस्यन्दीनां[5] पर्यायतापत्तिः,एकस्या एव क्रियायाः संयोगविभागजनकत्वात्। तथा च गमनं त्याग इत्यनयो[6]रविशेषापत्तिः। एवं गच्छति त्यजतीत्यनयोरपि।[7] न स्याच्च[8] "पच्यते[9] तण्डुलः स्वयमेवे"त्यादिकं, कर्मस्थभाव[10]कानामेव कर्मकर्तरि यगादिविधानात्।

न चाग्निसंयोगरूपव्यापारस्य धात्वर्थस्य कर्मनिष्ठत्वा[न्ना][11]नुपपत्तिरिति वाच्यम्, तथा सति "पच्यतेऽग्निः स्वयमेवे"त्यस्याप्यापत्तेः।

---

पूर्वग्रन्थेन व्यापारस्य धातुवाच्यत्वं व्यवस्थाप्य फलस्यापि आक्षेपद्वारा तत्साधयिष्यमाणः शङ्कते - नन्वस्तु इति॥ केवलव्यापारवाचकत्वम् केवलेति पदेन फलवाचकत्वनिरासः। ननु शाब्दबोधे फलभानानुपपत्तिः अत आह - फलं कर्मप्रत्ययार्थः द्वितीयाद्यर्थः। नन्वेवं सति ग्रामं गच्छति त्यजतीत्यनयोरविशेषापत्तिः, फलवाचिकाया द्वितीयाया ऐक्यादित्यत आह - संयोगरूपफलभाने इत्यादि॥ गम्धातुसमभिव्याहारे ग्रामं गच्छतीत्यादौ द्वितीयायाः संयोगरूपं फलम् त्यजधातुसमभिव्याहारे च विभागरूपं फलं वाच्यमिति नार्थबोधसाङ्कर्यमिति भावः। तदाह - समभिव्याहारस्य नियामकत्वात् इति॥ तथाचेदम् प्राचीननैयायिकमतम्। अत्र दोषोद्भावनमाह – त्यजिगमीति॥ संयोगविभागादि-

---

[1] त2- "इति"नास्ति

[2] अ3-नैयायिकप्राचीन

[3] भ2-एतच्च दूषितप्रायमित्यनेन अन्वितम् इति टिप्पणी.

[4] जै-त्यज्य

[5] त2-स्यन्दादीनां, भ1-स्यन्दानां

[6] भ2,ज1-इत्येतयो

[7] 1900,भ2 -एतदनन्तरं "न्यायरीत्या फलस्य भानाभ्युपगमेन विशेषोपपादाने तु घटादिपदे घटत्वस्यापि तथैव भानोपपत्तेरवाच्यतापत्तावाकृत्यधिकरणोच्छेदापत्तिः।"– इति अधिकपाठः, त2 –एवं गच्छतीत्यनयोरपि

[8] 1900-तस्माच्च

[9] त2- "पच्यते"नास्ति

[10] त2-कर्मस्वभाव, 1915-कर्मस्थभावनकानां

[11] "न्ना " इत्यपेक्षितं सर्वास्वन्यमातृकास्वस्ति। अत्रैव नास्ति।

फलवाचकत्वे तु गमित्यजिप्रभृतिषु पर्यायत्वं नास्ति फलविशेषवाचकत्वात्। फलावाचकत्वे तु उभयोरपि एकविधव्यापारवाचकत्वेन पर्यायतापत्तिरिति भावः। पर्यायत्वं पोषयति - एकस्या एव क्रियायाः संयोगविभागजनकत्वात्॥ यदि व्यापारमात्रं धात्वर्थस्तदा गमनं त्यागः इत्यनयोरविशेषः ऐक्यमेव। फलवाचकत्वे तु संयोगानुकूलो व्यापारः गम्यर्थः, विभागानुकूलो व्यापारः, त्यज्यर्थः इति नास्ति पर्यायतापत्तिः। यथा व्यापारमात्रवाचकत्वे, त्यागो गमनमित्यनयोरविशेषापत्तिस्तथैव गच्छति त्यजतीत्यनयोरपीत्यत आह - एवं गच्छतीति॥ अत्र "न्यायरीत्या फलस्य भानाभ्युपगमनविशेषोपादाने तु घटादिपदे घटत्वस्यापि तथैवोपपत्तेरवाच्यतपत्तावाकृत्यधिकरणोच्छेदापत्तिः" इति 1900 वर्षे मुद्रितपुस्तके अधिकपाठः दृश्यते।

ननु गच्छतित्यजत्यादौ विशेषभानाय, तत्तत्समभिव्याहारस्य नियामकत्वमुक्तमित्यदोष इत्यत आह – न्यायरीत्येति॥ न्यायरीत्या समभिव्याहारस्य नियामकत्वरूपया , गच्छति त्यजतीत्यादौ विशेषफलस्य भानोपगमे स्वीकारे। यथाकथञ्चिदुपलब्धस्य भानस्वीकारे। घटादिपदे इति॥ घटादिपदानां लाघवात् घटत्वादौ एव शक्तिरिति प्रतिपादितम् आकृत्यधिकरणे मीमांसकैः। एवं सति तदुच्छेदापत्तिरेव स्यात्। तथा हि - नैयायिकैः जात्याकृतिव्यक्तयः पदार्थ इत्यभ्युपगच्छद्भिः घटत्वादिजातिविशिष्टव्यक्तौ शक्तिस्वीकारेण घटादिव्यक्तेरिव घटत्वस्यापि भानोपपत्तौ, जातिवाचकत्वपरस्य आकृत्यधिकरणस्योच्छेदापत्तिः। यद्वा घटादिव्यक्तिरेव वाच्या, घटत्वादीनामुपलक्षणतया अनुगमकत्वमात्रमेव न तु वाच्यत्वम्। अस्मिन् पक्षे भानपदं शक्त्यानन्त्यव्यभिचारदोषनिरासकत्वपरमेव बोध्यम्। तस्मात् यथाकथञ्चित् भानमादाय दोषनिवारणं कर्तुमशक्यम्। तथा च व्यापारमात्रवाचकत्वपक्षे उक्तस्थलेषु वाच्यत्वमन्तरा पर्यायत्वापत्तिर्निवारयितुमशक्यैव। नस्याच्च पच्यत इति॥ तस्माच्च पच्यते तण्डुलः स्वयमेव इत्यादि क्वचित्कोऽपपाठः। अयमाशयः - ये धातवः कर्मस्थभावकास्तेषामेव कर्मवद्भावः। यथा तण्डुलः पच्यते स्वयमेवेत्यादौ। भावपदं क्रियापरम्। क्रिया च फलात्मिकैव। व्यापारसन्तानात्मिकया क्रियया यत्र कर्मणि फलविशेषोपलब्धिस्ते कर्मस्थभावका इत्युच्यन्ते। धातोः फलावाचकत्वे, व्यापारस्य कर्तृस्थत्वेन पचादीनामपि

कर्तृस्थभावकत्वेन कर्मस्थभावकत्वाभावात्कर्मवद्भावानापत्तिः। एतदेव न स्याच्चेत्यादिना उक्तम्। फलावाचकत्वेऽपि तण्डुलः पच्यते स्वयमेवेत्यादीनामुपपत्तिमाशङ्कते - न चाग्निसंयोगरूपव्यापारस्येति॥ पच्यर्थः अग्निसंयोगरूपो व्यापारः। संयोगस्य द्विष्ठत्वेन, यथा अग्नौ तथैव तण्डुलेऽपि वर्तमानत्वेन पच्यादेः कर्मस्थभावकत्वोपपत्तिरिति भावः। निराकरोति - तथा सतीति॥ संयोगरूपधात्वर्थाश्रयत्वेन तण्डुलादेः कर्तृत्वविवक्षायामिव, अग्नेः कर्तृत्वविवक्षायां पच्यतेऽग्निः स्वयमेवेति प्रयोगस्याप्यापत्तेः।

**44.** न च "कर्मवत् कर्मणा तुल्यक्रियः"(पा.3-1-87) इत्यनेन धात्वर्थजन्यफलाश्रयाणामेव कर्मवद्भाव[१]विधानात् तण्डुलानां तादृशविक्लित्ति[२]मत्त्वाद्[३] भवति तथा प्रयोगः[४]। अग्नेस्तु तदाश्रयत्वाभावान्नाति[५]प्रसङ्ग इति वाच्यम्।

एवं हि प्रावरणाद्यर्थं[६] पटमुत्पादयति[७] चैत्रे[८] "प्रावरणस्य (प्रावरणाय)[९] पटे यतत" इतिवद् "यत्यते [१०] पटः स्वयमेवे"त्यस्याप्यापत्तेर्यत्नजन्योत्पत्तेः [११] पटादौ [१२] सत्त्वात्। अन्यथा "क्रियते घटः[१३] स्वयमेवे" त्यपि न स्यात्।
सकर्मकत्वाभावादत्रातिदेशो न प्रवर्तत इति[१४] चेत्, तदेव तु[१५] भवन्मते दुर्वचम्।

---

[१] अ1-कर्मभाव, भ3,द6- "भाव"नास्ति
[२] के4-विक्लिप्ति,त5-विक्लृत्ति
[३] अ4-सत्त्वात्
[४] जो2-तादृशप्रयोगः
[५] त2-तदाश्रयत्वान्नाति
[६] जो2,द2-प्रावरणार्थं
[७] अ3- "पटमुत्पादयति" इत्यारभ्य "भावनां भावनाविदः" इत्यन्तं महान् ग्रन्थपातः
[८] त2- चैत्रो
[९] वा2,भार1,त1,त3,जै,ब1,द4,1900,भ2,1915-प्रावरणाय
[१०] जो2,वा2,1900,1915-यतते
[११] भ2-उत्पत्तिः- नानातन्तुसंयोगः इति टिप्पणी
[१२] अ1,वा2,भार1,द1,त2,जै,ब1,1900,द4,द3,भ1,भ2,भ3,1915,अ4-पटे, त्रि,ब2-घटादौ
[१३] भार1,द1,जै,ब1,1900,भ2,1915-पटः
[१४] वा2-प्रपूर्ववाक्ये इतिवदित्यत्र वदित्यारभ्य न प्रवर्तत इति पर्यन्तं ग्रन्थः नास्ति।
[१५] ब3- "तु" नास्ति

स्वार्थव्यापारजन्यफलकत्वं[१] फल[२]जनकव्यापारवाचकत्वं वात्रापि कृञादि[३]वदक्षतं स्यन्द्यादि[४]साधारणं चेत्यादि वक्ष्यते। कुतो वातिदेशाप्रवृत्तिः[५] स्वकर्मविरहेण[६] कर्मणा तुल्यक्रियत्वाभावादिति चेन्न, कर्मत्वस्यापि त्वन्मते[७] दुर्वचत्वात्। धात्वर्थ-जन्यफलशालित्वस्य गमेः पूर्वस्मिन्[८] देशे, त्यजेरुत्तरस्मिन्, स्यन्देः[९] पूर्वा[१०]-परयोर्यत्यादे[११]र्विषये चातिप्रसक्तत्वात्[१२]।

यत्तु स्वार्थान्वित[१३] प्रत्ययार्थफलव्यधिकरणव्यापारवाचकत्वमेव सकर्मकत्वम्, कर्मत्वमपि[१४] धात्वर्थान्वित[१५]प्रत्ययबोध्यफलवत्त्वमेव[१६]। प्रत्ययजन्य[१७]संयोगबोधे गम्यादेर्विभागबोधे त्यज्यादेः[१८] समभिव्याहारस्य हेतुत्वाच्च नोक्तदोष[१९] इति, तन्न, एवं ह्यन्वय[२०]व्यतिरेकाभ्यां गम्याद्यै(दे)[२१]रेव संयोगादिफले शक्तिसिद्धेः[१]।

[१] भार1-फलवाचकत्वं

[२] भ1- "फल"नास्ति

[३] 1900,1915-कर्त्रादि

[४] 1900,के3,1915,अ4-स्पन्द्यादि,द2,द3,भ3-स्यन्दादि

[५] अ1-वाप्रवृत्तिः, के3,अ4-वातिदेशात्प्राप्तिः, भ1-अतिदेशप्रवृत्तिः

[६] वा2- "कर्मविरहेण "नास्ति,भ2- स्वकर्म- स्वस्य धातोः कर्म इति टिप्पणी

[७] त5-तन्मते

[८] जो2,भ3,1900-पूर्व-

[९] 1900,के3,1915,म-स्पन्देः

[१०] द1,1900,त2-पूर्व

[११] के3,अ4-उभयत्र यत्यादेः

[१२] के3,अ4-चातिप्रसङ्गादिभिः,त2-चासति प्रसक्त्वात्

[१३] भार1,द1,ब1,त1,त3,के4,द4,त2,भ1,भ2,भ3,1915-स्वान्वित, द3-स्वधात्वर्थान्वित, भ2-स्वान्वित-स्वेन धातुना अन्वितो यः प्रत्ययो द्वितीया तदर्थः फलम् इति टिप्पणी

[१४] जो2- "अपि" नास्ति

[१५] वा2,भार1,त3,1900,भ2,1915-धात्वन्वित

[१६] अ1-"एव" नास्ति

[१७] भ2-प्रत्ययो द्वितीया, तज्जन्यः तदर्थः- संयोगरूपम् फलम् इति टिप्पणी

[१८] अ1-त्यजादेः

[१९] भ2-नोक्तदोषः-न पर्यायतापत्तिः इति टिप्पणी

[२०] ज1-एवं तर्ह्यन्वय

[२१] "गम्यादेरेव" इति अन्यमातृकासु सर्वत्रास्ति, अत्र नास्ति।

अन्यथा सुपामेव[२] घटादौ शक्तिर्घटादिबोधे तत्तत्प्रकृति[३] समभिव्याहारस्य हेतुत्वान्नातिप्रसङ्ग इत्यस्यापि[४] दुर्वारत्वापत्तेः, स्यन्द[५]स्त्यागो गमनमित्यादेरविशेषापत्तेरुक्तत्वाच्चे[६] [त्यादि][७] भिर्दूषितप्रायम्, तथाप्युक्तोपपत्त्यैवं[८] कृञादेरपि फलवाचकत्वं साधयन् केवल[९]यत्नवाचकत्वं[१०] सर्व[११]नैयायिकाभ्युपगतं निरस्यति - कृञ इति॥ सविषय[१२]मात्रार्थोप[१३]लक्षणमिदम्। यत्नो - यत्न[१४]मात्रम्, किं तू[१५]त्पत्त्यादिफल[१६]मपीत्यर्थः।

---

फलावाचकत्वेऽपि उपायान्तरेणोक्तस्थले कर्मवद्भावोपपत्तिमाशङ्कते - न च कर्मवत्कर्मणेति॥ अयम्भावः - फलस्यावाच्यत्वेन क्रियाकृतविशेषोपलभ्यमानत्वरूपम् कर्मस्थभावकत्वं मास्तु। धात्वर्थव्यापारजन्यफलाश्रयत्वरूपकर्मस्थभावकत्वेन कर्मवद्भावोऽस्त्विति तण्डुलादेः पच्यर्थव्यापारजन्यविक्लित्त्याश्रयत्वेन कर्तृत्वविवक्षया, कर्मवद्भावे च पच्यते तण्डुलः स्वयमेवेति प्रयोगोपपत्तिः। अग्निः स्वयमेव पच्यत इत्यादि प्रयोगापत्तिं वारयति – अग्नेस्त्विति॥ अग्नेः धात्वर्थ-

---

[१] के4-प्रसिद्धेः

[२] त1-उपामेच

[३] जो2- "प्रकृति" नास्ति

[४] भ3-इत्यपरस्यापि

[५] 1900,1915-स्पन्द

[६] जै-प्रपूर्ववाक्ये "यत्तु" इत्यारभ्य "उक्तत्वाच" इति पर्यन्तं ग्रन्थः नास्ति, के3,अ4-"यत्तु" इत्यारभ्य "च्चेत्यादिभिः" इति पर्यन्तं ग्रन्थः नास्ति

[७] "त्यादि" इत्यपेक्षितं सर्वास्वन्यमातृकास्वस्ति। अत्रैव नास्ति।,भ2-प्राचां मतमपि यद्यपीत्यादिभिः दूषितप्रायमिति योजना इति टिप्पणी

[८] 1900,त2-त्त्यैव

[९] अ4-एव

[१०] 1900,1915-केवलवाचकत्वं,द2-केवलफलवाचकत्वं

[११] ब1-सर्वथा

[१२] भ2-ते च ज्ञा-दृश-इषु प्रभृतयः इति टिप्पणी

[१३] अ1,के3,त2,द5-मात्रार्थकोप

[१४] के3-यत्नः – प्रयत्न, 1915-यत्नो – न यत्न

[१५] अ4-"तू" इति नास्ति

[१६] अ1,ज1-तूत्पत्त्यादिक

व्यापारजन्यविक्लित्याश्रयत्वाभावेन न तथा प्रयोग इति भावः। उक्ताशयमपाकरोति - एवं हीति॥ उत्पादयतीति शत्रन्तात्सप्तमी, प्रावरणमाच्छादनम्। तदर्थं यदा चैत्रः पटमुत्पादयन्नस्ति तदा प्रावरणाय पटे यतते इति प्रयोगो जायते। पटे इत्यत्र विषयसप्तमी। यत्नस्य सविषयकत्वात्। एवञ्च धात्वर्थव्यापारजन्योत्पत्तिरूप-फलाश्रयत्वेन पटस्यापि कर्मवद्भावापत्तौ पटः स्वयमेव यतते इति प्रयोगापत्तिः।

उत्पत्याश्रयत्वेन कर्मवद्भावास्वीकारे दोषमाह – अन्यथेति॥ पटे उत्पत्त्याश्रयत्वेन कर्मवद्भावास्वीकारे। पटः स्वयमेव यत्यते इत्यापत्तेर्वारणमाशङ्कते – सकर्मकत्वाभावादिति॥ कर्मवद्भावः सकर्मकधातुष्वेव न त्वकर्मकेषु, तत्र कर्मणो-ऽभावात् कर्मवद्भावासम्भवात्। यतिधातोरकर्मकत्वेन न पटः स्वयमेव यत्यते इति प्रयोगापत्तिः इति , अत्राह - तदेव त्वन्मते दुर्वचमिति॥ त्वन्मते नैयायिकमते। धातोः फलावाचकत्वे वक्ष्यमाणसकर्मकाकर्मकधातुलक्षणानुपपत्तेः। स्वमते सकर्मकलक्षणं विधाय अतिदेशप्रवृत्तिं साधयति – स्वार्थव्यापारेति॥ स्वस्य धातोरर्थः स चासौ व्यापारश्च तज्जन्यं फलं यस्य धातोः। फलजनक-व्यापारवाचकत्वम्, फलजनको व्यापारः तद् वाचकत्वं धातोरिति लक्षणद्वयमपि फलावाचकत्वेऽपि सम्भवत्येव। कर्त्रादिवदिति॥ यथा धात्वर्थव्यापाराश्रयत्वं कर्तृत्वम्। धात्वर्थव्यापारजन्यफलाश्रयत्वञ्च कर्मत्वमिति कर्त्रादिलक्षणम् तथा उक्तरीत्या सकर्मकत्वमपि लक्षणीयमित्यर्थः। अत्र फलावाचकत्वेऽपि कर्मणो यथा लक्षणम्, तथा प्रकृतेऽपि। तथा यतधातोरपि यत्नार्थकत्वे स्वार्थयत्नजन्यो-त्पत्तिफलकत्वेन उत्पत्तिजनकयत्नरूपव्यापारवाचकत्वेन वा सकर्मकत्वमस्ति। तथा चातिदेशप्रवृत्तौ यत्यते पटः स्वयमेवेत्यापत्तिस्तदवस्थैवेत्यत आह - कुतो वातिदेशाप्रवृत्तिरिति॥ इदानीं केवल- व्यापारवाची स्वमते दोषं वारयति – स्वकर्मविरहेणेति॥ उक्तरीत्या सकर्मकत्व- संभवेऽपि स्वकर्मणोऽभावान्न कर्मवद्भाव इति तदाशयः। यथा तण्डुलं पचतीत्यादौ साक्षात्कर्मण उपादानम् , तथा यतीधातोः स्वकर्मणोऽभाव इति न तत्र अतिदेशापत्तिः। तन्मतमिदं दूषयति - कर्मत्वस्यापि त्वन्मते दुर्वचत्वादिति॥ फलावाचकत्वे कर्मत्वं त्वन्मते दुर्वचम्। दुःखेन वक्तुं शक्यम्। कर्मलक्षणं तन्मतीयमाह – धात्वर्थजन्येति॥ न मन्मते धात्वर्थफलशालित्वम् कर्मत्वम् अपि तु धात्वर्थव्यापारजन्यफलशालित्वम्।

एतच्च धातोः फलावाचकत्वेऽपि सम्भवत्येव। फलस्य धात्वर्थत्वेनाविशेषितत्वात्। खण्डयति - गमेः पूर्वस्मिन् इत्यादिना॥ तथाहि - उक्तलक्षणे फले धात्वर्थव्यापारजन्यत्वविशेषणेन व्यापारजन्यानि यानि फलानि, तान्यपि गृहीत्वा दोषो दीयते। गमिस्थले यथा धात्वर्थव्यापारजन्यत्वमुत्तरदेशसंयोगे तथा विभागेऽपि। न हि विभागमन्तरा उत्तरदेशसंयोगोत्पत्तिः। तादृशविभागाश्रयत्वं पूर्वदेशे। अतः तस्य कर्मत्वापत्तिः। त्यजेः व्यापारजन्यो यथा विभागः तथैवोत्तरदेशसंयोगोऽपि। तदाश्रयत्वादुत्तरदेशस्यापि कर्मत्वापत्तिः। स्पन्देः पूर्वोत्तरोभयसंयोगोऽर्थः। तदाश्रयत्वात् उभयोः कर्मत्वापत्तिः। यतेश्च यत्नोऽर्थः। तज्जन्यफलाश्रयत्वम्, विषये घटादौ चातिव्याप्तमित्यादिस्वयमेवोह्यम्।

लक्षणान्तरमाह - यत्तु स्वार्थान्वितप्रत्ययार्थेति॥ स्वार्थो धात्वर्थो व्यापारः, तदन्वितं यत् द्वितीयादिप्रत्ययार्थीभूतं फलम् , तद्व्यधिकरणः विभिन्नाधिकरणवृत्तिर्व्यापारः तद्वाचकत्वं सकर्मकत्वम्। लक्षणमिदं फलस्य धात्ववाच्यत्वेऽपि समुपपद्यते। कर्मलक्षणमपि स्ववासनयाह – कर्मत्वमपीति॥ धात्वन्वितं धात्वर्थव्यापारान्वितं यद् द्वितीयादिप्रत्ययबोध्यं फलम्। तादृशफलाश्रयत्वं कर्मत्वम् तण्डुलं पचतीत्यादौ तण्डुलादेरक्षतमिति भावः।

ननु धातोः फलावाचकत्वे, गमित्यजिप्रभृतीनां पर्यायतापत्तिरेव स्यादिति चेदाह - प्रत्ययजन्यसंयोगबोधे गम्यादेरिति॥ व्याख्यातमेतत्। समभिव्याहारस्य तत्तत्फलविशेषबोधे नियामकत्वान्न पर्यायत्वापत्तिरिति भावः। नैयायिकादिमतं खण्डयति – तन्न। एवं हीति॥ वाच्यार्थनिर्णयो हि अन्वयव्यतिरेकाभ्यां भवति। तथा च संयोगादिफलविशेषबोधे गम्यादिसमभिहारस्य कारणत्वे। तद् वरं गम्यादीनामेव फलवाचकत्वम् तैरेवान्वयव्यतिरेकसत्त्वात्। एतदस्वीकारे दोषमाह - अन्यथा सुपामेवेति॥ जात्याकृतिव्यक्तयः पदार्थ इति तेऽभिमतम्। एवं सति घटादिपदैरेव घटादयोऽभिधीयन्ते। उक्तरीत्या यदि अन्वयव्यतिरेकौ अनादृत्य फलस्य धात्ववाच्यत्वं स्वीक्रियते तदा घटादिप्रकृतिकसुपामेव घटादौ शक्तिः स्वीक्रियताम्। घटादिविशेषव्यक्तिबोधे घटादिपदसमभिव्याहारो नियामक इति सर्वातिप्रसङ्गवारणसंभवे जात्य(त्या?)कृतिव्यक्तयः पदार्थ इत्यभ्युपगमानुपपत्तिरेव स्यात्। उक्तमपि स्मारयति - स्पन्दस्त्यागो गमनमिति॥ वैयाकरणः स्वमतं

निगमयति – तथाप्युक्तोपपत्त्येति॥ तथापीति॥ यद्यपि त्वया स्वमतस्थापनायै प्रयतितं तथापि। तथापीत्यस्यैव विवरणम् उक्तोपपत्त्येति। उपपत्त्या इत्यत्र हेतौ तृतीया, फलस्यापि स्वज्ञानद्वारा हेतुत्वस्वीकारात्। नैयायिकमते समापादितदोष-निराकरणोपाय एवात्र उपपत्तिः। कृञादेरिति॥ धातुमात्रोपलक्षणमिदम्। धातूनामिति तदर्थः। केवलवाचकत्वमिति॥ केवलयत्नवाचकत्वमिति पाठो युक्तः। तन्निरासायाह – कृञ इति॥ उक्तकारिकायामित्यर्थः। न हि यत्नोऽर्थः इष्यते इति तत्रोक्तम्। अपिशब्दस्वारस्यमाह – सविषयेति॥ यती प्रयत्ने इत्यादेः संग्रहः। यतेरपि सविषयकार्थकत्वं ज्ञानेच्छाकृतीनां सविषयत्वस्वीकारात्। वस्तुतस्तु धातुमात्रोपलक्षणता एव युक्ता। अत एव भूषणसारे, नहि यत्न इत्यत्र फलस्थानीयत्वेनेति शेषः। कृञ् इति धातुमात्रोपलक्षणमित्युक्तम्। न यत्नः व्यापारस्थानीयः, अपि तु उत्पत्त्यादिफलसहितो यत्नः। कृधातोः प्रस्तावात् यत्न इत्युक्तम्। वस्तुतस्तु नहि यत्न इत्यस्य न हि व्यापारमात्रं धातोरर्थः, अपि तु फलसहितो व्यापारो धात्वर्थ इति भावः।

**45.** अयं भावः- "यती प्रयत्न" इतिवद् यत्नार्थकतायां कृञोऽकर्मकता[१] स्यात्। अन्यथा "वायुर्विकुरुते, सैन्धवा विकुर्वते" इत्यादिप्रयोगदर्शनाद् यथाश्रुतेऽसङ्गतेः[२]। अत एव

"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनो[३]पसंग्रहात्"(वा.प.तृ.सा.**88**)

इत्याद्यर्थविशेषान्तर्भावेणा(ना)[४]कर्मकत्वसकर्मकत्व[५]विवरणं साधु[६] संगच्छत इति[७]। नन्वेवं [१] व्यापारार्थकत्वस्येव यत्नार्थकत्व [२] स्याप्यप्रयोजकतया [३] नेदमकर्मकतायां प्रयोजकम्, किं तु फलसमानाधिकरणव्यापारवाचित्वमेव। न चेह तदस्तीति नातिप्रसङ्ग इति चेन्न,

---

[१] जो2-ऽकर्मकत्वं

[२] 1900-श्रुतेऽसङ्गतिः, के4-श्रुते ह्यसङ्गतापत्तेः,त2-श्रुतेः सङ्गतेः

[३] ज1-धातोरर्थान्तरे वृत्तेधात्वर्थेनो

[४] अ1-विशेषान्तर्भावेन

[५] त1,द4,त2,त5-"सकर्मकत्व" नास्ति

[६] भ1,द7- "साधु " नास्ति

[७] जो2-"इति" नास्ति

एवं हि[४] यतेरप्यकर्मकत्वा[५]नापत्तेः[६]। यत्किञ्चिदुत्पत्तिजनकयत्नवाचकत्व-स्योत्पत्त्यादिफला[७]वाचकत्वस्य चोभयो[८]रप्यविशेषात्। स्वार्थफल[९]समानाधिकरण-व्यापारवाचकत्वरूपाकर्मकत्व[१०]स्यास्माभिरभ्युपगमेऽपि[११] केवलव्यापारवाचकत्व-रूपस्य तस्य[१२] भवद्भिरभ्युपगमात्[१३]।

यद् वा, अकर्मकतापत्तेः, सकर्मकतानापत्तेरित्यर्थः।

तथा हि - अस्मद्रीत्या स्वार्थफलव्यधिकरणव्यापारवाचित्वम्, भवद्रीत्या[१४] फल-विशिष्टव्यापारवाचकत्वं[१५] हि सकर्मकत्वम्[१६]। अन्यथा[१७] स्यन्दे[१८]रपि तदापत्तेः[१९]। तच्च[२०] कृञादेर्न स्यात्। त्वन्मते द्विष्यादेर्द्वेषज्ञानेच्छाकृतिमात्रवाचकत्वात्। अत एव "पटं जानाति, इच्छति, कुरुते,चैत्रो मैत्रेण ज्ञायते, इष्यते क्रियते[२१] वा घट" इत्यत्र

---

[१] जै-नन्वेयं
[२] अ1-"त्व" नास्ति
[३] अ4-....प्रयोजकत्वात्
[४] द4-"हि" नास्ति,भ3,द6-"एवं हि"नास्ति
[५] अ1-यतेरप्यकर्मकतानापत्तेः
[६] भ2-सकर्मकत्वमपि स्यात् इष्टन्त्वकर्मकत्वमात्रम् इति टिप्पणी
[७] अ1-"फला" नास्ति,द2,त्रि-फलावाचकत्वस्येवोभयोरप्यविशेषात्
[८] भ2-उभयोः कृञ्यतोः इति टिप्पणी
[९] ज1-स्वार्थे फल
[१०] वा2,त1,त्रि-"रूपाकर्मकत्व" नास्ति
[११] अ1-"अस्माभिः" नास्ति, अपीत्यस्यस्थाने " च " अस्ति
[१२] द2,भ1,त्रि,द7-"तस्य" नास्ति
[१३] भ1-भवद्भिरभ्युपगतत्वात्
[१४] भ1- "स्वार्थफलव्यधिकरणव्यापरवाचित्वम् भवद्रीत्या"नास्ति
[१५] अ4-वाचित्वं
[१६]त2- "हि सकर्मकत्वम्" नास्ति, अ4- "हि" नास्ति
[१७] भ2-अन्यथा - फलानिवेशे इति टिप्पणी
[१८] 1900,1915,म-स्पन्देः,त2-स्यन्दादेरपि
[१९] जो2-तदापत्तिः, भ2-सकर्मकत्वापत्तेः इति टिप्पणी
[२०] त2-तत्र,भ2-तच्च-सकर्मकत्वं
[२१] जो2-"क्रियते" नास्ति, त1-क्लियते

कर्मप्रत्ययेन यथायथं विषयित्वं विषयत्वं[1] वो[2]च्यते, फलाभावेन धात्वर्थतावच्छेदकफलाश्रयत्वरूपकर्मत्वासंभवादिति[3] निरूपितमाख्यातवाद[4]शिरोमणौ। एवं च[5] यत्न[6]मात्रार्थकत्वात् सकर्मकत्वाभावे कर्मणि लकाराद्यनापत्तिः।

यत्तु जानात्यादौ[7] सकर्मकत्व[8]व्यवहारो भाक्त इति[9] तन्न, व्यवहारस्य भाक्तत्वेऽपि[10] कर्मणि[11] प्रत्ययासंभवात्। फलावच्छिन्नव्यापारवाचकेभ्य एव कर्मप्रत्यय इति तत्रैवोक्तेः।

---

यत्नमात्रार्थकत्वे कृञः, अकर्मकतापत्तिः स्यादतः उत्पत्त्यादिफलमपि धातुवाच्यमभ्युपेयम्। तदेवोपक्रमते - अयं भाव इत्यादिना॥ यथा यत्नार्थकस्य यतेरकर्मकत्वम्, तथा यत्नमात्रार्थकत्वेन कृञोऽपि अकर्मकत्वमेव स्यादित्यर्थः। कृञ्पदं धातुमात्रोपलक्षणम्। सर्वेषामपि एकविधत्वमेव स्यात्।

ननु यत्नार्थकत्वेऽपि सकर्मकत्वमस्तु इत्यत आह – अन्यथेति॥ यत्नार्थकतायामिति विशेषणानुपादाने, वायुर्विकुरुते सैन्धवा विकुर्वते, इत्यादौ "अकर्मकाच्चे" (पा.1.3.35)ति सूत्रेणाकर्मकत्वविवक्षायाम् आत्मनेपदविधानात् कृधातोरपि अकर्मकत्वदर्शनेन, अकर्मकत्वस्यापत्तिकथनमसङ्गतमेव स्यात्। तस्य तत्र विद्यमानत्वात्।

यत्नार्थकतायामित्युक्तौ तु तस्मिन्नर्थे एवाकर्मकत्वापादनं युक्तम्। अत एवेति ॥ अर्थविशेष एव सकर्मकत्वाकर्मकत्वविभागादेव। धातोरर्थान्तरे वृत्तेरिति सकर्मक-

---

[1] त5-विषयत्वं विषयित्वं, त्रि - "विषयत्वं" नास्ति

[2] अ1,वा2,भार1,द1,त3,जै,जो2,1900,द4,त2,भ1,भ2,भ3,1915,म -चो

[3] अ1-कर्मत्वाननुभवादिति

[4] अ4-.....वादे

[5] अ1- "च " नास्ति

[6] जो2,1900,त्रि,द5-फल

[7] द2-जानातीत्यादौ

[8] के3,अ4-सकर्मकत्वस्य

[9] त2-भाक्तमिति

[10] जो2-"अपि" नास्ति

[11] अ1-कर्म

धातोरपि क्रिया अकर्मिका भवति। कुत इत्याकाङ्क्षायाम् चतुर्भिर्हेतुभिरकर्मकत्वं साधयन् आह – धातोरर्थान्तरेवृत्तेरिति॥ धातोरर्थान्तरे वृत्तेरिति, धात्वर्थेनोपसंग्रहादिति, प्रसिद्धेरिति, कर्मणोऽविवक्षात इति चत्वारि वाक्यानि, अकर्मिका क्रियेति सर्वत्रान्वेति। कर्मण इति तु द्वितीयादिषु वाक्येष्वन्वेति। अन्योऽर्थः अर्थान्तरं तत्र वृत्तेः शक्तेः। यदा प्रकृतमर्थं विहाय नानार्थत्वादन्यस्मिन् अर्थे धातुर्वर्तते तदा स धातुरकर्मकः। भारं वहति, अत्र प्रापणार्थको वह धातुः सकर्मकः यदा तु प्रस्रवणार्थकस्तदाऽकर्मकः, नदी वहति। कर्मणो धात्वर्थेनोपसंग्रहादकर्मकः, यत्र धात्वर्थेनैव कर्माकाङ्क्षा पूर्येत, तत्र नैराकाङ्क्षेण कर्मणोऽनुपस्थितौ धातुरकर्मक इति भावः। जीवति - अत्र प्राणरूपकर्मणो धात्वर्थतयैव ग्रहणम् , प्राणकर्मकधारणस्य धात्वर्थत्वात्। कर्मणो यत्र प्रसिद्धत्वं तत्राप्यकर्मकत्वव्यवहारः। कर्मविषयकोत्थिताकाङ्क्षाऽविषयत्वेन प्रसिद्धत्वम्। किमित्याकाङ्क्षासत्त्वेऽपि कर्मान्तरासत्त्वेऽपि तस्यैव लाभः सुतरामिति ज्ञातप्रयोगोऽनुचित इति यावत्। मेघो वर्षति, वर्षणकर्मणो जलस्य प्रसिद्धत्वात्। व्यापारार्थकत्वं यथा अकर्मकत्वप्रयोजकं न भवति, तथैव यत्नार्थकत्वमपि अकर्मकत्वप्रयोजकं न स्यादित्याह - नन्वेवं व्यापारार्थकत्वस्येवेति॥ इदं यत्नार्थकत्वम्। अकर्मकत्वप्रयोजकं किमित्यत आह - किन्तु फलसमानाधिकरणव्यापारवाचित्वमिति॥ यदा फलव्यापारयोरेकाश्रयकत्वं तदा अकर्मकत्वम्। एतस्य च फलावाचकत्वेऽप्युपपद्यते। धात्वतिरिक्तवाच्यतायामपि फलं गृहीत्वा तल्लक्षणोपपत्तेः। एवं सति कृञोऽकर्मकत्वापत्तिर्नास्ति। द्वितीयाद्यर्थोत्पत्त्यादिरूपफलेन यत्नस्य वैयधिकरण्येनोक्तसामानाधिकरण्यघटितलक्षणायोगात्। निराकरोति - चेन्न ।एवं हीति॥ यथा कथञ्चिदुपस्थितोत्पत्तिरूपफलमादाय लक्षणसमन्वये यती प्रयत्ने इत्यस्यापि अकर्मकत्वानापत्तेः, उत्पत्तेः पटादिनिष्ठत्वेन, यत्नस्य कर्तृनिष्ठत्वेन च फलव्यापारयोः सामानाधिकरण्याभावात्। तदेवाह – यत्किञ्चिदुत्पत्तीति॥ धातुनानुपात्तत्वे सति तद्व्यापारजन्योत्पत्तिमत्त्वमित्यर्थः। उभयोरिति। कृयत्योरित्यर्थः। मूलोक्तरीत्या उभयोरविशेषः। वैयाकरणमते निर्वाहमुक्त्वा नैयायिकमतमुपहरति – स्वार्थफलसमानाधिकरणव्यापारवाचकत्वेति॥मम मते तु फलव्यापारयोरुभयोरपि धातुवाच्यत्वेनैतल्लक्षणसमन्वयेन सकर्मकत्वाकर्मकत्व-

विभागः सुलभः। त्वन्मते तु फलस्य धात्ववाच्यत्वेनोक्तविभागानुपपत्तिः, स्वार्थ-फलवाचकत्वघटितलक्षणायोगात्। वैयाकरणमते फलव्यापारयोर्धातुवाच्यत्वेन कृञः उत्पत्यनुकूलो व्यापारोऽर्थः। उत्पत्तेर्घटादिनिष्ठत्वेन व्यापारस्य कर्तृनिष्ठत्वेन च सामानाधिकरण्याभाव इति नाकर्मकत्वापत्तिः। यतेश्च यत्नानुकूलो व्यापारोऽर्थः, फलस्य समवायेन कर्तृनिष्ठतया, व्यापारस्यापि तत्रैव वर्तमानतया सामानाधिकरण्यसत्त्वेनाकर्मकत्वोपपत्तिरिति तयोर्भेदः। अत्र व्यापारः अन्ततः आश्रयतारूपः। तस्यापि सावयवत्त्वारोपेण क्रियात्वं बोध्यम्। अत एव देवदत्तो जानातीत्यादौ देवदत्ताभिन्नाश्रयको ज्ञानेच्छाद्यनुकूलो वर्तमानो व्यापारः इति बोधः। स चान्तत आश्रयतैवेति भूषणसारे मूले उक्तं तद्वदिहापि।

कृञोऽकर्मकतापत्तेरिति कारिकांशस्य भावान्तरमाह – यद्वेति॥ सकर्मकतानापत्तेरिति॥ कृञो व्यापारमात्रार्थकत्वे सकर्मकत्वानापत्तेः। तां दर्शयति - तथाहि अस्मद्रीत्येति॥ वैयाकरणमते फलव्यापारोभयवाचकत्वेन, सकर्मकलक्षणे फलवाचकत्वव्यापारवाचकत्वोभयप्रवेशः कर्तुं शक्यत इत्यत आह – स्वार्थफल-व्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्। तच्च उत्पत्तिविशिष्टव्यापारवाचकस्य कृञः, नानुपपन्नम्। भवद्रीत्येति॥ फलाघटितलक्षणस्वीकारे स्पन्दादेरपि सकर्मकत्वापत्तिरतस्त्वयापि फलघटितमेव फलविशिष्टव्यापारवाचकत्वरूपम्, सकर्मकत्वं वाच्यम्। तथा च कृञः फलावाचकत्वे फलघटितसकर्मकत्वानुप-पत्तिरिति भावः।

तदेवोपपादयति - त्वन्मते द्विष्यादेरिति॥ द्विष्धातोर्द्वेषमात्रम् , ज्ञा धातोः ज्ञानमात्रम् , इष् धातोः इच्छामात्रं, कृञ् धातोः कृतिमात्रमर्थः। तथा च यत्नस्थानीयार्थकत्वेन उक्तसकर्मकत्वानापत्तिरिति भावः। ननु द्वितीयाद्यर्थफल-विशिष्टव्यापारवाचकत्वेन सकर्मकत्वोपपत्तिरिति चेन्न। गमित्यजिप्रभृतीनां पर्यायत्वापत्तिवारणाय गम्यादिसमभिहारस्य नियामकत्वस्वीकारापेक्षया गम्यादीनामेव फलवाचकत्वौचित्यात्। तथा च सति त्वत्सिद्धान्तहानिः। व्यापारमात्रशक्तिवादिनस्तु द्वितीयाद्यर्थफलान्वय्यर्थकत्वं सकर्मकत्वम्। पच्यादि-समभिव्याहारे द्वितीयाया विक्लित्याद्यर्थकत्वात्। जानातिसमभिहारे च विषयत्वा-

यर्थकत्वात् तदन्वयित्वं तदर्थेऽक्षतमित्याहुः। जानात्यादियोगे घटादीनां गौणकर्मत्वमिति तमारोप्य निराचष्टे – यत्त्विति॥ मुख्यकर्मणोऽभावात् , धात्वर्थ-फलाश्रयत्वस्यैव मुख्यकर्मत्वादिति भावः। निराचष्टे – तन्नेति॥ व्यवहारस्य कर्मत्वव्यवहारस्य भाक्तत्वेऽपि लक्षणानिबन्धनत्वेऽपि, कर्मणि गौणे कर्मणि, प्रत्ययासंभवात्। मुख्यसकर्मकत्वमादाय शास्त्रस्य चरितार्थत्वेन गौणे तद्व्यापारे मानाभावात्। नहि गङ्गापदस्य तीरे भाक्तत्वेऽपि तेन स्नानादिकार्यं कर्तुं शक्यम्। शास्त्रचारितार्थ्यायाह - फलावच्छिन्नव्यापारवाचकेभ्य एवेति॥ पच्यते इत्यादौ मुख्यकर्मणि शास्त्रस्य चारितार्थ्यम्। तत्रैव कर्मणिप्रत्ययः। तत्रैव पूर्वोक्तयत्तुग्रन्थे।

**46.** न च वैयाकरणानां यत्र सकर्मकत्वव्यवहारस्तेभ्य एव कर्मप्रत्यय इति[१] नियम[२] इति[३] वाच्यम्, भाष्यकारादिव्यवहारस्य विशिष्य सर्वत्राभावात्। अस्मद्व्यवहार[४]-स्यातिप्रसक्तत्वात्।

यच्च [५] स[विषयार्थकानां] [६] विषयतयान्वयवतामेव [७] सकर्मकत्वं, यत्यादिना [८] तू[९]पस्थापितयत्ने[१०] न विषयत्वेनान्वयः[११], किं तूद्देश्यत्वेन। अत एवाभुञ्जानेऽपि[१२] "भोजनाय यतत" इति[१३] प्रयोग इति, तन्न। एवं हि कर्मणि प्रत्ययोत्पत्ताव-नुगत[१]नियामकालाभप्रसङ्गात्[२]। "विष्णु र्यजते(विष्णुं यजते)[३], विष्णुर्यष्टव्यः[४]" इत्यादौ [५] चतुर्थ्यर्थविहितद्वितीयादेरुद्देश्यत्वेनैवान्वयबोधकत्वाद् यज [६] धातोरप्य-

---

[१] के4,भ1,अ4- "इति"नास्ति
[२] के3,भ1,द7,अ4- "नियम"नास्ति
[३] वा2-"नियम इति" अधिकं
[४] जो2-अस्मदादिव्यवहार
[५] जो2,1900,त्रि,द5-तच्च
[६] "विषयार्थकानां" इत्यपेक्षितं सर्वास्वन्यमातृकास्वस्ति। अ1 मध्ये अत्र च नास्ति।
[७] त2-विषयतयान्वयवत्वमेव
[८] द3,भ2,द5-यत्यादीनां
[९] 1900-यत्यादिधा
[१०] भ2,द5-यत्नस्य, यत्यादिना रूपस्थापिते
[११] भ2,द5-विषयत्वेन नान्वयः
[१२] द3-"अपि" नास्ति, अ4-भुञ्जाने
[१३] भार1,के4-इत्यादि

कर्मकत्वापत्तेश्च। उद्देश्यताख्यविषयतया विष्णुर्याग[७]विषय एवेति चेत्,[८] भोजनमपि यत्यर्थस्य तथैवेति स्यादेव यजिवद्[९] यत्यादेः[१०] सकर्मकत्वात् कर्मणि प्रत्ययः। न च[११] सविषयार्थकेषु विषयितयान्वय[१२]बोधकद्वितीयार्थे जाततृतीयया तस्यैव बोधनात्[१३] पश्वादिद्रव्यस्य तथान्वयसत्त्वात् स्यादेव सकर्मकत्वमिति वाच्यम्। एवमपि विष्णोर्धात्वर्थकर्म[१४]त्वाभावेन तस्मिन्[१५] द्वितीयातव्य[१६] लकाराणामभावापत्तेः।

अन्यथा "भोजनाय क्रियत ओदन" इत्यत्र भोजनम्, "मोक्षाय हरं भज[१७]" इत्यत्र मोक्षमित्यापत्तेर्दुर्वारत्वात्।

न चैवमपि[१८] "कर्मसंप्रदानयोः करण[१९]कर्मत्वे[२०] वाच्ये" इति संज्ञाविधान - सामर्थ्यादसत्त्वेऽपि[१] कर्मत्वे[२] द्वितीयादिकं स्यादिति वाच्यम्, कर्मसंज्ञा-

---

[१] अ1-प्रत्ययानुगत

[२] के4-नियामकालाभात्,त2-नियामकाभावुप्रसङ्गात्

[३] "विष्णुं यजते" इत्येव सर्वास्वन्यमातृकास्वस्ति। स एव पाठः युक्तः।

[४] अ1-विष्णुर्द्रष्टव्यः

[५] "च" इत्यधिकम्

[६] त5-यजि

[७] 1900,1915-विष्णुयोग

[८] अ4-"न" इत्यधिकम्

[९] अ1- "यजिवत्" नास्ति

[१०] अ4-यजत्यादेः

[११] जो2,1900-येन च

[१२] जै-तयाद्यन्वयि

[१३] अ1-बोधात्

[१४] वा2- "कर्म" नास्ति

[१५] भ1- "तस्मिन्"नास्ति

[१६] के3- "तव्य"नास्ति,अ4-तस्य

[१७] भार1,त1,त5,द6-हरिं भजते, त3-हरं भजते,के3,अ4,द2,ब3-हरिं भजे

[१८] के4- "अपि"नास्ति

[१९] वा2,ज1-कारण

[२०] भ1-कर्तृत्वे, त5-कर्मकत्वे

विधानान्यथानुपपत्त्या कर्मप्रत्ययसिद्धावपि [3] धातोस्तदर्थे [4] सकर्मक [5] त्वाभावेन तस्मिन् सकर्मकत्वसंबद्धकर्मलकारसिद्ध्यनापत्तेः(त्तौ) [6] "इज्यते विष्णुः" इत्याद्यभावापत्तेः।

---

वैयाकरणमतं शरणयति - न चेति॥ वैयाकरणमते यत्र सकर्मकत्वव्यवहारस्तत्रैव कर्मणि प्रत्ययः, यत्र तेषामकर्मकत्वव्यवहारस्तत्र नेति स्वीकुर्मः। तथा च न काप्यनुपपत्तिः। निराकरोति – भाष्यकारादिव्यवहारस्येति॥ धातूनामनेकत्वात् भाष्यकारादिभिः सर्वेषां नामग्राह्यमुपादानाभावाच्च सकर्मकत्वग्रहानुपपत्तेः। अस्मद्व्यवहारस्येति ॥ फलव्यापारोभयवाचकत्वे तु स्वार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वमिति सकर्मकधातुलक्षणम्। तादृशलक्षणाक्रान्तत्वेन सर्वेषामपि सकर्मकाणां सुग्रहत्वम्। तच्च भवन्मते दुर्ग्रहम्। पक्षान्तरमाह – यच्चेति॥ सविषयकार्थानां ज्ञानेच्छायत्नाद्यर्थानाम्। ज्ञानादीनां सविषयकत्वेन तद्वाचकधातूनां सविषयकार्थकत्वम्। तत्र ज्ञानादीनां विषयत्वसम्बन्धेन घटादिकर्मणि अन्वयादाह – विषयतयान्वयतामेवेति॥ एवेन समवायादिना अन्वयवतां पच्यादीनां व्यावृत्तिस्तेषान्तु विषयतयानन्वयात्। ननु यत्नार्थकयतेरपि विषयतयान्वयसम्भवेन सकर्मकत्वापत्तिरत आह – यत्यादि-धातूनामिति॥ यद्यपि यतिरपि सविषयकार्थः, तस्याप्युक्तरीत्या सकर्मकत्वापत्तिः। तथाप्यनुभवबलात् फलतावच्छेदकसम्बन्धभेदं स्वीकृत्य सकर्मकत्वं वारयति - किन्त्वित्यादिना ॥ यत्नस्य विषयता त्रिविधा उत्पादनत्वा-ख्या, विधेयत्वाख्या, उद्देश्यत्वाख्या च। इह उद्देश्यताख्या एव गृह्यते, सैव फलतावच्छेदकः सम्बन्धः। उद्देश्यतातिरिक्तसम्बन्धेन यत्रान्वयस्तत्रैव सकर्मकत्वव्यवहार इत्यभिप्रायो ग्रन्थकारस्य प्रतीयते। प्रकृते चोद्देश्यतयैव, न तु तदतिरिक्तविषयत्वसम्बन्धेनान्वयस्तथा च न यतेः सकर्मकत्वापत्तिरिति भावः। तदेवाह - अत

---

[1] भार1,द1,त1,त3,जो2,1900,1915-दसत्यपि

[2] त2-"ऽपि कर्मत्वे" नास्ति

[3] द4-कर्मप्रत्ययासिद्धावपि

[4] के3,त5,अ4-तदर्थत्वे

[5] त3-स्वकर्मकत्व

[6] "सिद्ध्यनापत्तौ" इत्येव सर्वास्वन्यमातृकास्वस्ति। अत्रैव नास्ति।

एवेति॥ अभुञ्जानेऽपि भोजनस्याभावेऽपि तदर्थं प्रयतमाने भोजनाय भोजनोद्देश्येन यतते इति प्रयोगोपपत्तिः। उद्देश्यत्वस्य सम्बन्धत्वेऽनुभवोऽयं प्रदर्शित इति ध्येयम्। नैयायिकमतमिदं निराचष्टे – तन्न। एवं हीति॥ समागतापत्तिवारणाय विभिन्ननियामकत्वस्वीकारे हि तत्र तत्रानुगमकनानात्वस्वीकारे गौरवम्। यतः सकर्मकत्ववारणाय उद्देश्यतया अन्वये स्वीक्रियमाणे दोषान्तरमाह - विष्णुं यजत इति॥ अयमाशयः। विष्णुं यजते इत्यत्र "कर्तुरीप्सिततमं कर्म"(पा.1.4.49)ति सूत्रेण विष्णोः कर्मसंज्ञायां "कर्मणि द्वितीये"(पा.2.3.2)ति सूत्रेण द्वितीया। द्वितीयार्थः उद्देश्यत्वं, तच्च चतुर्थ्यर्थः इति फलतः चतुर्थ्यर्थद्वितीयाविधानमादायाह – चतुर्थ्यर्थद्वितीयेति॥ तस्मिन्नुद्देश्ये द्वितीयार्थे यज्यर्थस्य उद्देश्यतयान्वये यतिवद् यजेरपि उक्तरीत्या अकर्मकत्वापत्तिः।

ननु यथा जानातेः विषयतयान्वयेन सकर्मकत्वम् , तथैवोद्देश्यताख्य-विषयतया यजेरपि द्वितीयार्थेऽन्वयेन जानात्यादेरेव सकर्मकत्वोपपत्तिरित्यत आह – उद्देश्यताख्यविषयतयेति॥ विषयताया उद्देश्यतारूपत्वमपीत्यर्थः। तदाह - विष्णुर्यागविषय एवेति॥ पूर्वमुद्देश्यताया विषयताभिन्नत्वमुक्तमिहाभेद इति ध्येयम्। अत्र कल्पे दोषमाह - इति चेद् भोजनमपि यत्यर्थस्य तथैवेति॥ तथैवेति॥ यत्यर्थस्योद्देश्यमेवेत्यर्थः। तथा च उद्देश्यताख्यविषयतयान्वयतो यतेरपि सकर्मकत्वम्, भोजनपदाद् द्वितीयापत्तिश्चेति भावः। तदेवाह - सकर्मकत्वात् कर्मणि प्रत्यय इति॥ सकर्मकत्वापत्तौ विवक्षावशात् कर्मणि प्रत्ययापत्तिः। नैयायिकः स्वमतं पाणिनिसूत्रसहकारेणोपस्थापयति - न च सविषयार्थकेषु इति॥ न चेति पाठो ज्यायान्। येन चेत्यपपाठः। पूर्वग्रन्थासङ्गतेः। "यजेः कर्मणः करणसंज्ञा सम्प्रदानस्य च कर्मसंज्ञे"ति वार्तिकम्, पशुं रुद्राय ददातीत्यर्थे यज्धातोः प्रयोगे कर्मणः पशोः करणसंज्ञा, सम्प्रदानस्य रुद्रस्य च कर्मसंज्ञेति तदर्थः। पशुना रुद्रं यजत इत्युदाहरणम्। अत्र यद्यपि कर्मणः करणसंज्ञया द्वितीयार्थः करणत्वमेव न तु कर्मत्वम्, अनुशासनबलात्। तथापि भूतपूर्वगत्या कर्मत्वमभिमन्यमानेनोक्तम् द्वितीयार्थे जाततृतीययेति॥ ननु द्वितीयायाः न सर्वत्र कर्मत्वबोधनम्, नदीमन्ववसिता सेना इत्यादौ द्वितीयायाः सम्बन्धबोधकत्वादित्यत आह – सविषयार्थकेष्विति॥ सविषयार्थकाः जानातीच्छ-

त्यादयः, तेषु प्रयुक्तेषु या द्वितीयाविभक्तिः सा, विषयतयाऽन्वयबोधिका। द्वितीयार्थः घटादिकर्म, तस्य विषयितासम्बन्धेन जानातीत्यादौ ज्ञानादावन्वयः। इदमेव विषयितया अन्वयबोधकत्वं द्वितीयायाः, यथा विषये ज्ञानादेर्विषयत्व-सम्बन्धेनान्वयः। तथैव विषयस्य ज्ञानादौ विषयित्वसम्बन्धेनेति ध्येयम्। तस्यैव द्वितीयार्थस्य कर्मण एव बोधनात्। यो हि पश्वादिः पूर्वकर्मतया बोधितः, स एवेदानीं तृतीयया करणत्वेनोच्यते, इत्यभिप्रायेणेदं बोध्यम्। पश्वादिद्रव्यस्य तथान्वयसत्त्वात् विषयितयान्वयसत्त्वात् यजेः सकर्मकत्वमिति नैयायिकाभिप्रायः। निराचष्टे - एवमपि विष्णोरिति॥ अयमभिप्रायः - उक्तापत्तिनिवारणाय यजेः सकर्मकत्वोपपादनमयुक्तम्, विष्णोर्द्वितीयार्थकर्मत्वेऽपि धात्वर्थफलाश्रयत्वरूपकर्म-त्वाभावेन कर्मणि लकारादिविधानानुपपत्तिः। धात्वर्थकर्मादायैव सकर्मकेभ्यो लकारादेः विधानात् । धात्वर्थफलाश्रयस्य कर्मत्वाभावे दोषमाह – अन्यथेति॥ धात्वर्थफलाश्रयरूपकर्मादाय सकर्मकत्वास्वीकारे, यथा कथञ्चिदुपात्तकर्मोपादानेन विषयितादिसम्बन्धेनान्वयिद्वितीयाद्यर्थकर्मोपादानेन वा सकर्मकत्वस्वीकारे चेत्यर्थः। तथा सति अतिव्याप्तिमाह – भोजनायेति॥ उद्देश्यत्वरूपविषयता-सम्बन्धेन यज्यर्थेऽन्वयवतो भोजनस्य मोक्षस्य च कर्मत्वेन द्वितीयापत्तौ भोजनं क्रियते मोक्षं भजते इत्यापत्तेः दुर्वारत्वात्। भोजनाय इत्यादौ भोजनादिपदात् द्वितीयापत्तेर्वारणाय नैयायिकेनापि धात्वर्थफलाश्रयस्यैव कर्मत्वं वाच्यम्। तथा सति पशुना रुद्रं यजते इत्यत्र रुद्रस्य कर्मत्वानुपपत्तिः, धात्वर्थकर्मत्वाभावादिति शङ्कमानो ब्रूते - न चैवमपि इति॥

वार्तिकार्थं फलतः पठति – कर्मसम्प्रदानयोरिति॥ धात्वर्थकर्मत्वाभावेऽपि कर्मसंज्ञाविधानसामर्थ्यात् रुद्रादिपदाद् द्वितीयोपपत्तिरिति तदाशयः। वैयाकरणः तथा स्वीकृत्यापि दोषान्तरमाह – कर्मसंज्ञाविधानेति॥ रुद्रादेरुक्तरीत्या कर्मत्वेन द्वितीयोपपादनेऽपि। यज् धातोः तस्मिन्नर्थे रुद्राद्यर्थे सकर्मकत्वाभावेन। यथा कथञ्चिदुपात्तफलव्यधिकरणव्यापारवाचकत्वादिरूपसकर्मकत्वस्वीकारेऽपि सति तस्मिन् धात्वर्थकर्मातिरिक्ते कर्मणि इज्यते विष्णुरित्यत्र सकर्मकोद्देश्येन जायमानलकारस्यासिद्धिः। धातूपात्तकर्मणैव सकर्मकत्वस्य तत्रोद्देश्यत्वात्। भोजनादेः कर्मत्ववारणाय सर्वत्र धात्वर्थकर्मण एवोपादानात्। मम तु

द्वितीयाद्युत्पत्तौ संज्ञायाः प्रयोजकत्वेऽपि सकर्मकत्वाद्यर्थे धातोः फलव्यापारोभयार्थवाचकत्वस्य स्वीकारान्न कोऽपि दोषः। यज्धातोरपि उभयार्थकत्वेन सकर्मकत्वात् कर्मणि लकारसिद्धौ इज्यते विष्णुरिति प्रयोगोपपत्तिरिति भावः।

47. न च कालभावाध्वगन्तव्यानामकर्मक[१] धातुयोगे[२] कर्मसंज्ञा[विधानेऽ][३] पि धातोरकर्मकत्वाद् "देवदत्तेनास्यते मास" इत्यादिकं तवापि च(न)[४] स्यादिति वाच्यम्, कालादिकर्मकः(कालादिकर्मणा [५]सर्वे सकर्मकाः।)[६] तद्व्यतिरिक्तकर्माभाव एवाकर्मकत्वमि[७]त्यग्रे व्युत्पादयिष्यमाणत्वात्।

किं च "पशुना रुद्रं यजते, देवदत्ताय क्रुध्यति, द्रुह्यति[८], ईर्ष्यति, असूयति[९]" इत्यादौ पशुदेवदत्तादेरिच्छाद्वेषादि[१०]विशेषविषयस्य तथान्वयवतः कर्मत्वात् , तेन कर्मणा सकर्मकत्वमादाय तस्मिन् कर्मणि लकारद्वितीयाकृदा[११]द्यापत्तिर्दुर्वारा। भवन्मते संज्ञायाः[१२] द्वितीयादावप्रयोजकत्वस्य सुबर्थनिर्णये वक्ष्यमाणत्वात्। अस्मन्मते कर्मसंज्ञैव तत्र प्रयोजिकेति तदभावान्नातिप्रसङ्ग इति व्युत्पादयिष्यामः।

अपि चैवमपि देवदत्तस्य योऽभिलाषस्तद्विषय[१३] इत्यर्थके "देवदत्ताय रोचते

---

[१] त3-मात्मकर्मक

[२] जो2-धातुभिर्योगे

[३] "विधाने " इत्यपेक्षितं सर्वास्वन्यमातृकास्वस्ति। अत्रैव नास्ति।

[४] "न" इत्येव अन्यासु मातृकासु सर्वत्रोपलभ्यते, युक्तश्च

[५] अ1-कालादिकर्मणो

[६] "कालादिकर्मणा सर्वे सकर्मकाः " इति सर्वास्वन्यमातृकास्वस्ति। योग्यश्च पाठः।

[७] त2-अकर्मकमि

[८] त2-गुह्यति

[९] के4-असूयत

[१०] त1-रिच्छादि,के3,अ4-पशुदेवदत्तयोरिच्छाद्वेष

[११] अ1-द्वितीयाकृत्त्या,भ1-द्वितीयाद्यापत्तिर्दुर्वारा

[१२] के3-संज्ञायाम्, त्रि - भवन्मतसंज्ञायाः

[१३] अ1-तद्विषयो मोदक

[ स्वदते][1] वा[2] मोदक" इत्यत्र मोदकस्य कर्मत्वापत्तौ[3] तस्मिन् कर्मणि लकार-द्वितीयाकृदादिप्रसङ्गो दुर्वारः। अस्मद्रीत्या यतिवन्नायं दोष इति व्युत्पादयिष्याम इति दिक्।

---

ननु सकर्मकेभ्य एव कर्मणि लकारादिप्रत्ययविधानौचित्येन आस्यते मास इत्यादौ कर्मणि लकारानुपपत्तिरित्याशङ्कते - न च कालभावेति॥ अत्रेत्थं बोध्यम् – "अकर्मकधातुभिर्योगे देशः कालो भावः गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यमि"ति वार्तिकेन अकर्मकधातुप्रयोगे सति देशस्य कालस्य भावस्य गन्तव्यस्य अध्वनः कर्मसंज्ञा विधीयते। देशपदेन देशविशेषः कुरुपञ्चालादिः। कालपदेनापि प्रसिद्धस्य मासादेर्ग्रहणम्। भावः साध्यस्वरूपा क्रिया। गन्तव्योऽध्वा गन्तव्यत्वेन विशेषितः, गन्तव्यत्वेन प्रसिद्धो नियतपरिणामः क्रोशादिः। मासमास्ते इत्यादौ मासादीनां कर्मत्वेन आस्यते मासः, शय्यते मास इत्यादयः कर्मणि लकारे सति प्रयोगाः। कर्मसत्त्वेऽपि अकर्मक इति व्यवहारस्य नोच्छेदः द्रव्यरूपकर्मत्वाभावात्। अत एव देवदत्तेन मासमास्यते इति भावेऽपि लकारसिद्धिः।

तथा चोक्तं हरिणा –

अतस्तैः कर्मभिर्युक्तो धातुर्द्रव्यैरकर्मकः।
लस्य कर्मणि भावे च निमित्तत्वाय कल्पते॥ (वा.प.साधन.69)

इत्थञ्चेयं कर्मसंज्ञा मासं पचत्योदनमित्यत्रापि भवति तुल्यन्यायात्। किन्तु कालादि कर्माप्रधानम्। द्रव्यकर्म तु प्रधानमिति द्रव्यकर्मण्येव मासं पच्यते ओदन इति लादयो भवन्तीति बोध्यम्। तदेतन्मसि निधाय शङ्कते - न चेति॥ सकर्मकेभ्य एव कर्मणि लकारविधानस्वीकारे मासमास्यते इत्यत्र कर्मणि लकारानुपपत्तिः, मासादेः कर्मत्वेऽपि द्रव्यादिकर्मणोऽभावादकर्मकत्वात्। दोषं निराचष्टे – कालादिकर्म-णामिति॥ वार्तिकेन विहितकर्मणा सकर्मकत्वस्वीकारात्। ननु अकर्मकधात्वभाव-प्रसङ्ग इत्यत आह - तद्व्यतिरिक्तकर्माभाव इति॥ तद्व्यतिरिक्तकर्मेति॥ वार्तिक-

---

[1] "स्वदते " इत्यपेक्षितं सर्वास्वन्यमातृकास्वस्ति। अत्रैव नास्ति। जै-इत्यर्थकदेवदत्ताय रोचते स्वादने – इत्यसंबद्धः पाठः

[2] भ2-च

[3] के4-सकर्मकत्वापत्तौ

विहितकर्मातिरिक्तेत्यर्थः। दोषान्तरमाह - किञ्च पशुना रुद्रं यजते इत्यादि॥ पशुना रुद्रं यजत इत्यत्र कर्मणः करणसंज्ञेति वार्तिकेन पशोः कर्मसंज्ञा, देवदत्ताय क्रुध्यतीत्यादौ "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप"(पा.1-4-37) इत्यनेन देवदत्तस्य सम्प्रदानसंज्ञा। पशुरिच्छाविषयः, देवदत्तो द्वेषादिविषयः। पशोः करणत्वेऽपि देवदत्तस्य सम्प्रदानत्वेऽपि च उद्देश्यताख्यविषयतासम्बन्धेन धात्वर्थेऽन्वयवतः पश्वादेः कर्मत्वेन पश्वादिकर्मणि सकर्मकत्वेन लकाराद्यापत्तिरिति भावः। त्वन्मते संज्ञानां परस्परं बाध्यबाधकभावास्वीकारात्। स्वमते निर्वाहप्रकारमाह – अस्मद्रीत्येति॥ धात्वर्थव्यापारानाश्रयत्वे सति धात्वर्थफलाश्रयत्वं कर्मत्वम्। यथा यतेरेतादृशकर्मत्वाभावस्तथा प्रकृतेऽपीति भावः।

**48.** न च[1] त्वद्रीत्यापि[2] सर्वेषामेव धातूनां यत्किञ्चित्फलव्यधिकरणव्यापारवाचित्वेन सकर्मकत्वापत्त्या[3] स्वार्थफलव्यधिकरणव्यापारवाचित्वं तद्वाच्यमित्यननुगमापत्त्याऽकर्मकभिन्नत्वं[4] तद्वाच्यम्। तत्र च प्रयोगानुरोधाज्जानात्यादिभेदो न प्रवेशनीय इति न कश्चिद् दोष इति शङ्क्यम्, सकर्मणा[5] मप्यर्थान्तरेऽकर्मकत्वेनासंभवापत्तेः। अकर्मकत्वस्याप्येकस्याभावेन[6] तुल्ययुक्त्या सकर्मकान्यत्व[7]स्यापि तत्त्वेऽन्योन्याश्रयापत्त्या[8] "लः कर्मणि"(**पा.3-1-69**) इत्यादेर्बोधकत्वानापत्ते[9]श्च।

ननु तवापि स्वत्वाननुगमाद[न]नुगतमेव[10] सकर्मकत्वादीति[11] कथं "लःकर्मणि" (**पा.3-1-69**) इत्यादेरनतिप्रसक्तबोधकत्वमिति चेन्न, "स्वपितृभ्यः पिता[1] दद्यात्,

---

[1] द4-ननु

[2] ब1-त्वद्रीपि

[3] त2-सकर्मकान्वयापत्त्या

[4] जै-कर्मभिन्नत्वं

[5] अ1,द2,म2,1915-सकर्मकाणां

[6] त2-अकर्मकतस्यापेक्षिकस्याभावेन

[7] वा2-सकर्मकार्मत्वस्यापि, जो2-सकर्मकान्यस्यापि

[8] त1,जो2,1900,1915,म- ऽन्योन्याश्रयणापत्त्या

[9] के3-बोधकत्वाभावापत्तेश्च

[10] "दननुगतमेव " इत्यन्यसर्वमातृकासम्मतः पाठः,युक्तश्च। जो2,द2- "एव " नास्ति

[11] अ1-सकर्मत्वादीति,द2-कर्मत्वादीति

ऋतौ स्वदारान् गच्छेदेवे[२]" त्यादौ स्वत्व[३] पितृत्वदारत्वाननुगमेऽपि[४] विशिष्य सर्वानतिप्रसक्तबोधकत्ववदुपपत्तेरिति[५] समासशक्तौ वक्ष्यामः।

ननु फलावच्छिन्नव्यापारवाचित्वादेव[६] धातूनां सकर्मकत्वमिति वदद्भिरस्माभिरपि[७] केवलव्यापारवाचकत्व[८] मकर्मकत्वं सूचितमेवेति[९] चेन्न, एवं हि केवलव्यापार-वाचकज्ञाकृञादे[१०]रकर्मकता स्यात्, न स्याच्च सकर्मकत्व[११]मिति।[१२]

ननु प्रत्ययार्थफलव्यधिकरणव्यापारवाचित्वमेव[१३] सकर्मकत्व[१४]मस्तु, प्रत्ययार्थ-फलाश्रयत्वमेव च कर्मत्वम्, अतो न कश्चिद् दोष इति चेन्न, "घटं भावयति, एधयती"त्यादिहेतुमण्णिजन्तसकर्मकेषु[१५] तत्कर्मणि च[१६] अव्याप्तेः। तत्रत्य[१७]-फलस्यान्वयव्यतिरेकाभ्यां धातुलभ्यत्वेनान्यलभ्यत्वात्[१८] प्राना(माना)[१९] भावाद् गौरवाच्च[२०] प्रत्ययार्थत्वा[२१]संभवादिति दिक्॥5॥

---

[१] द2,भ1-"पिता" नास्ति

[२] त1,जो2,1900- "एव " नास्ति, त2-ऋच्छेदेव

[३] जै-स्वस्व,के4,भ1,अ4- "त्व"नास्ति

[४] अ1- "अपि " नास्ति

[५] त2-बोधकत्वोपपत्तेरिति

[६] जो2-वाचित्वमेव

[७] वा2,भार1,1900-वदद्भिरपि, जै-वदद्भिरस्माभिः

[८] अ1,अ4-वाचित्व ,1915-वाचकत्वकर्म---

[९] भार1,त3,के4,भ2,द5,त5-सूचितमेवेति नान्योन्याश्रय इति,ज1- "एव" नास्ति

[१०] त्रि-वाचकताकृञादे

[११] जै- "कत्व " नास्ति

[१२] द2-"जानात्यादेः सकर्मकत्वाय ज्ञानफलाद्यनुकूलव्यापारवाचकत्वं वाच्यम्"इत्यधिकम्

[१३] द4-वाचकत्वमेव

[१४] त2-"सूचितमेवेति" इत्यारभ्य "वाचित्वमेव सकर्मकत्व" इत्यन्तं ग्रन्थः नास्ति

[१५] द3-णिजन्तकर्मकेषु

[१६] जै-वा

[१७] 1900,द5,त्रि,म-तत्र

[१८] द3-धातुलभ्यत्वेनोपलभ्यत्वात्

[१९] "माना " इति सर्वास्वन्यमातृकास्वस्ति। अयमेव युक्तः।

[२०] 1915-मानाभावागौरवाच्च

[२१] भ1- "त्व"नास्ति

नैयायिको वैयाकरणमतमाक्षिपति - न च त्वद्रीत्येति॥ वैयाकरणैरपि स्वार्थव्यधिकरणव्यापारवाचित्वं सकर्मकत्वं वाच्यम् , यत्किञ्चित्फलव्यधिकरण-व्यापारवाचित्वरूपसकर्मकत्वस्य सर्वस्यापि धातोः सत्त्वात्। यत्किञ्चिदित्यस्य यथाकथञ्चिदुपात्तेत्यर्थः। तथा सति यत्यादेरपि यत्नार्थकत्वेन गम्याद्यर्थसंयोग-व्यधिकरणव्यापारवाचकत्वेन सकर्मकत्वापत्तिः स्यादतस्तद्वारणाय स्वार्थफल-व्यधिकरणेत्यादि वाच्यम्। तथा सति अननुगतार्थकस्वपदघटितत्वेनाननुगमा-पत्तिस्तव वैयाकरणमत इति भावः।

तर्हि किं सकर्मकत्वमित्यत आह - अकर्मकभिन्नत्वं तद्वाच्यमिति॥ ननु नैयायिकस्य तव मतेऽपि अकर्मकभिन्नत्वमित्यत्र जानात्यादेरपि अकर्मकपदेन ग्रहणापत्तिरित्यत आह – प्रयोगानुरोधेनेति॥ प्रयोगः, घटं जानातीत्यादौ जानात्यादेः सकर्मकत्वेन प्रयोगः, तदनुरोधेन उक्तलक्षणे अकर्मकपदेनाग्रहणात् , जानात्यादे-र्भेदप्रतियोगित्वेन न तेषां ग्रहणमित्यत आह - जानात्यादिभेदो न निवेशनीयः॥ न निवेशनीयत्वेनाभिमतः। नैयायिकमतमिदं खण्डयन्नाह – सकर्मकाणामपीति॥ अर्थभेदेन एक एव धातुरुभयविधः। यथा नदी वहतीत्यत्र स्यन्दनार्थेऽकर्मकः। प्रापणार्थे सकर्मकः भारं वहतीत्यत्र। ननु प्रत्यर्थं शब्दाभिनिवेश इति भाष्यात् अर्थभेदे भिन्न एव धातुरित्यत आह – अकर्मकत्वस्यापीति॥ अकर्मकभिन्नत्वमिति सकर्मकत्वलक्षणं त्वया उक्तम् , तत्र त्वया अकर्मकत्वं वाच्यम् , तदेव दुर्वचम् , एकस्यानुगतस्याकर्मकत्वस्य भणितुमशक्यत्वात्। यदि सकर्मकभिन्नत्व-मकर्मकत्वमित्युच्यते तदान्योन्याश्रय इति सकर्मकधातुस्वरूपाज्ञाने सकर्मकोद्देश्यकस्य "लः कर्मणी"(पा.3-1-69)ति सूत्रस्यार्थबोधानुपपत्तिः। नैयायिकः शङ्कते - ननु तवापीति॥ स्वार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्म-कत्वं वदतस्तवमतेऽपि लक्षणस्याननुगतार्थस्वपदघटितत्वेन सकर्मकत्वस्य अग्रहापत्तिः, तथा चोक्तदोषस्तवापि मते सुस्थ एव। शाब्दिकः स्वमतं निर्दुष्टयति - स्वपितृभ्यः पिता दद्यादिति॥ स्वशब्दस्य सर्वनामत्वेन स्वत्वमननुगतम् , पितृत्वमपि अनिर्दिष्टपितृपितामहादिवृत्तित्वेनाननुगतमेव, दारादिशब्दस्यापि क्रियाशब्दतया दारत्वाद्यपि अनुगतमेव। एषामननुगतार्थत्वेऽपि स्वपितृभ्य इत्यादौ चैत्रपितृभ्यश्चैत्रो दद्यादित्यर्थः, विशेषेऽपर्यवसाने तादृशवाक्यस्यैव

आनर्थक्यापत्तेः। एवमेव ऋतौ दारान् गच्छेदेवेत्यादौ अपि चैत्रीयतद्दारसम्बन्धितदृतौ चैत्रस्तद्दारान् गच्छेदेवेति बोधपर्यवसानम्। किञ्च स्वत्त्वादेरननुगमेऽपि स्वत्त्ववत्त्वादेरनुगमेनादोषः। एवमेव प्रकृतेऽपि स्वार्थेति स्वपदेन पच्यादिग्रहणेनानुगमः कार्यः, अन्यथा लक्षणवाक्यं निर्विषयमेव स्यादित्यभिप्रायः। तदेवाह - विशिष्य सर्वानतिप्रसक्तेति॥ विशिष्य चैत्रपितृत्वादिरूपेण सर्वेभ्यः, अनतिप्रसक्तबोधः इष्टविषयकबोधस्तज्जनकत्ववदुपपत्तेः।

अकर्मकभिन्नत्वं सकर्मकत्वमिति सकर्मकलक्षणे अकर्मकत्वमुपपादयति - ननु फलावच्छिन्नव्यापारवाचित्वादेवेति॥ फलावच्छिन्नेति॥ द्वितीयाद्यर्थफलावच्छिन्नेत्यर्थः। एतन्मते फलस्य धात्ववाच्यत्वात्। तथा च सकर्मकधातुयोगे एव द्वितीयाप्रयोगात् तत्र सकर्मकत्वोपपत्तिः। अकर्मकधातुयोगे द्वितीयाया अयोगात् फलाप्रतीतेः फलावच्छिन्नव्यापारवाचकत्वाभावे केवलव्यापारवाचकत्वेन चाकर्मकत्वग्रहोपपत्तिरिति भावः।

मतमेतन्निरस्यति – चेन्नेति॥ धातूनां केवल व्यापारवाचकत्वेनाकर्मकत्वाभ्युपगमे कृञादेरपि अकर्मकत्वापत्तिः स्यात्तव मते केवलव्यापारवाचकत्वात्। मम मते तु तेषामपि फलव्यापारोभयार्थकत्वमेव, फलव्यापारयोर्धातुरिति प्रतिज्ञानात्।

अकर्मकलक्षणान्तरमाह - ननु प्रत्ययार्थेति॥ प्रत्ययो द्वितीयादिस्तदर्थः फलं, तद्यधिकरणेत्याद्यर्थः। ननु धातोः फलावाचकत्वे कर्मत्वानुपपत्तिरत आह – प्रत्ययार्थेति॥ प्रत्ययार्थो द्वितीयाद्यर्थः फलम् , तदाश्रयत्वं घटादेरिति। एवं सति न कश्चिद्दोषो नैयायिकमते। तत् अव्याप्तिदोषेण निरस्यति – चेन्न। घटं भावयति एधयतीति॥ उक्तस्थलेषु णिजन्तधात्वर्थप्रयोज्यव्यापारस्यैव फलत्वेन प्रतीयमानत्वेन तदाश्रयत्वेन घटादेः कर्मत्वोपपत्तौ प्रत्ययार्थफलाश्रयत्वरूपस्य कर्मलक्षणस्याव्याप्तेः।

ननु घटमिति द्वितीयार्थफलाश्रयत्वेन कर्मत्वोपपत्तौ नाव्याप्तिरित्यत आह – अन्वयव्यतिरेकेति॥ अयमाशयः- यच्छब्दोच्चारणानन्तरं यदर्थबोधः स तस्य वाच्य इति प्रतीतिसिद्धनियमेन णिजन्तधातुप्रयोगप्रमितव्यापारस्य अन्यलभ्यतया

द्वितीयादेः प्रत्ययस्य तत्र शक्तिकल्पनानौचित्यम्। उभयवाचकत्वे गौरवमपि। एको द्वौ इत्यादौ वचनग्रहणस्येवात्र मानस्याभावश्चेति।

7. कृञः यत्नार्थकत्वे दूषणान्तरम्

**49.** कृञर्थ[१]प्रकाशनपुरःसरं केवल[२]यत्नार्थकतायां दूषणान्तर[३]माह-

> किं तूत्पादनमेवातः कर्मवत् स्यात् यगाद्यपि।
> कर्मकर्तर्यन्यथा तु न भवेत् तद्[४] दृशेरिव[५]॥6॥

उत्पादनम्[६] - उत्पत्तिरूपफल[७]सहितम्, न तु केवलं[८] यत्नमात्रं व्यापारमात्रं[९] वा। अत्र कृञोऽर्थ इत्यनुषज्यते।

ननूत्पादयतीत्यस्योत्पत्तिं करोतीति विवरणमनन्वितं[१०] स्यात्, उत्पत्तेरुत्पत्त्य-भावादिति[११] चेन्न, यत उत्पत्तिराद्यक्षण[१२]संबन्धः, स च क्षणरूप इति तस्योत्पत्तेः सुलभत्वादुत्पादना[१३] सुलभैव। तवापि[१४] यतते यत्नं करोतीत्यादावनुपपत्ति-तादवस्थ्याच्च[१५]।नन्वेवं जानात्यादेः सकर्मकत्वाय ज्ञानफलाद्यनुकूल[१६] व्यापारवाचकत्वं वाच्यम्। तथा च चक्षुरादिकं जानातीति स्यात्।

---

[१] द4- कृत्यर्थ

[२] ज1-पुरःसरकेवल

[३] अ4-दूषण

[४] के4-तु

[५]अ1- "इति" अधिकं

[६] वा2- "उत्पादनं" नास्ति

[७] के4- "फल"नास्ति,भ2-उत्पत्तिरूप-प्रागसत्त्वे सति सत्त्वरूपा उत्पत्तिः इति टिप्पणी

[८] द1,वा2,ब1,1900,त्रि,त5 - केवल

[९] वा2- "व्यापारमात्रं" नास्ति

[१०] अ1,भार1-मनुचितं, जो2-मसङ्गतं

[११] के4-उत्पत्तिभावादिति

[१२] अ1-लक्षण

[१३] अ1-दसौ

[१४] अ1,भ1-तथापि

[१५] अ4-....पपत्तिसत्त्वाच्च

[१६] अ4-ज्ञानफलानुकूल

उत्पादनाया[1] आत्मनीव चक्षुष्यपि सत्त्वादिति चेन्न, मनो जानातीति प्रयोगोपपत्तये जनकव्यापारे लक्षणा [2] भ्युपगमे [3] तवापि व्यापरवत्तया तथा प्रयोगस्य [4] दुष्परिहरत्वादिति समाधिरुभयेषां तुल्य एव [5]। स्थाली पचतीतिवदिष्टापत्तेश्च। ज्ञाधातोः फलं विषयगतावरणनिवृत्तिः। तदनुकूलोत्पादना [6] ज्ञप्तिरेव। अतः सैव धात्वर्थः। तथा च [7] चैत्रो जानातीत्यत्र चैत्राभिन्नाश्रयिका आवरणभङ्गानुकूला ज्ञानक्रियेति बोध इति पक्षे च[8]न शङ्कापि[9]।

### 7.1 कारिकास्थस्य अत इति पदस्य अर्थद्वयप्रदर्शनम्

अतः। यतः कृञो यत्नमात्रमर्थो नेष्यते[10] अतः[11]। कर्मवत् स्यादिति[12] पदेन "कर्मवत् कर्मणा तुल्यक्रियः"(पा.3-1-87) इति सूत्रं लक्ष्यते।

अयं भावः - यत एतस्योत्पादनार्थकता, अतः क्रियते ओदनः स्वयमेवेति[13] यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्तृनिष्ठत्वेन कर्मस्थभावकत्वाभावाद् यगादयो न स्युः। अन्यथा "यत्यते घटः स्वयमेवे"त्यपि स्यादिति।

यद्वा, ननु जानातीच्छत्यादिवत्[1] कारकार्थनिर्णय[2] वक्ष्यमाणरीत्या विषयत्वादि-फल[3]वाचित्वेन सकर्मकत्वसंभवात् कृञ उत्पत्तिवाचकत्वाभ्युपगमो मुधैवेत्याशङ्कां

---

[1] त2- "उत्पादनाया" नास्ति

[2] भ2-आत्मधर्मत्वेन मनोनिष्ठत्वाभावाद् ज्ञानस्य ज्ञानजनकव्यापारे लक्षणा व्यापारस्य तु चेतनाचेतनसाधारणत्वात् मनोविषयत्वमिति भावः इति टिप्पणी, द7-जनकव्यापारलक्षणा

[3] जो2,द2-गमेन

[4] भ2-तथा प्रयोगस्य – चक्षुर्जानातीत्यादेः इति टिप्पणी

[5] अ4-तुल्यत्वात्

[6] के4- "तु "अधिकम्, त5-उत्पादनज्ञप्ति

[7] अ4-तथैव

[8] त2-"च" नास्ति

[9] भ2-धात्वर्थज्ञप्तेः चक्षुरादौ असत्त्वात् न चक्षुर्जानातीत्यादिप्रयोगसंभवः संभवस्तु लक्षणयैवेति न दोषः इति टिप्पणी

[10] वा2-यतः कृञो नावेष्यते, अ4- "इति" इत्यधिकम्

[11] वा2,भार1,त1,त3,जो2,1900,भ2,1915- "इत्यर्थः" इत्यधिकम्

[12] अ4- "कर्मवत् " इत्यधिकम्

[13] अ1- "आदि " अधिकं

मनसि निधायाह[४]- अत इति। यत उत्पत्तिरपि कृञोऽर्थ[५] एवेत्यर्थः[६]। अपि[७] भिन्नक्रमः। कर्म[८] कर्तर्यपि यगादि स्यादित्यर्थः। अन्यथा। उत्पत्त्यवाचकत्वे। "ज्ञायते,दृश्यते,इष्यत[९]" इतिवत् कर्मणि तत्संभवे[१०]ऽपि कर्मकर्तरि तन्न स्यादिति भावः। तदेवाह - दृशेरिति[११]। इदं च ज्ञानादिवाचकोपलक्षणम्।

तथा च केवलयत्नमात्र[१२]वाचकत्वे "दृश्यते घटः स्वयमेवे"ति यथा न भवति[१३], तथा[१४] "क्रियते[१५] घटः स्वयमेवे"त्यपि[१६] न स्यात्। कर्तृस्थ[१७]भावकत्वा[१८] विशेषादिति दिक्॥6॥

---

ननु वैयाकरणमतेऽपि कृञोऽकर्मकत्वापत्तिः स्यादित्यत आह – कृञर्थ-प्रकाशनेति॥ नैयायिकैः कृञो यत्नार्थकत्वमुक्तन्तदेवास्माभिर्नेष्यते यत्न-मात्रार्थकत्वे अकर्मकत्वापत्तेः। तदेतत्कारिकया स्पष्टयति -किं तूत्पादनमेवातः इति॥

---

[१] जो2-जानात्यादिवत्,द2-जानातीच्छतीत्यादिवत्

[२] वा2,द1,त1,त3,जो2,1900,त्रि,द5,ज1- निर्णये

[३] के4- "फल"नास्ति

[४] जै-विधायाह,ब3-मनसिकृत्याह

[५] अ4-" अत"इत्यधिकम्

[६] वा2-कृञोर्थः। अत एवेत्यर्थः, 1900,त्रि- कृतोर्थः एवेत्यर्थः

[७] "अपिः " सर्वास्वन्यमातृकास्वस्ति।

[८] अ1- "कर्म " नास्ति

[९] 1900,भ1,त्रि,द6- "इष्यते " नास्ति,भ3-"दृश्यते" नास्ति

[१०] भ1-तदसंभवे

[११] जो2-दृशेरिवेति

[१२] भ1- "मात्र " नास्ति

[१३] अ1-संभवति

[१४] 1900- "च " इत्यारभ्य "तथा " पर्यन्तं ग्रन्थः नास्ति

[१५] जो2-दृश्यते

[१६] जै-त्यादि

[१७] त2-"स्थ" नास्ति,भ1-कर्मस्थ

[१८] अ4-भावकर्मत्वापि

न तावद् यत्नमात्रमर्थः किन्तु उत्पादनमर्थः कृञः। उत्पादनम् उत्पत्तिरूपफलसहितम्। खण्डनीयमाह - न तु यत्नमात्रम्, व्यापारमात्रमिति॥ शेषं पूरयति - अत्र कृञ इति॥ यत्नपदं व्यापारस्यापि उपलक्षणम्, अत एवोक्तं भूषणसारे प्रारम्भे एव अयञ्च व्यापारः फूत्कारत्त्वाधःसन्तापनयत्नत्वादिरूपेण वाच्य इति। तेन रथो गच्छतीत्यादौ शक्यार्थयत्नस्य बाधेऽपि यत्नेतरशक्यार्थव्यापाराश्रयत्वस्य रथादिरूपेऽपि कर्तरि सत्त्वान्न लक्षणाश्रयणरूपगौरवमेतन्मते। ननु कृञ उत्पत्तिसहितयत्नार्थकत्वे उत्पादयतीत्यादौ उत्त्पत्त्यादेर्द्वैधाभानमिति शङ्कते – ननूत्पादयतीति॥ तथाहि - उत्पादयतीतिपदेन उत्पत्तिं करोतीत्यर्थःप्रतीयते, तथा च करोतेरुत्पत्त्यर्थकत्वे कर्मीभूतोत्पत्तेः कुत्रान्वयः स्यादिति जिज्ञासायां न तावत् कृधात्वर्थे उत्पत्तौ, घटोघट इत्यत्रेवान्वयानुपपत्तिः, न तु यत्नादौ, कृधात्वर्थोत्पत्त्यन्वयेन शान्ताकाङ्क्षस्य प्रथमोत्पत्तौ निराकाङ्क्षत्वात्, फलाभावाच्च। तदाह – उत्पत्तेरिति॥ समादधाति - चेन्न । यत इति॥ यद्यपि अखण्डकालस्यैकत्वं नित्यत्वञ्च, तथापि सखण्डकालस्य सूर्यादिक्रियोपहितस्य सखण्डत्वेनानित्यत्वमेव। तथा चात्रोत्पत्तिपदेन आद्यक्षणसम्बन्धो गृह्यते स चानित्य एवेति तस्य कृधात्वर्थे उत्पत्तौ अन्वये बाधाभाव एवेति भावः। तदाह – सचेति॥ क्षणरूपः। तेनानित्यत्वम्। दोषतौल्येनापि स्वमतं पोषयति - तवापि यतते यत्नमिति॥ तव मते यतेर्यत्नोऽर्थः अतश्च यतते इत्यस्य यत्नं करोतीत्यर्थः। कृञर्थस्तव यत्नः। यत्नस्य कृञर्थयत्ने कर्मत्वानुपपत्तिरिति। प्रतिधातु सकर्मकत्वं भिन्नं भिन्नं वाच्यम्, तथा च जानात्यादेरपि सकर्मकत्वं वैयाकरणमते ज्ञानात्मकफलाद्यनुकूलव्यापारवाचकत्वादेवेष्टव्यम्। तथा सति ज्ञानानुकूलव्यापारो विषयसन्निकर्षादिरेव। तादृशसन्निकर्षरूपव्यापाराश्रयत्वेन चक्षुरादेरपि कर्त्तृत्वापत्तौ चक्षुरादिकं जानातीति प्रयोगापत्तिरिति वदति - नन्वित्यादिना सत्त्वादित्यन्तेन ग्रन्थेन॥ इष्टापत्त्या परिहरति - मनो जानातीत्यादिना॥ अयमाशयः- धातूनां यत्नार्थकत्वे, मनो जानातीत्यादौ मनसि अचेतनत्वेन कृतेर्बाधात् जनकव्यापारे लक्षणा स्वीक्रियते। ज्ञानजनको व्यापार आश्रयत्वलक्षणः। स चाश्रयत्वरूपो व्यापारः मनसीति मनसः कर्तृत्वेन मनो जानातीति यथा प्रयोगस्तव मते तथैव चक्षुरादिकं जानातीत्यत्रापि जनकव्यापारे लक्षणायां तथा प्रयोगो दुष्परिहर एव। तथा च यथा तव मते

समाधानं तथा ममापि मते। इष्टापत्तिमाह - स्थाली पचतीति॥ देवदत्तः स्थाल्यां पचतीति स्थाल्या अधिकरणत्वविवक्षायां भवति। सौकर्यातिशयद्योतनार्थमधिकरणस्य कर्तृत्वविवक्षायां यथा स्थाली पचतीति जायते तथा करणीभूतस्येन्द्रियस्य कर्तृत्वविवक्षायां चक्षुरादिकं जानातीत्यस्यापि साधुत्वोपपत्तिरिति भावः।

इदानीं धात्वर्थभेदाश्रेयणोक्तदोषं वारयति - ज्ञाधातोः फलमिति॥ पूर्वं ज्ञाधातोर्ज्ञानानुकूलो व्यापारो धात्वर्थ उक्तः। इदानीम् न धातोर्ज्ञानं फलम् अपि तु विषयगतावरणनिवृत्तिरेव फलम्। अज्ञानस्य द्वे शक्ती, आवरणं विक्षेपश्च। प्रथमा स्वरूपावरिका द्वितीया च विपरीतकल्पिका। यथा ब्रह्मस्वरूपस्याप्यात्मन आवरणशक्त्या स्वरूपमाव्रियते विक्षेपशक्त्या च ब्रह्मविपरीतकर्तृत्वभोक्तृत्वसुखित्व-दुःखित्वादिकमात्मनि कल्प्यते। तथैव सर्वोऽपि विषयस्तदावरणशक्त्या आवृतो भवति अतो न सदा सर्वस्य भानम्। घटादिप्रत्यक्षस्थलेऽन्तःकरणं चक्षुरादिद्वारा घटादिदेशं गत्वा घटाद्याकारेण विपरिणमते। विषयाकारेण परिणामः स वृत्ति-रुच्यते। वृत्त्या तदावरणभङ्गो जायते। स भङ्ग एव फलम् , तदनुकूलो व्यापारो वृत्तिरेव। सचान्तःकरण इति अन्तःकरणावच्छिन्नचैतन्यस्य आत्मन एव कर्तृत्वं नेन्द्रियस्येति न चक्षुरादिकं जानतीति प्रयोगापत्तिरिति भावः। तदेतत्सर्वमाह - फलं विषयगतावरणनिवृत्तिरिति॥

तदनुकूलोत्पादनाज्ञाप्तिरेव। वृत्तिरेवेत्यर्थः। सैव आवरणभङ्गानुकूल-वृत्तिरेवेत्यर्थः। तथा चेति॥ विषयगतावरणनिवृत्त्यनुकूल-व्यापारार्थकत्वे सति। चैत्रो जानातीत्यत्रेति॥ चैत्रस्याख्यातार्थे कर्तरि अभेदेनान्वयः। कालस्य व्यापारे-ऽन्वयः, संख्यायाश्चाख्यातार्थेऽन्वयः। तथा च चैत्राभिन्नैकाश्रयकः वर्तमान-कालिकाऽऽवरणभङ्गानुकूलो व्यापार इति बोधः। अस्मिन् पक्षे, पूर्वोक्तधात्वर्थ-स्वीकारेणोक्तबोधस्वीकारे न शङ्कापीति॥ चक्षुरादेः कर्तृत्वशङ्कापि न, तादृश-ज्ञानक्रियात्मकव्यापारस्य चक्षुरादौ असिद्धेः। कारिकास्थमतः पदार्थमाह - अत इति॥ यतः यस्मात्कारणात् कृञः कृधातोः यत्नमात्रं फलरहितो यत्नः अर्थो वाच्यो न इष्यते, न तात्पर्यविषयी भवति, अतः फलसहितयत्नार्थकत्वादेवेत्यर्थः। तत्प्रयोजनमाह कारिकायाम् - कर्मवत्स्याद्यगाद्यपि इति॥ कर्मवदित्यस्य तात्पर्यार्थमाह - सूत्रं लक्ष्यत इति॥ कारिकाशयं विस्फोरयन्नाह - अयं भाव इति॥

यतः यस्मात् कारणात् एतस्य कृधातोः उत्पादनार्थकता फलसहितयत्नार्थकता अतः अस्मात्कारणात् कर्मकर्तृविवक्षायां कर्मवदितिसूत्रेण कर्मवद्भावेन यगाद्युत्पत्तौ क्रियते ओदनः स्वयमेवेति प्रयोगोपपत्तिः। द्विविधा हि धातवः, कर्मस्थभावकाः, कर्तृस्थभावकाश्च। यत्र क्रियाकृतो विशेषो दृश्यते कर्मणि प्रत्यक्षमुपलभ्यते तत्र कर्मणि विद्यमाना क्रिया कर्मस्थक्रियेत्युच्यते। तादृशक्रियार्थकत्वं धातोः कर्मस्थक्रियकत्वम्, यथा तण्डुलः पच्यते स्वयमेवेति। अत्र क्रियया तण्डुले पूर्वावस्थातः विक्लित्यादिरूपवैलक्षण्यं दृश्यते अतो लक्षणसमन्वयः। घटं जानाति, ग्रामं गच्छतीत्यादौ तु क्रियाकृतो विशेषो न लक्ष्यते। न ह्ययं घटः केनचिद् दृष्टः, ग्रामोऽयं केनचिद् गत इति शक्यं कर्मदर्शनेनावगन्तुम्।

केवलयत्नार्थकत्वे दोषमाह - अन्यथा यत्नस्येति॥ केवलयत्नार्थकत्वे, यत्नस्य धात्वर्थस्य कर्तृनिष्ठत्वेन कर्मस्थभावकत्वाभावेन कर्मवदिति सूत्रेण कर्मवद्भावेन प्राप्ताः यगादयः न स्युः। कर्मस्थभावकस्थले एव तेनातिदेशात्। तथा चोक्तम् -

विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता।
क्रिया व्यवस्था त्वन्येषां शब्दैरेव व्यवस्थिता॥ इति।

यत्र कर्मणि धात्वर्थक्रियाकृतविशेषदर्शनं तत्र कर्मस्थक्रियत्वम् , यत्र कर्तरि क्रियाकृतविशेषदर्शनं तत्र कर्तृस्थक्रियत्वम्।

नन्वेवं पच्यादिकर्तर्यपि श्रमादिरूपविशेषस्य दर्शनात् पच्यादीनामपि कर्मस्थक्रियत्वानुपपत्तिः, पश्यतीत्यादीनां कर्तृस्थभावकत्वानुपपत्तिश्च, कर्तरि क्रियाकृतविशेषाभावादतो मतान्तरमाह – क्रियाव्यवस्थेति॥ अन्येषां विषये क्रियाव्यवस्था - कर्मस्थत्वादिविशिष्टक्रियाव्यवस्था। शब्दैरेव पच्यादिशब्दैरेव प्रकाश्यते।

अयं भावः - येऽपि कर्मस्थभावकाः पच्यादयः, तत्रापि श्रमादिविशेषः कर्तर्यपि दृश्यते। तथा च विशेषदर्शनमित्यनेन नास्ति निर्वाहः। तस्माद् यत्र शब्दैरेव विशेषो गृह्यते तत्रैव स्थिता क्रिया। तद्यथा घटं पश्यतीत्यादौ, शब्दः किञ्चिद् विशेषविशिष्टं दृशिक्रियाविषयं घटादिकं नाभिधत्ते इति शब्दवशेन

कर्तृस्थभावकत्वाद् दृश्यते घटः स्वयमेवेति न भवति। काष्ठं भिनत्ति इत्यादौ भिदादिक्रियाविषयं काष्ठादिकं किञ्चिद् विशेषविशिष्टमभिधत्ते इति तद्वशेन कर्मस्थभावकत्वाद् भिद्यते काष्ठं स्वयमेवेत्यादि भवत्येव।

कारिकास्थमतः शब्दमन्यथा व्याचष्टे - यद्वा ननु जानातीति॥ फलस्य वाच्यत्वमभिप्रेत्येदं बोध्यम्। जानातीत्यादीनां विषयत्वरूपफलवाचित्वमुक्तं कारकार्थनिर्णये, सुबर्थनिर्णय इति तदर्थः। तत्र हि सविषयकार्थेषु ज्ञानेच्छाप्रयत्नसन्देहादिरेव धात्वर्थः, विषयतै-वातिरिक्ता तज्जन्या फलमित्युक्तम्। विषयतारूपफलवाचकत्वेन तेषां सकर्मकत्वं यथाभिहितं तथैव यत्नार्थककृधातोरपि विषयतैव फलमर्थो मन्तव्यस्तेनैव चास्यापि सकर्मकत्वोपपत्तिरिति उत्पत्तिरूप-फलवाचकत्वाभ्युपगमो व्यर्थः, इष्टसकर्मकत्वस्य तदवाचकत्वेऽपि लाभात्। तदाह – उत्पत्तिवाचकत्वाभ्युपगमो मुधेति॥

उक्त शङ्कायामतः शब्दार्थं विवृण्वन्नाह - अत इति॥ कारिकायामिति शेषः। उत्पत्तेर्वाच्यत्वायाह - यत उत्पत्तिरपीति॥ एवेन विशेषणयुक्तेन उत्पत्तेर्वाच्यत्वायोगव्यवच्छेदः। भिन्नक्रमः अन्यत्र पठितस्यान्यत्र योगः। यगाद्यपीत्यत्रापि शब्दः, कारिकास्थकर्मकर्तरीत्यतोऽग्रे योज्यः। तथा सति कर्मकर्तर्यपि यगादिः स्यादित्यर्थः। कारिकास्थस्य अन्यथेत्यस्य व्याख्यानम् उत्पत्त्यवाचकत्व इति॥ कर्मणि कर्मविवक्षाया कर्मणिप्रत्यये सति यथा सार्वधातुके यगित्यादिना यगादयो भवन्ति तथा कर्मवद्भावे सति यगादयो न स्युः कर्मस्थभावकत्वाभावेनातिदेशाप्रवृत्तेः।

दृष्टान्तमाह - ज्ञायते दृश्यते इष्यते इति॥ अत्र सर्वत्र क्रियाकृतविशेषस्य कर्मण्यनुपलभ्याद् यथा न यगादयस्तथैव क्रियते ओदन इत्यादौ अपि न स्युरित्यर्थः। इममर्थं कारिकार्थतया स्वीकारयति। तदेवाह – दृशेरिवेति॥ दृश् धातुः कर्तृस्थभावकानां सर्वेषामुपलक्षणमित्यभिप्रेत्याह – इदञ्चेति॥ आदिना इच्छादि गृह्यते। तथा च केवलयत्नेति॥ एतत्सर्वं पूर्वं व्याख्यातमेव। कृञः यत्नार्थकत्वे, दृशादिधातोरिव कर्तृस्थभावकत्वेन अतिदेशा-प्रवृत्तौ यगादयो न भविष्यन्ति, यत्नस्य कर्तृवृत्तित्वादित्येतदाह – कर्तृस्थभावकत्वाविशेषात् इति॥

**8. कर्मवद्भावव्यवस्था**

**50.** नन्वेवं[१] कृञादेरिव जानात्यादेरपि[२] विषयावच्छिन्नावरणभङ्गादि फलवाचकत्वमभ्युपगन्तव्यम्, अन्यथोक्तदोषापत्तेः। तथा च "ज्ञायते घटः स्वयमेवे"त्यपि स्यात्[३]। स्याच्च "ग्रामो गम्यते स्वयमेवे"त्यादिकम्। कर्मस्थभावकत्वाविशेषादित्याशङ्कां मनसि कृत्वाऽऽह[४]-

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।
न तु प्राप्ये कर्मणीति सिद्धान्तो हि[५] व्यवस्थितः॥ 7॥

कर्म त्रिविधम्- निर्वर्त्यं विकार्यं प्राप्यं च[६]। आद्यं "घटं[७] करोति[८]", द्वितीयं "सोमं सुनोति, व्रीहीनवहन्ती"त्यादि[९]। तृतीयं "रूपं पश्यती"त्यादि। प्राप्यत्वं च[१०] क्रियाकृतविशेषानुपलभ्यमानत्वमिति[११] वक्ष्यते। तच्च ज्ञादृश्यादे[१२]र्गम्यादेश्चास्तीति नातिप्रसङ्ग इति भावः।

नह्ययं ग्रामः केनचिद् गतः, घटोऽयं केनचिद् ज्ञातः[१३] इति ज्ञातुं[१४] शक्यम्। तस्मादावश्यकं फलवाचकत्वम्। अत एव "द्व्यर्थः पचि"रिति[१५] भाष्यमपि[१६] ४।

---

[१] के4-न चैवं

[२] वा2-नन्वेवं कृञादेरिव जानात्यादेः चक्षुर्जानात्याद्युक्तरीत्या

[३] "स्यादेव" सर्वास्वन्यमातृकास्वस्ति।

[४] ब1-कृत्याह,के3-निधायाह

[५] ब1-सिद्धान्तोऽयं,के4,म-सिद्धान्तोऽभिव्यवस्थितः,अ4- " हि " नास्ति

[६] के4,के3,अ4-चेति

[७] के4- "घटं"नास्ति

[८] अ1,त5 -करोततीति, के3,अ4-करोतीत्यादि

[९] के3,अ4-त्यादिकम्

[१०] त2-"च" नास्ति

[११] द2-"च" इत्यधिकम्

[१२] त1,त5-ज्ञादृश्यो,भ2- कर्मणीति शेषः इति टिप्पणी

[१३] त5-घटोयं केन विज्ञातः

[१४] द5-वक्तुं

[१५] अ4-पचतीति

[१६] त2-"भाष्यमपि" नास्ति,अ4- "अपि" नास्ति

फलव्यापारयोः शक्त्यभ्युपगम [१] एव संगच्छते। "तण्डुलानोदनं पचती"त्यत्र तण्डुलानां विकार्यकर्मत्वमोदनस्य निर्वर्त्यकर्मत्वं चोपपादयितुं[२] पचेर्विक्लित्त्युत्पत्ति[३] द्व्यर्थत्वस्य भाष्यकारैरुक्तस्य धातोः फलावाचकत्वे[४]ऽसंभवात्। एकस्यैव व्यापारस्योभयफलहेतुत्वसंभवेन[५] व्यापारद्वयार्थत्ववर्णनस्यासंभवात्[६]।

## 8.1 कृञ व्यापारवाचित्वव्यवस्थापनम्

उपलक्षणं च[७] कृञ इति[८] धातुसामान्यस्य। उक्त[९]वक्ष्यमाणयुक्तिभिः सर्वेषामेवोभयवाचकत्वावश्यकत्त्वात्[१०]। यत्तु कृञो यत्नत्वं न[११] वाच्यतावच्छेदकम्[१२], अकर्मकतापत्तेः, यत्यादिवत्। तथा च यत्नत्वेन[१३] विवरणप्रश्नोत्तरभावयोरेवाभावान्न तेनैव[१]

---

[१] वा2,भार1,त1,त3,जै,द4,भ2,1900,1915,म,अ4-शक्तिद्वयाभ्युपगम

[२] द1,त1,त3,1900,1915-चोपपादितम्।

[३] अ1-त्त्युपपत्ति

[४] त5,ब3-फलवाचकत्वे

[५] अ1-हेतुत्वेन

[६]भार1- एकस्यैव व्यापारस्योभयफलहेतुत्वेन संभवेन व्यापारद्वयार्थत्ववर्णनस्यासंभवात् , 1900,द6,द7- एकस्यैव व्यापारस्योभयफलत्वे हेतुत्वसंभवे तद्व्यापारद्वयार्थवर्णनस्याप्यसंभवात्, 1915- एकस्यैव व्यापारस्योभयफलत्वे हेतुत्वसंभवे तद्व्यापारद्वयार्थत्ववर्णनस्याप्यसंभवात्,
द1,त5,त्रि- एकस्यैव व्यापारस्योभयफलहेतुत्वसंभवे तद्व्यापारद्वयार्थत्ववर्णनस्यासंभवात्,
त1- एकस्यैव व्यापारस्योभयफलत्वे हेतुत्वसंभवे तद्व्यापारद्वयार्थवर्णनस्यासंभवात् ,
अ1,त3- एकस्यैव व्यापारस्योभयफलहेतुत्वसंभवेन व्यापारद्वयार्थत्ववर्णनस्याप्यसंभवात् ,
जो2- एकस्यैव व्यापारस्योभयफलहेतुत्वसंभवेन व्यापारद्वयार्थवर्णनस्यासंभवात् ,
ब1,त2,द5- एकस्यैव व्यापारस्योभयफलहेतुत्वेन व्यापारद्वयार्थवर्णनस्याप्यसंभवात् ,ब3-एकस्यैव व्यापारस्योभयफलहेतुत्वे न व्यापारद्वयार्थवर्णनस्याप्यसम्भवात्
जै,भ1,द4,के3,अ4- "तण्डुलानोदनं पचति " इत्यारभ्य "स्यासंभवात् " इति पर्यन्तं ग्रन्थः नास्ति,
के4,भ2- एकस्यैव व्यापारस्योभयफलहेतुत्वेन व्यापारद्वयार्थत्ववर्णनस्याप्यसंभवात् ,

[७] अ1,जै, वा2,1900,के3,द2,1915-चैतत्, त1,त3,भार1,द4- "च " नास्ति,

[८] अ1,जै,के3,द2,अ4- "कृञ इति " नास्ति

[९] जै-उक्तं च

[१०] ब1,1900,द7,ज1-मेवोभयवाचकत्वात्

[११] द2-"न"नास्ति

[१२] 1915-वाच्यतावच्छेदकत्वम्

[१३] त्रि-यत्नेन, अ4- यत्नत्वेनैव

रूपेण वाच्यतेति [२]नैयायिकोक्तं युक्तमिति भाव इत्यादि व्याचक्षते, तन्न। यतो[3] यद्यपि केवलयत्नमात्रवाच्यतावादे [४] प्रागुक्तरीत्यायं [५] दोषो युक्तः, तथापि कृञो यत्नत्वं [६]वाच्यतावच्छेदकमित्यत्र न सकर्मकत्वानुपपत्तिः न वा कर्मकर्तरि[७] यगनुपपत्तिर्बाधिका[८]। उत्पत्तिरूपफलवाचकत्व [९] सिद्ध्यैव फलव्यधिकरणव्यापार वाचित्व [१०] रूपसकर्मकत्व-सिद्धेः[११]। तवाप्युत्पादनामात्रवाचकत्वसिद्ध्यापि न सकर्मकत्व[१२]सिद्धिः[१३] फलवाचक - त्वसिद्धिं विना।[१४]

स्वार्थफलव्यधिकरणव्यापार[१५]वाचित्वस्यैव तत्त्वात्। "यती प्रयत्न" इत्यस्य फलं नार्थ इति[१६] नानुपपत्तिः। "घटं करोती"त्यत्रापि निर्वर्त्यकर्मत्वान्न यगादेः कर्मकर्तर्यनुप-पत्तिरिति। तस्मात् कृञो[१७] यत्नत्वमेव वाच्यतावच्छेदकमित्यत्र मानाभावः, लाघवस्य पूर्वमेव निरस्तत्वात्।

---

[१] जो2-तेन

[२]अ1, ब1- "नव्य" इत्यधिकं

[३] वा2-यतौ

[४] द7-केवलयत्नमात्रवाच्यतावच्छेदकवादे

[५] के3-प्रागुक्तरीत्या यद् दोषः

[६] अ1- " न " अधिकं

[७] जै-कर्मकरि

[८] के3,के4,अ4-यगाद्यनुपपत्तिः, अ1- यगाद्यनुपपत्तिः बाधिता

[९] त3-वाचित्व

[१०] अ1-वाचकत्व

[११] जै-रूपत्वकर्मकत्वसिद्धेः

[१२]भ1- "सिद्ध्यैव फलव्यधिकरणव्यापारवाचित्वरूपसकर्मकत्वसिद्धेः। तवाप्युत्पादनामात्रवाचकत्वसिद्ध्या-पि न सकर्मकत्व" नास्ति

[१३] त2-"यतो यद्यपि केवलयत्नमात्रवाच्यतावादे" इत्यत्र "वादे" इत्यारभ्य "सिद्धिः" इति यावत् ग्रन्थो नास्ति

[१४] जो2,त1,1900,1915-"।" नास्ति,भ2-फलवाचकत्वसिद्धिं विना न सकर्मकत्वसिद्धिरिति योजना इति टिप्पणी

[१५]भार1,त3- "व्यापार" नास्ति

[१६] त2-"इति" नास्ति

[१७] जै-कृतो

कर्तृस्थभावककर्मस्थभावकयोः विषयभेदं प्रदर्शयितुं शङ्कते – नन्वेवमिति॥ जानात्यादेरिति। आदिना दृश्यते इत्यादि ग्राह्यम्। सकर्मकत्वादिलक्षणोपपत्त्यर्थं फलसहितो व्यापारो धातोरर्थोऽभ्युपेयः। तथा च जानातेः, विषयावच्छिन्नावरणभङ्गविशिष्टो व्यापारोऽर्थो वाच्यः। अन्यथेति॥ फलसहितव्यापारार्थकत्वाभावे। उक्तदोषेति॥ सकर्मकत्वादिविभागोच्छेदरूपदोष इत्यर्थः। विषयावच्छिन्नेति॥ आवरणभङ्गमात्रस्य फलत्वे, मूलावरणभङ्गोऽपि धात्वर्थः स्यादावरणभङ्गत्वाविशेषात्। तथा सति घटं जानातीत्यादौ घटाकारवृत्तिकाले मूलावरणनाशसत्त्वात् मोक्षापत्तिः स्यात्। विषयावच्छिन्नेति विशेषणे तु घटं जानातीत्यत्र घटाकारवृत्त्या घटाद्यवच्छिन्नावरणस्यैव नाशात् न मोक्षापत्तिः, मूलावरणनाशाभावात्। जानात्यादेः कृञादेरिव फलसहितव्यापारार्थकत्वे विनिगमकाभावेन, क्रियते घटः स्वयमेवेत्यादिवत् ज्ञायते घटः स्वयमेवेत्याद्यपि स्यादित्याह - तथा चेत्यादिना॥ तत्रापत्तिं प्रति प्रयोजकमाह – कर्मस्थभावकत्वाविशेषादिति॥ शङ्कापनोदनायाह - निर्वर्त्ये च विकार्ये च इति॥

कर्मवद्भावस्थलविवेकाय कर्मणो भेदं निरूपयति - कर्म त्रिविधमिति॥ निर्वर्तयितुं योग्यं निर्वर्त्यम् , विकर्तुं योग्यम् - विकार्यम्। आद्यं घटं करोतीति॥ घटस्य निर्वर्त्यमानत्वात्। द्वितीयं सोममिति॥ विकृतः सोमो रसः, अतः सोमो विकार्यः। तृतीयं रूपमिति॥ तद्द्वयभिन्नत्वात्। कर्तृस्थभावकत्वपरिचयाय प्राप्यकर्म परिष्करोति – प्राप्यत्वञ्चेति॥ क्रियाकृतो विशेषोऽसाधारणो धर्मः अनुपलभ्यमानो यस्मिन् कर्मणि तस्य भावः । तथा च क्रियाकृतविशेषानुपलभ्यमानत्वे सति फलाश्रयत्वं प्राप्यकर्मत्वम्। तच्च प्राप्यत्वञ्च दृश्यादेरिति। ज्ञादिधातोर्यत्कर्म तस्येत्यर्थः। अन्यथा यथाश्रुते धातूनां प्राप्यत्वाभावादसङ्गतिः स्यात्।

प्राप्यत्वं विस्फोरयति - नह्ययं ग्रामः केनचिद् गत इति॥ ग्राममगच्छत् , ग्राममपश्यत् इत्यादौ कर्मदर्शनेन न कोऽपि विशेषः प्रतीयते इत्यर्थः। न च यत्र नगरादौ राजागमनप्रयोज्यपताकाद्यलङ्करणदर्शनेन गम्धात्वर्थगमनस्य ज्ञातुं शक्यतया गम्यादीनामपि कर्मस्थक्रियत्वापत्तिःइति वाच्यम्। तद्वैलक्षण्यस्य गम्धात्वर्थसंयोगरूपफलाप्रयोज्यत्वात्। तस्मादिति॥ क्रियते घटः स्वयमेवेत्यादौ यगाद्युत्पत्तये इत्यर्थः। फलव्यापारयोरुभयोर्वाच्यत्वे प्रमाणमाह - अत एवेति॥

द्व्यर्थः फलव्यापारोभयार्थकः। फलव्यापारयोरिति विषयत्वं सप्तम्यर्थः। तच्च स्वरूपसम्बन्धविशेष एव। द्व्यर्थः पचिरिति भाष्यस्यार्थान्तरमादायाह – तण्डुलानोदनमिति॥ अस्मिन् पक्षे द्व्यर्थ इत्यस्य विक्लित्तिर्निष्पत्तिश्चेत्यर्थः। ननु द्व्यर्थः पचिरिति भाष्यं पचेर्द्व्यर्थकत्वे मानं न तु धातोः फलव्यापारोभयार्थकत्वे इत्यत आह - पचेः विल्कित्युत्पत्तिद्वयार्थत्वेति॥ पचेरीदृशद्वयार्थकत्वं व्यापारमात्रार्थकत्वेऽनुपपन्नमेव, फलावाचकत्वात्। यदि च फलमपि धात्वर्थस्तदैव निष्पत्तिविक्लित्तिरूपोभयफलवाचकत्वेन अर्थद्वयप्रतिपादकं भाष्यं सङ्गच्छते। पचेर्द्व्यर्थकत्वे बोधाकारमाह - तण्डुलान् ओदनं पचतीत्यत्रेति॥ तण्डुलानित्यत्र "अकथितञ्चे" (पा. 1-4-51)ति कर्मसंज्ञा। तण्डुलानां विकर्तुं योग्यत्वात् विकार्यता। ओदनस्य च निष्पाद्यमानतया निर्वर्त्यत्वमिति भावः। धातोः फलवाचकत्वे मानरूपेणोक्तभाष्यं दार्ढ्यायाह – पचेरिति॥ फलावाचकत्वे इति॥ द्व्यर्थः पचिरिति भाष्योपात्तफलद्वयस्य प्रयोजकौ द्वौ व्यापारौ न त्वेक इति व्यापारद्वयार्थकत्वं पचेरिति मतं खण्डयति - एकस्यैव व्यापारस्येति॥ उभयफलत्वे विक्लित्युत्पत्तिद्वयफलत्वे, द्वयं फलं यस्य व्यापारस्य तत्त्वे। हेतुत्वसम्भवे व्यापारनिष्ठहेतुत्वसम्भवे। फलद्वयं प्रति एक एव व्यापारो हेतुरिति भावः। तस्य फलद्वयस्य जनकत्वं षष्ठ्यर्थः। फलद्वयजनकव्यापारद्वयार्थौ धातुरिति वर्णनस्य प्रतिपादनस्यासम्भवापत्तेः, गौरवादिति शेषः। कृञ इति॥ कारिकास्थ कृञ इति। धातुमात्रेति॥ सर्वेषामपि धातूनां फलसहितो यत्नोऽर्थो न तु व्यापारमात्रमिति भावः। युक्तिः सकर्मकत्वाकर्मकत्वानुपपत्तिरूपा युक्तिः यगाद्यनापत्तिरूपा वा। व्यापारमात्रार्थकत्वे उभयोरप्यनुपपत्तिरिति भावः।

इदानीं कृञोऽकर्मकतापत्तेरिति कारिकांशस्य अन्यथाव्याख्यानं कर्तुर्मतं प्रदर्श्य निरस्यति - यत्तु इत्यादिना॥ नहि यत्नोऽर्थ इत्यंशं व्याख्याति - कृञो न वाच्यतावच्छेदकमिति॥ कृञोऽर्थो यत्नश्चेद् यत्नत्वं वाच्यतावच्छेदकम्। यत्नत्वस्य वाच्यतावच्छेदकत्वाभावे हेतुमाह – अकर्मकतापत्तेरिति॥ फलावाचकत्वे स्वार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वाभावात्। दृष्टान्तमाह - यत्यादिवदिति॥ यथा यत्नमात्रार्थकत्वेन यतेरकर्मकत्वं तथा। दोषान्तरमाह - तथा चेति॥ प्रश्नो जिज्ञासा, उत्तरं विवक्षितार्थप्रतिपादनम्। किं करोतीति प्रश्नः

क्रियाविषयकः, पचतीति तदुत्तरम् क्रियाविशेषविषयकमेव। नात्र प्रश्नोत्तरयोः यत्नविषयकत्वमित्याह – यत्नत्वेनेत्यादिना॥ व्यापारत्वेनैव प्रश्नोत्तरयोरुपक्षीणतया यत्नत्वेन वाच्यतायां प्रश्नोत्तरयोर्न विनिगमकत्वमिति भावः। नैयायिकोक्तं युक्तमिति॥ अत्र न पाठो भ्रष्टः। तथा च नैयायिकोक्तं न युक्तमिति योजना। तथा च यत्नत्वेन यत्नो वाच्य इति यन्नैयायिकेनोक्तं तन्न युक्तमिति भावः इति रीत्या ग्रन्थो योजनीयः। उक्तरीत्या व्याख्यातृमतं खण्डयति - इत्यादि व्याचक्षते तन्नेति॥ यत्तु वादिन इति शेषः। प्रत्याख्यानप्रकारमाह - यतो केवलयत्नमात्रवाच्यतावादे इति॥ यदा हि केवलयत्नमात्रं कृञोऽर्थस्तदा अकर्मकत्वापत्तिरूपो दोषोऽस्तु , किन्तु यत्नत्वस्य वाच्यतावच्छेदकत्वं न सकर्मकत्वापकारकम्, न वा कर्मकर्तरि यगाद्यपहारकम् उत्पत्तिसहितयत्नवाचकत्वपक्षे यत्नत्वस्य वाच्यतावच्छेदकत्वेऽपि सकर्मकत्वाद्युपपत्तेः। तथा च यत्नत्वस्य वाच्यतावच्छेदकत्वं न सकर्मकत्वापहारकमिति भावः। अत्र तेनैवेति एवकारेण व्यापारत्वव्यवच्छेदः। यत्नत्वेनैवेति तदर्थः।

तवापीति॥ यत्तु वादिमते नैयायिकमते वा। उत्पादनामात्रेति॥ मात्रपदेन फलव्यवच्छेदः, फलवाचकत्वसिद्धिं विना इत्यग्रिमग्रन्थस्वारस्यात्। उत्पादनम् यत्नो वा व्यापारो वा। तन्मात्रवाचकत्वेन, न सकर्मकत्वसिद्धिः। तत्र हेतुमाह - फलवाचकत्वसिद्धिं विनेति॥ अत्र आपत्तिरित्थं बोध्या – तवाप्युत्पादनामात्रवाचकत्वसिद्ध्यापि फलवाचकत्वसिद्धिं विना न सकर्मकत्वसिद्धिरिति।

सकर्मक लक्षणमुखेन तन्मतं खण्डयति – स्वार्थफलव्यधिकरणव्यापारवाचित्वस्यैव तत्त्वात्॥इति॥ तत्त्वात् सकर्मकत्वात्। फलावाचकत्वे फले स्वार्थत्वानुपपत्तिरिति बोध्यम्। ननु धातूनां फलव्यापारोभयार्थकत्वे यतेरपि तथात्वेन तद्वयबोधापत्तिरित्यत आह - यतीप्रयत्ने इत्यस्य फलं नार्थ इति॥ वस्तुतः फलावाचकत्वे फलव्यापारयोरिति सिद्धान्तहानिः, सकर्मकत्वन्तु व्यापारस्य स्वार्थफलव्यधिकरणत्वेन विशेषितत्वात्। यतेस्तु फलसमानाधिकरणव्यापारार्थकत्वात् प्राप्यकर्मत्वाच्च न कर्मकर्तर्यापत्तिरिति न कोऽपि दोषः। घटं करोतीति॥ स्पष्टमेतत्। लाघवस्य कृतित्वरूपशक्यतावच्छेदकैक्यरूपस्य निरस्तत्वात्। रथो गच्छतीत्यादौ व्यापारत्वादेर्लक्ष्यतावच्छेदकत्वस्वीकारे तन्मतेऽपि गौरवात्।

**51.** न च कर्तृ[१]जन्यत्वाजन्यत्व[२]प्रतिसंधानात् पटा[३]ङ्कुरयोः कृताऽकृतव्यवहारानुपपत्ति[४]रेव मानम्, "बीजादिनाङ्कुरः कृत" इति तत्रापि व्यवहारदर्शनात्[५]। "रथो गमनं करोती"ति[६] विवरणस्याचेतनेऽपि दर्शनाच्च[७]।

यत्तु[८] व्यापारमात्रस्य कृञर्थत्वे[९] कारकमात्रं कर्तृपदार्थः स्यादिति, तत् तुच्छम्। "स्वतन्त्रः कर्ता" (पा.1-4-54) इति सूत्रोक्तरीत्या धातूपात्तव्यापाराश्रयत्वरूपं स्वातन्त्र्य[१०]मेव कर्तृत्वमिति वक्ष्यमाणत्वेन शास्त्रे[११] कर्तृपदार्थत्व[स्य][१२] प्रायेण[१३] सर्वकारकाणामिष्टत्वात्। लौकिकानां प्रयोगे[१४] च[१५] कर्तेत्यत्र कृञो यत्ने निरूढलक्षणेति च[१६] वदन्ति[१७]। तस्मात् कृञा[१८] विवरणानुरोधान्नाख्यातस्य यत्नमात्रवाचकत्वसिद्धिः। किं च कृञो यत्नमात्र[१९]शक्तिग्रहवत एव तादृश[२०]विवरणप्रश्नौ[२१], न

---

[१] अ1,अ4-यत्न, त1,त5-कृति

[२] जै-जनत्वाजनत्व

[३] के3,अ4-घटा

[४] त1-पत्ते

[५] अ4-व्यवहारात्

[६] त3- "इति" नास्ति

[७] अ1,त1,त5- "च" नास्ति

[८] भ3,द6-यच्च

[९] द4- कृञर्थत्वेन

[१०] जो2- "रूपं स्वातन्त्र्य" नास्ति

[११] जै- "कर्तृत्वमिति वक्ष्यमाणत्वेन शास्त्रे" नास्ति

[१२] द1-कर्तृत्वस्य, "स्य" इति अन्यमातृकासु सर्वासु अस्ति। अत्रैव नास्ति।

[१३] अ4-प्रायशः

[१४] भार1,द1,त1,त3,ब1,1900,द2,द4,के4,1915-लौकिकप्रयोगे

[१५] अ1-स्वतन्त्रः कर्तेत्यत्र "कर्ता" इत्यारभ्य "प्रयोगे च" पर्यन्तं नास्ति

[१६] "च" अन्यत्र नास्ति

[१७] त2-"वदन्ति" नास्ति

[१८] वा2,भार1,जो2,1900-कृञो

[१९] द2-यत्नमात्रे

[२०] जै-एतादृश

[२१] भार1,1900,1915-प्रश्नो

तु व्यापारशक्तिग्रहवत इति न तौ[१] कृतित्वेन[२] वाच्यतायां प्रमाणम्। प्रयोज्य-प्रयोजकवृद्धयो[३]स्तादृशमनादिविवरणं, कृञ एव च[४] प्रश्नोत्तरभावं[५] शृण्वतां बालानां कृतावेव शक्तिग्रहो भवतीत्यपि[६] विना प्रमाणं शपथमात्रपर्यवसन्नमेवेति द्रष्टव्यम्।

## 8.2 पचतीत्यादावपि यत्नत्वप्रकारकबोधनिरूपणम्

कथं तर्हि पचतीत्यत्र यत्नत्वप्रकारकः पाकानुकूलयत्नानुभव इति चेत् - अत्र प्राञ्चः[७] - धातुत्वमेव जातिः शक्तताव‌च्छेदिका। संज्ञाशब्दानां जाति[८]वाचकत्वात्। व्यापारत्वं च वाच्यतावच्छेदकम्[९]। क्वचिद् यत्नत्वप्रकारकबोधस्तु[१०] शक्तिभ्रमाल्लक्षणया वा[११]।

ननु तवाप्येतादृशस्थले लक्षणावश्यकत्वे किं विनिगमकं व्यापारत्वं वाच्यतावच्छेदकमित्यत्रेति चेत्, सत्यम्।[१२] व्यापारत्वस्या[१३]धिकसंग्राहकत्वेन तस्यैवावच्छेदकताया[१४] न्याय्यत्वात्[१५]। अत एव कर्तृजन्यतावच्छेदकं लघ्वपि घटत्वादिकमपहाय[१] कार्यत्वं[२] कल्प्यते[३]। किं चास्माकं यत्नस्यापि व्यापारविशेषत्वेन तल्लक्षणा सर्वथा[४] श्रुत्यर्थात्यागाद् वरम्[५]। भवतां[६] रथादिव्यापारे लक्षणा[७] सर्वथा[८]

---

१ जो2-न कृतौ

२ द1-कृतिवाचित्वेन

३ अ4-प्रसिद्धयो

४ द1,त1,भ1- "च" नास्ति,भ2,द5- "यत्न" इत्यधिकम्

५ भार1,त1,त3,ब1,भ2,द5- "च" इत्यधिकं

६ के4- "अपि"नास्ति

७ अ1- "अत्र प्राञ्चः" नास्ति

८ के3,अ4- "मात्र"अधिकम्

९ ब1-च्छेदकः,द3-वाच्यतावच्छेदिका

१० के4- "अत्र प्राञ्चः" इत्यारभ्य "यत्नत्वप्रकारकबोधस्तु" इति ग्रन्थः नास्ति

११ अ1- "वा" नास्ति

१२ भ1- "शक्तिभ्रमाल्लक्षणया वा[१२]। ननु तवाप्येतादृशस्थले लक्षणावश्यकत्वे किं विनिगमकं व्यापारत्वं वाच्यतावच्छेदकमित्यत्रेति चेत्, सत्यम्।" इति ग्रन्थः "अत्र प्राञ्चः" इत्यस्मात् पूर्वमस्ति

१३ भ1,त5-व्यापारस्या

१४ त1,त5-च्छेदकतायां, जै-च्छेदकतायाम

१५ त्रि-अन्याय्यत्वात्

श्रुत्यर्थत्यागाज्जघन्या[९]। अपि च "दावाग्निर्वनं दहति" इत्यादौ यत्नसंबन्धग्रहं विनापि व्यापारबोधान्न भवद्रीत्या[१०] लक्षणा युज्यते, अज्ञाताया[११] वृत्तेरनुपयोगात्। अन्यथा अगृहीतशक्त्यादिभ्योऽपि बोधप्रसङ्गादिति वदन्ति[१२]।

8.3 व्यापारो भावनेति कारिकायाः कृतित्वं नावच्छेदकमित्यर्थ इति भ्रान्तिनिरासः वस्तुतस्तु कृतित्वमपि शक्यतावच्छेदकम्[१३], तेन रूपेणापि[१४] बोधात्। तथा[१५] फूत्कारत्वादिकमपि। अत एव तत्तद्रूपेणैव[१६] शक्तिरिति प्रागुक्तम्। वक्ष्यते च।

एवं च व्यापारो भावनेति पूर्वोक्तमपि व्यापारोऽपि[१७] वाच्य इत्यभिप्रायकम्, न तु कृतित्वं नावच्छेदकमित्यभिप्रायकमिति भ्रमितव्यम्। तथापि[१८] च यथा[१९] न[२०] नानार्थत्वं तथोक्तं प्राक्।

---

[१] अ1-घटत्वादिकम् अपाय, के3-घटात्वादिकं विहाय
[२] अ1-कार्यत्वादिकं
[३] द4,त्रि-कल्पते
[४] अ1- "सर्वथा" नास्ति
[५] के4- "दैवाद्दत्ते वरः श्रेष्ठे त्रिषु क्लीबे मनाक् प्रिय इति कोशात् वरा इति भवति" इति अधिकम्
[६] त1, -भवतो
[७] त5-रथादिव्यापारलक्षणा, अ4- "लक्षणा"नास्ति
[८] अ4-सर्वरथा
[९] अ4-श्रुत्यर्थत्यागाल्लक्षणा जघन्या
[१०] त1,त3,त5-भवद्रीत्यापि
[११] अ1,द1,त1,1900,1915,म,द4-अगृहीताया
[१२] भ3,द6-"वदन्ति" नास्ति
[१३] अ4- "अपि" इत्यधिकम्
[१४] अ1- "अपि" नास्ति, ब1- "बोधप्रसङ्गात्" इत्यारभ्य "रूपेणापि" इति पर्यन्तं नास्ति
[१५] जै- "च" इत्यधिकं
[१६] त5-तद्रूपेणैव
[१७] अ1- "अपि" नास्ति, त2-"व्यापारोऽपि" नास्ति
[१८] अ1,के3- "अपि"नास्ति
[१९] अ4-यथापि
[२०] अ1,ज1- "न" नास्ति

कृधातोर्यत्नार्थकत्वं साधयन्नाह - न च कर्तृजन्यत्वाजन्यत्वेति॥ अयमाशयः - कृधातोर्यत्नार्थकत्वे एव पटः कृतः इति भवति, पटस्य चेतनकुलालकृतिविषयत्वात् न च भवति बीजादिना अङ्कुरः कृतः, बीजादीनामचेतनत्वेन तत्कृतत्वाभावात्। एवं सति कृधातोर्यत्नोऽर्थः सिद्ध्यति, तेन अङ्कुरः कृत इत्यङ्कुरे कृतत्वव्यवहारो न जायते। तथा च येयं कृताकृतत्वव्यवहारानुपपत्तिः सैव कृधातोर्यत्नार्थकतायां प्रमाणम्।

तदाह – मानमिति॥ अङ्कुरे कृतत्वव्यवहारा-नुपपत्त्या कृञोः यत्नार्थकत्वं यदुक्तं तदुपपत्त्या खण्डयति - बीजादिना अङ्कुरः कृत इति॥ तथा व्यवहारदर्शनेन कृत्यभावेऽपि कृधातोः प्रयोगाद् न कृञो यत्नार्थकत्वमिति भावः। पुनरपि अचेतने कर्तरि कृधातोः प्रयोगमाह - रथो गच्छतीत्यस्य विवरणं रथो गमनं करोतीति। तथा च अचेतनेऽपि कृधातोः प्रयोगान्न कृञो यत्नार्थकत्वम्। यत्नार्थकत्वाभावे दोषमाशङ्कते - यत्तु व्यापारमात्रस्य कृञर्थत्व इति॥ कृधातोर्व्यापारमात्रवाचित्वे कृधातोर्निष्पन्नस्य कर्तृपदस्य व्यापाराश्रय इत्येवार्थः स्यात्। धातुना व्यापारस्य प्रत्ययेन तृचा आश्रयस्योपस्थानात्। तथा च सर्वाणि अपि कारकाणि स्वस्वान्तरक्रियया प्रधानक्रियानिष्पादकानीति स्वस्वव्यापाराश्रयत्वेन सर्वेषामपि कारकाणां कर्तृत्वापत्तिः।इति।

निरस्यति – तत्तुच्छमिति॥ तुच्छत्वे हेतुमाह - स्वतन्त्रः कर्तेति॥ क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्तृसंज्ञः स्यादिति सूत्रार्थः। स्वातन्त्र्यं धातूपात्तव्यापाराश्रयत्वरूपमेव। तथा च धातूपात्तव्यापाराश्रयस्यैव कर्तृसंज्ञा। तथा च कर्तृभिन्नकारकव्यापारस्य धात्ववाच्यत्वेन स्वव्यापाराश्रयत्वेऽपि न कर्तृसंज्ञा धात्वर्थव्यापाराश्रयत्वाभावात्। ननु कर्मकर्तृविवक्षायां स्थाली पचति काष्ठानि पचन्ति, इत्यादिदर्शनेन कारकान्तरस्यापि कर्तृत्वानुपपत्तिरित्यत आह - शास्त्र इत्यादि॥ अयमभिप्रायः - स्वातन्त्र्यमेव धात्वर्थव्यापाराश्रयत्वरूपं कर्तृत्वम् , तच्च स्वातन्त्र्यं विवक्षाधीनम्। यदा हि सौकर्यादिवशात् स्थाल्यादीनामेव स्वातन्त्र्यं विवक्षितं तदा तेषामेव स्वातन्त्र्यात् कर्तृत्वम्। अत एव कौमुद्यां कर्मकर्तृप्रक्रियायामुक्तम् -"स्वव्यापारे स्वतन्त्रत्वात्। नन्वेवं सति स्थाल्यादीनां

धात्वर्थव्यापाराश्रयत्वाभावेन स्वातन्त्र्यानुपपत्तिरिति चेन्न, कर्मकर्तृविवक्षास्थले फूत्कारादेर्धात्वर्थत्वाभावात्, स्वस्मिन् समावेशनादेरेव धात्वर्थत्वात्।

तदाश्रयत्वेन च स्थाल्यादीनां स्वातन्त्र्यरूपकर्तृत्वोपपत्तेः" इति। ननु लोके कृधातुघटितकर्तृपदस्य कृत्याश्रये प्रयोगानुपपत्तिरित्यत आह - लौकिकप्रयोगे इति॥ लोक्यते दृश्यते इति लोकः संसारस्तत्र भवो लौकिकः। प्रयोगात्मकव्यवहारे कृधातोः निरूढलक्षणया यत्ने प्रयोगो न तु शक्त्या, अतो न पूर्वोक्तविरोध इति वदन्ति कृतान्तिनः। तस्मादिति॥ व्यापारस्य धात्वर्थत्व-प्रतिपादनात्। यत्नोऽपि धात्वर्थ एव।

इदानीं कृधातोः विवरणानुरोधेन, प्रश्नोत्तरभावेन च यत्नार्थकत्वस्य यत्किञ्चित्पुरुषवासनाविषयत्वं ब्रूते - किञ्च कृञ् इति॥ अयमाशयः - किं करोतीति कृतिविशेषविषयकः प्रश्नः, पाकं करोतीति पाकानुकूलकृतिविशेषविषयकमुत्तरम्। तेन कृञो यत्नमात्रार्थकत्वं सिद्धम्। प्रश्नोत्तरयोः कृञः प्रवेशात्। विवरणमपि यथा - पचति पाकं करोतीति रूपम्। ताभ्याञ्च कृञो यत्नमात्रवाचकत्वमिति ये मन्यन्ते, ते तादृश शक्तिग्रहवन्त एव। शक्तिग्रहस्य स्वस्वव्युत्पत्त्यनुसारित्वात्। अत एव केचित् व्यक्तौ अन्ये जातावेव शक्तिमभ्युपगच्छन्ति। ये तु व्यापारशक्तिग्रह-वन्तस्तेषां नायं भारः यत्नमात्रशक्तिस्वीकारस्येति भावस्तदाह - न तु व्यापारशक्तिग्रहवत इति॥ विवरणस्य स्वस्ववासनानुसारेणैव अर्थनिर्धारकत्व-मित्याह - न तौ कृतित्वेनेति॥ यत्न एवार्थ इत्यत्र न तौ विवरणप्रश्नौ प्रमाणे। प्रयोज्यप्रयोजकवृद्धव्यवहारबलात् कृञो यत्नार्थकत्वमाक्षिप्य खण्डयति – प्रयोज्यप्रयोजकवृद्धेति॥

अयमाशयः – शक्तिग्राहकेषु प्रयोज्यप्रयोजकवृद्ध- व्यवहारः शिरोमणिः मुख्यः। प्रयोज्यशक्तिग्रहाय प्रयोजकवृद्धेन उक्तं विवरणम् प्रश्नोत्तरभावस्य प्रकारश्च प्रदर्शितः। तेन जातशक्तिग्रहस्य प्रयोज्यस्य प्रवृत्त्या ताभ्याञ्च प्रयोजक-वृद्धव्यवहारप्रयोज्यप्रवृत्तिभ्यां बालकस्य कृञो यत्ने शक्तिग्रहो भवतीति कथनमपि निष्प्रमाणमेव, कृतावेव शक्तिग्रहो नान्यत्र व्यापारादौ इत्यत्र विनिगमकाभावात्।

एतदेवाह - विना प्रमाणं, शपथमात्रपर्यवसन्नमिति। शपथः प्रतिज्ञा तन्मात्रेण पर्यवसन्नम् स्वीकृतम् निश्चितमिति वा। प्रमाणं विना तत्स्वीकारस्याश्रद्धेयत्वम्।

किं करोतीति यत्नप्रश्नस्य पचतीत्युत्तरस्य च सत्त्वेन पचादिधातूनां यत्नार्थकत्वमिति वासनया शङ्कते - कथन्तर्हि इति॥ एतन्मते पाकानुकूलो यत्नः पच्यर्थः। तथा च पचतीति प्रयोगे, यत्नत्वप्रकारको यत्नविशेष्यको बोधो जायते यत्नबोधे यत्नत्वस्यप्रकारतया भानादाह - यत्नत्वप्रकारकेति॥ तथा च यत्नार्थकत्वाभावे तादृशानुभवविरोध इति भावः।

उक्तमतं प्राचीनमतेन मलिनयति - अत्र प्राञ्च इति॥ यत्र वाच्यवाचकभावः तत्र शक्त्यनुगमाय किमपि वाचकतावच्छेदकं वाच्यतावच्छेदकं च वाच्यम्। प्रकृते च फलव्यापारयोरित्युक्तत्वाद् क्रियावचनो धातुरिति भाष्याच्च, धातुत्वमेव वाचकतावच्छेदकं, तच्च धातुत्वं जातिः, जातित्वे प्रमाणमाह – संज्ञाशब्दानामिति॥ भाष्यकृता चतुष्टयीशब्दानां प्रवृत्तिरिति पक्षं संखण्ड्य त्रयीशब्दानां प्रवृत्तेः स्वीकारात्। संज्ञाशब्दानां जातिशब्देष्वन्तर्भाव इति भावः। ननु संज्ञाशब्दस्य जातिशब्दत्वानुपपत्तिः, संज्ञिन एकत्वादिति चेन्न। संज्ञिन एकत्वेऽपि कालभेदेनानेकत्वारोपात्। वाच्यतावच्छेदकञ्च व्यापारत्वम्। तथा च पच्यादिस्थलेऽपि व्यापारत्वमेव शक्यतावच्छेदकम्, न तु कृतित्वमिति भावः।

ननु अयञ्च व्यापारः फूत्कारत्वाधःसन्तापनत्वयत्नत्वादिरूपेण वाच्यः इति प्रारम्भभूषणसारग्रन्थानुपपत्तिस्तत्र यत्नत्वस्याप्यवच्छेदकत्वस्वीकारादित्यत आह – क्वचिदिति॥ शक्तिभ्रम इति॥ व्यापारवाचकत्ववति पच्यादौ यत्नवाचकत्वभ्रमः। यत्नबोधस्याबाधादाह – लक्षणयेति॥ व्यापारवाचकस्य यत्ने लक्षणास्वीकारात्। वस्तुतस्तु धातुत्वेन व्यापारस्य वाच्यत्वेऽपि पच्यादिनिष्ठपचित्वादिना फूत्कारत्वयत्नत्वादिना वाच्यतायां न कोऽपि विरोधः। यत्नत्वप्रकारकेत्यादि खण्डनन्तु यत्नत्वमात्रप्रकारकानुभवस्येति ध्येयम्। क्वचिल्लक्षणया यत्नबोधे लक्षणास्वीकारोक्तिं खण्डयति -ननु तवापीति॥तवापि व्यापारमात्रबोधवादिनोऽपि, एतादृशस्थले यत्नबोधस्थले, तदर्थं लक्षणास्वीकारे किं मानमिति, तव मते व्यापारत्वमेव शक्यतावच्छेदकमित्यत्र च किं मानमिति प्रश्नद्वयमत्र बोध्यम्। समाधानमाह –

चेत्सत्यमिति॥ यत्त्वया प्रमाणं पृच्छ्यते तत्सत्यम्। प्रमाणानुपन्यासे वस्त्वसिद्धेः। विनिगमकमाह – व्यापारत्वस्येति॥ फूत्कारत्वादेरवच्छेदकत्वे अवच्छेदकनानात्वं, व्यापारत्वस्यावच्छेदकत्वे तु व्यापारत्वेन फूत्कारादेरपि संग्रहः। इदमेवाधिकसंग्राहकत्वम्। तथा च तस्यैव व्यापारत्वस्यैव अवच्छेदकतायाः शक्यतावच्छेदकताया औचित्यात्, लाघवेनेच्छाविषयत्वात्। दृष्टान्तद्वारा उक्तमर्थं निगमयति - अत एवेति॥ घटम्प्रति कुलालादिः कर्ता कारणमित्यत्र कुलालत्वेन घटत्वेन च न कार्यकारणभावः, किन्तु कर्तृत्वेन कार्यत्वेनैव कार्यकारणभावः लाघवात्। प्रतिव्यक्ति कार्यकारणभावे गौरवात्। एवमेवात्रापि धातुत्वेन व्यापारत्वेन वाच्यवाचकभावः।

पुनरपि स्वमते लाघवमाह - किञ्चास्माकमिति॥ अस्माकं मते धात्वर्थो व्यापारः। व्यापारपदं यत्नादिसामान्यपरम्। तदाह - यत्नस्यापि व्यापारविशेषत्वेति॥ सामान्यशब्दस्य विशेषपरत्वे लक्षणेति नियमात्। धातुना व्यापारविशेषयत्नबोधे लक्षणैव स्वीकार्या। धातुश्रुत्या व्यापारत्वेन यत्नस्यापि बोधात् यत्नोऽपि सामान्यरूपेण अर्थो भवति। यत्नविशेषे लक्षणायामपि सामान्यरूपेण श्रुतस्य यत्नरूपस्यार्थस्यात्याग इति भावः। यो हि धातोरन्यस्य वा यत्नमर्थं मन्यते, तन्मते रथो गच्छतीत्यादौ सर्वथापि श्रुत्यर्थस्य यत्नस्य धात्वादिवाच्यस्य त्याग इति वरमत्यागपरमस्माकं मतमिति भावः।

अत्र क्वचित्पुस्तके, पूर्वं श्रुत्यर्थत्यागादिति पाठः, अन्ते च श्रुत्यर्थात्यागादिति च पाठः। अयुक्त एव सः। अथवा अपेक्षया इत्याध्याहार्यम्। तथा च श्रुत्यर्थत्यागापेक्षया, श्रुत्यर्थात्यागापेक्षयेति च योज्यम्।

यत्ने लक्षणानुपपत्तिरपीत्याह - अपि च दावाग्निर्वनं दहतीति॥ शक्यसम्बन्धो हि लक्षणेति ते मतम्। यथा गङ्गायां घोष इत्यत्र शक्यप्रवाहसम्बन्धं तीरे गृहीत्वा तीरबोधो लक्षणया। दावाग्निर्वनं दहतीत्यत्र शक्यतया यत्नस्य भानाभावेन व्यापारे यत्नसम्बन्धाप्रतीत्या लक्षणानुपपत्तिः। ननु यत्नवादिमते सर्वधातुषु यत्नप्रतीतिः। यत्र बाधस्तत्र लक्षणा। तथा च दहधातुनोपस्थितस्य शक्ययत्नस्य जन्यत्वरूपसम्बन्धो व्यापारेऽस्त्येवेति शक्यसम्बन्धरूपलक्षणाया

नानुपपत्तिरिति चेदत्रोच्यते - देवदत्तो गच्छतीत्यादौ गम्धातोः चेतनकर्तृकत्वे यत्नोऽर्थः प्रसिद्धः। रथो गच्छतीत्यादौ अचेतनकर्तृकत्वे तद्बाधात् गम्धातुवाच्य-यत्नस्य जन्यत्वसम्बन्धो व्यापारेऽनुभूय लक्षणास्तु, दह्धातुयोगे तु न चेतन-कर्तृकत्वसम्भवः। तस्य सर्वत्रैव अचेतनकर्तृकत्वे एव प्रयोगात्। तथा च शक्यार्थकत्वेन यत्नानुपस्थितेः शक्ययत्नसम्बन्धस्यासम्भव एवेति भावः।

ननु अगृहीतयैव लक्षणया तत्र व्यापारबोधोऽस्त्वित्यत आह - अगृहीताया वृत्तेरनुपयोगादिति॥ गृहीताया एव वृत्तेरुपयोगः। शाब्दबोधफलकत्वम्। अन्यथेति॥ अगृहीताया शाब्दबोधोपयोगित्वस्वीकारे। बोधप्रसङ्गात्। आङ्ग्ल-भाषाशक्तिग्रहाभाववतोऽपि तद्भाषामात्रश्रवणेन बोधप्रसङ्गात्।

सिद्धान्तमाह - वस्तुतस्तु कृतित्वमपीति॥ अत्र धातुत्वेन व्यापार-सामान्यस्य पचित्वादिना फूत्कारत्वयत्नत्वादिना फूत्कारयत्नादेरपि वाच्यता। फूत्कारत्वयत्नत्वाद्यपि शक्यतावच्छेदकमेव। तदाह – फूत्कारत्वादिकमपीति॥ आदिना यत्नत्वादेर्ग्रहणम्। एतदुक्तस्य स्वोक्त्या प्रामाण्यमाह - अत एवेति॥ प्राक् धात्वर्थनिरूपणप्रारम्भे।

ननु यत्नस्य वाच्यत्वे, व्यापारो भावनेति कारिकार्थस्य का गतिरित्याह - व्यापारो भावनेति॥ यत्नसमुच्चयमाह व्यापारोऽपि इति॥ तथा च कृतित्वमपि शक्यतावच्छेदकमेव। ननु फूत्कारत्वयत्नत्वादीनामवच्छेदकानां नानात्वे नानार्थ-त्वापत्तिरत आह - यथा न नानार्थत्वमिति॥ तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकत्वस्य सत्त्वात् न नानार्थत्वमिति तत्रैवोक्तेः।

**52.** एवं च बोधस्य व्युत्पत्त्यनुसारित्वात् तथा व्युत्पन्नस्य कृतित्वरूपेणैव बोधो जायत इति न कश्चिद् दोष इति विभावनीयं सूरिभिः। तस्मात् फलव्यापारयोरिति प्रतिज्ञात [१] फलवाचकत्वसाधनायैव कृञोऽकर्मकतापत्तेरिति [२] ग्रन्थ इति [३] विभावयामः।

---

[१] द7-प्रतिज्ञाते

[२] त्रि - पत्तिरिति

[३] त1,त5-ग्रन्थरीतिरिति, ज1-ग्रन्थं

8.4 कृञोऽकर्मकतापत्तेरित्यादिकारिकाभागस्य प्राचीनप्राभाकरमतखण्डनपरत्वम् अथवा[1] "व्यापारो भावना सैवे"(वै.सि.का.5)त्यादिना साधितमपि विवरणानुरोधेन व्यापारवाचकत्वं[2] {केवलफलवाचकत्वं}[3] केवल[4]फलवाचकतावादिनिरासेन समर्थयितुं तन्मत[5]निरासनाय[6] अयं[7] ग्रन्थः। तथा हि - लडादौ भावना वाच्यैव न, तत्प्रकारकशाब्दबोधस्य विवादग्रस्तत्वात्।

यत्त्वाख्यातस्य यत्नो वाच्यः[8], यत्नार्थककरोतिना विवरणाद्[9], व्यवहारादि[10]वद् बाधकं[11] विना विवरणादपि व्युत्पत्तेः[12], किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेश्च। किं च, फलमात्रस्य धात्वर्थत्वे तस्यैव नामार्थे[13]ऽन्वयः स्यात्[14]। न चेष्टापत्तिः, धात्वर्थप्रातिपदिकार्थयोर्भेदेन[15] साक्षादन्वयस्याव्युत्पन्नत्वात्। अन्यथा[16] "तण्डुलः पचति चैत्र[17]" इत्यादावप्यन्वयो भवेदिति, तन्न। विवरणस्य पाकमित्य[18]शब्दार्थकर्मत्वविवरणवदुपपत्तेः[19]। तथा हि - "चैत्रः पचती"-

---

[1] अ1-अथ

[2] जो2-वाचकत्वे

[3] {केवलफलवाचकत्वं} इत्ययं ग्रन्थः असम्बद्धः अ1 मध्ये अत्र चास्ति, अन्यत्र नास्ति

[4] भ1- "केवल"नास्ति

[5] द4-"तन्मत" नास्ति

[6] अ1,त1,त2,त5-निरासाय, द1-निरसनाय

[7] त2-"अयं" नास्ति, त5-वायं

[8] ब1-"वाच्यैव न" इत्यारभ्य "वाच्यः" इत्यन्तं ग्रन्थः नास्ति

[9] त2-विक्रियमाणार्थकत्वात्

[10] के3,अ4-व्यवहारवत्

[11] द4-व्यवहारादिकं

[12] जो2-व्युत्पत्तिः

[13] भ2-फलस्य चैत्रे अन्वयः स्यादित्यर्थः इति टिप्पणी

[14] भ3-"स्यात्" नास्ति

[15] भ2-चैत्रासमवेतत्वेन फलस्य अभेदान्वयस्तु नास्ति चैत्रे। तण्डुलसमवेतत्वाच्च नाभेदान्वयः इति टिप्पणी

[16] भ2- भेदेनान्वयव्युत्पत्तिस्वीकारे। इति टिप्पणी

[17] त3-"चैत्रः" नास्ति

[18] द7-पाकमित्यत्रा

[19] भ2- तथा च न शब्दार्थो यत्न इत्यर्थः इति टिप्पणी,ज1-पाकमित्यशब्दार्थकत्वम् विवरणवदुपपत्तेः

त्यत्र स्वजनककृति[१] संबन्धेन[२] पाकश्चैत्रे विशेषणम्। तथा च चैत्रः पाकं करोती[३]त्यत्र द्वितीयाख्यातयोरिव कृञोऽपि संसर्ग एवार्थः। अन्यथा[४] द्वितीयया आख्यातेन च कर्मत्वाश्रयत्वयोरपि[५] विवरणात् तयोरपि वाच्यतापत्तेः[६]। कृतित्वादिप्रकारक-बोधस्तु[७] मानस एवोत्तरकालिकः[८]। प्रश्नोऽपि किं करोतीत्यत्र यदि किंशब्दस्य क्रियाविशेषणत्वमादाय कीदृशो[९] यत्न[१०] इत्येवंरूपो[११] यदि वा कर्ममात्रविषयः[१२], उभयथापि न तदुत्तरं यत्नस्याख्यातार्थत्वसाधकम्। पाकवाचक[१३]स्यैव धातोस्त-द्विषयकयत्ने[१४] लक्षणया पाकविषयक इति बोधोपपत्तेः[१५] स्वातन्त्र्येण शक्ति-सिद्ध्यसंभवात्। एवं विधप्रश्नस्यासार्वत्रिकत्वात्। कर्मप्रश्नश्च[१६] पाकमात्रबोधने-नोपपन्नः[१७]। अत एव पाकमित्यपि कादाचित्कमुत्तरं संगच्छते। "तण्डुलः[१८]

---

[१] द2-कृतिमत्त्व

[२] भ2-स्वं-फलं तज्जनिका कृतिः तत्सम्बन्धः चैत्रे इत्यर्थः इति टिप्पणी

[३] भ2-एतच्च पचतीत्यत्र विवरणरूपम् इति टिप्पणी

[४] भ2-न संसर्गो अर्थः किन्तु यत्न एवार्थः कृञः इति चेत् इति टिप्पणी

[५] जो2- अन्यथा आख्यातेन द्वितीयया च आश्रयत्वकर्मत्वयोरपि, वा2- अन्यथा द्वितीयया आख्याते। स्वकर्मत्वाश्रयत्वयोरपि

[६] त5- वाच्यापत्तेः, भ2-कर्मत्वं-फलं, आश्रयत्वं-कृतिः, तथा च फलव्यापारयोरित्यर्थः एवं च वैयाकरणमतमेव सिद्धम् न च फलस्य धात्वर्थत्वसिद्धावपि व्यापारस्य प्रत्ययार्थत्वं सिद्धमिति शङ्क्यम् कृञर्थयत्नस्य प्रत्ययार्थत्वसिद्धेः इति टिप्पणी

[७] अ1- कृतित्वादिप्रकारकशाब्दबोधस्तु

[८] त5-मानस एवौत्तरकालिकः

[९] अ1-किं विषयो

[१०] जै-यत्नात्

[११] भ2-क्रियाप्रश्न इत्यर्थो अत्र बोध्यः इति टिप्पणी

[१२] भ2-कर्म च स्मरति पर्यवसन्नम् इति टिप्पणी

[१३] अ1-पाचक

[१४] जो2- "यत्ने" नास्ति

[१५] ज1-पाकमात्रबोधने चोपपत्तेः

[१६] भ1- "च"नास्ति,भ2- क्रियाप्रश्नस्य यत्नशक्त्यसाधकत्वमुक्तम् कर्मप्रश्नस्यापि तदाह इति टिप्पणी

[१७] भ2,द5-बोधने नानुपपन्नः

[१८] अ1-तण्डुलं

पचती"त्यादौ [1] तण्डुलप्रकारक[2] पाकविशेष्यकबोधापत्तिरूपं बाधकं [3] विशेष्यतासंबन्धेनाभेदातिरिक्तसंसर्गकप्रातिपदिकार्थप्रकारकबोधे निपातसुबादिजोपस्थिते [4] र्विषयतया हेतुत्वकल्पनेनैव नास्तीति कृति[5]संसर्गकचैत्रादिविशेष्यकबोधे न दोषः।

---

सहानुभूत्यात्मानमुपस्थापयति – एवञ्चेति॥ यथा प्रथमान्तार्थमुख्यविशेष्यको बोधो नैयायिकनये, भावनामुख्यविशेष्यको बोधो मीमांसकमते, स्वस्वव्युत्पत्त्यनुसारित्वात्। तथैव यत्नत्वरूपेणैव यस्य बोधव्युत्पत्तिस्तस्य तथैवास्तु बोधस्य व्युत्पत्त्यनुसारित्वात्। तथा व्युत्पन्नस्य यत्नबोधव्युत्पन्नस्येत्यर्थः। न कश्चिद् दोषः इति॥ दोषाभावो रुचीनां नानात्वात्। युक्तायुक्तत्वविचारे तु दोषोऽस्त्येवेति बोध्यम्। कृञोऽकर्मकत्वापत्तेर्नहीति कारिकया यदुक्तम् तस्य फलवाचकत्वे हेतुत्वमिति स्वाभिप्रायं प्रस्तौति – तस्मादित्यादिना॥ तस्मात् व्यापारवाचकत्वस्यान्यथैव सिद्धेः। तत्सिद्धौ न अकर्मकत्वापत्तिर्हेतुरिति भावः। फलवाचकत्वे तु अकर्मकत्वापत्तिरेव हेतुरिति ग्रन्थाशयः।

व्याख्यानान्तरमाह – अथवेति॥ व्यापारो भावनेति॥ उक्तकारिकांशोऽयम्। तद्व्याख्यानस्य प्रस्तुतत्वात्। विवरणानुरोधेनेति॥ पचति पाकमुत्पादयति पाकानुकूला भावनेत्यादिविवरणेत्यर्थः। तेन च धातोर्व्यापारवाचित्वं साधितं तत्रैव कारिकाव्याख्याने केवलफलवाचकतावादिनः नैयायिकमीमांसकाः, तेषां मतस्य निरासेन निराकरणेन समर्थयितुं विवरणसिद्धं व्यापारवाचित्वं साधयितुं, तन्मतस्य नैयायिकादिमतस्य निरासायायं ग्रन्थः, कृञोऽकर्मकतेति कारिकाग्रन्थः। तथा हि - लडादौ भावनेति॥ लडादौ, आदिपदेन लिडादिर्गृह्यते। लडादेर्न भावना वाच्या। हेतुमाह –तत्प्रकारकशाब्दबोधस्येति॥ यस्य नैयायिकस्य मते आख्यातार्थो भावना। तन्मते आख्यातार्थप्रकारकप्रथमान्तार्थमुख्यविशेष्यको

---

[1] अ1-त्यत्र

[2] अ1- "कर्मतासंसर्गक " अधिकं-

[3] ज1-बोधोपपत्तिरूपबाधक , त्रि – बोधापत्तिरूपं वाचकं

[4] अ1-सुबादेरुपस्थिते, भार1,जो2,त3,के3,के4,1915,अ4-सुबादिजन्योपस्थिते, ब1-स्वादिजन्योपस्थिते

[5] अ1- "कृति" नास्ति

बोधः। स च विवादग्रस्तः, अन्यैः भावनाविशेष्यकबोधस्य स्वीकारात्। धातो-र्व्यापारवाचित्वमाक्षिपति - यत्त्वित्यादिना। आख्यातपदं तिङ्परम्। तदर्थो यत्नः। करोतेर्यत्नोऽर्थः सर्वसिद्धः। तथा च पचतीत्यत्र पाकं करोतीति करोतिना आख्यातस्य विवरणेनाख्यातस्य यत्नोऽर्थः, विवरणस्य विव्रियमाणार्थ-निर्णायकत्वात्।

विवरणस्यापि व्युत्पादकत्वमाह – व्यवहारादिवदिति॥ व्यवहारः प्रयोज्य-प्रयोजकवृद्धव्यवहारो यथा शक्तिग्राहकस्तथा विवरणमपि शक्तिग्राहकम्, शक्तिग्राहकेषु विवरणस्यापि पाठात्।

तथा चोक्तम् -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

बाधकं विनेति॥ "भूवादि" (पा.1.3.1)सूत्रस्थभाष्यादिविरोधरूपबाधकसत्त्वे करोतीति विवरणं नाख्यातस्य किन्तु धातोरेव, तथा च वक्ष्यते तस्मात् करोति-र्धातोः स्याद् व्याख्यानं न त्वसौ तिङामिति मत्वाह - बाधकं विनेति॥ अयन्तु बाधकाभावेनाख्यातस्यैव विवरणं मन्यते। प्रश्नोत्तरयोः समानविषयकत्वेनापि यत्नार्थकत्वं साधयन्नाह - किं करोतीति यत्नप्रश्ने इति॥ पचतीत्युत्तरस्यापि यत्न-विषयकत्वं वाच्यम्, प्रश्नस्य यत्नविषयकत्वात्। अयञ्च प्रश्नोत्तरभावः, आख्यातस्य यत्नार्थकत्वे एव सम्भवतीति प्रश्नकर्तुराशयः। तदाह - यत्नार्थकत्वं विनानुप-पत्तेश्चेति॥

किञ्च फलमात्रस्य धात्वर्थत्व इति॥ फलमात्रस्य धात्वर्थत्वे, तस्यैव - फलस्यैव नामार्थे ग्रामादावन्वयः स्यादिति। उपस्थितौ तत्रान्वयोऽस्त्वित्यत आह - न चेष्टापत्तिरिति॥ इष्टापत्तौ बाधकमाह – धात्वर्थप्रातिपदिकार्थेति॥ धात्वर्थश्च प्रातिपदिकार्थश्च तयोः। भेदेन भेदसम्बन्धेन साक्षादन्वयोऽव्युत्पन्न इति नियमा-कारः। प्रत्ययार्थद्वारा अन्वयस्य स्वीकारेणाह – साक्षादिति॥ नियमास्वीकारे दोषमाह – अन्यथेति॥ तण्डुलः पचतीति॥ अत्र तण्डुलस्य पाके साक्षादन्वये तण्डुलः पचतीत्यापत्तेः। नियमस्वीकारे तु न दोष इति भावः। तण्डुलमिति द्वितीयार्थद्वारैवान्वय उचितः। तन्न। विवरणस्येति॥ पचतीत्यस्य विवरणम् पाकं

करोतीति। अमा कर्मत्वविवरणम् न तावत् शब्दार्थविवरणं पचतीति विव्रियमाणे कर्मत्ववाचकशब्दाभावात् तथा चाशब्दार्थस्यापि विवरणदर्शनात्तस्य शक्तिनिर्णायकत्वाभावस्तदाह - विवरणस्य पाकमित्यशब्दार्थकर्मत्वेति॥ उपपत्तेः शब्दार्थनिर्णायकत्वाभावसिद्धेः। तथाहीति॥ विवरणस्यानिर्णायकत्वादेवेत्यर्थः। चैत्रः पचतीति॥ धात्वर्थः पाकस्तस्य चैत्रेऽन्वयः। सम्बन्धमाह – स्वजनककृतिसम्बन्धेन॥ स्वं पाकस्तज्जनिकाकृतिश्चैत्रे। तद्वत्त्वं सम्बन्धश्चैत्रे। ननु कस्येदं मतम् नैयायिकस्य वैयाकरणस्य वा। नाद्यः, तस्य पूर्वं निरस्तत्वात्। नापि द्वितीयः तन्मते चैत्रादेरप्राधान्येन कृतेस्तत्रान्वयाभावात्। अत्राह - बुद्धिस्थत्वेन नैयायिकमतस्य प्रस्तुतत्वात् यद्वा वैयाकरणमतेऽपि चैत्रस्य कृतौ अन्वये फलतः कृतेरपि चैत्रेऽन्वय इत्यस्य वक्तुं शक्यत्वात् समाधानम्[1]। विवरणेन कृतेर्न वाच्यतया भानम् किन्तु संसर्गतयेति। विवरणवशात् यत्नार्थकत्ववादिमतं निरस्तमित्यभिप्रायवानाह - तथा च चैत्रः पाकमिति॥ द्वितीयार्थः कर्मत्वं, आख्यातार्थः आश्रयत्वम् उभावपि संसर्गौ तथैव कृञोऽपि संसर्ग एवेति भावः। अन्यथा द्वितीययाख्यातेनेति॥ संसर्गतया तत्प्रतीत्यभावे विवरणवशात् कर्मत्वस्य आश्रयत्वस्य च वाच्यतापत्तेः। विवरणे द्वितीयादिश्रवणात्। ननु पचतीत्यादौ कृतेर्बोधानुपपत्तिरत आह – कृतित्वादिप्रकारकेति॥ मानसो न तु शाब्दबोधः। उत्तरकालिकः शाब्दबोधोत्तरकालिकः।

ननु किं करोतीति यत्नप्रश्नस्योत्तरेण पचतीत्यात्मकेन यत्नार्थकत्वं साधितमेवेत्यत आह - किं करोतीत्यत्रेति॥ किं करोतीति प्रश्नस्य स्वरूपं निर्वक्ति - किं शब्दस्येति॥ क्रियाविशेषणत्वे, यत्नस्य क्रियारूपत्वेन तत्रैव जिज्ञासाविषयत्वस्य किमर्थस्यान्वयः। तथा च कीदृशो यत्न इति क्रियाविषयकत्वं प्रश्नस्य अवगतम्। यदा करोतीत्यस्य सकर्मकत्वेन किमित्यनेन कर्माकाङ्क्षा तदा कर्मविषयकत्वं प्रश्नस्य आयाति। तथा च तदुत्तरवाक्येन पचतीत्यादिना यत्नस्याख्यातवाच्यत्वं साधयितुं न शक्यम्। तदेवोपपादयति – पाकवाचकस्यैवेति॥ धातुनैव यत्नबोधस्येष्यमाणत्वे, पाकवाचकधातोरेव तत्रार्थे लक्षणा, तयैव च पाकविषयको यत्न इति बोधसम्भवात्। शक्त्या यत्नार्थकत्वपरत्वमसिद्धमेव। तदाह – स्वातन्त्र्येणेति॥ लक्षणासहकार-

---

[1] वस्तुतः नात्र विमृश्यमानं नैयायिकमतं वैयाकरणमतं वा। किन्तु प्राचीनप्राभाकरमतम्। द्र. 52,53,54 खण्डानां प्रकाशटिप्पणी।

मनपेक्ष्यैव । शक्तिसिध्यसंभवादिति॥ विवरणद्वारेति शेषः। इदानीं प्रश्नस्य स्वारसिकत्वं खण्डयति – एवंविधप्रश्नस्येति॥ कादाचित्कत्वादिति॥ कादाचित्कत्वेन प्रश्नोत्तरयोर्नार्थसाधकत्वम्। यो हि सार्वत्रिकः स एव साधकः, अन्यस्य तु न साधकत्वमन्यथासिद्धिदोषग्रस्तत्वात्। ननु कर्मप्रश्नस्य तु सकर्मकस्थलेऽस्ति सार्वत्रिकत्वं, तेनैवास्तु वस्तुसिद्धिरित्यत आह – कर्मप्रश्नस्त्विति॥ पाकं करोतीत्युत्तरेणेत्यर्थः।

ननु कर्मप्रश्ने पाकमित्यस्य बोधनेन कथं कर्माकाङ्क्षानिवृत्तिः तदाह - अत एवेति॥ कर्मविशेषाकाङ्क्षायाः सत्त्वादेव कादाचित्कत्वम्। यदा यस्य कर्मविशेषस्याकाङ्क्षा तदा तस्योत्तरम्। तेन कर्मविशेषविषयकस्योत्तरस्य कादाचित्कत्वम्।

इतः पूर्वं किञ्चेत्यादिना फलमात्रं धात्वर्थः, विवरणादिना यत्नोऽर्थः आख्यातस्येति नैयायिकमतं प्रसक्तम्। तस्य तण्डुलः पचतीति प्रयोगापत्तिरूपबाधकोपन्यासपुरस्सरं खण्डनं कृतम्। प्रश्नोत्तरभावस्य चासाधकत्वमुक्तम्। व्यञ्जनया वैयाकरणमतं सिद्धम्, ततश्च पुनरपि सिंहावलोकनन्यायेन नैयायिकः स्वमतं स्थापयति - तण्डुलः पचतीत्यादौ इति॥ फलमात्रस्य धात्वर्थत्वे क्रमशो यः तण्डुलः पचतीत्यापत्तिरूपो दोषो दत्तः स नास्त्येव।

अभेदातिरिक्तेति॥ भेदसंसर्गेत्यर्थः। तथा च विशेष्यतासंबन्धेन भेदसंसर्गकप्रातिपदिकार्थप्रकारकबोधम्प्रति निपातसुबादिजन्योपस्थितिर्विषयतया हेतुरिति कार्यकारणभावः स्वीक्रियते। राजा पुरुष इत्यत्र विशेष्यतासंबन्धेन निपातसुबादिजन्योपस्थित्यभावेऽपि नामार्थप्रकारकबोधदर्शनेन व्यभिचारवारणाय कार्यकारणभावे अभेदातिरिक्तसंसर्गकेति विशेषणम्। तथा च राजा पुरुष इत्यत्र अभेदसंसर्गकबोधस्यैव सत्त्वेन न व्यभिचारः। तथा च तण्डुलः पचतीत्यत्र तण्डुलादिप्रातिपदिकार्थप्रकारकाभेदातिरिक्तसंसर्गकबोधापत्तिर्नास्ति। तत्र विषयतया निपातसुबादिजन्योपस्थितेरभावात्। एवं सति कृतिसंसर्गकचैत्रादिविशेष्यके बोधे न दोषः, तण्डुलः पचतीति प्रयोगापत्तिरूपबाधकस्योक्तरीत्या निरस्तत्वात्।

**53.** न च धात्वर्थप्रकारकबोधस्य कर्मादि[१] रूपनामार्थेऽभावाद्धात्वर्थप्रकारकबोधे तिङादि[२]जन्योपस्थितेर्हेतुत्वं कल्पनीयम्। तथा च न चैत्रे तदन्वय[३] इति वाच्यम्, धात्वर्थप्रकारकबोधे प्रथमान्तजन्यो[४]पस्थिते[५]रेव लाघवेन हेतुत्वात्[६]। अन्यथा धात्वर्थप्रकारकबोधे तिबादिजन्योपस्थितिर्विषयतया[७] हेतुः,आख्यातार्थभावना-प्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति[८] कार्यकारणभावद्वयमाख्यातस्य शक्तिश्च कल्प्येत्यतिगौरवं स्यात्। तस्मान्न कर्त्राख्यातस्य कृतिः, कर्माख्यातस्य[९] फलं वाच्यम्। जानातीत्यादा[१०]वाश्रयत्वं लक्ष्यमिति[११] युक्तम्[१२]।

न च पचतीत्यादा[१३]वाख्यातस्य भावनावाचकत्वग्रहवतः पाकानुकूलकृतिमानिति बोधाद्धा[१४] त्वर्थप्रकारकबोधे तिङाद्युपस्थितिर्हेतुः[१५] क्लृप्तेत्याख्यातार्थः कृतिरिति वाच्यम्।{एवं ह्याख्यातार्थः कर्तेति ग्रहवत आख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातार्थः कृतिरिति वाच्यम्।}[१६] एवं ह्याख्यातार्थः[१७] कर्तेति ग्रहवत आख्यातार्थसंख्याप्रकारकबोधं प्रत्याख्यातजन्योपस्थितेर्हेतुत्वस्य क्लृप्तत्वेन

---

[१] अ4-कर्मत्वादि

[२] भ2,द1,त3,के4,त2,त5-तिबादि

[३] जो2- "न चैत्रे तदन्वय" इत्यस्य " चैत्रे न तदन्वय " इति

[४] अ1,द1,त5,द5-प्रथमान्तपदजन्य

[५] के4-पस्थिति

[६] जो2- "लाघवेन हेतुत्वात्" इत्यस्य " हेतुत्वं लाघवात् " इति

[७] के4- "विषयतया"नास्ति,ज1-जन्योपस्थितिविषयतया

[८] जो2-स्थितिःकारणमिति

[९] त2-"कृतिः, कर्माख्यातस्य" नास्ति, त्रि-"स्य" नास्ति

[१०] जै-जानात्यादा

[११] अ1- "न " अधिकं-

[१२] त5,ब2-लक्ष्यमित्युक्तम्

[१३] वा2-पचत्यादा

[१४] द2-बोधाय धा

[१५] जो2- "हेतुः" नास्ति,त2-तिबाद्युपस्थितिर्हेतुः

[१६] {} एतत्कोष्टकान्तर्गतः पाठः अन्यत्र नास्ति, असंबद्धश्च

[१७] त2-"कृतिरिति वाच्यम्। एवं ह्याख्यातार्थः" नास्ति

कर्तृ[१] कर्मणोरप्या[२] ख्यातवाच्यताङ्गीकारापत्तेः[३]। कृतिफलयोः शक्तिकल्पना - गौरवमधिकमिति[४] चेत्, कर्तृकर्मणोः शक्तिकल्पनागौरवं तवाप्यधिकमिति तुल्यमिति[५] दिक्।

---

तटस्थो मीमांसको वा शङ्कते - न च धात्वर्थप्रकारकेति॥ धात्वर्थः फलम्, यत्तु इत्यादिना तस्यैव प्रस्तुतत्वात्। तण्डुलः पचतीत्यत्र नामार्थे तण्डुले धात्वर्थ-फलान्वयवारणाय त्वया यः कार्यकारणभाव उक्तः, स न कार्यः। नामार्थे धात्वर्थप्रकारकबोधोऽसम्भवी। अतस्तद्वारणाय कार्यकारणभावस्यानावश्यकत्वात्। तिङर्थो भावना धात्वर्थः फलम्। तत्प्रकारकतिङर्थभावनाविशेष्यक-बोधस्यानुभवसिद्धत्वेन तदर्थं धात्वर्थप्रकारकबोधम्प्रति तिङादिजन्योपस्थितेः कारणत्वं स्वीक्रियताम्। तथा चानेनैव कार्यकारणभावेन तण्डुलः पचतीति प्रयोगापत्तिरपि नास्तीति किमर्थं सः कार्यकारणभावः किमर्थं च तादृशो बोध इति भावः।

प्रथमान्तार्थविशेष्यकबोधवादी नैयायिकः पुनराशङ्कते – धात्वर्थप्रकारक-बोधे इति॥ प्रथमान्तार्थे धात्वर्थप्रकारकबोधस्य स्वीकारात्। स्ववासनया दोषमाह – अन्यथेति॥ उक्तकार्यकारणभावास्वीकारे। तण्डुलः पचतीति वारणाय तिबादि-जन्योपस्थितेः आख्यातार्थभावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितेश्च कारणत्वस्वीकारे कार्यकारणभावद्वयं स्वीकार्यम्। अतिगौरवमपि भावनाया-माख्यातस्य शक्तिकल्पनाप्रयुक्तम्।

सुन्दोपसुन्दन्यायेन नैयायिकमीमांसकद्वयस्य मतं निरस्तं मत्वाह – तस्मादिति॥ मतद्वयस्य परस्पराघातेन निरस्तत्वात्।न कर्त्राख्यातस्य कृतिरिति॥ कर्तरि यदाख्यातम् तस्य कृतिः, कर्मणि यदाख्यातं तस्य फलम्, आख्यातस्य यत्नार्थकत्वं त्यक्त्वा जानातीत्यादौ आश्रयत्वे लक्षणाश्रयणञ्च न युक्तमित्यन्वयः।

---

[१] द2-"कर्तृ"नास्ति

[२] जो2-"अपि" नास्ति

[३] त2-"कर्तृकर्मणोरप्याख्यातवाच्यताङ्गीकारापत्तेः" नास्ति

[४] वा2,त1,जो2,1900-गौरवमिति

[५] त1-"तुल्यमिति" अस्य स्थाने "तु विभाव्यमिति" इत्यस्ति

काचित्कानुभवबलात् स्वमतं स्थापयति - न च पचतीत्यादौ इति॥ आख्यातं भावनायां शक्तमिति यस्य शक्तिग्रहः, प्रथमान्तार्थस्यैव प्राधान्यमिति यस्याग्रहश्च तस्य पाकानुकूलकृतिमानिति बोधो जायते। तस्य मते धात्वर्थफलस्यानुकूलत्व-सम्बन्धेन तिङर्थभावनायां (यत्ने)अन्वयोऽनुमतः। तदर्थञ्च धात्वर्थप्रकारकबोधे तिङाद्युपस्थितेर्हेतुत्वं क्लृप्तमिति तादृशबोधसिद्ध्यर्थं आख्यातस्य कृतिरर्थः स्वीकार्य इति न चेत्यादिग्रन्थाशयः। तुल्यन्यायाद् वैयाकरणस्तन्मतमवमानयति - एवं हीति॥ यस्य आख्यातं कर्तरि शक्तमिति शक्तिग्रहः, आख्यातार्थसंख्यायाश्च तादृशकर्तरि अन्वयग्रहश्च, तन्मते आख्यातार्थसंख्याप्रकारकबोधम्प्रति आख्यातजन्यकर्तृकर्मपस्थितेर्हेतुत्वस्य क्लृप्तत्वेन कर्तृकर्मणोरपि आख्यातशक्तेः स्वीकारापत्तेर्वज्रलेपायितत्वात्।

ननु त्वन्मते आख्यातस्य कर्तृकर्मवाचकत्वे तद्द्वयशक्तिकल्पनाधिक्य-मित्याह - न चेति॥ गौरवमिदं त्वन्मतेऽप्यस्तीत्याह - इति चेत्कृतिफलयोरिति॥ तव मतेऽपि कर्त्राख्याते कृतौ कर्माख्याते फले च शक्तिकल्पने तुल्यमेव।

### 8.5 पार्थसारथिमिश्रमतानुवादः, विमर्शश्च

**54.** यत्तु[१] पार्थसारथिमिश्राः[२]42 भावनायाः सर्वत्रावाच्यत्वे वाजपेयाधिकरण(मी.1-4-6)मसंगतं स्यात्। तथा हि "वाजपेयेन स्वाराज्यकामो यजेत, उद्भिदा यजेत पशुकामः" इत्यादिसर्वे[३]षु[४] वाक्येषु गुणविधिः कर्मनामधेयता[५] वेति संशये यजेतेत्याख्यातं गुणफलाभ्यां[६] तन्त्रेण[७] संबन्धुं[८] क्षमते, नातो मत्वर्थलक्षणादि नामधेयत्वसाधकम्, अतो गुणविधित्वमेव।

---

[१] त2-"यत्तु" नास्ति, पार्थसारथिमिश्रास्तु

[२] भ2-आहुरित्यनेनान्वयः इति टिप्पणी

[३] के3- "सर्वे"नास्ति

[४] अ4-इत्यादिषु

[५] के3,त2-कर्मनामधेयम्,के4-कर्मनामधेयत्वं, द7- कर्मनामता

[६] भ2-वाजपेयरूपो गुणः स्वाराज्यं फलं इति टिप्पणी

[७] भ2-सकृदुच्चारितमनेकोपकारकं तन्त्रम् इति टिप्पणी

[८] ब1,1915-संबद्धुं

तथाहि - यजेतेत्यत्र यागस्य भावनायां यदि कर्मत्वेन संबन्धः तदा साध्यद्वयासमवायान्न[१] फलं संबध्येत[२]। यदि करणत्वेन, तदा करणद्वयासमवायान्न[३] गुणः संबध्येत[४]। न चाख्यातेन कर्मत्वं करणत्वं[५] वोच्यते[६], तद्वाचकपदाभावात्। तथा च यथा[७] भावना कर्मत्वकरणत्वादिरूपभेदमन्तरेण साध्यादिभिः संबध्यत इदमनेनेत्थं कुर्यादिति, तथा यागोऽपि करणत्वादिरूपमाना(मना)[८]दृत्यैव गुणफलाभ्यां संबध्यत[९] इति न मत्वर्थलक्षणेति शङ्का[१०]।

राद्धान्तस्तु[११] भावना हि क्रियारूपा करणत्वादिकमनादृत्य संबध्यताम्, यागस्त्वक्रियारूपः कथमिव कारकरूपैर्गुणादिभिः संबध्येत? तस्मादसौ भावनाद्वारेणैव[१२] गुणफलाभ्यां सम्बध्यत[१३] इति वक्तव्यम्। तथा सति फलस्य साधनापेक्षत्वात्[१४] गुणस्य साध्यापेक्षत्वात्[१५] तत्तदवच्छिन्न[१६]भावनान्वयाय कर्मात्मना करणात्मना वा[१७] यागः प्रतिपादनीय इत्यावृत्त्यापत्तिः।

---

[१] भ2-साध्याकाङ्क्षायाः निवृत्तत्वात् इति टिप्पणी

[२] त्रि-फलं करणाकाङ्क्षया निवृत्तत्वात् साध्याकाङ्क्षायाः निवृत्तत्वात् सम्बध्यते।,1915-संबध्यते

[३] भ2-करणाकाङ्क्षायाः निवृत्तत्वात् इति टिप्पणी

[४] 1900-संबध्यते, अ4- गुणगणः संबध्येत

[५] जै-कारणत्वं

[६] अ1,1900,के3,भ2,1915-चोच्यते

[७] जै-तथा

[८] "मनादृत्यैव" इत्येवअन्यसर्वमातृकासम्मतः पाठः,शुद्धश्च

[९] ज1-सम्बध्येत

[१०] के4- "शङ्का" नास्ति

[११] के3,त1,द4,त5,अ4-सिद्धान्तस्तु

[१२] जो2-भावनारूपेण द्वारेणैव

[१३] त5-सम्बध्येत

[१४] वा2,भ2-साधनापेक्ष्यत्वात् ,अ4-साधनापेक्षित्वात्

[१५] वा2,भ2-साध्यापेक्ष्यत्वात्, जो2,त2- "गुणस्य साध्यापेक्ष्यत्वात्" नास्ति

[१६] जो2,1900,त्रि,द6-तदवच्छिन्न,ब3-"तत्तत्" नास्ति

[१७] के3-च,द3-भावन,अ4-वा

एवं[१] गुणत्वप्रधानत्वविधेयत्वानुवाद्यत्वोपादानत्वो[२]द्देश्यत्व[३]कृतमपि वैरूप्यं वारयितुं तदापत्तिः। तस्माद् गुणविधिपक्षे मत्वर्थलक्षणाऽऽवृत्तिर्वा स्यात्। तद्वरं वाजपेयं सुरा[४]द्रव्यमस्मिन्निति सुराग्रह[५]विधानात् तत्प्रख्यन्यायेन[६] नामधेयतेति स्थितम्।

भवन्मते च "काष्ठैः पचती"त्यादिषु भावनाभावाद् धात्वर्थेनैव कारकाणां संबन्धात् क्रियारूपत्वं धात्वर्थस्याभ्युपेयम्। तथा च स्वरूपेणैव धात्वर्थः[७] कारकसंबन्धमर्हतीति विनैवावृत्त्या यज्यभिहितेनैव[८] रूपेण साध्यसाधनाभ्यां संबध्यत[९] इत्यधिकरणमिदमनुपपन्नं स्यात्। न चोद्देश्योपादानादिकृतमपि वैरूप्यम्, गुणविशिष्टयागविधानात्। नापि मत्वर्थलक्षणा[१०], कारकविभक्त्यैव श्रुत्या[११] क्रियारूपधात्वर्थसंबन्धसिद्धेः।

किं च, धात्वर्थ एव कारकाणामन्वये "काष्ठैः पचती"तिवत् "काष्ठैः पाक" इत्यपि स्यात्। अपि च लडादिभिरपि कर्मनामधेयानां करणार्थतया समभिव्याहारो दृश्यतेऽनुवाद[१२]वाक्ये[१३]। "वाजं वैषोऽवरुरुत्सते यो वाजपेयेन यजत[१४]" इति। राजसूयेन यजते, योऽश्वमेधेन यजत" इति च[१५]। इदं च[१] धात्वर्थस्यैव करणाद्यन्वये

---

[१] अ1,अ4-एवं च

[२] त1-नुवादत्वोपादानत्वो, 1900-नुवाद्यत्वापादानत्वो, अ1,त3-नुवाद्यत्वोपादेयत्वो,के4,अ4-उपादेयत्व,त2-"उपादानत्व" नास्ति

[३] अ1-उद्देश्य, जो2- नुवाद्यत्वोद्देश्यत्वोपादानत्व

[४] अ4-सुर

[५] 1900,त्रि-सुराद्रव्य

[६] अ1-तत्प्रत्याय्यन्यायेन,भ2-तस्य गुणस्य प्रख्यापकम् अन्यद्वर्तते चेत् कर्मनामधेयता न गुणविधिरिति व्याचक्षते इति टिप्पणी

[७] ज1-धात्वर्थे

[८] ज1-विनावृत्त्याभिहितेनैव

[९] ज1-सिध्येत्

[१०] त1,त5-मत्वर्थलक्षणया

[११] अ4-श्रुत्यादि

[१२] द1-ऽनुवाद्य

[१३] अ4-....वाक्ये च

[१४] जै,के4-यजेतेति

[१५] ज1-यो राजसूयेन यजते इति वा।, अ4-"च"नास्ति

न[२] युज्यते। न हि स्वस्यैव स्वं प्रति करणत्वमिति। यथा च[३] वैदिक-वाक्यालोचनेनापूर्वं शब्दार्थ इत्यभ्युपेयते[४], तथैवाभ्युपगम्यतां भावनापि सर्वाख्या-तवाच्यैवेति प्राहुः[५]।

अत्रेदमवधेयम्[६] - भावनाया अवाच्यत्वमते फलमात्रमर्थ[७] इति फलितम्। तत्रै[व] च[८] करणादीनामन्वयः। तथा च "काष्ठैः पचती"त्यादौ काष्ठजन्यः पाक इति बोधः। इदमेव च[९] धात्वर्थस्य क्रियात्वम्, यत् कारकान्वयित्वम्। एवं च धात्वर्थनिरूपितं साध्यत्वं क्वापि विध्यतिरिक्तवाक्ये न बोध्यते। "तण्डुलं पचती"त्यत्रापि वक्ष्यमाण-रीत्या[१०] कर्मशक्तिर्द्वितीयार्थः,न तु साध्यत्वमिति न धात्वर्थ[११]साध्यत्वं प्रतीयते। एवं च विधिवाक्यार्थे कार्ये[१२] विशेषणीभूत[१३]कृतौ यागस्य विषयितयान्वयात्[१४] तत्रा[१५]न्वयितावच्छेदकतया करणत्व[१६]मौपादानिक[१७]प्रमाणादुपस्थितं शाब्दबोधे भासते, वाजपेयादिगुणनिरूपितं[१८] साध्यत्वं चेति वैरूप्यं[१९] स्यादिति

---

[१] अ1-इत्थं च, ब1- "इदं च" नास्ति

[२] त2-करणाद्यन्वयो न

[३] अ1,भार1,द1,त1,त3,जै,1900,के4,द2,द4,त2,1915,अ4- "च"नास्ति

[४] त1,1900,के4,द4,भ2,भ3,1915,म-इत्यभ्युपेयः

[५] द1-आहुः

[६] त2-अत्रैवमवधेयम्, भ2-फलमात्रधात्वर्थवादी भावनावादिनं पार्थसारथिमिश्रमाक्षिपति इति टिप्पणी

[७] के3- "अर्थ"नास्ति

[८] द1,के3,के4,द2,द4,भ1,अ4-"च" नास्ति

[९] के4,भ1-"च" नास्ति

[१०] त2- "वक्ष्यमाणरीत्या " नास्ति

[११] भार1-धात्वर्थे, ज1- धात्वर्थस्य वा

[१२] भ2-फले इति टिप्पणी

[१३] त2-कार्यविशेषणीभूत

[१४] त2- "न्वयात् " नास्ति

[१५] त1-विषयितया त्वया तत्रा, जै-विषयितयान्वयि। तत्रा, त्रि-विषयितयान्वयादत्रा

[१६] जै,द5-कारणत्व

[१७] ब1-मौपादायौग्यतानिक

[१८] जो2-"तस्य" इत्यधिकं

[१९] भ2-विरुद्धक्रियया यतेतेति

तत्परी[१]हारायावृत्ति[२] र्मत्वर्थलक्षणा वा स्यादेवेति सममेव[३] नामधेयत्वसाधकम्। यच्च[४] "काष्ठैः पाक" इति स्यादिति[५]। तत्रेष्टापत्तिरेवेति[६] वक्ष्यामः। तवापि काष्ठैर्भावनेत्यापत्तिश्च[७]। यदि चाख्यातोपात्तभावनायामेव तदन्वयः, तदा लडाद्यन्तोपात्तधात्वर्थे[८] तदन्वय इति मयापि[९] सुवचमेव। "वाजपेयेन यजत" इत्यादौ सामानाधिकरण्यानुपपत्तिस्तवापि तुल्या। विधिवाक्ये एवोत्सर्गे(उत्सर्ग)[१०]प्राप्तं धात्वर्थस्य साध्यत्वं त्यज्यते, नान्यत्रापि। यदि तदनुवाद[११]त्वादत्रापि धात्वर्थः करणम्[१२], तर्हि ममापि प्रागुक्तरीत्या तथात्वमक्षतमिति दिक्। तस्मान्नाधिकरणानुपपत्ति[१३]र्भावना[१४]वाच्यत्वसाधिका, नापि तस्या अवाच्यत्वे कारकान्वयानुपपत्तिः। फले एवैषामन्वयात्। नापि[१५] पचतीत्या[१६]ख्यातार्थकालान्वयानुपपत्तिः। जानातीत्यादौ धात्वर्थ एवान्वयात्। क्वचित्त्वा[१७] क्षिप्तभावनायामन्वयः। पक्ववानित्यादौ भावनावाच्यत्वविरहवादिभि र्भट्टपादै[१८][43]रपि तथाभ्युपगमादिति।

---

[१] द1,त1,त3,ब1,जो2,द4,त2,भ1,भ2,भ3,1915,म-तत्परि

[२] द5-तत्परिहारार्थावृत्ति

[३] के4-"इति"इत्यधिकं, अ4- "इदं" इत्यधिकम्

[४] द2-यत्तु, अ4-"यच्च" इति नास्ति

[५] त1,त5-"स्यादिति" नास्ति

[६] अ1-तत्रेष्टापत्तिमेव, त2-तत्रेष्टापत्तिरिति

[७] जै-भावनेत्यापत्तेश्च, ज1-"च" नास्ति

[८] अ1,भ2- "एव " अधिकं-

[९] अ1,त2- "अपि " नास्ति

[१०] ()एतत्कोष्टकान्तर्गतः पाठः अन्यमातृकासु सर्वास्वस्ति युक्तश्च

[११] अ1,के3,अ4-तदनुवादकत्वा

[१२] त1,त5-कारणं

[१३] अ1-तस्मात् समानाधिकरणानुपपत्ति

[१४] जो2-भावनादि

[१५] जै-"अपि" नास्ति

[१६] द1,त1,त3,के4,द5,त5,ब3-पचतीत्यादावा

[१७] जै-कश्चित्त्वा

[१८] अ4-भट्टै

एवं च भावनाया वाच्यत्व[1]स्यैवाभावात् क्व कृतित्वेन व्यापारत्वेन वा वाच्यत्वे[2] विवादः[3]? कथं वा धात्वाख्यातार्थत्वविवाद इति केचिन्मन्वते[4]। तान्निराचष्टे[5] कृञ इत्यादिना[6]।

अयं भावः- व्यापारावाच्यत्वमते फलमात्रमर्थ इति फलितम्। तथा च करोतीत्यादौ यत्नप्रतीतेः[7] स एव धात्वर्थ इति वाच्यम्। तथा च यत्नमात्रार्थकत्वाद् "यती प्रयत्न" इत्यादिवत् प्रागुक्तरीत्याऽकर्मकतापत्तिः[8], विना व्यापारान्तर्भावं[9] तद्विभागासंभवात्। किं चैवं कर्मस्थक्रियत्वाभावेन[10] कर्मकर्तरि यगादिकं[11] न[12] स्यादित्याद्युक्तरीत्यो-ह्यम्[13]।

---

एतन्मते भावना न आख्यातार्थः। तदवाच्यत्वे दोषः उच्यते - भावनाया सर्वत्र अवाच्यत्वे इति॥ वाजपेयाधिकरणप्रसङ्गमाह - तथा हीति॥ वाजपेयेनेति उद्भिदेति। अत्र द्वयेऽपि द्रव्यरूपगुणाश्रयणात् गुणविधित्वशङ्का, नामधेयाश्रयणात् नामधेयताशङ्का बोध्या। यत्र तु कर्म प्रकारान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्र-विधानम्, स च विधिर्गुणविधिः। यथा दध्ना जुहुयादित्यत्र होमस्य अग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद् होमोद्देश्येन दधिमात्रविधानम्, दध्ना होमं भावयेदिति। नामधेयबोधको विधिर्नामधेयविधिः, यथा चित्रया यजेतेति। वाजपेयशब्देन गुणो

---

[1] जै-भावनायामन्वयः वाच्यत्व

[2] भ2-वाच्यत्वेपि

[3] त2-वाच्यत्वविवादः

[4] अ1,के3 –केचिन्मन्यन्ते, भ3-कैश्चिन्मन्यन्ते

[5] अ4-तन्मतन्निराचष्टे

[6] अ4-इति

[7] 1900-यत्नप्रतीतिः, त्रि-यत्नप्रतीतेरेव

[8] अ1,भ2,द5-कर्मकतापत्तेः, ब3-अकर्मतापत्तिः

[9] भ2-व्यापारस्यान्तर्भावो लक्षणे निवेशः धात्वर्थान्तःपातित्वं वा अन्तर्भावः इति टिप्पणी

[10] द1,1915-कर्मस्थक्रियात्वाभावेन

[11] अ4-"यगादिकं"इति नास्ति

[12] 1900,1915- "न " नास्ति

[13] अ1-रीत्योक्तम्

विधीयते। वाजं वाजान्नस्य द्रवीभूतो रसः सुराद्रव्यम्। नामधेयत्वपक्षे मत्वर्थलक्षणया वाजपेयवता यागेनेष्टं भावयेत्। गुणविधिपक्षे वाजपेयेन द्रव्येण यागं कुर्यात् , यागेन स्वाराज्यं भावयेदित्यन्वये मत्वर्थलक्षणा नास्ति। अत्र पक्षे यागस्य गुणफलाभ्यां सम्बन्धप्रयुक्तं गौरवमस्ति तत्राह – तन्त्रेणेति॥ वाजपेयेन द्रव्येण स्वाराज्याय यजेतेत्येवं यागस्य तन्त्रेण युगपदेव उभयसंबन्धः। तथा च गुणविधित्वपक्षे मत्वर्थलक्षणां विनैव निर्वाहात् गुणविधित्वमेवेति पूर्वपक्षः। तथा हीति॥ कर्मत्वेति॥ यागस्य गुणसम्बन्धे वाजपेयेन यागं कुर्यादिति यागस्य कर्मत्वं, तथा यागेन स्वाराज्यं भावयेदिति चेद् यागस्य करणत्वं प्राप्तम्। ततश्च कथमुभयसम्बन्धः। एतदेवाह - तदा साध्यद्वयासमवायादित्यादिना न गुणः सम्बन्ध्येतेत्यन्तेन॥ असमवायात् असम्बन्धात्।

अत्रेदं बोध्यम्। यथा आख्यातोपात्ता भावना सम्बन्धसामान्येन साध्येन सम्बध्यते इदं साध्यमनेनेत्थं कुर्यादिति तथा धात्वर्थयागोऽपि सम्बन्धसामान्येनैवोभाभ्यां सम्बध्येत। तथा हि - यज्धातुना याग उक्तः, प्रत्ययेन भावना उक्ता तयोस्तु समभिव्याहारात्सम्बन्धमात्रं गम्यते। न तु कर्मत्वादि , तद्वाचकपदाभावात्। पर्यवसानतो विशेषलाभः। अतो गुणविधित्वमेवेति पूर्वपक्षः। अत्र सिद्धान्तमाह - राद्धान्तस्तु इति॥ वस्तुतस्तु तन्त्रेणोभयसम्बन्धाङ्गीकारे विरुद्धत्रिकद्वयापत्तिः स्यात्। तत्स्वरूपन्तु यथा - उद्देश्यत्वमनुवाद्यत्वं मुख्यत्वञ्चेत्येकं त्रिकम्। उपादेयत्वं विधेयत्वं गुणत्वञ्चेत्यपरं त्रिकम्। विरुद्धस्य तद्वयस्यापत्तिः। एतच्च मीमांसाशास्त्रतोऽध्येयम्। भावना प्रत्ययवाच्या सा न करणत्वादिनाऽन्वेति, धात्वर्थो यागस्तु अक्रियारूपः, गुणादिना क्रियाभिन्नेन न तदन्वयः क्रिययैव तदाकाङ्क्षितत्वात्। भावनाद्वारैवेति॥ भावना फलेन गुणेन च सम्बध्यते। तदनु च यागान्वयः पश्चाद् जायते, तथा सति गुणेन कर्मत्वेन फलेन च करणत्वेन अन्वयाद् यागस्यावृत्तिः कार्या। तदाह – साधनापेक्षत्वादित्यादिना॥ उक्तदोषमाह - एवं गुणत्वेत्यादिना॥ सिद्धान्तमाह - एकवाक्यतयान्वयाय लक्षणा, अथवा कर्मत्वेन करणत्वेनान्वयाद् आवृत्तिरिति न गुणविधित्वपक्षः। तस्मात्तत्प्रख्यन्यायेन वाजपेयं यस्मिन्निति व्युत्पत्त्या नामधेयता। गुणविधित्वपक्षे गुणत्वादिदोषा मीमांसाशास्त्रोक्ताः स्युः तद्वारणायापि आवृत्त्यापत्तिदोषः। भवन्मते

वैयाकरणमते, भावनाभावात् आख्यातार्थभावनाभावात्, कारकाणां धात्वर्थेनैव सम्बन्धो वक्तव्यः, तदर्थं धात्वर्थस्य क्रियात्वं मन्तव्यम्, तद्विना कारकान्वयायोगात्। तेन किमायातमित्याह - तथा स्वरूपेणैवेति॥ क्रियात्वेनैव रूपेण । कारक-सम्बन्धमिति॥ क्रियाकारकयोर्नित्याकाङ्क्षितत्वात्। तत्स्पष्टयति - विनैवावृत्त्या यज्यभिहितेनैव इति॥ धातुनाभिहितत्वेनैव गुणफलाभ्यां संबध्यते यागः इति शेषः। तथा सति गुणविधित्वपक्षे आवृत्तिरूपदोषदानमनुचितमिति॥ तादृशदोष-परमधिकरणमनुपपन्नमेव स्यात्। तदाह - यज्यभिहितेन यागेन॥ यज्धात्वभि-हितेनेत्यर्थः। न चोद्देश्येति॥ यदा कर्मत्वेन यागं भावयेदित्यन्वयस्तदा उद्देश्यता, यदा यागेन स्वाराज्यं भावयेदिति, तदा उपादानता। विशिष्टविधानेति ॥ स्वाराज्यादि-फलमुद्दिश्य वाजपेयविशिष्टयागविधानेत्यर्थः।

अत्रेदमवधेयमिति॥ तत्रैव फले। तथा काष्ठैः पचतीत्यत्र काष्ठानां धात्वर्थे फलेऽन्वयः, तथा च काष्ठजन्यः पाक इत्येव बोधः। क्रियास्वरूपमाह – इदमिति॥ एवञ्चेति॥ विधिवाक्ये धात्वर्थयागसाध्यत्वं भावनायामस्ति, घटं करोतीत्यादौ कर्मत्वमेव द्वितीयार्थः। न तु तण्डुलादौ धात्वर्थसाध्यता। तदाह – नन्विति॥ करणत्वसाध्यत्वोभयप्रतीत्या वैरूप्यमाह - एवं चेत्यादिना॥ करणत्वं साधकत्वमिति वैरूप्यं भिन्नाधिकरणवृत्तित्वात्। नामधेयत्वेऽपि लक्षणादिप्रयुक्तम् दूषणमित्याह – तत्परिहारायेति॥ तस्य वैरूप्यस्य परिहाराय। काष्ठैः पाक इत्यापत्तिमिष्टापत्त्या परिहरति – यच्चेति॥ अन्यथा त्वन्मतेऽपि दोषः। तवापीति॥ उभयत्रापि भावे एव प्रत्ययविधानात्। ननु मम आख्यातार्थभावनायामेव करणाद्यन्वय इति वदति - यदि चेति॥ खण्डयति – तदेति॥ लडाद्यन्तोपात्तेति॥ लडाद्यन्तेत्यत्र अतद्गुणो बहुव्रीहिः। तदाह धात्वर्थ इति॥ काष्ठैः पाक इत्यत्र लडभावेनादोषः। तवापि भावनावाच्यत्ववादिनः, यागभावनयोः सामानाधिकरण्यानुपपत्तिस्तुल्या। विधिवाक्ये यजेतेत्यादौ धात्वर्थस्य यागस्य करणत्वेनान्वयात् साध्यत्वं न प्रतीयते। अन्यत्र तु कर्त्रादिकारकसाध्यत्वस्य तत्र प्रतीतेः। करणत्वोपपादनं खण्डयति - ममापि प्रागिति॥ तस्मादुक्तव्याख्यानात्। अधिकरणानुपपत्तीति॥ अन्यथोपपत्तेः सम्भवात्। कारकान्वयानुपपत्तिरिति॥ धात्वर्थफलेऽन्वयात्। नापि पचतीति आक्षिप्तभावनायामेवान्वयात्। जानातीत्यादौ तु धात्वर्थज्ञाने एव कालान्वय इति

भावः। पक्ववानित्यादौ, भावनाया अवाच्यत्वेऽपि, आक्षिप्तायामेव तस्यामन्वयः। उपसंहरति – एवञ्चेति॥ भावनाया वाच्यत्वसिद्धावेव तस्याः कृतित्वादिना वाच्यत्वविचारः। अवाच्यत्वे तद्विचारस्य नैष्फल्यमिति पूर्वपक्षिण आशयः। कथमिति॥ अत्र मते भावनाया न धातुवाच्यत्वं न वा आख्यातवाच्यत्वम् अपि तु आक्षेपादिनैव तस्याः सर्वत्र भानम्। मतमिदं नैयायिकादिभिन्नमेव प्रतीयते। तन्मतं खण्डयति - तन्निराचष्टे कृञ इत्यादिनेति॥ व्यापारो भावनेत्यादिकारिकायां कृञोऽकर्मकतापत्तेरित्यादिना।

अयं भावः। व्यापारावाच्यत्वे इति॥ व्यापारवाच्यत्व इति नञ्रहितः पाठ पुस्तकान्तरे। स न युक्तः। फलमात्रार्थकत्वे दोषमाह - तथा च करोतेरिति॥ कृञो यत्न एवार्थस्तत्र तस्यैव फलत्वात्। यत्नमात्रार्थकयतीप्रयत्ने इत्यस्येव यत्नमात्रार्थकत्वात्कृञोऽपि अकर्मकत्वापत्तिरित्यर्थः। आपत्तिमुपपादयति – विनेति॥ व्यापारवाचकत्वं विनेति भावः। तद्विभागासम्भवात्। अकर्मकसकर्मकविभागासम्भवात्। यगादिकं न स्यादिति।क्वचित् नञ् रहितः पाठः। स अयुक्तः। अथवा कर्मस्थक्रियत्वाभावेऽपि यदि कृञः कर्मकर्तरि यगादिकं स्यात्तदा सर्वेभ्योऽपि यगादिकं स्यादिति कथंचित् व्याख्येयम्।

55. ननूत्पत्तिरेव कृञोऽर्थोऽस्तु। तथा च कर्मस्थभावकत्वाद्[१] यगादिकं स्यादेवेति चेत्[२] तथाप्युत्पद्यत[३] इतिवदकर्मकतापत्ति[४]र्दुर्वारा।
उत्पत्त्यर्थ[५]भवते"भूयते घटः स्वयमेवे"त्यस्येव[६] "क्रियते घटः स्वयमेवे"त्य[७] - स्याप्यसंभवापत्तेर्दुर्वारत्वाच्च। अस्तु वा कृञर्थः कृतिमात्रमुत्पत्तिमात्रं वा।
तथापि धातूनां फलमात्रार्थकत्वे सकर्मकत्वाकर्मकत्व[८]विभागोच्छेदापत्तिः।

---

[१] ज1-कर्मस्थभावत्वात्

[२] के3,अ4-यगादिकं न स्यादिति चेन्न ,त2- "चेत्"नास्ति,द6-यगादिकं न स्यादेवेति चेत्

[३] अ1,जै-तथाप्युपपद्यत

[४] 1900,त्रि,द7-तापत्तिरेव

[५] अ1,द5-उत्पत्त्यर्थक

[६] द1- "इव " नास्ति

[७] त2-"स्येव क्रियते घटः स्वयमेवेत्य " नास्ति

[८] त1- "अकर्मकत्व " नास्ति

स्वार्थफलव्यधिकरणव्यापारवाचकत्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा तत्त्वमित्यस्य त्वद्रीत्या [१] ऽसंभवात्। न चैवमननुगमापत्त्या [२] न्यतमत्वमेव [३] तद्वाच्यम् [४], तथा च नोक्तदोष इति वाच्यम्। एकस्यैवार्थभेदेनाकर्मकत्व-सकर्मकत्वयोर्दर्शनेन[५] कदा कः सकर्मक इत्यननुगतस्यैव[६] लक्ष्यत्वेन [७]लक्षणाननु-गम[८]स्येष्टत्वात्[९]। अन्यतमत्वमिति पक्षे सर्वत्रैवार्थे[१०] सकर्मकत्वा[११]पत्तिरिति।

अथ वा कर्मणा सहितत्वं सकर्मकत्वं तदभावापत्तेरित्यर्थः। अस्मिन् मते कर्मत्वस्य[१२] दुर्वचत्वात्[१३]। न च धात्वर्थाश्रयत्वं कर्मत्वम्[१४]। तथा सति "तण्डुलं पचति[१५], घटं भावयती"त्यत्रेव[१६] "घटो भवती"[१७]त्यत्रापि घटस्य कर्मत्वं दुर्वारमिति द्वितीया स्यात्। परसमवेत[१८]क्रियाजन्यधात्वर्थफलशालित्वस्यापि कुलालनिष्ठ[१९] कृतिजन्यो-त्पत्त्याश्रयत्वेन सत्त्वात्। अथ संज्ञैव द्वितीयोत्पत्तौ प्रयोजिकेति "घटो भवती"त्यत्र

---

[१] जो2-तत्त्वमित्यस्मद्रीत्या, के3,अ4-त्वदुक्तरीत्या

[२] भ2-स्वत्वाननुगमापत्त्या इति टिप्पणी

[३] जै-न चैवमनुगमापत्त्या अन्यतरत्वमेव

[४] के3-तद्वाच्यत्वम्,भ2-अकर्मकत्वान्यत्वमेव सकर्मकत्वं चेत् अकर्मकत्वमेव दुर्वचम् अतः परिगणितत्वं अन्यतमत्वं व्याख्येयम् तदेव सकर्मकत्वं वाच्यम् इति टिप्पणी

[५] भार1,जो2,त3,त5- एकस्यैवार्थभेदेन सकर्मकत्वाकर्मकत्वयोर्दर्शनेन,त2-"अकर्मकत्व " नास्ति

[६] त1,त5-गमस्यैव

[७] के3,अ4-लक्ष्यतया

[८] जै-लक्षणानुगम

[९] त2-स्पष्टत्वात्

[१०] 1900,त2,1915-सर्वत्र वार्थे

[११] के3,के4,अ4-सकर्मकता

[१२] के3,के4-"एव" इत्यधिकं

[१३] के3-दुर्वाच्यत्वात्,त2-दुर्वचनत्वात्,ब3-दुर्वारत्वात्

[१४] ब1,त1-"कर्मत्वम्" नास्ति

[१५] त्रि-पचते

[१६] द3-त्यत्र च

[१७] जै-"त्यत्रेव" इत्यारभ्य "घटो भवती" इत्यन्तं ग्रन्थः नास्ति

[१८] अ1-परसमेत

[१९] द7-कुलालकर्तृनिष्ठ

घटस्य कर्तृत्वेन तत्संज्ञया[१] कर्मसंज्ञायाः बाधान्न द्वितीयेति चेन्न, त्वन्मते घटस्य कर्तृत्वासंभवात्। अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वात्[२]। कृत्याश्रयत्वं कारकचक्रप्रयोक्तृत्वं[३] वा तत्त्वमिति चेत्, तर्हि घटोऽस्तीत्यत्रापि[४] तन्न स्यात्। धात्वर्थानुकूलव्यापाराश्रयत्वं च[५] कारकमात्रेऽति[६] प्रसक्तम्। एतेन स्वार्थफलव्यधिकरणव्यापारवाचित्वं[७] सकर्मकत्वं[८] नार्थसाधकम्। यद्धातूच्चारणे कर्माकाङ्क्षा नियता स[९] सकर्मकोऽन्योऽकर्मक[१०] इत्येव लक्षणसं[११]भवात्। तस्य च[१२] केवलव्यापारवाचित्वे केवलफलवाचित्वे चासंभवादि[१३] त्यपास्तम्। कर्मत्वस्य दुर्वचत्वेन[१४] तदाकांक्षावत्त्व[१५]रूपस्यापि {तस्यापि}[१६] तस्यासंभवात्[१७]।

---

कृञो यत्नार्थकत्वेऽपि कर्मवद्भावं साधयति – ननूत्पत्तिरेवेति॥ तथा च उत्पत्त्यर्थकत्वे सति उत्पत्तेः कर्मस्थत्वेन, कर्मस्थभावकत्वात् कर्मवद्भावे सति यगादिकमस्तु। उक्तं खण्डयति - चेत् तथापीति॥ कृञ उत्पत्त्यर्थकत्वे। उत्पद्यते इत्यस्य उत्पत्त्यर्थकत्वे यथा अकर्मकत्वं तथा कृधातोरपि तदर्थकत्वेनाकर्मकत्वं

---

१ के3,के4-कर्मसंज्ञया, अ4-तत्संज्ञया कर्मसंज्ञया

२ द7-दुर्वचनत्वात्

३ त1-कारकवत्प्रयोक्तृत्वं,के3,अ4-कारकप्रयोक्तृत्वं

४ भ2-कृतेः चेतनाश्रितत्वेन घटे तदसत्त्वात् कारकचक्रप्रयोक्तृत्वस्यापि चेतनधर्मत्वात् घटे अनुपपत्तेः कर्तृत्वं न स्यादित्यर्थः इति टिप्पणी

५ के5,अ4,म-तु

६ त1,त5-"अति" नास्ति

७ त1,त3,त5,ब3,के4-वाचकत्वं

८ भ2-"सकर्मकत्वं" नास्ति

९ अ4-"स" इति नास्ति

१० अ1,वा2,द1,द2,त1,जो2,के3,के4,के5,अ4-"अन्योऽकर्मक" नास्ति

११ वा2-"सं" नास्ति

१२ अ1,के5-"च" नास्ति

१३ त1,के3,के4,के5,भ2,अ4-वासंभवादि

१४ द7-दुर्वचनत्वेन

१५ भ1-तदावत्त्व

१६ {} एतत्कोष्टकान्तर्गतः पाठः के3 मध्येऽप्यस्ति। अन्यत्र नास्ति, असंबद्धश्च

१७ के5,अ4,म-"तस्य" नास्ति ,द3- " इत्यपास्तम् " इत्यारभ्य "तस्यासंभवात्" इति पर्यन्तं नास्ति

स्यात्। भूधातोरुत्पत्त्यर्थकत्वं मत्वाह – भवतेरिति॥ उत्पत्त्यर्थकत्वं न कर्मवद्भाव-साधकम्, भूधातोरुत्पत्यर्थकत्वेऽपि भूयते घटः स्वयमेवेति नैव भवति, कृञोऽपि तदर्थकत्वे क्रियते घटः स्वयमेवेति नैव स्यात्। भूयते घटः स्वयमेवेति त्वापाद्यमानं रूपम्। नत्विष्टम्। ननु शब्दशक्तिस्वाभाव्यात् उत्पत्यर्थकत्वेऽपि कृञोऽस्तु कर्मवद्भाव इत्यत आह - अस्तु वा कृञ इति॥ वेति॥ कृत्यर्थकत्वम् उत्पत्त्यर्थकत्वं वेति एकतरस्य फलस्य वाच्यत्वमित्यर्थः। व्यापारावाचकत्वे फलमात्रमर्थः। तत्र दोषमुद्घाटयति – तथापीति॥ कृधातुर्धातुमात्रोपलक्षणम्, कारिकायां तथैवेष्टत्वात् , तथा च धातुमात्रस्य सकर्मकत्वादिविभागानुपपत्तिः।

अनुपपत्तिमाह – स्वार्थफलेति॥ स्वस्य धातोरर्थः फलम्। तद्यधिकरणः फलाधिकरणेऽवृत्तिः, भिन्नाधिकरण इत्यर्थः, तादृशो यो व्यापारः तद्वाचकत्वं धातोरिति। तथा च फले स्वार्थेति विशेषणात् व्यापारवाचकत्वेति धातौ विशेषणात् फलव्यापारोभयवाचकत्वे एव धातोः सकर्मकत्वम्। एवमेव स्वार्थफल-समानाधिकरणव्यापारेति अकर्मकत्वलक्षणमपि उभयवाचकत्वे एव सम्भवति। फलमात्रवाचकत्वे तदनुपपत्तिरिति भावः। त्वद्रीत्या। फलमात्रवाचकत्वरीत्या। असम्भवेति च्छेदः। अकर्मकत्वादिः प्रकारान्तरेण साधयति - न चैवमननुगमादिति॥ फलमात्रवाचकत्वे सकर्मकत्वा-ननुगमः विभागाननुगमः। अननुगमः, सकर्मकत्वाकर्मकत्वविभागाग्रहः। तेन अन्यतमत्वमेव सकर्मकत्वादि वाच्यम् लक्षणीयम्।

अयमाशयः- सकर्मकत्वेनाभिमतान् धातून् संगृह्य गम्याद्यन्यतमो धातुः सकर्मकः, एवमेव अकर्मकत्वेन सम्मतान् धातून् संगृह्य भ्वाद्यन्यतमो धातुरकर्मकः, इत्येव लक्षणं वाच्यम्। अन्यतमत्वम् तद्भिन्नभिन्नत्वं, यथा पचादिभिन्नाः भ्वादयोऽकर्मकास्तद्भिन्नत्वम् पचादौ। लक्षणस्यास्यालक्षणत्वमाह – एकस्यैवार्थेति॥ अर्थभेदेति॥ वह्धातुः प्रापणेऽर्थे सकर्मकः, भारं वहति। प्रस्रवणार्थे अकर्मकः, नदी वहति। तथा च सकर्मकत्वलक्षणे वह्धातोरपि प्रवेशेन नदी वहतीति प्रयोगे तस्याकर्मकत्वानुपपत्तिरिति लक्षणाव्याप्तिः। किञ्च अन्यतमत्वमित्यस्य सकर्मकत्वेनाभिमतपचाद्यन्यतमत्वमित्यर्थो वाच्यः, तथा सति

सकर्मकलक्षणे सकर्मकप्रवेशे आत्माश्रयत्वापत्तिरिति लक्षणानुपपत्तिरेव। एवमेवाकर्मकलक्षणेऽपि। यद्वा ननु तव मतेऽपि अर्थभेदेन, सकर्मकत्वाद्यननुगम एवेत्यत आह – एकस्यैवार्थभेदेनेति॥ सिद्धान्ती अननुगममिष्टापत्त्या स्वीकरोति - कदा कः सकर्मकः इत्यादिना॥ अर्थभेदेन एकस्यैवाकर्मकत्वं सकर्मकत्वञ्च। तथा च कदा कः सकर्मकः, इत्यादिजिज्ञासायां यदा यः स्वार्थव्यधिकरणव्यापारवाची तदा सः सकर्मकः, इत्युत्तरेणैव सकर्मकत्वलक्षणोपपत्त्या लक्षणस्य यत्तत्पद-घटिततया लक्ष्याननुगमे लक्षणस्याननुगमोऽवश्यम्भावीति स स्वीकार्य एवेति भावः।

अन्यतमत्वपक्षं दूषयति - अन्यतमत्वमिति पक्षे इति॥ पचाद्यन्यतममध्ये गत्यर्थकस्य 'वा गतिगन्धनयोः' ग्रहणे तस्य गत्यर्थे सकर्मकत्वस्य इष्टत्वेऽपि गन्धनार्थेऽपि सकर्मकत्वापत्तिः, अन्यतमत्वेन ग्रहणे अर्थस्यानुक्तत्वात्। अत आह - सर्वत्र वार्थे इति॥ सर्वस्मिन् वार्थे वाधात्वर्थे गतिगन्धनार्थे। तथा च वायुर्वाती - त्यकर्मकप्रयोगानुपपत्तिः। धातोर्व्यापारावाचकत्वे पुनरपि दोषान्तरमाह – अथवेति॥ कर्मणा सहितत्वम् , साहित्यञ्च स्वान्वय्यर्थकत्वरूपम्। स्वं कर्म तदन्वयी धात्वर्थः, तदर्थकत्वम् तद्वाचकत्वम्। तदभावापत्तेः सकर्मकत्वाभावा-पत्तेः। यद्वा सकर्मकत्वज्ञानाभावापत्तेः। तदेवोपपादयति - अस्मिन् मते इति॥ व्यापारस्यावाच्यत्वे धात्वर्थव्यापारजन्यफलाश्रयत्वरूपस्य कर्मणः दुर्वचत्वात् कथयितुमशक्यत्वात्। वादी स्वमते कर्मत्वं लक्षयति - न च धात्वर्थाश्रयत्वमिति॥ यथा तण्डुलं पचति, घटं भावयति इत्यादौ फलाश्रयत्वेन तण्डुलघटादेः कर्मत्वं तथैव फलमात्रवाचकत्वे घटस्य धात्वर्थफलाश्रयत्वात् कर्मत्वेन घटं भवतीति प्रयोगापत्तिरिति धात्वर्थाश्रयत्वमिति कर्मलक्षणं त्वया वक्तुमशक्यमिति भावः। अत्र धात्वर्थः फलम्। ननु न धात्वर्थाश्रयत्वं कर्मत्वम्। अपि तु परसमवेतक्रिया-जन्यफलाश्रयत्वं कर्मत्वमिति कर्मलक्षणं वाच्यम् , परत्वञ्च द्वितीयाप्रकृत्यर्थापेक्षया ग्राह्यम्। यथा - ग्रामं गच्छतीत्यत्र परो देवदत्तादिः कर्ता तत्र समवेता क्रिया संयोगानुकूला क्रिया, तज्जन्यं फलं संयोगस्तदाश्रयत्वात् ग्रामस्य कर्मता। घटो भवतीति स्थले परसमवेतक्रियाया अभावात् नापत्तिः। अस्मिन् लक्षणेऽपि घटे तदापत्तिस्तदवस्थैवेत्याह – कुलालनिष्ठेति॥ परः कुलालः तन्निष्ठा कृतिः

घटोत्पत्त्यनुकूला कृतिः, तज्जन्यफलम् उत्पत्त्यादिरूपं तदाश्रयो घट इति घटस्य कर्मत्वापत्तिस्तदवस्थैव। इदानीं संज्ञानां बाध्यबाधकभावेनात्मानं रक्षति - अथ संज्ञा एवेति॥ प्रयोजिका "कर्मणि द्वितीये"(पा.2.3.2)ति सूत्रात्। घटो भवति इत्यत्र "स्वतन्त्रः कर्ते"(पा.1.4.54)ति सूत्रेण कर्तृसंज्ञा प्राप्ता, "कर्तु"(पा.1.4.49) रिति सूत्रेण कर्मसंज्ञा प्राप्ता, परत्वात् कर्तृसंज्ञया कर्मसंज्ञाया बाधः, तदाह – तत्संज्ञयेति॥ कर्तृसंज्ञया। फलमाह - न द्वितीयेति॥ समाधानमिदं खण्डयति - त्वन्मते घटस्याकर्तृत्वात्॥ असम्भवोपपत्तिमाह – अनुगतकर्तृत्वेति॥ धात्वर्थ-व्यापाराश्रयत्वं हि कर्तृत्वं, त्वन्मते व्यापारस्य धात्वर्थत्वाभावेन कर्तृत्वानिरुक्तेः। व्यापारस्यावाच्यत्वेऽपि कर्तृत्वं लक्षयति – कृत्याश्रयत्वमिति॥

खण्डयति - घटोऽस्तीति॥ घटस्याचेतनत्वेन चेतनमात्रवृत्तिकृतेस्तत्रा-वर्तमानत्वेन कर्तृत्वानुपपत्तेः। कारकचक्रप्रयोक्तृत्वमपि चेतनवृत्तिः कश्चनधर्मः, तस्याप्यचेतनेऽवर्तमानतया घटस्य कर्तृत्वानुपपत्तिरेव। धात्वर्थानुकूलेति॥ धात्वर्थः फलम्। तदनुकूलो व्यापारः सकलेषु कारकेषु, कारकाणां फलानुकूल-स्वस्वव्यापाराश्रयत्वात्। तथा चेदं लक्षणं कर्तृभिन्नकारकेष्वपि सत्त्वादतिव्याप्तमिति भावः। तदाह – कारकमात्रेऽतिप्रसक्तमिति॥ एतेनेति॥ उक्तदोषेण वक्ष्यमाणदोषेण वा। अपास्तमित्यनेनान्वयः। अपास्तत्वाश्रयमाह – स्वार्थेति॥ स्वमते स्वार्थफल-व्यधिकरणेत्यादिलक्षणस्यासम्भवदुक्तिकत्वेन द्वेषवशादाह - सकर्मकत्वं नार्थ-साधकमिति॥ सकर्मकत्वमुक्तलक्षणम्। अर्थस्य मदिष्टस्य साधकं नेत्यर्थः। वैयाकरणमते तु साधकमेव। लक्ष्यानुगमकत्वमेवात्र साधकत्वम्।

स्वमते साधकं लक्षणमाह – कर्माकाङ्क्षानियतेति॥ यत्र गच्छतीत्याद्युक्तौ ग्रामादिकर्माकाङ्क्षा कं गच्छतीत्याकारिका जिज्ञासा, नियता नियमेन भवति स धातुः सकर्मक इति भावः। आकाङ्क्षा प्रयोक्त्रादिसमवेता। धातौ तु प्रयोजकत्वसम्बन्धेन। यत्र नास्ति तादृशी आकाङ्क्षा घटो नश्यतीत्यादौ स धातुरकर्मकः। स्वलक्षणस्यास्यौचित्यमाह – केवलव्यापारेति॥ केवलव्यापार-वाचकत्वे केवलफलवाचकत्वे वा तस्य फलव्यापारोभयवाचकत्वसापेक्षलक्षणस्य स्वार्थव्यधिकरणव्यापारवाचित्वरूपस्य सकर्मकत्वस्यासम्भवात्। अपास्तत्वहेतु-माह - कर्मत्वस्य दुर्वचत्वेनेति॥ त्वन्मते कर्मत्वं दुर्वचम्। तथा च

कर्माकाङ्क्षावत्त्वरूपसकर्मकत्वलक्षणघटककर्मणोऽज्ञानात् तवाभिमतस्य लक्षणस्यासम्भवात्।

56. न च[1] द्वितीयान्तपदोपस्थाप्यत्वं तत्त्वम्, "स्तोकं भवती"त्यपि[2] दर्शनेनातिव्याप्तेः[3]। न च[4] कर्तृत्व[5]कर्मत्वादिकमखण्डमेव, व्यासज्यवृत्तिकर्तृत्वदेवतात्वादेः[6] शास्त्रेऽदर्शनादिति वाच्यम्, तस्य धात्वर्थफलाश्रयत्वव्यापकतया तत्सत्त्वेन[7] सत्त्वात्। न च सकर्मकधात्वर्थाश्रयत्वं कर्मत्वम्, अन्योन्याश्रयेन(ण)[8] सकर्मकत्वादे[9]र्दुर्ग्रहत्वापत्तेः। निरसिष्यते चोक्तं सकर्मकत्वं[10] "फलव्यापारयोरेकनिष्ठ[11]तायामि[12]"(वै.सि.का.13)त्यत्र। किं चैवं फलमात्रस्य धात्वर्थत्वे "ग्रामो गमनवानि"ति प्रतीत्यापत्तिः[13]। पाकानुकूल[14] व्यापारारम्भेऽपि[15] फलानुत्पाददशायां "पाको भवती"त्यनापत्तिः। ग्राम[16]चैत्रयोर्मिथः संयोग[17] इतिव"न्मिथो[18] गमनमि"त्या-

---

[1] के5,म-"च" नास्ति,द3-ननु

[2] त1-भवतीत्यत्रापि, अ1,द1,त्रि -पचतीत्यपि

[3] के5,म,के3,अ4-स्तोकं पचतीत्यादावतिव्याप्तेः,भ2-अस्ति हि द्वितीयान्तस्तोकपदेन भवतेः उपस्थितिरिति सकर्मकत्वं स्यादित्यर्थः इति टिप्पणी

[4] त1-तं च

[5] त्रि-"कर्तृत्व" नास्ति

[6] ज1-देवत्वादेः, द7-देवतात्वादेरिव

[7] त1,द4-तत्सत्त्वे एतदनन्तरं। " व्यापारयोरेकनिष्ठतायामिन" इति द4मध्ये अधिकम्

[8] अ1-श्रयत्वेन, वा2,भार1,त1,त3,जै,ब1,1900,द4-श्रयेण,के5,म-अन्योन्याश्रयात्

[9] के5,म-सकर्मकाकर्मकत्वादे

[10] अ1,1900,त2,द3,1915 -चोक्तसकर्मकत्वं,भ1 - कर्मत्वम्

[11] द3- "अत एव धात्वर्थः फलमात्रं व्यापारः आख्यातार्थ इति मण्डनाचार्यमतं नन्वेवमथाख्यातार्थवर्तमानत्वान्वयासम्भवजानात्यादौ " इत्यधिकम्,असम्बद्धम्

[12] भ2-निष्ठतायामकर्मक इत्यत्र, 1915-निष्ठायामित्यत्र

[13] वा2-प्रतीत्यापत्तेः

[14] के3-फलानुकूल

[15] अ4-"अपि" इति नास्ति

[16] त2-मैत्र

[17] द4-सम्बन्ध

[18] के3-इतिवत्तथा

पत्तिश्च[1], व्यापारविगमे फलसत्त्वे "पाको विद्यत" इत्यापत्तिः, "पाकोऽभूदि"-त्यनापत्तिश्चेति[2] दिक्॥ 7॥

---

लक्षणान्तरमाह - न च द्वितीयेति। घटं करोतीत्यत्र द्वितीयान्तपदं घटमिति तत्पदोपस्थाप्यत्वं घटार्थे। तस्य कर्मत्वम्। पञ्चकं प्रातिपदिकार्थः, इति पक्षे कर्मत्वस्यापि प्रातिपदिकार्थत्वेन कर्मत्वं प्रातिपदिकशक्त्या उच्यते द्वितीयादिना द्योत्यतया। तथा च द्वितीयान्तोपस्थाप्यत्वमित्यस्य द्वितीयान्तघटक-प्रकृतिप्रत्ययोभयेत्यर्थः। उपस्थाप्यत्वम् वाच्यत्वं द्योत्यत्वञ्चेत्यर्थः। अतिव्याप्त्या लक्षणं निरस्यति - स्तोकं भवतीति। स्तोकस्यापि द्वितीयान्तोपस्थाप्यत्वेन त्वदुक्तकर्मलक्षणस्य तत्रातिव्याप्तेः। न च स्तोकादेरपि कर्मत्वमिष्टमेव, क्रिया-विशेषणानां कर्मत्वमित्यतिदेशेनैव तत्त्वात् , वस्तुतोऽकर्मत्वात्। फलाभेदेनैव कर्मत्वात्। वस्तुतस्तु वैयाकरणमते फलतावच्छेदकसम्बन्धेन फलाश्रयत्वं कर्मत्वमिति वक्तव्यम् , अन्यथा विक्लित्त्यादेः कालिकसम्बन्धेन काले सत्त्वात् फलाश्रयत्वेन कालस्यापि कर्मत्वापत्तौ कालं पचतीति प्रयोगापत्तिः। फलता-वच्छेदकसम्बन्धश्च तादात्म्यसमवायादिरेव। तथा च स्तोकादेरपि विक्लित्त्यादिफले अभेदेन अन्वयेन तादात्म्यसम्बन्धेन फलाश्रयत्वात् स्तोकादेः कर्मत्वमिष्टमेव। धात्वर्थव्यापाराश्रयत्वादिरूपं सखण्डं कर्तृत्वकर्मत्वादि नेष्टम्, अपितु अखण्डमेव। कर्तृत्वाद्युपपत्तये आह – व्यासज्यवृत्तीति॥ अनेकवृत्तीत्यर्थः। यदा धात्वर्थव्यापारा-श्रयत्वादिरूपम् कर्तृत्वादि विवक्षितम्, तदा तस्य समन्वयाय विशेषणतया व्यापारस्य विशेष्यतया आश्रयस्य च भानमावश्यकमित्येव व्यासज्यवृत्तित्वम्।

---

[1] भार1,त1,1900,1915-"च" नास्ति, त3,द1,अ1,के4,त5,त्रि,द5-"पाकानुकूल" इत्यारभ्य "त्यापत्तिश्च" इत्यन्तग्रन्थस्य स्थाने "ग्रामचैत्रयोर्मिथः संयोग इतिव"न्मिथो गमनमि"त्यापत्तिश्च, पाकानुकूलव्यापारारम्भेऽपि फलानुत्पाददशायां "पाको भवती"त्यनापत्तिः। " इत्यस्ति। जै- " ग्रामचैत्रयोर्मिथः संयोग इतिव"न्मिथो गमनमि"त्यापत्तिश्च " नास्ति।

[2] द1- "इति " नास्ति। "संयोगस्य ग्रामवृत्तित्वात् ग्रामो गच्छतीत्यापत्तेश्च। अत एव धात्वर्थः फलमात्रं,व्यापार आख्यातार्थ इति मण्डनाचार्यमतम्। नचैवमपि आख्यातार्थव्यापारे वर्तमानत्वान्वयासंभवः। जानात्यादौ धात्वर्थे तदन्वयानुरोधेन आख्यातार्थवर्तमानप्रकारकबोधे धातुजन्योपस्थितेः तौल्यात्। भावप्रत्ययस्य घञादेः अनुकूलव्यापार एवार्थोऽतश्च नोक्तदोष इति परास्तमिति वक्ष्यते इति " इति च अधिकम्।

कर्मत्वस्य धात्वर्थफलाश्रयत्वसमनियततया, तस्य धात्वर्थफलाश्रयत्वस्य सत्त्वेनैव कर्मत्वस्य सत्त्वात्। तद्विना कर्मत्वस्याग्रहात्तन्न समीचीनम्। पुनरपि लक्षणान्तरमाह - न च सकर्मकेति॥ सकर्मको गम्यादिः, तदर्थः संयोगादिः फलम् तदाश्रयत्वं कर्मत्वं ग्रामादेः। निरस्यति – अन्योन्याश्रयेणेति॥ कर्मत्वज्ञानेन सकर्मकत्वज्ञानम्, सकर्मकत्वज्ञानेन कर्मणो ज्ञानमिति ज्ञप्तौ अन्योन्याश्रयः। तथा च सकर्मकत्वादि दुःखेन ग्रहीतुं शक्यम्। फलमात्रस्य धात्वर्थत्वे दोषान्तरमपीत्याह – फलमात्रस्येति॥ फलमात्रस्य धात्वर्थत्वे गमनमित्यस्य संयोगरूपं फलं वाच्यम्। ल्युडादेर्धात्वर्थे एव विधानात्। तथा च गमनाश्रय(संयोगाश्रय)त्वात् ग्रामो गमनवानिति प्रयोगापत्तिः।

पुनरपि दूषणान्तरमाह – पाकानुकूलेति॥ फलमात्र-स्य धातुवाच्यत्वे पूर्वोक्तरीत्या पाकपदं फलपरम् , तथा च यत्र पाको विक्लित्तिः तदनुकूलो व्यापारः प्रारब्धस्तत्र पाको (विक्लित्तिः) भवतीति प्रयोगो नैव जायते, व्यापारारम्भे पाकोत्पत्त्यभावात्। सिद्धान्ते तु पाकगमनयोः धात्वर्थव्यापारे एव साधुत्वात् दोषाभावः। ग्रामे व्यापाराभावात् न ग्रामो गमनवानिति प्रयोगापत्तिः। पाकस्य व्यापारार्थकत्वेन व्यापारारम्भे पाको भवतीति प्रयोगस्या- बाधात्। ग्रामचैत्रयोरिति॥ चैत्रव्यापारेण ग्रामसंयोगो जायते। संयोगस्य द्विष्ठत्वेन ग्रामचैत्रयोः संयोग इति प्रयोगो निर्बाधं जायते। उक्तरीत्या गमनपदस्य संयोगार्थत्वेन, ग्रामचैत्रयोर्मिथो गमनमित्यपि स्यादिति भावः। व्यापारविगम इति॥ फलमात्रस्य धातुवाच्यत्वे पाकपदस्य फलार्थकत्वे व्यापारस्य नष्टत्वेऽपि पाको (विक्लित्तिः) विद्यते इति प्रयोगापत्तिः। इष्टस्य पाकोऽभूदित्यस्याभावापत्तिः। सिद्धान्ते तु पाकपदस्य न फलमात्रमर्थः किन्तु फलानुकूलो व्यापारः, "भावे" (पा.3.3.18) इति सूत्रेण धात्वर्थव्यापारे एव घञो विधानात्। तथा च व्यापार-विगमे पाको विद्यते इति प्रयोगाभावः, पाकपदार्थस्य व्यापारस्य तदानीमभावात्।

---

[1] व्या.म.भा. – भागः-4 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ.166

[2]" जलत्वमपि भेदकं, जलशब्दसङ्केतग्रहो न व्यक्तिमात्रे, न वा व्यक्तिविशेषे इत्यनुगतधर्मस्यबाधका-भावाज्जातित्वात्।"-न्यायलीलावतीप्रकाशः- पृ 148 (न्यायलीलावती-व्याख्यात्रयोपेता-चौखम्भा-1991)

[3] व्या.म.भा. – भागः-1 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 295

[4] जञ्जभ्यमानाधिकरणोच्छेदेति॥ तत्र हि "जञ्जभ्यमानोनुब्रूयान्मयि दक्षक्रतू "इति दर्शपूर्णमासप्रकरणे श्रूयते। तत्र जपः शुद्धपुरुषधर्म उत क्रतुयुक्तपुरुषसंस्कारः, क्रतोरेववेति सन्दिह्य वाक्याद्वात्रविनामपूर्वकविदारितमुखपुरुषार्थ-त्वावगतेः वाक्यस्य प्रकरणेन संकोचायोगात् न क्रतुयुक्तपुरुषधर्मत्वमिति पूर्वपक्षयित्वा वाक्यप्रकरणयोरविरोधेनापि तादृशपुरुषसंभवात् तत्संस्कारमुखेन क्रत्वर्थत्वमिति क्रतुयुक्तपुरुषधर्मत्वं जपस्य सिद्धान्तितम्। कृति कर्तुरवाच्यत्वे हि शानचोकर्त्रर्थत्वेन न तत्सिद्ध्यतीति तदधिकरणवैयर्थ्यप्रसंग इति तात्पर्यम्। पुरुषार्थत्वं क्रतुयुक्तपुरुषार्थत्वम्, यथाश्रुतेऽसंगतेरिति। (इदं विवरणं भा.इ.सं.मं. मातृकायामस्ति)

[5] गुणप्रकाशः – किरणावल्याः गुणखण्डस्य व्याख्या – पृ 71 – Government Press – Allahabad - 1933

[6] व्या.म.भा.(पस्पशा) – भागः-1 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 56 (शक्यं क्षुत् प्रतिहन्तुम् इति पाठः)

[7] रघुवंशः – पञ्चमसर्गः – 54 श्लोकः

[8] मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1989 चतुर्थभागः –पृ.478 ("यादृशस्तु" इत्यस्य स्थाने "यादृशश्चे"ति प्रकृतग्रन्थपाठः)

[9] द्र. पूर्वत्र("यदि कर्त्रा धात्वर्थेन वा" इत्यस्य "यदि कर्त्रा धात्वर्थेन च"इति प्रकृतग्रन्थपाठः)

[10] "तस्मात्करोति"रिति कारिकाव्याख्यायाम्

[11] "लः कर्मणि च भावेचाकर्मकेभ्यः"(पा.3-4-69 ) इति सूत्रे मनोरमायाम्

[12] कारकार्थनिर्णये विभक्तौ लक्षणायाः असाधुत्वस्य वक्ष्यमाणत्वादिति। (द्र.1915प्रकाशने पृ.115-116)

[13] मी.द.(टीकापञ्चकसनाथीकृतं)- तारा बुक् एजन्सी- वाराणसी- 1989- चतुर्थभागः- पृ.480 (अत्र मूलग्रन्थः इत्थं - कर्तृविशिष्टा संख्याभिधीयमाना न शक्या कर्तारमनभिधाय वक्तुम् इति।

[14] द्र.पूर्वत्र- पृ.480

[15] द्र.पूर्वत्र- पृ.482

[16] "सर्वाख्यातेषु कर्तृणामिष्टा" इति प्रकाशितग्रन्थपाठः

[17] द्र.पूर्वत्र- पृ.478

[18] मी.द.(टीकापञ्चकसनाथीकृतम्)-ताराबुक् एजन्सी-वाराणसी-1989 चतुर्थभागः- पृ.478-481

[19] मी.द.(टीकापञ्चकसनाथीकृतम्)-ताराबुक् एजन्सी-वाराणसी-1987 तृतीयभागः- पृ.563

[20] मी.द.(टीकापञ्चकसनाथीकृतम्)-ताराबुक् एजन्सी-वाराणसी-1987 तृतीयभागः- पृ.564

[21] द्र. पूर्वत्र

[22] द्र. पूर्वत्र

[23] मी.द.(टीकापञ्चकसनाथीकृतम्)-ताराबुक् एजन्सी-वाराणसी-1987 तृतीयभागः- पृ.565-568

[24] द्र.पूर्वत्र पृ.567

[25] द्र. पूर्वत्र पृ.568

[26] द्र. पूर्वत्र पृ.565

[27] द्र. पूर्वत्र पृ.567

[28] भावार्थाधिकरणम्-(मी.2-1-1) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 द्वितीयभागः –पृ.268

[29] अरुणाधिकरणम्-(मी.3-1-6) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 तृतीयभागः –पृ.565

[30] "विग्रहसमासयोरतिसमानार्थत्वनियमो नास्त्येव" – समासशक्तिनिर्णयः – (1915प्रकाशने पृ.183)

[31] अरुणाधिकरणम्-(मी.3-1-6) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 तृतीयभागः –पृ.568

[32] नामार्थनिर्णयः (1915 प्रकाशने पृ.119)

[33] आकृत्यधिकरणम्-(मी.1-3-9) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 प्रथमभागः –पृ.635

[34] व्या.म.भा. – भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 342, भागः-4 पृ 146

[35] म.भा.(पा.1-4-21)

[36] म.भा.(पा.1-4-21)

[37] व्या.म.भा.(सू - बहुषु बहुवचनम् - 1-4-21) – भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 343

[38] व्या.म.भा.(सू – प्रशंसायां रूपप् – 5-5-66) – भागः-6 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 435

[39] व्या.म.भा.(सू – सार्वधातुके यक् – 3-1-67) – भागः-4 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 139

[40] न्या.कु.-पञ्चमस्तबकः-9 (न्यायकुसुमाञ्जलिः-व्याख्यात्रयोपेतः-चौखम्भा-1957-द्वितीयभागः-पृ.77)

[41] व्या.म.भा. – (सू. कर्तुरीप्सिततमं कर्म – 1-4-49) भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 376

[42] शास्त्रदीपिका-वाजपेयाधिकरणं(1-4-6) कृष्णदास अकादमी- वाराणसी- 1988 पृ. 69-73

[43] "धात्वर्थकारकैरेव गुणभूतोऽवगम्यते।भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते" – भावार्थाधिकरणम्- (मी.द.2-1-1-1)

9.मण्डनमिश्रानुयायिनां मतम् - तस्मात्करोतिर्धातोरित्यादिकारिकावतरणिका

57. मण्डनमिश्रमता[1]नुयायिनस्तु फलमेव धात्वर्थः, व्यापारः प्रत्ययार्थः। प्रत्ययार्थ[2]-व्यापारव्यधिकरणार्थ[3]वाचकत्वं सकर्मकत्वम्[4]। प्रत्ययार्थव्यापारसमानाधिकरणार्थ[5] वाचित्वं[6] चाकर्मकत्वम्[7]। कर्मत्वमपि प्रत्ययार्थव्यापारव्यधिकरणधात्वर्थाश्रय-त्वमेव[8]। घटं भावयतीत्यादौ णिच्प्रत्ययार्थ[9]व्यापारव्यधिकरणोत्पत्त्याश्रयत्व-सत्त्वात्[10]।

न चाण्यन्तेऽप्य[11]न्तर्भावितण्यर्थे "शम्भुर्घटं भवती[12]"त्यादौ प्रत्ययार्थ-समानाधिकरणव्यापारार्थक[13]त्वादकर्मकत्व[14]लक्षणातिव्याप्तिरिति शङ्क्यम्। भ्वादे-र्णिजर्थावाचकतया[15] [16]लक्षणावश्यकत्वे प्रत्ययस्यैव णिजर्थलक्षणाभ्युपगमेन सर्व-निर्वाहात्[17]। एवं प्रत्ययार्थव्यापाराश्रयत्वमेव[18] कर्तृत्वम्,[19] "देवदत्तेन चैत्रः[1]

---

[1] भार1,त1,त3,द4,भ2,त5- "मत" नास्ति

[2] त2-"अर्थ" नास्ति,भ1- "प्रत्ययार्थ" नास्ति

[3] भार1,त1,त3,1900,के4,1915,म-व्यधिकरणफल

[4] त2-सर्वकर्मत्वम्

[5] भार1,द1,त1,त3,1900,के4,1915-समानाधिकरणफल

[6] अ1-वाचकत्वं

[7] त2-वासकर्मकत्वम्,त5-वाकर्मकत्वम्

[8] भार1,त3,के4,त5,द5-धात्वर्थफलाश्रयत्वमेव

[9] जै- "णिच्" नास्ति

[10] त1,के5,द4,त5,म- "सत्त्व" नास्ति,के4- आश्रयत्वस्य सत्त्वात्,द3-व्यधिकरणोफलाश्रयत्वसत्त्वात्

[11] अ4-"अपि"इति नास्ति

[12] अ1-भावयति

[13] अ1,त3-प्रत्ययार्थव्यापारसमानाधिकरणार्थक, त2-प्रत्ययार्थसमानाधिकरणकत्वात्, द5-प्रत्ययार्थस-मानाधिकरणफलार्थक

[14] द3-"त्व" नास्ति

[15] त2-णिजर्थवाचकतया

[16] के5,म- "तत्"इत्यधिकं

[17] जै-सर्वविरहात्

[18] अ1,द5- "एव" नास्ति

[19] अ1,भार1,द1, द2,द3,द4,त1,त3,जै,1900,के4,1915 - "यथा मैत्रः पचतीत्यादौ मैत्रादेः" इत्य-धिकं

पाचयती"त्यादौ[२] णिजर्थाख्यातार्थयोराश्रयत्वादुभयोः[३] कर्तृता। अत एव "शत्रूनगमयत् स्वर्गमि"त्यादौ[४] शत्रूणां कर्तृत्वात् कर्मसंज्ञा, कर्तुरेव[५] कर्मसंज्ञाविधानात्। एवमाख्यातानां स्वार्थव्यापारान्वितकालबोधकत्वमेव। जानातीत्यादावपि[६] ज्ञानाश्रयत्वरूपे तज्ज[७]नकमनःसंयोगरूपे वा[८] व्यापार एव[९] तदन्वयो न तु धात्वर्थे। एवं चैकस्यैव धातोः फलव्यापारोभयवाचकत्वेन[१०] नानार्थता[११]दोषोऽपि परास्तः। भावे विहितघञादीनामपि व्यापारवाचकत्वस्वीकारादेव न "ग्रामो गमनवानि"त्याद्यापत्तिरपि। अत एव घञर्थ[१२]भावनान्वयादोदनस्य पाक इत्यत्र "कर्तृकर्मणोः कृती"(पा.2-3-65)ति[१३] विहिता कर्मणि षष्ठी संगच्छते। एवं कर्तृकर्मकृतामपि[१४] कारकभावनोभयवाचकत्वा[१५]"दोदनस्य पक्ते"त्याद्यपि[१६] नानुपपन्नम्।

---

मण्डनमिश्रः मीमांसकः, तन्मतानुयायिनो ब्रुवते - फलमेव धात्वर्थः॥ एवेन व्यापार व्युदासः। नन्वेवं सति व्यापार प्रतीत्यनुपपत्तिरित्याह - व्यापारः प्रत्ययार्थः॥ प्रत्ययो धातुप्रकृतिकस्तिबादिः। ननु व्यापारावाचकत्वे सकर्मकत्वादि-

---

१ जो2-मैत्रः
२ त2-यथा मैत्रः पचतीत्यादौ
३ के3,अ4-णिजर्थाख्यातार्थव्यापाराश्रयत्वादुभयोः, त्रि-दुभयोरपि
४ अ1-त्यत्र
५ द5- "गतिबुद्धीति" इत्यधिकम्
६ के4- "अपि" नास्ति, द4,भ2,द5-जानातीत्यत्रापि
७ के4- "तत्" नास्ति
८ जै-वाच्या,अ4- "वा" नास्ति
९ त3- "एव " नास्ति
१० अ1,भार1,द1,त1,1900,जै,ब1,त2,द3,भ1,1915-वाचकत्वे
११ अ1-नानार्थकता
१२ ज1-पच्यर्थ
१३ जै- "कृदर्थयोगे " इत्यधिकं
१४ के3,के4,के5,म-एवं कृतामपि
१५ के5,म-वाचित्वादो
१६ अ1- "अपि " नास्ति

लक्षणानुपपत्तिरित्यत आह – प्रत्ययार्थव्यापारेति॥ प्रत्ययस्तिबादिः तस्यार्थो व्यापारस्तद्व्यधिकरणं फलं तद्वाचकत्वं यस्य स धातुः सकर्मकः। अकर्मकत्वमाह – प्रत्ययार्थव्यापारेति॥ स्पष्टम्। कर्मलक्षणमाह – प्रत्ययार्थव्यापारव्यधिकरण-फलाश्रयत्वं कर्मत्वम्॥ सकर्मकलक्षणे प्रत्ययत्वेन प्रत्ययप्रवेशफलमाह - घटं भावयति इति॥ अत्र प्रत्ययपदेन णिच् प्रत्ययो गृह्यते। तिस्वादिना ग्रहणे तु दोष एव स्यात्। तथा च णिजर्थो व्यापारः प्रयोजकव्यापारः; तद्व्यधिकरणोत्पत्तिः घटे। अकर्मकलक्षणातिव्याप्तिं प्रदर्शयति - न चाण्यन्तेऽपीति॥ अयमाशयः - यदा शुद्धो धातुर्ण्यर्थं स्वात्मनि अन्तर्भाव्यण्यर्थविशिष्टं स्वार्थमाह तदा स अन्तर्भावितण्यर्थ उच्यते। तस्यामवस्थायामकर्मकोऽपि धातुः सकर्मको भवति। तथा च शम्भुर्घटं भवतीति सकर्मकप्रयोगः। एवञ्च प्रत्ययस्तिप् तदर्थो व्यापार उत्पत्त्यनुकूलः तस्योत्पत्तेश्च घटे सत्त्वादकर्मकत्वापत्तिः भूधातोः स्यात्। इष्यते तु सकर्मकत्व-मन्तर्भावितण्यर्थावस्थायां सकर्मकत्वात्।

परिहरति – भ्वादेर्णिजर्थावाचकत्वेति॥ णिजर्थः प्रयोजकव्यापारः प्रेरणादिरूपः, तद् वाचकत्वं भ्वादिधातूनां न सम्भवति, तत्रार्थे भ्वादीनाम् असङ्केतितत्वात्। लक्षणयैव तत्प्रतीतिर्वाच्या। एवं सति णिजर्थे न धातोर्लक्षणा अपि तु प्रत्ययस्यैवेति मत्वाह – प्रत्ययस्यैवेति॥ तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वात्। प्रत्ययलक्षणायामेव तात्पर्यविषयीभूतस्य प्रत्ययार्थव्यापार-व्यधिकरणफलवाचित्वादिरूपसकर्मकत्वस्य सिद्धेः।

प्रत्ययो णिच् ,तदर्थः लक्ष्यभूतः प्रयोजकव्यापारः, स च प्रयोजकनिष्ठः, उत्पत्तिश्च घटे, इति द्वयोर्व्यधिकरणत्वेन सकर्मकत्वमेव, न तु अकर्मकत्वापत्तिः। अयमेव निर्वाहः व्यापारवाचकत्वेऽपि। कर्तृलक्षणमाह – प्रत्ययार्थव्यापारा-श्रयत्वमिति॥ संगमयति - यथा मैत्रः पचतीति॥ अत्र प्रत्ययस्तिप् तदर्थो व्यापारस्तदाश्रयत्वान्मैत्रस्य कर्तृत्वम्। ण्यन्ते कर्तृत्वं व्यवस्थापयति - चैत्रः पाचयतीति॥ णिजर्थः प्रयोजकव्यापारः तदाश्रयत्वात् चैत्रस्य कर्तृता। पचतीत्यत्राख्यातार्थव्यापाराश्रयतया मैत्रस्य कर्तृता। उभयोः मैत्रचैत्रयोः। यद्वा णिजर्थाश्रयत्वात् चैत्रस्य आख्यातार्थव्यापाराश्रयत्वाद्देवदत्तस्येति वाच्योऽर्थः। अत एव उभयोः कर्तृत्वादेव। शत्रूनगमयत्स्वर्गमिति॥ तथा सत्येव शत्रूणां कर्तृत्वम्।

तथा च शत्रुरूपकर्तुरीप्सितत्वात् तद्वृत्तिव्यापारजन्यफलाश्रयत्वात् स्वर्गस्य "कर्तुरीप्सिततमम्" (पा.1.4.49)ति सूत्रेण कर्मसंज्ञा। किञ्च शत्रूणां कर्तृत्वादेव "गतिबुद्धी" (पा.1.4.52)तिसूत्रेण तेषां कर्मसंज्ञा। कर्तृत्वाभावे तदनुपपत्तिः, तेन सूत्रेण कर्तुरेव कर्मसंज्ञाविधानात्। ननु धातोर्व्यापारावाचकत्वे धात्वर्थान्वयिनः कालस्य कुत्रान्वय इत्याकाङ्क्षायामुच्यते – एवमाख्यातानामिति॥ स्वमाख्यातं तदर्थो व्यापारः, तन्मते व्यापारस्याख्यातवाच्यत्वात्। तादृशव्यापारान्वितः यः कालस्तस्यबोधकत्वमाख्याते। काल आख्यातार्थस्तस्याख्यातार्थे व्यापारेऽन्वयः।

ननु जानातीत्यादेर्न परिस्पन्दनात्मको व्यापार आख्यातार्थस्तथा च कालान्वयानुपपत्तिरित्यत आह - तत्र न स्पन्दनात्मको व्यापार आख्यातार्थः किन्तु आश्रयत्वम्। तज्जनकेति॥ ज्ञानजनकमनःसंयोगरूपो वा व्यापार एवाख्यातार्थः। तत्रैव कालान्वयः न तु धात्वर्थे। स्वमते लाघवमाह – एवञ्चैकस्येति॥ धातोरेकस्य फलव्यापारोभयार्थकत्वे निरूपकभेदेन शक्तिभेदान्नानार्थत्वमित्याह – नानार्थतेति॥ स्वमतेनाह - परास्त इति॥ मन्मते फलमात्रवाचकत्वादर्थभेदाभावान्न नानार्थत्वम्।

ननु फलमात्रवाचकत्वे ग्रामो गमनवानिति स्यात् त्वन्मते गमनस्य संयोगरूपत्वात् ,तव मते धात्वर्थफले एव ल्युटो विधानापत्तेरिति शङ्कायामुच्यते - भावे विहितघञादीनामिति॥ न तावन्मम मते फलार्थकत्वं भावविहितप्रत्ययानां किन्तु व्यापारार्थकत्वमेव, "भावे" (पा.3.3.18) इति सूत्रेण भावे एव तेषां विधानात्। भावश्च व्यापार एवेत्यर्थः। तथा गमनमित्यस्य न संयोग एवार्थः, अपि तु तदनुकूलो व्यापारः, तस्य च ग्रामादौ बाधात् न ग्रामो गमनवानिति प्रयोगापत्तिः। अत एवेति॥ भावविहितप्रत्ययानां व्यापारवाचकत्वादेव। ओदनस्य पाक इत्यत्र ओदनपदात् कर्मणि षष्ठी। ननु व्यापाराप्रतीतौ ओदनस्य कर्मत्वानुपपत्तिः, क्रियां विना तदनुपपत्तेरित्यत आह - घञर्थभावनायां क्रियाकर्मभावसम्बन्धेन ओदनस्यान्वयात् कर्मत्वोपपत्त्या तत्र षष्ठी सङ्गच्छते। ओदनस्य पक्तेत्यादि प्रयोगाणामुपपत्तिप्रकरणमाह – कर्तृकर्मकृतामिति॥ कर्तरि कर्मणि च ये कृतस्तेषां। कारकं कर्मादि ।भावना व्यापारश्चार्थः। तदाह – उभयवाचकत्वेति॥ पाचक इत्यादौ विक्लित्यनुकूलव्यापाराश्रय इति बोधोपपत्तये

उभयार्थकत्वं मन्तव्यम् , अन्यथा आश्रयस्य व्यापारस्य भानानुपपत्तिः। व्यापार-वाचकत्वफलमाह - ओदनस्य पक्तेति॥ तृजर्थव्यापारं प्रति ओदनस्य कर्मत्वेन ओदनस्य पक्तेत्यत्र ओदनपदात्कर्मणि षष्ठीति।

58. न चैवं कृतां नानार्थतापत्तौ[१] गौरवापत्तिः,धातुभ्यः कृतामल्पतया त्वद्रीत्या बहूनां[२] धातूनां तत्कल्पनातो लाघवाक्षतेः[३]। नन्वेवं कृञ्ज्ञानात्यादे[४] रकर्मकतापत्तिर्धात्वर्थयत्न[५]ज्ञानादि[६]व्यधिकरणव्यापारस्य देवदत्तादौ बाधादिति चेन्न, फलतावच्छेदकविषयतासंबन्धेन यत्नाद्यनधिकरणवृत्तित्व[७]रूपस्य व्यधिकरणत्वस्य तदाश्रयत्वरूपे व्यापारे सत्त्वात्। यथाश्रुते सकर्मकाणामपि[८] कालिकादि[९]संबन्धेन फलसमानाधिकरणव्यापारवाचित्वादकर्मकाणां च संबन्धान्तरेण फलव्यधिकरणव्यापारवाचित्वसत्त्वेनालग्नकतापत्ते[१०]रित्याहुः, तन्न। "क्रियते घटः स्वयमेवे"त्यनापत्तेः। "ज्ञायते घटः स्वयमेवे"त्यापत्तेर्वा। विषयतया यत्नस्येव[११] [१२]ज्ञानेच्छयोरपि तत्र[१३] सत्त्वात्। घटनिष्ठोत्पत्तेरपि[१४] कुलालज्ञानेच्छाकृतिजन्यत्वस्याविशिष्टत्वात्। किं च[१५] "पचति, पक्ष्यति[१६], पक्वानि"त्यादौ फूत्कारादीनां

---

[१] त1-नानार्थापत्तौ,के3-नानार्थकतापत्तौ

[२] जो2- "बहूनां " नास्ति

[३] ज1-लाघवापत्तेः

[४] वा2- "कृञ् " नास्ति, 1900,त्रि-कृजानात्यादे

[५] द3-फल

[६] त1- "ज्ञान " नास्ति

[७] के5-प्रवृत्तित्व,द3-फलानधिकरणवृत्तित्व

[८] 1915-सकर्मणामपि

[९] त1,भ1,त5,ब3-कालादि

[१०] भ2-कतापत्ति

[११] अ1- "यत्नस्येव " नास्ति

[१२] अ1- "आत्म " अधिकं-

[१३] भ3,द6- "तत्र" नास्ति

[१४] अ1- "अपि " नास्ति

[१५] जै-"किं च" नास्ति, द4- "च" नास्ति

[१६] के5,म- "पक्ष्यति" नास्ति

प्रतीतये[१]ऽनेकप्रत्ययानां तत्र शक्तिर्वाच्येति शक्ततावच्छेदकानन्त्यादनेकशक्ति-कल्पनागौरवापत्तिः[२]। अस्माकं पचधातो[३] रैक्याच्छक्त्यैक्येन[४] लाघवम्। किं च[५] फूत्कारादेः प्रत्ययार्थत्वे[६] "गच्छती" त्यादावपि तत्प्रतीत्यापत्तेस्तद्बोधे पच[७]धातु-समभिव्याहारः कारणं वाच्य इति पचेरेव शक्तिर्युक्ता[८]। अन्यथा "पूर्वापरीभूतं[९] भावमाख्यातमाचष्टे[१०], यथा पचति व्रजतीत्युपक्रम[११]प्रभृत्यपवर्गपर्यन्तमि"ति निरुक्त[1]विरोधश्च[१२]। अत्राख्यातशब्दस्य धातुपरताया[१३] वक्ष्यमाणत्वात्।

अपि चास्त्यादौ[१४] सत्ताद्येव[१५] व्यापारः। अवच्छेदकता[१६]रूपा व्याप्तिः फलम्। अत एव "मासं भवती"त्यादौ[१७] मासादेः कर्मतेति वक्ष्यते। तथा चात्र[१८] भवद्भिः प्रत्ययानां सत्तादौ[१९] पृथक् शक्तिः कल्प्या। धातूनां च[२०] सा त्याज्येति[२१] महद् गौरवं स्यात्।

---

[१] अ1- "प्रतीतये " नास्ति

[२] ज1-शक्ततावच्छेदकशक्तिकल्पनागौरवापत्तिः

[३] जै- च धातो, अ1,के3,के4,अ4-पचिधातोः

[४] त2-रैक्याच्छक्येन

[५] वा2-"किंच" नास्ति

[६] अ1- "च " अधिकं-

[७] के3,के4,अ4-पचि

[८] भ2-तद्धेतोरिति न्यायादिति भावः इति टिप्पणी

[९] अ1-भूत

[१०] ब1-माख्यातेनाचष्टे, के3,के5,अ4-भावनामाख्यात

[११] भ2-व्रजत्युपक्रम

[१२] अ1-निरुक्तविरोधाच्च

[१३] द1-धातुपरतया

[१४] अ1-भ्वादौ

[१५] भ2-सत्तैव

[१६]अ4- "ता" नास्ति

[१७] भ2-मासनिष्ठव्याप्त्यनुकूलः सत्ताख्यो व्यापार इति बोधः इति टिप्पणी

[१८] भ2-अत्र-अस्त्यादौ इति टिप्पणी

[१९] के3-संज्ञादौ

[२०] अ1,भार1,त3-"च" नास्ति

[२१] ज1-वाच्येति

उक्तरीत्या कृतां कारकभावनावाचकत्वे गौरवमाक्षिप्यते - न चैवमिति॥ एवं कृतां कारकभावनोभयवाचकत्वे गौरवापत्तिः, गौरवे हेतुमाह - नानार्थतापत्तौ इति॥ अर्थभेदे हि नानार्थत्वम् उभयार्थकत्वेऽर्थभेदात्। उक्तापत्तिं परिहरति - धातुभ्य इति॥ कृतः परिगणिताः धातवस्तु ततोऽधिकाः। धातूनां व्यापार-वाचकत्वेऽधिकेषु वाचकत्वकल्पना। तदपेक्षया न्यूनसंख्याकेषु कृत्सु व्यापारवाचकत्वे लाघवम्।

ननु त्वन्मते प्रत्ययार्थव्यापारव्यधिकरणफलवाचित्वं सकर्मकत्वमभिमतम्, तच्च करोति जानात्यादेरनुपपन्नमित्याह - ननु कृञ्ज्ञानात्योरित्यादिना॥ करोतेर्यत्नः जानातेश्च ज्ञानम् अर्थः। तदनुकूलो व्यापारस्त्वन्मतेऽस्तु प्रत्ययार्थः। तदा च यत्नादिफलस्य प्रत्ययार्थव्यापारस्य च देवदत्तादिकर्तरि वर्तमानत्वम्। तथा च फलव्यापारयोः सामानाधिकरण्यादकर्मत्वापत्तिरिति पूर्वपक्षः। व्यधिकरण-व्यापारस्य बाधात् समानाधिकरणव्यापारस्यैव सत्त्वात्।

उत्तरेण शङ्कां निरस्यति –चेन्नेत्यादिना॥ सकर्मकलक्षणे वैयधिकरण्यं न तावद् येन केनापि सम्बन्धेन ग्राह्यम् अपि तु फलतावच्छेदकसम्बन्धेनैव। तथा च यत्नादेः फलतावच्छेदकसम्बन्धो न समवायः, अपि तु विषयतारूपस्तेनात्र वैयधिकरण्यं विवक्षितम्। तथा च फलतावच्छेदकविषयतासम्बन्धेन यत्नज्ञानादि घटादौ तत्र व्यापारस्यासत्त्वेन यत्नाद्यनधिकरणवृत्तिरूपं वैयधिकरणं व्यापारे अक्षतमिति पूर्वशङ्काया अनवसर एव। अत्र व्यापार आश्रयत्वरूपस्तदाह - तदाश्रयत्वरूपे व्यापारे इति॥

फलतावच्छेदकसम्बन्धाग्रहणे दोषमाह - यथाश्रुते सकर्मकाणामपीति॥ यथाश्रुते येन केनापि सम्बन्धेन वैयधिकरण्यस्य विवक्षितत्वे। सकर्मकाणामपि पचतीत्यादीनां निश्चितसकर्मकत्वानामपि। फलव्यापारयोरुभयोरपि कालिकादि-सम्बन्धेन कालवृत्तित्वेन सामानाधिकरण्यात् अकर्मकत्वापत्तिः। यती प्रयत्ने इत्यादीनामकर्मकाणामपि विषयत्वादिसम्बन्धेन फलवैयधिकरण्यमादाय तादृशयत्नव्यधिकरणव्यापारवाचकत्वेन सकर्मकत्वापत्तिरिति भावः। इत्याहुः मण्डनमिश्रमतानुयायिनः।

इतःपरं उक्तं प्रपञ्चं सयुक्ति निरस्यति – तन्नेति॥ क्रियते घट इत्यादिना॥ फलमात्रवाचकत्वे यथा ग्रामो गम्यते स्वयमेवेति न भवति तद्वत् फलमात्रवाचकत्वाविशेषात् कृधातावपि कर्मवद्भावानुपपत्तिः। यदि हठात् स्वीक्रियते तदा तुल्यन्यायाद् आह - ज्ञायते घट स्वयमेवेत्यापत्तेर्वेति॥ तदेवोपपादयन्नाह – विषयतयेति॥ यथा कृञर्थो यत्नो विषयतया घटादौ कर्मणि वर्तते। तथैव ज्ञानेच्छयोरपि घटं जानाति इच्छतीत्यादौ तत्र घटादौ सत्त्वेन तद्योगे कर्मवद्भावापत्तिः। ननु घटः क्रियते स्वयमेवेत्यत्र धात्वर्थयत्नकृतो विशेष उत्पत्तिरूपो घटेऽस्तीति स्यादेव कर्मवद्भावः, घटः स्वयमेव ज्ञायते इत्यत्र तु नोत्पत्तिर्धात्वर्थज्ञानजन्येति विशेषान्न भवति कर्मवद्भाव इत्यत आह – घटनिष्ठोत्पत्तेरपीति॥ उत्पत्तेर्यत्नजन्यत्वमिव कुलालज्ञानेच्छाजन्यत्वमपि। ज्ञानजन्या भवेदिच्छा, इच्छाजन्या भवेत्कृतिरिति नियमात्। तथा च ज्ञानादिजन्योत्पत्त्याश्रयत्वेन घटः क्रियते स्वयमेतिवत् ज्ञायते घटः स्वयमेवेत्यापत्तेस्तादवस्थ्यमेव। प्रतीतिबलादपि व्यापारस्य धातुवाच्यत्वं साधयति - किञ्च पचति पक्ष्यतीति॥ अयमाशयः - यदुच्चारणानन्तरं यत्प्रतीयते तत्तस्य वाच्यमिति सर्वसिद्धनियमेन पचति पक्ष्यतीत्यादिप्रयोगानन्तरं फूत्कारादयः प्रतीयन्तेऽतस्ते वाच्यत्वेनैष्टव्या एव। तत्रैवं सति जिज्ञास्यते यदयं फूत्कारादिः प्रतीयते तत्कस्यार्थः, धातोः प्रत्ययानां वेति संशये धातोरेव वाच्या न तु प्रत्ययानाम्। प्रत्ययानां तिबादिरूपाणाम् नानात्वात् धातोश्च पचति पक्ष्यतीत्यादौ एकरूपत्वात्। तथा च प्रत्ययेषु शक्तिकल्पने वाचकतावच्छेदकनानात्वम् , तिप्त्वादि भेदात्। तथा चानेकशक्तिकल्पनापत्तिः। पचादीनां वाचकत्वे पच्त्वादिरूपम् तत्तत्स्थले एकरूपमेवेति न शक्तिनानात्वम्। वाचकत्वं शक्तिरिति पक्षमादाय शक्तिनानात्वोक्तिः। तदाह – अस्माकमिति॥ पचधातोरैक्यादिति॥ पच् धातुः पच्त्वेन फूत्कारादीनामुपस्थापकः। पच्त्वमेव शक्ततावच्छेदकम्। एकैव शक्तिरिति लाघवमित्यर्थः। ननु क्वचित् पच्त्वम् क्वचित् पठ्त्वमिति रीत्या धातोर्वाचकत्वपक्षेऽपि शक्ततावच्छेदकगौरवमित्यत आह - किञ्च फूत्कारादेरिति॥ तिबादिप्रत्ययानां वाचकत्वे पचतीत्यत्र तिप्त्वेन तिपः फूत्कारादिवाचकत्वमावश्यकम्। तथा च गच्छतीत्यादौ तिप्त्वेन तिपः सत्त्वात्तत्रापि फूत्कारार्द्यथकत्वापत्तिः। ननु तिप्त्वेन फूत्कारवाचकत्वे पच्धातुसमभिव्याहारस्य

कारणत्वेन गम्यादिस्थले तादृशसमभिव्याहाराभावे तत्र नास्ति फूत्कारप्रतीत्यापत्तिरिति शङ्कमानं प्रत्याह - पचेरेव शक्तिर्युक्तेति॥ पच्समभिव्याहारस्य कारणत्वे तद्वरं धातोरेव शक्तिर्निश्चीयताम्। धातोः शक्तत्वे उक्तलाघवमपि। धातोरवाचकत्वे निरुक्तविरोधश्च। तदाह - अन्यथेति ॥ तिबादिप्रत्ययानां फूत्कारादिवाचकत्वे पूर्वापरीभूतं भावमाख्यातमाचष्टे यथा पचति व्रजतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तमिति निरुक्तम् विरुध्येत। तदर्थश्चेत्थम् - आख्यातं धातुपदं पूर्वापरीभूतं पूर्वापरावयकं क्रमिकम् भावं क्रियां फूत्कारादिरूपामाचष्टे अभिधत्ते। उदाहरणमाह – पचतीति॥ उपक्रम आरम्भः आद्यवयवारम्भः फूत्काराद्यवयवकः। प्रभृतिशब्दस्य आद्यवयवपरत्वात्। अपवर्गः फलप्राप्तिस्तत्पर्यन्तम् फलप्राप्तिं यावत् यावन्तो व्यापाराः फूत्कारादयस्तेषां यः समुदायः कल्पिताभेदः, स एव धातुवाच्य इत्यर्थः। एवमेव व्रजतीत्यत्रापि ऊह्यम्।

ननु आख्यातस्य न धातुपरत्वम्। किन्तु तिबादिपरत्वमेवे-त्यत आह - आख्यातपदस्य धातुपरताया वक्ष्यमाणत्वात् इति॥ आख्यातशब्दे भागाभ्यामिति कारिका व्याख्यायाम् इति शेषः।

अपि चेति॥ अस भुवि इत्युक्तेः, भूधातोः सत्तार्थकत्वेन अस्तेरपि सत्तैव व्यापाररूपा वैयाकरणमते सा धात्वर्थः। फलं किमित्याह – अवच्छेदकतेति॥ व्याप्तिः सम्बन्धः, इदमवच्छेदकत्वं स्वरूपसम्बन्ध एव।अयमभिप्रायः - घटो भवतीत्यादौ फलव्यापारयोः सामानाधिकरण्योपपत्तये फलव्यापारयोः घटे एव वृत्तिता ग्राह्या। तथा च सत्ता घटे, सत्तायाश्च ब्रह्मरूपत्वेन सर्वत्र विद्यमानत्वेन अवच्छेदकत्वसम्बन्धेन घटेऽपि वृत्तिता। यथा अभिन्नमेकं व्यापकमपि आकाशम् घटावच्छिन्नमित्युच्यते। तत्र आकाशावच्छेदको घटादिः। तथैवात्रापि बोध्यम्। घटावच्छिन्ना सत्तेति बोधः। अत्र हि सत्ताया अवच्छेदकत्वस्य च फलव्यापारयोर्घटरूपैकाधिकरणवृत्तित्वेन अकर्मकत्वमपि। मासं भवति इति॥ अवच्छेदकतारूपफलाश्रयत्वेन मासस्य कर्मतेति भावः। सत्ताया व्यापाररूपाया आख्यातार्थत्वे दोष उच्यते - तथा च अत्र भवद्भिरिति॥ धातुना प्रतीयमाना सत्ता त्वया प्रत्ययवाच्या स्वीक्रियते, तथा क्लृप्तत्यागः अक्लृप्तकल्पना त्वया क्रियत इति महद्गौरवम्।

**59.** ननु तवापि "भवती"त्यादौ सत्तावद् व्याप्ते"र्ज्ञानं कृतिरि"त्यादौ विषयत्वो[१]त्पत्त्यादेश्च बोधापत्तिर्दुर्वारा, फलेऽपि शक्तिसत्त्वादिति चेन्न,

एकदेशे[२] समूहे वा व्यापाराणां पचादयः।
स्वभावतः प्रवर्तन्ते तुल्यरूपं[३] समाश्रिताः॥ (वा.प.तृ.सा.58)

इति वाक्यपदीयोक्तरीत्या निरस्तत्वात्[४]। [५]गवादिपदानां गोवागिन्द्रिय[६] पृथिव्याद्यनेकार्थत्वेऽपि[७] प्रसिद्धितदभावाभ्यां शीघ्रं वागाद्यबोधगोबोध[८]-योरिवोपपत्तेश्च।

[९]अपि च "गुरुः शिष्येण पाचयती[१०]"त्यत्र गुरुव्यापारस्य प्रयोजकव्यापारत्वेन णिजर्थत्वे स्थिते तस्याख्यातार्थप्रयोज्यव्या[११]पारं प्रति प्रकृत्यर्थत्वाद-प्राधान्यापत्तिः। आख्यातार्थव्यापारानन्वयिनि [१२]संख्यान्वयासंभवात्[१३] तदनभिधानेन[१४] गुरौ प्रथमानापत्तेः शिष्ये प्रथमापत्तेश्चेत्यादि[१५] स्पष्टं चैतद् विवेचयिष्यामः[१६]।

---

[१] त2-विषयो

[२] भ2-फले इत्यर्थः इति टिप्पणी

[३] त5-तुल्यं रूपं

[४] भ2-अत्र च व्यापारस्यैव प्रतीतिरिति भावः इति टिप्पणी

[५] त3,के3,के5,म,अ4-"अथवा"इत्यधिकं

[६] के3,के5,म,अ4- "इन्द्रिय" नास्ति

[७] त1,त5-नेकार्थवत्वेऽपि, जो2-नेकार्थकत्वेऽपि

[८] त2,द3-"गोबोध " नास्ति

[९] भ2-ननु तुल्यरीत्या समाश्रिता इत्युक्तत्वात् भवतीत्यादौ फलस्यैव भानमस्तु अतः समाध्यन्तरमाह- इति टिप्पणी

[१०]अ1-याति, त2-पचती

[११]द4- "गवादिपदानाम् " इत्यारभ्य "प्रयो" पर्यन्तमत्र नास्ति। परन्त्वग्रे "अथ फलमात्रं" इत्यस्मा-त्पूर्वं वर्तते।

[१२] द4- "संख्यान्वयिनि " अधिकम्

[१३] द1-"अन्वय" नास्ति

[१४] जो2-तदभिधानेन,त2-"तत् " नास्ति

[१५] अ1-प्रथमापत्तिश्चेत्यादि, के5- "इत्यादि" नास्ति

[१६] जै-"गवातिपदानाम्" इत्यारभ्य "विवेचयिष्यामः"इत्यन्तं ग्रन्थः नास्ति

अथ फलमात्रं न धात्वर्थः,किं तु व्यापारोऽपि। तथा च धात्वर्थव्यापाराश्रयत्वमेव कर्तृत्वं, तदर्थफलाश्रयत्वं च कर्मत्वम्। एवं च न[१] सकर्मकत्वाकर्मकत्व-विभागोच्छेदोऽपि। भावे विहित[२]घञादीनां च धात्वर्थानुवादक[३]त्वान्न "पाको भवति, अभूदि"[४]त्यनयोरनापत्तिः। स्वीकृतं च धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम्। फलावच्छिन्नव्यापारबोधकत्वादेव धातूनां सकर्मकत्वाकर्मकत्वविभाग[५] इति[६] वदद्भिर्नैयायिकैरपि तथेति चेत्, तर्हि[७] सिद्धमस्मन्मतम्। धातोर्व्यापारशक्तावेव यत्नस्याप्यनुप्रवेशेन[८] विक्लित्त्यनुकूलयत्नप्रत्ययसिद्धेराख्यातस्य स्वातन्त्र्येण यत्ने[९] शक्ते[१०]र्मानाभावाद् गौरवाच्च सिद्ध्यसंभवात्। न हि पचतीत्यादौ विक्लित्त्य-नुकूलव्यापारानुकूलयत्नवानिति[११] प्रत्यय[१२] आनुभविकानाम् येन[१३] तदनुरोधेना-ख्यातस्य पृथक् शक्तिः स्यात्।

---

तव वैयाकरणमते फलानुकूलो व्यापारो धात्वर्थः न तु फलमात्रमर्थः। तथा च भवतीत्यत्र यथा सत्ता प्रतीयते तथा व्याप्तिरूपं फलमपि प्रतीयताम् फलस्यापि धात्वर्थत्वात् ।तथा च यथा मासं भवतीति व्याप्तिरूपफलाश्रयत्वेन मासादेः कर्मता तथैव घटो भवतीत्यादावपि व्याप्त्याश्रयत्वेन घटादेः कर्मत्वेनाकर्मकप्रयोगो भूधातोर्न स्यात्। ज्ञानं कृतिरित्यादावपि विषयत्वरूपस्य उत्पत्तिरूपस्य च

---

[१] अ1- "न " नास्ति

[२] त1-"तद्" इत्यधिकं

[३] द1,1900-धात्वर्थव्यापारानुवादक

[४] त1-पाको भवत्युक्तोऽभूदि

[५] अ1- सकर्मत्वाकर्मकत्वविभाग

[६] अ1- "इति " नास्ति

[७] भ3-"तर्हि"नास्ति

[८] त1,त3,के4,त5-"अपि" नास्ति

[९] द6-यत्नशक्ते

[१०] त2-"शक्तेः " नास्ति

[११] अ1,जै,के3,के5-विक्लित्त्यनुकूलफूत्काराद्यनुकूलयत्नवानिति, ज1- विक्लित्त्यनुकूलयत्नवानिति

[१२] त2-प्रत्ययो वा

[१३]अ1,त1,द1,द3,ब3,त5-आनुभविको लोकानाम् येन, त3- त1,द1-आनुभविको नामधेयेन, त्रि-आनुभविकानां लोकानां येन

बोधापत्तिः। तदाह - फलेऽपि शक्तिसत्त्वात् इति॥ दोषमुद्धरति – चेन्नेति॥ एकदेशे समूहे वेति॥ पचादयः क्वचित् एकदेशे फूत्कारादौ, समूहे फूत्कारादिषु सर्वेषु व्यापारेषु समुदायात्मकेषु बुद्ध्या प्रकल्पिताऽभेदेषु वा प्रवर्तन्ते बोधयितुम् , यथा वर्तमाने फूत्कारमात्रे पचतीति प्रयोगः। वर्तमानेऽपि अन्तिमे व्यापारे यदा पचतीति प्रयुज्यते तदा समुदायात्मक एव व्यापारः पचिना अभिधीयते। अपचत् पक्ष्यतीत्यादौ तु सर्वथा समुदायात्मकं व्यापारं पचिरभिधत्ते। ननु पच्यादेरियमनेकधा कथं प्रवृत्तिरित्याह - स्वभावत इति॥ शब्दशक्तिस्वभावात्। तुल्यरूपमिति॥ सर्वत्रापि पचित्वादिनैव प्रवृत्तेः। तथा च पचित्वेनैव पच् धातुरुक्तमर्थं वदतीति भावः। अनेन प्रकृते किमायातमिति चेच्छृणु। धातोरयं स्वभावः यदयं प्राधान्येन व्यापारमेवाभिधत्ते, तदेकदेशं समूहं वेत्यन्यदेतत्। फलमपि यद्यपि धात्वर्थस्तथापि कर्मपदसमभिव्याहारे एव तस्य स्पष्टो बोधः, अतः ज्ञानं कृतिरित्यादौ व्यापार एव प्रतीयते। ज्ञानमित्यत्र विषयत्वस्य कृतिरित्यत्र उत्पत्तेश्च वर्तमानत्वेऽपि यथा कर्मपदसमभिव्याहारे तत्प्रतीतिस्तथात्र न भवतीति।

एवं प्रतीतौ दृष्टान्तमाह – गवादिपदानामिति॥ गोशब्दोऽनेकार्थः, गोवागिन्द्रियपृथिव्यादिषु शक्तत्वात्। किन्तु गोपदोच्चारणे प्रसिद्ध्या गोपशोरेव झटिति बोधो जायते, इन्द्रियादीनां न तथा प्रतीतिः, प्रकरणादिवशादन्यपदसमभिव्याहाराद् वा विलम्बेन। तथैव उक्तहरिकारिकानुसारेण यत्र कर्मपदसमभिव्याहारो नास्ति तत्र व्यापारस्यैव बुद्धिविषयतेति भावः। दोषान्तरमाह - अपि च गुरुः शिष्येणेति॥ शिष्यः पचति, गुरुः प्रेरयति। अत्र शिष्यस्य प्रयोज्यकर्तुरनुक्तत्वेन तृतीया। गत्यादिषु अनुक्तत्वात् न शिष्यस्य कर्मसंज्ञा। गुरोश्चाख्यातेनोक्तत्वात् प्रथमेति वैयाकरणमतम्।

मीमांसकस्य तव मते नेयं व्यवस्था सम्भवति। तदेवोपपादयति - गुरुव्यापारस्य प्रयोजकव्यापारत्वेनेति॥ गुरुरत्र प्रयोजककर्त्ता, तदीयः प्रेरणादिव्यापारः प्रयोजकव्यापारः स एव णिजर्थः। तव मते आख्यातार्थव्यापारस्यैव प्राधान्यात् आख्यातार्थस्तव मते प्रयोज्यव्यापार एव। न तावत्सः धातोरर्थः तव मते फलमात्रस्य धात्वर्थत्वात्। नापि णिचाऽभिधातुं शक्यः, प्रयोजकव्यापारस्यैव तेनोपस्थापनात् । पर्यवसानतया आख्यातेनैव प्रयोज्यव्यापारोऽभिधातुमिष्यते।

तथा सति आख्यातार्थप्राधान्यवादिनस्तव मते प्रयोजकव्यापारस्य तदपेक्षया अप्राधान्यापत्तिः। द्वितीयदोषमाह - आख्यातार्थव्यापारान्वयिनि इति॥ देवदत्तः पचतीत्यादिस्थले तवमते आख्यातार्थो व्यापारस्तदन्वयी देवदत्तस्तत्रैव संख्यान्वयः। णिजन्तस्थले एवं वक्तुमशक्यम्। गुरुः शिष्याभ्यां पाचयतीत्यादौ आख्यातार्थ-व्यापाराश्रयौ शिष्यौ तत्र संख्यान्वये गुरुः शिष्याभ्यां पाचयत इति प्रयोगापत्तेः। तदाह - आख्यातार्थव्यापारानन्वयिनि संख्यान्वयासम्भवादिति॥ किञ्च तव मते उक्तानुक्तव्यवस्था आख्यातार्थसंख्याभिधानानभिधानद्वारा क्रियते। आख्यातार्थ-संख्याभिधाने तदाश्रयस्याभिधानमित्यर्थः। तथा च णिजन्तस्थले आख्यातार्थ-संख्या प्रयोज्यगतसंख्या, तस्याः आख्यातेनाभिधाने उक्तस्थले गुरोरनभिधानेन ततः तृतीया, शिष्यगतसंख्याभिधानात् शिष्यपदात् प्रथमैव स्यादित्याह - गुरौ प्रथमानापत्तेः शिष्ये प्रथमापत्तेश्चेति॥

अथ फलमात्रं न धात्वर्थ इति॥ मीमांसकैकदेशिमतमाह। मात्रशब्देन व्यापारव्यावृत्तिः। व्यापारोऽपीति॥ फलसहितो व्यापार इत्यर्थः। अत्र कर्तृत्व-कर्मत्वसकर्मकत्वादिविभागमाह -तथा च धात्वर्थव्यापाराश्रयत्वमित्यादिना॥ फलव्यापारयोरुभयोर्वाच्यत्वे वैयाकरणरीत्यैव सर्वं समञ्जसमित्यर्थः। उभयार्थकत्वे फलमात्रवाचकत्वपक्षदोषा न सम्भवन्ति इति आह - भावे विहितेति॥ फलमात्रस्य धात्वर्थत्वे पाकादिपदस्य न व्यापारोऽर्थः, किन्तु फलमेव स्यात् तथा च पाको भवतीति न स्यात् व्यापारारम्भे पाकपदार्थफलस्यावर्तमानत्वात्। व्यापारविगमे फलस्य वर्तमानत्वेन पाकोऽभूत् इति न स्यात्। व्यापारवाचकत्वे तु व्यापारस्य सत्त्वात् पाको भवतीति प्रयोगः, इदानीं पाकपदस्य व्यापारे एव व्युत्पन्नत्वात् व्यापारविगमे पाकपदार्थव्यापारोऽभूदिति प्रयोगश्चाञ्जस्येन जायते। एवमादिरीत्या ये वदन्ति ते तु वैयाकरणानुयायिन एवेत्याह - तर्हि सिद्धमस्मन्मतमिति॥

यत्नोऽपि व्यापार इव धात्वर्थ इत्याह – धातोर्व्यापारशक्ताविति॥ फल व्यापारौ धात्वर्थः। तथा च धातोः व्यापारे शक्तिरित्यायाति। एवेन पृथक् शक्तिः निवारिता यया शक्त्या धातुना फलव्यापारौ अभिधीयेते तयैव यत्नोऽपीति बोध्यम्। यत्नस्याप्यनुप्रवेशेनेति॥ अविनाभावादित्यर्थः। न हि यत्नमन्तरा व्यापारसम्भवः। व्यापारशक्त्यैव विक्लित्यनुकूलयत्नप्रतीतिः सिध्यति। न तत्प्रतीत्यर्थं पृथक् शक्तिः

कल्प्या एकवृन्तगतफलद्वितयादिन्यायाद्वा। तदाह - आख्यातस्य स्वातन्त्र्येण शक्तौ मानाभावात्। ननु पचतीत्यादौ यत्नप्रतीतिरेव मानमित्यत आह - गौरवात् । एकशक्त्यैव प्रतीतिसम्भवे पृथक् शक्तिकल्पनायां गौरवात्। आभ्यां हेतुभ्यां सिद्धेः असंभवः साध्यते। मानाभावात् गौरवाच्च स्वातन्त्र्येण यत्ने शक्तेः सिद्ध्यसम्भवादित्यन्वयः।

उपपत्तिमाह - न हि पचतीति॥ आनुभविकानाम् अनुभवशीलानाम् यत्नप्रत्ययो नेत्यर्थः। मूलोक्तो बोधो यदि नास्ति तदा तत्र पृथक् शक्तिर्नास्ति इति भावः। ननु अनुपदमेव यत्नस्यानुप्रवेशेनेत्यादिना यत्नप्रतीतेरुक्तत्वेन तत्प्रतीत्यभावकथनमनुपपन्नमिति चेदिदं बोध्यम्। स्वातन्त्र्येण यत्ने शक्तिस्वीकारे सर्वत्रापि तद्बोध आवश्यकः स्यात् , व्यापारशक्तावेवानुप्रवेशे स बोधः क्वाचित्कः कादाचित्क एवेति विशेषः।

अत्रेदमपि बोध्यम् - यत्नव्यापारयोरेकार्थकत्वमादायापि ग्रन्थस्यास्य स्थापनं कर्तुं शक्यते। अत एव व्यापारानुकूलयत्नवानिति बोधस्यानुभवानारूढत्वमूक्तम्। किन्तु पुस्तके यत्नस्य अपीत्युक्तेः मदुक्तं व्याख्यानमेव साधु प्रतीयते।

**60.** न चैवं यत्नत्वरूपेण[1] बोधो न स्यात्, धात्वर्थव्यापारे फलस्यैवावच्छेदकत्वादिति शङ्क्यम्। पचतीत्यादावधःसंतापन[2]फूत्कारादेर्विशिष्यबोधानुरोधेन विशिष्यैव[3] तद्वाच्यत्व[4]कल्पनात्। फूत्का[5]रत्वयत्नत्वादिभिः शक्तौ धातोर्नानार्थतापत्तिरिति[6] चेत्, किं कुर्मः[7]? यत्नमात्रांशत्यागेऽप्यधः संतापनत्व[8]फूत्कारत्वचुल्ल्युपरिधारणत्वरूपेण

---

[1] त2-"रूपेण " नास्ति,भ2-यत्नत्वेन रूपेण

[2] अ1-सन्तपन

[3] त2-विशेष्यस्यैव

[4] द4- "त्व " नास्ति

[5] त2-" फूत्का" नास्ति

[6] अ1-नानार्थत्वापत्तिरिति, जो2-नानार्थत्वमिति, द5- नानार्थतापत्तेरिति

[7] भ2-अस्तु नानार्थतापत्तिरिति भावः इति टिप्पणी, 1915-कुर्मोः

[8] अ1-सन्तपनत्व,द3-"फूत्कारत्वयत्नत्व" इत्यारभ्य "सन्तापनत्व" पर्यन्तं ग्रन्थः नास्ति

बोधानुरोधेनास्य दुष्परिहार्यत्वात्[१], नैयायिकनवीनानामाख्यातस्य फलवाचकत्वेऽपि तदादिन्यायेन नानार्थत्व[२]परीहार[३]वद् वाऽस्याप्युपपत्तेः। एवं च करोतिरपि[४] धात्वंशस्यैव[५] विवरणम्। अत एव पक्तेत्यादावपि कृतिबोधाय पृथक् शक्तिर्न कल्प्येत्यतिलाघवं[६] स्यात्।

न च पचति पाकं करोतीति विवरणं न स्यात्[७] कृत्यनुकूलकृत्यभावादिति शङ्क्यम्। तत्र पाकशब्दस्य विक्लित्तिमात्राभिप्रायकत्वात्। अत एव फलानुत्पाददशायां[८] पाको जातो न वेति प्रश्ने भविष्यतीत्यपि प्रत्युत्तरं दृश्यते। व्यापारान्तर्भावेण प्रश्ने जायत इत्यपि दृश्यते।

अत एवौदनस्य पाक इति कर्मकारकान्वयः। अन्यथा भावनाया अनुक्तावनन्वयापत्तेः[९]। कारकाणां क्रियायामेवान्वयस्य वाजपेयाधिकरण (मी.1-4-6) सिद्धान्त[१०]मूलत्वात्।

न चाक्षिप्ततिङर्थान्वय इति भ्रमितव्यम्, लादेशयोगे षष्ठ्या असंभवस्य[११] वक्ष्यमाणत्वात्। "यतते यत्नं करोती"तिवद् विवरणोपपत्तेश्च।

न च फलजनकव्यापारस्यैव धात्वर्थत्वाद्[१२] यत्नस्य चेष्टादिभिरन्यथासिद्धस्य कथं धात्वर्थतेति भ्रमितव्यम्, कुलालतद्यत्नादे[१३]र्घटादिजनकत्वानापत्त्या[१] व्यापारेणा-

---

[१] अ1-दुष्परिहारत्वात्

[२] के3,अ4-नानार्थकत्व

[३] अ1,भार1,द1,त1,त3,त2,जो2,भ2-परिहार

[४] के3,के5-करोतिः,अ4-करोतिरिति

[५] अ1-धत्वर्थस्यैव

[६] जै- "अति" नास्ति

[७] त2-" न च पचति पाकं करोतीति विवरणं न स्यात्" नास्ति

[८] अ4-फलानुत्पत्तिदशायां

[९] अ4-अनुक्तावन्वयापत्तेः

[१०] जै,त2,द6,द7,ब2-सिद्धान्ते

[११] ज1-षण्णामसम्भवस्य

[१२] के4-धात्वर्थात्,के5-धात्वर्थत्वं स्यात्

[१३] अ1-कुलालवद्यत्नादे, त1,जो2,1900,1915- "तद्" नास्ति

न्यथासिद्धत्वस्य[२] सर्वशास्त्रेषु[३] निराकृतत्वादिति[४]। वक्ष्यते चान्य[५]दुपरिष्टादित्यादि सर्वमभिप्रेत्याह -

9.1 मण्डनानुयायिमतखण्डनम्

तस्मात् करोतिर्धातोः[६] स्याद् व्याख्यानं न त्वसौ तिङाम्।
पक्ववान् कृतवान् पाकं किं कृतं पक्वमित्यपि॥ 8॥

तस्मादाभिप्रायका[७]दुक्तहेतोः। धातो[८]रित्यादि।

---

ननु यत्ने स्वातन्त्र्येण शक्त्यस्वीकारे पचतीत्यादौ यत्नत्वरूपेण बोधानुपपत्तिरिति शङ्कते - न चेत्यादिना॥ यत्नत्वेन बोधाभावे हेतुमाह - धात्वर्थव्यापारे फलस्यैवा- वच्छेदकत्वादिति॥ फलं विक्लित्यादि। तस्यैव अवच्छेदकत्वात् विशेषणत्वात्। शङ्कामपनुदति – पचतीत्यादाविति॥ पचतीत्युक्तौ फूत्कारादीनां विशेषरूपेण बोधः। अतः फूत्कारादिषु विशेषेषु वाच्यता। न तु व्यापारसामान्यमात्रे। तथा च पचतीत्यादौ यथा फूत्कारादयः प्रतीयन्ते यत्नोऽपि तथैव तद्वारापतिततया प्रतीयताम्। न तु स्वातन्त्र्येण प्राधान्येन वा। अयमेवार्थः अस्य ग्रन्थस्य प्रतीयते। अत एव फूत्कारत्वयत्नत्वादिभिरित्याद्यग्रिमशङ्काग्रन्थः सङ्गच्छते। अन्यथा यत्नस्याप्रतीतौ तस्यानवच्छेदकत्वे गौरवकुक्षौ तस्योपादानानुपपत्तिरेव स्यात्।

फूत्कारत्वादिभिर्विशेषबोधे गौरवमाह - नानार्थतापत्तिरिति ॥ फूत्कारत्वयत्नत्वादिभिः वाच्यत्वस्वीकारेऽवच्छेदकनानात्वेन नानार्थतापत्तिरिति भावः। गौरवस्यानिवार्यत्वमाह - किं कुर्म इति॥ अनुभवबलाद् गौरवमस्तीति किं कुर्मः?

---

[१] अ1,द4-घटजनकतानापत्त्या

[२] ब1-सिद्धस्य,अ1,के5,अ4-व्यापारेण व्यापारिणोऽन्यथासिद्धत्वस्य

[३] के5,अ4-सर्वशास्त्रे

[४] के5- "इति" नास्ति

[५] त5-वान्य

[६] अ4,के5-करोति धातोः

[७] के4,के5,अ4-आभिप्रायिका

[८] त2,अ4-" धातो" नास्ति,द2-रित्यादिः

परिहारस्य कथयितुमशक्यत्वात्। नैयायिकनवीनानामिति॥ तैः कर्मस्थले आख्यातस्य फलवाचकत्वं स्वीक्रियते। तत्रापि न हि फलत्वेन वाच्यत्वम् अपि तु विक्लित्तित्वादिनैव। तथा सति विक्लित्तित्वादीनामवच्छेदकत्वे नानार्थतापत्तौ यथा तदादिन्यायेन समाधानं तथेहापीति भावः। वेति॥ अस्य फूत्कारत्वादे-रवच्छेदकत्वेऽदोषस्योपपत्तेः सिद्धेः। पाकं करोतीति विवरणस्वरूपे करोतीति विवरणमाख्यातस्येति यदुक्तं तत्र स्वमतमाह - एवञ्च करोतिरपीति॥ करोतीति धात्वंशस्यैव पचतीति घटकधात्वंशस्यैव विवरणं व्याख्यानम्।

करोतीति विवरणस्य धात्वंशविवरणत्वे फलमाह - अत एवेति॥ करोतीति विवरणस्य धात्वंशविवरणत्वादेव। पक्तेति॥ अत्र पाकानुकूलकृत्याश्रयो देवदत्तादिरिति बोधं मन्यते। यत्नस्याख्यातार्थत्वम्। अत्राख्यातस्याभावेन तत्प्रतीतये धातोः कृतौ वा शक्तिरभ्युपेया। तथा सति गौरवं स्यात्।

करोतेर्धातुविवरणत्वे दोषम् आशङ्कते - न च पाकं करोतीति॥ करोतेर्धातुविवरणत्वे पाकमित्यस्य पाकानुकूला कृति(यत्नः) रर्थः करोतीत्यत्र कृञोऽपि कृतिरेवार्थः। तथा सति पाकानुकूलकृत्यनुकूला कृतिरिति बोधे कृतेर्द्वधा भानापत्तिः स्यात्। तथा च कृत्यनुकूलकृतेरभावेन तादृशविवरणानुपत्तिरिति भावः।

उक्तदोषं निरस्यति - तत्र पाकशब्दस्येति॥ तत्र पाकं करोतीति विवरणे। पाकशब्दस्येति विक्लित्ति- मात्रपरत्वात् मात्रपदेन व्यापारस्य त्यागः। तथा पाकं फलं करोतीति विवरणोपपत्तिः। पाकपदस्य क्वचित्फलपरत्वं दर्शयति - अत एवेति॥ फलानुत्पाददशायां व्यापारसत्त्वे च। बुभुक्षुणा पाको जातो न वेति फलप्रश्ने भविष्यतीत्युत्तरं दृश्यते। पाकपदस्य व्यापारमात्रार्थकत्वे व्यापारस्य वर्तमानत्वेन भविष्यतीत्युत्तरस्यासम्भवात् तस्मात् क्वचित्पाकपदं फलतात्पर्य-कमपीति।

नन्वेवं सति व्यापारपरत्वाभाव एव स्यादत आह – व्यापारान्तर्भावेणेति॥ यत्र पाकानुकूलो व्यापारो जायते न वेति व्यापारविषयकः प्रश्नस्तत्र पाको जायत इत्युत्तरं व्यापारविषयकम् पाकपदस्य व्यापारपरत्वमपि साधयति। अत एव॥

पाकपदे प्रकृतिभागेन साध्यव्यापारस्योपस्थितेरेव। ओदनस्येति॥ प्रकृत्युपस्थाप्य-क्रियानिरूपितकर्मत्वेन ओदनस्येति कर्तृकर्मणो(पा.2.3.65)रिति कर्मणि षष्ठी। तस्य च कर्मत्वेन तत्रान्वयश्च। अन्यथा व्यापारावाचकत्वे। भावनाया अनुक्तौ अनुपस्थितौ। अनन्वयस्य कर्मत्वानन्वयस्य आपत्तेः। नियममाह - कारकाणां क्रियायामेवान्वयस्येति॥ क्रियाकारकयोः परस्पराकाङ्क्षायाः उत्थितत्वात्। नियमस्य मूलमाह - वाजपेयाधिकरण इति॥ तत्र हि कारकाणां क्रियान्वयस्य व्युत्पादितत्वात्।

तिङो भावनावाचकत्ववादी शङ्कते - न चाक्षिप्तेति॥ ओदनस्य पाक इत्यत्र आक्षिप्तस्तिङस्तीति तदर्थभावनान्वयेत्यर्थः। अस्य भ्रमत्वे मानमाह - लादेशयोगे इति॥ "न लोकाव्ययनिष्ठा खलर्थतृनामि"(पा.2.3.69)ति सूत्रेण लादेशयोगे षष्ठ्या निषेधात्। यतधातोर्व्यापारादिवाचकत्वे एव यतते इत्यस्य यत्नं करोति विवरण-मुपपद्यते। यत्नावाचकत्वे करोतीति विवरणमनुपपन्नमेव उपस्थापकाभावात्। यत्नस्य धात्वर्थत्वं वारयतुं शङ्कते - न चेत्यादि॥ धातोः फलानुकूलो व्यापारोऽर्थः। तथा च न यत्नोऽप्यर्थः।

ननु सर्वत्र फलम्प्रति यत्नस्यावश्यम्भावात् यत्नोऽप्यस्तु धात्वर्थ इत्यत आह – चेष्टादिभिरिति॥ अवश्यक्लृप्तपूर्ववर्तिभिरेव कार्यसम्भवे तद्भिन्नमन्यथासिद्धमिति चेष्टादिभिरेवावश्यक्लृप्तैः फलसिद्धौ यत्नस्यान्यथासिद्धत्वम् । चेष्टा च हिताहितप्राप्ति-परिहारानुकूलो व्यापारः। स च शरीरनिष्ठः। यत्नश्च चेतननिष्ठ इति विवेकः।

यत्नस्यान्यथासिद्धत्वं परिहरति – कुलालकृतेरिति॥ कुलालो घटं करोतीति स्थाने कुलालयत्नादेरवश्यं कारणत्वं वाच्यम्। तच्च नोपपद्येत। चेष्टया अन्यथासिद्धत्वात्। दोषमुद्धरति - तथा च यत्नः करणम्। चेष्टा व्यापारः। घटादि कार्यम्। तत्र व्यापारस्थानापन्नया चेष्टया करणत्वेनाभिमतस्य यत्नस्यान्यथासिद्धत्वं नेष्टम्। व्यापारेण व्यापारिणोऽन्यथासिद्ध्यप्रयोजकत्वात्। तदाह – सर्वशास्त्रेष्विति॥

स्वाभिप्रायमाह – तस्मात्करोतिर्धातोरित्यादि॥ तस्मादाभिप्रायिका-दुक्तहेतोः॥ अभिप्रायो बुद्धिः तत्र भवो हेतुरित्यर्थः। बुद्धिस्थहेतोः। स च उक्तः

वक्ष्यमाणश्च। पाकं करोतीत्यादौ करोतिरिति विवरणम् धातोरेव। नत्वसौ विवरणात्मा तिङाम्। शेषं मूले एव व्याख्यास्यामः। तदाह – धातोरित्यादि॥

9.2 आख्यातवाच्यैव भावनेति मीमांसकमतम्

**61.** अत्र मीमांसकाः - आख्यातवाच्यैव भावना। भावनार्थककरोतिना विवरणात्। यत्तूक्तं[१] धातोरेवै[२]तद्विवरणमि[३]ति तन्न, विनिगमकाभावात्। अस्मन्मते च[४] व्यापारविशेष्यकबोधानुपपत्तिरेव मानम्।

प्रकृतिप्रत्ययौ सहार्थं ब्रूतः[५],तयोः प्रत्ययार्थप्राधान्यस्यान्यत्र क्लृप्तत्वात्। "तदागमे हि दृश्यत[६]"(मी.**4.5.1**) इति न्यायेनाख्यातवाच्यत्वपरिच्छेदाच्च।

तदुक्तम्[2] -

प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सदा।
प्राधान्याद् भावना तेन प्रत्ययार्थोऽवधार्यते॥ (त.वा.**2-1-1-1**)
तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः।
प्रत्ययश्रुतिवेलायां भावनात्मावगम्यते॥ (त.वा..**2-1-1-1**) इति।

न चायमुत्सर्गः प्रकृते[७] नादरणीयः, बाधकाभावेन त्यागायोगात्।

तदुक्तम्-[3]

धात्वर्थस्य प्रधानत्वं न तावदिह जन्मनि।
औत्सर्गिको न च न्यायो मत्पक्षे हि निवर्त्स्यति[८]॥ (त.वा.**3-4-4-12**)इति।

अथ भावनाया आख्यातवाच्यत्वे कृत्प्रत्ययस्थले तत्प्रतीतिर्न स्यात्, वाचकाभावादिति चेन्न, धात्वर्थकारकैर्गम्यमानत्वादेव तस्यास्तत्र[९] प्रतीतेः।

---

[१] जै-यदुक्तं, जो2-अनूक्तं

[२] के4- "एव" नास्ति

[३] के5,द6-धातोरेव तद्विवरणमिति

[४] वा2,1900,1915,भ3- "च " नास्ति

[५] के5- "इति" इत्यधिकं

[६] आ1,जो2-तद्दृश्यते, (पश्वेकत्वाधिकरणम् – मी.4-5-1)

[७] 1900-प्रप्रकृते

[८] त1-विवर्त्स्यति,ज1-निवर्त्स्यताम्

[९] त1,त5 -तस्यास्तत्

अत एवोक्तम् -4

धात्वर्थ[१]कारकैरेव गुणभूतो[२]ऽवगम्यते।

भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते॥ (त.वा..2-1-1-1)

यथैव[३] भावना[४] प्रधानत्वादाख्यातेषु तत्संबन्धादेव गुणभूतकारकप्रतीतिसिद्धेर्न कर्तृकर्मणोरभिधानम्, एवं कर्त्रा[५]द्यभिधानादेव तदनुपपत्त्या भावनायाः सिद्धेरनभिधानम्। करोतिसामानाधिकरण्यमपि गम्यमाना[६]पेक्षयैव[७]।

यथा पचतिशब्दस्य देवदत्तशब्देन तथाभूतयैव[८] च [९]कारकसंबन्धोऽप्युपपद्यत इति[१०]।

न च पक्ववान् पक्तेत्यादौ कारकयो[११]र्धातुकृदर्थयो[१२]रुणाधिकरण(मी.3-1-6)न्यायेन परस्परमन्वयास्वीकारात्[१३] प्रकृतिप्रत्ययार्थयोरन्वयस्यैवाभावे क्व[१४] प्राधान्यनियमः, सहार्थं ब्रूत इति वचश्चेति[१५] शङ्क्यम्[१६], "संबन्धमात्रमुक्तं[१७] च श्रुत्या धात्वर्थभावयोः"(त.वा.2-1-1-1) इति वार्तिको5क्त[१८]रीत्या संबन्धसामान्येना-

---

[१] जै,1915-धात्वर्थः

[२] त1-गुणभूता

[३] जो2-अथैव

[४] जो2-भाना

[५] त2-कृता

[६] त2-गम्यता

[७] भ2-गम्यमानभावनापेक्षयैवेत्यर्थः इति टिप्पणी

[८] भ2-गम्यमानयैवेत्यर्थः इति टिप्पणी

[९] अ1- " भावनयापि " अधिकं-

[१०] भ3,द6-"इति" नास्ति

[११] भ2-पाकं कृतवान् इत्याकारयोः कर्मकर्तृकारकयोरित्यर्थः इति टिप्पणी

[१२] भ2-पाकमित्याकारकं कर्म धात्वर्थः कृतवानित्याकारकं कर्तृकारकं कृदर्थः तयोरित्यर्थः इति टिप्पणी

[१३] अ1-परस्परान्वयास्वीकारात्

[१४] त1- "क्व " नास्ति

[१५] भ1- सहार्थं चेति वचश्चेति,त5-वचनं वेति

[१६] अ1-शङ्कितव्यम्

[१७] 1900,म,त्रि,द6- सम्बन्धमात्रयुक्तं

[१८] त1-कारिकोक्त

न्वयेन प्राथमिके बोधे[१] भावनाद्वारके[२] विशिष्टबोधे[३] च प्राधान्यस्योक्तत्वात्। तस्माद्धातुवाच्या भावनेति वैयाकरणमतं[४] न साधीय इत्याहुः।

अत्रेति॥ भावनाया वाच्यत्वविषये। भावना न धात्वर्थः। अपि तु आख्यातार्थः। तत्र हेतुमाह - भावनार्थक करोतिनेति॥ पचतीत्यस्य पाकं करोति इति विवरणं तत्र, धातोः पाकमिति तिपो विवरणं करोतीति मन्यते। तथा च तिपो भावनार्थककरोतिना विवरणेन विवरणसमानार्थकत्वं विव्रियमाणस्येति नियमेन भावना एवार्थ इति मीमांसको मन्यते। धातोर्विवरणमाक्षिप्य खण्डयति - यत्तु इति॥ करोतीति विवरणं धातोरेव न तु तिङ इति मतं मीमांसको निरस्यति – तत्रेति॥ नियामकाभावे संशये, नियामकं विनिगमकमपेक्ष्यते, तत्तु धातोर्विवरण-वादिमते नास्तीति भावः।

ननु तव मतेऽपि विनिगमकाभाव इत्यत आह - अस्मन्मते इति॥ मीमांसकस्य मम मते व्यापारमुख्यविशेष्यको बोधः स्वीक्रियते भावप्रधान-माख्यातमिति निरुक्तात्। स च बोधो भावनाया आख्यातवाच्यत्व एव सम्भवति, प्रत्ययार्थत्वाभावे तस्याः प्राधान्यानुपपत्तेः। तथा च भावनाविशेष्यकबोधानुप-पत्तिरेव भावनाया आख्यातार्थत्वे प्रमाणमिति भावः। प्रत्ययार्थस्य प्राधान्ये बीजमाह - प्रकृतिप्रत्ययौ सहार्थं ब्रूत इति॥ विशेष्यतया प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिः कारणमिति कार्यकारणभावः फलितः। तथा च भावनाया आख्यातवाच्यत्वे एव तद्विशेष्यको बोधो जायत इति तादृशबोधा-नुपपत्तिरेव मम मते प्रमाणम्। तदागमे हि दृश्यते इति न्यायेति॥ तथा हि - पशुना यजेतेति श्रूयते, तत्रैकवचनोपात्तमेकत्वं यागे विशेषणम् उत प्रकृत्यर्थे इति संशये प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति नियमेन प्रकृत्यर्थे एवान्वये एकत्वस्य यागाङ्गत्वाभावादविवक्षितत्वे पशुद्वयादिकरणकयागेनापीष्टभावनापत्ति-

---

[१] भार1,म,1900,त2,भ2,त5-प्राथमिकबोधे

[२] त2-द्वारिके

[३] 1900- "भावनाद्वारके विशिष्टबोधे " नास्ति, के3,के5,अ4-विशिष्यबोध,भ2-विक्लित्तिकर्मवृत्त्याश्रय इत्याकारके विशिष्टबोधे इति टिप्पणी

[४] के5-"मतं " नास्ति

रिति पूर्वपक्षे "शब्दवत्तूपलभ्यते तदागमे हि दृश्यते तस्य ज्ञानं यथान्येषामि" (मी.4-5-1)त्युत्तरपक्षीयजैमिनिसूत्रम्। एतदर्थस्तु शाब्दबोध्यमेकत्वं यथा भवति तथोपलभ्यते हि यतः तदागमे एकवचनश्रवणे तदेकत्वं दृश्यतेऽतः शब्दत उपस्थितत्वात् तस्य एकत्वस्य ज्ञानम् यागाङ्गत्वज्ञानं यथा अन्येषां पशुत्वादीनां यागाङ्गत्वं तथैकत्वस्यापीति। तदागमे यद् दृश्यते तत्तस्यार्थः। तथा आख्यातप्रयोगे व्यापारः प्रतीयते, अतः व्यापारः आख्यातार्थः। तदाह - न्यायेनाख्यातवाच्यत्वपरिच्छेदात् इति॥ परिच्छेदो निश्चयस्तस्मात्। तदुक्तम् -

प्रत्ययार्थं सह ब्रूतःप्रकृतिप्रत्ययौ सदा।
प्राधान्याद् भावना तेन प्रत्ययार्थोऽवधार्यते॥ (त.वा.2-1-1-1)
तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः।
प्रत्ययश्रुतिवेलायां भावनात्मावगम्यते॥ (त.वा.2-1-1-1)

कारिकार्थः- प्रकृतिप्रत्ययौ सदा प्राधान्यात् प्रत्ययार्थं सह ब्रूतः। साहित्यञ्च विशिष्टैकबोधजनकत्वम्। तत्र प्रत्ययार्थः प्राधान्येन प्रतीयते। तेन प्रत्ययार्थस्य प्राधान्येन प्रत्ययार्थो भावनेति अवधार्यते निश्चीयते। प्रकृतिप्रत्यययोः क्रमवतोः, व्युत्पत्तिवेलायाम् उभयोः क्रमः, पूर्वं प्रकृतेरुपस्थितिस्ततश्च प्रत्ययस्येति क्रमोऽत्र। तादृशक्रमवतोः प्रकृतिप्रत्यययोरंशयोः श्रूयमाणयोः प्रत्ययांशश्रवणे भावनास्वरूपं बुध्यते। यच्छ्रवणेन यः प्रतीयते स तस्य वाच्य इति नियमेन भावनाप्रत्ययार्थ इति भावः। ननु अजा च्छागीत्यादौ नियमस्य त्यागादौत्सर्गिकत्वमेवेत्यत आह - न चायमुत्सर्ग इति॥ औत्सर्गिकत्वादत्र तस्य नियमस्यानादरः स्वीकारो न कार्यः। औत्सर्गिकत्वेऽपि प्रकृते प्रवृत्तिस्तदाह – बाधकाभावादिति॥ बाधके सत्येव तस्याप्रवृत्तिर्यथा अजा इत्यादौ स्त्रीत्वप्रकारकबोधस्य अनुभवसिद्धत्वेन नियमस्याप्रवृत्तिः। प्रकृते तु बाधकाभावात् प्रवृत्तिरेवेति भावः। तदुक्तम्-

धात्वर्थस्य प्रधानत्वं न तावदिह जन्मनि।
औत्सर्गिको न च न्यायो मत्पक्षे हि निवर्त्स्यति॥ (त.वा.3-4-4-12)

आख्यातस्थले धात्वर्थस्य फलस्य व्यापारस्य वा न प्राधान्यम् प्रत्ययार्थत्वाभावात्। अतस्तस्य प्राधान्याय प्रत्ययार्थत्वमेव मन्तव्यम्। प्रकृत्यर्थप्राधान्यस्य सर्वथाऽसम्भवमाह - इह जन्मनि॥ अस्मिन् जन्मनि मीमांसकजन्मनि।

वैयाकरणैस्तु तथा इष्यत एव। ननु तव मते किं प्रमाणं यदाश्रित्य त्वया उद्घोषः क्रियते तत्राह - औत्सर्गिको न चेति॥ औत्सर्गिकः सर्वत्र प्रवर्तमानः, प्रकृतिप्रत्यय-न्यायः मत्पक्षे मीमांसकपक्षे न च नैव निवर्त्स्यति, निवर्तमानो न भविष्यति, प्रवर्तिष्यते एव।

कृदन्तस्थले भावना प्रत्यायकमाक्षिपति -अथ भावनाया इति॥ त्वन्मते आख्यातवाच्यैव भावना। तथा च कृदन्तस्थले आख्याताभावेन तत्प्रतीत्यनुपपत्ति-रेव। वाचकाभावात्। इति चेत् आक्षेपात्तत्प्रतीतिमाह – धात्वर्थकारकैरिति॥ धात्वर्थः फलम्, तस्यापि कारकत्वं कर्मत्वरूपं स्वीकृतमित्यभिप्रायेणेदं प्रतीयते। यद्वा धात्वर्थैः कारकैरिति पाठे न कोऽपि दोषः। फलमपि धातुभेदेन नानेति कारकैरिति बहुवचनम्। तथा च फलान्यथानुपपत्त्या भावनाया गम्यमानता प्रतीतिरित्यत आह – गम्यमानत्वाद्॥ अनुपपत्त्या कल्प्यमानत्वेन तस्या भावनाया तत्र कृदन्तस्थले प्रतीतेः। अत एवोक्तम् ॥ भावनाया उक्तरीत्या प्रतीतेरेव उक्तम्।

धात्वर्थकारकैरेव गुणभूतोऽवगम्यते।

भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते॥ (मी.2-1-1)इति।

कृदन्तेषु भावनात्मा, धातुप्रकृतिकाख्यातार्थः, धात्वर्थकारकैरेव कर्त्रादिभिः आक्षिप्तः गुणभूतः कर्त्राद्यपेक्षया अप्राधान्येन प्रतीयमानः अवगम्यते। तस्मात् कृदन्तस्थले भावना केनापि नाभिधीयते वाच्यत्वेन न कथ्यते, अनन्यलभ्यो हि शब्दार्थ इति न्यायात्। कारिकार्थं दृष्टान्तद्वारा स्पष्टयति – यथेति॥ भावना प्रधानं येषु आख्यातेषु तस्य भावस्तस्मात् तादृशेषु आख्यातेषु प्रयुक्तेषु तत्सम्बन्धात् आख्यातार्थभावनासम्बन्धात् आश्रयत्वसम्बन्धात् गुणभूतस्य कारकस्य कर्त्रादेः प्रतीतिराक्षेपात् प्रतीतिसिद्धौ न कर्तृकर्मणोः अभिधानम्। आक्षेपादेव कर्तृकर्मणोः प्रतीतिसिद्धौ नाभिधानम् न वाच्यत्वम् ।कृदन्तस्थले भावनाया अनभिधानं साधयति - एवं कर्त्राद्यभिधानादेवेति॥ "कर्तरि कृदि"(पा.3.4.67)त्यादि सूत्रात् कृतां कर्त्रादौ शक्तिनिर्णीयते। तथा च कृद्भिरेव कर्तुः कर्मणश्चाभिधाने भावनां विना तत्प्रतीत्यन्यथानुपपत्त्या भावनायाः आक्षेपादेव लाभात् अनभिधानम् न वाच्यत्वमिति भावः। ननु पाचक इत्यत्र पाकं करोति इति करोतिना सामानाधिकरण्यं दृश्यते तन्नोपपद्यते, करोतेरनुपस्थानादित्यत आह - करोति सामानाधिकरण्यमपीति॥

अत्र सामानाधिकरण्यम् एकार्थकत्वम्। आक्षिप्तक्रियामादायैव तत्सिद्धेः। यथेति॥ पचतीत्यत्र आक्षिप्तदेवदत्तादिना यथा सामानाधिकरण्यम्। आख्यातस्थले हि कारकाक्षेप एभिः क्रियते इति ध्येयम्। तथाभूतयैव आक्षेपात्प्रतीत्यैव। कारकसम्बन्धो भावनया उपपद्यते अनुभूयते। यथा इति आक्षिप्तभावनाप्रतीत्या सम्बन्धः, तथाख्यातस्थले आक्षिप्तप्रकारकप्रतीत्यैवेत्यर्थः। अत्र सामानाधिकरण्यमेकवचनत्वादिरूपं समानार्थकत्वरूपं वेति बोध्यम्।

मीमांसकपक्षे दोषमुद्घाटयति - न च पक्वान् पक्तेति॥ पक्वान् इत्यस्य पाकं कृतवान् इति विवरणे कर्तृकर्मकारकयोः, पक्तेत्यत्र पच्धात्वर्थकृदर्थकर्त्रोश्च, त्वन्मतेऽन्वयासम्भवः। एतदुपपादकमाह – अरुणाधिकरणन्यायेनेति॥ अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणातीति इति श्रूयते। तत्र हि अरुण्यादिगुणानां गुणिनाञ्च करणत्वश्रुत्या कारकाणां क्रियान्वयनियमात् क्रियायामेव अन्वयो न परस्परमिति प्रतिपादितम्। तथेहापि कारकद्वयस्य परस्परान्वयाभाव एव स्यात्। तथा च प्रकृत्यर्थप्रत्ययार्थयोरन्वयासम्भवे प्रत्ययार्थप्राधान्यनियमस्य हानिस्तदाह - क्व प्राधान्यनियम इति॥ सहार्थं ब्रूत इति वचश्चेति॥ क्व लब्धावसरमिति शेषः। सहार्थमित्यस्य परस्परान्वितमित्यर्थः। अन्वयासम्भवे तदनुपपत्तिः।
मीमांसकः आक्षिप्तं मतं खण्डयति -

सम्बन्धमात्रमुक्तन्तु श्रुत्या धात्वर्थभावयोः।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते॥ (त.वा.2-1-1-1)

श्रुत्या यजेतेति श्रुत्या धात्वर्थभावयोः सम्बन्धसामान्यमुक्तम्। यागसम्बन्धी भावनेति बोधस्तत्र प्रथमतो जायते। तस्य सम्बन्धस्य एकांशनिवेशे विशेषबोधे अस्याः श्रुतेः व्यापारः सामर्थ्यं न विद्यते इति कारिकार्थः। तथा चैतद्वार्तिकोक्तरीत्या उक्तस्थले कारकयोः सम्बन्धसामान्येनान्वयः प्रथमं कार्यः। ततः भावनाद्वारके आक्षिप्तभावनाद्वारा विशिष्टबोधे। तथाहि - धात्वर्थपाकस्यानुकूलत्वसम्बन्धेनाक्षिप्तभावनायां भावनायाश्च कृदर्थकर्त्रादौ अन्वयः। तथा सति कृत्प्रत्ययार्थस्य प्राधान्यमुपपद्यते। तदिदं विशिष्टबोधे च प्राधान्यस्योक्तत्वादित्यनेनोक्तम्। स्वाभिप्रायमुपसंहरति – तस्मादिति॥ भावनाया धात्ववाच्यत्वेऽपि इष्टलाभे भावनाया धातुवाच्यत्वपरं वैयाकरणमतं न साधु। इति मीमांसका आहुः।

9.3 तत्खण्डनम्

**62.** तत्र बाधकमाह[१]- न त्वित्यादिना[२]। नासौ तिङां व्याख्यानं पक्कवानित्यादावनन्वयापत्ते[३]रित्यर्थः। अयं भावः- "प्रकृतिप्रत्ययौ[४] सहार्थं ब्रूत " इत्यस्य हि विशेष्यतया प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावः फलितः। एवं च[५] "पक्कवानि "त्यत्र पा[कः][६] कर्मकारकं, क्तवत्वर्थः कर्तृकारकम्,[७] तयोश्च वक्ष्यमाणरीत्या[८]न्वयासंभवात् प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाभावे क्व प्राधान्यबोधक उक्तो[९] नियमः? न च संबन्धसामान्येनान्वयः शङ्क्यः, योग्यताविरहात्। क्रियात्वमेव[१०] हि कारकान्वयितावच्छेदकमिति वक्ष्यते। तदेतदाविष्कर्तुं धात्वर्थक्तवत्वर्थयोः कर्मत्व[११]कर्तृत्वे विवरणेन दर्शयति - कृतवान् पाक[१२]मिति।

वस्तुतः "प्रत्ययार्थः प्रधानमि"त्यत्र यः प्रधानं स प्रत्ययार्थ एव[१३]। यः[१४] प्रत्ययार्थः स[१५] प्रधानमेवेति वा न[१६] नियमः। "अजा छागी पाचिके"त्यादौ व्यभिचारात्[१७]।

---

[१] के5- "आह" नास्ति

[२] भार1,त5-नत्वित्यादि

[३] जै-वन्वयापत्ते

[४] त1-प्रत्ययार्थौ

[५] द6-"च" नास्ति

[६] "कः " इति प्रकृतमातृकायां लुप्तम्, अन्यत्रास्ति अपेक्षितं च

[७] द4- "क्तवत्वर्थः कर्तृकारकम् " नास्ति

[८] भ2-गुणानां च परार्थत्वात् असंबन्धः समत्वात् स्यात् इति नामार्थनिर्णये वक्ष्यमाणरीत्या इति टिप्पणी

[९] भ3-बोधकोक्तो

[१०] अ1-क्रियान्वयित्वमेव

[११] त2,अ4-"त्व " नास्ति

[१२] अ4-पक्व

[१३] त1,त5-प्रत्ययार्थे अन्वयः

[१४] त5-"यः" नास्ति

[१५] अ4- "स"नास्ति

[१६] जो2,त5- "न " नास्ति

[१७] भ2-अजा छागीत्यादौ प्रधानं व्यक्तिः नासौ प्रत्ययार्थः, प्रत्ययार्थः स्त्रीत्वं नैतत् प्रधानम् व्यक्तेरेव प्राधान्यात् इति नियमद्वयस्यापि व्यभिचार इत्यर्थः इति टिप्पणी

न हि पाचिकेत्यादौ स्त्रीत्वविशेष्यको बोधः कस्यचित्। ननु जातिव्यक्त्यो-रभेदस्वीकारात् स्त्रीत्वविशेष्यकबोधे इष्टापत्तिरिति चेन्न, एवं ह्याकृत्यधिकरणो(मी.1-3-9)च्छेदापत्ति[1]रिति[2] "एकं द्विकमि" (वै.सि.का.25)त्यादौ वक्ष्यामः।

---

वैयाकरणः उक्तकारिकाव्याख्यानेनोक्तमीमांसकमतं बाधकोपन्यासेन निरस्यति - तत्र बाधकमाह- नन्वित्यादिनेति॥ तस्मात्करोतिर्धातोः स्याद् व्याख्यानं नत्वसौतिङ्गमिति कारिकाघटकनत्वित्यादिनेति भावः। तदंशं व्याख्याति - नासौ तिङ्गमिति॥

अयं भाव इति॥ प्रकृतिप्रत्ययनियमं साधयितुं कार्यकारणभावमाह - प्रकृतिप्रत्ययौ सहार्थमिति॥ नियमश्च कार्यकारणभावमूलकः, प्रतिबध्यप्रतिबन्धक-भावमूलकश्च भवति। तथाचोक्तनियमसाधनाय कार्यकारणभावमाह – प्रकृतिप्रत्ययाविति॥ न च सम्बन्धसामान्येति। सम्बन्धसामान्येनान्वये कारका-न्वययोग्यताया अभावात्। न हि कारकत्वं कारकान्वयितावच्छेदकम् , क्रियात्व-स्यैव तदन्वययोग्यतावच्छेदकत्वात्।

ननु पक्वानित्यत्र कर्मणः प्रतीत्यनुपपत्तिस्तद्वाचकपदाभावादित्यत आह - तदेतदाविष्कर्तुं धात्वर्थक्तवत्वर्थयोरिति॥ पक्वानित्यत्र धात्वर्थः पाकः, स च कर्म, पाकं कृतवानिति विवरणे पाकस्य कर्मत्वेन प्रतीतेः। यद् बलेन मीमांसको भावनाया आख्यातवाच्यत्वं मन्यते।

तदेव खण्डयति - वस्तुतस्तु इत्यादिना॥ सर्वं वाक्यं सावधारणं भवतीति नियमेन प्रकृतिप्रत्ययनियमे द्विविधनियमं सम्भावयन्नाह - प्रत्ययार्थः प्रधानमि-त्यत्र यः प्रधानं स प्रत्ययार्थ एवेति॥

प्रथमं नियमं व्यभिचारयति - अजा छागीति॥ अत्र स्त्रीत्वविशिष्टेत्यादि-रूपस्य स्त्रीत्वप्रकारकबोधस्यानुभवसिद्धतया, प्रत्ययार्थस्त्रीत्वप्राधान्यादर्शनेन यः प्रधानं स प्रत्ययार्थ एवेत्यस्यासत्त्वात् यः प्रत्ययार्थः सः प्रधानमेवेत्यस्यात्र व्यभि-

---

[1] भार1-पत्ते,के5-आकृत्यधिकरणविच्छेदापत्ते

[2] के4- "इति" नास्ति

चारो बोध्यः। प्रत्ययार्थस्य स्त्रीत्वस्याप्रधानत्वात् प्रधानमेवेति पाठो न्याय्यः। तदेव दर्शयति – नहीति॥ पाचिकेति॥ अत्र प्रत्ययार्थस्त्रीत्वप्रकारकबोधस्यैव सत्त्वात्।

प्रकृतिप्रत्ययन्यायं पुनरपि उज्जीवयति - ननु जातिव्यक्त्योरभेदेति॥ जातिरुपलक्षणम् प्रकारीभूतस्य धर्मस्य। अभेदेति॥ अयुतसिद्धतया भेदसम्बन्धस्य निर्वक्तुमशक्यत्वात्। उभयोरैक्ये आश्रयप्रकारकः स्त्रीत्वप्रकारको वा बोधोऽस्तु , न कापि क्षतिरिति भावः। तदाह - स्त्रीत्वविशेष्यकबोधे, इष्टापत्तिरिति॥ तथा सत्या-कृत्यधिकरणोच्छेदापत्तिरित्याह – उच्छेदापत्तिः॥ अभेदे सति त्वद्रीत्या व्यक्ति-शक्तिवादस्यापि स्थित्या जातिशक्तिवादपरकस्याकृत्यधिकरणस्य विलयापत्तिरि-त्यर्थः। एकं द्विकमिति॥ नामार्थप्रकरणे। तत्रत्यो ग्रन्थो यथा – जातिव्यक्त्यो-रभेदाद् दानान्वय इति चेन्न। तथा सति व्यक्तेर्वाच्यत्वमायातमेवेत्युक्तम्।

### 9.4 बोधस्य व्युत्पत्त्यनुसारित्वम्

**63.** वस्तुतो[१] विशेष्यत्वादिबोधस्य तादृशव्युत्पत्त्यनुसारित्वेन[२] न[३] प्रत्ययार्थत्वादौ[४] प्रमाणता। तथा हि[५] - बोधो व्युत्पत्त्यनुसारी, न च[६] बोधानुसारिणी व्युत्पत्तिः। तथा च तव तादृश[७]व्युत्पत्तिसत्त्वात्[८] तथैव बोधः।

अत एव नैयायिकस्य प्रथमान्त[९]विशेष्यक एव बोधः। अत एव लक्षणायां लक्ष्यतावच्छेदकं शक्यतावच्छेदकमेवे[१०]ति स्वीकुर्वन्तः[११] "गङ्गायां घोषः"

---

[१] भ1-वस्तुतस्तु

[२] अ1-सारेण

[३] जो2,के3,के5,अ4- "न " नास्ति

[४] अ1-प्रत्यत्वादौ

[५] त्रि- "तथा हि" नास्ति

[६] के5-तु, अ4- "च"नास्ति

[७] के5,म-एतादृश

[८] त5-व्युत्पत्त्यनुसारित्वात्

[९] के3- "मुख्य" इत्यधिकं

[१०] अ1,के4- "एव" नास्ति,द3-लक्ष्यतावच्छेदकमेवेति, भ2-शक्यतावच्छेदकम् गङ्गात्वादि तदेव लक्ष्यतावच्छेदकम् न तु तीरत्वादि इत्याहुरालङ्कारिकाः इति टिप्पणी

[११] ज1-स्वीकुर्वतो

"जाता लता हि शैले जातु लतायां न जायते शैलः।
सम्प्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम्॥[१]"

इत्यादौ गङ्गात्वलतात्वशैलत्वादिना तीरादे[२]र्बोधः, अत एव चमत्कारोऽपि, अन्यथा वैपरीत्यं च न स्यादित्याहुरालङ्कारिकाः।

नैयायिकादयस्तु

"कच[३]तस्त्रस्यति वदनं वदनात्[४] कुचमण्डलं त्रसति[५]।
मध्याद् बिभेति नयनं नयनादधरः समुद्विजति॥"

इत्यत्र[६] कच[७]त्वादिना बोधो न त्रासकर[८] इत्य[९]तोऽन्यदेव[१०] तद् वाच्यम्। अत एव गङ्गापदात्[११] तीरत्वादिनैव[१२] बोध इत्याहुः।

तस्माद् व्युत्पत्तिग्रह एवात्र[१३] शरणम्। न नियमः। अत एव भगवान् पाणिनिराह- "प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्"(पा.1-2-56) इति[१४]। अत्र तदशिष्य[१५]मित्यनुवर्त्य वचनमित्यत्र[१६] योज्यम्[१७]। तत्र हेतुरर्थस्येत्यादि[१]।

---

[१] के3,के5,अ4- "सम्प्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम्" नास्ति, (कुवलयानन्दे विभावनालङ्कारस्योदाहरणमिदम्)

[२] के3,अ4-नदीतीरादे

[३] के3-कुचतः

[४] अ1-वचनात्, जै-वद वन्दनात्

[५] अ1-त्रसते

[६] 1915-इति।अत्र

[७] के3-कुच

[८] जै-त्रासक

[९] के3,अ4- "इति"नास्ति

[१०] भ2-राहुत्वचन्द्रत्वादि इति टिप्पणी

[११] द6-गङ्गादिपदात्

[१२] जै-तीरत्वादिनाव

[१३] अ1,त1,त5- "अत्र " नास्ति

[१४] के4-"इति" नास्ति

[१५] त2-तद्विशेष्य

[१६] वा2-तदशिष्यमत्र

[१७] के3,अ4-योजनीयम्

अन्यप्रमाणत्वाल्लोकत एव व्युत्पत्त्यनुसारेण विशेषण[2]विशेष्यभावेन बोधोपपत्ते-रित्यर्थ इति[3]।

---

नियमस्य स्वस्वव्युत्पत्त्यनुसारित्वेनापि असाधकत्वमाह - वस्तुतो विशेष्य-त्वादिबोधस्येति॥ विशेष्यत्वादिबोधस्येति षष्ठीसमासः, निरूपकत्वं षष्ठ्यर्थः। प्रत्ययार्थनिष्ठविशेष्यत्वादिनिरूपकबोधस्य तादृशव्युत्पत्तिः स्ववासनानुसारिणी। व्युत्पत्तिरनुभवः। तदनुसारित्वेन अनुभवाधीनप्राणकत्वेन। प्रत्ययार्थत्वादौ प्रत्ययार्थप्राधान्यादौ न प्रमाणता न साधकता।

उक्तमुपपादयति - तथाहि बोध इति॥ सिद्धान्तमाह - बोधो व्युत्पत्त्य-नुसारी॥ व्युत्पत्तिमनुसरति बोधः।न तु व्युत्पत्तिः बोधमनुसरति। वादिनमेक-देशित्वेनोपस्थापयति - तथा चेति॥ स्वव्युत्पत्यनुसारेणैव बोधे नैयायिकं दृष्टान्तयति - अत एव नैयायिकस्येति॥ तन्मते प्रथमान्तार्थमुख्यविशेष्यकबोध एव। पुनरपि बोधस्य तथात्वमाह - अत एव लक्षणायामिति॥

नैयायिकः गङ्गायां घोषः इत्यादि लक्षणास्थले "शक्यादन्येन रूपेण ज्ञाते भवति लक्षणे"त्यभियुक्तोक्तरीत्या लक्ष्यवृत्तितटत्वादिनैव लक्ष्यस्य बोधं मन्यते। अत एव "कचतस्त्रस्यति वदनमि"त्यादौ कचस्य राहुत्वेन बोधात् त्रासोपपत्तिः। शक्यतावच्छेदकरूपेण भाननये तु तदनुपपत्तिरेव।

वैयाकरणास्तु शक्यतावच्छेदकारोपं स्वीकुर्वन्तः शक्यतावच्छेदकरूपेणैव लक्ष्यं बोधयन्ति। राहुत्वेन राहुबोधे त्रासस्य लोके प्रसिद्धत्वेन न चमत्कारातिशयप्रतीतिः। कचत्वेन राहुबोधे तु चमत्कारातिशयोपपत्तिः, तेनरूपेण त्रासहेतुत्वस्यालौकिकत्वात्। आलङ्कारिकोऽपि शक्यतावच्छेदकरूपेणैव लक्ष्य-बोधमभ्युपगच्छति। तदेतदुपपादयति - अत एवेत्यादिना॥ लक्षणायां गङ्गायां घोष इत्यादौ।

---

[1] 1900-स्येत्यादिः,के3,अ4-स्येत्याह

[2] वा2- "विशेषण" नास्ति

[3] जो2- "इति" नास्ति

जाता लता हि शैले जातु लतायां न जायते शैलः।
सम्प्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातम्॥

(कुवलयानन्दे विभावनाया उदाहरणमिदम्)

इत्यादौ च। शैले लता जातेति तु लोकसिद्धम्, लतायां न जातु कदाचिदपि शैलो जायते। कनकलता नायिकाशरीरम्, तत्र सम्प्रति एतद्विपरीतं जातम्, यदस्यां कनकलतायां गिरिद्वयम् स्तनद्वयं जातम् इत्यर्थः।

अत्र आलङ्कारिका अलङ्कारवासनावन्तः, "लक्षणारोपिता क्रिये"ति काव्यप्रकाशीयसूत्रपर्यालोचनया शक्यतावच्छेदकारोपविषयनिष्ठसंसर्गस्यैव लक्षणात्वलाभात् गङ्गायां घोष इत्यादौ गङ्गात्वेनैव तटबोधं लतात्वेनैव सुरम्यरमणीदेहयष्टिप्रतीतिं शैलत्वेनैव च स्तनद्वयप्रतीतिं मन्यन्ते। तथा सत्येव चमत्कारस्याधानमुपजायते इति तेषामभिमतम्। नैयायिकास्तु अत्र विप्रतिपद्यन्ते इत्याह - नैयायिकादयस्तु इति॥

कचतस्त्रस्यति वदनं वदनात् कुचमण्डलं त्रसति।
मध्याद् बिभेति नयनं नयनादधरः समुद्विजति॥

नैयायिकमते सम्बन्धितावच्छेदकरूपेणैव लक्ष्यार्थस्य मानम् । अत एव कचतस्त्रस्यति वदनमित्यत्र, सम्बन्धितावच्छेदकरूपेण शक्यसम्बन्धितावच्छेदकराहुत्वेनेत्यर्थः। राहुत्वेन राहुरेव कचादिपदलक्ष्यः। तथासत्येव त्रासोपपत्तिः। कचत्वादिशक्यतावच्छेदकरूपेण लक्ष्यार्थबोधाङ्गीकारे तदनुपपत्तिरेवेति स्वीक्रियते। तदाह - कचत्वादिना बोधो न त्रासकर इत्यतोऽन्यदेव (राहुत्वाद्येव) तद् (लक्ष्यता-वच्छेदकं) वाच्यम् (न तु शक्यतावच्छेदकं कचत्वादि।) अत एवेति॥ गङ्गायां घोष इत्यादौ गङ्गापदात्तीरत्वादिना एव बोध इत्याहुः नैयायिकाः।

आलङ्कारिकाणान्तु शक्यतावच्छेदकमेव लक्ष्यतावच्छेदकम्। वैयाकरणा अपि अत्र सम्वादिन एव। न च कचत्वादिना बोधे त्रासकरणत्वानुपपत्तिः, राहुत्वादिना बोधे चमत्कारानुपपत्तिरित्युभयानुपपत्तिरिति वाच्यम्। कचत्वविशिष्टो राहुरित्यादिबोधेन तदुभयसिद्धेः। राहुत्वविशिष्टे कचत्वारोपात् राहुत्वविशिष्टात् त्रासोपपत्तिः, कचत्ववैशिष्ट्येन चमत्कारोपपत्तिश्च।

उपसंहरति - तस्माद् व्युत्पत्तिग्रह एवेति॥ शरणं रक्षकम्। स्वस्व सिद्धान्तस्य। न तु प्रामाण्यमिति बोध्यम्। न नियमः न सर्वैः स्वीकार्यः।

अत्र पाणिनेरपि सम्मतिमाह - अत एव भगवान् पाणिनिरिति॥ प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्। प्राचीनवैयाकरणैः प्रधानं प्रत्ययार्थ इति सूत्रं कृतम्। तच्च पाणिनिः खण्डयति प्रधानप्रत्ययार्थवचनमित्यादिना। अत्र लिङ्गमशिष्यमित्यतः समस्तमपि नञ् अनुवर्तते तात्पर्यवशात्। तथा च प्रधान-प्रत्ययार्थवचनं न कर्तव्यम्। हेतुमाह अर्थस्येति। विशेष्यत्वादिना प्रतीतेः अन्यप्रमाणत्वात् प्रतीत्यनुरोधकव्युत्पत्तिकत्वात् स्वस्वानुभवसिद्धत्वात्। हेतुरिति॥ प्रधानप्रत्ययार्थवचनाकरणे हेतुः कः इत्याकाङ्क्षायां तत्र सूत्रे एवाह – अर्थस्येति॥

9.5 धात्वर्थो भावनेत्यत्र प्रामाण्यप्रदर्शनम्

**64.** किञ्च[1], यदि[2] नियामकापेक्षा गृह्यताम् तर्हि "भावप्रधानमाख्यातं, सत्त्व-प्रधानानि नामानि"(नि.अ1.पा1)इति निरुक्तवचनम्। इदं हि नामाख्यातोपसर्ग-निपातानां[3] चतुर्णां पदानां मध्ये[4] नामाख्यातयोर्लक्षणत्वेन[5] प्रवृत्तम्। अत्राख्यायते सर्व[6]प्रधानभूतोऽर्थोऽनेनेति व्युत्पत्त्या धातुराख्यातपदे[7]नोच्यते, नामादिप्रकृती-नामेवोद्देशात्[8]। अग्रेऽपि तत्र[9] "नामान्याख्यातजानीति शाकटायनो[10] नैरुक्तसमयश्च[11], न[1] सर्वाणीति गार्ग्यो वैयाकरणानां चैके[2]" (नि.अ1.पा1)

---

[1] के5-"किञ्च" नास्ति

[2] अ1- "यदि " नास्ति

[3] अ1- "च " अधिकं-

[4] के5-"पदानां मध्ये" नास्ति

[5] त1-नामाख्यातयोरेव लक्षणत्वेन

[6] द4-सर्वः

[7] के3,के5-"पद" नास्ति

[8] द1,त1,त5,म-मेवोद्देश्यत्वात्

[9] त1- "तत्र " नास्ति

[10] त2-शाकटायनेनोक्तम्

[11] जै-समन्वयश्च,त2-"नैरुक्त " नास्ति

इत्युक्तत्वाच्च। न ह्याख्यातप्रत्ययजं नाम संभाव्यते, किं तु धातुजम्। अत एवैतत्[३] समानार्थकं वाक्यं[४] "सर्वं[५] नाम[६] धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्" इति महाभाष्ये[6] पठितम्। तथा[७] च धातोर्भावप्रधान-बोधजनकत्वं लक्षणम्। नम[८]न्त्याख्यातशब्दे गुणभावेन[९] नमयन्ति[१०] वा[११] स्वार्थं[१२] भावनां प्रतीति[१३] नामानि। तल्लक्षणं "सत्त्वप्रधानानी"(नि.अ1.पा1)ति। एवं चाख्यातस्य भावप्रधानत्वोक्तेर्धात्वर्थो भावनेति निरुक्तविरुद्धम्। अन्यथा "भावप्रधानो धातु"रित्येव वा[१४]ऽवक्ष्यदिति निरस्तम्। तस्मान्न प्रत्ययार्थ-प्राधान्यनियम इति ध्येयम्[१५]।

यच्च[१६] तदागमे हीत्यादि, तत्राह[१७] - किं कृतं पक्वमिति। कृञा[१८] विवरणं प्रतीतिश्च[१९] पक्वान् पक्वमि[२०]त्यादावपीति[२१] तत्रापि भावना वाच्या स्यादिति भावः।

---

[१] जै-न च

[२]द4- "एके " नास्ति

[३] द4- एव सर्वैतत्

[४] अ1- " वाक्यं " नास्ति , द1-समानार्थकवाक्यं,के3-समानार्थकत्वं वाक्यं

[५] अ4- "सर्वं"नास्ति

[६] अ4-नाम च

[७] वा2-यथा

[८] के4-नय

[९] जै-गुणभावे द4-गुणाभावेन

[१०] अ4-नमन्ति

[११] अ4- "वा" नास्ति

[१२] जै-स्वार्थं च

[१३] भ3-प्रति

[१४] के5-चा, त5,द5- "वा" नास्ति

[१५] के3,के5-बोध्यम्,त्रि- इत्यवधेयम्

[१६] त2-तच्च

[१७] त1-तदात्राह

[१८] त2-किन्ना

[१९] के3-"ततश्च"इत्यधिकं

[२०] के3,के5,अ4-"पक्वम्" नास्ति

[२१] द7-पक्वमित्यत्रापीति

नन्वस्तु तिङामिव[१] कृतामपि[२] भावना वाच्येत्यत आह- अपीति। तथा चोभयत्रापि[३] प्रतीते[४]रुभय[५]साधारणो धातुरेव वाचकोऽस्त्विति भावः। भवद्रीत्या प्रत्ययार्थत्वात् प्राधान्यापत्तिश्चेति[६] द्रष्टव्यम्। यदप्युक्तम्[७] - पक्वानित्यादौ धात्वर्थकारकैरेव इति, तदपि न। आख्यातस्थलेऽप्याक्षेप्या(पा)पत्त्या[८] तत्रापि भावनाया वाच्यत्वं[९] न स्यात् । आक्षेपलभ्यस्य प्राधान्याभावनियम[१०]स्य[११] निरस्तत्वात्। वैपरीत्यापत्तेश्च ।[१२] अथ कृदुपस्थाप्ये[१३] लिङ्गसंख्यान्वयित्वदर्शनात् कर्तु-र्वाच्यत्व[१४]मावश्यकमिति चेत्[१५], तर्हि कालान्वयाय भावनाया अपि तदा-वश्यकमेवेति[१६] तुल्यम्। किञ्च, एवं हि संख्यान्वयोपपत्तये[१७] आख्यातेऽपि कर्ता वाच्यः स्यात्। आक्षेपलब्धे[१८] कर्तरि संख्यान्वयो न विरुद्ध इति चेत्[१९], तुल्यं[१] प्रकृतेऽपीति दिक्॥ **8**॥

---

[१] अ1-तिङामपि

[२] अ1- "अपि " नास्ति

[३] जो2-चोभयत्रादि,के3-चोभयत्रापि तत्प्रतीतेः

[४] अ1-तत्प्रतीते

[५] जै-प्रतीतेरूभयत्र

[६] भ1-प्राधान्यापत्तिश्चेत्यपि

[७] द4- "यदप्युक्तं " नास्ति

[८] "आख्यातस्थलेप्याक्षेपापत्त्या "इत्येवान्यमातृकासम्मतः पाठः,के5-व्याक्षेपापत्त्या

[९] ब1-वाच्यं,त2-आक्षेप्यत्वं

[१०] अ1-आक्षेपलभ्यस्याप्राधन्यनियमस्य, जो2- "नियम " नास्ति

[११] के4-"आकृत्यधिकरणन्यायेन घटस्यैव वाच्यत्वेन घटस्याक्षेपलभ्यत्वेन प्राधान्यात् "इत्यधिकं

[१२] भार1,द1,1900,1915द4,भ2,भ3 - "कृत्यपि भावनाया एव वाच्यतापत्तेः" इत्यधिकम्, अ1,त1,-त3,जै,ब1,जो2- "एव " विना तद्वाक्यमधिकम्,के4-"कृत्यपि भावनाया एव च वाच्यतापत्तेः" इत्य-धिकम्,के3-"कृत्यपि भावनाया एव वाच्यत्वापत्तेः" इत्यधिकम्, त्रि-वैपरीत्यापत्तिश्च

[१३] जै-कृदुपस्थितप्ये,के3-कृदुपस्थाप्यत्वे

[१४] जै- "त्व " नास्ति

[१५] त2-कर्तुर्वाच्यत्वदर्शनादिति

[१६] अ1-तवावश्यकमेवेति

[१७] अ1-संख्यान्वयाय, जै,1900,के4,के5,त2,द2,भ2,भ3-संख्यान्वयोपपत्तेः, ब1-संख्यान्वयोपपत्तेपि

[१८] जै,वा2,भार1,त1,जो2,1900-लभ्ये, त5-आक्षेपकर्तरि, ब2-आक्षेपलब्धे कर्तरि

[१९] त2-"चेत् " नास्ति

ननु त्वन्मतेऽपि नियामकाभाव एवेत्यत आह - किञ्च यदि नियामकापेक्षेति॥ नियामकं - विनिगमकम्। तस्यापेक्षेत्यर्थः। तर्हीति॥ नियामकापेक्षाकाले भावप्रधानमाख्यातमिति निरुक्तवचनं नियामकरूपेण गृह्यताम्। निरुक्तवचनाभिप्रायमाह - इदं हीति॥ इदं निरुक्तम्। नामादीनां चतुर्णां पदानाम्। नामाख्यातोपसर्गनिपाताश्चेत्यस्य प्रकृतत्वात्। अस्मिन् नामाख्यातयोर्लक्षणं प्रतिपिपादयिषितम्। यद्यपि "आख्यातमाख्यातेन क्रियासातत्ये" इत्यत्र आख्यातपदं तिङन्तपरमेव गृह्यते। तथाप्यत्र तस्य धातुपरत्वं व्युत्पादयति - अत्राख्यायते सर्वेति॥ आख्यायते - प्रतिपाद्यते सर्वेभ्यः कर्तृकर्मसंख्याकालादिभ्यः प्रधानभूतोऽर्थो व्यापाररूपोऽनेनेति व्युत्पत्त्या करणे क्ते सति आख्यातपदेन धातुरुच्यते।

ननु करणार्थकक्तप्रत्ययेन धात्वभिधानं निष्प्रमाणमित्यत आह - नामादिप्रकृतीनामेवोद्देशात्। उद्देशात् - संकीर्तनात्। पुनरपि तदेवोपपादयति – अग्रेऽपीति॥ तादृशनिरुक्ताग्रे "नामान्याख्यातजानी"ति शाकटायनो मन्यते। अयमेव नैरुक्तः समयः, सङ्केतः। वैयाकरणानां मध्ये एकः केवलः प्रधानो वा गार्ग्यः, न सर्वाणि नामानि आख्यातजानीति मन्यते। इत्युक्तत्वादिति॥ अनेन निरुक्तेन नाम्नामाख्यातजत्वम् , आख्यातपदस्य धातुपरत्वञ्च सिध्यति। वैपरीत्यशङ्कामपनुदति - न ह्याख्यातप्रत्ययजमिति॥ आख्यातं तिङादि , ततो नाम न जायते अपि तु धातुजमेवेत्यर्थः।

महाभाष्यकारसम्मतिमाह - अत एवेति॥ नाम्नो धातुजत्वादेव। समानार्थकं नाम्नो धातुजत्वबोधकनिरुक्तसमानार्थकं वाक्यम्। वाक्यमेवाह - सर्वं नाम धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकमिति॥ इदं वाक्यं क्व पठितमित्यत आह - महाभाष्ये। निष्कर्षमाह - तथा च धातोरिति॥ "भावप्रधानमाख्यातमि"त्यत्राख्यातपदेन धातोर्ग्रहणात् भावः प्रधानं यस्मिन् स बोधो भावप्रधानो बोधः तादृशबोधजनकत्वं धातोर्लक्षणं निष्पन्नम्। नामपदं व्याचष्टे - नमन्ति आख्यातशब्दे गुणभावेन॥ आख्यातशब्दे - आख्यातशब्दप्रतिपाद्ये व्यापाररूपे गुणभावेन -

---

[1] के5-"तुल्य" नास्ति,भ2-कृत्यपि आक्षेपलभ्ये कर्तरि सङ्ख्यान्वयो न विरुद्ध इति तुल्यमित्यर्थः इति टिप्पणी

अप्राधान्येन विशेषणतयेत्यर्थः। गौणभावं भजन्ते। द्वितीयां व्युत्पत्तिमाह - नमयन्ति वा स्वार्थं भावनाम्प्रतीति॥ धात्वर्थभावनाम्प्रति स्वार्थं नामार्थं नमयन्ति विशेषणीकुर्वन्ति। तानि नामानि। नाम लक्षणं स्पष्टयति – तल्लक्षणमिति॥ सत्त्वं द्रव्यं, तत्प्रधानानि, जातिलिङ्गसंख्यापेक्षया द्रव्यविशेष्यकबोधजनकानीति यावत्। मीमांसामान्यमतं खण्डयितुमाह – एवञ्चाख्यातस्येति॥ तन्मतेऽपि यद्यपि "भावप्रधानमाख्यातमि"ति निरुक्तवचनेन भावना प्रधानीभूता, किन्तु सा आख्यातप्रत्ययवाच्यैव न तु धातुवाच्या, निरुक्ते आख्यातपदस्य प्रत्ययपरत्वेन तैः स्वीकारात् । ततश्च धात्वर्थभावनाविशेष्यत्वपरो वादो न युक्तः, निरुक्तविरोधात्। अन्यथा आख्यतपदस्य धातुपरत्वे भावप्रधानो धातुरित्येवावक्ष्यत् निरुक्तकार इति मीमांसको मन्यते। तत्खण्डयति - निरस्तमिति॥ उक्तरीत्या निरुक्ते आख्यातपदस्य धातुपरत्वव्यवस्थापनात्। तस्मात् उक्ताभिप्रायात् प्रकृतिप्रत्ययन्यायादिना प्रत्ययार्थप्राधान्यनियमो न सर्वत्रादरणीयः।

यच्च यदागमे हीति॥ यदागमे यो दृश्यते स तस्य वाच्य इति न्यायतात्पर्यम्। प्रत्ययागमे भावना दृश्यते। अतः प्रत्ययवाच्यैव सा न तु धातुवाच्येति तदभिप्रायः। तन्निरस्यति – तत्राहेति॥ किं कृतं पक्वमिति॥ उक्तकारिकांशोऽयम्। अत्रत्यं वक्तव्यं स्पष्टयति - कृञा विवरणमिति॥ अयमभिप्रायः पक्वान् इति॥ अत्र पक्वानिति पाठः। अस्य विवरणम् पाकं कृतवान्। पक्वमित्यस्य पाकः कृतः इति। उभयत्रापि कृतवान् इति कृत इति कृधातुना विवरणम्। तथा च विवरणे कृञा भावनाप्रतीत्या विव्रियमाणेऽपि भावनाया वाच्यत्वं मन्तव्यमेव, अन्यथा कृञा विवरणानुपपत्तिः। प्रतीतिश्चेति॥ यथा विवरणं भावनाया वाच्यत्वे प्रमाणं तथैव उभयत्र भावनाप्रतीतिरपि तस्या वाच्यत्वे प्रमाणमित्यर्थः। न चेष्टापत्तिः, भावनायाः आख्यातवाच्यत्ववादिमते कृत्स्थले आख्याताभावेऽपि तत्प्रतीतौ सिद्धान्तहानेः। किञ्च एतन्मीमांसकमते कृत्स्थले भावनायां आक्षेपलभ्यत्वस्वीकारेण वाच्यत्वेऽभ्युपगमविरोधाच्च। ननु कृत्स्थले भावनाप्रतीतिबलादस्तु कृद्वाच्यापि भावनेति शङ्कते - नन्वस्तु तिङामिवेति॥ यथा तिङन्तस्थले तिङां भावनायां शक्तिस्तथैव प्रतीतिबलात् कृतामपि तथैवास्तु शक्तिरित्यत आह – अपीति॥ कारिकायां कृत्स्वपीत्यत्रत्यः 'अपि' इत्यंशः। अपिपदस्वारस्यमाह -

तथा चोभयत्रापि प्रतीतेरिति॥ उभयत्र तिङ्स्थले कृत्स्थले च भावना प्रतीतये उभयसाधारणः तिङ्स्थले कृत्स्थले च उद्देश्यतया गृहीतो धातुरेव भावनावाचकोऽस्त्विति भावः। दोषान्तरमाह – भवद्रीत्येति॥ कृत्स्थले कृतामेव भावनावाचकत्वे तस्याः प्रत्ययार्थत्वेन प्राधान्यापत्तिरपि। तथा च पाचक इत्यादौ व्यापाराश्रय इति बोधो न स्यात् , आश्रयवृत्तिव्यापारः इत्यादिबोधापत्तेः। तदाह - द्रष्टव्यम् विचारणीयम्।

कृत्स्थले आक्षेपाद् भावनालाभ इति मतं निरस्यति - यदप्युक्तम् पक्वानित्यादाविति॥ पक्वानिति कृत्स्थलोपलक्षणम्। तत्र धात्वर्थकारकैः धात्वर्थः फलं तत्कारकैः तदाक्षेपः, भावनाया आक्षेप इति यदुक्तम् तदपि न मनोरमम्। तुल्यन्यायात् आख्यातस्थलेऽपि धात्वर्थकारकैरेव भावनाक्षिप्यताम्। वाच्यत्वाभ्युपगमो व्यर्थः। ननु आक्षिप्तस्य प्राधान्यानुपपत्तिरित्यत आह – आक्षेपलभ्यस्येति॥ आक्षिप्तानामपि गवादिव्यक्तीनां प्रधान्यदर्शनेनोक्तदोषानवसरात्। तदाह – निरस्तत्वादिति॥ आक्षिप्तस्यापि प्राधान्योपपत्तेः वैपरीत्यापत्तेश्च तिङन्तस्थले एव भावनाया आक्षेपलाभोपपत्तेश्च।

वैपरीत्यमेवाह - कृत्यपि भावनाया एव वाच्यत्वापत्तेः॥ एवेन कर्तृवाच्यत्वनिरासः। कृत्स्थले भावनाया वाच्यत्वाभावे विनिगमकमाह - अथ कृदुपस्थाप्य इति॥ कृतः कटः, कृतौ कटौ, पक्वन्तौ इत्यादौ प्रतीयमानसंख्यान्वयाय कृतां कर्त्रादिवाचकत्वमावश्यकम्। तथा च तत्र कृतां न भावनायां शक्तिः,तत्राह - तर्हि कालान्वयायेति॥पक्वानित्यादौ भूतकालान्वयाय कृत्स्थले भावनाया तद्वाच्यत्वमावश्यकमेव। मीमांसकरीतिमाख्यातस्थलेऽपि योजयति - किञ्च एवं हीति॥ पचतीत्यादौ तिङर्थसंख्यायाः कर्त्रादौ अन्वयः। तदुपपत्तये आख्यातेऽपि कर्ता वाच्यः तिबादेः स्यात्।

पूर्वपक्षी अन्यथयति - आक्षेपलभ्ये इति॥ आख्यातार्थो भावना। तदाक्षिप्ते कर्तर्यपि संख्यान्वये विरोधाभावः। निरस्यति - तुल्यं प्रकृतेऽपीति॥ प्रकृते कृत्स्थले भावनाया वाच्यत्वमस्तु। तदाक्षिप्ते एव कर्तरि संख्याद्यन्वयोऽस्त्विति भावः।

10. धातोः भावनावाचकत्वे एव कर्तृकर्मकरणादौ कृत्प्रत्ययानां सङ्गतिः

65. अपि च धातोर्भावनावाचकत्वसिद्धावेव कर्तृकर्म[१]करणादौ कृत्प्रत्ययाः सङ्गच्छन्ते[२], नान्यथेत्यभिप्रेत्य तदेवोदाहरन्नाह[३]-

किं कार्यं पचनीयं चे[४]त्यादि दृष्टं हि कृत्स्वपि।

किं च क्रियावाचकतां विना धातुत्वमेव न॥9॥

अयं भावः- कार्यमित्यादौ[५] "ऋहलोर्ण्यत्"(पा.3-1-124) इति कर्मणि[६] प्रत्ययः। पचनीयमित्यादौ चानीयर्प्रत्ययः[७] कर्मणि। एवमादिना ज्योतिष्टोमयाजीत्यादौ[८] "करणे यज"(पा.3-2-85) इति [९] णिनिः।[१०]क्तादिश्चोक्तः। एते च क्रियायोगं[११] विनाऽसंभावितास्तद्वाच्यतां बोधयन्ति। विना क्रियां कारकाणामसम्भवात्[१२]। नापि तेषां[१३] कारकत्वसंभावनाप्यन्यथा[१४], क्रियान्वयित्वस्यैव तत्त्वात्।

यत्त्वा[१५]क्षेपलब्ध[१६] क्रियासंबन्धात् कारकार्थकः[१७] प्रत्ययः कारकत्वं चेति, तदुक्तोत्तरम्[१८]।

---

[१] द2,द3,भ3-"कर्म" नास्ति
[२] जो2-कृत्प्रत्ययः सङ्गच्छते
[३] के3-उदाहरणमाह
[४] अ1,के3,के5,अ4-वे
[५] द2- "च" इत्यधिकम्
[६] त2-" कर्मणि" नास्ति
[७] जो2- "प्रत्ययः" नास्ति
[८] के4-"इत्यादौ"नास्ति
[९] द2- "कर्तरि"इत्यधिकम्
[१०] जो2,1900,1915,के4,के5- "पक्वमित्यादौ " इत्यधिकम्
[११] त1,त5-क्रियान्वयं
[१२] त3,के3,अ4-कारकाणामन्वयासंभवात्
[१३] 1915-"तेषां" नास्ति
[१४] त1,के3-,त5,अ4-"अन्यथा" नास्ति,त2-"अपि " नास्ति
[१५] त2-नत्त्वा
[१६] द3-लक्ष्य
[१७] जै-कारकार्थः,के4-कारकार्थप्रत्ययः
[१८] भ2-आख्यातस्थलेऽपि आक्षेपापत्त्या तत्रापि भावनायाः वाच्यत्वं न स्यादित्युक्तम् इति टिप्पणी

किं चैवं नखैर्भिन्नो नखभिन्नः[१], हरिणा त्रातो[२] हरित्रात इत्यादौ "कर्तृकरणे कृता बहुलम्" (पा.2-1-32) इति समासो न स्यात्। "पुरुषो राज्ञो, भार्या देवदत्तस्ये" त्यादिवदसामर्थ्यात् ।

अथाध्याहृतक्रियाद्वारा सामर्थ्यमस्त्येव। अन्यथा "दध्योदनः, गुडधाना" इत्यादावपि "अन्नेन व्यञ्जनम्" (पा.2-1-34) "भक्ष्येण मिश्रीकरणमि" (पा.2-1-35)त्यनेन समासो न स्यात्। अध्याहृतोपसेक[३]मिश्रण[४]क्रियां विनान्वया-[५] संभवादिति चेन्न, तत्र विध्यानर्थक्यादगत्या तथा स्वीकारेऽपि "हरिकृतं जगद्, रामबाणकृतो वध" इत्यादौ साक्षाद्धात्वर्थभावनान्वयेनोपपद्यमानस्यास्याक्षेपेण[६] परम्परासंबन्धे प्रवृत्त्यसम्भवात्। न चै[७]कस्यां क्रियायां कर्मादिभावेनान्वयि[८]त्व-मेवात्र[९] सामर्थ्यमिति वाच्यम्, "असूर्य[१०] पश्या" इत्यादौ "सर्वचर्मणः कृतः खखञौ" (पा.5-2-5) इति सूत्रे सर्वचर्मण इत्यंशेऽपि च तथात्वसत्त्वेन असमर्थसमासत्त्वा[११]नापत्तेः। इष्टापत्तौ "कृतः सर्वो मृत्तिकये"त्यर्थे "कृतः सर्व-मृत्तिक" इत्यापत्तेः[१२]। न चात्र[१३] समासविधायकाभावः, "सह सुपा" (पा.2-1-4) इत्यस्यैव सत्त्वात्। अन्यथोक्तसूत्रेऽपि तव स[१४] न स्यादिति दिक्।

---

[१] ब1-नखैर्निर्भिन्नः नखनिर्भिन्नः

[२] 1915-त्रात

[३] के5,म-अध्यामृतोपनैक

[४] के3-मिश्रीकरण

[५] के3,के5,म,अ4-विनासामर्थ्या

[६] भार1,त1,त3,त2,ब1,1900,द4-नोपपद्यमानस्याक्षेपेण

[७] भ2-हरि कृतं जगदित्यादौ हरेः कर्तृत्वेन जगतः कर्मत्वेन एकस्यामेव करणक्रियायाम् अन्वयात् एकक्रियान्वयित्वलक्षणं सामर्थ्यं वाच्यमिति न काप्यनुपपत्तिरिति चेत् नेत्याह इति टिप्पणी

[८] के5-"अन्वयि"नास्ति

[९] के4- "अत्र" नास्ति,त2-मेवार्थस्य

[१०] भ2-नञः प्रतियोगित्वेन सूर्यस्य कर्मत्वेन दृशिक्रियायामेकस्यामन्वयात् सामर्थ्यसत्त्वे असमर्थसमासो न स्यादित्यर्थः इति टिप्पणी

[११] अ1,के4-समासा

[१२] त2-" इष्टापत्तौ "कृतः सर्वो मृत्तिकये"त्यर्थे "कृतः सर्वमृत्तिक" इत्यापत्तेः" नास्ति

[१३] त1,त5-"न चात्र" इत्यस्य "तवात्र न"

[१४] अ1-"स" नास्ति, के5- "तव स" इत्यस्य स्थाने "तदपि" इत्यस्ति, के3,अ4- "तव स" नास्ति

भावनाया अवाच्यत्वे कर्मादिप्रत्ययानुपपत्त्या दोषमुपस्थापयति - अपि चेत्यादिना॥ कर्तृप्रत्ययः पाचक इत्यादिः, कर्मप्रत्ययः हरिणा त्रातः इत्यादिः, करणप्रत्ययःवृश्चन इत्यादिः। एते प्रत्यया धातोर्भावनावाचकत्वे एव सम्भवन्ति। तदाह – धातोर्भावनावाचकत्वसिद्धाविति॥ नान्यथा धातोव्यापारवाचकत्वाभावे न सेत्स्यन्तीति मत्वाह - किं कार्यं पचनीयं चेत्यादि॥ कारिकायां किमः, पचनीय-श्चेत्यत्र चस्य च समुच्चयेन किञ्चेति उल्लेखः। कृत्स्वपि कार्यं पचनीयं चेत्यादि प्रयोगजातं दृष्टम् , तद्भावनाया अवाच्यत्वे न सिद्ध्येदिति शेषः। किञ्च क्रियावाचकतां विना पचादीनां धातुत्वं धातुसंज्ञा न स्यात् , धातुसंज्ञा सूत्रेण क्रियावाचिनामेव धातुत्वविधानादिति कारिकार्थः। कारिकार्थमेव विशदयति - अयं भावःइति॥ उदाहरणानि प्रत्ययाश्च मूले एव स्पष्टाः। अनीयर् प्रत्यय इति पाठ्यम्। धातोर्भावनावाचकत्वाभावे दोषमाह - एते च प्रत्ययाः क्रियायोगमन्तरा असम्भाविताः (असन्तः) तस्याः (भावनायाः) वाच्यतां बोधयन्ति।

अन्यथानुपपत्तिमाह - विना क्रियामिति॥ कृत्स्थले क्रियाया अप्रतीतौ कर्मादिकारकाणामनुपपत्तिरेव स्यात्। ननु क्रियां विना कारकाणि न स्युः, कर्मत्वादीनां सत्त्वे बाधकाभाव इत्यत आह - नापि तेषां कारकत्वसम्भावनापि अन्यथेति॥ अन्यथा भावनाया अवाच्यत्वे, कारकत्वसामान्यस्यापि सम्भावना नास्ति। हेतुमाह - क्रियान्वयित्वस्यैव तत्त्वात् कारकत्वात्। क्रियां विना तत्त्वा-सम्भवादित्यर्थः। आक्षेपलभ्यां भावनामादाय निर्वाहं खण्डयति - यत्तु इति॥ स्पष्टम् उत्तरोत्तरम्। आक्षेपलाभस्य पूर्वं खण्डितत्वात्।

कारिकायामपिः हेत्वन्तरसमुच्चायक इत्यत आह - किञ्चैवं नखैर्भिन्न इत्यादि॥ हरिणा त्रातः नखैर्भिन्न इत्यादौ "कर्तृकरणे कृता बहुलमि"(पा.2.1.32) ति सूत्रेण समासः, कर्तरि करणे च या तृतीया तदन्तं कृदन्तेन समर्थेन समस्यते इति सूत्रार्थः। धातोर्भावनावाचकत्वाभावे क्रियोपस्थानाभावेन हरिरूपस्य कर्तुः नखरूपस्य च करणस्य त्रातपदार्थे भिन्नपदार्थेऽनन्वयेन सामर्थ्याभावे समासा-नुपपत्तिरेव स्यात्। भावनायाः धात्वर्थत्वे तु त्राणरूपधात्वर्थक्रियायां भेदनरूप-क्रियायाञ्च तयोरन्वयेन सामर्थ्ये सति समासोपपत्तिरिति भावः। तदाह -समासो न स्यादिति॥ समासाभावे दृष्टान्तमाह - पुरुषो राज्ञो भार्या देवदत्तस्योत्यादि॥ अत्र

हि भिन्नक्रियाक्रमेणान्वये परस्परमसामर्थ्यात् यथा न समासः, तथा प्रकृतेऽपि न स्यात्। उक्तस्थले भार्याया देवदत्तेनान्वयात् राज्ञा सामर्थ्याभावो बोध्यः। सामर्थ्यमुपपादयति – अथवाध्याहृतेति॥ भिन्नादिपदघटककृदर्थकर्मादिद्वारा हरिणा त्रात इत्यत्र तृतीयार्थकर्त्रादिना वा स्वान्वययोग्यत्वेन नखैः कृत्वा भिन्नः, हरिणा त्रातः कृतः इत्येवं रूपेणाध्याहृतक्रियाद्वारा सामर्थ्यमस्ति, तस्यां हर्यादीनामन्वये स्वान्वय्यन्वयित्वरूपपरम्परासम्बन्धेन भिन्नादिपदार्थेनान्वय-सत्त्वात्। अध्याहृतक्रियामादाय सामर्थ्याभ्युपगमे दृष्टान्तमाह - अन्यथा दध्योदनः गुडधाना इत्यादि॥ उक्तस्थले "अन्नेन व्यञ्जनमि"(पा.2.1.34)ति "भक्ष्येण मिश्रीकरणमि" (पा.2.1.35)ति सूत्राभ्यां समासः।व्यज्यतेऽनेनेति विग्रहे करणे ल्युटि व्यञ्जनशब्दः करणार्थकः, मिश्रीक्रियतेऽनेनेति मिश्रीकरणशब्दोऽपि तथा।

दध्योदनः गुडधाना इत्यादौ ओदनस्य धानायाश्चाक्रियात्वेन दध्यादीनां करणत्वानुपपत्तौ तत्रानन्वयेनासामर्थ्यात् समासेऽप्राप्ते अध्याहृतोपसेकादि-क्रियाद्वारा सामर्थ्यमादाय यथा सामर्थ्यं तथेहापीति भावः। तथा चोक्तं कौमुद्यां समासप्रकरणे "इहान्तर्भूतक्रियाद्वारा सामर्थ्यमित्यादि"। तत्र ओदनादिपदानामेव उपसिक्तौदने वृत्तिः स्वीकृतेति ध्येयम्। तदाह - समासो न स्यात्॥ क्रियाध्याहाराभावे इति शेषः। अन्वयासम्भवात्। तदेतन्निरस्यति – चेन्नेति॥ तत्र विध्यानर्थक्यादिति॥ तत्र दध्योदन इत्यादौ विध्यानर्थक्यात् अध्याहाराभावे तदुदाहरणाप्रसिद्धेः सूत्रवैयर्थ्यात् ,अगत्या तथा स्वीकारेऽपि तादृशक्रियामादाय सामर्थ्यस्वीकारेऽपि।

ननु इहापि "कर्तृकरण"(पा.2.1.32) इति सूत्रप्रामाण्यात्तथास्त्वित्यत आह - हरिकृतं जगदिति॥ हरिकृतमित्यत्र रामबाणकृतो वध इत्यत्र च कृञा क्रियाया उपस्थित्या कर्तुः करणस्य चोपपत्या सामर्थ्ये सति सूत्रस्य चारितार्थ्य- सम्भवेन अध्याहारे तस्याप्रमाणत्वात्। न चैकस्यां क्रियायामिति॥ एक्रियान्वयित्व-रूपसामर्थ्येन धवखदिरावित्यादौ दृष्टेन समासोऽस्तु। तथा हि - नखैर्भिन्नःकृतः इति विवक्षया कर्मादिभावेन आदिना कर्मत्वकरणत्वादिना कृत इत्येकस्यां क्रियायामन्वयेन एकक्रियान्वयित्वरूपं सामर्थ्यमादाय निर्वाहः कार्य इति शङ्कितुराशयः। तथा स्वीकारे दोषमाह - असूर्यं पश्या इत्यादौ इति॥ न सूर्यं

पश्यन्तीति विग्रहे नञर्थस्य क्रियापेक्षत्वेन सूर्येणासामर्थ्याच्च असमर्थसमासः स्वीक्रियते। एवमेव सर्वचर्मणि इत्यत्र सर्वचर्मन् शब्दात् तृतीयान्तात् चर्मणा सर्वं कृतमित्यर्थकेन "सर्वचर्मणः कृतः खखञौ"(पा.5.2.5) इति सूत्रेण खञ् प्रत्ययः सर्वः चर्मणा कृत इति विग्रहे इष्टः, स च तत्रासामर्थ्येऽपि निपातनादसमर्थसमासः कृतः। तत्र यदि पूर्वोक्तरीत्या एकक्रियान्वयित्वरूपं सामर्थ्यं स्वीक्रियते तदा अत्रापि एकक्रियायाः सत्त्वेन तत्र च परस्परान्वयेन मुख्यसामर्थ्येनैव समाससिद्धौ असमर्थसमासकथनानुपपत्तिरेव स्यादिति भावः।

ननु साक्षादन्वयाभाव एवासमर्थसमासपदेन तत्रोक्त इत्यतः आह - इष्टापत्तौ इति॥ कृतः सर्वो मृत्तिकया इत्यत्राप्येकक्रियान्वयित्वरूपसामर्थ्यसत्त्वात्। अत्र समासः "सह सुपे"(पा.2.1.4)त्यनेनेति मत्वाह - न च समासेति॥ अन्यथा "सह सुपे(पा.2.1.4)"त्यस्याप्रवृत्तौ। "असूर्यललाटयोर्दृशितपोरि(पा.3.2.36)"ति सूत्रीयोदाहरणेऽपि तव स असमर्थसमासो न स्याद् , विधायकाभावात्।

**66.** अस्मन्मते च धातूपात्तां भावनां प्रत्यन्वयादनुपपत्तिगन्धोऽपि[१] नेति। अपिः प्रागुक्तदूषणसमुच्चयार्थः। अथवा दोषान्तर[२]मप्यर्थः।

तथा हि - "भावयति घटमि"तिवत् परमते[3] "भवति घटमि"त्यपि [४]स्यात् , तुल्यार्थत्वात्। दृष्टान्ते हि कर्तुः कुम्भकारस्य व्यापारं णिजाचष्टे। दार्ष्टान्तिके त्वाख्यातप्रत्ययः। तथा च भावनाकर्मत्वाद् घटस्य कर्मणि द्वितीया स्यादेव।

ननु[५] प्रयोजकव्यापारो णिजर्थः, कर्तृव्यापारस्त्वाख्यातार्थ इति वैषम्यमिति "घटो भवती"त्यत्र कर्तृव्यापारवत्त्वाद्[१] घटः कर्त्तैव। तथा च कर्तृसंज्ञया कर्मसंज्ञायाः[२] बाधान्न द्वितीया, किं तु प्रथमैवेति चेन्न।

---

[१] अ1- प्रत्ययान्वयानुपत्तिगन्धोऽपि

[२] त5-दूषणान्तर

[3] त5-"परमते" नास्ति

[४] अ1- "न" अधिकं, त5-"अपि" नास्ति

[५]1900-न तु, द7-मम तु, द1-"परसमवेतक्रियाजन्यधात्वर्थतावच्छेदकफलशालित्वं न घटस्य, भ्वर्थक्रियायाः परासमवेतत्वादिति चेन्न।संज्ञैव द्वितीयोत्पत्तौ बीजम्, नैतदिति वक्ष्यमाणत्वात्। मण्डनमिश्रमते धातोः केवलफलवाचकत्वेन उक्त्यसंभवाच्च। अथैवं" इत्यधिकम्, ब3- "परसमवेत-

त्वन्मते कारकचक्रप्रयोक्तुरेव कर्तृत्वेन घटस्यातथात्वात्। भावनायाः प्रत्ययार्थता-वादिनामन्यादृशकर्तृत्वस्य[३] दुर्वचत्वाच्च[४]।

10.1 मीमांसकोक्तकर्तृलक्षणानुवादः तत्खण्डनम् च

यत्तु बाधलक्षणे क्रत्वर्था[५]भ्युच्चयाधिकरणे(मी.10.1.1.) यस्यैवान्यापेक्षया - ख्यातोपात्त[६]व्यापारसमवायः स कर्तेत्युक्तत्वादचेतनघटादेरपि कर्तृत्वमिति ।

तन्न -

करोतिः क्रियमाणेन न कश्चित् कर्मणा विना।
भवत्यर्थस्य कर्ता च करोतेः कर्म जायते[७]॥ (त.वा.2-1-1-1)
करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः।
भविता तमपेक्ष्यार्थं[८] प्रयोज्यत्वं प्रपद्यते[९]॥ (त.वा.2-1-1-1)
प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः।
ण्यन्ता एव[१०] प्रयुज्यन्ते[११] तत्प्रयोजककर्तृषु॥[१२](त.वा.2-1-1-1)

---

क्रियाजन्यधात्वर्थतावच्छेदकफलशालित्वं न घटस्य, भ्वर्थक्रियायाः परासमवेतत्वादिति चेन्न। संज्ञैव द्वितीयोत्पत्तौ बीजम्, नैतदिति वक्ष्यमाणत्वात्। मण्डनमिश्रमते धातोः केवलफलवाचकत्वेन उक्तासंभवाच्च। अथैवं" इत्यधिकम्,

[१] द2- कर्तृव्यापारकत्वात्, त5-व्यापारसत्त्वात्

[२] 1915-"कर्मसंज्ञाया" नास्ति

[३] के3-न्यादृशस्य,त2-कर्मत्वस्य, अ4-प्रत्ययाः प्रत्ययार्थत्ववादिनामन्यादृशस्य कर्तृत्वस्य

[४] जै-भावनायाः इत्यादीदं वाक्यंनास्ति।, अ4-दुर्वारत्वाच्च

[५] अ1-प्रत्ययार्था,1915-क्रत्वथ

[६] भ1-यस्यैवान्यापेक्षयार्थतोपात्त

[७] ब3- करोतिः क्रियमाणेन इति श्लोकः नास्ति

[८] जो2-पेक्ष्यार्थ

[९] अ1-प्रवक्ष्यते

[१०] 1900,द6,द7-ण्यन्तादाव

[११] त3-प्रयोज्यन्ते

[१२] वा2,जै,ब1,के3,के5,त2,द2,भ1,भ3,ब2,अ4-"करोत्यर्थस्य" "प्रयोज्यकर्तृकैकान्त" इति कारिकाद्वयं नास्ति। तत्स्थाने "इत्यारभ्य" इत्यधिकम्।, 1900,द3,1915 इति मातृकासु श्लोकद्वयेन सह - "इत्यारभ्य" इत्यधिकम्।

तेन भूतिषु[1] कर्तृत्वं प्रतिपन्नस्य वस्तुनः।
प्रयोजकक्रियामा[2]हुर्भावनां भावनाविदः॥ (त.वा.2-1-1-1)

इति भावार्थाधिकरणे(मी.2-1-1) भट्टपादै[7]रा[3]ख्यातार्थभावनाया[4] निरूपितत्वात्, घटस्य तदाश्रयत्वाभावेन कर्तृत्वासंभवात्। किञ्च, [5]क्वचित् प्रयोगे काष्ठादेः[6] कर्तृत्वं क्वचिच्चाकर्तृत्वमिति व्यवस्थार्थ[7] तस्मिन् प्रयोगे य आख्यात[8] इत्यस्यावश्यकत्वे[9] "शत्रूनगमयत् स्वर्गम्" इत्यादौ स्वर्ग[10]कर्तृता[11] प्रयोज्यकर्तुर्न स्यात्, आख्यातार्थ[12]-

---

[1] अ1-भूतेषु,भ2-इक्श्तिपौ धातुनिर्देशे इति तिपा निर्देशः। भू सत्तायामित्यादिष्वित्यर्थः इति टिप्पणी

[2] अ3-पूर्वत्र "पटमुत्पादयति चैत्रे" इत्यत्र " यति " इत्यारभ्य "क्रियामा " पर्यन्तं नास्ति

[3] अ3-भट्टपादैरप्या

[4] अ1-भावनायां, 1900,त्रि-भावना

[5]अ1- "क्वचित् " आरभ्य "व्यवस्थार्थ " पर्यन्तं नास्ति। तत्स्थाने "अस्तु वा घटो भवतीत्यत्र प्रयोज्यघटव्यापारस्याख्यातवाच्यत्वं च। तथापि तदाश्रयत्वादण्यन्तकर्तृत्ववद्घटं भावयतीत्यत्राप्याख्यातार्थतदाश्रयत्वात् घटस्य कर्तृता दुर्वारेति कर्तृतानुपपत्तिरेव। प्रयोजकव्यापारस्य णिजर्थत्वेनाख्यातार्थत्वविरहात् णिजर्थाश्रयस्याकर्तृतापत्तेश्च। अथ णिजन्ताण्णिजर्थानुवादकमाख्यातं , प्रयोज्यव्यापारस्तु धात्वर्थ एवेति चेत्तर्हि काष्ठानि पचन्तीत्यत्र काष्ठानां कर्तृत्वेऽपि देवदत्तः काष्ठैः पचतीत्यत्र तेषां कर्तृत्ववारणाय " इत्यस्ति।,

भ2-"अस्तु वा घटो भवतीत्यत्र प्रयोज्यत्वम् घटव्यापारस्य आख्यातार्थत्वं च वाच्यम् तथापि तदाश्रयत्वात् घटस्य कर्तृत्ववत् घटं भावयतीत्यत्रापि आख्यातार्थतदाश्रयत्वात् घटकर्तृता दुर्वारेति कर्मत्वानुपपत्तिरेव प्रयोजकव्यापारस्य णिजर्थत्वेन आख्यातार्थत्वविरहात् णिजर्थाश्रयस्य अकर्तृतापत्तेश्च अथ णिजन्ते णिजर्थानुवादकमाख्यातम् प्रयोज्यव्यपारस्तु धात्वर्थ एव इति चेत् तर्हि काष्ठानि पचन्तीत्यत्र काष्ठानां कर्मत्वे(?) अपि देवदत्तः काष्ठैः पचतीत्यत्र तेषां कर्तृत्ववारणाय तस्मिन् प्रयोगे य आख्यात इति किञ्चेत्यारभ्य पाठान्तरम् बोध्यम्" इति टिप्पणी

[6] के5-कांस्यादेः

[7]द3-"क्वचित्प्रयोगे काष्ठादेः कर्तृत्वम्, क्वचिच्चाकर्तृत्वमिति व्यवस्थार्थम्" नास्ति। तत्स्थाने "इह णिजर्थाश्रयस्याकर्तृतापत्तेश्च, अथ णिजन्ते णिजर्थानुवादकमाख्यातम्, प्रयोज्यव्यापारस्तु धात्वर्थ एवेति चेत् " इत्यस्ति

[8]अ1-आख्यातार्थस्तदाश्रयः कर्ता, त3-यदाख्यातम्,भ2-यः आख्यातबोधितव्यापारे आश्रयः स कर्ता इति टिप्पणी

[9] अ3-इत्यर्थस्यावश्यकत्वे

[10] अ1-गमन

[11] त5-"ता" नास्ति

[12] त1-"अर्थ" नास्ति

व्यापारानाश्रयत्वात्।[१] न चेष्टापत्तिः, तथा सति स्वर्गस्य कर्मत्वानापत्तेः। कर्तुरीप्सिततमत्वस्य[२] कर्मत्वात्।

---

वैयाकरणः स्वमते दोषं वारयति - अस्मन्मते इति॥ वैयाकरणमते हरिणा त्रात इत्यादौ धातुनोपस्थापितां भावनां प्रत्यन्वययोग्यतायाः परस्परान्वयस्य च सत्त्वेन समासोपपत्तौ न कोऽपि दोषः।

दोषान्तरमिति॥ दोषान्तमिति दुष्टःपाठः। भावयति घटमिति॥ द्वितीयव्यापारप्रयोज्यफलाश्रयत्वाद् घटस्य कर्मता। तथैव फलमात्रस्य धात्वर्थत्वे तदाश्रयत्वाद् घटस्य कर्मत्वेन घटं भवतीति स्यात्। तुल्यार्थत्वात् फलमात्रार्थकत्वात्। ननु भावयतीतिस्थले णिजर्थोऽधिक इत्यत आह - दृष्टान्ते इति॥ भावयतीत्यत्र व्यापारो न धात्वर्थः। किन्तु णिजर्थः घटं भवतीत्यत्रापि व्यापार आख्यातार्थः। न तु धात्वर्थः।तथा चोभयत्रापि फलवाचकत्वं समानमेव। तथा चेति॥ यथा प्रत्ययार्थभावनाकर्मत्वात् णिजन्तस्थले घटस्य कर्मता तथैवात्रापीति भावः।

वैषम्यमाह - ननु प्रयोजकव्यापार इति॥ फलितमाह - घटः कर्त्तैव॥ कर्तृसंज्ञाफलमाह - तथा चेति॥ कर्तृसंज्ञया कर्मसंज्ञाया बाधः, परत्वात्। तथा च न द्वितीया। परमतं खण्डयति - त्वन्मत इति॥ त्वं कारकचक्रप्रयोक्तृत्वमेव कर्तृत्वं मन्यसे। तच्च घटादावचेतने न सम्भवतीति कर्तुर्ज्ञानाभावेन कथं बाधः स्यात्। ननु धात्वर्थव्यापाराश्रयत्वमेव कर्तृत्वं तत्राह - भावनाया इति॥ अन्यादृशेति॥ धात्वर्थव्यापाराश्रयत्वरूपस्य दुर्वचत्वात् त्वन्मते भावनाया धात्ववाच्यत्वात्। मीमांसकमतोक्तकर्तृलक्षणेन स्वार्थं साधयति – यत्वित्यादिना॥ तत्रत्यम् कर्तृलक्षणमाह - अस्यैव वान्यापेक्षयेति॥ अन्यापेक्षया करणाद्यपेक्षया आख्यातोपात्तस्य तिङर्थस्य व्यापारस्य समवायः सम्बन्धो यस्मिन् देवदत्तादौ स देवदत्तादिः कर्ता। तथा च घटो भवति इत्यादौ आख्यातं तिप् तदुपात्तव्यापारसमवायो

---

[१]के4- "णिजर्थानुवादकत्वादाख्यातस्येति भावः,अन्यथा घटो भवतीत्यत्रैव घटं भावयतीत्यत्रापि आख्यातार्थाश्रयत्वात् घटस्य कर्तृत्वापत्तेः" इत्यधिकं

[२] अ1,त2-तमस्य

घटस्येति समन्वयः। इदञ्च लक्षणमचेतनस्यापि तदाह – अचेतनघटादेरपीति॥ तदेतत्खण्डयति – तन्नेति॥

करोतिः क्रियमाणेनेत्यादि॥ क्रियमाणेन सम्पाद्यमानेन कर्मणा विना तद्राहित्येन कश्चित् करोतिः न। करोतीत्यनेन कृञर्थो गृह्यते सकर्मकत्वात् । कर्मविहाय करोतिर्नप्रयुज्यते। करोतेः कर्माह – भवत्यर्थस्येति॥ घटो भवतीत्यत्र भवत्यर्थस्य भूधात्वर्थस्य यः कर्ता घटादिः, स एव घटादिः करोतेः कर्म जायते, घटं करोतीति प्रयोगात्। अपरोऽपि विशेष इत्याह - करोत्यर्थस्य क्रियायाः यः कर्ता कुलालादिः स भवितुर्भवनाश्रयस्य घटो भवतीत्यत्र घटादेः प्रयोजकः। घटो भवति, कुलालादिः प्रेरयतीति प्रतीतेः कुलालादयो घटस्य प्रयोजककर्तारो भवन्ति। प्रयोज्यमाह – तमपेक्ष्य। प्रयोजककर्तारमपेक्ष्य। तन्निरूपिततया भविता घटादिः प्रयोज्यत्वं प्रेर्यत्वं प्रपद्यते तेन रूपेण ज्ञानविषयीभवति। प्रयोज्यव्यापारानुकूलव्यापारे ण्यन्तप्रयोगः, तत्र प्रयोजक एव कर्ता मुख्य इत्याह – प्रयोज्यकर्तृकैकान्तेति॥ प्रयोज्यः कर्ता यस्य व्यापारस्य स प्रयोज्यकर्तृकः। स एव एकान्तःएकदेशो विशेषणीभूतो व्यापारो यस्मिन् व्यापारे प्रयोजकव्यापारे, तस्य प्रतिपादका बोधका ण्यन्ता भावयतीत्यादयः एव प्रयुज्यन्ते। तत्प्रयोजकेति॥ तस्य प्रयोज्यस्य प्रयोजकः, कर्तृषु विषयीभूतेषु। इत्यारभ्य उपक्रम्य। तेन भूतिषु कर्तृत्वमिति॥ तेन भवत्यर्थप्रयोजके एव णिजन्तप्रयोगेण भूतिषु भवनात्मक व्यापारेषु कर्तृत्वं तदाश्रयत्वं प्रतिपन्नस्य प्राप्तस्य वस्तुनो घटादेः यः प्रयोजकः कुलालादिः तस्य या क्रिया प्रेरणादिरूपा, भावनाविदः भावनापदार्थज्ञातारः तामेव भावनामाहुः। तादृशीक्रिया एव भावनेत्यर्थः। अयमर्थः भावार्थाधिकरणे भावनापदार्थनिश्चायके। तथा च प्रयोजकव्यापार एवाख्यातार्थः, स च प्रयोज्येऽचेतने कथं तिष्ठेदित्यभिप्रायः। तदाह - घटस्य तदाश्रयत्वाभावेन उक्तभावनाश्रयत्वाभावेन कर्तृत्वासम्भवात् , आख्यातार्थभावनासमवायाभावात्।

ननु उक्तासु कारिकासु भवत्यर्थस्य कर्तेति पुनःपुनरुक्तत्वात् घटादीनामपि कर्तृत्वं स्वीकृतमेवेत्यरुचेराह - किञ्च क्वचित्प्रयोगे इति॥ काष्ठानि पचन्तीत्यत्र। अकर्तृत्वमिति॥ देवदत्तः काष्ठैः पचतीति प्रयोगे काष्ठानामकर्तृत्वम्। एवं सति कर्तृलक्षणमनिरूपितं भवतीति तद्व्यवस्थार्थमनुगमार्थं तस्मिन् प्रयोगे यदाख्यातं

तदर्थव्यापाराश्रयत्वं कर्तृत्वं वक्तव्यम्। तथा सति शत्रूनगमयत्स्वर्गमित्यत्र स्वर्गकर्तृता स्वर्गगमनकर्तृता प्रयोज्य कर्तुः शत्रोर्न स्यात् ,तस्मिन् प्रयोगे शत्रूनगमयदिति प्रयोगे यदाख्यातम् अगमयदित्यत्र तिप् तदर्थो व्यापारस्तदाश्रयत्वस्य हरौ सत्त्वेऽपि शत्रूणां तदभावात्। तदाह – आख्यातार्थव्यापारानाश्रयत्वात्। इष्टापत्तिं परिहरति – स्वर्गस्येति॥ कर्तृव्यापारप्रयोज्यफलाश्रयत्वरूपस्य कर्तुरीप्सिततमस्य "कर्तुरीप्सिततमं कर्म"(पा.1.4.49)ति सूत्रेण कर्मसंज्ञाविधानात्। उक्तरीत्या शत्रूणामकर्तृत्वेन तत्त्वासम्भवात्।

**67.** **न च[१] प्रयोजककर्तृ[२]कर्मत्वमेव[३] स्वर्गस्यास्ताम्, तथा सति णिजर्थकर्मत्वापत्तौ गमिकर्मतानापत्तेः[४]। तथा च "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनी" (पा.2-3-12)ति स्वर्गायेति[५] चतुर्थ्यनापत्तेः।[६] "पाचयति देवदत्तो विष्णुमित्रेणे"-त्यत्र विष्णुमित्रस्य[७] [कर्तृत्वविरहेण[८] तृतीयानापत्तेश्च। न चेयं करण[९]]तृतीयैवेति[१०] शङ्क्यम्[११], तथा सति देवदत्तस्याहेतुतापत्तौ[१२] णिजुत्पत्त्यसंभवापत्तेः। "तत्प्रयोजको हेतुश्चे"(पा.1-4-54)ति कर्तृप्रयोजकस्यैव हेतुत्वात्। एवं शत्रूणामकर्तृत्वे[१३] -**

---

[१] जो2-न तु

[२] द1-कर्तृत्व

[३] अ4- "एव" नास्ति

[४] अ3-तानापत्तिः

[५] के5- "स्वर्गायेति"नास्ति

[६]अ1,के4,भार1,त3,त2- "स्याद्वा स्वर्गपदादिवत् शत्रुपदादपि चतुर्थी णिजर्थकर्मत्वाविशेषात्" इत्यधिकं, भार1,त3,द5 मध्येऽपि पूर्वोक्तं वाक्यमधिकम् "पदादिवत्" स्थाने "पदादिव" इति वर्तते

[७] त2-" विष्णुमित्र" नास्ति

[८] त2-कर्तृत्वविवरण

[९] त5-कारण

[१०] अ3- "इति " नास्ति

[११][ ] एतत्कोष्टकान्तर्गतः ग्रन्थः मूलमातृकायां नास्ति, अन्यत्र सर्वत्रास्ति उपयुक्तश्च।, जो2- "चतुर्थ्यनापत्तेः" इत्यारभ्य "शङ्क्यम्" इत्यन्तग्रन्थस्य स्थाने "शङ्क्यम्।तथासति देवदत्तो विष्णुमित्रेणेत्यत्र विष्णुमित्रस्य कर्तृत्वविरहेण तृतीयानापत्तेश्च। न चेयं करणतृतीयेति शङ्क्यम् " इत्यस्ति।

[१२] के4-देवदत्तस्य हेतुतापत्तौ

[१३] त2-महेतुत्वे

ऽप्यूह्यम्। "ण्यन्ते कर्तुश्च[1] कर्मणः[2]" इति भाष्य[8]विरोधापत्तेश्च[3]। अकर्तुः कर्मण एव कर्तृपदेनेह व्यावर्त्यत्वात्[4]। न च "कर्तुः[5] कर्मण" इति भाष्यमसंगतमेव[6], संज्ञान्तरानाविष्टे कर्तृपदसंकेतेनात्रापि[7] प्रयोज्यस्य[8] "गतिबुद्धी"(पा.1-4-52)ति सूत्रेण कर्मसंज्ञाविधानेन[9] कर्तृत्वासंभवादिति वाच्यम्, शुद्धधात्वर्थव्यापारे कर्तृत्वेऽपि प्रयोजक[10]व्यापारे कर्मत्वात्[11]। क्रियाभेदेन तयोरविरोधात्। [12]किञ्च, देवदत्तः पाचक इत्यत्रा[13]ख्याताभावाद् देवदत्तादेः कर्तृत्वं न स्यादित्याद्यूह्यम्[14]। [15]किञ्च, फलप्रकारकव्यापारविशेष्यका[16]नुकूलत्वसंसर्गकशाब्दबोधे त्वया धात्वाख्यातयो-र्धातुकृतोर्वानुपूर्वी हेतुरभ्युपेया। मया च धातोरेवानुपूर्वी तथा वाच्येति लाघवम्। न च तवापि यदाख्यातस्य व्यापारवाचकत्व[17]भ्रमः तदा तद्धेतुरभ्युपेयः[18],

---

[1] 1900-कर्तुः

[2] भ2-प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः॥ इति टिप्पणी

[3] द7-विरोधापत्तिश्च

[4] अन्यत्र सर्वत्र "कर्तृपदव्यावर्त्यत्वात्" इति अस्ति। अ1,भार1,त2,त3,के4,द3- "तथा च कृष्णेन शत्रवः स्वर्गं गम्यन्ते इतिवत् कृष्णेन शत्रून् स्वर्गो गम्यते इत्यापत्तिः दुर्वारा स्यात्।" इत्यधिकम्।,भ2- "तथा चात्र कृष्णेन शत्रवः स्वर्गं गम्यन्ते इतिवत् कृष्णेन शत्रून् स्वर्गो गम्यते इत्यस्याप्यापत्तिः दुर्वारा स्यात्।" इत्यधिकम्।,द5--"तथा चात्र कृष्णेन शत्रवः स्वर्गं गम्यन्ते इतिवत् कृष्णेन शत्रून् स्वर्गो गम्यते इत्यस्यापत्तिः दुर्वारा स्यात्।" इत्यधिकम्।

[5] के4-कर्तुश्च

[6] ब3-भाष्यविरोध एव

[7] त1- "अत्र" नास्ति

[8] जै- "प्रयोज्यस्य" नास्ति

[9] त1-विधाने

[10] जै- "शुद्धधात्वर्थव्यापारे कर्तृत्वेऽपि प्रयोजक" नास्ति

[11] जो2- "प्रयोजकव्यापारे कर्तृत्वात्" इत्यस्य "प्रयोजकत्वात्" इत्यस्ति।

[12] भ2-आख्याते लक्षणाव्याप्तिमुक्त्वा कृत्प्रत्ययस्थले लक्षणासम्भवमाह किञ्चेति इति टिप्पणी

[13] अ1-इत्यादावा

[14] अ3-त्यूह्यम्, त1-त्याद्यूह्यः, द1,के4-त्याद्यप्यूह्यम्

[15] भ2-पुनर्गौरवदोषापादितं दोषान्तरमप्यर्थमाह किञ्चेति इति टिप्पणी

[16] अ4-...विशेष्या

[17] भार1-वाचकत्वे

[18] भार1,त3,के4,भ2,भ3-रभ्युपेयम्

धातुशक्तिज्ञानस्यापि[१] कारणत्वे कारणता[२]रूपायां शक्तौ व्याकरणस्यैव निर्णायकत्वात्। अन्यथा घटपदस्यापि शक्तिभ्रमाद् पटबोधकत्वेन[३] पटशक्तत्वा[४]पत्तेरिति।

---

वादी स्वमतं पुनरुत्थापयति - न च प्रयोजककर्तृकर्मत्वमिति॥ अयमभिप्रायः – "कर्तु"(पा.1-4-49)रिति सूत्रे कर्तृमात्रमुक्तम्। तत्त्वञ्च प्रयोजक-कर्तर्यपि सुस्थितम्। तथा च प्रयोजककर्तुर्यो व्यापारस्तेनाभीप्सिता यथा शत्रव-स्तथैव शत्रूणामीप्सितं स्वर्गम् भवति, प्रयोजकव्यापारप्रयोज्यफलाश्रयत्वरूपस्य ईप्सिततमत्वस्य स्वर्गे सत्त्वात्। यद्वा प्रयोजकस्य हरेः यः प्रेरणीयः कर्ता शत्रुरूपः, तस्य कर्मत्वम् ईप्सिततमत्वं स्वर्गस्येति बोध्यम्।

तथा च प्रयोजककर्तृकर्मत्वं स्वर्गस्यापि सिद्धमेव। खण्डयति - तथा सतीति॥ एवंविधकर्मत्वस्वीकारे णिजन्तस्थले गमिकर्मत्वेनाभिमतानां ग्रामादीनां णिजन्तेनाप्यमानत्वात् तत्कर्मत्वापत्तिः। तथा च गत्यर्थकर्मत्वाभावेन ग्रामं ग्रामाय वा गच्छतीत्यादौ "गत्यर्थकर्मणी"(पा.2-3-12)ति सूत्रेण चतुर्थ्यनापत्तिः। प्रकृते च स्वर्गाय स्वर्गमिति न स्यात्। गत्यर्थकर्मण्येव तेन चतुर्थी विधानात्। दोषान्तरमप्याह - पाचयति देवदत्तो विष्णुमित्रेणेति॥ तस्मिन् प्रयोगे आख्यातार्थ-व्यापाराश्रयत्वाभावात् विष्णुमित्रस्याकर्तृत्वात् तृतीयानापत्तेः, "कर्तृकरणयो-स्तृतीये" (पा.2-3-18) त्यनेन कर्तर्येव तृतीयाविधानात्।

ननु कर्तृतृतीया मास्तु करणे तृतीयैव स्यादित्याक्षिप्य खण्डयति - न चेयमिति॥ तथा सति करणतृतीयायामुक्तस्थले देवदत्तस्य हेतुत्वापत्तिः। कर्तुः प्रयोजकस्य "तत्प्रयोजको हेतु"(पा.1-4-55)रिति सूत्रेण हेतुसंज्ञा विधानात् करण-तृतीयाया तदसम्भवात्। नैषा आपत्तिरत्रैवान्यत्रापीत्याह - एवं शत्रूणाम-कर्तृत्वेऽपीति॥ तत्रापि करणतृतीयास्वीकारापत्त्या शत्रूणामकर्तृत्वे हेतुसंज्ञाभावे

---

[१] के5,म-धातुशक्तित्वस्यापि

[२] अ3- "ता" नास्ति

[३] अ1- "त्वेन" नास्ति, अ4-पटबोधसत्वौ

[४] अ3-शक्तता

णिजुत्पत्त्यनुपपत्तेः। भाष्यविरोधेनापि करणतृतीया अयुक्तेत्याह - ण्यन्ते कर्तुश्च कर्मणः इति॥ ण्यन्ते कर्मद्वयम् शत्रूनगमयत्स्वर्गमित्यादौ। यथा - स्वर्गं कर्तुरीप्सितत्वात् कर्म, शत्रूणामण्यन्तावस्थायां कर्तॄणां "गती"(पा.1-4-52) त्यादि सूत्रेण कर्मत्वम्।

तत्रैकं कर्म कर्तुरीप्सिततमं स्वर्गादि , द्वितीयं कर्तृभूतं कर्म शत्र्वादि। अत आह भाष्ये कर्तुश्चकर्मणः। तेन अकर्तुः कर्मणः स्वर्गादेः व्यावृत्तिः। विष्णुमित्रेण पाचयतीत्यादौ यदि करणे तृतीया तदा शत्रूणामपि करणत्वेन करणसंज्ञां प्रबाध्य कर्मसंज्ञाविधानमेव स्यात्। तदा कर्तुश्च कर्मण इति भाष्यासङ्गतिः। करणस्य कर्मण इत्येव कथनौचित्यात्। ननु त्वन्मतेऽपि भाष्यमिदमसङ्गतमेवेत्याक्षिपति - न च कर्तुः कर्मण इति॥ भाष्यासङ्गतिमुपपादयति - संज्ञान्तरानाविष्ट इति॥ स्वतन्त्रस्य संज्ञान्तरानाविष्टस्य कर्मसंज्ञकत्वाद्यभाववतः कर्तृपदसङ्केतेन कर्मसंज्ञाविधानेन शत्र्वादेरकर्तृत्वात्। कर्तृत्वाभावमुपपादयति – गतिबुद्धीति॥ तेन सूत्रेण कर्मसंज्ञयाविष्टत्वात्। भाष्यं सङ्गमयति - शुद्धव्यापार इति॥ निरूपकभेदेनैकस्यैव संज्ञाद्वयबोधने विरोधाभावात्। निरूपकभेदमाह - शुद्धव्यापारे धात्वर्थव्यापारे, कर्तृत्वं, प्रयोजकव्यापारे णिजर्थरूपे कर्मत्वमित्यर्थः। अविरोधोपपादनमाह – क्रियाभेदेन इति॥ शुद्धधात्वर्थणिजर्थरूपव्यापारभेदेन तयोः कर्तृत्वकर्मत्वयोः एकस्मिन् धर्मणि सत्त्वेऽपि अविरोधात्।

आख्यातार्थव्यापाराश्रयत्वस्य कर्तृत्ववादिनोऽस्य मते कर्तृत्वानुपपत्तिमाह – किञ्चेति॥ देवदत्तः पाचकः इति॥ पाचक इत्यत्राख्याताभावात् देवदत्तस्य निरुक्तकर्तृत्वाभाव इति भावः। आख्यातस्य भावनावाचकत्ववादिमते कार्यकारणभावे गौरवमित्याह - किञ्च फलप्रकारकेति॥ अयमभिप्रायः - शाब्दबोधो द्विविधः, पर्यवसितः अपर्यवसितश्च। अखण्डः खण्डश्चेत्यपि वक्तुं शक्यते। देवदत्तः पचतीत्यत्र देवदत्ताभिन्नैककर्तृको वर्तमानकालिको विक्लित्त्यनुकूलो व्यापार इति पर्यवसितो बोधः। यदा उपस्थितयोः फलव्यापारयोरेव बोध इष्टस्तदा मीमांसकवैयाकरणयोरुभयोरेव भावनाविशेष्यको बोधः सम्मतः, तत्र फलम् अनुकूलत्वसम्बन्धेन भावनायां प्रकारः। तथा च फलप्रकारको व्यापारविशेष्यकः अनुकूलत्वसंसर्गकश्च स बोधो जायते। बोधं प्रति आकाङ्क्षाज्ञानस्य कारणत्वात् मीमांसकनये

तादृशबोधे पचतीति धात्वाख्यातयोरानुपूर्वीरूपाकाङ्क्षाज्ञानस्य कारणता, धात्वाख्यातयोरेव उभयशक्तत्वात्। वैयाकरणः स्वमते लाघवं वक्ति - मया चेति॥ मम मते धातोरेव फलव्यापारयोः शक्तत्वात् तन्मात्रानुपूर्वीज्ञानस्य कारणतेति लाघवम्। वैयाकरणमतम् स्वतुल्यतया उपस्थापयति – वैयाकरणमतेऽपीति॥ भ्रमो नामातस्मिंस्तद्बुद्धिः। यदा भावनाया धातुवाच्यत्ववादिनो यदा आख्यातं भावनावाचकमिति भ्रमस्तदा त्वयापि धात्वाख्यातयोरानुपूर्वीज्ञानस्य कारणता वाच्येति न त्वन्मते लाघवम्। मतमेतन्निरस्यति - धातुशक्तिज्ञानस्यापि कारणत्वम् इति॥ आख्यातशक्तिभ्रमेण भावनाबोधः, धातुज्ञानेनापि भावनाबोध इति स्थितौ भावनाबोधं प्रति धातुज्ञानमपि कारणम्। प्राचीनवैयाकरणानां मते बोधजनकतैव शक्तिरिति मत्त्वाह - कारणतारूपायां शक्तौ इति॥ शक्तिग्राहकेषु व्याकरणस्य परिगणनादाह – व्याकरणस्यैवेति॥ व्याकरणेन धातुशक्तेरेव बोधनात् धातोरेव भावनायां शक्तिः, न तु आख्याते। ननु आख्यातशक्तिज्ञानादपि शाब्दबोधदर्शनेन आख्यातेऽपि शक्तिरस्त्वित्यत आह - अन्यथा घटपदस्यापि इति॥ न केवलं बोधजनकत्वमेव शक्तिमत्त्वम् अपि तु शक्तिग्राहकप्रमितशक्तिमत्त्वमेव।

**68.** साधुत्वनिर्णायकं व्याकरणम् इति चेत्, शक्तत्वस्यैव साधुत्वस्य[१] व्याकरणाधिकरणे**(मी.1-3-8)** न्यायसुधायामभिधानात्[२]। प्रत्ययस्यैवमप्यसाधुतापत्तेश्चेति ध्येयम्[३]।

10.2 धातोः क्रियावाचित्वे भूवादिसूत्रस्य प्रामाण्यवर्णनम्

धातुत्वमेव[४] नेति। अयं भावः- धातुसंज्ञाविधायकं [५]तावद् "भूवादयो धातवः" **(पा.1-3-1)** इति[६] सूत्रम्। तत्र च[१] भूश्च वा[२]श्चेति द्वन्द्वः। आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः। ततो भूवौ आदी येषामिति बहुव्रीहिः[३]।

---

[१] त2-धातुत्वस्य

[२] जै-व्याकरणेऽधिकरणे न्यायसुधानाभिधानात्

[३] भ1-बोध्यम्

[४] त5-साधुत्वमेव

[५] अ1- "हि" अधिकं

[६] त5- "इति" नास्ति

तथा च भूप्रभृतयो वासदृशा धातव इत्यर्थः पर्यवसितः। सादृश्यं च[४] क्रियावाचकत्वेन। अन्यथा वा[५]शब्दानर्थक्यं स्यात्। इत्थं च क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं[६] पर्यवसितम्। अत्र क्रिया[७]वाचित्व[८]मात्रोक्तौ वर्जनादि-रूपक्रियावाचके हिरुक्[९] नानेत्यादावतिव्याप्तिरिति[१०] गणपठितत्वमुक्तम्॥9॥

11. गणपठितत्वस्यैव धातुत्वे दोषप्रदर्शनम्

[११]ननु गणपठितत्वमेव धातुत्वमास्ताम्, न तु क्रियावाचकत्वमपि[१२]। न च वाशब्दानर्थक्यम्, "भूवादीनां[१३] व[१४]कारोऽयं[१५] मङ्गलार्थः प्रयुज्यते"[9]इति वार्तिक-कारैरेव तत्प्रयोजनस्योक्तत्वादित्यत[१६] आह-

सर्वनामाव्ययादीनां यावादीनां[१७] प्रसङ्गतः।
न हि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम्[१८]॥10॥

---

[१] के4,के5,अ4- "च" नास्ति
[२] द3- "साधुत्वनिर्णायकम्" इत्यत्र "यकम्" इत्यारभ्य "वाश्चेति" इत्यत्र "वा" पर्यन्तम् ग्रन्थः नास्ति
[३] अ1-विग्रहः
[४] अ4- "च " नास्ति
[५] जै- "वा" नास्ति
[६] के5,अ4-धातुत्वमिति
[७] के4-क्रियामात्र
[८] अ4-...वाचकत्व
[९] जो2-इरुक्
[१०] के5,अ4-व्याप्तिरित्यतः
[११] द3-अस्याः कारिकायाः व्याख्याग्रन्थः अत्र नास्ति, अनन्तरकारिकाव्याख्यायां "ननु धात्वर्थः क्रियेत्यत्र प्रविष्टम्" इत्यारभ्य अस्ति, अयं सर्वोऽपि ग्रन्थः अस्त्यादावपि धर्म्यंशे इति कारिकाव्याख्याने "अस्तीत्युत्तरमपि स्यात् तुल्यत्वात्" इति ग्रन्थानन्तरमस्ति
[१२] 1915-----मपीति
[१३] जै-भूपादीनां
[१४] त1,1900,1915-वा
[१५] भार1,त3-वकारो वै
[१६] अ1- "अत " नास्ति,भ2-"इति" नास्ति
[१७] जै- "यावादीनां " नास्ति
[१८] भार1,त3-स्थितम्

गणपठितत्व[१]मात्रोक्तौ सर्वनामा यो[२] या तस्यापि[३] धातुत्वं स्यात्। तथा च याः पश्यसी[४]त्यादौ "आतो धातोः"(पा.6-4-140) इत्याकारलोपः स्यात्। इत्थं चोक्तास्वरसादेव मङ्गलार्थत्वं परित्यज्य "भुवो वार्थं वदन्तीति भ्वर्था वा वादयः[५] स्मृताः"[10] इति पक्षान्तरं तैरेवोक्तमिति[६] ध्येयम्।

ननु लक्षणप्रतिपदोक्तयोः[७] प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो[८] ग्रहणम्[९], तस्य[१०] लाक्षणिकत्वात्, अत आह- वेति[११]। अव्ययं यो वा तत्रातिप्रसङ्गः। तथा[१२] च विकल्पार्थको[१३] वातीत्यादि[१४]प्रयोगः स्यादिति भावः। आदिना सु इत्युपसर्गस्य माङ्[१५] मा[१६] इति स्वराद्योश्च संग्रहः। न च[१७] षत्व[१८]पाठादुपसर्गव्यावृत्तिः। "साध संसिद्धा"वित्यस्य मूर्धन्यादित्वाय[१९] षोपदेशलक्षण[२०]वत्त्वं[२१] तत्त्वमि[२२]त्यन्यत्र[१]

---

[१] जै-गणपठितव्य

[२] अ1-सर्वनामाव्ययो, अ4-सर्वनामादयो

[३] 1915-सर्वनामा योपात्तस्यापि

[४] त1-पश्यती

[५] अ1,ब1,1900,1915,अ4-भ्वर्था भूवादयः

[६] त2-पक्षान्तरमेवोक्तमिति

[७] त3- "प्रतिपदोक्तयोः " नास्ति

[८] अ4- सर्वनामेन

[९] अ4-अग्रहणम्

[१०] जो2,अ4- "तस्य " नास्ति

[११] अ1-अव्ययेति

[१२] त5-तत्र

[१३] के4-विकल्पकार्थको

[१४] अ1,भार1,त3,द4,अ4- "आदि " नास्ति, त1,त5-वाति

[१५] त2-" माङ्" नास्ति

[१६] अ4-मान

[१७] त1- "च " नास्ति

[१८] भ1-सत्त्व

[१९] अ1-मूर्धन्यादित्वोपपत्तेः

[२०] के4- "लक्षण" नास्ति

[२१] ज1-लक्षणत्वं

[२२] के5,म- "तत्त्वम्' नास्ति

निर्णीतत्वात्। तथा च समीचीनवर्जनाद्यर्थे[२] सवति[३] मिमीते मातीत्यापत्तिः[४], "षु प्रसवे", "माङ् मा माने[५]" इति धातूनां सत्त्वा[६]न्निर्णयासंभवात्।

---

ननु साध्वनुशासनेऽत्रशासने इत्युक्त्या व्याकरणं साधुत्वनिर्णायकं न तु शक्तिनिर्णायकमित्याशङ्कां मनसि निधायाह – साधुत्वनिर्णायकमिति॥ न तु शक्तिनिर्णायकम्। मीमांसकमतमादाय निरस्यति तन्मते साधुत्वशक्तत्वयोरैक्यात्। अपभ्रंशे तैः शक्तेरस्वीकारात्। तदाह – शक्तत्वस्यैवेति॥ तद्रीत्या धातोर्भावनाऽवाचकत्ववादिनो मते प्रत्ययस्याख्यातस्यैवं भावनावाचकत्वे इति शेषः। अपिः ह्यर्थकः। तस्मादित्यर्थः। धातुत्वमेव नेति॥ उक्तकारिकायामिदं पठितम्। धातोः क्रियावाचकत्वं विना धातुत्वमेव न स्यादित्यर्थः।

तदेवोपपादयति - अयं भाव इति॥ स्पष्टम्। व्यवस्थाप्रकारेति॥ व्यवस्थाशब्दः प्रभृतिपरः। आद्यवयव इति यावत्। प्रकारशब्दः सादृश्यपरः, 'प्रकारो भेदसादृश्यम्' इति स्मरणात्। भुवः प्रभृत्यर्थके आदिशब्देऽन्वयः,वाशब्दस्य सादृश्यार्थके अन्वयश्च। तदाह - भूप्रभृतयो वासदृशाः इति॥ सादृश्यप्रतियोगितावच्छेदकव्यापाकीभूतधर्मेण सादृश्यग्रहणम् इत्याह - सादृश्यं च क्रियावाचकत्वेनेति॥ सादृश्यप्रतियोगी वाधातुः,प्रतियोगितावच्छेदकं वात्वम्, तद्व्यापकं न तावदादन्तत्वाजन्तत्वपच्त्वादिरूपम्, भू-पच्-दरिद्रादीनामग्रहणप्रसङ्गात्।

अतः तात्पर्यविषयीभूतक्रियावाचकत्वेनैव तद्ग्रहणमिति भावः। तादृश रूपेण सादृश्यग्रहणे निर्णायकमाह – अन्यथेति॥ क्रियावाचकत्वं विहाय अजन्तत्वादिना सादृश्य ग्रहणे वादिग्रहणं व्यर्थमेव स्यात्। भ्वादय इत्येव सूत्रमस्त्विति॥ आदिशब्दे तन्त्रम्। तथा एकस्य भूप्रभृतय इत्यर्थः स्यात् द्वितीयस्य भूसदृश इत्यर्थः। तथा च भूसादृश्येनैव अजन्तत्वादिलाभे वाग्रहणमनर्थकम्।

---

[१] अ4-....मित्यत्र

[२] अ3- "अर्थे" नास्ति

[३] अ3,त1,त5 -सुवति

[४] के5-यातीत्यापत्तेः, अ4-मातीत्यापत्तेः

[५] अ3,त1,1900-माङ् माने मा माने, जो2,द1-माङ् माने

[६] अ4-धातूनामेव गणे सत्त्वा.....

अथवा क्रियावाचकत्वाग्रहणे भ्वादिगणपठितस्य लाभाद् तद्ग्रहणस्य वैयर्थ्यमिति बोध्यम्।

पदकृत्यमाह - अत्र क्रियावाचकत्वमात्रोक्तौ इति॥ हिरुग् नाना इत्याद्यव्ययानां क्रियावाचकत्वस्य कोशादिसिद्धस्य सत्त्वादतिव्याप्तिः। गण-पठितत्वोक्तौ तेषां भ्वादिगणे पाठाभावेन न दोषः। विशेष्यांशफलमाह – गण-पठितत्त्वमेवेति॥ ननु क्रियावाचकत्वाभावे तदर्थकवाग्रहणवैयर्थ्यापत्तिः इत्यत आह - न च वाशब्दानर्थक्यम् तस्य मङ्गलार्थत्वात् इति॥ "भूवादीनां वकारोऽयं मङ्गलार्थः प्रयुज्यते" इति वार्तिके तु वकार इति पाठः। ग्रन्थस्तु "भूवा" इति पठिताभिप्रायेण। अयं वकार आगमादिरूपः। अत एव न यण्। अन्यथा आदि-घटकाकारे परे यण् स्यात्। मङ्गलार्थत्वन्तु तस्य 'मङ्गलार्थं वकारागमं प्रयुङ्क्ते' इति भाष्यात् वकारस्य अमृतबीजत्वाच्च।

क्रियावाचकत्वफलमाह - सर्वनामाव्ययादीनाम् इति॥ कारिकार्थः स्फुटः। भ्वादिगणपठितानुपूर्वीसदृशानुपूर्वीमत्त्वमित्येव धातुत्वं यद्युच्यते तदा सर्वनामा सर्वनामसंज्ञकः यः या इति टाबन्तो यच्छब्दः, तस्यापि धातुत्वापत्तिः, या प्रापणे इति भ्वादिगणपठितानुपूर्वी मत्त्वात्। धातुत्वफलापत्तिमाह - तथा चेति॥ धातुत्वात्। "आतो धातो"रिति॥ तेन धातोरेवाकारलोपविधानात्।

ननु वाग्रहणस्य सफलत्वे वाकारस्य मङ्गलार्थत्वकथनानुपपत्तिरित्यत आह – इत्थञ्चोक्तास्वरसादिति॥ अस्मिन्पक्षे सूत्रे आदिग्रहणं नास्ति तथा चोक्तं भाष्ये "नेदमादिग्रहणं वदेरयमौणादिक इञ् प्रत्ययः कर्तृसाधनः। भुवं वदन्तीति भूवादयः। भुवं जायमानमर्थं वदन्ति ते भूवादयः। वदधातोरिञ् प्रत्ययः, क्रियावाचिनो धातवः" इति। गणपठितत्वमात्रस्यौचित्याय उक्तदोषं परिहरन्नाह - ननु लक्षणप्रतिपदोक्तेति॥ तस्य सर्वनामनिष्पन्नतया या इत्यस्य लाक्षणिकत्वात् यदिति प्रकृतेरेव तत्तल्लक्षणैर्निष्पन्नत्वात्। अत इति॥ उक्तारुचेरेव। वेति॥ कारिकायां वेति। वेत्यस्य धातुत्वापत्तेः फलमाह – वातीति॥ आदिनेति॥ सर्वनामा- व्ययादीनामित्यत्र। भ्वादिगणे षुञ्प्रसवे माङ् माने इति पाठेन सु मा इत्यव्यययोः तत्सदृशानुपूर्वीमत्त्वात्। स्वराद्योरिति॥ अव्यये स्वरादिगणस्तत्र

पठितयोरित्यर्थः। षत्वपाठादिति॥ षुञ् इति धातुपाठे इति शेषः। माङ् माने इति ङित्वपाठस्योपलक्षणमिदम्। साध संसिद्धाविति॥ साध् धातुः दन्त्यादिः, तस्य। मूर्धन्यादित्वाय इति॥ मशकाय धूम इतिवत् मूर्धन्यादित्वनिवृत्तये षोपदेश-लक्षणत्वमिति। षोपदेशत्वस्वरूपपरिचयायैव षत्वपाठस्य कृतत्वात्। नान्यत्फल-मुपसर्गव्यावृत्तिरूपमिति तात्पर्यात्। सकृन्न्यायविरोधात्।

तथा चेति॥ वेत्यनुक्तौ सत्याम्। सु इत्यस्य धातुत्वापत्तौ समीचीनार्थे सवति वर्जनाद्यर्थे मिमीते मातीत्याद्यापत्तिः। ननु उपसर्गस्य न ग्रहणं धातुपाठे तेषामसत्त्वादित्यत आह - षु प्रसवे, माङ्माने, मा इति धातूनां सत्त्वान्निर्णया-सम्भवादिति॥ धातुपाठे तादृशानुपूर्वीसत्त्वेन उपसर्गसुमेत्यादीनामपि तत्सदृशा-नुपूर्वीमत्तया ग्रहणापत्तेः। षुमा इत्यादीनामेव धातुपाठे ग्रहणं न तु उपसर्गभूतानामिति निर्णयासम्भवादित्यर्थः।

**69.** न च वेत्याद्यव्ययानां "वा गतिगन्धनयो"रित्यादिधातुभ्यः क्विबादिभिर्व्युत्पादनं[1] शङ्क्यम्[2], गमनादिकर्तेत्याद्यर्थत्वापत्ते[3]रर्थान्तरत्वानापत्तेश्च[4]। कृदन्तत्वात्[5] सिद्धौ "निपात[6]स्यानर्थकस्ये"ति वार्त्तिकस्यानुक्तिसंभवापत्तेश्चेत्यादि ध्येयम्।

न च गतिगन्धनाद्यर्थनिर्देशो नियामक इति वाच्यम्, तस्याधुनिकभीमसेनादिभि - र्निक्षिप्तत्वात्। "भीमसेनादयो ह्यर्थं निर्दिदिशुः[7]। पाणिनिस्तु भ्वेध[8] इत्याद्य[9]-पाठीदिति" भाष्यवार्तिकयोः स्पष्टम्[10]।

---

[1] अ4-व्युत्पादन्नता

[2] ब2- शक्यम्

[3] के5-गमनादिकर्तव्यार्थतापत्तेः

[4] द1-रर्थान्तरतानापत्तेश्च

[5] के5-कृच्छब्दत्वात्

[6] अ1-निपातन

[7] त1-निर्दिशुः

[8] द5-भ्वेधि

[9] के4-इत्य

[10] के4-स्फुटम्

केचित्तु[१] उद्दिष्टार्थ[२]विशिष्टस्य धातुत्वे"ऽलंक्रियते गुरु" रित्यादावर्थान्तरे धातुत्वं न स्यात्, तदर्थस्यानुद्देशात्। निपातानां वाचकत्वात् सोऽर्थो निपातवाच्य इति चेन्न[३], उपसर्गाणां द्योतकत्वात्, तत्रानुपपत्तितादवस्थ्यात्। वस्तुतो निपातानामपि द्योतकत्वमेवेति[४] तत्राप्यनुपपत्तिरेवेति[५] वदन्ति। ननु प्रयोगानुसारतोऽर्थानां कल्प्यत्वे सर्वत्रोद्दिष्टोऽर्थो[६] व्यर्थ इति[७] चेन्न, क्रियावाचित्वबोधार्थं[८] तदुद्देशात्। तदु[९]क्तम्-

> क्रियावाचित्वमाख्यातुमेकैकोऽर्थः प्रदर्शितः।
> प्रयोगतोऽनुसर्तव्या अनेकार्था हि धातवः॥ 11 इति।

"कुर्दखुर्दगुर्द[१०]गुदक्रीडायामेवे"त्येवकारोऽप्यत्र मानम्, अन्यथा व्यर्थत्वा[११]-

ननु क्रियावाचकत्वे[१३] सति गणपठितत्वस्यैव धातुत्वे सौत्राणां[१४] स्तम्भ्वा-दीनां लौकिकानां[१५] च[१६] चुलुम्पादीनां धातुत्वं न स्यादिति चेन्न,

स्तम्भ्वादिषूदित्करणेनैव ज्ञापकबला[१७]त्तत्सिद्धेः, चुलुम्पादीनां च "कास्यनेकाच्" इति वार्तिकवचनात्[१] तत्सिद्धेः[२]।

---

[१] 1915-केश्चित्तू

[२] ब3-केचित्तूपदिष्टार्थ

[३] अ4-चेत्

[४] अ3-द्योतकत्वात्, भार1,त3- "एव" नास्ति

[५] के4- "एवेति" नास्ति

[६] के4- "अर्थो" नास्ति

[७] 1915- "इति" नास्ति

[८] भार1,त3,के3,के4,द5,भ2,अ4-बोधनार्थं

[९] के5,म- "तत्" नास्ति

[१०] जो2- "गुर्द" नास्ति

[११] त2-वैयर्थ्या

[१२] अ3- "अन्यथा व्यर्थत्वापत्तेः" नास्ति

[१३] के3,के5-वाचित्वे

[१४] त1-सूत्राणां

[१५] अ1- "लौकिकानाम्" नास्ति

[१६] अ3,भ1- "च" नास्ति

[१७] के3,म,अ4- "बल" नास्ति, अ4-ज्ञापकेन इति......

वस्तुतः[3] चुराद्यन्ते "बहुलमेतन्निदर्शन[4]मि"ति पठितगणसूत्रेण सर्वेषां संग्रहः। तत्र धातुवृत्तिकारादिभिरेतत्प्रदर्शनं दिक्प्रदर्शनमात्रम्[5], प्रयोगानुसारेणान्येऽपि ज्ञेया इति व्याख्यातत्वात्। तस्मात् क्रियावाचको धातुरिति सिद्धम्॥ **10**॥

---

गत्याद्यर्थकवाधातोः क्विपि अव्ययो वा शब्दः, मा इति धातोर्निषेधार्थको मा इत्यव्ययशब्दो निष्पाद्य इति भावः। तथा च सूत्रे वाग्रहणेऽपि भ्वादिगणपठितानुपूर्वीमत्त्वे सति क्रियावाचकत्वात् धातुत्वापत्तिरिति शङ्कितुराशयः। शङ्कामपनुदति – गमनादिकर्तेति॥ वातीति विग्रहे वाधातोर्गमनार्थकत्वेन क्विपः कर्त्रर्थकत्वेन च अव्ययवेत्यस्य गमनकर्तेति बोधापत्तेः। ननु अस्तु तादृशबोध इत्यत आह – अर्थान्तरत्वानापत्तेश्चेति॥ अर्थान्तरं गमनादिभिन्नम् विकल्पादि, तस्य इष्टस्य - नापत्तेरिति भावः।

ननु कोशादिप्रामाण्येन विकल्पोऽप्यर्थो अस्त्वित्यत आह – कृदन्तत्वादिति॥ उक्तरीत्या क्विबन्तत्वेन वाद्यव्ययसाधुत्वान्वाख्याने तदर्थं "निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्ये"ति वार्तिकारम्भानुपपत्तिः, कृदन्तत्वादेव प्रातिपदिकत्वसिद्धेः। पुनरपि क्रियावाचकत्वबोधकवाग्रहणानर्थक्यमाक्षिपति - न च गतिगन्धनाद्यर्थनिर्देश इति॥ धातुसंज्ञाविधायकसूत्रे क्रियावाचकवाशब्दाभावेऽपि वा इत्याद्यव्ययानां धातुत्वानापत्तिः, धातुपाठे गतिगन्धनाद्यर्थनिर्देशेन अव्ययवेत्यादिनामतदर्थत्वात्। इदमेवाह – गतिगन्धनाद्यर्थेत्यादिना॥ अर्थनिर्देशस्याव्यावर्तकत्वमाह – तस्याधुनिकेति॥ भीमसेनः आचार्यविशेषः, तेनैव लक्ष्यानुसारेणार्थबोधनात् ।तदाह - भीमसेनादयो ह्यर्थं निर्दिदिशुः इति॥ इदानीं दृश्यमानः भूसत्तायामित्याद्यर्थनिर्देशस्तु नार्ष इति भावः। भीमसेनादिकृतस्यार्थनिर्देशस्य दुष्टत्वमपीत्याह – केचित्त्विति॥ ये भीमसेनादिभिर्निर्दिष्टार्थाः तादृशार्थविशिष्टानां धातुत्वे अलङ्क्रियते इत्यत्र अलङ्करणार्थे कृधातोर्धातुत्वानुपपत्तिः, डुकृञ् करणे इति

---

[1] द1,जै-चुलुम्पादीनां चकारस्य नेजिति वार्तिकवचनात्, के3,अ4-वार्तिकेन

[2] के4-बलादेवैतत्सिद्धेः,त्रि- सिद्धेः

[3] अ3,जै-वस्तुतस्तु

[4] अ4-....निदान

[5] अ1- धातुवृत्तिकारादिभिरेतत्प्रदर्शनमात्रम्

पाठेन करण अर्थे एव धातुत्वविधानात्। अर्थविशिष्टस्य धातुत्वपक्षं पुनरुत्थापयति - निपातानां वाचकत्वादिति॥ अलङ्क्रियत इत्यलङ्काररूपोऽर्थो न धातोरपि तु अलमिति निपातस्यैवेति। कृधातोर्निर्दिष्टार्थकत्वेन धातुत्वोपपत्तिरिति यदाह, तन्न। उपसर्गाणां द्योतकत्वात् वाचकत्वाभावात्। तथासति उक्तस्थले धातोरेवालङ्कार-रूपोऽर्थः स च न निर्दिष्ट इति दोषस्तदवस्थ एवेति भावः। तदाह - तत्र अलङ्क्रिय-त इत्यत्र, अनुपपत्तिः धातुत्वानापत्तिः। तादृशस्यार्थस्य गणेऽनिर्देशात्।

दृढं करोति - वस्तुत इति॥ तत्रानुपपत्तिरेवेति॥ अलङ्क्रियत इत्यत्र कृञो धातुत्वानुपपत्तिः। अर्थनिर्देशानर्थक्यमाशङ्कते - ननु प्रयोगानुसारेति॥ प्रयुक्तानाम् वान्वाख्यानादित्युक्तेः, प्रयोगेणैव शब्दानां साधुत्वविचारोऽर्थनिर्णयश्चेति मत्वाह - प्रयोगानुसारतोऽर्थानामिति॥ भीमसेनाद्याचार्यैस्तत्तद्धातूनां तादृशार्थेषु प्रयोगम-नुभूय सङ्केतग्रहं परिकल्प्य च ते ते अर्थाः विनिर्दिष्टाः। यदि प्रयोगैरेवार्थनिर्णय-स्तदा सर्वेषामपि धातूनाम् निर्देशनश्रमो व्यर्थ इति भावः।

सर्वत्रेति॥ स्थालीपुलाकन्यायेन केषाञ्चिदेवार्थनिर्देशः स्यात् सूक्ष्मार्थानामेव वा स्यादिति दृष्ट्वा आह - सर्वत्रेति। अर्थनिर्देशफलमाह – क्रियावाचित्वबोधार्थमिति॥ धातुसंज्ञासूत्रकृद्धातुलक्षणसमन्वयार्थमेव तदुद्देशात् तत्सङ्कीर्तनात्। अर्थविशिष्टपाठे तेषां क्रियावाचित्वग्रहोपपत्तौ धातुत्वज्ञानं सुलभमिति भावः। अत्र आचार्याणां सम्मतिमाह - क्रियावाचित्वमाख्यातुम् इत्यादि॥ धातुपाठे भीमसेनाद्याचार्यैः क्रियावाचित्वमाख्यातुं बोधयितुं एकैकोऽर्थः, प्रतिधातु इति शेषः। अर्थः सत्तादिरूपः प्रदर्शितः कृतः।

ननु भीमसेनादिभिराधुनिकैरुत्प्रेक्षितत्वादश्रद्धेयता स्यादित्याह - तैर्न स्वतोऽर्थाः कल्पिताः प्रयोगत इति॥ न स्वतस्तैः कल्पिताः, किन्तु शिष्टप्रयोगादेव ते कल्पिताः। स्वयमपि चिन्तनीयमाह - अनुसर्तव्या इति॥ प्रयोगान् दृष्ट्वा अपरेऽप्यर्थाः ऊहनीयाः। यतो धातवोऽनेकार्थाः भवन्ति। अनेकार्थत्वे मानमाह - कुर्द खुर्देति॥ एवकारोऽन्य-योगव्यवच्छेदार्थकः। धातूनामेकैकार्थत्वे अन्यस्याप्राप्तौ अन्ययोगव्यवच्छेदार्थकैव-कारस्य वैयर्थ्यापत्तेः। तदाह - अन्यथा व्यर्थत्वापत्तेः॥ एवकारस्येति ध्येयम्। लक्षणाव्याप्तिमाक्षिप्य परिहरति - ननु क्रियावाचकत्वे सति इति॥ "स्तन्भुस्तुन्भु-

स्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्चे"(पा. 3-1-82) त्यादिसूत्रपठितानां सौत्राणां धातुत्वानुपपत्तिः भ्वादिगणेऽपाठात्। लौकिकानां लोके प्रतीतानाम् एषां धातुत्वमुपपादयति – स्तन्भ्वादीनामिति॥ उदित्करणेनैवेति॥ स्तन्भ्वादिभ्यः धातवः धातुकार्यफलकोदित्त्वात् दिवादिवत्। अत्र "उदितो वे"(पा. 7-3-56) त्यादिसूत्रमनुकूलस्तर्कः। उदितो धातोः परस्य क्त्व इड्वा स्यादित्यर्थः। धातुत्वाभावे क्त्वोऽनुपपत्तिः। तथा सति उदित्वं निष्फलमेव स्यात्। वार्तिकवचनादिति॥ वार्तिके अनेकाजिति कथनात्। चुलुम्पादीनामधातुत्वे वार्तिकस्य यत्किञ्चिदविषयकत्वापत्तेः। बाहुलकात्सर्वेषां संग्रहमाह - वस्तुत इति॥ निदर्शनस्य गणादिनिर्देशस्य बहुलत्वात्।

बाहुलकं यथा -

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः, क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥

तथा चात्र क्वचिदन्यदेवेत्यस्य बाहुलकस्य प्रवृत्तिर्बोध्या। स्पष्टमन्यत्। उपसंहरति - तस्मात् क्रियावाचको धातुरिति सिद्धम्॥

12. धात्वर्थत्वमेव क्रियात्वमिति आक्षिप्य समाधानम्

**70.** ननु क्रियावाचकत्वे[१] सति गणपठितत्वं तत्त्व[२]मस्तु[३]। क्रिया च न व्यापारः, किंतु धात्वर्थ इत्यत आह[४]-

धात्वर्थत्वं क्रियात्वं चेद् धातुत्वं च क्रियार्थता।[५]
अन्योऽन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाकरम्॥ **11**॥

धातुत्वग्रहे च[६] धात्वर्थत्वरूप[७]क्रियात्वग्रहः,तद्ग्रहे च तद्वाचकत्वरूपधातुत्वग्रह इत्यन्योन्याश्रय इत्यर्थः।[१]

---

[१] अ1-वाचित्वे

[२] अ1-धातुत्व

[३] ब1-तव्यत्वमस्तु

[४] द2-इत्याह

[५] भ1-"गणपठितत्वं" इत्यारभ्य "धातुत्वं च क्रियार्थता" इत्यन्तं ग्रन्थः नास्ति

[६] के4,म-धातुत्वग्रहश्चेत्

[७] वा2,भार1,त3,1900,के4,1915,अ4-धात्वर्थरूप,भ1-धात्वर्थस्वरूप

ननु "धात्वर्थः क्रिया[२]" इत्यत्र प्रविष्टमन्यदेव धातुत्वं[३] वाच्यम्। तथा च नान्योन्याश्रय इति चेन्न, मानाभावात्। तदपेक्षया[४] यथाश्रुतस्यैव लघुत्वात्। तदेव धातुत्वमादाय लडाद्युपपत्तौ[५] "भूवादय"(पा.1-3-1) इत्यस्य वैयर्थ्याच्चेत्याशयेनाह- तस्मादिति। व्यापारसंतानः क्रिया, तद्वाचको धातुरिति यथाकरमित्यर्थः।

केचित्तु[६] "मीमांसको[७] वैयाकरणं प्रति दोषमाह[८]- धात्वर्थत्वमिति[९]। धात्वर्थत्वं क्रियात्वं यदि ब्रूयाः,तदान्योन्याश्रयः स्पष्ट इत्यर्थः। तस्मादिति। आख्यातार्थः[१०] क्रियेत्यध्याहारः। वैयाकरणः समाधत्ते- अस्त्विति। व्यापारसंतानः क्रिया, तद्वाचको धातुरित्यर्थः। तथा च नान्योन्याश्रय[११]" इति व्याचक्षते।

12.1 संज्ञाविशेषस्यैव लडादिप्रयोजकत्वम्

वस्तुतस्तु[१२] न[१३] क्रियावाचकत्वे सति[१४] गणपठितत्वं लडादिप्रयोजकम्[१५], क्रियात्वस्यैकस्याभावेनाननुगमात्[१६]। किंतु संज्ञाविशेषः, संज्ञाशब्दानां जातिवाचित्व[१]पक्षे जातिविशेषो वा तन्नियामकः। सूत्रं च तत्परिचायकम्।

---

[१]ब3-"इति ग्रहपदं पूरयित्वा व्याख्येयम्। यथाश्रुते च अन्योन्याश्रयस्योत्पत्तौ ग्रहे वा प्रतिबन्धकत्वाभ्युपगमेन असङ्गतेः" इत्यधिकम्

[२] 1900-धात्वर्थक्रिया, त्रि,द7-धात्वर्था क्रिया

[३] के3,के4-धातुत्वमिति

[४] जै-तदपेक्ष्यया, अ4-"च"इत्यधिकम्

[५] भ1-द्युत्पत्तौ

[६] जै-कश्चित्तु,भ1-कश्चित्तु

[७] त3-मीमांसकाः

[८] त3-दोषमाहुः

[९] के4-धात्वर्थमिति

[१०] द4-आख्यातः

[११] जै-"न" नास्ति

[१२] ब3-वस्तुतः

[१३] वा2-तर्हि

[१४] अ3,भ1- "सति" नास्ति

[१५] त2-प्रयोजकत्वम्

[१६] भ1-भावेनामात्

तत्रोक्ता[२]ग्रिमकारिकाभिः[३] परिचायका[४]व्याप्त्यतिव्याप्ती विचार्येते[५]। तत्रापि[६] क्रियाशब्दस्य साध्यत्वेनाभिधीयमानव्यापारे एव साङ्केतिकशक्तेः स एव गृह्यते सूत्रे वाशब्दसूचनाये(सूचनये[७])ति[८], न[९] सूत्रं धातोः क्रियार्थत्वसाधनाया[१०]भिहितम्। किं तूक्तयुक्तिभिः साधिता[११]र्थस्य स्वोत्प्रेक्षितत्व[१२]निराससूचनायेति तत्त्वम्।

## 12.2 भ्वाद्यन्यतमत्वं धातुत्वमित्यादिमतखण्डनम्

एतेन[१३] भ्वाद्यन्यतमत्वमेवास्तु धातुत्वम्, न क्रियार्थत्व[१४]गर्भम्। अथ वा गणपठितत्वे सति[१५] सत्ताद्यर्थकत्वमेव भूधातोर्धातुत्वमास्ताम्। इत्थमन्यत्राप्यूह्यम्। अत एव तत्तदर्थव्यापारयोरुभयो[१६]र्धातुवाच्यत्वे धातोर्नानार्थत्वकल्पनादोषोऽपि[१७] परास्तः। अर्थस्य[१८] तत्तत्पुरस्कारेणोपादानाच्च[१९] नान्योन्याश्रयोऽपि।

---

[१] के3-वाचकत्व

[२] जो2- "उक्त" नास्ति

[३] जो2-कारिभिः, जै-कारिकादिभिः

[४] के4-परिचायक

[५] द1-च वार्येते

[६] अ1- "अपि " नास्ति

[७] ( ) एतत्कोष्टकान्तर्गतः पाठ एव युक्तः अन्यासु सर्वासु उपलभ्यते च

[८] ब2-"बोधार्थे" इत्यधिकम्

[९] 1915-"न" नास्ति

[१०] के3-क्रियावाचकत्वसाधनत्वायाभिहितम्

[११] के3-साधुत्वा

[१२] अ3- "त्व " नास्ति

[१३] अ3,द6,वा2,भार1,द1,द4,त3,जै,के4,भ1,भ3,म,अ4-तेन

[१४] आ1,अ3-क्रियात्व

[१५] अ3- "सति " नास्ति

[१६] अ3-तत्तद्व्यापारयोरुभयो, ब3-"अपि" इत्यधिकम्, त्रि- "उभयोः" नास्ति

[१७] त1-कल्पनादयोऽपि

[१८] ज1-अर्थस्या

[१९] अ1-तत्तत्पुरस्कारेणोपात्तत्वाच्च

यद्वा सर्वफलान्य[1]न्यतमत्वेन धृत्वा तद्वाचकत्वे सति गणपठितत्वमेव सूत्रार्थः कल्प्यतामित्यपास्तम्[2]।

किञ्चान्यतमत्वेन सर्वेषां धातूनां[3] ते तेऽर्था धर्त्तव्याः[4],अन्यथाऽर्थान्तरे धातुत्वं न स्यात्। तथा चाव्यये वा इत्यादावतिप्रसङ्गः, तस्याप्यु[5]क्तरीत्या गणपठितत्वाद् विकल्पार्थत्वाच्च[6]। अन्यतममध्ये[7] विकल्पस्यापि धृतत्वात्[8]। "कृपू[9] सामर्थ्ये" इत्यस्य विकल्पयतीति[10] प्रयोगदर्शनाद्विकल्पार्थत्वादिति[11] ॥ **11** ॥

---

धातोः फलमात्रवाचित्वमाक्षिपति – नन्वित्यादिना॥ क्रियावाचकत्वं धातुत्वमस्तु किन्तु क्रिया च फलमेवास्त्विति शङ्कितुराशयः। शङ्कां समाधत्ते - धात्वर्थत्वं क्रियात्वं चेद् इति॥

किं नाम क्रियात्वं धात्वर्थत्वम्, घटितबुद्धौ घटकज्ञानस्य कारणत्वात् धातुत्वं किमित्याकाङ्क्षायां क्रियार्थत्वम् एव धातुत्वं वक्तव्यम्। तथा सति अन्योन्याश्रयो दोषः।

तदाह - अन्योन्याश्रयः स्पष्टः इति॥ अन्योन्याश्रयरूपदोषस्योत्पत्तौ ज्ञप्तौ एव सम्भवः। उत्पत्तौ बीजाङ्कुरयोः। अनादित्वात्परिहार इत्यन्यत्। ज्ञप्तौ हलन्त्यमित्यादौ प्रसिद्धः। कारिकायामुभयोरप्यश्रवणादन्योन्याश्रयत्वोक्तिरसङ्गतेति

---

[1] अ1,अ3,के4,द2,भ1,अ4-"न्य" नास्ति

[2] अ3-मिति परास्तम्

[3] अ3- "धातूनां " नास्ति

[4] के3,अ4-ते ते धात्वर्थाः वक्तव्याः

[5] जै,त्रि-तथाप्यु

[6] जै-विकल्पार्थकत्वाच्च,भ1-गणपठितत्वसत्त्वात् च

[7] त्रि- अन्यतममध्य

[8] त2-धातुत्वात्

[9] अ1-क्लृपू

[10] त3-विकल्पयतीत्यादि

[11] त5-विकल्पार्थकत्वादिति, ज1-विकल्पादिति

ग्रहपदं पूरयित्वा तदुपपादयन्नाह - तद्ग्रहे च तद्वाचकत्वरूपधातुत्वग्रह इत्यन्योन्याश्रयः।

ननु न हि मया क्रियावाचकत्वं धातुत्वमुच्यते अपि तु अन्यतमत्वरूपमन्यत् किमप्युच्यत इति नास्त्यन्योन्याश्रयो दोष इति शङ्कते – नन्वित्यादिना॥ धात्वर्थः क्रियेति॥ धातुलक्षणे प्रविष्टधातुत्वमित्यर्थः। शङ्कामपहरति – मानाभावादिति॥ मानम् अन्यतमत्वादिलक्षणस्य प्रमितं मानम्। तस्याभावात्। अन्यतमत्वादे-रप्रमितत्वन्तु पूर्वमेवोक्तम्। अपरमपि तत्र दूषणमाह – तदपेक्षयेति॥ अन्यतमत्वा-द्यपेक्षया। अन्यतमत्वे सर्वजगत्प्रवेशे गौरवात्। क्रियावाचकत्वभिन्नधातुत्व-स्वीकारे तेनैव धातुत्वज्ञाने धातुसूत्रवैयर्थ्यापत्तिरिति भावः। कारिकोक्त आक्षेपः कस्येत्याह - कश्चित्तु मीमांसक इति॥ तथात्वे यतोऽन्योन्याश्रय स्तस्मादिति। तस्मात् अन्योन्याश्रयदोषसत्त्वात् आख्यातार्थः क्रिया न तु धात्वर्थ इति मीमांसका-भिप्रायः। अत्र समाधत्ते वैयाकरणः – अस्त्विति॥ यथाकरमस्तु। किमस्त्वित्यत आह - व्यापारसन्तानः क्रिया॥ आकरो भाष्यम्। क्रियावचनो धातुरिति भाष्यं तदनुसारेण इत्यर्थः। धातुशब्दस्य संज्ञाशब्दत्वमाश्रित्य अन्योन्याश्रयदोषं परिहरति - तथा च नान्योन्याश्रय इति॥ अन्योन्याश्रयदोषपरिजिहीर्षया व्याख्यानान्तरमाह – वस्तुतस्त्वित्यादिना॥ लडादौ "वर्तमाने लडि"(पा.3-2-123) त्यादिविधौ धातुत्वमुद्दिष्टं, तत् न क्रियावाचकत्वे सति गणपठितत्वरूपम् ,नानाविध-दोषात्।

तत्रैकं दोषमाह – क्रियात्वस्येति। क्रियावाचकेत्यत्र यत् क्रियात्वं तदनुगतमेकं न भवतीत्यर्थः। ननु सर्वत्र क्रियासु क्रियाक्रियेत्यनुगतव्यवहारदर्शनेन क्रियात्वस्य सिद्धिरिति चेन्न। सर्वेषां धातूनां क्रियावाचकत्वे पर्यायतापत्तेः, फूत्कारत्वादिनाभिधाने एकविधत्वानुपपत्तेरिति भावः। क्रियात्वस्य सखण्डत्वेन जातिरूपत्वासम्भवस्वीकाराच्च। तर्हि किमिदं धातुत्वमाह - किन्तु संज्ञाविशेष एवेति॥ ननु संज्ञात्वपक्षेऽपि अनुगमाभाव इत्याह – संज्ञाशब्दानामिति॥ त्रयी शब्दानां प्रवृत्तिरिति वदता भाष्यकारेण संज्ञाशब्दानां जातिशब्देष्वेव कृतत्वात्तदाह - जातिवाचित्वपक्षे इति॥ एतत्पक्षे धातुत्वं जातिरूपमेव। तदेव नियामकम् अनुगमकम्। ननु जातिवाचिनां घटादिशब्दानां संज्ञासंज्ञिभावबोधनाभावेऽपि

जात्या एव तत्र सङ्केतानुगमः, तथा जातिवाचकत्वेन धातुपदस्यापि सङ्केतानुग्रहः, तथा च धातुसंज्ञासूत्रं व्यर्थमित्याह – सूत्रञ्चेति॥ "भूवादयो धातवः"(पा.1-3-1) इति सूत्रं तु परिचायकम्, मन्दबुद्धिप्रयोजकम्। तत्रोक्ताग्रिमेति॥ साध्यत्वेन क्रियेत्यादिषु कारिकासु। तत्रैवैतद् विचार्यते। तत्रापि वक्ष्यमाणकारिकासु क्रियापदं यदस्ति तस्यापि साङ्केतिकशक्तेः। धातुपदस्यास्मिन्नर्थे शक्तिरिति रूपायाः। कुत्र सा शक्तिरित्याह - साध्यत्वेनाभिधीयमाने व्यापारे। सङ्केतस्य शिष्टोहितत्वेन, सूत्रेऽपि भ्वादिसूत्रेऽपि स एव साध्यत्वेनाभिधीयमानव्यापार एव गृह्यत इति शेषः।

तत्र ज्ञापकमाह – वाशब्दसूचनयेति॥ वाग्रहणेन क्रियावाचित्वस्य ज्ञापनात्। नन्वेवं क्रियावाचकत्वबोधनाय सूत्रमावश्यकमित्यत आह - न सूत्रं क्रियार्थत्वसाधनायेति॥ धातुपदस्य तादृशार्थे घटपदस्येव घटार्थे सङ्केतादेव निर्वाहे न तदर्थं सूत्रमावश्यकमिति भावः संज्ञात्वग्रहस्तु प्रयोगादेवेति बोध्यम्। तदाह – किन्तूक्तयुक्तिभिरिति। उक्तयुक्तिभिः, क्रियाया अननुगतार्थत्वादियुक्तिभिः साधितस्य अर्थस्य धातोः संज्ञात्वपक्षस्य। स्वोत्प्रेक्षितत्वेति। स्वकल्पितत्वेत्यर्थः।

ननु स्वपदार्थः सूत्रकारः, अन्यो वा? नाद्यः। सर्वज्ञत्वान्मुनेस्तं प्रत्येतादृश-पर्यनुयोगानवकाशात्। नान्त्यः इष्टापत्तेः। यैः संज्ञात्वपक्षः कृतस्तस्यैव पक्षस्य सूत्रकृतानुमोदितत्वात्। एतेनेति॥ एतेनेत्यस्य अपास्तमित्यनेन वक्ष्यमाणेनान्वयः। अपासनीयान्याह - भ्वाद्यन्यतमत्वमित्यादिना॥ अन्यतमत्वस्याग्रे खण्ड्य-मानत्वात्।

अथवेति॥ प्रतिधातुलक्षणस्य भिन्नभिन्नतया गौरवात्। अत एवेति॥ उक्तलक्षणे फलांशस्यैव निवेशेन। तत्तदर्थेत्यस्य तत्तद्धात्वर्थेत्यर्थः। व्यापारयोः, फलव्यापारयोरुभयोर्वाच्यत्वे धातुवाच्यत्वे नानार्थताकल्पनादोषोऽपि परास्तः, निरस्तः। सत्ताद्यर्थकत्वेति॥ लक्षणे फलमात्रवाच्यत्वेऽपि निर्वाहात् इदमपि निरसनीयमेव।

ननु सत्ताद्यर्थकत्वमिति लक्षणेऽपि अन्योन्याश्रय इत्याह – अर्थस्येति॥ तत्तत्पुरस्कारेण सत्तात्वादिना पुरस्कारेण सत्तात्वादिप्रकारकबुद्ध्या उपादानात् ग्रहणात्। न तु धात्वर्थत्वेनेति भावः।

यद्वेति॥ सर्वफलानि सत्तादीनि आदाय सत्ताद्यन्यतमत्वेन धृत्वा बुद्धौ तद्वाचकत्वे सत्ताद्यन्यतमवाचकत्वे सति गणपठितत्वं धातुत्वमिति सूत्रार्थः, भूवादि सूत्रार्थः, कल्प्यताम् स्ववासनया आरोप्यताम्। एतत्पर्यन्तं यदुक्तं तत् परास्तम्। संज्ञात्वपक्षेण निर्वाहात् ,सर्वस्यापि पक्षस्य गौरवात् , सूत्रस्य परिचायकत्वमात्रत्वेन तदर्थस्वारस्यवर्णनस्यानौचित्यात्।

अन्यतमत्वपक्षे विशिष्टदोषमाह – किञ्चान्यतमत्वेनेति॥ यावत्श्रुतार्थेषु धातुत्वमेष्टव्यम्, अन्यतममध्ये तेषां सर्वेषाम् पाठोऽवश्यं कर्तव्यः। अन्यथा यस्यार्थस्य पाठः तदर्थे धातुत्वसिद्धावपि अपठितार्थे धातुत्वानापत्तेः। सर्वार्थपाठे गौरवाच्च। सर्वपाठे दोषान्तरमाह - तथा चाव्यये वेति॥ आपत्तिमुपपादयति - तस्यापि अव्यये वा इत्यस्यापि उक्तरीत्या भ्वादिगणपठित 'वा' गन्धने इत्यानुपूर्वी-सदृशानुपूर्वीमत्त्वात् । विकल्पार्थत्वाच्चेति॥ विकल्पार्थत्वाच्च धातुत्वापत्तिः।

ननु अर्थान्यतममध्ये विकल्परूपोऽर्थो न पठित इत्याह - अन्यतममध्ये इति॥ विकल्पस्यापि अर्थस्य त्वया धृतत्वात् गृहीतत्वात्। कुत्र सोऽर्थो गृहीत इत्याह - कृपू सामर्थ्येति॥ कृपू इत्यस्य विकल्पयतीति प्रयोगे विकल्परूपस्यार्थस्य प्रतीतेः, तदर्थे तस्य धातुत्वाय अर्थमध्ये विकल्पस्यापि पाठावश्यकत्वात्।

13. अस्त्यादीनामपि व्यापारवाचित्वमस्त्येव

**71.** नन्वेवं गणपठितत्वे सति क्रियावाचकत्वस्यैव धातुत्वे भवतीत्यादौ क्रियानुपलम्भाद् भ्वादीनां धातुत्वं न स्यादित्यत्राह[1]-

> अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना।
> अन्यत्रा[2]शेषभावात्तु सा तथा न प्रकाशते[12] ॥ **12** ॥

अस्त्यादौ[3] "अस भुवी"त्यादौ। धर्म्यंशे' धर्मिभागे। भाव्ये भाव्यताविवक्षायाम्। भावनास्त्येव।

---

[1] अ3,के3,के4,भ1-स्यादित्यत आह, त2-स्यादिति आह

[2] वा2-अन्यथा

[3] अ4- "अस्त्यादौ" नास्ति

अयं भावः- अस्ति भवतीत्यादौ धर्म्यंशे[1] भावनास्त्येव, भूधातोः स्थित्युत्पत्ति[2]-द्व्यर्थत्वात्। प्रमाणं च "धान्यानां भवने क्षेत्रे[3]"(पा.5-2-1), "तत्र जातः"(पा.4-3-25), "तत्र[4] भवः"(पा.4-3-53) इति भेदेन निर्देश एव[5]। "रोहितो लोहितादासीद्[6] धुन्धु[7]स्तस्य सुतोऽभवत्[8]" इति प्रयोगः[9][च]। अत एव[10] घटो भवति स्व[11]-स्वरूपं[12] लभत इति सत्कार्यवादिनां विवरणमप्युपपद्यते। इत्थं च[13] सर्वत्र भावना निराबाधैव।

किञ्च, यद्यत्र[14] क्रिया नास्ति, कथं तर्हि "भविष्यति,अभूत्,भवति, अस्ती"त्यादौ कालसंबन्धः? कालस्य क्रियात्मकत्वात्। "वर्तमाने लट्"(पा.3-2-123) इत्यत्र वर्तमानक्रियावृत्तेरिति व्याख्यानात्[15]।

[16]उक्तं हि[17] वाक्यपदीये-

क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका[1] ॥ (वा.प.तृ.काल.2)इति।

---

[1] के4-"धर्म्यंशे" नास्ति

[2] अ1,1900,के3,द2,1915,अ4- "रूप" अधिकम्

[3] अ1- " ख इति " इत्यधिकं, के3,के4,अ4- "खञ्" इत्यधिकम्

[4] जो2-"तत्र" नास्ति

[5] भ2- भवने- अत्र उत्पत्तिरर्थः, भवः- अत्र स्थितिरर्थः, यद्युत्पत्तिरर्थः स्यात् तर्हि तत्र जात इत्यनेन गतार्थस्स्यात् इति टिप्पणी

[6] भ2-उत्पन्नः इति टिप्पणी

[7] अ3,त2-बन्धु,त5-धुब्धुः

[8] अ3-भवति, 1900-सुताभवत्

[9] जै-प्रयोगाच्च, अन्यत्र "प्रयोगश्च" – चकारयुक्तः पाठः। युक्ततरश्च।

[10] भ2- द्व्यर्थत्वादेव

[11] अ1-स्वं

[12] भ2-स्थितिं इति टिप्पणी

[13] त5-"च" नास्ति

[14] द1-यद्यप्यत्र

[15] अन्यत्र सर्वत्र "व्याख्यातत्वात्" इत्यस्ति।

[16] अ3- "उक्तं हि वाक्यपदीये" इत्यारभ्य "आकाशोस्ति, आकाश" इत्यन्तं अष्टादशवाक्यात्मकः ग्रन्थः लुप्तः

[17] के3,के5,म,अ4-च

कालानुपाति यद्रूपं तदस्तीति प्रतीयते॥ (वा.प.तृ.क्रि.12) इति च।

तस्माद्यदि क्रियात्र[२] नास्ति, तर्हि लडादिकमपि न स्यादिति द्रष्टव्यम्। नन्वेवं भावनाया उभयत्र[३] तुल्यत्वाद् घटं करोतीत्यत्रेव घटो भवत्यस्तीत्यत्रापि[४] प्रतीयेतेत्यत[५] आह - अन्यत्रेत्यादि। अशेषभावाद्[६] भावनाफलयोरेकनिष्ठत्वात्। सा - भावना। तथा - स्पष्टम्। भावनाफल[७]योरेकनिष्ठत्वाद्भावना[८] स्पष्टं न[९] प्रकाशत इत्यर्थः।

अथ सर्वेषां धातूनां क्रियावाचकत्वे किं[१०] करोतीति प्रश्ने पचतीत्युत्तरमिवा[११]स्तीत्युत्तरमपि[१२] स्यात्[१३], तुल्यत्वादिति चेन्मैवम्,

आसन्नविनाशं कञ्चिदु[१४]द्दिश्य किं करोतीति प्रश्ने अस्तीत्युत्तरस्य सर्वसंमतत्वात्। इतरत्र[१५] तु सुस्थतया निश्चिते किं करोतीति प्रश्नः पाकादिविशेषगोचर[१६] एवेत्यवधारणादस्तीति नोत्तरमिति[१७]।

---

[१] जै-भेदका

[२] जो2-क्रिया तत्र, जै- "अत्र" नास्ति

[३] 1900,1915,म- "त्र" नास्ति

[४] अ4-भवतीत्यत्रापि

[५] 1915-प्रतीयेतेत्यत्र

[६] के4-अविशेषाभावात्

[७] त2-"फल" नास्ति

[८] के5,म- "भावना" नास्ति

[९] के3- "भावनाफलयोरेकनिष्ठत्वाद्भावना स्पष्टं न" नास्ति

[१०] के3,अ4-किमयं

[११] भार1,द1,द2,द4,त1,त3,जै,ब1,1900,1915,भ1-पचतीत्युत्तरस्येवा

[१२] के3,अ4-पचत्युत्तरस्येव अस्तीत्युत्तरस्यापि,के4-पचतीत्युत्तरस्येव अस्तीत्युत्तरमपि,के5-पचतीत्युत्तरस्येव अस्तीत्युत्तरस्यापि

[१३] के3,के5,अ4,म-प्रसङ्गः

[१४] के3,त2,भ1,अ4-किञ्चिदु

[१५] के3,के5,अ4-अस्तीत्युत्तरस्यापि दर्शनात् इतरत्र

[१६] त1-गौरव

[१७] अ4-नोत्तरमित्यपि

अथैवमपि "दिगस्ति भवत्यात्मास्ती[१]"त्यादौ तेषामुत्पत्तेर्बाधिततया[२] कथं भावना वाच्येति चेत्[३], अत्राहुः[४]- पूर्वापरीभावापन्नानेकक्षणविशिष्टस्या[५]त्मन उत्पत्तेरत्रापि सुलभत्वान्नातिप्रसङ्गः।

सिद्धान्तिनमाक्षिपति – नन्वेवमिति॥ गणपठितत्वे सति क्रियावाचकत्वम् इति धातुलक्षणमुक्तम्। तथा सति भवति अस्तीत्यादीनाम् धातुत्वानापत्तिः। ततः त्वदभिमतायाः क्रियाया अप्रतीतेः। तदाह – क्रियानुपलम्भात्॥ क्रियाया अप्रतीतेः तत्समाधानायाह - अस्त्यादावपि इति॥ अस्त्यादौ अस्ति भवतीत्यादिप्रयोगे भावनास्त्येव। कदा सा प्रतीयत इत्यत आह - धर्म्यंशे भाव्ये इति॥ धर्मं फलम् तदस्यातीति धर्मी कर्ता।

ननु फलाश्रयस्य कर्मत्वात् कथं फलाश्रयस्य धर्मिणः कर्तृत्वमिति। अकर्मकधातुस्थले फलव्यापारयोः सामानाधिकरण्यस्य सत्त्वात् कर्तुरेव फलाश्रयत्वात्। तथा च धर्म्यंशः फलम् , प्रकारतया भासमानत्वात् तस्मिन् भाव्ये भाव्यत्वेन साध्यत्वेन विवक्षिते अस्त्यादौ, भावनास्त्येव भावनां विना फलस्य भाव्यत्वानुपपत्तेः। तं कारिकार्थमेवाह मूले - अस्त्यादौ अस् भुवीत्यादौ॥ उक्तमर्थं विवृणोति - अयं भाव इत्यादिना॥ अस्ति भवतीत्यादौ धर्म्यंशे फले भाव्यत्वेन विवक्षिते भावना क्रियास्त्येव। विनिगमकमाह – भूधातोरिति॥ द्व्यर्थत्वात् एतद्द्वयार्थस्य फलरूपत्वेन व्यापारं विना तज्जननासंभवात्। नन्वेकस्यैव फलस्य निर्देशेऽपि तदनुकूलव्यापारबोधे द्वयोरुपादानं व्यर्थम् इति चेन्न। स्थित्यर्थकत्वे तदाश्रयत्वरूपस्य व्यापारस्यारोपितव्यापारत्वेन स्पष्टतया व्यापारत्वाप्रतीतेः। उत्पत्तेरुपादाने तु तदनुकूलस्य परिस्पन्दात्मकव्यापारस्य लाभाच्च। उभयार्थकत्वे मानमाह – प्रमाणञ्चेति॥ धान्यानां भवने क्षेत्र इति॥ धान्यवाचिनः षष्ठ्यन्तात् भवनेऽर्थे खञ् यद्भवनं तद् क्षेत्रं स्यादित्यर्थः। मुद्गानां भवनं क्षेत्रं मौद्गीनम्।

---

[१] जो2- "आत्मा " नास्ति

[२] के3,के5,अ4-बाधितत्वात्

[३] अ4- "चेत्" नास्ति

[४] भ1,द7-अत्राह

[५] 1915-विनष्टस्य

भवत्यस्मिन्निति अधिकरणे ल्युट्। भूधातुरत्र उत्पत्त्यर्थकः। मुद्गोत्पत्तिस्थान-मित्यर्थः। निर्देशेन अर्थभेदनिर्देशेनेत्यर्थः। "तत्र जातः" (पा.4.3.25) "तत्र भवः" (पा.4.3.53) इत्यत्रापि उत्पत्तिः स्थितिश्चार्थद्वयम्।

उत्पत्त्यर्थकत्वे पुनः प्रमाणमाह - रोहितो लोहितादासीदिति॥ वाल्मीकीयरामायणे वंशवर्णनमेतत्। आसीदभवदित्यर्थः। अनेन प्रयोगेण उत्पत्यर्थकत्वमेव सिद्धम्। अत एव भवनार्थकत्वादेव उत्पत्यर्थकत्वादेव वा।

सत्कार्यवादिनामिति॥ उत्पत्तेः पूर्वमपि कार्यं सदिति तेषां मतम्। उत्पत्ति-विनाशौ आविर्भावतिरोभावपरौ। तथा च घटो भवतीति स्थले उत्पत्तिरूपार्थकत्वं मत्त्वा स्वसिद्धान्तहानिमवलोक्यैव स्वरूपं लभते इत्यर्थं ते वदन्ति। तथा च न सिद्धान्तहानिः, स्वरूपाभिव्यक्तिस्वरूपलाभभावनायाः सर्वधातुसाधारण्यमेवाह - इत्थं च सर्वत्रेति॥ सर्वधातुष्वित्यर्थः।

कालान्वयानुपपत्त्यापि भावनाया अस्त्यादौ प्रतीतिरिति मनसि निधायोच्यते - किञ्च यद्यत्र क्रिया नास्तीति॥ अत्र अस्ति भवतीत्यादौ क्रियाया अभावे दोषम् आह - कथं तर्हीति॥ भविष्यतीत्यत्र भविष्यत्कालः। अभूत् इत्यत्र भूतकालः। भवति अस्तीत्यादौ वर्तमानकालः। प्रयोगभेदेन कालस्य प्रतीति-र्जायते। क्रियां विना तदनुपपत्तिः स्यादत आह – कालस्य क्रियात्मकत्वादिति॥ क्रियान्वयित्वे एव तदर्थप्रतीतिः। यद्वा क्रियैव काल इति मतमादेयेदम्। सूत्रार्थं तत्र प्रमाणरूपेण उपस्थापयति - वर्तमाने लडिति॥ वर्तमाना या क्रिया तद्वृत्तेः, शक्तिसम्बन्धेनेति शेषः, धातोर्लडिति सूत्रार्थः। अस्त्यादिधातूनां क्रियाऽवाचकत्वे तेभ्यो लडनुपपत्तिरेव, वर्तमानक्रियावृत्तित्वाभावात्। वाक्यपदीयकारमतम् अत्र सम्वादयति – उक्तमिति॥

क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका। (वा.प.तृ.काल.2)

कालानुपाति यद्रूपं तदस्तीति प्रतीयते। (वा.प.तृ.क्रि.12)

क्रिया साध्यत्वेन प्रतीयमाना। तद्भेदाय परिच्छेदाय। कालस्तु व्यावृत्त्यर्थकः, नान्यत् किमपि भेदकम्। संख्या एकत्वादिरूपा सर्वस्य पदार्थमात्रस्य भेदिका। अत्र कारिकायां क्रियाकालयोर्भेद्यभेदकभावसम्बन्धः उक्तः। तथा च कालप्रतीत्यन्यथा-

नुपपत्त्या अस्त्यादीनामपि क्रियारूपोऽर्थः। कालानुपाति कालान्वयि यद्रूपं तदेव अस्त्यादिना प्रतीयते। भावनाप्रतीत्यभावे लडादिव्यवस्थानुपपत्तिः स्यादित्याह – तस्मादिति॥ भावनायाः परिस्पन्दात्मिकायाः सर्वधातुसाधारण्येऽपि अस्त्यादि-स्थले तदभावानुपपत्तिमाक्षिपति - नन्वेवं भावनाया इति॥ उभयत्र तुल्यत्वात्। घटं करोति घटोऽस्तीत्युभयत्र तुल्यत्वात् , धातोः व्यापारशक्तत्वेन उभयत्रापि धातोः सत्त्वात्। अथवा घटं करोतीत्यत्र यथा स्पष्टं प्रतीयते तथा अस्ति भवतीत्यादौ स्पष्टं प्रतीयेतेति स्पष्टम् इत्यध्याहृत्य व्याख्येयम्। तस्या अस्पष्टत्वे हेतुमाह कारिकायाम् – अन्यत्रेति॥ अन्यत्र अस्ति भवतीत्यादौ। अशेषभावात् । भवतीत्यस्मिन्निति व्युत्पत्त्या अधिकरणघञन्तोऽधिकरणवाची भावशब्दः। शेषः फलव्याप्त्यतिरिक्तः कालानधिकरणमित्यर्थः। तथा शेषः फलानधिकरणो भावः। अधिकरणं यस्येति बहुव्रीहिना शेषभावशब्दः फलव्यधिकरणार्थकः भावप्रधाननिर्देशात् । तस्मात् नञ्समासे सति पञ्चम्येकवचने फलव्यधिकरणत्वाभावादित्यर्थावगतिः। तदेवाह – अशेषभावादिति॥ भावनाफलयोरेकनिष्ठत्वात्। सेति कारिकास्थं पदं स्पष्टयति – भावनाफलयोरिति॥ अस्त्यादिना भावनाप्रश्नोत्तराभावाद् भावना तत्र न वाच्येति शङ्कते - अत्र सर्वेषां धातूनां क्रियावाचकत्वे इति॥ किं करोतीति प्रश्नाकारः, पचतीति पाकभावनाविषयकमुत्तरं यथा भवति तथा अस्तीत्युत्तरमपि स्यात् , भावनाया अविशेषात्। तदाह – तुल्यत्वादिति॥ भावनावाचकधातुसत्त्वात्। आक्षेपमिमम् अपहरति – मैवमिति॥ आसन्नविनाशं आसन्नो विनाशो मृत्युर्यस्येति विग्रहः। तादृशं कञ्चित् उद्दिश्य किं करोतीति प्रश्ने अस्तीत्युत्तरस्य सम्भवेन सर्वसम्मतत्वात् इष्टत्वात्। सर्वत्र पचतीतिवदस्तीत्युत्तरं कथं न भवतीत्यत आह – इतरत्रेति॥ अन्यत्र अन्यस्थलमेवाह – सुस्थतयेति॥ तत्र तत्सत्तायामसन्देहात् जिज्ञासायाः सन्देहनिबन्धनत्वात् न सत्ताविषयकः प्रश्नः नापि सत्ताविषयकमुत्तरम् इति भावः। तथा च तत्र पाकादिक्रियाविशेषविषयक एव प्रश्नः, क्रियाविशेष-विषयकं पचतीत्युत्तरम्। तदाह - अस्तीति नोत्तरम्।

पचतीत्यादौ पच्यादाववयवभूतव्यापाराणां वैलक्षण्यात् व्यापारसमुदाया-त्मकक्रियायाः सत्त्वाच्च देवदत्तः पचतीति प्रयोग उपपन्नः। दिगस्ति आत्मास्ती-त्यादौ च दिगादीनां तत्सत्तायाश्च नित्यत्वेनैकविधत्वेन अवयववैलक्षण्याभावेन च

दिगस्ति आत्मास्तीति प्रयोगानुपपत्तिमाशङ्कते - अथैवमपि दिगस्तीति॥ उत्पत्तिर्बाधितेति॥ यस्योत्पत्तिस्तस्य सावयवत्वं, तद्व्यापारस्यापि सावयवत्वं स्यात् यस्य चोत्पत्तिर्बाधिता तस्य न सावयवत्वं नापि तस्य व्यापारस्य सावयवत्वम् इत्यर्थः। तथा सावयवरूपा भावना कथं प्रतीयेतेत्याह- कथं भावना वाच्येति॥ शङ्कां निरस्यति - चेत् अत्राहुरिति॥ यद्यपि दिगात्मादीनां स्वतो नित्यत्वं तथापि तत्तत्क्षणविशिष्टदिगात्मादेरनित्यत्वम्। विशेषणीभूतक्षणादेर्नष्टत्वात्। शिखी ध्वस्तः स्वर्गी ध्वस्त इति न्यायात्। तदाह – पूर्वापरीभावापन्नेति॥ पूर्वापरयोरभावस्य भाव इत्यर्थे च्विप्रत्ययोऽत्र। तमापन्ना अनेके क्षणा इति विग्रहः। सारे त्वित्थमुक्तम् – "आत्मास्ति पर्वताः सन्तीत्यादौ तत्तत्कालिकराज्ञां क्रियायाः अनित्यत्वात्तत्तद्विशिष्टस्योत्पत्त्यादिकमादाय वर्तमानत्वादि ऊह्यम्। "

**72.** यद्वा[1] स्वस्वरूपधारणमेवास्त्यादौ फलम्, "पच्यते तण्डुलः स्वयमेवे"-त्यादाविव तदाश्रयतैव साध्यत्वेनाभिधीयमानो व्यापारः, तथा चात्मादिः[2] स्वस्वरूपधारणं करोतीत्यर्थः। तदुक्तं निरुक्ते - "अस्तीत्युत्पन्नस्यात्मधारणमुच्यते"(नि.अ1.पा1) इति।

नन्वेवम् "आत्मानं धत्ते" इतिवद् "आत्मानमस्ती"त्यपि[3] स्यादविशेषादिति चेत् , अत्र[4] वक्ष्यामः[5]।

उक्तं च[6] वाक्यपदीये-

आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते॥ (वा.प.तृ.सं.47) इति।

कथमन्यथा परेषां[7] तिङामप्यत्रैव[1] व्यभिचाराद् भावना वाच्या? न चात्रापि भावनास्त्येव, तत्प्रतीतौ पुनः किञ्चित् प्रतिबन्धकत्वं[2] कल्प्यते, समभिव्याहार-

---

[1] अ4-उपदा

[2] के5,म-अस्मदादिवत्, त5-आत्मादि

[3] त1-त्यतिप्रयोगः, अ1,के3,के5,अ4-अस्तीति प्रयोगः

[4] अ1- "अत्र " नास्ति

[5] त1,त5-अत्रोच्यते, वा2,जो2- "नन्वेवम् " इत्यारभ्य "वक्ष्यामः "इत्यन्तं नास्ति, जै- "तदुक्तम् " इत्यारभ्य "वक्ष्यामः " इत्यन्तं नास्ति,भ1-वदामः

[6] जै- "च " नास्ति

[7] के5-कथमन्येषाम्

विशेषस्य कारणत्वं[३] वेति वाच्यम्, ममाप्येतस्य सुवचत्वात्। अत एव भावनाफलयोरेकनिष्ठत्वमत्र दोषत्वेनोक्तं मूलकृता।[४]

वस्तुतः किं चेत्याद्युक्तयुक्त्यनुरोधेनात्रापि[५] "आकाशोऽस्ति", "आकाश आत्मा वासीदि"ति प्रयोगाद् भावनाया वाच्यत्वमावश्यकम्।

किं[६] चास्त्यादावस्तित्वमेव व्यापारः। अवच्छेदकतारूपा[७] व्याप्तिः फलम्[८]। सा च मासादावस्तीति[९] "मासमास्ते, गोदोहमास्ते[१०], क्रोशमास्ते, कुरून् स्वपिती"त्यादौ मासादेर्धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं संगच्छते।

तथा च मासाद्य[११]वच्छिन्ना[१२] स्थितिरित्यर्थः। अत एव द्वितीये भाष्ये[१३] "प्राकृतमेवेदं[१४] कालादि कर्म, यथा घटं[१५] करोति"[13] इत्याद्युक्तम्। वाक्यपदीये च[१६]

> कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
> सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते[१७]॥ (वा.प.तृ.सा.67) इति।[१]

---

[१] द1-परेषाम् अत्र

[२] भार1,जै,भ2-प्रतिबन्धकं

[३] अ1-कारणत्वे

[४]वा2,त3,ब1,जो2,1900,के4,त2,द3,भ1,द6,द7,ज1,ब2- "कथमन्यथा " इत्यारभ्य "मूलकृता" इत्यन्तं नास्ति

[५] अ1-रोधादत्रापि

[६] वा2,त1,जो2,द3,त5,ज1-एवं

[७] द1,अ4-अवच्छेदकरूपा,त2-अवच्छेदकरूपव्याप्तिः

[८] अ4- "फलम्" नास्ति

[९] के4- "इति" नास्ति

[१०] अ1- "गोदोहमास्ते " नास्ति

[११] द2-"द्य" नास्ति

[१२] अ4-मासाद्यैरवच्छिन्ना

[१३] द4-द्वितीयभाष्ये

[१४] अ1-वेह

[१५] अ1-कटं

[१६] म-वाक्यपदीयेपि

[१७] त1,जो2,द3-मुपगम्यते,ब2-मुपपद्यते

प्रधानास्तित्वक्रियापेक्षया धात्वर्थत्वाद्[2] व्याप्त्यादिकमन्तर्भूतं[3] क्रियान्तरं येषां[4] तेषां सर्वेषां योगे कालादीनां कर्मत्वं भवतीत्यर्थः। "मासं पचती"त्यादिसंग्रहाय सर्वैरिति। वार्त्तिके[5] अकर्मणामिति[6] कैमुतिकन्यायेन[7]। "मासमास्ते कटे" इत्यत्र कटस्य न[8] व्यापनकर्मत्वमिति न ततो द्वितीयेति हेलाराजः[14]।

"अधिशीङ्स्थासाम्[9]"(पा.1-4-46) इति ज्ञापनात्[10] "कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणां देशश्च[11]"[15] इत्यस्य नियमार्थत्वाद् वा नातिप्रसङ्ग[12] इति तत्त्वम्[13]।

---

अस्त्याद्यर्थवैलक्षण्यमुपपाद्य निर्वाहम् आह – यद्वेति॥ पूर्वम् सत्तैवार्थ इति पक्षमादायोक्तम् , इदानीं स्वस्वरूपधारणफलं तदनुकूलो व्यापारश्च अस्त्यर्थ इति

---

[1]द1- "एकदेशे समूहे वा व्यापाराणां पचादयः। स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः॥ इति च। व्यापाराणां मध्ये एकदेशे आश्रयत्वमात्रे पच्यते स्वयमेवेत्यादौ, समूहे – कृत्यादौ, देवदत्तः पचतीत्यादौ। एवं किं करोतीत्यत्र अस्तीत्युत्तरेऽपि व्याप्तिरहिते विद्यमानत्वमात्रे धातुर्वर्तत इति हेलाराजः। " इति अधिकम्

[2] अ1,के3,अ4-धात्वर्थे

[3] जै-व्याप्त्यादिकर्म तद्भूतं

[4] भ1- "येषां " नास्ति

[5] अ1,के3,के5,अ4- "वार्तिके" नास्ति

[6]अ1,1915,1900,के3,अ4-अकर्मकैरिति,भार1,त3-अकर्मणामिति वार्तिके, भ1,द5,द6,ब3-अकर्मकाणामिति

[7] त1,वा2,जो2,द3,त5,ज1,ब2- "वार्तिके " इत्यादिवाक्यं नास्ति, अ1-कैमुत्तिक, के3,म-कैमुक्तिक

[8] अ1-न कटस्य

[9] अ1- "कर्म" अधिकं

[10]अ1,के3 –ज्ञापकात्, के4-"यदि कटे अस्तीत्यादौ कटादीनामपि व्याप्त्याधाराश्रयत्वेन कर्मत्वं स्यात् तर्हि अधितिष्ठति अध्यास्ते वा वैकुण्ठमित्यत्रापि वैकुण्ठादीनां कर्मत्वं सिद्धमेवेति अधिशीङ्स्थासामित्यस्य वैयर्थ्यम् तदेव व्यर्थं सत् ज्ञापयति न कटादीनां कर्मत्वम्" इत्यधिकम्।
भ2-यदि कटे अस्तीत्यादौ कटादीनामपि व्याप्त्याधाराश्रयत्वेन कर्मत्वं स्यात् तर्हि अधितिष्ठति अध्यास्ते वा वैकुण्ठमित्यत्रापि वैकुण्ठादीनां कर्मत्वं सिद्धमेवेति अधिशीङ्स्थासामित्यस्य वैयर्थ्यम् तदेव व्यर्थं सत् ज्ञापयति न कटादीनां कर्मत्वमिति इति टिप्पणी

[11] भ1-कालभावाध्वगन्तव्याः कर्मणो देशश्च .

[12] भ2-मासमास्ते कट इत्यत्र कटस्य न कर्मत्वम् इति टिप्पणी

[13] भ3,द6-"तत्त्वम्" नास्ति

मन्यते। दृष्टान्तयति - पच्यते तण्डुलः स्वयमेवेति॥ कर्मकर्तृविवक्षायां कर्तरि प्रत्ययः, तत्र न विक्लित्यनुकूलः फूत्कारादिः व्यापारो धातोरर्थः, अपि तु विक्लित्याश्रयत्वरूपो व्यापारः। आश्रयतायाश्च आरोपितावयवत्वेन व्यापारत्वं, तथात्रापि स्वस्वरूपधारणानुकूलव्यापारः आश्रयतैव। सैव व्यापारः। ननु आश्रयतायाः स्वरूपरूपत्वेन साध्यत्वानुपपत्तिरित्यत आह – साध्यत्वेनेति॥ साध्यत्वाभावेऽपि साध्यत्वप्रकारकप्रतीतिविषयत्वबलाद्साध्यत्वेनाभिधानात्। व्यापारस्य साध्यत्वं विवृणोति - तथा चात्मादिः स्वस्वरूपधारणं करोतीति॥ विवरणकृञोऽर्थस्य साध्यत्वेन विव्रियमाणस्यार्थस्यापि साध्यत्वसिद्धिरिति भावः। तथा च आत्मादिकर्तृकं स्वस्वरूपधारणम् इति बोधः। स्वाभिप्रायसाधनाय निरुक्तम् अवतारयति – तदुक्तम्। अस्तीति॥ उत्पन्नस्य जातस्यात्मधारणं अस्तीत्यनेनोच्यते द्वितीयोऽयं भावविकार इति भावः। अत्र आत्मादेः स्वरूपतो नित्यत्वेऽपि उपहितात्मना स्वरूपधारणादि उपपादनीयम्। ननु यदि आत्मधारणमेवास्त्यर्थस्तदा धारणार्थकधाधातुयोगे आत्मानं धत्ते इति यथा प्रयोगस्तथैव आत्मानं अस्तीतिस्यादिति शङ्कते – नन्वेवम् आत्मानम् इति॥ समाधानं वक्ष्यमाणमाह - वक्ष्यते इति॥ धाधातोः धारणमात्रमर्थः, तथा सति न कर्मणः धात्वर्थतावच्छेदककुक्षौ प्रवेशः। अस्त्यादेस्तु आत्मधारणमर्थः। तथा च आत्मादिकर्मणो धात्वर्थतावच्छेदककुक्षौ प्रवेशादकर्मकत्वमेव इत्यपि बोध्यम्। तदेवाह कारिकया - आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यते इति॥ अस्त्यर्थमेवाह – आत्मानमिति॥ आत्मना आत्मानं बिभ्रति इति अस्तीत्यनेन व्यपदिश्यते, अभिधीयते। आत्मकर्मकं धारणम् अस्त्यर्थः। तथा सति उक्तरीत्याऽकर्मक एव। तथा च आत्मानम् अस्तीति न प्रयोगापत्तिः। आत्मरूपकर्मणो धात्वर्थतया गृहीतत्वात्। परस्यापि इमामनुपपत्तिमाह – कथमन्यथेति॥ अयमाशयः - ये भावनायास्तिङ्वाच्यत्वमभिप्रयन्ति तन्मतेऽपि अत्रैव आत्मास्तीत्यादौ एव व्यभिचारात् तिङ्त्वेऽपि भावनाया अप्रतीतेः, कथं भावना वाच्या तिङः परेषां तेषाम्। परस्य समाधानमाह - न चात्रापि भावनेति॥ अस्त्यादावपि तिङ्वाच्यत्वेन भावना अस्त्यैव। ननु कथं न प्रतीयते इत्यत आह – तत्प्रतीताविति॥ तस्या भावनायाः प्रतीतौ अनुभवे प्रतिबन्धकम् नित्यवाचिदिगादिशब्दोच्चारणादि, कल्प्यते अभिमन्यते। समभिहार-

विशेषस्य देवदत्तादिसावयवपदार्थपरपदप्रयोगरूपस्य कारणत्वं भावनाबोधकारणत्वं वा कल्प्यते। परमतमिदम्। कल्पितं प्रतिबन्धस्वरूपं स्वमतेऽपि योजयति। ममाप्येतस्य उक्तकल्पनाद्वयस्य मम वैयाकरणस्य मतेऽपि सुवचत्वात् कथयितुं शक्यत्वादेव। अत एवेति॥ समभिव्याहारविशेषादेः कारणत्वस्वीकारादेव। उक्तं मूलकृता कारिकाकृता अन्यत्राशेषभावादित्यादि। वस्तुतःइति॥ उक्तयुक्त्यनुरोधेन । किं च क्रियावाचकतां विना धातुत्वमेव नेत्यादि युक्त्यनुरोधेनेत्यर्थः। भावनाया वाच्यत्वं सर्वत्रापि बोध्यम् ।तदभावे धातुत्वानुपपत्तौ लडाद्यनुपपत्तिरिति भावः। पूर्वमुक्तमपि स्मारयति - किञ्चास्त्यादौ इति॥ अस्तित्वम् अस्तीति प्रतीतिविषयत्वम्। स एव व्यापारः। फलं किमित्याह – अवच्छेदकतारूपा व्याप्तिः फलमिति॥ सा च अवच्छेदकतारूपा व्याप्तिः स्वरूपेण मासादावस्तीति फलाश्रयत्वात् कर्मता। तदाह - मासमास्ते, गोदोहमास्ते इत्यादि॥ शाब्दबोधमाह - मासावच्छिन्ना स्थितिरिति॥ नारद आस्ते इत्युक्तौ नारदस्थितिः, निरवच्छिन्नतया सदा प्रतीयते गोदोहमित्युक्तौ सास्थितिः परिच्छिद्यते, यावद् गोदोहस्तावत् स्थितिः। अन्यदा स्थित्यभावः सिध्यति। तथा च स्थित्यवच्छेदकः गोदोहादिः, अवच्छेदकता गोदोहादौ फलस्थानीया, तदाश्रयत्वात् एषां कर्मतेति भावः। व्याप्तिः सम्बन्ध एवेति ध्येयम्। अत एव द्वितीये भाष्य इति॥ द्वितीयाध्याये। प्राकृतमेव "कर्तु(पा.1.4.49)"रिति विधीयमानम् मुख्यमेव। घटं करोतीत्यत्र यथा प्राकृतं मुख्यं कर्म तथैव कालादि कर्मापि। ननु कालादीनां "कर्तुरीप्सिते" (पा.1.4.49) त्यनेन न कर्मत्वं "अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक" इति वार्तिकेनैव कर्मत्वं, तथा च प्राकृतकर्मत्वकथनानुपपत्तिरित्यत आह - वाक्यपदीये चेति॥

कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते॥ (वा.प.तृ.सा.67)इति।

अयमभिप्रायः- तत्तद्धात्वर्थकरणकव्यापने तत्तद्धातूनां शक्तिं स्वीकृत्य "अकर्मकधातुभिर्योग" इति वार्तिकं खण्डितम्। "कर्तुरीप्सिततमम्(पा.1.4.49)" इत्यनेनैव गतार्थत्वात्। तथाहि - मासमास्ते इत्यादेः मासमासनेन व्याप्नोति। आसनमुपवेशनम्। एवं सति मासादेर्व्यापनकर्मत्वात् "कर्तुरीप्सिततममि(पा.1.4.49)"

त्यनेनैव कर्मत्वसिद्धिरिति प्राकृतमेवेति कथं न सङ्गतिः। अयमेवार्थः कारिकाया-मुक्तः। तदाह – प्रधानास्तिक्रियापेक्षया॥ कारिकायां क्रियान्तरमित्युक्तम् , तत्र प्रतियोग्यांशं पूरयति – प्रधानास्तित्वापेक्षया। मासमास्ते इत्यादौ प्रधानीभूता अस्त्यादिक्रिया। तत्र प्राधान्येन अस्त्याद्यर्थ उच्यते इति भावः। तत्र अन्तर्भूत-व्याप्त्यादिकं क्रियान्तरं येषां अस्त्यादीनाम्। अन्तर्भावे हेतुमाह - धात्वर्थत्वेन। यतो अनुभवबलादेषां धातूनां व्याप्त्यादिकं क्रियान्तरमर्थः। अतस्तदर्थान्तर्भावेन तेषां धातूनां वृत्तिरित्यर्थः। स्वार्थकरणकव्यापने वृत्तिमतां तेषां धातूनामस्त्यादीनां योगे कालादीनां कर्मत्वं भवतीत्यर्थः। मासं पचतीति॥ सर्वैरकर्मकैःसकर्मकैश्च। ननु कारिकायामकर्मकैः इत्येवोक्तमित्यत आह - कैमुतिकन्यायेन इति॥ अकर्मकैर्योगे यदि भवेत् किमुत सकर्मकैरिति। किमुत इति निपातसमुदायात् ठञ्। किमुतयोर्भाव इति विग्रहे शब्दपरतया नाव्ययसंज्ञा। अत्र कैयटसम्मतिमाह - मासमास्ते कट इत्यत्रेति॥ न कटस्य व्यापनकर्मत्वम् अपि तु कर्तृत्वमेव। व्यापनकर्मत्वमित्युक्त्या व्यापनान्तरभावेन आसादिधातूनां वृत्तिः सूचितेति ध्येयम्। ननु घटमास्ते इत्यादि प्रयोगाः स्युरित्यत आह - अधिशीङ्स्थासां कर्मेति॥ अकर्मकाणां योगे कालादीनां कर्मसंज्ञा चेत् विशेषादिवाचिनामेवेति नियमेन घटादीनां देशादि वाचकत्वात्। द्वितीयं नियममाह - कालाभावाध्वगन्तव्या इत्यादि॥ अकर्मकाणां योगे कालविशेषादीनामेव इति नियमाकारः।

**73.** न च "आस्यते मास" इतिवत् "पच्यते[1] मास" इत्यापत्तिः। अस्त्यादेः[2] सकर्मकत्वात् पच्यादे[3]रिव भावे लश्च न स्यादिति वाच्यम्।

"प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्"[16] इति, "न[4] केचित्[5] कालभावाध्वभि-रकर्मका[1]स्तदेवं विज्ञास्यामः क्वचिद्[2] येऽकर्मका"[17] इति च[3] भाष्येणैव दत्तोत्तरत्वात्।

[1] द1,जो2-क्रियते, त1-पठ्यते

[2] अ1-आस्यादेः

[3] त2-पचत्यादे,भ2-पचेः द्विकर्मकत्वात् पच्यते मास इति न भवतीति भावः इति टिप्पणी

[4] अ1-न च, त3,के4,त्रि - "न" नास्ति,अ4-अनेन

[5]भ2-न केचिदिति न सकर्मका इत्यर्थः इति टिप्पणी

उक्तं च वाक्यपदीयेऽपि[४]-

आधारत्वमिव[५] प्राप्तास्ते[६] पुनर्द्रव्यकर्मसु।
कालादयो भिन्नकक्ष्यं[७] यान्ति कर्मत्वमुत्तरम्[८] ॥
अतस्तैः कर्मभिर्धातुर्युक्तो द्रव्यैरकर्मकः[९]।
लस्य[१०] कर्मणि भावे च निमित्तत्वाय[११] कल्पते[१२] ॥

(वा.प.तृ.सा.68,69) इति।

तात्पर्यविरहाच्च[१३] केवलमस्तीत्यादौ न तद्बोधकत्व[१४]मिति ध्येयम्। [१५]गवादिपदानां वागाद्य[१६]नेकार्थत्वाविशेषेऽपि "गौरस्ति, गां दद्यात्" इत्यादौ[१७] प्रसिद्ध्यप्रसिद्धिभ्यां[१८] उत्सर्गतः शीघ्रं सास्नादिमद्व्यक्तिबोधवागाद्य[१९]बोधवत् पचत्यस्तीत्यादौ विक्लित्ति-

---

[१] अ4-.....रकर्मकै

[२] भ2- निवृत्तप्रेषणाभावविवक्षायाम् इति टिप्पणी

[३] अ1,1915- "च" नास्ति

[४] जै,जो2,1900,1915,भ1,भ2- "अपि" नास्ति

[५] जै-आधारत्वमेव

[६]अ1-व्याप्तास्ते, अ3- "ते पुनर्द्रव्यकर्मसु" इत्यारभ्य "धातूपात्तफलाश्रये" इत्यन्तं चतुर्दशवाक्यात्मकः ग्रन्थः नास्ति

[७] वा2-भिन्नकक्षा,ज1-भिन्नकक्षं

[८] त1-मुत्तरः

[९] के4-रकर्मकैः,भ2-लः कर्मणीति सूत्रे कालादिभिन्नकर्मरहिता एव अकर्मत्वेन गृहीता इति अस्त्यादेः तथात्वात् भावे लकारो भवतीति भावः इति टिप्पणी

[१०] अ1-तस्य, वा2-लक्ष्य

[११] जै-निमित्तकाय

[१२] अ1,वा2,त1,भ2,1915-कल्प्यते

[१३] अ1-भावनाद्यर्थविरहाच्च

[१४] भ2-अस्त्यादेः नावच्छेदकदतारूपव्याप्त्यादिफलबोधकत्वमिति भावः इति टिप्पणी

[१५] अ1- "गवादिपदानां" इत्यारभ्य "साम्प्रदायिकाः" इत्यन्तं त्रिचत्वारिंशत् वाक्यात्मकः ग्रन्थभागः नास्ति

[१६] जो2,त्रि-गवाद्य

[१७] के4-इति

[१८] द3-"अप्रसिद्धि" नास्ति

[१९] त्रि- त5- ----गवाद्य

सत्तादिबोधव्याप्त्यबोधयोरुपपत्तेश्च। वस्तुतो धातुसंज्ञाविध्यनुरोधाद् धातूनां क्रियावाचकत्वावश्यकत्वेऽपि[१] फलवाचकत्वं नावश्यकम्[२]। अतोऽस्त्यादौ सत्तादिरेव क्रिया[३]। अत एव "पश्यति भवः स्वयमेव, दर्शयति(ते)[४] भवः" इत्यादौ निवृत्तप्रेषणे[५]ऽपि विषयतारूप फलस्यैव क्रियात्वं धात्वर्थत्वं चाभ्युपगतम्। "पच्यते ओदनः स्वयमेव" इत्यादौ विक्लित्ति[६]मात्रं धात्वर्थः, अतस्तद्रूप[७]क्रियाश्रयत्वादोदनस्य कर्तृतेति -

एकदेशे[८] समूहे वा व्यापाराणां पचादयः।
स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः॥ (वा.प.सा.58)

इति वाक्यपदीयव्याख्यायां हेलाराजीये[18]ऽप्युक्तम्।

नन्वेवं[९] "घटं भावयति, तण्डुलं पचति, भवं पश्यती"त्यादावपि धातूपात्तक्रियाश्रयत्वाद् घटादेः कर्तृतापत्तौ द्वितीयानापत्तिः[१०]। कर्तृसंज्ञया कर्मसंज्ञाया बाधात्। न च निरवकाशत्वात् कर्मसंज्ञैव देवदत्तः पचतीत्यादौ देवदत्ते सावकाशां कर्तृसंज्ञां बाधिष्यत इति वाच्यम्। एवं हि "चैत्रो ग्रामं गच्छती"त्यादौ धातूपात्तफलाश्रये[११] चैत्रेऽपि[१२] कर्मसंज्ञाद्वितीययोरापत्तेः[१३]। एवं[१] "पश्यति भव[२]" इत्यादावपीति[३]।

---

[१] द4-"अपि" नास्ति

[२] त2-फलवाचकत्वन्त्वावश्यकम्

[३] भ2-सत्ता व्याप्तिरिति पर्यायः तथा च फलस्यैव क्रियात्वम् धात्वर्थत्वं चाभ्युपेयते इत्याह सत्तादिरेव क्रियेति इति टिप्पणी

[४] वा2,भार1,द1,द2,भ1,त1,त3,जो2,1900,भ2,भ3-दर्शयते

[५] ज1-निवृत्ते प्रेषणे

[६] त5-विक्लृत्ति

[७] भ2-विक्लित्तिरूप इति टिप्पणी

[८] भ2-एकदेशे –फले इति टिप्पणी

[९] द1,भ1-नचैवं

[१०] भ1,द7-द्वितीयानापत्तेः

[११] द1-धातूपात्तव्यापाराश्रये

[१२] के4-अपि चैत्रे

[१३] त2-रुपपत्तेः

ननूक्तरीत्या यथा मासमास्ते इत्यादयो प्रयोगास्तथैव मासम् पचतीति स्यात् । तथा सति यथा मास आस्यते तथैव मासः पच्यत इत्यपि स्यात्। द्वितीयं दोषमाह – आस्यादेरिति॥ कालादिकमादाय अस्त्यादीनां सकर्मकत्वेन भूयते इत्यत्र भावे लडाद्यनापत्तेश्च अकर्मकत्वाभावात्। दृष्टान्तमाह – पच्यादेरिवेति॥ यथा पचादेः सकर्मकत्वेन भावे न लट् तथैव तेभ्यः इति भावः। उक्ताक्षेपद्वय-समाधानमाह - प्रधानकर्मण्याख्येये लादीनाहुरिति॥ द्विकर्मणां प्रधानकर्मणि लकार इत्यर्थः। तथा च मासं तण्डुलं पचति इत्यस्य द्विकर्मकत्वेन तण्डुलस्यैव प्रधानकर्मत्वं तत्रैव लकारो न त्वप्रधाने कर्मणि मासादौ। कर्तुरिति विहितत्वे प्रधानकर्मत्वम्।

द्वितीयाक्षेपसमाधानमाह - न केचिदिति॥ क्वचिदिति॥ देशकालादिभिन्न-कर्माभाववन्त अकर्मका इति तदर्थः। तथा चास्त्यादेः कालादिभिन्नकर्मा-भाववत्त्वेन अकर्मकत्वाद् भावे लडादिसिद्धिः। वाक्यपदीयकारानुमोदनमाह – उक्तमिति॥

आधारत्वमिव प्राप्तास्ते पुनर्द्रव्यकर्मसु।
कालादयो भिन्नकक्ष्यं यान्ति कर्मत्वमुत्तरम्॥
अतस्तैः कर्मभिर्धातुर्युक्तो द्रव्यैरकर्मकः।
लस्य कर्मणि भावे च निमित्तत्वाय कल्प्यते॥ (वा.प.तृ.सा.68,69)

यथा कर्तृकर्मद्वारा आधारः क्रियायोगं भजते तथा द्रव्यकर्मव्यवधानेन कालादि क्रियायोगं भजत इत्युपमार्थः। द्रव्यकर्मणा साकं पूर्वक्रियायोगः, तद्वारा तु कालादिकर्मणेति यान्ति कर्मत्वमुत्तरमित्युक्तम्। अत्र द्रव्यकर्म प्रधानं कर्म। भिन्नकक्ष्यमिति॥ द्रव्यकर्मणः क्रियासम्बन्धात् उत्तरस्मिन्काले भिन्नकक्ष्यं भिन्ना कक्ष्या कोटिरप्रधानत्वाख्या यस्य तद्भिन्नकक्ष्यं कर्मत्वं यान्ति प्राप्नुवन्ति। अतस्तैः कालादिभिः अद्रव्यैः कर्मभिर्युक्तो धातुरकर्मकः सन् लस्य कर्मणि भावे चोत्पत्तिनिमित्तत्वाय कल्पते। तथा च यत्रास्ति सकर्मकेषु द्रव्यकर्मतण्डुलादि

---

[1] जो2- एवं हि

[2] भ2-प्रेरणांशत्यागात् भवस्य फलाश्रयत्वात् कर्मसंज्ञाद्वितीये आपद्येतामिति भावः इति टिप्पणी

[3] त1- "इति" नास्ति

तदपेक्षया कालादिकर्मणो अप्रधानत्वात् तत्र लडादिर्न भवति। तदाह – प्रधानकर्मणीति॥ तात्पर्यविरहाच्चेति॥ भावनाविषयकतात्पर्याभावात्। केवलमस्ति इत्यादौ॥आसन्नविनाशाद्यवस्थाया अभावः केवलशब्दार्थः। सत्तामात्रतात्पर्ये सतीति योजनीयम्। तत्र भावनाबोधकत्वं नास्ति। उदाहरणेनेदं साधयति - गवादौ पदानामिति॥ व्याख्यातमेतत् । वागाद्यनेकार्थत्वेऽपि प्रसिद्ध्या गौरस्तीत्यादौ सास्नादिपदव्यक्तिबोधो जायते वागादिबोधो नैव जायते। तद्वत् फलव्यापारो-भयार्थकत्वेऽपि तात्पर्यवशात् फलमात्रबोधो व्यापारफलबोधाभावश्च।

एकदेशिमतमाह - वस्तुतस्तु इति॥ क्रियावाचकानां एव धातुत्वविधानात् क्रियावाचकत्वमावश्यकम्। धातुसंज्ञायां फलवाचकत्वस्यानपेक्षितत्त्वादाह - फलवाचकत्वं नावश्यकम् इति॥ फलितमाह - अतो अस्त्यादौ इति॥ क्रिया-वाचकत्वरूपधातुत्वाय सत्तादिरेव क्रिया तत्र। पश्यति भवः इति॥ भक्ताः भवं पश्यन्ति। कर्मणः कर्तृत्वविवक्षायां पश्यति भवः - ज्ञानविषयो भवति। पुनः भक्ताः प्रेरयन्तीति प्रेरणांशविवक्षायां भक्ताः भवं दर्शयन्ति। पुनः निवृत्तप्रेषणायां भवः स्वयमेव दर्शयते इति स्थितिः। अत्र "णेरणा"(पा. 1-3-67)विति सूत्रेणात्मनेपदं प्रसिद्धम्।अत्र विषयत्वमेव फलम् , तस्यैव क्रियात्वेन धात्वर्थत्वविवक्षया तदादायैव धातुसंज्ञेति भावः। निर्विवादस्थलमाह – पच्यते ओदनः स्वयमेवेति॥ अत्र कर्मण एव कर्तृत्वविवक्षायां फूत्कारादीनामोदनादौ बाधात् विक्लित्तिमात्रम् धात्वर्थः क्रियारूपः। व्यापाराश्रयस्य कर्तृत्वमिति त्वोदनस्य कर्तृत्वायाह – अतस्तद्रूप-क्रियाश्रयत्वादोदनस्य कर्तृतेति॥

एकदेशे समूहे वा व्यापाराणां पचादयः।
स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः॥(वा.प.सा.58)

व्याख्यातेयं कारिका। व्यापारमात्रार्थकत्वे दोषं समुच्चिनोति - नन्वेवं घटं भावयतीति॥ सर्वत्रापि धातोः सत्त्वात्तदुपात्तव्यापारस्य तदाश्रयस्य च सत्त्वादिति योज्यम्। ननु कर्मसंज्ञासूत्रेण कर्मसंज्ञोपपत्तिरित्यत आह – कर्तृसंज्ञयेति॥ परत्वात्। अपवादत्वात् कर्मसंज्ञाम् साधयति- न च निरवकाशत्वादिति॥ येन ना प्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति न्यायात् कर्मसंज्ञैव न तु कर्तृसंज्ञा। ननु कर्तृसंज्ञापि निरवकाशैवेत्यत आह - देवदत्तः पचतीति॥ देवदत्तस्य कर्मसंज्ञा तु न,

देवदत्तस्य कर्तृत्वेन कर्तुरीप्सिततमत्वाभावात्। कर्मसंज्ञायाः कर्तृसंज्ञाबाधमाक्षिपति - एवं हि चैत्रो ग्राममिति॥ धातूपात्तफलाश्रयेऽपि इति॥ नन्वत्र फलस्य धातुवाच्यत्वमपहाय विचार्यते तत्कथं धातूपात्तफलेतीत्युक्तम्। उभयवाचकत्ववासनयास्य ग्रन्थस्य प्रस्तुतत्वात्। भावनामात्रवाचकत्वविचारस्तु प्राकरणिकः। यद्वा फलस्थानापन्नव्यापार एवात्र फलपदार्थः। फलाश्रयेऽपीति व्यापाराश्रयेऽपीत्यर्थः। कर्मसंज्ञेति॥ अपवादत्वरूपोक्तयुक्तेः। पश्यति भवः इत्यत्रापि कर्तृकर्मसंज्ञयोः प्राप्तौ निरवकाशत्वात् कर्मसंज्ञैव स्यादिति भावः।

**74.** नापि "प्रत्ययार्थान्याविशेषणत्व[1]विशिष्टविषयतया[2] धातुजन्यशाब्दबोधविषयत्व[3]मेव क्रियात्वं" निर्वाच्यम्, तच्च फलोपधानं "तण्डुलं पचती"त्यादौ फले नास्तीति तस्मिन्प्रयोगे फलस्याक्रियात्वेऽपि[4] कर्मकर्तरि तदस्त्येवेति तत्र तस्य[5] क्रियात्वं तदाश्रयत्वेनौ[6]दनभवादेः कर्तृत्वं चोपपद्यते।

"पाचयति शिष्येण गुरुः पाचक[7]" इत्यादौ प्रत्ययार्थविशेष्यक[8] भावनाविशेषणकशाब्दबोधस्य धातुप्रत्ययाभ्यामुत्पत्तेरव्याप्तिवारणाय "प्रत्ययार्थान्येतीति" युक्तम्[9]। एवमपि "पश्य मृगो धावति, पश्य नृत्यति, पचति भवति" इत्यादौ धात्वर्थविशेष्यक[10]नृत्यादि[11]भावनाविशेषणक[12]शाब्दबोधाभ्युपगमादव्याप्त्यवारणादिति[13] चेन्न।

---

[1] त1-प्रत्ययार्थ अन्याविशेषणत्व,के4-प्रत्ययार्थानां विशेषणत्व

[2] अ3-विषयकतया

[3] भ1-शाब्दबोधाविषयत्व

[4] भ3-"कर्मत्वेपि" अधिकम्

[5] भ2-तस्य-फलोपधानस्य इति टिप्पणी

[6] भ2-क्रियाश्रयत्वेन इति टिप्पणी,त्रि-तदाश्रयत्वेनोदनतादेः

[7] त3-गुरुपाचक

[8] भ1-"भावनाविशेष्यक"इत्यधिकम्,भ2-णिच् प्रत्ययार्थप्रेरणाविशेष्यकेत्यर्थः इति टिप्पणी

[9] जो2,भ2-प्रत्ययार्थान्येतीत्युक्तम्,के4,म-प्रत्ययार्थान्यतेति युक्तम्

[10] वा2,भार1,त3- "धावन " अधिकम्,

[11] भार1,त3,द4,त2,ब3-नृत्तादि

[12] भ2-धात्वर्थभावनाविशेषणकेत्यर्थः इति टिप्पणी

[13] अ3-वारणमिति, के4-वारणायेति

तद्धात्वर्था[१]विशेषणत्वविशिष्टविषयतया तद्धातुजन्यशाब्दबोधविषयता[२]फलोपधान-स्यैव तद्धात्वर्थभावनात्वात्[३]। न चैवं "घटं भावयती"त्यादौ भवनस्य णिजन्त-धात्वर्थविशेषणत्वेऽपि[४] भ्वर्थाविशेषणत्वाद् भ्वर्थक्रियात्व[५]मस्त्येवेति तदाश्रय-त्वापत्तिः(तदाश्रयत्वात् कर्तृत्वापत्तिः)[६], इष्टापत्तेः[७]।

अत एव "गतिबुद्धि"(पा.1-4-52) इति सूत्रेण कर्तुरेव कर्मसंज्ञा विधीयते। अत एव क्रियाभेदादुभयमप्यस्तीति "ण्यन्ते कर्तुश्च कर्मणः"[19] इति भाष्ये उभयथापि व्यवहारः कृतः।

न चैवमपि क्रियात्वस्य धातुत्व[८]गर्भतया तस्य क्रियावाचकत्वगर्भस्यान्योन्याश्रया-दग्रह[९]प्रसङ्गः, [१०]क्रियात्वघटकधातुत्वस्य जात्यादिरूपत्वात्। भूवादि (पा.1-3-1) सूत्रं तु[११] तत्परिचायकमिति प्रागेवोक्तम्। फलत्वमपि तद्धात्वर्थविशेषणत्वे सति तद्धात्वर्थत्वम्। अतः प्रयोज्यव्यापारस्याणिजन्तधात्वर्थाफलत्वेऽपि[१२] णिजन्त-धात्वर्थफलत्वा[१३]त्तदाश्रयस्य तत्र कर्मत्वमुपपद्यते।

"पश्य मृगो धावति" इत्यत्र धावनक्रियाया दृशिफलत्ववारणाय[१४] प्रथमं[१] तत्पदम्। दृशिफलत्वे च[२] तदाश्रयत्वान्मृगस्य कर्मतापत्तौ द्वितीया दुर्वारा। न च तस्य

---

[१] जो2- "तत्" नास्ति, के4-तद्धात्वर्थत्वा

[२] त5-बोधविषयतया

[३] त3-भावनात्

[४] भ1,द7- "अपि" नास्ति

[५] जो2-भ्वर्थक्रियाविशेषणत्व, त्रि -भ्वर्थाविशेषणत्वादभ्वर्थक्रियात्व

[६] अन्यत्र सर्वत्र "तदाश्रयत्वात् कर्तृत्वापत्तिः", द4-"तदाश्रयत्वात् कर्तृतापत्तिः"

[७] त्रि-इष्टापत्तिः

[८] भ1- "त्व" नास्ति

[९] त3,1900,म-दग्रहण

[१०] अ3- "क्रियात्वघटकधातुत्वस्य" इत्यारभ्य "कर्तृव्यापारानुकूल" इत्यन्तम् एकादशवाक्यात्मकः ग्रन्थः नास्ति

[११] भार1,द1,त3- "तु" नास्ति

[१२] द1-प्रयोज्यव्यापारस्य णिजन्तधात्वर्थाफलत्वेऽपि, द3-"णिजन्तधात्वर्थाफलत्वेऽपि" नास्ति

[१३] भ1-धात्वर्थाफलत्वात्

[१४] के4-कारणाय

धात्वर्थ[3]भावनाश्रयतया कर्तृत्वात् तत्संज्ञया बाधान्न कर्मसंज्ञाद्वितीयेति वाच्यम्, "पक्त्वौदनो[4] भुज्यते देवदत्तेन" इत्यत्रेव प्रधानानुरोधेन कार्यप्रवृत्तेः, प्रधानदृश्यर्थक्रियानुरोधिकर्मसंज्ञा[5]या दुर्वारत्वात्।

किं च[6] स्वकारकविशिष्टा क्रिया[7] दृशिकर्म। तथा च धावनकर्तृत्वानन्तरं दृशिकर्मत्वसंपत्त्येन नाप्राप्तिन्यायरीत्या पश्चात् प्रवृत्तं[8] कर्मत्वं कर्तृत्वबाधेनैव प्रवर्ततेति[9] न[10] बाध्यत्वं युज्यते।

अत एव "घटं भावयती"त्यादौ प्रधानानुरोधात् कर्मत्वं सिध्यत्येवेति "गति[11]बुद्धि[12]"(पा.1-4-52)सूत्रं नियमार्थम्। तेन "पाचयति गुरुः शिष्येण" इत्यत्र न कर्मत्वमिति सर्व[13]सम्प्रतिपन्नम्।

---

उक्तदोषं क्रियात्वपरिष्कारेण वारयितुं प्रक्रमते – नापीति॥ अयं च क्रियात्वपरिष्कारः फलस्यापि वाच्यत्वे एव प्रवर्तते। क्रियात्वं शाब्दबोधविषयत्वम्। एतत् चोभयवाचकत्वे फलेऽपि अतिव्याप्तम् अत आह – प्रत्ययार्थान्येति॥ प्रत्ययस्तिङादिस्तदर्थः कत्रादिः। न्यायमीमांसातिरिक्तमतस्यैव प्रस्तुतत्वात्। तदन्यो व्यापारस्तन्निरूपितविशेषणत्वमेव फले। तादृशविशेषणत्वे समानाधिकरणविषयतापि तत्रैव फले । सामानाधिकरण्यमत्राभिन्नत्वरूपम्। तादृशविशेषणत्वाभावविशिष्टा

---

[1] भार1,द1,द2,त1,त3,1900,1915, के4,भ1,भ2,भ3,ब2- "तद्धात्विति" इत्यधिकम्
[2] "च" नास्ति
[3] भार1,त3,द1,ब1 - धावत्यर्थ,भ1-धावन
[4] भ1-पक्त्वौदनो
[5] के4- "द्वितीयेति"इत्यारभ्य"कर्मसंज्ञा" पर्यन्तं नास्ति
[6] जो2- "किं च " नास्ति
[7] भार1,त3-स्वकारकविशिष्टक्रिया
[8] त2-प्रतीतं
[9] त1-प्रवर्तत इति, त3-प्रवृत्तेति
[10] त्रि-"न" नास्ति
[11] वा2- "गति " नास्ति
[12] भ1,द5-बुद्धीति
[13] वा2,भार1,जो2,त1,त3,1915-सर्वे

विषयता व्यापारे एवेति समन्वयः। विषयतयेत्यत्र तृतीयार्थो निरूपकत्वं, तस्य स्वरूपसंबन्धेन धातुजन्यबोधेऽन्वयः।तथा च तादृशविशेषणत्वाभाववती या विषयता तन्निरूपको यो धातुजन्यो बोधस्तद्विषयत्वं व्यापारे इति फलति।

फले तदभावं दर्शयति - तच्च फलोपधानमित्यादिना॥ फलपदमत्र विशेषणपरं प्रत्ययार्थान्याविशेषणत्ववैशिष्ट्यरूपम्। तच्च तण्डुलं पचतीत्यत्र प्रतीयमाने फले नास्त्येवेति भावः। यद्वा फलस्यधातुवाच्यत्वाभावे द्वितीयाद्यर्थत्व-विवक्षायां धातुजन्यबोधविषयत्वाभावेन नातिव्याप्तिः।

तस्मिन् प्रयोगे। तण्डुलं पचतीतिप्रयोगे। फलस्य अक्रियात्वेऽपि उक्त-लक्षणाभावात्। पच्यते ओदनः स्वयमेवेति कर्मकर्तरि तत्फलस्य क्रियात्वमस्त्येवेति तत्र फूत्कारादिव्यापाराणामप्रतीतेरपि तादृशफलात्मकक्रियाश्रयत्वादुक्तस्थले ओदनादेः कर्तृत्वम्।

तदाह - कर्तृत्वञ्चोपपद्यते इति॥ क्रियात्वपरिष्कारस्य पद- कृत्यमाह – पाचयतीति॥ पाचक इति तु पाकक्रियां प्रति गुरुत्वपोषणाय। णिजन्तस्थले व्यापारद्वयम् विक्लित्यनुकूलो व्यापारः फूत्कारादिरेकः धात्वर्थः तदनुकूलो व्यापारः प्रेरणारूपो णिजर्थो द्वितीयः। उभयमपि लक्ष्यम्। तत्र णिच्प्रत्ययार्थः प्रयोजकव्यापारः विशेष्यः, धात्वर्थव्यापारो विशेषणम्। प्रत्ययार्थेत्यस्याभावे अन्याविशेषणत्वविशिष्टेत्येव स्यात्तथा च धात्वर्थव्यापाररूपे अन्यत्र प्रत्ययार्थ-व्यापारे विशेषणत्वेन धात्वर्थव्यापारे क्रियालक्षणस्याव्याप्तिरतः प्रत्ययार्थेति। तदुक्तौ तु प्रत्ययार्थे विशेषणत्वेऽपि तदन्यस्मिन् घटादावविशेषणत्वेन च लक्षणसमन्वयः इति युक्तम् पूर्वनञा उक्तसम्बन्धः। इतः पूर्वं यदुक्तं तन्न युक्तम्।

अयुक्तत्वे हेतुमाह – एवमपीति॥ पश्य मृगो धावतीत्यत्र मृगकर्तृको-त्कटधावनकर्मकमृगदर्शनमिति धात्वर्थविशेष्यकधात्वर्थप्रकारको बोधः, पश्य नृत्यतीत्यत्र एककर्तृकवर्तमानकालिकनर्तनकर्मकं दर्शनमितिबोधस्तादृश एव पचति भवतीत्यत्र पाककर्तृका भवतिक्रियेति बोधः। धात्वर्थविशेष्यको धात्वर्थ-प्रकारको बोधः।तत्र प्रकारीभूते धात्वर्थव्यापारेऽव्याप्त्यवारणात् प्रत्ययार्थान्यस्मिन् व्यापारे विशेषणत्वात्।

नन्वेवं घटं भावयतीत्यादिना आक्षिप्तदोषं निराकरोति – चेन्न। तद्धात्वर्थविशेषणत्वेति॥

विशेष्यविशेषणोभयदले तत्तद्धातुप्रवेशेन पश्य मृगो धावतीत्यादौ भिन्न-भिन्नधात्वर्थयोर्वर्तमानत्वेन समानधात्वर्थनिरूपितविशेषणत्वाभावेन नाव्याप्तिः। विषयताफलोपधानस्य विषयताश्रयस्य। तत्तद्धात्वर्थाविशेषणत्वेति विशेषणेऽपि दोषमाह -न चैवं घटं भावयतीति॥ भवनस्य भूधात्वर्थव्यापारस्य । णिजन्तधात्वर्थो व्यापारः प्रयोजकव्यापारः। तत्र विशेषणत्वेऽपि अनुकूलत्वसंबन्धेनेति शेषः। भ्वर्थो व्यापारो भवनात्मकः फलात्मको वा, तत्राविशेषणत्वात् स्वम्प्रति स्वस्याविशेषण-त्वात् ,धातुजन्यशाब्दबोधविषयत्वाच्च भ्वर्थे क्रियात्वम् भवनस्येति शेषः। अस्त्येव। तत्फलमाह - तदाश्रयत्वात् तादृशभवनाश्रयत्वात् कर्तृत्वापत्तिः घटादेः। परिहरति – इष्टापत्तेः। तादृशकर्तृत्वस्येष्टत्वात्। अत एव प्रयोज्यव्यापाराश्रयस्य कर्तृत्वैषणादेव, शत्रूनगमयत्स्वर्गमित्यत्र प्रयोज्यकर्तृणां शत्रूणां कर्तृत्वेन कर्मसंज्ञोपपत्तिः। तेन सूत्रेण कर्तुरेव कर्मसंज्ञाविधानात्। अत एव कर्तुरेव कर्मसंज्ञाविधानादेव। "ण्यन्ते कर्तुश्च कर्मण" इति भाष्ये उभयथापि कर्तृत्वेन कर्मत्वेन च व्यवहारः सङ्केतः कृतः। अत्र लादयो विधीयन्ते इति शेषः।

पूर्वमुक्तमपि स्मरति - नचैवमपि क्रियात्वेति॥ धात्वर्थगर्भतया धात्वर्थघटिततया। क्रियात्वं धात्वर्थत्वम्। तस्य धातुत्वस्य । क्रियावाचकत्वेति लक्षणे क्रियात्वघटिततया अन्योन्याश्रयः। निरस्यति – क्रियात्वघटकधातु-त्वस्येति॥ धातुशब्दस्य संज्ञाशब्दतया जातिपरत्वात्। जातिशब्दस्य जातेरेव परिचायकत्वेन अन्यानपेक्षत्वात्। सिद्धान्तिमतमुभयवाचकत्वमतम् अतिप्रवृत्त-मित्याह - फलत्वमपि इति॥ तद्धात्वर्थविशेषणत्वे सतीति॥ फलस्यापि धातुवाच्य-त्वेनाह – तद्धात्वर्थत्वमिति॥ अत एव तद्धात्वर्थेत्याद्युक्तत्वादेव। प्रयोज्यव्यापार-स्येति॥ तद्धातुः णिजन्तो धातुः, णिजन्तस्यापि धातुत्वात् "सनाद्यन्ता धातव"(पा. 3-1-32) इत्युक्तेः। तद्धात्वर्थः तादृशधात्वर्थप्रयोजकव्यापारे विशेषणीभूतः अणिजन्तधात्वर्थश्चेति। एवञ्च अणिजन्तः भवतीति, तदुपस्थितो यः प्रयोज्य-व्यापारस्तथा तस्याफलत्वेऽपि णिजन्तधातुमात्रव्यापारे फलत्वेन तज्जन्यत्वेन

तदाश्रयत्वात् प्रयोजकव्यापारजन्यफलात्मकप्रयोज्यव्यापाराश्रयत्वात् घटं भावयतीत्यादौ घटादेः कर्मत्वोपपत्तिः। फललक्षणे प्रतिपदफलमाह - पश्यमृगो धावतीति॥ धात्वर्थविशेषणत्वे सतीत्येतावन्मात्रोक्तौ पश्य मृगो धावतीत्यादौ धात्वर्थो दर्शनं तत्र धावनात्मकव्यापारस्य कर्मतया विशेषणत्वात् धावति धात्वर्थाद् धावने दृशि फलत्वापत्तिरतः प्रथमं तदित्याह - तदुक्तौ - यस्य धातोरर्थत्वं फले विवक्षितम् तादृशधात्वर्थविशेषणत्वमिष्टम् , प्रकृते च धावत्यर्थत्वेनाभिमते धावने धात्वर्थनिरूपितविशेषणत्वं नास्तीति न दोषः।

ननु धावनस्य कर्मत्वे किं दूषणमित्याह – दृशिफलत्वे॥ धावनस्योक्तरीत्या फलत्वापत्तौ तदाश्रयत्वान्मृगस्य कर्मत्वापत्तिः। तथा सति मृगपदाद्वितीयापत्तिः स्यात्। मृगस्य कर्तृतया कर्मसंज्ञाबाधमाशङ्कते - न च तस्य धात्वर्थभावनाश्रयस्येति॥ तस्य मृगस्य।धात्वर्थः उत्कटधावनम्। तदाश्रयो मृगः। तथा च कर्तृसंज्ञया कर्मसंज्ञाबाधान्न कर्मसंज्ञाद्वितीये, कर्मसंज्ञा तत्प्रयोज्यद्वितीया च न । दोषमुद्धरति - पक्त्वौदनो भुज्यते देवदत्तेन इत्यत्रेवेति॥

अत्र ओदननिष्ठे कर्मत्वशक्ती द्वे, गुणीभूतपच्यर्थक्रियानिरूपिता प्रधानीभूतभुज्यर्थनिरूपिता च। तत्र गुणीभूताया कर्मत्वशक्तेरनभिधानम् प्रधानीभूतक्रियानिरूपितायाः कर्मत्वशक्तेः तिङ्प्रत्ययेनाभिधानम्। एवमभिधानानभिधानयोः सत्त्वेन अनुक्तकर्मत्वाश्रयणेन द्वितीयायामुक्तकर्मत्वाश्रयणेन प्रथमायां प्राप्तायां प्रधानानुरोधेन प्रधानक्रियाकर्मत्वशक्तौ अभिहितायां गुणीभूतक्रियानिरूपिता अनुक्तापि कर्मत्वशक्तिरुक्तवत् भासत इति स्वीकारात् प्रथमैव। तद्वत् प्रधानानुरोधेन कार्यप्रवृत्तेरौचित्येन गुणीभूतधावने कर्तृत्वेऽपि प्रधानीभूतदृश्यर्थनिरूपितकर्मत्वशक्त्या द्वितीयाया दुर्वारत्वात्। तदाह – दुर्वारत्वादिति॥

ननु अन्वयाभिप्रायेण ओदनं पक्त्वा भुज्यते इत्यस्यपि साधुत्वं दृश्यत इत्यरुचेराह – किञ्च स्वकारकविशिष्टेति॥ स्वं धावनं तत्कारको मृगः, तद्विशिष्टा क्रिया मृगकर्तृकोत्कटधावनात्मिका क्रिया एव दृशिकर्म। धावनक्रिया स्वनिष्पत्त्यर्थं कर्तारमपेक्ष्यत इति। कर्तृसंज्ञाप्रवृत्तिः प्राक्कालिकीत्याह - तथा चेति॥ धावनकर्तृत्वानन्तरं दृशिकर्मत्वं मृगस्येति तादृशकर्मत्वसंपत्तेः।

बाधकन्यायमाह - येन नाप्राप्तिन्यायरीत्या निरवकाशत्वेनेत्यर्थः। पश्चात् कर्तृत्वानन्तरं प्रवृत्तं किं बाधेत। तदाह - कर्तृत्वबाधेनैव॥ एवेन समावेशाभावः सूचितः। एतादृशबाधस्यानौचित्यमाह - न बाध्यत्वं युज्यते, जातसंस्कारो न निवर्तेतेति नियमात्। वस्तुतस्तु प्रकरणानुरोधेन न बाध्यत्वम् , उक्तरीत्या कर्तृसंज्ञया बाध्यत्वं न युज्यते, तथा च द्वितीयापत्तिस्तदवस्थैवेति विशेषणफलं सिद्धमेव। अत एव घटं भावयतीति॥ "गतिबुद्धी" (पा.1.4.52) ति सूत्रमिदं नियमार्थमिति नव्याः। घटं भावयति इत्यादौ धात्वर्थव्यापाराश्रयत्वात् घटस्य कर्तृसंज्ञायां प्रधानीभूतणिजर्थ-व्यापारजन्यप्रयोज्यव्यापाररूपफलाश्रयत्वेन कर्मसंज्ञायां प्रधानकार्यं सर्वतो बलवदितिनियमेन प्रधानानुरोधेन कर्त्तुरित्यनेनैव कर्मसंज्ञासिद्धौ "गतिबुद्धी (पा.1.4.52)"ति सूत्रस्य नियमार्थता। तेन नियमार्थत्वेन पाचयतीत्यादौ शिष्यादेः न कर्मत्वमपि तु अनुक्ते कर्तरि तृतीयैव। नियमाकारश्च णिजन्तेनाप्यमानस्य अण्यन्तकर्तुः कर्मसंज्ञा चेत् गत्याद्यर्थानामेव कर्तुरिति। पचादेर्गत्याद्यर्थत्वाभावान्न दोषः।

**75.** एवं च "पच्यते ओदनः स्वयमेव, घटो[1] भवति" इत्यादौ व्यापारे आश्रयत्वा-दिकं[2] प्रकल्प्य फलव्यापारोभयार्थत्वकल्पनं तत्र तत्रोक्तमनादेयम्। भावयतीत्यादौ भवना[3]नुकूलप्रेरणाप्रतीतिवद्भवनाश्रयत्वानुकूलव्यापारवानिति[4] प्रतीतेरनुभवविरहा-च्च[5] कर्तृव्यापारानुकूलव्यापारस्यैव णिजर्थत्वात्।

एवं च[6] धात्वर्थः सर्वोऽपि प्रयोगविवक्षा[7]भेदेन भावना भवतीति का पुनर्धात्व-र्थातिरेकिणी भावनेति मीमांसकैरेतन्मतं[8] शङ्कितं भावार्थाधिकरणे **(मी.2-1-1)**।

---

[1] के4-पटो

[2] जो2,द4,त5-व्यापारमाश्रयत्वादिकं

[3] भ1,त5-भावना

[4] द4-भावयतीत्यादौ भावनाप्रतीतिवत् भवनानुकूलव्यापारवानिति

[5] 1900,द6-भवविरोधाच्च

[6] भ2- "च " नास्ति

[7] त5-विवक्षणा

[8] त्रि-मीमांसकैरेव

## 13.1 केवलव्यापारवाचित्वमपि अकर्मकत्वम्

तथा चैतन्मते केवलव्यापारवाचकत्वमकर्मकत्वं फलव्यापारोभयवाचकत्वं सकर्मकत्वं द्रष्टव्यम्। अत एव जीवत्यादेरकर्मकत्वं[१] सूपपन्नम्। "जीव प्राणधारणे" "नृती गात्रविक्षेपे" "स्रंसु ध्वंसु अधःपतने"इत्याद्यनुशासनेनैतादृशानां प्राण[२]विशिष्टधारकसंयोगगात्रविशिष्टविक्षेपादि क्रियामात्र[३]वाचकत्वेनोभयवाचकत्वाभावाद् विशिष्टस्यैव क्रियात्वात्। अत एवात्र[४] न प्राणगात्रयोः[५] कर्मत्वम्[६]। दधात्यादेस्तु[७] धारणक्रियासंयोगाद्युभय[८]वाचकत्वात्[९] "पात्रं[१०] धत्ते, प्राणान् धत्ते" इत्यादि सर्वप्रयोगाः सकर्मकत्वं चोपपन्नमेव। "पत[११] गतौ" "पत्लृ गता[१२]"वित्येतयोश्च "गम्लृ गता"[१३]वितिवत् संयोगक्रियोभयशक्त[१४]त्वात् तद्वदेव सकर्मकत्वम्। अत एव "ऊर्ध्वं पतति, अधः पतति, इतस्ततः पतती[१५]"त्यादयो गच्छतिवत् प्रयोगाः, "द्वितीयाश्रितातीत[१६]"(पा.**2-1-24**) इति सूत्रे "नरकपतित[१७]" इति वृत्तिकारोदाहरणं चोपपद्यते।

---

[१] भार1,त3-रकर्मत्वं

[२] द1,त1,जो2,1900,के3,के4,के5,म-प्राणादि

[३] अ3-क्रियाविशिष्टमात्र

[४] अ3,भ1-एव चात्र

[५] द4-प्राणगात्रादेः

[६] भ2-एवं च न प्राणान् जीवति गात्रं नृत्यति इति प्रयोगः नापि प्राणकर्मकं धारणं गात्रकर्मको विक्षेप इति धात्वर्थप्रत्ययः इति टिप्पणी

[७] 1900-दधत्यादेस्तु

[८] त1,ब1,1900,त्रि-संयोगोभय, द5- क्रियात्यये उभय

[९] त2-वाचकत्ववत्

[१०] त5-गात्रं

[११] त1-पल,भ3-एत

[१२] त्रि-पत्लृ गतौ पद गतौ

[१३] त2- "वित्येतयोश्च गम्लृ गता" नास्ति

[१४] ज1-शक्ति

[१५] त1-पचती

[१६] त3,भ1,त5,ब2- "पतित " अधिकम्

[१७] त2-नरकेपतित,भ1- "पतित" नास्ति

"अस्तीत्युत्पन्नस्या त्मधारणमुच्यत" (नि.अ1पा1) इति निरुक्तकारोक्त्या अस्तेरप्यात्मविशिष्ट[१]धारणवाचकत्वे च[२] जीवत्यादिवदेवाकर्मकत्वम्[३]। आत्मविशिष्टधारणादिकमेव व्यापारः। तदेवादाय[४] "भूवादय"(पा.1-3-1) इत्यादि[५] लक्षणसंगतिः[६]। अस्तु वा तदतिरिक्त[७]तत्फल समानाधिकरणव्यापारवाचकत्वम[८] -स्त्यादेः। न चैवं तत्प्रतीत्यापत्तिः, बाधानवतारदशायामिष्टत्वात्। तदवतारे तेनैव प्रतिबन्धाद् न[९] तथेति न काप्यनुपपत्तिरिति साम्प्रदायिकाः[१०]। स्वतन्त्रास्त्वस्तु[११] तत्र वाज(बाध)[१२]निश्चयः, तथापि प्रत्ययो [१३]नानुपपन्नः। अत्यन्तासत्यपि शब्दाद् बोधे बाधकाभावात्।

---

[१] द1- "विशिष्ट " नास्ति

[२] ब1-धारणत्वे च, त1,त5-धारणवाचकत्वेन

[३]द1,द4-वदेवाकर्मत्वम् द्रष्टव्यम्, अ3,भार1,त3,त2,1900,1915,भ2,भ3-वदेवाकर्मकत्वं द्रष्टव्यम्। एतदनन्तरं अ3, द1, द4, त3, त2, भार1, भ1, भ2, भ3, त्रि, द6, द7-"आत्मानं धत्ते इति तु प्राणान्धत्ते इतिवत् " इति अधिकम्। ,के4- जीवत्यादिवदकर्मकत्वम्

[४] जो2-तदेव चादाय

[५] वा2-इतीत्यादि, जो2-इति सूत्रे, भार1,द1,त1,त3,1900,1915-इति

[६]द6,त्रि,भ2- "आत्मविशिष्टधारणादिकमेव व्यापारः। तदेवादाय[६] "भूवादय"(पा.1-3-1) इत्यादि[६] लक्षणसंगतिः। "नास्ति

[७] भ2-तदतिरिक्त-आत्मधारणातिरिक्तेत्यर्थः इति टिप्पणी

[८] त5-वाचित्वम

[९] ज1-तु

[१०] अ3,द1,द4,त3,त2,भ1,भ3,द6,द7,- "आत्मविशिष्ट " इत्यारभ्य "साम्प्रदायिकाः " इत्यन्तं नास्ति, भार1-"आत्मविशिष्ट " इत्यारभ्य "लक्षणसङ्गतिः" इत्यस्य स्थाने "अस्तु स्वतन्त्रास्तु" इति वर्तते , जै- "गवादिपदानां" इत्यारभ्य "साम्प्रदायिकाः" इत्यन्तं महान् ग्रन्थपातः।

द1मातृकायां तत्स्वामिना इत्थं टिप्पणी विहिता - "पुस्तकान्तरे निरुक्तकारोक्त्या इत्यस्य अग्रे लेखभेदः - अस्तेरप्यात्मविशिष्टधारणादिकमेव व्यापारस्तदेवादाय भूवादय इति लक्षणसङ्गतिः। अस्तु वा तदतिरिक्ततत्फलसमानाधिकरणव्यापारवाचकत्वमस्त्यादेः। न चैवमस्त्यादौ तत्प्रतीत्यापत्तिः, बाधानवतारदशायामिष्टत्वात् तदवतारे तेनैव प्रतिबन्धात् न काप्यनुपपत्तिरिति साम्प्रदायिकाः।( अयं पाठः 1900 मुद्रितपुस्तके उपलभ्यते।) , अ4-" वागाद्यनेकार्थ " ....इत्यारभ्य " सम्प्रादायिकाः " पर्यन्तं ग्रन्थः नष्टः।

[११] भार1- "स्वतन्त्रास्त्वस्तु" नास्ति

[१२] ( ) एतत्कोष्टकान्तर्गतः पाठ एव युक्तः अन्यासु सर्वासु उपलभ्यते च

[१३] अ3- "नानुपपन्न " इत्यारभ्य "योग्यताज्ञानं" इत्यन्तं त्रयोदशवाक्यात्मकः ग्रन्थः नास्ति

तथा च[१] भगवत्पतञ्जलिः[२]- "शब्दज्ञानानुपाती[3] वस्तुशून्यो विकल्पः"(यो.सू.1-9) इति, तथोक्तं[४] विवरणेऽध्यासलक्षणशेषे- "नाप्यध्यस्त[५]मसदेव, तथात्वे प्रतीभासा[६]-योगादि"ति टीकाप्रतीकमादाय[७] "प्रत्यक्षप्रतीभासो[८] न स्यादित्यर्थः। प्रतिभासमात्रनिराकरणे शून्यं[९] न भासत इति[१०] वाक्यस्याबोधकत्व[११]प्रसङ्गात्" इति।[१२]

तथा खण्डनकारोऽप्याह- "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि"।इति[१३]। अत एव शशशृङ्गादि[१४]शब्दाद् बाधितो[१५]ऽपि संसर्गो भासत एवेत्यर्थ[१६] प्रतीति-जनकत्व[१७]रूपार्थवत्त्वात् प्रातिपदिकत्वसिद्धेः समास[१८]ग्रहणं नियमार्थमित्यत्र नानुपपत्तिः[१९]। इत्थं च क्रियावाचकत्वं तद्बोधकत्वमात्रम्। वक्ष्यते[20] च बोधकत्वमेव शक्तिरपि[२०]।

---

[१] अ4- "तथा च" नास्ति

[२] अ1,त1,ब1,1900,1915-भगवान् पतञ्जलिः

[३] भ2-शाब्दबोधविषय इत्यर्थः इति टिप्पणी

[४] त1,1900,1915-तदुक्तं

[५] भ1-नाध्यस्त

[६] अ1,वा2,भार1,द1,त1,त3,1900,भ2-प्रतिभासा

[७] के5,म-टीकामादाय,के3,त्रि-टीकामुपादाय

[८] अ1,वा2,भार1,द1,त2,त1,त3,1900,1915,भ1,भ2-प्रतिभासो

[९] त3-निराकरणशून्यं

[१०] त5-हीति

[११] जो2-बोधप्रसङ्गात्,1915-वाक्यस्यावबोधकत्व

[१२] अ4- "टीकाप्रतीकमादाय" इत्यारभ्य "प्रसङ्गात् इति" पर्यन्तं ग्रन्थः नास्ति

[१३] वा2,1900,1915- "इति " नास्ति

[१४] के5-शशविषाणादि

[१५] त्रि-शब्दाभिहितो

[१६] 1900,त2,ब2-एवेत्यर्थः।

[१७] अ4-......ज्ञानकत्व

[१८] त्रि-प्रातिपदिकत्वमित्यादिसिद्धसमास

[१९] जै,द4-नातिप्रसङ्गः,के3,के5,त्रि,अ4-नानुपपत्तिप्रसङ्गः

[२०] के3,त्रि-शक्तिरित्यपि. अ1,त2,अ4-शक्तिरिति

एवञ्चेति॥ उक्तरीत्या व्यापारमात्रस्य धातुवाच्यत्वे सिद्धे पच्यते ओदनः स्वयमेवेत्यत्र विक्लित्तिरेव फलम् , तदनुकूलो व्यापार आश्रयत्वम्। इदमेव व्यापारे आश्रयत्वकल्पनम्। घटो भवतीति॥ अत्रापि सत्ताश्रयत्वे स्वीक्रियमाणे तथैव स्थितिः। एवं सति धातोः फलव्यापारोभयार्थकत्वं सिध्यति। तदेतद्द्वयं खण्डयति – एवञ्चेत्यादिना॥ तदाह - उभयार्थत्वकल्पनं फलव्यापारोभयार्थत्वकल्पनं धातोः। तत्रतत्रेति॥ वीप्सया सर्वथा अनादेयत्वमाह। व्यापारमात्रार्थकत्वेऽपि सर्वत्र निर्वाहात्। उभयार्थकत्वोपपादनायाह – भावयतीत्यादाविति॥ यत्र णिच् तत्रोभयार्थकत्वमनुभूयतेऽतस्तथोभयार्थकत्वमस्तु। भवनं मूलधात्वर्थः, तदनुकूला भावना प्रेरणात्मिका प्रयोजकव्यापारो णिजर्थः, इत्यनुभवबलात् तत्र उभयार्थकत्व-प्रतीतिः। तद्वत् भवतीत्यादौ उभयार्थत्वे न मानम्। ननु णिजन्तस्थले भवनस्य तदाश्रयत्वरूपस्य प्रतीत्या भवत्यादेरपि उभयार्थकत्वमस्तीत्यत आह – भवना-श्रयत्वानुकूलव्यापारवानिति प्रतीतेरिति॥ यदि णिजन्तस्थले भवनाश्रयत्वानुकूलो व्यापारः प्रतीयेत तदा भवनाश्रयत्वरूपो व्यापारः प्रकृत्यर्थः स्यान्न च तथा प्रतीयतेऽतो न तादृशत्वम्। एतदेवाह - अनुभवविरोधात् इति॥ तत्रत्यबोधमाह – कर्तृव्यापारानुकूलव्यापारस्यैवेति॥ एवं सति न भवत्यादेराश्रयत्वार्थकत्वमिति भावः।

निगमयति - एवञ्च धात्वर्थः सर्वोऽपीति॥ प्रयोगविवक्षाभेदेन पचादिप्रयोगभेदेन सर्वोऽपि धात्वर्थो भावना भावात्मको भवति। नतु फलात्मकः। अतः धात्वर्थातिरेकिणी धात्वर्थभिन्ना काचिदन्या भावना न। एतन्मतं भावार्थाधिकरणे शङ्कितं मीमांसकैः। तथा हि - तत्र जैमिनिसूत्रम् – "भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैषोऽर्थः विधीयत"(मी.2.1.1.1) इति। कर्मशब्दाः कर्मप्रतिपादकाः यजेतेत्यादिषु यजादयो धातवः, ते भावार्थाः। यागादिविशेषार्थको यजधातुर्हि दानहोमादीतरभावनातः प्रत्ययार्थं व्यावर्तयन् भावार्थो भवति। तेभ्यश्च क्रिया अपूर्वोत्पत्तिरूपा प्रतीयेत। यत एष यागाद्यर्थो विधीयत इति सूत्रार्थः। अत एवैतदधिकरणं भावार्थाधिकरणमुच्यते। धात्वर्थो भाव इति च तत्र प्रतिपादितम्।

ननु धातोः फलावाचकत्वे एषाम्मते सकर्मकत्वादि कथमुपपाद्यत इत्यत आह - तथाचैतन्मत इति॥ केवलव्यापारवाचकत्वमिति॥ एवञ्च अकर्मकाणां

केवलव्यापारोऽर्थः। नतु फलम्। सकर्मकत्वमाह – फलव्यापारोभयेति॥ तथा च सकर्मकधातूनां फलव्यापारोभयार्थकत्वं सिध्यति। तत्र अकर्मकत्वोदाहरणमाह - अत एव जीवत्यादेरिति॥ व्यापारमात्रवाचकत्वादेव। तदेवोपपादयति - जीवप्राणधारणे नृती गात्रविक्षेपे इत्यादि॥ यद्यपि जीव इत्यस्य प्राणरूपस्य नृती इत्यस्य गात्रस्य स्यन्दादीनामधोदेशादेश्च कर्मतया प्रतीतिरस्ति तथापि प्राणादीनां धात्वर्थेनोपसंग्रहाद् बहिर्भूतकर्मणश्चाभावान्न तैः कर्मभिः सकर्मकत्वम्।

प्राणादिविशिष्टो यो धारकः संयोगः, वैशिष्ट्यं समवायादिः, गात्रं शरीरम् तद्विशिष्टो यो विक्षेपादिः, अत्रापि वैशिष्ट्यं समवाय एव, तादृशसंयोगविक्षेपादिरूपा विशिष्टा क्रिया। तन्मात्रवाचकत्वेनेति॥ मात्रपदेन फलव्यावृत्तिः। उभयेति॥ फलव्यापारोभयेत्यर्थः। ननु संयोगादीनां फलतया तज्जनकक्रियायाश्च व्यापारत्वेनात्र प्रतीत्या उभयवाचकत्वमक्षतमित्यत आह – विशिष्टस्यैवेति॥ पचतीत्यादौ विक्लित्यादेरिव प्रकृते विक्लित्तितयाऽग्रहणात्। विक्लित्तितया अग्रहणे फलमाह – अतएवात्रेति॥ फलत्वेन प्रतीयमानफलाश्रयस्याभावादेव। ननु दधातेरपि अकर्मकत्वापत्तिः, तत्रापि यत्किञ्चित्कर्मकधारणस्यैव धात्वर्थत्वात् इत्यत आह - दधत्यादेस्तु इति॥ तत्र धारणक्रियायाः सामान्यतो धारणम् संयोगश्चेत्युभय-वाचकत्वस्य सत्त्वात्।फलितमाह- पात्रं धत्ते इति॥ अत्र पात्रादेः धात्वर्थतावच्छेदक-कुक्षावप्रदेशात्।

पत गताविति। यथा गम् धातोः संयोगः तदनुकूलो व्यापारश्चेत्युभय-वाचकत्वात्सकर्मकत्वम् तथा पत गतौ इत्यादेरपि संयोगव्यापारोभयवाचकत्वात् सकर्मकत्वम्। अधः पततीत्यादिस्थले अधोदेशादीनामधिकरणशक्तिप्रधानत्वेऽपि कर्मशक्तिप्राधान्यमिति ग्रन्थकर्त्राशयः। पत्यादेः सकर्मकत्वनिर्धारणात् पत्यादीना-मुभयवाचकत्वेन सकर्मकत्वे प्रमाणमाह – द्वितीयाश्रितेतिसूत्रे नरकपतित इति॥ उभयवाचकत्वाभावेवृत्तिकारोक्तोदाहरणानुपपत्तिः। अस्त्यादेरकर्मकत्वमुपपादयति - अस्तेरपि इति॥ स्पष्टम्। ननु अस्त्यादेर्धातुत्वानुपपत्तिः क्रियावाचकत्वाभावादत आह – आत्मविशिष्टेति॥ उक्तमपि फलं व्यापारत्वेनावधारितम्। तदेवादायेति॥ आत्मविशिष्टधारणात्मकव्यापारमादायेत्यर्थः। तादृशक्रियावाचकत्वेन धातुसंज्ञा। सङ्गतिः अत्र प्रवृत्तिः।

आत्मविशिष्टधारणात्मकव्यापारमात्रवाचकत्वेनास्तेरकर्मकत्वं पूर्वं ध्वनितम्। इदानीमुभयवाचकत्वपक्षेऽपि अकर्मकत्वं साधयति - अस्तु वेति॥ तदतिरिक्तः विशिष्टव्यापारातिरिक्तः यः फलसमानाधिकरणो व्यापारः, तद्वाचकत्वमिति समन्वयः। पूर्वमात्मविशिष्टधारणात्मकव्यापाररूपोऽर्थः प्रतीतः। इदानीं फलस्य व्यापारस्य च विविक्तवाच्यत्वमाश्रितमिति विवेकः।

ननु फलस्य व्यापारस्य च अस्त्यादौ स्वीकारे तदुभयप्रतीतिः स्यादित्याह - न चैवं तस्य तद्वयस्य फलस्य व्यापारस्य चेत्यर्थः। इष्टापत्त्या परिहरति – बाधेत्यादि॥ बाधः अन्यत्राशेषभावः, फलांशेन सामानाधिकरण्यम्, तस्यानवतारः अप्रतीतिः, तद्दशायाम् रोहितो लोहितादासीदित्यादि समभिव्याहारदशायामिति यावत्। तत्र उत्पत्तेः फलस्य व्यापारस्य च प्रतीतेः। तदनवतारे तादृशसमभिव्याहाराभावे। प्रतिबन्धात् तादृशबुद्ध्यनुदयात् , न तथा उभयप्रतीतिः। उभयवाचकत्वेऽपि न काप्यनुपपत्तिरिति साम्प्रदायिकाः।

स्वतन्त्रास्तु अस्तु इति च्छेदः। तत्र अस्त्यादौ सामानाधिकरण्येन प्रतीतिरेव बाधः, तथापि बाधनिश्चयेऽपि। प्रत्ययः फलादिप्रतीतिः, नानुपपन्ना न युक्त्यभाववती। युक्तिमेवाह - अत्यन्तासत्यपि शब्दादिति॥

बोधबाधकाभावात् सामग्रीसत्त्वेऽवश्यं कार्यमिति नियमात्। ननु पदार्थसिद्धिरपि सामग्रीति चेन्न । बौद्धार्थस्वीकारात्। अस्याचार्यसम्मतिमाह -तथा च भगवान् पतञ्जलिः शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति॥

योगशास्त्रे पुंप्रयत्नेनावश्यनिरोद्धव्यप्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपपञ्चवृत्तीनां मध्ये विकल्पलक्षणमिदम्। शब्दश्च ज्ञानञ्च शब्दज्ञाने, ते अनुपातिनी यस्य स शब्दज्ञानानुपाती। श्रोतुः श्रूयमाणशब्दहेतुकः प्रयोक्तुः पदार्थोपस्थितिहेतुको बाधनिश्चयेऽपि कलहादौ शशशृङ्गादिप्रयोगे, उत्प्रेक्षादौ च सर्वानुभवसिद्धश्च वस्तुशून्यो बाधितविषयः प्रत्ययो विकल्पाख्या वृत्तिः, अस्यां वृत्तौ बौद्धा एव पदार्था भासन्ते। विवरणमपि प्रमाणत्वेनोपन्यस्यति - विवरणेऽध्यासलक्षण इति॥ इदं रजतमित्यादौ रजतमध्यस्तं प्रतीयते। तत्राध्यस्तरजतादेः स्वरूपविचारः। तदध्यस्तम् रजतादि असद्वा सद्वेति चिन्त्यमानमस्ति। असत्त्वपक्षे प्रतिभासस्य

भानस्य अयोगः अनुपपत्तिः। तत्र विवरणकारो व्याख्याति - अयोगादित्यस्य रजतमित्यादि प्रत्यक्षप्रतिभासः प्रत्यक्षभानं न स्यादित्यर्थः। उक्तमर्थं साधयति - प्रतिभासमात्र निराकरण इति। कस्यापि अप्रतिभासे शून्यस्यापि प्रतिभासाभावे प्राप्ते, शून्यं न भासते इत्यस्यापत्तौ तादृशस्य वाक्यस्यापि बोधजनकत्वापत्तेः। कस्याप्यभाने शून्यप्रतीतेरनिवार्यतया शून्यं भासते इत्येवेष्टं तत्र। असत्स्थले सर्वस्याप्यभाने तथापत्तेः सुवचत्वात्।

अनेन ग्रन्थसन्दर्भेण अध्यस्तस्थले इदं रजतमित्यादौ बाध्यस्य रजतादेरसत्त्वेऽपि इदंरजतमिति प्रतिभासो भवत्येव सत्यपि बाधे इत्येव प्रतिपाद्यम्।

खण्डनकारमतमाह - तथाखण्डनकारोऽप्याह इति॥ अत्यन्तासत्यपि ह्यर्थे अत्यन्तासति बाह्येऽसति। विषयत्वं सप्तम्यर्थः। शब्दः, ज्ञानं असतो बाधितस्यार्थस्येति शेषः, अथवा उक्तात्यन्तासदर्थविषयकम् , हि निश्चयेन करोति जनयति। बाधेऽपि ज्ञानं भवतीत्यर्थः। अत एव बाधितस्यापि ज्ञानविषयत्वादेव बौद्धार्थविषयकत्वादेव वा, बाधितेऽपि बहिरसन्नपि प्रमाणेन निवारितोऽपि वा भासते बुध्या गृह्यते एव।

इतीति॥ तस्माद् अर्थप्रतीतिजनकत्वरूपार्थवत्त्वात् प्रातिपदिकत्वसिद्धेः, "अर्थवदधातु"(पा. 1-2-45)रिति पूर्वसूत्रेणैव शशशृङ्गादि शब्दानामपि प्रातिपदिकत्वसिद्धेः "कृत्तद्धितसमासश्च"(पा. 1-2-46)त्यत्र समासग्रहणं नियमार्थमिति शिष्टसम्प्रदायस्य अनुपपत्तिर्न, किन्तु उपपत्तिरेव। अन्यथा शशशृङ्गादिशब्दानामनर्थकत्वेन पूर्वसूत्रेण प्रातिपदिकत्वानापत्तौ, तेषां प्रातिपदिकत्वाय समासग्रहणस्य विधायकत्वापत्तौ नियमार्थत्वानुपपत्तिरेव स्यात्।

इत्थं च असतोऽपि बोधस्वीकारे क्रियावाचकत्वं तद्बोधकत्वमात्रम्। तस्याः क्रियायाः बोधकत्वम् बोधजनकत्वमात्रम्। नतु क्रियाविषयकप्रमाजनकत्वम्। प्रमाप्रवेशे उक्तरीत्या बाधसत्त्वे क्रियावाचकत्वं न स्यात् क्रियाप्रमायास्तत्राभावात्।

ननु प्रमाया अप्रवेशे धातौ शक्त्यभावापत्तिरत आह - वक्ष्यते चेति॥ बोधजनकत्वरूपशक्तौ बोधस्य भ्रमप्रमासाधारण्येन बोधत्वेनैव प्रवेशात्।

13.2 शाब्दबोधे योग्यताज्ञानं न कारणम् न वा अयोग्यतानिश्चयः प्रतिबन्धकः

76.[१]यत्तु "वह्निना सिञ्चेत्" इत्यत्र बोधादर्शनादयोग्यतानिश्चयः शाब्दबोधे प्रतिबन्धकः। स च प्रकृतेऽस्त्येवेति न बोध इति नैयायिकमीमांसकादिभिः परिशीलितः पन्थाः।[२] एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभावादिना{ना}[३]योग्यताज्ञानं न शाब्दबोधे[४] स्वातन्त्र्येण कारणम्। न वा स्वातन्त्र्येण[५] शाब्दबोध एवैतादृश[६]योग्यताविरहरूपायोग्यत्व[७]निश्चयः प्रतिबन्धकः, किंत्वनुमित्यादिसाधारण्येनैव[८] क्लृप्त[९]प्रतिबन्धकीभूतबाध[१०]ज्ञानादेव न[११] वह्निनेत्यादौ बोधः।

न चैवमपि[१२] शाब्दप्रमायां गुणत्वानुरोधेन योग्यताप्रमाकारणं[१३] कल्प्यम्। अतो "यद्विशेषयो"रिति न्यायेन शाब्दबोधसामान्य[१४] एव योग्यताज्ञानं कारणमिति वाच्यम्, संशयत्वादिवन्नीलघटत्वादि[१५]वच्चार्थसमाज[१]सिद्धतया[२] प्रमा[३]त्वस्य कार्यतानवच्छेदकत्वात्। एवं च प्रकृतेऽपि बाधज्ञान[४]सत्त्वान्न बोधः[५]।

---

[१] अ1-यस्तु, के3,अ4- "यत्तु अत्र बाधनिश्चये सति बोधो न वह्निना सिञ्चेत्यादौ तथाभ्युपगमात् " इत्यधिकम्, त्रि-"अत्र बाधनिश्चये सति न बोधः वह्निना सिञ्चेदित्यादौ तथाभ्युपगमात्। यत्तु" इत्यधिकम्

[२] त3 - "स च न साधुः। " अधिकम्,के3,अ4-"स न साधुः। " अधिकम्, त्रि-"स न साधुः। तथा हि" अधिकम्

[३] अ1- " ना " नास्ति , द1-प्रतियोगित्वादिनाना, त3,द4- प्रतियोगित्वादिना

[४] भार1,1900-शाब्दबोधसामान्ये

[५] के3- "कारणम् न वा स्वातन्त्र्येण" नास्ति

[६] म- एव तादृश

[७] द4-रूपोऽयोग्यत्व

[८] जो2-साधारण्येनेव

[९] जै-कृत

[१०] भ1-बाधकी

[११] अ1- "न " नास्ति

[१२] जो2,1900-"अपि" नास्ति,भ1- "च" नास्ति

[१३] त1,त्रि-योग्यताप्रमाणकारणं, ब1-योग्यताप्रमाकारणत्वं, जै-योग्यप्रमाकरणं,के3,त5-योग्यताप्रमाकरणं

[१४] जो2-शाब्दबोधसमय

[१५] त2-"त्वादि" नास्ति

यत्तु "घटोऽघट[६]" इत्यत्रापि बोधापत्त्या योग्यताज्ञानं कारणम्, तत्र[७] बाधस्य प्रतिबन्धकत्वासम्भवात्। घटत्वधर्मितावच्छेदकक[८]घटभेदज्ञानस्य प्रतिबध्य[९]स्यानाहार्यस्याप्रसिद्धेरिति[१०], तत्तुच्छम्[११]। तादृशोपनीत भान[१२]स्यानाहार्यस्य[१३] तवापि दुर्वारत्वात् [१४]तादृशज्ञाने इच्छा[१५]विशेषस्यैव हेतुत्वात्।[१६]

किं चैवं योग्यतायाः सर्वत्रैक्यासंभवाद्विशिष्य हेतुहेतुमद्भावावश्यकत्वे प्रकृते तादृशशाब्दबोधाप्रसिध्या हेतुत्वकल्पनाया असम्भवात्। अन्यत्र कल्पनायां मानाभावाच्चेति।

---

[१] अ3- " वत् " नास्ति , द4-समाधि

[२] जै- "नीलघटत्वादिवच्चार्थसमाजसिद्धतया " नास्ति,के3,के5,म,अ4-समाजसम्पन्नतया

[३] भ1-प्रमाण

[४] भ3-बाधज्ञाने

[५] द1-सत्त्वान्नाबोधः

[६] 1900-घटो घट, के5,1915,अ4-घटो न घट

[७] जै-तत्र तत्र,त2-तन्न

[८] जो2,1900,त2,भ1,1915- "क" नास्ति, त2 मध्ये "घट" नास्ति

[९] वा2-ज्ञानस्याप्रतिबध्य, द4-ज्ञानस्याप्रतिविध्यर्थनाहार्य--

[१०]जै-घटत्वधर्मितावच्छेदकतादृशज्ञानाहार्याप्रसिद्धेरिति, त्रि- घटत्वधर्मितावच्छेदककघटभेदज्ञानस्य प्रतिबध्यतयास्य तादृशानाहार्यज्ञानस्याप्रसिद्धेरिति,
त3- घटत्वधर्मितावच्छेदककघटभेदज्ञानस्य प्रतिबध्यतयास्य तादृशानाहार्यस्याप्रसिद्धेरिति,
के3,अ4-घटत्वधर्मितावच्छेदकघटभेदज्ञानस्य प्रतिबन्धकतयास्य तादृशानाहार्यज्ञानस्याप्रसिद्धेरिति,के5,म-घटत्वधर्मितावच्छेदकघटभेदज्ञानस्य प्रतिबध्यस्यानाहार्यज्ञानप्रसिद्धेरिति

[११] द4-"तत्तुच्छम्" नास्ति

[१२] जो2- "भान " नास्ति

[१३] के3,के5,अ4,त्रि,म-"अनाहार्यस्य" नास्ति

[१४] त्रि-अतादृश

[१५] भ1-ज्ञानेच्छा

[१६] जो2-तादृशज्ञानेच्छाविशेषस्यैव हेतुत्वात्

किं चात्यन्तासतेन्द्रिय[1]सन्निकर्षाभावेन प्रत्यक्षासंभवाद्[2] व्याप्तिज्ञानासंभवे[3] नानुमित्याद्यभावात् तत्र शक्तिग्रहस्यैवासम्भवान्न[4] बोध इत्यपरे वदन्ति। तच्चिन्त्यम्। बाधनिश्चयादेः सत्त्वेऽपि[5]

"अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः[6] संख्यया
प्रज्ञाचक्षुरवेक्ष्यमाण[7]तिमिरप्रख्या[8] किलाकीर्तयः।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरान् -
मूकानां प्रकरेण[9] कूर्मरमणीदुग्धोदधे[10] रोधसि॥"[21]

इत्यादेः[11],

"एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।
मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः[12]॥"[22]

इत्यादितश्च[13] बोधदर्शनेनास्याप्रतिबन्धकत्वात्।

न चात्र न[14] शाब्दबोधः, किं तु पदार्थोपस्थितिमात्रमिति[15] शङ्क्यम्, अन्यत्रापि तथात्वापत्तेः शब्द[16]प्रामाण्यो[17]च्छेदप्रसङ्गात्। अन्यथा चमत्कारानापत्तेश्च।

---

[1] अ1-चात्यन्तासति इन्द्रिय

[2] के3,अ4-प्रत्यक्षज्ञानासम्भवात्

[3] जो2-ज्ञानासंभवो, अ4-"संभवेन"नास्ति

[4] अ1-स्यैवाभावान्न

[5] अ3-बाधनिश्चयसत्त्वेपि, त2-"अपि" नास्ति

[6] जै-लक्ष्यीकृताः

[7] त1,जै-वेक्षमाण

[8] 1900 –बधिरश्रव्या, अ1,के3,अ4-बधिरश्राव्याः

[9] अ1,के3,द2-प्रवरेण द4-प्रकारेण

[10] जै-दुग्धोदधेः

[11] अ1- " इत्यादेः " नास्ति , जै-इत्यादिः

[12] के3-"मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्धरः" नास्ति

[13] भ1-"च" नास्ति

[14] जै- "न" नास्ति

[15] जै- "मिति" नास्ति

[16] त2,भ2-शाब्द

[17] भ1-प्रमाणो

न च प्रवृत्तिं प्रति[१] विशिष्ट[२]ज्ञानस्य हेतुत्वानुरोधा[३]च्छाब्दविशिष्ट[४]ज्ञानसिद्धिः। दुःखद्वेषेच्छासुखादावपि तद्रीत्या[५] तद्धेतुत्वेन मिथ्याभिशापगालि[६] दानरूपकादि-काव्यजसुखाद्यनुरोधेन[७] सत्यपि बाधे[८] तत्सिद्धेर्दुर्वारत्वात्[९]।

न चैवं[१०] "वह्निना सिञ्चेत्" इत्यत्र बोधे प्रवृत्तिरपि स्यादिति शङ्क्यम्, प्राक्तनबाधेना[११]प्रामाण्यशङ्काया एव जायमानज्ञाने जननात् तच्छून्यज्ञानस्य प्रवृत्तावुप[१२]योगिनोऽसत्त्वेनासंभवात्।

एवं शक्तिग्रहोऽपि न[१३] शाब्दबोधविषयीभूतपदार्थमात्रेऽपेक्षितः, किं तु क्वचिच्छक्यतावच्छेदकावच्छिन्ने। स च प्रकृते घटोऽस्तीत्यादौ[१४] वृत्त एव, शशशृङ्गादिपदे[१५] तु[१६] पदप्रकारकबोध एव । तत्र चेदं पदं[१७] क्वचिच्छक्तं साधुपदत्वादित्याकारो[१८] दशरथादिपदेष्विव[१९] तद्ग्रहो[२०] हेतुः। स च भवतीति व्युत्पादयिष्याम[१] इति न द्वितीयो[२]ऽपीत्याहुः ॥ **12** ॥

---

[१] के3-"प्रति" नास्ति

[२] त1-प्रवृत्तिं प्रविष्ट

[३] भ2-हेतुत्वानुरोधेन

[४] 1900,1915-शब्दविशिष्ट, जो2-शाब्दे विशिष्ट

[५] अ1-उक्तरीत्या

[६] त2-गाली

[७] ब1,1900-काव्यजदुःखसुखाद्यनुरोधेन, त1,1915,अ4-काव्यजदुःखाद्यनुरोधेन

[८] त2-बोधे

[९] जै- "न च प्रवृत्तिं प्रति " इत्यारभ्य "दुर्वारत्वात् " इत्यन्तं नास्ति

[१०] जै- "एवं " नास्ति

[११] त1-प्राक्तनबोधेना

[१२] त2-प्रवृत्त्याद्युप

[१३] के3-"न" नास्ति

[१४] अ3-घटो नास्तीत्यादौ

[१५] वा2- "त्वयि " अधिकम्

[१६] त2-हेतु

[१७] अ1- "पदं " नास्ति

[१८] अ1-दित्याकारकः

[१९] अ3,भ1-पदेष्विति

[२०] त3,द4-तत्तद्ग्रहो,द2-तद्ग्रहे

इदानीं योग्यताज्ञानस्य कारणत्वमभ्युपेत्यासत्स्थले बोधाभावमुपपादयति - यत्तु वह्निना सिञ्चेदित्यादिना॥ कार्यकारणभावं पोषयति - वह्निना सिञ्चेदिति॥ सत्यप्यत्र शब्दोच्चारणे वह्निकरणकसेचनबोधो न जायते। घटमानयेत्यादौ तु जायते। अतः यदभावान्न जायते, यत्सत्त्वाज्जायते, तस्य कारणत्वं मन्तव्यमेवेति योग्यताज्ञानं शाब्दबोधम्प्रति कारणं भवतीति केषाञ्चित् मतम्। प्रकृते तु योग्यता-ज्ञाननिष्ठकारणतायामौदासीन्यमेव। किन्तु वह्निना सिञ्चेदित्यादौ बोधादर्शनेन अयोग्यतानिश्चयस्य प्रतिबन्धकत्वमुक्तम्। स च अयोग्यतानिश्चयःप्रकृते अस्त्यादौ अस्त्येवेति। अयोग्यतानिश्चयोऽस्त्येवेत्यर्थः। न बोधः व्यापारस्य उभयोर्वा स्पष्टतया न बोधः। उपरि फलव्यापारोभयवाचकत्वविचारस्यैव प्रस्तुतत्वात्।

इदञ्च नैयायिकमीमांसकाभिप्रायेणेत्थम्। योग्यताज्ञानस्य कारणत्व-निराकर्तृमतमाह - एकपदार्थसंसर्गे इति॥ एकपदार्थसंसर्गे घटमानयेत्यादौ, एकपदार्थः आनयनादिरूपः, तन्निष्ठः अत्यन्ताभावः पटनिष्ठकर्मतानिरूपकत्वाभावः, अत्रानयने पटस्यान्वयाभावात्। प्रतियोगित्वं तादृशनिरूपकत्वरूपे संसर्गे। प्रतियोगित्वाभावः घटनिष्ठकर्मतानिरूपकत्वे, आनयने घटकर्मकत्वस्य सत्त्वात्। वह्निना सिञ्चतीत्यत्र सेचनपदार्थे वह्निकरणकत्वसंसर्गाभावस्य विद्यमानत्वेन तादृशसंसर्गे प्रतियोगित्वस्यैव सत्त्वम्। तथा च नात्र योग्यता। एतादृशयोग्यता-ज्ञानस्य कारणत्वं निरस्यति – नानायोग्यताज्ञानेनेति॥ प्रतिबोधे विभिन्नतयैव योग्यताज्ञानस्य कारणत्वस्य वक्तव्यतया नानात्वं बोध्यम्। नानात्वरूपगौरवात् शाब्दबोधम्प्रति योग्यताज्ञानं स्वातन्त्र्येण न कारणम्। फलतः प्रयोजकत्वेऽपि न साक्षात्कारणमित्यर्थः। एवमेव योग्यताविरहरूपस्याऽयोग्यतानिश्चयस्यापि स्वातन्त्र्येण प्रतिबन्धकत्वस्य न कल्पनम् गौरवात् ,शाब्दबोधात्पूर्वमयोग्यता-निश्चयस्याज्ञानाच्च। नन्वेवं सति वह्निना सिञ्चतीत्यादौ शाब्दबोधप्रतिबन्धानुपपत्ति-रित्यत आह - किन्तु क्लृप्तेति॥ पूर्वरीत्या शाब्दम्प्रति योग्यताज्ञानस्य कारणत्वे

[१] जै,के3,अ4- "वृत्त एव " इत्यत्र "एव " इत्यारभ्य "व्युत्पादयिष्याम " इत्यन्तं नास्ति,त्रि- "भववाक्यपदीये अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मक इति न आत्मानमात्मनेति पूर्वागतानि व्युत्पादयिष्यामः " इत्यधिकम्

[२] भ2-किन्त्वत्यन्तासतेन्द्रियेत्यादिग्रन्थोक्तो दोषः इति टिप्पणी

अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे स्वीक्रियमाणे अनुमित्यादिकम्प्रति अन्यस्य स्वीकर्तव्यत्वे गौरवमेव स्यादतः अनुमित्यादिसाधारण्येन क्लृप्तस्य स्वीकृतस्य प्रतिबन्धकीभूतबाधज्ञानस्य हेतुत्वम्। क्लृप्तं प्रतिबन्धकज्ञानम् , तद्वत्ताबुद्धिं प्रति तदभाववत्ता बुद्धिः प्रतिबन्धिकेति ज्ञानम्। तथा च तदभाववत्त्वज्ञानमेव प्रतिबन्धकज्ञानम्। तथा चानेनैव प्रतिबन्धकज्ञानेन वह्निना सिञ्चति इत्यादौ न शाब्दबोधः। प्रमात्वस्य गुणग्राह्यत्ववादी शङ्कते - न चैवं शाब्दप्रमायामिति॥ गुणत्वानुरोधेनेति॥ गुणप्रयोज्यत्वसिद्धये। दोषप्रयुक्तत्वं भ्रमे, गुणप्रयुक्तत्वं प्रमायाम्। योग्यताज्ञानं गुणत्वेन प्रमाकारणत्वेन स्वीकार्यम्। तथा च प्रमाज्ञानं प्रति योग्यता कारणमिति भावः।

यद्विशेषयोः कार्यकारणभावः तत्सामान्ययोरपीति न्यायशरीरम्। तथा च ज्ञानसामान्यापेक्षया प्रमाज्ञानं विशेषणम्। यौ च विशेषौ यद्विशेषौ, तयोर्यद्विशेषयोः। तत्सामान्ययोरिति॥ तयोर्विशेषयोर्ये सामान्ये तयोरिति विग्रहः। यादृशविशेषयोः कार्यकारणभावः तादृशविशेषयोर्ये सामान्यभूते तयोरपि परस्परं कार्यकारणभाव इति न्यायार्थः। तथा च प्रमामादाय यः विशेषयोः कार्यकारणभावः तत्सामान्ययोरपि अपरिहार्य एव। प्रमायाः सामान्यरूपं ज्ञानमेव। तदाह - शाब्दबोधसामान्ये एव योग्यताज्ञानमिति॥ तथा चोक्तस्थलेषु योग्यताज्ञानाभावान्न शाब्दबोधः नापि अस्त्यादौ व्यापारबोधः इति शङ्काशयः।

योग्यताज्ञानस्य शाब्दज्ञानसामान्यं प्रति कारणत्वं खण्डयति – संशयत्वादिवदिति॥ यथा योग्यताज्ञानस्य कार्यतावच्छेदकं न संशयत्वादि, किन्तु ज्ञानत्वमेव स्यात्। ननु योग्यताज्ञानस्य खण्डयितुर्योग्यताज्ञानकार्यतावच्छेदकविचारोऽनुपपन्न इत्यत आह – नीलघटत्वादिति॥ यथा दण्डघटयोः कार्यकारणभावः, दण्डत्वेन घटत्वेन न तु लम्बदण्डत्वेन नीलघटत्वेन, गौरवात्। तथा चास्य कार्यकारणभावकार्यतावच्छेदकं घटत्वमेव न तु नीलघटत्वम्। तद्वदिह योग्यताज्ञानस्य कार्यतावच्छेदकं प्रमात्वं न भवितुमर्हति। तथा च विशेषरूपेण कार्यकारणभावो नास्ति। तथा सति यद्विशेषयोरिति न्यायेन शाब्दबोधसामान्यं प्रति योग्यताज्ञानस्य कारणत्वचर्चैव दूरे गतेति भावः। आर्थसमाजसिद्धतया विशेषतायाः, तया च प्रमात्वेन

तथात्वस्वीकारे गौरवमिति भावः। योग्यताज्ञानस्य कारणत्वं पुनरप्याशङ्कते – यत्त्वित्यादिना॥ घटो न पट इति यथा भवति, घटप्रतियोगिकभेदवान् पट इति च तत्रत्यो बोधः। तथैव घटो न घटः इत्यपि स्यात्। तथा च घटप्रतियोगिकभेदवान् घट इति बोधोऽपि जायताम्। अत आह- बोधापत्त्येति॥ तादृशप्रयोगवारणाय योग्यताज्ञानस्य कारणता वक्तव्यैवेति। तथा सति संसर्गाबाधरूपयोग्यताया अभावात् न स बोधो भवति। ननु योग्यतायाः कारणत्वं मास्तु, घटे घटभेदाभाववत्वरूप-बाधेनैव तादृशबोधासिद्धिरित्यत आह - तत्र बाधस्येति॥ तत्र घटो न घट इत्यत्र तादृशबोधप्रतिबन्धकाभावः। बाधस्य प्रतिबन्धकत्वाभावं समर्थयति – घटत्व-धर्मितावच्छेदकेति॥ अयमाशयः - घटो न घट इत्यत्र ज्ञाने घटभेदः प्रकारः घट एव च धर्मी। धर्मिता घटे धर्मितावच्छेदकं घटत्वम्। घटत्वं धर्मितावच्छेदकं यस्मिन् घटभेदज्ञाने तज्ज्ञानं घटत्वधर्मितावच्छेदकक घटभेदज्ञानम्।

तादृशभेदज्ञानम् एव बाधज्ञानप्रतिबन्ध्यं वाच्यम्। तच्च न सम्भवति, प्रतिबन्धं प्रति प्रतिबन्ध्यप्रसिद्धेरावश्यकत्वात्। तादृशं घटभेदवद् घटज्ञानन्तु अनाहार्यतया अप्रसिद्धमेव। तथा च प्रतिबन्ध्यस्याप्रसिद्धौ बाधज्ञानानवसर एवेति योग्यताज्ञानमेव निर्वाहकम्। भ्रमो द्विविधः - आहार्यभ्रमः अनाहार्यभ्रमश्च। बाध-ज्ञानसमकालिकेच्छाजन्यं ज्ञानमाहार्यज्ञानम्। यथा "पूर्वत्रासिद्धमि" (पा. 8-2-1) त्यादौ सिद्धे असिद्धत्वज्ञानम्। इदं रजतमित्यादि तु अनाहार्यभ्रमः। तत्तुच्छमिति॥ यत्त्वया योग्यताज्ञाननिष्ठकारणत्वोपपादकमुपन्यस्तम् तत् तुच्छम् अप्रामाणिकम्। यथा शशश्रृङ्गादि प्रमाणाभावात् तुच्छमित्युच्यते तथैवेदं तवेति भावः।तुच्छत्वमुपपादयति – तादृशोपनीतेति॥ सुरभि चन्दनमित्यत्र सौरभस्यो-पनीतभानम्, उपनीतस्य पूर्वं ज्ञातस्य भानम् ,यथा चन्दने, यदिह सौरभं तत् क्वचिदाधृतचन्दने उपनीतम्।

इह चन्दनस्येन्द्रियसन्निकृष्टत्वात् ज्ञानलक्षणसन्निकर्षेण तद् गृह्यते। इदमेवोपनीतभानमुच्यते ।प्रकृते घटभेदस्य पटादौ उपनीतस्य ज्ञातस्य, घटे तस्य घटभेदस्य भानं यदस्ति, अकामेनापि त्वया अनाहार्यतया मन्तव्यमेवेति भावः। तादृशभानप्रयोजकमाह - तादृशज्ञाने इच्छाविशेषेति॥ इच्छां विना कस्यापि क्रियाया अनुपपत्तेः। यद्वा तादृशज्ञाने अनाहार्यघटकाहार्यज्ञाने इच्छा एव हेतुः।

अनाहार्यज्ञाने तु सामग्री एव प्रयोजिकेति संयोजनीयम्। सामग्री च पदार्थोपस्थित्यादिरेवेति बोध्यम्। नन्वेवं सति बाधस्य निर्विषयत्वापत्तिरित्यत आह – किञ्चेति॥ स्थलभेदेन पदार्थगर्भिणी योग्यता भिन्नैव वक्तव्या। अत आह – सर्वत्रैक्यासंभवात्॥ एवं सति योग्यताया हेतुत्वाभावः इत्यत आह – विशिष्येति॥ विशिष्यकार्यकारणभावफलमाह - प्रकृत इति॥ प्रकृते घटो न घट इत्यत्र। तादृशेति॥ घटप्रतियोगिकभेदवान्। भेदवति लक्षणायां घटभेदवान् इत्याकारकस्य बोधस्याप्रसिद्ध्या। शशशृङ्गबोधं प्रति यथा हेतुत्वकल्पनायाःअसम्भवः तथैवात्रापि हेतुत्वकल्पनायाः योग्यतानिष्ठवारणत्वकल्पनायाः असम्भवः। ननु योग्यतायां कारणत्वं मास्तु अन्यस्यैव कारणताऽस्त्वित्यत आह – अन्यत्र कल्पनायामिति॥

तदेवोपपादयति - किञ्चात्यन्तासता इति॥ यो हि प्रत्यक्षादिसिद्धस्तत्रैव शक्तिग्रहः। अयं पदार्थस्तु न केनापि प्रमाणेन प्रमितः इत्येवाह – अत्यन्तासतेत्यादिना॥ यदाऽसिद्धस्तदा शक्तिग्रहाभाव इत्याह – शक्तिग्रहस्यैवासम्भवादिति॥ तथा च न तादृशो बोधस्तत्र इति केचन वदन्ति। खण्डयति – तच्चिन्त्यम्॥ बाधेऽपि बोधस्य बौद्धार्थशक्तिग्रहेण जायमानत्वादिति तु प्रतिभाति। तदाह - बाधानिश्चयादेः सत्त्वेऽपि इति॥ आदिना इच्छादिपरिग्रहः॥ अस्य क्षोणिपतेरिति॥ नैषधीयोऽयं श्लोकः - अत्र श्लोकेऽसतामेव पदार्थानां ग्रहणमस्ति। तथाहि - अस्य बुद्धिस्थस्य क्षोणेः पृथिव्याः पत्युः स्वामिनः, परार्द्धपरया परार्द्धसंख्या अन्तिमा संख्या, ततोऽधिका नास्ति, परार्द्धादपि परा, या संख्या तया। वैशिष्ट्यं तृतीयार्थः, तच्च सामानाधिकरण्यसम्बन्धेन लक्षत्वेऽन्वेति। फलतः लक्षत्वसंख्यापरिच्छेदो बोधः। लक्षशब्दः संख्येये वर्तते, आदशतः संख्याः संख्येये इति कोशात्। परार्द्धाधिकसंख्याविशिष्टलक्षत्वसंख्याविशिष्टाः इत्यर्थः[1]। प्रज्ञा एव चक्षुर्यस्य तेनावेक्ष्यमाणाः दृश्यमानाः तिमिरेऽन्धकारे प्रख्याः ख्यायमानाः अकीर्तयः अपयशांसि, वन्ध्योदरात् वन्ध्या अपुत्रा, तस्या उदराज्जातेन उत्पन्नेन अष्टमं स्वरं कलयता विदधता मूकानां वाणीरहितानां प्रवरेण श्रेष्ठेन, कूर्मः कमठस्तस्य रमणी, तस्याः दुग्धं, तस्योदधिः समुद्रः, तस्य रोधसि तटे, किन्न गीयन्ते वर्ण्यन्ते। अत्र

---

[1] वस्तुतः परार्धपरया लक्षीकृता इत्यस्य परार्धाधिकसंख्यया गणिता इत्यर्थः। अत्र लक्ष्यीकृता इत्यपि पाठान्तरम्। द्र. टिप्पणी 76.

परार्द्धपरायाः संख्यायाः, नेत्रहीनकर्तृकस्येक्षणस्य अकीर्तिनिष्ठस्य तिमिरप्रख्य-त्वस्य, अष्टमस्य स्वरस्य, वन्ध्यापुत्रस्य, कूर्मरमणीदग्धस्य, मूककर्तृकगानस्य, एष वन्ध्यासुतो यातीत्यादौ खपुष्पस्य , मृगतृष्णाम्भसः, शशशृङ्गस्य च सर्वथा असत्त्वे बाधिते तत्त्वेऽपि बोधो दृश्यते तथा च बाधनिश्चयादेः प्रतिबन्धकत्वादर्शनेन, बाधस्य अकिञ्चित्करत्वमेवेत्यर्थः।

अत्रेदं बोध्यम् - परार्द्धाधिकसंख्यादीनामसत्त्वेन राज्ञः अकीर्तयोऽपि असत्या एवेति भावः। बाधस्याकिञ्चित्करत्वमुपपादयन्नाह - न चात्र न शाब्दबोधः इति॥ नैयायिकादीनां मते यत्र बाधः न तत्र शाब्दबोधः, अपि तु पदैः पदार्थो-पस्थितिरेवेति भावः। तत्खण्डयति - अन्यत्रापि इति॥ अबाधस्थलेऽपि तथात्वस्य शाब्दबोधाभावस्य आपत्तेः।तथा सति शब्दप्रमाण्योच्छेदापत्तेः। शाब्दबोधात्मक - प्रमाया अजनकत्वात्। ननु वैशेषिकादयः शब्दस्य प्रामाण्यं नाभ्युपगच्छन्ति अत आह - चमत्कारानापत्तेश्च इति॥ अस्य क्षोणिपतेरित्यादि श्लोकं श्रृण्वतां मनसि जायमानस्य चमत्कारस्यानुपपत्तेः। शब्दस्य प्रामाण्यं व्यवस्थापयन्नाह - न चेत्यादिना॥ यत्र बाधितार्थशब्दज्ञानानन्तरं प्रवृत्तिर्जायते, तत्र कार्यं दृष्ट्वा कारण-मनुमीयत इति नियमेन प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुता मन्तव्या, तादृशविशिष्ट-ज्ञानं शाब्दबोधात्मकं प्रति शब्दस्यैव हेतुत्वेन शाब्दबोधात्मकप्रमाजनकत्वेन शब्दस्य प्रामाण्यं सिद्धमेवेति शब्दप्रामाण्योच्छेदस्य आपत्तिर्नास्तीति पूर्वपक्षिण आशयः।

पूर्वपक्षं खण्डयति – दुःखद्वेषेच्छासुखादावपीति॥ दुःखादिपदेन वृत्त्या-त्मकक्रिया गृह्यते, तथा सति प्रवृत्तिरूपत्वमेषाम्। यद्वा दुःखादिपदेन तज्जनकविषयदानोपादानात्मकक्रियायाः एव ग्रहणम्। तथा च दुःखादिप्रवृत्तिं प्रति तद्रीत्या उक्तरीत्या तद्धेतुत्वेन। दुःखादिप्रवृत्तिं प्रति विशिष्टज्ञानं हेतुरित्यर्थः। मिथ्याभिशापः निरर्थकशापः, गालिदानम् आरोपितार्थकशब्दप्रयोगः, रूपकादि-काव्यम् चन्द्रो मुखमिति, एतेभ्यः स्वभावतो जायमानानि दुःखसुखानि, तेषाम-नुरोधेन, अन्यथानुपपत्त्या सत्यपि बाधे, असत्त्वेऽपि तस्य, विशिष्टज्ञानस्य हेतु-भूतस्य गालिदानादिजन्यस्य सिद्धेः स्वीकारस्य दुर्वारत्वात् अनिवार्यत्वात्। अत्यन्तासत्यर्थे विशिष्टज्ञानमनिवार्यमित्यर्थः। ननु बाधस्थलेऽपि विशिष्टज्ञानस्य

अपरिहार्यत्वे, विशिष्टज्ञानरूपहेतोः सत्त्वेन बाधितस्थलेऽपि प्रवृत्तिः स्यादित्यत आह- न चैवं वह्निना सिञ्चेदिति॥ प्राक्तनेति॥ प्राक्तनबाधः। इदानीमुच्चारितवह्निना सिञ्चतीति प्रयोगात् प्राक्तनेत्यर्थः। कुत्रापि अग्निकरणकसेचनादर्शनमेव बाधः। तथा च तत्संस्कारात् वह्निना सिञ्चती -त्यादिज्ञाने अप्रामाण्यशङ्का जायते। ततश्च प्रवृत्त्युपयोगिनः प्रमात्मकस्य ज्ञानस्याभावान्न प्रवृत्त्यापत्तिरिति भावः।

इदानीं शाब्दबोधद्वयमुक्त्वा असत्स्थले शक्तिग्रहप्रकारमुपपादयति - एवं शक्तिग्रहोऽपीति॥ अयमाशयः -शाब्दबोधं प्रति शक्तिग्रहः कारणम्। स च शक्तिग्रहः क्वचिदेव, शक्यतावच्छेदकावच्छिन्ने। न तु शाब्दबोधविषयीभूतसर्व-पदार्थेषु सदसत्सु। उदाहरति - स चेति॥ प्रकृते प्रस्तुते घटोऽस्तीति, अत्र अस्यैव प्रस्तावात्। अत्र प्रकरणे अयमेव विचारः प्रस्तुतः। घटोऽस्तीति स्थले धात्वर्थो व्यापारोऽस्ति न वेति। तत्र बहुभिर्हेतुभिः व्यापारः प्रत्यायितः। तथा चोक्तं - अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येवहि भावनेति॥ सर्वप्रतीत्यभावस्तु फलेन सामानाधिकरण्याद् जायते। तथा चात्र आत्मधारणानुकूलो व्यापारोऽस्त्यर्थः। तत्र चास्तेः शक्तिग्रहः। तथा च घटकर्तृकात्मधारणानुकूलो व्यापार इति शाब्दबोधः। यद्वा सत्तैवास्त्यर्थः। सा च आत्मधारणम्। सत्तायाश्चापि षड्भावविकारेषु अस्ति जायत इति पठितेषु परिगणनात्। घटोऽस्तीत्यत्र घटपदस्य घटत्वावच्छिन्ने शक्तिग्रह इत्यपि बोध्यम्। स च वृत्तः, पूर्वमेव अस् धात्वर्थविचारे निरूपितः। ननु शशश्रृङ्गादिषु असदर्थेषु का गतिरित्यत आह – शशश्रृङ्गादीति॥ शशश्रृङ्गादिषु बोध्यार्थस्याभावादाह – पदप्रकारक एवेति॥

ननु तत्र वाच्याभावात् कथं शक्तिग्रहः इत्याशङ्कमानं प्रत्याह -तत्र चेदमिति॥ इदं पदं शशश्रृङ्गादिपदं क्वचिच्छक्तमिति सामान्याकारेण शक्तिग्रहः। ननु शक्तं पदमिति मते शशश्रृङ्गादिषु पदत्वानुपपत्तिः, सुप्तिङन्तं पदमिति मतेऽपि सैवानुपपत्तिरिति चेदत्रोच्यते - आद्यपक्षे विकल्पविषयीभूतारोपितार्थमादाय शक्तत्वेन पदत्त्वोपपत्तिः, सा च लोकप्रयोगेण जायमाना। अत एवेदानीमपि शशश्रृङ्गादिपदानां प्रयोगपरम्परा दृश्यते। द्वितीयेऽपीत्थमेवोपपादनीयम्। यद्वा बौद्धार्थमादायार्थवत्त्वेन प्रातिपदिकसंज्ञायां जातसुपा पदत्वोपपत्तिरिति भावः। क्वचिच्छक्तमित्यत्र हेतुमाह – पदत्वादिति॥ दृष्टान्तमाह – दशरथादिपदेष्विवेति॥

दशरथो नाम राजाभूदित्युक्तौ दशरथादिपदानामर्थस्येदानीमभावात्। तत्राधुनिकानां शक्तिग्रहाभावे शाब्दबोधानुपपत्तौ दशरथादिपदं कचिच्छक्तमित्याकारकसामान्य-शक्तिग्रहेणैव पदप्रकारकः शाब्दबोधः। यद्वा बौद्धार्थविषयकमेव तद्वयम्। तथैवात्रापि निर्वोढव्यमिति प्रतीयते। तदाह – शक्यानुपस्थितावपीति॥ शक्यस्यानुपस्थितावपि। कचित्पुस्तके शब्दानुपस्थितावपीति पाठान्तरम्। तत्र शब्देन शशशृङ्गदशरथादिरूपेण अर्थस्यानुपस्थितावपीति। किञ्चात्यन्तासतेन्द्रिय-सन्निकर्षाभावेनेत्यादिना शक्तिग्रहाभावप्रतिपादकप्रकारो यो द्वितीय उक्तः सोऽपि नेति भावः। ततः पूर्वमुक्तः प्रथमः प्रकारः इत्यपि बोध्यम्।

14. धातूनां सकर्मकत्वाकर्मकत्वविभागः

77. ननु भावनायाः फलनियतत्वात्[१] फलवतः कर्मत्वाद्धातोस्तद्वाचकत्वे सर्वे सकर्मकाः[२] स्युः, तत्राह-

फलव्यापारयोरेकनिष्ठतायामकर्मकः।
धातुस्तयोर्धर्मिभेदे[३] सकर्मक उदाहृतः।**13**।

एकनिष्ठतायामेकमात्रनिष्ठतायां[४] भिन्नाधिकरणावृत्तितायामिति यावत्। तेन गम्यादौ नातिव्याप्तिः। अकर्मको धातुरित्यन्वयः[५]। यथा भ्वादिः।[६] तयोरित्यादि। यत्रानयो[७]र्भिन्ननिष्ठतेत्यर्थः। यथा पच्यादिः। इत्थं[८] चाकर्मके क्रियासत्त्वेऽपि[९] तयोरेकनिष्ठत्वान्न सकर्मकत्वमिति भावः। [१०]तदुक्तं वाक्यपदीये-

---

[१] जो2,द2-फलायत्तत्वात्

[२] ब1-सवेत्यकर्मकाः, जै-सर्वेकर्मकाः

[३] जै-धर्मभेदे

[४] अ3,भ1- "एकमात्रनिष्ठतायाम्" नास्ति

[५] भार1,के3,अ4-धातुरित्यनेनान्वयः, द1-धातुरित्यन्तेनान्वयः

[६]अ3,जै,द4,1900,त2,भ1,भ2,भ3,1915,म-अकर्मकोयथाभ्वादिः,धातुरित्यन्तेनान्वयः,अ1- अकर्मको यथा भ्वादिः, धातुरित्यनेनान्वयः, के3,अ4-यथा भूधातुः

[७] त1-यत्रान्वयो,भ3,द6-यत्र तयोः

[८] द2-एवं

[९] के3,अ4-क्रियार्थत्वेऽपि,द2-क्रिययोः सत्त्वेपि

[१०]त1,त5,म-"अत्रेदमवधेयम्। एवं हि" इति ग्रन्थानन्तरं "तदुक्तं वाक्यपदीये इत्यादि क्रोडीकृतत्वादि" त्यन्तः ग्रन्थः वर्तते।

"अन्तर्भावाच्च तेनासौ[१] कर्मणा न सकर्मकः" (वा.प.तृ.सं.47) इति।
तेन - आत्मानमात्मनेति पूर्वार्धेनो[२]क्तकर्मणा, असावस्तिः[३] सकर्मको न, अन्तर्भावात् - अस्त्यर्थेन क्रोडीकृतत्वादित्यर्थः।[४]

अत्रेदमवधेयम् - एवं हि जीवतिनृत्यादेः[५] सकर्मकत्वापत्तिः। प्राणधारणगात्र[६] विक्षेपादिरूप[७]फलस्य व्यापारव्यधिकरणत्वसत्त्वात्। तस्मात्[८] फलाश्रयावाचक त्वे[९] सति तद्व्यधिकरणव्यापारवाचकत्वं सकर्मकत्वं[१०] वाच्यम्[११]। अविवक्षितकर्मणा मलक्ष्यत्वे चा[१२]विवक्षाविरहविशिष्टेत्यपि निवेशनीयम्[१३]।

एवं चास्तेरात्मधारणरूपफलवाचकत्वे निरुक्तकारोक्तेऽप्या[१४]त्मांशस्य[१५] धात्वर्थत्वान्न सकर्मकत्वम्। दधातेस्तु धारणमात्रमर्थः[१६], न तु तदाश्रयोऽपीति सकर्मकत्वं संगच्छते। एवं "स्रंसु[१७] ध्वंसु[१८] अधःपतन" इत्यादेरप्यधो[१९]

---

[१] त्रि-अन्तर्भावान्वितेनासौ
[२] अ4-पूर्वार्थेन
[३] द3-"असौ"नास्ति
[४]भार1,द1,द4,त3,त2,ब1,1900,के3,अ1,अ3,अ4,भ1,भ2,भ3,1915-"तदुक्तं वाक्यपदीये"इत्यारभ्य "क्रोडीकृतत्वादित्यर्थः" इत्यन्तं ग्रन्थः उत्तरत्र "द्वितीयासमासोपपत्तिः" इत्यनन्तरमस्ति।
[५] त1,1900-जीवतिनृत्यत्यादेः
[६] भ3-"गात्र" नास्ति
[७] के3,अ4-प्राणधारणेगात्रक्षेपरूपफलस्य
[८] के3-"तस्मात्" नास्ति
[९] जो2-फलाश्रयवाचकत्वे
[१०] त2-"सकर्मकत्वम्" नास्ति
[११] अ1,के3,अ4-"सकर्मकत्वं वाच्यम्" इत्यस्य स्थाने "स्वीकर्तव्यम्" इत्यस्ति
[१२] अ1,के3,अ4-तु अविवक्षा-
[१३] भ3-विशेषणीयम्
[१४] अ4-"अपि" नास्ति
[१५] द1,1900-निरुक्तकारोक्तेरप्यात्मांशस्य
[१६] ब1-धारणमात्रार्थो
[१७] त1,त3-एवं च स्रंसु, वा2-एवं च श्रंसु, 1900-एवं च शंसु
[१८] के3,अ4-"ध्वंसु" नास्ति
[१९] द2-इत्यादेरधो

देशरूपफलागम(श्रय[१])वाचकत्वादकर्मकत्वम्। "पत्लृ गता"वित्यादेर्गम्यादिवत्[२] संयोगमात्रार्थत्वात्[३] सकर्मकत्वान्नरकपतित इत्यादि[४]द्वितीयासमासोपपत्तिः[५]।

अथैवं[६] जानातीच्छत्यादेः[७] घटादिकर्मणा[८] सकर्मकत्वं न स्यात्, धात्वर्थ-ज्ञानजन्यफलस्य घटादावसत्त्वात्। "आत्मानं जानाती"त्यादौ फलव्यापारयो-रेकनिष्ठत्वाच्चेति[९] चेत्, सत्यम्।

ज्ञानजन्यफलस्य घटादौ कारकार्थनिरूपणे[23] वक्ष्यमाणत्वात्। "आत्मानं[१०] जानाती"त्यादौ चा[११]त्मभेदः कल्प्यते।[१२] एकः शरीरावच्छिन्नोऽपरस्त्वन्तः-करणावच्छिन्नः। तत्रान्तःकरणा वच्छिन्नः[१३] कर्ता चेच्छरीरावच्छिन्नः कर्म। तथा च फलव्यापारयोर्भिन्न निष्ठत्वाक्षतेः[१४] सकर्मकत्वं नासिद्धम्। एवम् "आत्मानमात्मना हन्ति[१५] सृजत्यात्मानमात्मना[१६]" इत्यत्रापि[१७] शरीरात्मभेद-

---

[१] ज1 मातृकां विना अन्यत्र सर्वत्र फलाश्रय इत्येव पाठः युक्तश्च। के3,अ4-इत्यादौ फलाश्रय

[२] अ1-गतावित्यादिवत्, के3-गत्यादिवत्

[३] अ1,के3,अ4-संयोगमात्रवाचकतया

[४] अ4-इत्यादिवत्

[५] जै-"अत्रेदमवधेयम्" इत्यारभ्य "द्वितीयासमासोपपत्तिः" इत्यन्तं ग्रन्थः नास्ति

[६] अ3-तथैवं

[७] अ1,अ3,भ1-जानातीत्यादेः

[८] अ1,अ3,भार1,त1,त3,द4,जो2,जै,ब1, के3,1900,त2,भ2,भ3,1915,अ4- "घटादिकर्मणा " नास्ति

[९] अ4-...निष्ठत्वादिति

[१०] अ3- "च " अधिकं

[११] के3,अ4-"च" नास्ति

[१२] त2- "आत्मानं जानाती"त्यादौ फलव्यापारयोरेकनिष्ठत्वाच्चेति चेत्, सत्यम्। ज्ञानजन्यफलस्य घटादौ कारकार्थनिरूपणे[१२] वक्ष्यमाणत्वात्। "आत्मानं जानाती"त्यादौ चा[१२]त्मभेदः कल्प्यते। " नास्ति

[१३] अ4-"तत्रान्तःकरणावच्छिन्नः" नास्ति

[१४] त्रि-भिन्ननिष्ठत्वात्कृतेः, द5-भिन्ननिष्ठत्वाद्रक्षतेः

[१५] अ1-वेत्ति, के3,अ4-वेत्सि

[१६] अ1- "सृजत्यात्मानमात्मना " नास्ति, द1-आत्मानमात्मना हंसि सृजस्यात्मानमात्मना, अ3,द2,द4,भ2- आत्मानमात्मना हन्ति सृजस्यात्मानमात्मना

[१७] अ4-इत्यादावपि

सत्त्वाल्लक्षणं[१] द्रष्टव्यम्[२]। उक्तं च "कर्मवत् कर्मणा[३]"(पा.3-1-87) इति[४] सूत्रे भाष्ये[24] "द्वावात्मानौ शरीरात्मान्तरात्मा[५] च। शरीरात्मा तत्कर्म[६] करोति[७], येनान्तरात्मा सुखदुःखे अनुभवति। अन्तरात्मा तत्कर्म[८] करोति, येन शरीरात्मा[९] सुखदुःखे अनुभवती"ति[१०]।

---

ननु धातुत्वाय क्रियावाचकत्वावश्यकत्वेन क्रियाजन्यफलाश्रयत्वरूप-कर्मत्वस्य सार्वत्रिकत्वेनाकर्मकत्वोच्छेदापत्तिरिति मनसि निधाय शङ्कते - ननु भावनाया इति॥ तद्वाचकत्वे क्रियावाचकत्वे, तज्जन्यफलाश्रयत्वरूपकर्मत्वस्य सर्वत्र सत्त्वेनेति शेषः। समाधानाय यतते – तत्राहेति॥

फलव्यापारयोरिति॥ फलव्यापारयोरेकनिष्ठातायां सामानाधिकरण्ये सति धातुः अकर्मकः। यस्य धातोरर्थौ फलव्यापारौ समानाधिकरणौ स धातुरकर्मक इति भावः। यथा भ्वादिः। ननु फलव्यापारयोः सामानाधिकरण्यम् अकर्मकत्व-प्रयोजकमिति चेद् गम्यादीनामपि सकर्मकत्वेनाभिमतानाम् अकर्मकत्वापत्तिः। संयोगस्य द्विष्ठत्वेन देवदत्तो ग्रामं गच्छतीत्यादौ देवदत्तादौ कर्तरि सत्त्वेन व्यापारस्य च तत्रैव सत्त्वेन फलव्यापारयोरेकनिष्ठत्वादत आह –भिन्नाधिकरणा-वृत्तितायामिति॥ तथा च व्यापारस्य भिन्नाधिकरणवृत्तित्वेऽपि संयोगरूपस्य फलस्य देवदत्ताद्यपेक्षया ग्रामादिभिन्नाधिकरणवृत्तितया न दोषः। तदाह - तेन

---

[१] जो2,द2-सत्त्वात्तल्लक्षणं

[२] के3,अ4-शरीरात्मभेदेन समाधेयम्

[३] अ1- "तुल्यक्रियः " इत्यधिकं

[४] त5-"इति" नास्ति

[५] त2-"अन्तरात्मा" नास्ति, भ1-शरीरात्मा च अन्तरात्मा च

[६] के3,अ4-तत्

[७] त2-करोतीति

[८] के3,अ4-तत्

[९] जै-शरीरादि आत्मा

[१०] अ3-"अन्तरात्मा तत्कर्म[१०] करोति, येन शरीरात्मा[१०] सुखदुःखे अनुभवतीति" नास्ति, त2-"येनान्तरात्मा सुखदुःखे अनुभवति। अन्तरात्मा तत्कर्म[१०] करोति, येन शरीरात्मा[१०] सुखदुःखे अनुभवतीति। " नास्ति, अ1-"इति" नास्ति

गम्यादौ न दोषःइति॥ कारिकायां सकर्मकलक्षणमाह – तयोरिति॥ तयोः-फलव्यापारयोः, धर्मिणः, आश्रयस्य भेदे सकर्मकः उदात्तः। तमर्थमाह - यत्रानयोर्भिन्ननिष्ठतेत्यर्थः। अनयोः फलव्यापारयोः भिन्ननिष्ठता वैयधिकरण्यम्। उदाहरणमाह - यथा पच्यादिः। उपसंहरति - इत्थं चेति॥ नन्वस्यैव सकर्मकत्वे, जीवादेरपि सकर्मकत्वापत्तिः तत्रापि फलस्य संयोगादिरूपस्य भिन्नाधिकरण-वृत्तित्वादत आह–अत्रेदमवधेयमिति॥ सकर्मकत्वापत्तेः। संयोगस्य प्राणादि-वृत्तित्वेन व्यापारस्य च कर्तृवृत्तित्वात्। जीवत्यादिधातूनामकर्मकत्वाय सकर्मकत्वं परिष्करोति – प्राणधारणगात्रविक्षेपादिफलस्येति॥ फलस्येत्यस्य व्यापारव्यधिकरणे अन्वयः। तथा च तादृशकर्मविशिष्टे फलस्य यद् व्यापारवैयधिकरण्यम् समानधातू-पस्थाप्यत्वाभावः तद्वद्वाचकत्वं सकर्मकत्वम्। जीवतिनृत्यत्यादौ केवलं प्राणधारण-विक्षेपादिफलं नास्ति किन्तु गात्रादि विशिष्टम्। तथा च गात्रादेः कर्मणः फलस्य च धातुनैवोपस्थानात् व्यापारव्यधिकरणव्यापारवाचकत्वाभावान्नापत्तिरित्यभिप्रायः।

ननु अविवक्षितकर्मणामकर्मकत्वानुपपत्तिरविवक्षादशायामपि स्वरूपतः फलव्यधिकरणव्यापारवाचकत्वाक्षतेरित्यत आह - अविवक्षितकर्मणामलक्ष्यत्वे अविवक्षाविरहविशिष्टेत्यपि इति॥ तथा च लक्षणम् अविवक्षाविरहविशिष्टफल-व्यधिकरणव्यापारवाचकत्वं सकर्मकत्वमिति। अविवक्षाविरहस्य वैशिष्ट्यं वैयधिकरण्येनान्वेति। तथा च अविवक्षितत्वाभाववद् यद् वैयधिकरण्यं तद्वद् व्यापारवाचकत्वं सकर्मकत्वम्, विवक्षितकर्मस्थले फलव्यापारयोर्वैयधिकरण्यं विवक्षितमतस्तत्र सकर्मकत्वम्, तण्डुलं पचतीत्यादौ यथा।

यत्र तु तण्डुलादिकर्मणोऽविवक्षा फलव्यापारयोः सामानाधिकरण्यस्य च विवक्षा तत्र न सकर्मकत्वम् , वैयधिकरण्यस्य अविवक्षितत्वात्। अस्तेः सकर्मकत्वं वारितमपि वारयति - निरुक्तकारेण आत्मा अस्तीत्युत्पन्नस्यात्मधारणमुच्यते इति वदता, अस्तेरात्मधारणरूपफलवाचकत्वं बोधितम्।

आत्मांशस्य कर्मांशस्य धात्वर्थत्वात् धात्वर्थतावच्छेदकत्वात् न सकर्मकत्व-मपि त्वकर्मकत्वमेव। ननु धा धातोरपि धारणार्थकत्वेन पात्रादिकर्मणोऽपि धारणांशे प्रविष्टत्वम् पात्रं धत्ते इत्यादौ धारणमात्रप्रतीतेः, तथा चोक्तरीत्या

अकर्मकत्वापंत्तिरत आह - दधातेस्तु इति॥ अत्र पात्राद्यविशिष्टधारणमात्रस्य धात्वर्थत्वम्। न तु आश्रयोऽपि पात्रादिरपि। तथा चात्र शक्तिस्वरूपवैलक्षण्येन सकर्मकत्वमक्षतम्। अधोदेशरूपसंयोगात्मकफलाश्रयस्य वाच्यत्वात् देशस्य तत्संयोगस्य च धात्वर्थत्वेन गृहीतत्वात्। नरकपतित इति वार्तिककारप्रयोगात् पच्धातोः सकर्मकत्वम्। कर्मणो धात्वर्थत्वेऽकर्मकत्वे प्रमाणमाह - अन्तर्भावात् । धात्वर्थत्वात् फलमाह - तेनात्मानमात्मनेति पूर्वार्द्धेनेति।आत्मानमात्मना बिभ्रदस्तीति प्रतीयते इति पूर्वार्द्धम्। तेन धात्वर्थत्वेन कर्मणो ग्रहणे अकर्मकत्वस्वीकारेण। कारिकार्द्धेनात्मरूपकर्मणा अस्तिर्न सकर्मकःइत्यत्र हेतुमाह – अन्तर्भावाच्चेति॥

अथैवं जानातीच्छत्यादेरिति॥ घटं जानाति घटमिच्छतीत्यादौ फलाश्रयत्वाद् घटादेः कर्मत्वमिष्टम् । तदेवानुपपन्नम् ,धात्वर्थज्ञानजन्यफलस्य आवरणभङ्गादेर्घटादाववृत्तित्वात्। आवरणं चैतन्यवृत्ति न तु जडवृत्तीति स्वीकारेण यत्र चैतन्ये आवरणं तत्रैव तस्य भङ्गस्य सत्त्वात्। समाधानं वक्ष्यमाणमाह - कारकार्थनिरूपण इति॥ तथाहि - जानातीच्छति द्वेष्टि संदेग्धीत्यादीनां ज्ञानेच्छाद्यनुकूलो व्यापारोऽर्थ उक्तः। स च व्यापारः ज्ञानजनक मनश्चक्षुःसंयोगरूपः।तथा च ज्ञानस्यैव फलत्वेन विषयतासम्बन्धेन घटादिवृत्तित्वेन घटादेः कर्मत्वम्। घटमिच्छतीत्यत्र इच्छानुकूलज्ञानादिरेव व्यापारः। इच्छायाः फलत्वेन विषयतया घटादिवृत्तितया च तत्रापि घटादेः कर्मत्वम्। नन्वात्मानं जानातीत्यादौ आत्मन एकत्वेन फलव्यापारयोः सामानाधिकरण्यात्कथं सकर्मकत्वोपपत्ति इति। यद्यप्येक एवात्मा अखण्डश्चिदानन्दः तथाप्युपाधिवशात् आकाशमिव भिद्यते। तदाह - आत्मभेदः कल्प्यते॥ भेदमाह - एकः शरीरावच्छिन्नः अन्तःकरणावच्छिन्नोऽपरः॥ तत्र आत्मानं जानातीत्यत्र तिबर्थः कर्ता आत्मैव। तत्र अन्तःकरणावच्छिन्नः आत्मा कर्ता, तस्यैव ज्ञानाश्रयत्वात्। शरीरावच्छिन्नः कर्मेति तमादाय आत्मानमिति। सकर्मकत्वोपपादानमाह - फलस्य ज्ञानस्य विषयतासम्बन्धेन शरीरावच्छिन्ने सत्त्वेन व्यापारस्योक्तसंयोगरूपस्य अन्तःकरणावच्छिन्ने सत्त्वेनोभयोर्वैयधिकरण्यात् सकर्मकत्वम् , तदेतत्सर्वं भाष्योक्त्या प्रमाणयति - आत्मानमात्मनेत्यतः आत्मा अनुभवतीत्यनेन ग्रन्थेन॥

## 14.1 मीमांसकोक्तमकर्मकत्वम्

**78.** मीमांसकास्तूक्तातिप्रसङ्गभियैव[१] प्रकारान्तरेणाकर्मकत्वसकर्मकत्व[२]विभागं वदन्ति। तथा च भावार्थाधिकरणे[३](मी.2-1-1) भट्टैरुक्तम्[४][25] -

"साक्षादव्यभिचारेण धात्वर्थो यत्र कर्मभाक्[५]।
सकर्मकः स धातुः स्यात् पारम्पर्ये त्वकर्मकः॥[६](मी.2-1-1-1)

आसनशयनादौ[७] हि आनन्तर्येण नियमेन[८] कर्मविशेषो न निरूप्यत इत्यकर्मकत्वम्, पचि[९]गम्यादीनां तु विक्लिद्य[१०]त्संयुज्यमान[११]साक्षात्सम्बन्धिकर्माव्यभिचारात् सकर्मकत्वम्, न तु भावनाविशेषणत्वेन[१२] कश्चिद्विशेष[१३]" इति।

तच्चिन्त्यम्। भवति घटमित्याद्यापत्तेः[१४]। न चात्र कर्म न[१५] निरूप्यत इत्यकर्मकत्वम्, कर्मनिरूपणस्यैवापाद्यत्वात्[१६]। अन्योन्याश्रयापाताच्च।[१७] कर्मनिरूपणे[१८] हि सकर्मकत्वम्, सकर्मकत्वे च कर्मनिरूपणमिति।

---

[१] 1915-भियेव,त5-धियैव
[२] अ4-"सकर्मकत्व"नास्ति
[३] ज1-तथा चाभावाधिकरणे
[४] ब1,त1,त3,1900,के3,अ4-भट्टपादैरुक्तम्
[५] के3-कर्मभेदात्
[६] के3,अ4-"इति"इत्यधिकम्
[७] जै-आशानसयनादौ
[८] त2-नियमत्वेन
[९] अ3-पचति
[१०] त5-विक्लुद्य
[११] द1-विक्लिद्यसंयुज्यमान
[१२] भार1-भावनाविशेषणत्वे
[१३] त1-कश्चिद्विशेषण इति
[१४] त2-मित्यापत्तेः
[१५] त2- "न" नास्ति
[१६] जो2-कर्मनिरूपणस्यैवापाद्यमानत्वात्
[१७] द3-"कर्म" इत्यारभ्य "अन्योन्याश्रयापाताच्च" इत्यन्तं नास्ति,भ2-अन्योन्याश्रयत्वाच्च
[१८] जै-सकर्मनिरूपणे,द3-कर्मत्वनरूपणे

न च तवाप्येतादृशस्थले फलव्यापारयोर्भिन्ननिष्ठतैव किं न स्यादिति वाच्यम्, तथैव वस्तुनः स्वभावात्। निरूपणं[१] तु[२] प्रयोगः। स चापादयितुं शक्य एवेति।

नन्वत्र[३] निरूपणमाकाङ्क्षा। तथा च यद्धातूच्चारणे कर्माकाङ्क्षा नियता स सकर्मकः। सा च समानार्थकेष्वपि[४] धातु[५]विशेषोपस्थापन[६]निबन्धना[७] यत्रास्ति स[८] सकर्मकः[९], यत्र नास्ति[१०] सोऽकर्मकः। एवं च कृञोऽपि यतेरिव यत्नमात्रार्थकत्वेऽपि[११] नानुपपत्तिः। कर्मत्वादिपदो[१२]पस्थाप्य[१३]कर्मत्वस्य क्रियाकाङ्क्षत्वाभावेऽपि द्वितीयोपस्थाप्यस्य तत्साकाङ्क्षत्ववत्[१४] कृञुपस्थाप्यस्य[१५] यत्नस्य[१६] कर्माकाङ्क्षत्वोपपत्तेः। एवं च सकर्मकत्वा[१७]नुरोधेन कृञ उत्पत्तिवाचकत्वव्यवस्थापनमप्ययुक्तम्। अविवक्षितकर्मणां[१८] तत्कर्मकत्वस्य (सकर्मकत्वस्य[१९]) वारणीयत्वे चा[२०]विवक्षाभाववैशिष्ट्यमपि[२१] लक्षणे निवेश्यताम्। एवमेकस्यैवार्थभेदेनाकर्मकत्वं सकर्मकत्वमपि[१]

---

१ त्रि-निरूपणे, द5 - तव तु निरूपणं

२ अ4-"तु" नास्ति

३ जै-नचात्र,त2- "अत्र" नास्ति

४ त1,त5-समानार्थेष्वपि

५ अ1-समानार्थकेषु धातुष्वपि

६ अ4-....स्थापने

७ अ1-विशेषोपस्थाननिबन्धना

८ अ1-"स" नास्ति

९ 1900- "सा च " इत्यारभ्य "सकर्मकः " इत्यन्तं नास्ति

१० अ1-यत्रास्ति

११ द1- "अपि " नास्ति

१२ द3-कर्मत्वपदो

१३ अ4-....स्थाप्यस्य

१४ जो2-तत्साकाङ्क्षवत्,के3-तत्साकाङ्क्षत्वादिवत्

१५ अ4- "तत्साकाङ्क्षत्ववत् कृञुपस्थाप्यस्य" इति नास्ति

१६ अ1-कृञुपस्थाप्ययत्नस्य, त2-कृञुपस्थाप्यस्य फलस्य

१७ द6-एवं चाकर्मकत्वा

१८ ब2-अविवक्षितकर्मणो

१९ ज1 मातृकां विना "सकर्मकत्वस्य " इत्यन्यत्र पाठः स्पष्टश्च।

२० त5-"च" नास्ति, ब3- वा

२१ भ1-चाविवक्षाभावमपि

नानुपपन्नम्। यदर्थे[२]ऽविवक्षा विरहविशिष्ट[३]कर्माकाङ्क्षाजनकत्वं यस्य, स तत्रार्थे सकर्मक इत्यन[४]नुगतस्यैव त्वद्रीत्या लक्षणत्वसंभवादिति चेन्न,

गच्छतिपतती[५]त्यादिषु[६] कर्माकाङ्क्षाविरहेणाव्याप्तेः। अत्रत्य[७]कुत्रकिमित्याकाङ्क्षायाः यतते[८]भवतीत्यादिषु कुत्र[९]किमित्याकाङ्क्षातुल्यत्वात्। "द्वितीयाश्रितातीतपतित[१०]" (पा.2-1-24) इति सूत्रे पतितशब्दस्य कर्म[११]द्वितीयासमासविधानेन पतेः[१२] सकर्मकत्वनिर्णयात्। कृञ उत्पत्त्यर्थकतायाः प्रागेव निर्णीतत्वाच्चेति दिक्॥ **13**॥

---

उक्तातिप्रसङ्गभिया अस्ति जीवतीत्यादौ सकर्मकत्वादिभिया, उक्तप्रकार-भिन्नतया उक्तसकर्मकत्वादिलक्षणभिन्नतया।

भावार्थाधिकरणं स्वमतस्थापकमाह - साक्षादव्यभिचारेण इति॥ यत्र धात्वर्थः फलम्, व्यापारस्यैतन्मतेऽवाच्यत्वात्, साक्षात् परम्परासम्बन्धमननु-भूयैव, अव्यभिचारेण तद्विना स्वानुपपत्तेः, कर्मभाक् कर्मसम्बन्धी। यथा तण्डुलं पचतीत्यादौ धात्वर्थस्य तण्डुलादिना सम्बन्धित्वम्।

तदाह – पचिगम्यादीनामिति॥ विक्लिद्यदिति॥ पच्यभिप्रायेण।संयुज्यमानेति॥ गम्यभिप्रायेण। विक्लिद्यद् यत्साक्षात्सम्बन्धिकर्म तस्याव्यभिचारात्। अवश्यं सत्त्वात् सकर्मकत्वम्। न तु व्यतिरेकेणेत्यत आह – न तु भावनाविशेषणत्वेन॥ अयमभिप्रायः- भावना धात्वर्थ इति वैयाकरणाः, आख्यातार्थः इति मीमांसकाः।

---

[१] अ1,अ4-"सकर्मकत्वं" नास्ति, 1915-अकर्मकत्वसकर्मकत्वमपि

[२] के3-तदर्थे

[३] अ1-विवक्षाभावविशिष्ट

[४] भ1- "न" नास्ति

[५] के3-पचती

[६] अ3-त्यादौ न

[७] अ1-अत्र

[८] अ4-यतन्ते

[९] भार1,त3-अत्र

[१०] अ1-"गतात्यस्त" अधिकं

[११] अ3-कर्मणि

[१२] 1900-यतेः,1915-पत्तेः

तत्र फलव्यधिकरणभावनावाचकत्वं सकर्मकत्वमिति वैयाकरणैरुच्यते। अत्र जीवत्यादेः सकर्मकत्वाभावाय च किञ्चिद्भावनादौ विशेषणं देयमिति। तत्राह - न तु भावनाविशेषणत्वेनेति॥ भावनायामुक्तविशेषणत्वेन । उक्तविशेषणदानेनेति भावः। न कश्चिद् विशेषः, न फलान्तरम्। मदुक्तक्रमेणैव निर्वाहात्। अकर्मकासनशयनादौ सकर्मकत्वं वारयति - पारम्पर्ये त्वकर्मकः॥ यत्र परम्परया धात्वर्थेन कर्मसम्बन्धस्तत्र अकर्मकः। तदाह मूले - आसनशयनादौ हि आनन्तर्येण नियमेन कर्मविशेषो न निरूप्यत इत्यकर्मकत्वम् इति॥

पचतीत्युक्तौ किमित्याकाङ्क्षायाः झटिति सत्त्वेन धात्वर्थसमुपस्थिति-कालमेव तेन तण्डुलादिकर्मसम्बन्धो भवति। आस्ते तिष्ठतीत्यादौ तु झटित्याकाङ्क्षा न जायते, व्याप्त्यादिक्रियान्तर्भावेण जायते, इति पारम्पर्येण तत्र क्रियासम्बन्धः। तस्मादकर्मकत्वन्तेषाम्। मीमांसकमतमिदं खण्डयति – भवतिघटमित्या-द्यापत्तेरिति। फलाश्रयत्वेन घटस्य कर्मत्वात्। त्वन्मते कर्मत्वविनिगमकस्या-सत्त्वात्। मीमांसकः स्वमते विनिगमकमाह - न चात्र कर्म निरूप्यते इति॥ यथा पचतीत्यादौ किमित्याकाङ्क्षादिना कर्म निरूप्यते - बुद्धिविषयीभवति। तथा आकाङ्क्षादिना अस्त्यादौ कर्मनिरूपणाभाव इति तेषामकर्मकत्वम्। विनिगमकं निरस्यति – कर्मनिरूपणस्यैवेति॥ सकर्मकत्वादिलक्षणप्रविष्टकर्मनिरूपणस्य अद्यापि असिद्धेः। आपाद्यत्वात् - आक्षेप्यत्वात्।

अन्योऽपि दोष इत्याह – अन्योन्याश्रयापाताच्चेति॥ अन्योन्या-श्रयदोषमुपपादयति - कर्मनिरूपणे हीति॥ वैयाकरणमाक्षिपति - न च तवाप्येता-दृशस्थल इति॥ तवापि वैयाकरणमतेऽपि एतादृशस्थले आसनादौ फलव्यापारयो-र्भिन्ननिष्ठतैवेति तेन च सकर्मकत्वापत्तिः किं न स्यात्। भिन्ननिष्ठत्वाभावहेतुं विवृणोति - तथैव वस्तुनः स्वभावादिति॥ यथा अग्नेः दाहकत्वं स्वभावः, न तत्र हेतुर्जिज्ञास्यते, तथैव क्वचित्फलव्यापारयोः सामानाधिकरण्येन प्रतीतिः, क्वचित् वैयधिकरण्येन च प्रतीतिः स्वाभाविकत्वात् शब्दशक्तिमहिम्ना च। ननु मम मतेऽपि वस्तुस्वभावादेव क्वचित् साक्षात्कर्मणो निरूपणम् क्वचित् पारम्पर्येणेति शङ्कमानं प्रत्याह - निरूपणं तु प्रयोगः इति॥ ज्ञानानुकूलो व्यापारो निरूपणम्। स च व्यापारः उच्चारणरूपः। उच्चारणस्य क्रियारूपत्वेन कर्तृतन्त्रत्वादापादनीयता।

भिन्नाधिकरणनिष्ठतादेस्तु वह्नेर्दाहकत्वस्यैव वस्तुधर्मत्वात्। तस्य च स्वभाव-सिद्धत्वमेव न तु कर्तृपारतन्त्र्यम्। निरूपणपदार्थनिर्वचनमुखेन मीमांसकः स्वमत-मुपस्थापयति - न चात्र निरूपणमाकाङ्क्षेति॥ न तु प्रयोगः। आकाङ्क्षार्थकत्वे विवक्षितमर्थमाह - तथा चेति॥ यद्धातूच्चारणे पचादिधातूच्चारणे कर्माकाङ्क्षा नियता व्यापिका स सकर्मकः। ननु समानार्थेषु कृयत्यादिषु तद्द्वयानुपपत्तिः। एकार्थकत्त्वेऽपि कस्यचित्सकर्मकत्वात् कस्यचिदकर्मकत्वादित्यत आह - सा समानार्थेषु इति॥ कृञो यतेश्च यत्नार्थकत्वेन समानार्थत्वेऽपि करोतीत्यत्र सा कर्माकाङ्क्षा जायते, धातुविशेषोपस्थापननिबन्धनात् , यत्नोपस्थापककृधातुसमभि-व्याहारस्य तत्र हेतुत्वात्। यतते इत्यादौ यत्नोपस्थितावपि यत्नोपस्थितेः कर्माकाङ्क्षाप्रयोजककृधातुप्रयोज्यत्वाभावात् न कर्माकाङ्क्षेति भावः।इदमपि शब्द-शक्तिस्वभावसिद्धमेवेति ध्येयम्। फलितमाह - एवञ्च कृञोऽपि यतेरिति॥ यतेरिव कृञोऽपि यत्नमात्रार्थकत्वेऽपि नानुपपत्तिरिति योजना। नाकर्मकत्वापत्तिः, यद्वा न सकर्मकत्वानुपपत्तिः। शब्दशक्ति-स्वभावभेदमाह – कर्मत्वादिपदोपस्थाप्यस्येति॥ कर्मत्वं कारकत्वव्याप्यम्। द्वितीयाद्युपस्थाप्ययत्नस्य कर्माकाङ्क्षोपपत्तिः।

एवमिति॥ शब्दशक्तिस्वभावादेव यतीसमानार्थत्वेऽपि कृञः सकर्मकत्वो-पपत्तौ उत्पत्तिवाचकत्वस्वीकारो व्यर्थ इति भावः। निवेश्यतामिति॥ सकर्मकत्व-लक्षणे। अर्थभेदेनेति॥ नदी वहति, भारं वहतीत्येकस्यैव धातोरर्थभेदेनाकर्मकत्व-सकर्मकत्वे भवतः, नदी वहतीत्यत्र कर्माकाङ्क्षाया नैयत्याभावादत्रार्थे प्रस्रवणे अकर्मकः अन्यत्र प्रापणे सकर्मकः। लक्षणस्वरूपं पर्यवसितमाह – यदर्थेत्यादि॥ विवक्षाभावाभावत्वरूपे वैशिष्ट्यम् द्वितीयाभावस्य प्रतियोगिरूपतया, अविवक्षा-विरहो विवक्षैव, तस्य कर्मवैशिष्ट्यं विषयत्वमेव। पचतीत्युक्तौ तण्डुलादेराकाङ्क्षायाः सत्त्वात्। तन्मतं खण्डयति – गच्छतीति॥ गच्छतिपततीत्युक्तौ ग्रामादीनां कर्मतया आकाङ्क्षाविषयत्वाभावात्। तदेवोपपादयति – कुत्रेति॥ यथा यतते भवतीत्याद्युक्तौ कुत्र यतते, कुत्र घटो भवतीत्यधिकरणाकाङ्क्षैव जायते, तथा सति तेषाम् अकर्मकत्वम्। तथैव गच्छति पततीत्यादौ अपि कुत्रेत्यधिकरणजिज्ञासासत्त्वाद-कर्मकत्वापत्तिरिति भावः। यतीसामान्यं गम्यादावाह - अत्रत्येति ॥ गम्यादि-स्थलीयेत्यर्थः। ननु पतत्यादेरकर्मकत्वमेवास्त्वित्यत आह - द्वितीयाश्रितेत्यादि सूत्रे

पतितशब्दस्येति॥ द्वितीयान्तं श्रिताद्यन्तम् समर्थप्रकृतिकद्वितीयान्ताभिन्नसुबन्तेन समस्यते, इति सूत्रार्थः। तत्र पतितशब्दस्य द्वितीयान्तेन समास एकः, कूपपतितः इति। सकर्मकत्वं विना तादृशसमासानुपपत्तेः। अत्र मूले यतेरित्यपपाठः, पतेरित्युचितः। उत्पत्तिवाचकत्वं कृञ आक्षिप्तं स्वीकारयति - कृञ उत्पत्त्यर्थकत्वम् इति॥ प्रागेवेति॥ उत्पद्यर्थकत्वाभावे क्रियते घटः स्वयमेवेति कर्मवद्भावानुपपत्या मतदर्थकत्वस्योपपादनात्।

## 15. पाक इत्यादिघञन्तस्थले साध्यक्रियायाः धातुवाच्यत्वप्रतिपादनम्

**79.** ननु क्रियाया धातुवाच्यत्वे पाक इत्यादिघञन्तस्थले तत्प्रतीतिः स्यात्। वाचकस्य[१] धातोराख्यात इवात्रापि तुल्यत्वात्। न चेष्टापत्तिः, सत्त्वरूपाया एव प्रतीतेः।[२] "कृदभिहितो भावो द्रव्यवत् प्रकाशते[3]" इति भाष्य[26]वचनविरोधापत्तेश्च[४]। तस्मान्नासत्त्वरूपा क्रिया धातुवाच्येत्यत आह-

आख्यातशब्दे भागाभ्यां साध्यसाधनवर्तिता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः[27]।14।

आख्यातशब्दे[५] "पश्य मृगो धावति" इत्यादौ। "मृगो धावति[६] पश्येति साध्यसाधनरूपते"(वा.प.तृ.क्रि.51)त्यनुपदमेव[७] वाक्यपदीयेऽभिधानात्। भागाभ्यां तिङन्ताभ्याम्। प्रकृतिप्रत्ययभागाभ्यामिति त्वपव्याख्यानम्[८]। पचतीत्यत्रापि[९] भागद्वयसत्त्वेन सिद्धावस्थक्रियाप्रतीत्यापत्तेः। साध्यसाधनवर्तिता यथाक्रमं पश्यभागेन साध्यवर्तिता, धावतिभागेन साधनवर्तिता[१०] यथा शास्त्रे प्रकल्पिता[१]।

---

[१] अ4-वाचकं
[२] के3,अ4-"अन्यथा"इत्यधिकम्
[३] के3,अ4-भवति
[४] अ4-"च"नास्ति
[५] भ1-आतशब्दे
[६] त2- "इत्यादौ। मृगो धावति" नास्ति
[७] अ4-रूपेत्यनुपदमेव
[८] अ1- तु न व्याख्यानं, त2,त्रि-त्वया व्याख्यातम्
[९] द3-पचतिभवतीत्यत्रापि
[१०] जै-साध्यवर्तिता

अयमर्थः - पश्येत्यत्र क्रियायाः साध्यत्वम्, स्वस्मिन् कारकाणामन्वयः, स्वस्य वा कारकत्वेनान्यान्वयित्वाभावः[२]। धावतीत्यस्याः[३] साधनत्वं तु[४] कारकत्वेनान्यस्मिन् स्वस्यान्वयः। इत्थं च "पचति भवती"त्यत्राप्येककर्तृका वर्तमाना या पचिक्रिया एकतत्कर्तृका[५] वर्तमाना[६] भवनक्रियेति बोधात्[७] तत्राप्यूह्यम्। एवं च "पश्य मृगो धावति" इत्यादावेकमृगाभिन्नाश्रयिका या[८] वर्तमाना धावन[९]क्रिया तद्विषयकं यदिष्टसाधनीभूतं दर्शनं तदनुकूला भावनेति बोधः।

अथाख्यातान्तवाच्यस्य[१०] भावस्यासत्त्वावस्थापन्नतेति सिद्धान्तः। तत् कथं कर्मीभूता[११] आख्यातस्थलेऽर्थः[१२]।

उक्तं हि वाक्यपदीये-

"असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते" (वा.प.)

इति[१३] चेन्मैवम्, करण[१४]त्वादिनान्यानन्वयित्वं[१५] लिङ्गानन्वयित्वं[१६] वा तदिति भावात्[१७]। एतदन्यादृशत्वं[१८] द्रव्यत्वमित्याहुः। तत्त्वं[१] पुनरनुपदं वक्ष्यामः।[२] "पश्य

[१] अ1-कल्पिता

[२] द1,त1,भ1,त5- "अन्य" नास्ति

[३] के3,अ4-धावतीत्यत्र तस्याः

[४] त2-च

[५] अ3-एककर्तृका

[६] के3,अ4-"वर्तमाना" नास्ति

[७] त2-बोधः

[८] अ3,भ1-"या" नास्ति

[९] द6-वर्तमानधावन

[१०] जै- "अथ "नास्ति, त2-वाचकस्य,भ3-"स्य" नास्ति

[११] अ1-कर्मभूत

[१२] अ1-स्थले इत्यप्यर्थः, अ3-"अर्थः" नास्ति,भ1-इत्यर्थः

[१३] त3,द3-इतीति

[१४] अ3,त5-कारण

[१५] अ1-करणत्वादिनास्यानन्वयित्वं,भ1-त्वादिनान्यायित्वम्

[१६] अ3,जो2,द4,अ4- "लिङ्गानन्वयित्वं" नास्ति

[१७] अ1-संभवात्

[१८] त2-एतदन्यादृशं

मृगो धावती"त्यादौ वाक्यार्थभूतापि क्रिया[३] क्रियान्तरं प्रति कर्तृत्व[४]कर्मत्वाभ्यां स्वाभाव्यादन्वेतीति हि[५] निर्णीतं "सरूप"(पा.1-2-64)सूत्रे "सार्वधातुके यगि"(पा.3-1-67)ति सूत्रे च भाष्यादौ[६]। घञादिषु पाक इत्यादौ[७]। अत्र[८] भागाभ्यां प्रकृतिप्रत्ययभागाभ्याम्[९]। तत्र प्रकृत्या असत्त्वरूपाया[१०] एवोपस्थितिः। न चात्र मानाभावः, "ओदनस्य पाक[११]" इत्यादिकर्तृकर्मप्रत्ययानां मानत्वात्। अन्यथा विना क्रियां कारकाणामनन्वयेन[१२] तद्वाचकप्रत्ययासंभवात्।

न चाध्याहृत[१३]तिङन्तार्थक्रियायामेव कारकान्वयः, "कर्तृकर्मणोः कृति"(पा.2-3-65) इति कृद्योगषष्ठ्यभावापत्तेः[१४]। "न लोकाव्ययनिष्ठाखलर्थतृनाम्[१५]"(पा.2-3-69) इति निषेधेनाध्याहृतक्रियान्वये षष्ठ्यसंभवाच्च। "ओदनपाक" इत्यादि[१६]षष्ठीसमासानापत्तेश्च[१७]। "कृद्योगा[१८] च षष्ठी समस्यत"28 इति वाक्यविहितस्यापि[१९] षष्ठ्यसंभवात् षष्ठ्यन्तस्य उत्तरपदार्थेनानन्वये[१] "भार्या राज्ञः पुत्रो[२]

---

[१] त2-तत्तु

[२] के3,अ4-"पचतिभवति"इत्यधिकम्

[३] त2,द3- "क्रिया" नास्ति

[४] त2- "त्व" नास्ति

[५] अ3-"हि" नास्ति

[६] अ1-भाष्ये, द3- "सार्वधातुके यगिति सूत्रे"नास्ति

[७] त1,त5- "घञादिषु पाक इत्यादौ" नास्ति

[८] अ1-तत्र

[९] जो2- "अत्र भागाभ्यां प्रकृतिप्रत्ययभागाभ्याम्" नास्ति

[१०] भार1,ब1,1900,द3-प्रकृत्याः सत्त्वरूपायाः, जो2,के3,अ4-प्रकृत्या असत्त्वभूतायाः

[११] अ1-पाचक

[१२] जै-कारकाणामन्वयेन

[१३] के3,अ4-चात्राध्याहृत

[१४] जो2-षष्ठ्यभावप्रसङ्गात्,के3,अ4-कृद्योगे षष्ठ्यभावापत्तेः, द4-षष्ठ्यनापत्तेः

[१५] के3-तृणाम्

[१६] भ1,द7-इति

[१७]जै- "कृद्योगषष्ठ्यभावापत्तेः" इत्यारभ्य "षष्ठीसमासानापत्तेश्च" इत्यन्तं ग्रन्थः नास्ति, के3-समासानुपपत्तेश्च, अ1-समासानापत्तिश्च

[१८] के3,अ4-कृद्योगलक्षणा

[१९] वा2- "षष्ठ्यसंभवाच्च" इत्यारभ्य "वाक्यविहितस्यापि" इत्यन्तं ग्रन्थः नास्ति

देवदत्तस्ये"त्यादाविवासामर्थ्याच्चासंभवात्[३]। "समर्थः पदविधिः"(पा.2-1-1) इति परिभाषणात्। [४]"विधेर्वस्त्रकृति"रित्यादौ सावकाशत्वेना[५]नर्थक्य स्याप्यभावात्[६]। न चौ[७]दनस्य पाक इत्यादि[८] शेषषष्ठ्यैव भवेत् , समासोऽपि तयैवा[९]स्त्विति वाच्यम्, "नल[१०]पाकः[११], शंष(शश)पाकः[१२]" इत्यादिषु कर्तृत्वादि[१३]प्रकारकबोधानुभवानापत्तेः[१४]। "आश्चर्यं[१५] गवां दोहोऽगोपेने[१६]" त्यादेरसिद्ध्यापत्तेश्च। "उभयप्राप्तौ कर्मणी" (पा.2-3-66)त्यस्य "कर्तृकर्मणोः कृती"(पा.2-3-65)ति प्राप्तनियमार्थत्वात्। "अनन्तरस्ये"ति न्यायात्। उभयपदलिङ्गाच्च। शेषषष्ठ्याः सर्वत्राविशेषात्। किं च, शेषषष्ठ्यैव[१७] निर्वाहाभ्युपगमे[१८] "कर्तृकर्मणोःकृती"(पा.2-3-65)ति विधिवैयर्थ्यं स्यात्[१]। "गतिकारकोपपदात् कृत्"(पा.6-2-139) इत्यादिविहित-

---

[१] के3-"अनन्वये" नास्ति, भ3-उत्तरपदार्थेनान्वये

[२] के3,अ4-पुरुषो

[३]त1,त5-विवासामर्थ्याच्च सम्भवात्

[४]भ2-नन्वसामर्थ्येपि कृद्योगा च षष्ठीतिसमासविधेरानर्थक्यात्समासो भविष्यति इति चेन्न वस्त्रकृतिरित्यादौ सावकाशत्वात् इत्याह-विधेरिति इति टिप्पणी

[५]जो2-सावकाशेना

[६]ब1-स्याप्यसम्भवात्

[७]द3- "ओदनपाक इत्यादिषष्ठीसमासानापत्तेश्च " इत्यारभ्य "न चौदनस्य" इत्यत्र "न च" पर्यन्तं ग्रन्थः नास्ति

[८]अ1-इत्यादौ,अ4-इति

[९] द6,द7-तथैवा

[१०]अ3-नलः

[११] भ1-नलकाः

[१२]अ1-चुल्लीपाकः, अ3-शान्तिपाकः, वा2-पल्लीपाकः, त1-शुण्ठपाकः, जै,भार1,द1,द2,त3,1900, भ1,भ2,भ3,1915,म-शुण्ठीपाकः, जो2,द4-शुण्ठिपाकः, ब1-शब्दपाकः,त2-शुण्डीपाक, ज1-शङ्खपाकः

[१३] अ4-कर्त्रादि

[१४] अ1-कर्तृकादिप्रकारकबोधानापत्तेः, के3-अनुभवनापत्तेः, अ4-.....बोधानापत्तेः

[१५] अ3,भ1-आश्चर्यो

[१६] के3,अ4-अगोपालेन

[१७] अ1-"सर्वत्र" अधिकं

[१८] जो2-भ्युपगते

स्वरलाभार्थं तदा[२]रम्भ इति चेत्, तर्ह्योदनस्य[३] पाक[४] इत्यादावपि स्वरार्थं[५] कारकषष्ठ्यभ्युपगमो दुर्वारः। एवं रीत्या "काष्ठैः पाक" इत्यत्रापीष्टापत्तिरेव। एवं चोक्तपूर्वपक्षे इष्टापत्तिरिति[६] भावः।

---

क्रियाया सिद्धत्वसाध्यत्वविवेकाय ग्रन्थमुत्थापयति - ननु क्रियाया वाच्यत्वे इत्यादिना॥ पाकः इत्यत्रापि क्रियाप्रतीतिः स्यात् धातोः सत्त्वात्। तदाह – वाचकस्येति॥ यथा आख्यातस्थले तिङन्तस्थले धातोः सत्त्वात्क्रियावाचकत्वं तथात्रापीति भावः।

पाक इति स्थले क्रियाप्रतीतिं दूषयति - न चेष्टापत्तिरिति॥ इष्टापत्तिं परिहरति - सत्त्वरूपाया इति॥ पाक इत्यत्र सत्त्वरूपाया एव क्रियायाः प्रतीत्या साध्यत्वेन तत्प्रतीत्यनुपपत्तेः।

ननु पाक इत्यत्र सत्त्वेन क्रियायाः प्रतीतौ मानाभाव इत्यत आह - कृदभिहित इति॥ कृत्प्रत्ययेन घञादिना अभिहितः कथितो भावः क्रिया द्रव्यवत् सत्त्ववत् प्रकाशते प्रतीयते, भाष्यस्यैव मानत्वात्।

आख्यात इव पाक इत्यत्रापि साध्यत्वेन प्रतीतौ तादृशभाष्यविरोधाच्च। पाक इत्यत्र धातुसत्त्वेऽपि साध्यत्वेन प्रतीतेः व्यभिचारेण न धातोरसत्त्वरूपा क्रिया वाच्येत्यत आह - आख्यातशब्दे इत्यादि॥

कारिकार्थमाह - आख्यातशब्दे आख्यातघटितशब्दे पश्यमृगो धावतीत्यादौ, भागाभ्यां धावतीति पश्येति भागाभ्यां तिङन्ताभ्यां, साध्यसाधनवर्तिता। साध्येति॥ साध्यत्वेन प्रतीयमानरूपत्वेन। साधनेति॥ साधनत्वेनप्रतीयमानत्व-

---

[१] वा2- "अनन्तरस्येति" इत्यारभ्य "विधिवैयर्थ्यं स्यात्" इत्यन्तं ग्रन्थः नास्ति

[२] त2-तथा

[३] त1,त5-स्वरलाभार्थमितिचेन्न। ओदनस्य

[४] अ1-"ओदनपाकः" अधिकं

[५] के3-स्वरार्थमपि

[६] के3-इष्टापत्तिरेवेति

रूपेण अभिधीयमानयोः क्रिययोः वर्तिता शक्तत्वम्। पश्येत्यस्य साध्यक्रियायां शक्तत्वम्, धावतीत्यस्य साधनत्वविशिष्टक्रियायां शक्तत्वम्।

तदाह - साध्यसाधनवर्तिता यथाक्रमं पश्यभागेन साध्यवर्तिता, धावतिभागेनसाधनवर्तिता यथा शास्त्रे प्रकल्पिता इति॥ अत्र भागाभ्यामित्यस्य प्रकृतिप्रत्ययभागाभ्यामिति यदुक्तं तदपव्याख्यानमेवेति दर्शयति – प्रकृतिप्रत्ययेति॥ अत्र क्रिययोः धावनदर्शनयोः साध्यसाधनभावं दर्शयति - अयमर्थ इत्यादिना॥ पश्येत्यत्र या दर्शनात्मिका क्रिया तस्य साध्यत्वं यदस्ति तत् स्वस्मिन् दर्शनात्मके कारकाणां धावनादीनामन्वयेन, स्वस्य दर्शनस्य कारकत्वेन अन्यत्र साधनत्वेनान्वयभावेन। धावनस्य सत्त्वरूपत्वमाह – धावतीत्यस्याः ॥ धावतीत्यनेन बोध्यायाः साधनत्वन्तु सत्त्वरूपत्वन्तु कारकत्वेनान्वयित्वम्।

क्रिययोः साध्यसाधनरूपत्वं विवेचयितुं शाब्दबोधाकारमाह – इत्थञ्चेति॥ पचति भवतीति॥ सेयं वाचो युक्तिः भवत्यादिक्रियायाः पच्यादिक्रियाः कर्त्र्यो भवन्तीति भाष्यादस्य वाक्यस्य साधुत्वम्। शाब्दबोधस्तु मूले उक्तः। एककर्तृकेति॥ एका सा पचिक्रिया कर्ता यस्या इति विग्रहः। पश्य मृगो धावतीत्यस्य बोधाकारमाह – एवञ्चेति॥ अनेन वाक्येन मृगकर्तृकोत्कटधावनस्यैव दर्शनान्वयित्वेन प्रतिपिपादयिषितत्वेन, विशिष्टधावनस्यैव दर्शनेऽन्वयः। लोडर्थः इष्टसाधानत्वम् । धावनस्य विषयतया दर्शनेऽन्वयः। संगृह्य शाब्दबोधो मूले उक्तः। तथा च धावनस्य विषयतया दर्शनेऽन्वयः। संगृह्य शाब्दबोधो मूले उक्तः। तथा च धावनस्य कारकत्वेन दर्शनेऽन्वयात् साधनत्वम् दर्शने धावनस्य कारकत्वेनान्वयाद्दर्शनस्य साध्यत्वं सिद्धमिति भावः।

पश्य मृगो धावतीत्यत्र धावनस्य साधनत्वेनान्वयमाक्षिपति – अथाख्यातान्तेति॥ अतद्गुणसंविज्ञानो बहुव्रीहिः। धातुवाच्यस्य भावस्य असत्त्वावस्थास्वभावः साध्यतैवेति सिद्धान्तनिर्णयः। एवं सति आख्यातस्थले धावतीत्यादौ॥ कर्मत्वेन दर्शनेन्वयेन कर्मीभूतः सत्त्वभूतः अर्थः सम्पन्नःधावनरूपः। धातुवाच्या क्रिया असत्त्वभूतैवेत्यत्र वाक्यपदीयकारस्य सम्मतिमाह - उक्तं हि वाक्यपदीये -'असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते' इति। तिङ्पदैः तिङ्कृतिभिः

धातुभिः। सीदतो लिङ्गसंख्ये यस्मिंस्तत् सत्त्वम् लिङ्गसंख्यान्वयित्वं । तद्भिन्नम् असत्त्वम् अद्रव्यम् , तत्प्राप्तः असत्त्वभूतः।भू प्राप्तौ इत्यस्य भूत इति रूपम् । असत्त्वशब्दस्य धर्मपरत्वम्, असत्त्वत्वं प्राप्त इत्यर्थः। यद्वा उपमार्थे भूतशब्दो यथा पितृभूतः। अयमर्थः महाभाष्यप्रारम्भे सामान्यभूतं स शब्द इति भाष्यव्याख्याने प्रदीपे उक्तः। असत्त्वं परिष्कृत्योक्ताक्षेपं वारयति – कर्मत्वातिरिक्तकरणत्वादिना-नन्वयित्वं लिङ्गानन्वयित्वम् वा तत् असत्त्वभूतत्वम्। तेन कर्मत्वेनान्वयित्वेऽपि नासत्त्वभूतत्वहानिः। भावः अभिप्रायः। आहुर्वैयाकरणाः। तत्त्वमिति॥ साध्य-साधनविभागरूपं तत्त्वमित्यर्थः। तत्त्वमेवाह - पश्य मृगो धावतीति॥ आदिना पचति भवतीत्यादि गृह्यते। वाक्यार्थभूतापि॥ पाक इत्यादौ तु पदार्थभूतैव। धावतीत्यत्र धावनात्मिका क्रिया तु वाक्यार्थभूतैव। वाक्यार्थग्रहाभावे कर्मत्वेन तदन्वयस्य ज्ञातुमशक्यत्वात्। पचति भवतीत्यत्र पाकक्रिया कर्तृत्वेन भावना-न्वयिनी, पश्य मृगो धावतीत्यत्र धावनक्रिया दर्शनकर्मत्वेनान्वयिनी। अन्वय-प्रयोजकमाह – स्वभावादिति॥ कारिकांशं व्याख्याति - घञादिषु इति॥ घञादिषु इत्यस्य व्याख्यानम् – पाक इत्यादाविति॥ घञादिष्वित्यस्य घञन्तेषु इत्यर्थः अत्र भाष्यादौ। घञादिषु पाक इत्यादौ। अत्र भागाभ्यामिति। पाक इत्यत्र भागाभ्यामि-त्यस्यानुवृत्तस्य प्रकृतिप्रत्ययमात्रमित्यर्थः, शब्दाधिकारात्। अत्र स्वाभिप्रायमाह - तत्र प्रकृत्या तत्र पाक इत्यत्र प्रकृत्या पच् रूपया। असत्त्वेतिच्छेदः। मूलपुस्तकेषु सत्त्वरूपाया इति विच्छिद्य पाठः पृथग् दृश्यते, स नोपयुक्तः सन्दर्भायोग्यत्वात्। तथा च प्रकृत्या असत्त्वरूपाया एवोपस्थितिः। असत्त्वे मानानुपपत्तिं परिहरन्नाह - न चात्रेति॥ प्रयोगानुपपत्तिरूपमानमाह - ओदनस्य पाक इति। ओदनस्येति "कर्तृकर्मणोः कृती"(पा.2-3-65) त्यनेन कर्मणि षष्ठी। अन्यथा पाक इत्यत्र प्रकृतिभागेन पच् इत्यनेनासत्त्वरूपाया अनुपस्थितौ। क्रियाम् असत्त्वरूपां क्रियां। विना अभावेन। कारकाणामनन्वयेन अन्वयिनोऽभावात् कारकत्वासंभवेन। तद्वाचकस्य कारकवाचकप्रत्ययस्य ओदनस्येत्यत्र कर्मवाचकस्य षष्ठीरूपस्य असम्भवात् विधानासम्भवात्। ननु पाक इत्यत्र प्रकृत्या असत्त्वभूता क्रिया माभिधीयताम्। पाकः कृत इत्यध्याहृतकरणादिक्रियामादाय ओदनादेः कर्मत्वेन कर्मषष्ठ्युपपत्तिरित्याशङ्कते - न चाध्याहृतक्रियायामेवेति॥ अध्याहृतक्रियामादाय

निर्वाहं निरस्यति। कर्तृकर्मेति॥ अनेन सूत्रेण कृद्योगे एव षष्ठीविधानात् प्रत्यासत्त्या यादृशकृद्योगे षष्ठी तादृशकृत्प्रकृत्युपस्थाप्यक्रियानिरूपितोक्तकर्मत्ववदर्थवाचकात्षष्ठीत्यर्थस्य षष्ठीविधायकस्य सूत्रस्याध्याहारेऽप्रवृत्तेस्तदाह – षष्ठ्यभावापत्तेरिति॥ ननु कृद्योगे एव षष्ठीत्येव तदर्थस्तथा चात्र कृद्योगसत्त्वात्षष्ठीप्रवृत्तौ बाधकाभाव इत्यत आह - न लोकेति॥ कृतः करोति भवतीत्याद्यध्याहारे षष्ठ्यप्राप्तिः, "न लोके(पा.2.3.69)" ति निषेधात्। पाक इत्यत्र प्रकृत्या साध्यक्रियाया अनुपस्थितौ दोषान्तरमाह - ओदनस्य पाक इत्यादि॥ ओदनस्य पाकः ओदनपाक इति षष्ठीसमास इष्टः, स न स्यात्। समासोपपादनाय विधायकमाह – कृद्योगेति॥ कृदन्तयोगे षष्ठी समस्यत इत्यर्थः। अत्रापि कृद्योगसत्त्वात्षष्ठीसमासोऽस्तु। निषेधेति॥ वाक्यविहितस्य कृद्योगेति वार्तिकविहितस्य। षष्ठ्यसम्भवात् षष्ठीसमासासम्भवात्। तदभावे हेतुमाह –षष्ठ्यन्तस्येति॥ "समर्थः पदविधि"(पा.2.1.1)रिति सूत्रेण समासविध्यादेः पदविधेः परस्परान्वयित्वरूपसामर्थ्यनिमित्तकत्वेन यथा भार्या राज्ञः पुरुषो देवदत्तस्येत्यत्र देवदत्तान्वयिना पुरुषेण भार्यान्वयिनो राज्ञः समासो न भवति परस्परासामर्थ्यात्, तथैव अध्याहारे षष्ठ्यन्तस्यौदनस्य अध्याहृतक्रियायामेवान्वयेन उत्तरपदार्थे समस्यमानत्वेन विवक्षिते पाकपदार्थेऽनन्वयेनासामर्थ्यात्समासानुपपत्तिरेव स्यादित्यर्थो मूलग्रन्थस्य। असामर्थ्याच्चेति॥ चो हेतौ। यतः असामर्थ्यम् अतः समासासम्भव इत्यर्थः।

नन्वेवं सति कृद्योगेति वाक्यमनर्थकं स्याल्लक्ष्याभावादत आह - विधेः वस्त्रकृतिरिति ॥ वस्त्रस्य कृतिरित्यत्र कृद्योगा षष्ठीत्यस्य चारितार्थ्यमिति भावः। समासोपपादनायोपायमाह - न चौदनस्येति॥ ओदनस्येति षष्ठी कर्मणि मास्तु "षष्ठी शेषे"(पा.2.3.50) इति सूत्रेण शेषे एवास्तु , समासोऽपि "षष्ठी"(पा.2.2.8) ति सूत्रेण शेषषष्ठ्या एव स्यादिति भावः। शेषषष्ठ्यैवेति ॥ एवकारश्च्छेद्यः। वादिमतं निरस्यति - नलपाकः इत्यादिना॥ शाब्दबोधवैलक्षण्योपपत्तये कारकषष्ठ्या आवश्यकत्वात्। तथाहि - नलस्य पाक इत्यत्र शेषषष्ठ्यां नलसम्बन्धीपाकः इत्येव बोधः। कर्तरि षष्ठ्यां नलकर्तृकः पाकः इति कर्तृत्वप्रकारकः। नलः कश्चिद् राजा। एवं शुण्ठीपाक इत्यत्रापि। अत्र कर्मणि षष्ठीसत्त्वात् शुण्ठीकर्मकः पाक इति बोधः। तथा च कर्तृत्वादिप्रकारकविलक्षणबोधोपपत्तये कर्त्रादिषष्ठीविधानाय पाक इत्यादौ

प्रकृत्या साध्यावस्थापन्ना क्रियाभिधातव्या। तदाह – **कर्तृत्वादिप्रकारकबोधानापत्तेः॥** पाक इत्यादौ प्रकृत्या असत्त्वरूपाया अनुपस्थितौ कर्त्राद्यर्थे षष्ठ्यप्राप्तौ।**आश्चर्यो गवां दोहोऽगोपेनेत्यादेरिति॥** दोह इत्यादौ प्रकृत्या असत्त्वक्रियाया अनुपस्थाने गवामित्यत्र षष्ठ्यसिद्धिरेव स्यात्, न च "उभयप्राप्तौ कर्मणी" (पा. 2-3-66) ति सूत्रेण षष्ठी स्यादत आह - **उभयप्राप्तौ कर्मणीत्यस्याप्यप्राप्तेः॥** "कर्तृकर्मणो"(पा. 2-3-65) रित्यस्यैवायं नियम इत्यत्र मानमाह – **अनन्तरस्येति॥** अनन्तरस्य विधिर्भवति प्रतिषेधो वेति न्यायशरीरम्। **उभयपदलिङ्गाच्चेति।** उभयपदेन यत्र कर्तृकर्मणोरुभयोरर्थयोः षष्ठी प्राप्ता तत्रायं योग इति बोधनात् कर्तृकर्मणोरित्यस्य प्राप्तौ एवायम् नियम इति भावः। शेषषष्ठ्याः अगतिकगतित्वं बोधयति - शेषषष्ठ्याः सर्वत्रापि अविशेषात् सार्वत्रिकत्वेन तादृशबोधाजनकत्वात्। ननु अगत्यर्थं शेषषष्ठ्यस्तु, तत्राह- **किञ्चेति॥** वैयर्थ्यम् सर्वत्रैव शेषषष्ठ्या एव निर्वाहात्।

कर्तृकर्मणोः कृतीत्यस्य सार्थक्यमाह - **"गतिकारकोपपदात् कृत्" इति॥** एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे इति सूत्रार्थः। तत्र कारकात्परस्य कृदन्तस्योदाहरणमिध्मव्रश्चन इत्यादि। यदि इध्मशब्दात् शेषषष्ठी तदा कारकपूर्वस्य कृदन्तस्याभावेन तदंशे सूत्रानर्थक्यमेव स्यादतस्तत्सार्थक्याय तत्र कर्मषष्ठीविधानाय सूत्रमावश्यकमिति भावः। समाधानमाह - **तह्योदनस्येत्यत्र तुल्यन्यायात्।** **काष्ठैः पाक इति॥** प्रकृत्या असत्त्वरूपायाः क्रियाया उपस्थितौ तन्निरूपितकारकत्वस्य काष्ठेषु सत्त्वात्तृतीयाप्राप्तौ बाधकाभावात्। **एवमुक्तपूर्वपक्षे इति॥** पूर्वं काष्ठैः पाक इति स्यादिति पूर्वपक्षः कृतः तत्र इष्टापत्तिरित्यर्थः।

**80.** अनया च[१] रीत्या[२] फलमप्यसत्त्वावस्थापन्नमेवोच्यते[३] धातुना[४]। अन्यथा "शोभनं पचति, स्तोकं पचती"तिवत् "शोभनं पाक" इत्यनापत्तेः[५]। धात्वर्थे[१]

---

[१] जै,द4,द5- "च " नास्ति

[२] अ4-उक्त्या

[३] अ1-"अवस्था" नास्ति

[४] के3,अ4-"धातुना" नास्ति, त2-धातूनां, अ4-फलमप्यसत्त्वापन्नमेवोच्यते

[५]अ1, जै-इत्यापत्तेः

साध्यत्वे[२]नोपस्थिते[३] सामानाधिकरण्येनान्वय एव नियमतस्तत्र[४] द्वितीया स्यात्, नान्यथा।

नन्वेवं द्वितीयां बाधित्वा "कर्तृकर्मणोः कृती"(पा.2-3-65)ति षष्ठी स्यादिति चेत्[५],

न ह्यत्र कर्मणि द्वितीया, किं तु[६] विशेषणविभक्तिवदभेदार्था साधुत्वमात्रार्था[७] वा। तत्र "स्तोकं पचती"त्यादौ क्लृप्तत्वादन्यस्यानभिधानाच्च द्वितीयैव कल्प्यते[८]। अत एव स्तोकार्थो विना भावनां[९] फल एवान्वेति, कारकत्वे तदसंभवात्।

भवतु वा कर्मत्वमर्थः। अस्तु च षष्ठी। अत एव यत्र[१०] करणतया धात्वर्थान्वयस्तत्र सामानाधिकरण्येनान्वये तृतीयैव "ज्योतिष्टोमेन यजेते"त्यादौ। इयान् परं[११] भेदः- फलांशे साध्यत्वमसत्त्वं च {लिङ्गानन्वयित्वं च}[१२]लिङ्गानन्वयित्वमात्रम्, क्रियायां तु करणत्वादिनानन्वयित्वमपीति दिक्॥ 14॥

16. साध्यसिद्धक्रिययोर्व्यवस्थाप्रदर्शनम्

एतदेव[१३] स्पष्टयति-

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः[29]॥ 15॥

---

[१] अ3-साध्यधात्वर्थे
[२] त2-साधनत्वे
[३] भ1,द7-नोपस्थापिते
[४] 1900-नियमस्तत्र
[५] अ1-चेन्न
[६] अ3,भ1-"किं तु" नास्ति
[७] द3- "साधुत्वमात्रार्था"नास्ति
[८] त्रि,द7-कल्पते
[९] त2- "भावनां " नास्ति
[१०] अ3,भ1-"यत्र" नास्ति
[११] 1900-वरं
[१२] {} एतत् कोष्ठकान्तर्गतं अन्यत्र नास्ति।
[१३] जो2-एतत्

तत्र घञाद्यन्ते। अत्र[१] प्रतीयत इति[२] शेषः। बोधकमाह- धातुरूपेति। क्रियेति फल[3]व्यापारोभयसाधारण्येन साध्यत्वान्वयाय साधारणशब्देन निर्देशः। तान्त्रिकैरनेनोभयोर्व्यवह्रियमाणत्वात्। सिद्धभावस्त्विति। न च घञादिभिर्व्यापार-फलयोः सिद्धत्वेन बोधने मानाभावः, पाकपदात् तथाप्रतीतेरेव मानत्वात्। अन्यथा फलानुत्पाददशायां व्यापाराभिप्रायेण पाको भवति नष्टो वेत्यादि क्रियान्तराकाङ्क्षानापत्तेः[४]। स्तोकः[५] पाक इत्यनापत्तेश्च[६]।

## 16.1 स्तोकः पाक इत्यादिस्थलेषु अन्वयव्यवस्था

तस्माद्धात्वर्थफलान्वये[७] स्तोकादिशब्देभ्यो द्वितीया नपुंसकलिङ्गता च[८]। धात्वर्थभावनायामन्वये "ज्योतिष्टोमेन भक्तिपूर्वं[९] यजेते"तिवत् प्रथमासंभवे[१०]ऽपि नपुंसकलिङ्गमात्रम्। "सामान्ये[११] नपुंसकम्" इत्यस्य[१२] दुर्वारत्वात्। घञार्थान्वये तु प्रथमा पुल्लिङ्गता चेति तद्विभागाय[१३] शक्त्यन्तरमावश्यकमिति भावः। एतदभिप्रायेणैव[१४] "कृदभिहितो भावो द्रव्यवत् प्रकाशत[१५]" इति भाष्यम्[30]। तथा च न[१६] भाष्यविरोध इति भावः।[१७] [१]उक्तं च वाक्यपदीये-

---

[१] के3,अ4-"अत्र" नास्ति

[२] द3- "दिक्" इत्यारभ्य "प्रतीयते इति" इत्यन्तं ग्रन्थः नास्ति

[3] त2-"फल" नास्ति

[४] अ1-" च" अधिकम्, त1-क्रियान्तरानाकाङ्क्षापत्तेः

[५] के3,अ4-स्तेकं

[६] अ1-"स्तोकः पाक इत्यनापत्तेश्च" नास्ति

[७] अ1-"तु" अधिकम्

[८] अ3-वा

[९] के3,अ4-पूर्वकं

[१०] भ3,द6-प्रथमात्वे

[११] जै-साम्यान्ये

[१२] अ4-सामान्ये नपुंसकस्य

[१३] अ3-"तत्" नास्ति,द2-तत्तद्विभागाय

[१४] भ1- "कृदभिप्रायेणैव" इत्यधिकम्

[१५] अ1-प्रकाश्यत

[१६] अ1-"न" नास्ति

[१७] 1915-एतदभिप्रायेणैव इत्यारभ्य भावः इति पर्यन्तं वाक्यद्वयं नास्ति

"क्रियायाः सिद्धतावस्था[2] साध्यावस्था च कीर्तिता।

सिद्धतां द्रव्यमिच्छन्ति तत्रैवेच्छन्ति[3] घञ्विधिम्॥"(वा.प.)इति।

एतेन[4] संख्यावर्तमानत्वाद्यबोधकानां घञादीनां प्रयोगसाधुतामात्रमिति नैयायिकनवीनोक्तमपास्तम्। [स्तोकः[5]पाक इति सिद्धये तस्यापि शक्तिकल्पना-वश्यकत्वात्। यच्च[6] पाक इत्यादि घञन्तशक्त्योपस्थिते[7]ऽन्वये][8] "स्तोकः पाक" इति, तन्न, समुदायशक्तावुभयोरानुपूर्व्याः शक्ततावच्छेदकत्वापत्तौ गौरवात्। लाघवादनुशासनाच्चास्मदुक्तस्यैव युक्तत्वाच्चेति[9]।

---

अनयेति॥ उक्तरीत्या यथा क्रिया असत्त्वरूपैव, तथैव धातुवाच्यं फलमपि, तथा असत्त्वरूपमेव। अन्यथा असत्त्वावस्थापन्नतयानभिधाने। शोभनं पाक इत्यनापत्तेरिति॥ यथा पचतीत्यादौ फलमसत्त्वतयोपस्थितम् अभिधीयते तथा शोभनं पाक इत्यत्रापि तथैवाभिधीयते। तथा सत्येव शोभनं पाक इत्यत्र द्वितीया।

उपपादयति – धात्वर्थे इत्यादिना॥ यदि साध्यत्वेन धात्वर्थः फलं समुपस्थितं तत्र साध्यसामानाधिकरण्येनाभेदेनान्वये शोभनादेः, नियमः क्रियाविशेषणानां कर्मत्वं क्लीबत्वं चेति नियमः प्रवर्तत इति शेषः। तत्र एवं सति द्वितीया स्यादिति भावः।

शोभनं पचतीत्यत्र द्वितीयाभावमाशङ्कते - नन्वेवं द्वितीयां बाधित्वेति॥ सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेदिति न्यायेन। षष्ठीं प्रतिषेधति - न ह्यत्रेति॥ कर्मणि द्वितीयाया एव "कर्तृकर्मणो" (पा.2-3-65)रिति बाधकमिति

---

[1] ज2,ब2,ब3- पुंलिगता वेति इत्यधिकम्

[2] द1-साध्यतावस्था

[3] त2-"तत्रैवेच्छन्ति"नास्ति

[4] अ3-तेन

[5] त3-स्तोकं

[6] के3-तच्च

[7] अ1-घञन्तशब्दावस्थिते, त1,के3,त5,अ4-घञन्तशब्दोपस्थिते

[8] [ ] – एतत्कोष्टकान्तर्गतः ग्रन्थः एतन्मातृकां विहाय प्रायः सर्वत्रास्ति, आवश्यकश्च।

[9] जै-युक्तत्वादिति

ध्येयम्। शोभनमिति धातूपस्थाप्ये फलेऽभेदेन विशेषणम्। फलस्य च साध्यव्यापारं प्रति कर्मत्वेन, तत्सामानाधिकरण्यात् शोभनमित्यत्र द्वितीया। न तु कर्मणि द्वितीयेति भावः। तस्याश्च अभेद एवार्थः।

समानाधिकरणविशेषणविभक्तेरभेदार्थकत्वम्, साधुत्वार्थकत्वं वेति व्युत्पत्तिवादादौ निर्णीतत्वात्। तत्र स्तोकं पचतीति॥ क्लृप्तत्वात् सर्वैः स्वीकृतत्वात्। अत एव साध्यत्वेन प्रतीयमानत्वादेव। स्तोकार्थो विनेति॥ स्तोकार्थः स्तोकं पाक इत्यत्र स्तोकपदार्थः भावनायां नान्वेतीत्यर्थः। फले एवान्वेति न तु व्यापारे। स्तोकमित्यत्र द्वितीयायाः कारकत्वे सत्त्वरूपत्वे तदसम्भवात् स्तोकार्थान्वयस्य फलांशेऽन्वयस्यासम्भवात्। अयोग्यत्वात् साध्यत्वस्यैव कारकान्वयितावच्छेदकत्वात्।

तुष्यतु दुर्जनन्यायेनाह – भवतु वेति॥ स्तोकमित्यत्र द्वितीयायाः कर्मत्वमर्थः। अस्तु वा षष्ठी॥ओदनस्य पाक इत्यादौ। अत एव यत्रेति॥ येनरूपेणान्वयविवक्षा तेन रूपेण भाने, तत्प्रयुक्तविभक्तेरौचित्यादेव। अग्निष्टोमेन यजेतेति॥ अत्र धात्वर्थयागस्य करणाकाङ्क्षायां भावनायां करणत्वेनान्वयः यागेन स्वर्गं भावयेत्। यागे अग्निष्टोमनाम्नो अभेदेनान्वयात् तत्रापि तृतीयैव, अग्निष्टोमेन यागेनेष्टं भावयेदिति बोधः। सामानाधिकरण्येन॥ यागेन सह अग्निष्टोमस्य सामानाधिकरण्यम् अभेदः।

फलव्यापारयोर्विशेषमाह - इयान् परं भेद इति॥ परं परन्तु, इयान् एतावान्, भेदो विशेषः, फलांशे धात्वर्थफलांशे, साध्यत्वं उक्तरूपम्, असत्त्वञ्च लिङ्गानन्वयित्वमात्रम्, न तु कारकत्वेनानन्वयित्वरूपम्। क्रियाया विशेषमाह – क्रियायान्तु॥ करणत्वादिनानन्वयित्वमपि। धावनादेः कर्मत्वादिनान्वयेन करणत्वेत्युक्तम्। अपिना लिङ्गानन्वयित्वग्रहणम्।

एतदेवं स्पष्टयति -साध्यत्वेन क्रिया तत्र इत्यादिना॥ तत्र पाक इत्यत्र साध्यत्वेनाभिधीयमाना क्रिया, धातुरूपं निबन्धनं बोधकं यस्याः सा धातुना अभिधीयमाना। तस्याः एकस्या एव क्रियायाः सिद्धभावः सिद्धत्वरूपं, स सिद्धभावः घञादिनिबन्धनः घञादिनाभिधीयमानः। आदिना अबादीनां ग्रहणम्।

तदाह मूले - तत्र घञाद्यन्ते॥ प्रतीयते क्रिया प्रतीयते इत्यन्वयः। घञादिना अभिधीयमानस्य सिद्धत्वमाक्षिपति - न च घञादिभिरिति॥ घञादिना उपस्थितो भावः, स फलसहित इति मन्यते, तथा प्रतीतौ तौ सिद्धत्वस्वभावौ। तत्र मानाकाङ्क्षायामयं पूर्वपक्षः।

तेन तयोस्तथा प्रतीतिरेवमानमित्याह – पाकपदादिति॥ सिद्धत्वेन प्रतीत्यभावे दोषमाह – अन्यथेति॥ तदर्थः साध्यत्वेन प्रतीतिरिति स्वीकारे, यत्र फलं नोत्पन्नं व्यापारोह्यारब्धस्तत्र पाको नष्टः वा भवति वेत्याकाङ्क्षा जायते सा आकाङ्क्षा एव घञादिना सिद्धत्वेनाभिधाने मानं, क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकत्वस्यैव सिद्धत्वात्। साध्यत्वे क्रियान्तराकाङ्क्षा नैव जायेत तस्याः तत्स्वभावात्।

ननु उक्तप्रश्नेन व्यापारस्य सिद्धत्वसिद्धावपि फलस्य तदसिद्धमेवेति चेदत्रोच्यते - यत्र पाकव्यापारो जायमानस्तत्र पाको जातो न वेति फलविषयक एव प्रश्नो नतु व्यापारविषयकः। व्यापारस्य जायमानस्य ज्ञातत्वात् फलं विधास्यमानं जिज्ञास्यमानमिति पाको जातो न वेति प्रश्नः फलमेव विषयीकरोति।

तथा सति फलस्यापि घञादिनाभिधानमत्रत्यमेवोक्तमधस्तात्। ननु तेन फलाभिधानेऽपि सिद्धत्वेनाभिधाने मानाभाव एवेति चेत्तत्र फलपरकत्वे पाकः, पाकौ इति प्रयोगदर्शनस्यैव मानत्वात्। अन्यथा नपुंसकलिङ्गता एकवचनञ्चैव स्यात्। यत्र पाको जातो न वेति प्रश्नस्तत्र धातुनाभिहितं फलमेव विषयः धातुनाभिहितस्य साध्यत्वेनैवाभिधानात् पाकः पाकौ इत्यनापत्तेः। तदन्वयानुरोधेन स्तोकः पाक इत्यपि न स्यादित्याह -

स्तोकः पाकः इत्यनापत्तेश्च। निष्कर्षमाह- तस्माद् धात्वर्थफलेति॥ नपुंसकलिङ्गता चेति॥ क्रियाविशेषणानां कर्मत्वं क्लीबत्वं चेति स्वीकारात् घञर्थान्वये स्तोकः पाकः इति, तदाह - घञर्थान्वय इति॥ तद्विभागायेति॥ केचित् स्तोकः पाकः इत्याद्यनुरोधेन घञन्तस्यैव तादृशव्यापारे शक्तिं स्वीकुर्वन्ति, तान् निरस्यति – तद्विभागायेति॥ क्व स्तोकं पाकः क्व च स्तोकः पाक इत्यादिविभागाय।

शक्त्यन्तरम् पाक इत्यत्र पचधातोः साध्यक्रियायां घञादेः सिद्धक्रियायां पृथक् शक्तिकल्पनमावश्यकमिति भावः। वाक्यपदीयसंवादमाह -

क्रियायाः सिद्धतावस्था साध्यावस्था च कीर्तिता।
सिद्धतां द्रव्यमिच्छन्ति तत्रैवेच्छन्ति घञ्विधिम्॥

क्रियायाः द्विविधा अवस्था। सिद्धावस्था साध्यावस्था च। उक्तप्रकारेण तद्वयम् बोध्यम्। सिद्धतां द्रव्यमिच्छन्ति, कृदभिहित इति भाष्यात् तत्र द्रव्यभूतायां सिद्धतायामेव घञ्विधिं घञ्विधानमिच्छन्ति।

एतेन एतादृशप्रयोजनसत्त्वेन। घञादीनां भावप्रत्ययानां प्रयोजनाभावात् प्रयोगसाधुत्वमात्रार्थकत्वम् इत्यपास्तम्। निष्प्रयोजनत्वमाह – संख्यावर्तमानत्वाद्यबोधकानामिति॥

यदुक्तम्। नैयायिकनवीनोक्तमपास्तम्। एतेन पूर्वपठितेनान्वयः। प्रयोजनसत्त्वेन घञादीनां सिद्धक्रियायां शक्तिकल्पनमावश्यकमिति।

16.2 साध्यत्वसिद्धत्वयोः परिष्कारः

**81.** ननु साध्यत्वं लिङ्गाद्यनन्वयित्वं[1], तदन्वयित्वं[2] सिद्धत्वम्[3]। तत्[4] त्वदुक्तरीत्यैकस्यां विरुद्धं कथं धातुघञ्स्थले[5] भवेदिति चेत्, न ब्रूमस्तस्यां लिङ्गाद्यनन्वयम्। किं तु धातूपस्थाप्यायां तदन्वयो न[6], घञाद्युपस्थाप्ये तु स[7] इति[8]। अत एव भावनाशब्दो[9]पस्थाप्ये तदन्वयः सर्वसिद्धः[10]। अत एव भट्टपादैरुक्तम्[31]-

[1] अ1-लिङ्गसंख्यानन्वयित्वं, त2-लिङ्गानन्वितम्

[2] अ1-"च" अधिकम्

[3] ब1-"सिद्धत्वं" नास्ति

[4] अ1-तच्च, त2-तदन्वयि सिद्धत्वन्तु त्वदुक्तरीत्यैकस्यां, अ4-" तत्" इति नास्ति

[5] अ3-धातुघञन्तस्थले, त2-धातुघञर्थस्थले

[6] अ1-न तु

[7] अ1,के3,अ4-घञाद्युपस्थाप्यायामपि सः

[8] त3-किन्तु धातूपस्थाप्यायां तदनन्वयो नतु घञाद्युपस्थाप्यायां स इति

[9] अ1-पदो

[10] त2-सर्वसिद्धिः

"यादृशी भावनाख्याते धात्वर्थश्चापि यादृशः[१]।

नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः[२] क्वचित्॥"(त.वा.2-1-1-1)इति।

वस्तुतस्तु साध्यत्वं न[3] लिङ्गाद्यनन्वयित्वमत्र[४] संमतम्। "साध्यत्वेन क्रिया तत्रे"त्यादौ तृतीयया तस्य प्रतीयमानत्वप्रदर्शनात्।

"यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।" (वा.प.तृ.कि.1)

इति वाक्यपदीये "यादृशी[५] भावना"(त.वा.2-1-1-1) इति भट्टकारिकायां[६] वाच्यत्वेन[७] प्रदर्शनाच्च। नहि लिङ्गानन्वयित्वं[८] वाच्यं प्रतीयते वा, किं तु तदन्वयहेत्वभावादार्थिकम्।

यच्च भाष्ये[32] "क्रियया[९] क्रिया[१०] समवायं न गच्छती"त्यादिना[११] क्रियान्तर-साधनत्वेनानन्वयित्वं साध्यत्वमुक्तम्। साधनत्वेने[१२]त्युपादानात्"पक्त्वा[१३] गच्छती"त्यादौ सामानाधिकरण्योत्तरकालादिसंबन्धेनान्वयेऽपि न[१४] क्षतिरिति तन्न।

"कृष्णं नमेच्चेत्[१५] सुखं यायात्" इत्यादिहेतुहेतुमतोर्लिङि "भुक्त्वा तृप्यति, मानिनीं[१६] नत्वा मृडयति[१७], स्तुत्वा मादयति[१]" इत्यादौ च[२] भोजनादिजन्य-

---

[१] जो2,भ3,1915-तादृशः

[२] जो2-"पदैः" नास्ति

[3] 1900,1915-च

[४] त2-लिङ्गाद्यनन्वयित्वमात्रं

[५] त2-"यादृशी"नास्ति

[६] अ1,के3,अ4-"च"इत्यधिकम्

[७] अ1-वाच्यत्वे

[८] अ1-"त्वं" नास्ति, 1915-लिङ्गाद्यनन्वयित्वं, अ4-लिङ्गानन्वयित्वं

[९] भार1,त3-"क्रियया" नास्ति

[१०] द1-"क्रिया" नास्ति

[११] अ1-त्यादि

[१२] द3-साधनत्वेनो, 1915- साधनत्वं ने

[१३] त2-भुक्त्वा

[१४] अ1-"अपि न" नास्ति

[१५] अ1-"चेत्" नास्ति

[१६] के3-मनिनीयं

[१७] अ3-मृजयति, द4-मृदु पचति,भ1-मृग्यति

तृप्ति[३]बोधाच्च क्रिययोः साध्यसाधनभावेनान्वयादव्याप्तेः[४]। "पश्य मृगो धावति" "पचति भवती"त्यादौ कर्तृत्व[५]कर्मत्वेनाप्यन्वयाच्च। असाधनस्य कारक[६]-त्वानुपपत्तेः।

यत्तु "घटो भवति, घटं करोति" इत्यादावसिद्धस्यापि कर्तृत्वकर्म[त्व][७]दर्शनादसतः साधनत्वस्य चासंभवान्मुख्यं साधनत्वं[८] करणादेरेवाऽसिद्धस्य करणत्वाद्यदर्शनात्। कर्तृकर्मणोस्तु क्वचिन्मुख्यम्, क्वचिद् बुद्धिपरिकल्पित[९]सिद्धत्वमादाय गौणं[१०] साधनत्वम्। तथा च भाष्ये कारकान्तर्गत[११]मुख्यसाधनत्वपरिग्रहात् करणादि-कारकत्वेनानन्वयित्वं[१२] विवक्षितमिति नोक्तदोषावकाशः।

न हि परकीयपाक[१३]क्रियाचातुर्यं दृष्ट्वा मत्सरिणः "पाकेन वैरं कृतम्, पाकाय कालो नीत" इत्यादिप्रयोगवत् "पचति वैरं कृतमि"त्यादि प्रयुञ्जन्तीति[१४] कैयटे ध्वनितम्।

---

[१] 1900,1915-भुक्त्वा तृप्यति मानिनी, नत्वा मण्डयति, स्तुत्वा मादयति, भार1- भुक्त्वा तृप्यति मानिनी, नत्वा मृडयति, स्तुत्वा मोदयति, द1- भुक्त्रा तृप्यति मानिनी, नत्वा मृडयति, स्तुत्वा मादयति, त1,त3,जै,म - भुक्त्वा तृप्यति, मानिनीं नत्वा मृडयति, स्तुत्वा मोदयति, जो2- भुक्त्वा तृप्यति, मानिनीं नत्वा मृडयति, स्वस्वा गायति, अ1,अ3,के3,अ4-स्तुत्वा मोदयति,

[२] अ1-"च" नास्ति

[३] भ2-तृत्यादिबोधादित्यर्थः इति टिप्पणी

[४] अ1-दव्याप्त्यापत्तेः, जो2-नान्वयबोधादव्याप्तेः

[५] अ1,द1-कर्तृ

[६] त2-कारण

[७] [ ] – एतत्कोष्टकान्तर्गतः एतन्मातृकां ,द1 मातृकां च विहाय प्रायः सर्वत्रास्ति, आवश्यकश्च।, अ3-कर्तृकर्मत्व

[८] अ1-वासंभवान्मुख्यसाधनत्वं

[९] के3-बुद्धिमतिकल्पित,त2-बुद्धिपरिकल्पितं

[१०] त1,त5-गौण

[११] अ4-कारकान्तर्भूत

[१२] जै,त2-त्वेनान्वयित्वं

[१३] भ3-"पाक" नास्ति

[१४] जै-प्रयुञ्जीतेति,त2-प्रयुञ्जतीति,भ3-प्रयुञ्जत इति

तदपि भाष्योक्तलिङ्गानन्वयित्वपक्षवदुक्तवाक्यपदीयाद्युक्त[१]वाच्यत्वप्रतीयमानत्वयोः पथं[२] नावतरति।

एतेन भाष्ये अन्वय{रूप}[3] आकाङ्क्षा[४]रूपो विवक्षितः। सोऽपि शब्दान्तर-समभिहाराभाव[५]प्रयुक्तः। तथा च शब्दान्तरसमभिहाराभावे[६] सत्यपि स्वसाध्य-क्रियान्तराकाङ्क्षोत्थापकज्ञानविषयत्वं सिद्धत्वम्[७]। तादृशाकाङ्क्षानुत्थापक[८] ज्ञान-विषयत्वं साध्यत्वम्। भवति च पाक इत्यादिश्रवणे धात्वर्थघञर्थक्रिययोरभेदान्वये सत्यपि "कर्तव्यो वा[९], नाशनीयो वा, तिष्ठति वा, जायते वा, नश्यति वे[१०]"त्यादि पाकसाध्या[११] क्रियान्तराकाङ्क्षा, न तु पचतीत्यादौ[१२]। "पचति[१३] भवती"त्यादौ च भवति क्रियायाः कर्त्रपेक्षत्वाद्योग्यतावशादन्यतराकाङ्क्षयैवान्वयबोधः।
"यः कृष्णं नमेत्[१४]" इत्यादौ तु[१५] यच्छब्दचेच्छब्दादि[१६]समभिव्याहार-प्रयुक्तमेवाकाङ्क्षोत्थानम्[१७]। अन्यथा "कृष्णं नमेत्" इत्यत्रापि स्यात्। एवं

---

[१] त1,त5 -"वाक्यपदीयाद्युक्त" नास्ति
[२] जै-पन्था,भ1-पक्षं, 1915-पन्थानं
[3] {} एतत्कोष्टकान्तर्गतः अन्यत्र कुत्रापि नास्ति
[४] त1-अन्वयाकाङ्क्षा
[५] अ3,1900,के3,अ4-समभिव्याहारभाव, ज1-"शब्दान्तर" नास्ति
[६] अ3,अ4-समभिव्याहाराभावे
[७] भ1- "सिद्धत्वम्" नास्ति
[८] जो2-नुत्थापन
[९] अ3-"वा" नास्ति
[१०] 1900,1915-चे
[११] ब1,द4,1900,1915,त2,द2,भ1-पाकसाध्य
[१२] अ3-पचतिभवतीत्यादौ
[१३] म-"पचति"नास्ति
[१४] अ3-"चेत्" अधिकम्
[१५] अ1-इत्यादौ, अ3-इत्यादौ च
[१६] त5-यच्छब्दतच्छब्द
[१७] त1-प्रकाङ्क्षोत्थानम्,के3,अ4-आकाङ्क्षोत्थापनम्

भुक्त्वे[1]त्यत्रापि किमित्यादि क्रियान्तराकाङ्क्षा धातुसंबन्धार्थक-त्त्वादियोन(ग)[2]-प्रयुक्ता, न तु [3]धातूपस्थापननिबन्धना[4], पचतीत्यत्राप्यापत्तेः।

घञन्तशक्तिवादमुत्थाप्य निरस्यति – यच्चेति॥ अस्मदुक्तस्यैवेति॥ घञादेः स्वतन्त्रशक्तेरेव। पाक इत्यस्यैकस्यां विरुद्धधर्मासम्भवमाशङ्कते - ननु इत्यादिना॥ साध्यत्वं लिङ्गाद्यनन्वयित्वम्। धातुघञ्स्थले पाक इति स्थले विरुद्धयोरेतयोरेकस्यां क्रियायां स्थित्यनुपपत्तिरिति भावः। आक्षेपमपहरति – चेन्नेति॥ एकस्यां तस्यां क्रियायाम् विरुद्धधर्मं न ब्रूमः। किन्तु उपस्थापकभेदेन तदन्वयानन्वयौ उच्येते। तथाहि - धातूपस्थाप्यायां न तदन्वयः, घञाद्युपस्थाप्यायां तदन्वय इति। यथा घटस्यैक्येऽपि अंशभेदेन घटत्वाभिप्रायेण नित्यत्वम् घटाभिप्रायेण अनित्यत्वमिति। यद्वा एकस्य विशेषणत्वम् अपरस्योपाधित्वम्। तथा चात्र बोधप्रकारं केचित् साध्यत्वविशिष्टाभिन्नासिद्धत्वविशिष्टाक्रियेति वदन्ति तन्न मनोरमम्। सामान्यविशेषयोर्यथा अभेदः, नीलो घट इत्यादौ न तथा विशिष्टयोरभेदः। नीलघटाभिन्नः पीतघटः इत्यापत्तेः। अपरे यथा दीपादौ ग्राह्यत्वग्राहकत्वोभयधर्मयोरुपलभ्यमानत्वेन ग्राह्यत्वग्राहकत्वोभयधर्मविशिष्टो दीपः इति व्यवहारः,

तथोक्तम् वाक्यपदीये -

ग्राह्यत्वं ग्रहकत्वं च द्वे शक्ती तेजसो यथेति,

तथाऽत्रापि साध्यत्वसिद्धत्वविशिष्टा एका क्रियेति बोधः। वस्तुतस्तु साध्यत्वविशिष्टासिद्धत्वोपहिता क्रियेति बोधः साधुः। अत्र मूले तथैवोक्तेः। अत एव घञाद्युपस्थाप्येति॥ लिङ्गाद्यन्वयस्वीकारात्। भावनाशब्देति ॥ णिजन्तभूधातोर्भावे युच्। तदुपस्थाप्यक्रियायां तदन्वयः लिङ्गाद्यन्वयः सर्वसिद्धः। भट्टपादमतेनेदं साधयति - अत एव भट्टपादैरुक्तमिति॥

यादृशी भावनाख्याते धात्वर्थश्चापि तादृशः।
नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः क्वचित्॥ (त.वा. 2-1-1.1)

---

[1] त्रि-भुक्ते

[2] अ1-प्रयोग, अ3-योग

[3] अ3-"तु" नास्ति

[4] जो2-स्थापनबन्धना

आख्याते तिङन्तस्थले यादृशी भावना साध्यस्वभावा उच्यते, पाक इत्यादौ धात्वर्थश्चापि धातुनाभिधीयमानः तादृश एव साध्यस्वभाव एव। अन्यैः पदैः पाकः इति घटकघञादिभिः भावनादिपदैर्वा, असौ धातुनाभिधीयमानत्वोपहितः तेनैव साध्यत्वेन न कथ्यते।

वस्तुतस्तु साध्यत्वञ्चेति॥ लिङ्गाद्यनन्वयित्वम् भू , अस, पाक इत्यादौ धात्वर्थो न। किन्तु साध्यत्वमेव। तादृशप्रतीतौ प्रमाणमाह - साध्यत्वेन क्रियेति॥ साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धनेति कारिकायाम् साध्यत्वेनेति तृतीयायाः दर्शनात्। साध्यत्वेनेत्यत्र प्रकृत्यादित्वात्तृतीया। प्रतीयमानत्वमध्याहार्यम्। तृतीयार्थः प्रकारित्वम् । तथा च साध्यत्वप्रकारकप्रतीतिविषयत्वमित्यर्थः। सा च साध्यत्वप्रकारिका प्रतीतिः, लिङ्गाद्यनन्वयित्वविषयिणीति फलतो बोध्येति मन्यते। तथा च पदार्थस्यैक्येऽपि उपस्थापकवैविध्येन प्रतीतयो विभिद्यन्ते इत्यभिप्रायः।

तदेवाह – न हि लिङ्गाद्यनन्वयित्वं वाच्यमिति॥ वाच्यतया न प्रतीतिः अन्वयहेत्वभावात् । द्रव्यत्वेन प्रतीतिरिव लिङगाद्यन्वयहेतुस्तदभावादार्थिकम् फलति इति भावः। यच्च भाष्ये इति॥ क्रियया क्रिया समवायं सम्बन्धं न गच्छति। क्रिययोः परस्परं साध्यसाधनभावो नास्तीति तद्भाष्याशयः। तथा च क्रियान्तरे साधनत्वेन क्रियाया अनन्वयित्वं साध्यत्वमुक्तं तद्भाष्ये। यथा तण्डुलं पचति इत्यत्र कर्मत्वरूपसाधनत्वेन पाकक्रियायां तण्डुलादेरन्वयस्तथा क्रियायाः क्रियान्तरे साधनत्वेनान्वयाभाव एव क्रियायाः साध्यत्वमिति भावः। ननु पक्त्वा गच्छतीत्यनुपपत्तिः। तत्र "समानकर्तृकयो(पा.3.4.21)"रिति सूत्रेण पूर्वकाले क्त्वा विधानात् पाकक्रियायाः क्रियान्तरे गमनेऽन्वयेन पूर्वभाष्यविरोधादित्यत आह - साधनत्वेन इत्युपादानात् इति॥

साध्यत्वेनोपादानाद् इत्ययुक्तः पाठः। अयमाशयः - भाष्ये साधनत्वेनानन्वयित्वं साध्यत्वमुक्तम्। तत्र साधनत्वेन इत्युपादानादुक्तत्वात् पक्त्वा गच्छतीत्यत्र न दोषः। यतो हि तत्र पाकक्रियायाः गम्यर्थे न साधनत्वेनान्वयः। येन भाष्यविरोधः स्यात् अपि तु अन्यरूपेणैव। तदाह – सामानाधिकरण्योत्तरकालादिसम्बन्धेनेति॥ "समानकर्तृकयोः पूर्वकाले (पा.3.4.21) "इति सूत्रे समानकर्तृकेत्युक्तौ एक-

कर्तृकत्वं समानाधिकरण्यमत्रोक्तं पूर्वकाल इत्युक्त्या पूर्वोत्तरकालत्वमुक्तम्। तथा च पाकक्रियागमिक्रिययोरिदमेव सम्बन्धद्वयम् यत् सामानाधिकरण्यम् उत्तरकालिकत्वं च। अत आह- अन्वयेन न क्षतिः न भाष्यविरोधः, साधनत्वेनानन्वयात्। पाकस्योक्त-सम्बन्धाभ्यामेवान्वयात्। उक्तमर्थं निरस्यति – तन्नेति॥ क्रिययोः साधनत्वेना-न्वयस्य बहुशो दर्शनात्। तानि स्थलान्येवाह - कृष्णं नमेच्चेत् इत्यादिना अव्याप्ते-रित्यनेन ग्रन्थेन। कृष्णनमनभोजननमनस्तवादेः सुखप्राप्तितृप्तिमण्डनमादनादौ साधनत्वेनैवान्वयात् अव्याप्त्यापत्तेः। साधनत्वेनान्वयित्वरूपस्य साध्यत्व-लक्षणस्याव्याप्तिदोषग्रस्तत्वात्। तासां क्रियाणां साधनत्वेनैवान्वयात्।

पूर्वोक्तस्थलेऽपि लक्षणाव्याप्तिमाह - पश्य मृगो धावतीति॥ स्पष्टम्। कारकत्वानुपपत्तिश्चेति॥ धावनस्य साधनत्वेनानन्वये सतीति शेषः। न चैवं सति तादृशभाष्यस्य का गतिरिति चेदत्रेदं बोध्यम् - तादृशभाष्ये साधनत्वेनेत्यस्य करणत्वादिनेत्यर्थः। उक्तस्थले साधनत्वेनान्वयेऽपि न करणत्वादिना। साधनत्वम् हेतुत्वम्, करणत्वमन्यदेवेति कथञ्चिन्नेयम्। तदेव यत्त्वित्यादिनोच्यते। घटो भवतीत्यादौ घटस्य अनुत्पन्नतया असत्त्वम् घटं करिष्यति इत्यत्र उत्पत्स्यमानत्वेना-सत्त्वम्। तथा चात्र घटस्यासत एव कर्तृत्वं कर्मत्वं वाच्यम्। तच्च न सम्भवति, असिद्धस्य तत्त्वासम्भवात्। तस्मात् तत्र मुख्यं साधनत्वं नास्ति। करणत्वादीनां साधनत्वं मुख्यमेव सर्वत्र, असिद्धरूपत्वे करणत्वाद्यनुपपत्तेः। तदेवाह - मुख्यं साधनत्वं करणादेरिति॥ कर्तृकर्मणोः साधनत्वं द्विविधमित्याह - कर्तृकर्मणोस्तु इति॥

एतद्व्याख्यानद्वारा भाष्याशयं विस्फोरयति - तथा चेत्यादिना॥ साधनत्वेनेत्यस्य कारकान्तर्गतं करणादिवृत्ति यन्मुख्यं साधनत्वं तेनानन्वयित्वं साध्यत्वम् विवक्षितम्। तथा चोक्तस्थलेषु सर्वत्र करणत्वादिसमानाधिकरण-साधनत्वादिनाऽनन्वयस्य विवक्षया न दोषः। कैयटविरोधं परिहरति - मत्सरिणः असहिष्णवः। यथा पाकेन वैरं कृतं, पाकाय कालो नीतः इति प्रयोगो जायते तत्र च पाकपदार्थस्य साधनत्वेन करणाद्यवन्वयः, तथा पचति वैरं कृतमिति न प्रयुञ्जन्ति। तत्र पचत्युपस्थापितपाकस्य कृञर्थे उक्तसाधनत्वेनानन्वयः। तदपीति॥ लिङ्गाद्यनन्वयित्वरूपसाध्यत्वं यदस्ति तत् वाक्यपदीयपदमेवानुगच्छतीति भावः। साधनत्वेनान्वयस्यापरिहारात् अत्र पन्थानं नावतरतीति पाठो युक्तः।

लक्षणमात्रमिदम्। न तु धातुनाभिधानादिकम्। एतेन वाच्यत्वादि-निराकरणेन। अपास्तमिति ॥ वक्ष्यमाणेनान्वयः। पूर्वभाष्ये साधनत्वेनान्वय इत्यत्र यः अन्वयः सोऽप्याकाङ्क्षारूपः पदानां परस्परं पौर्वापर्येणोच्चारणरूपः सोऽपि शब्दान्तर-समभिव्याहाराभावप्रयुक्तः। समभिव्याहारेणैवान्वयसिद्धेः। प्रतिपाद्यमाह - तथा च शब्दान्तरसमभिव्याहाराभावे सत्यपि॥ यथा घटोऽभवदित्यत्र अभवदिति समभिव्याहारे सत्येव घटस्य सिद्धत्वप्रतीतिः, क्रियायाः सिद्धत्वप्रतीतिर्न तथा समभिव्याहारप्रयोज्या। अपि तु अन्यथैवेति तदाह – स्वसाध्यक्रियान्तराकाङ्क्षो-त्थापकज्ञानविषयत्वम्॥ स्वं सिद्धत्वेनाभिमता क्रिया, पाक इत्यादौ घञादिना-भिधीयमाना, तत्साध्यभूतं यत्क्रियान्तरं भवतीत्यादिरूपम् , तस्य या आकाङ्क्षा जिज्ञासा, पाक इत्युक्तौ भवति जायते नष्ट इत्याकाङ्क्षा, तस्याः यद् ज्ञानं तद्विषयत्वं सिद्धक्रियायाम्। साध्यत्वलक्षणमाह - तादृशाकाङ्क्षा क्रियान्तराकाङ्क्षा, तदनुपस्थापक-ज्ञानविषयत्वं साध्यत्वं। तदुपपादयति – भवति चेत्यादिना॥ स्पष्टम्।

साध्यक्रियायां वैलक्षण्यमाह - न तु पचतीत्यादाविति॥ पचतीत्यादौ च पचेः क्रियायाः कर्तृत्वेन परस्परमाकाङ्क्षा जायते। तदाह – कर्त्रपेक्षत्वात्॥ योग्यतावशात् कर्तृत्वक्रियात्वयोरेव मिथोऽन्वयितावच्छेदकत्वात्। अन्यतराकाङ्क्षयैवेति॥ कर्तुः क्रियाकाङ्क्षा, क्रियायाश्च कर्तुराकाङ्क्षा। ननु "यः कृष्णं नमेत् चेत् सुखं यायात्" इत्यत्र क्रियाया अपि क्रियान्तराकाङ्क्षा दृश्यत इत्यत आह – यच्छब्दचेच्छब्दादिति॥

न तु तत्र स्वाभाविकं क्रियान्तराकाङ्क्षोत्थानम् ।भुक्त्वेत्यत्रापि व्रजतीत्यादौ किमिति क्रियान्तराकाङ्क्षादर्शनम्। क्रियासम्बन्धः सामानाधिकरण्यादिरूपः तदर्थको यः क्त्वादिस्तत्प्रयुक्तमेवेति न दोषः। न तु धातूपस्थापननिबन्धना, धातुनोपस्थिता या भावना तन्मात्रनिबन्धना न। किन्तु क्त्वादिप्रयोगनिबन्धनैव। अन्यथेति॥ धातुमात्र-निबन्धनत्वे पचतीत्यादावपि तदाकाङ्क्षा स्यादित्यर्थः।

**82.** न चैवं घञादिसमभिव्याहारप्रयुक्ता धात्वर्थस्यैव पाक इत्यत्राप्याकाङ्क्षा स्यादिति वाच्यम्, घञादेः स्वातन्त्र्येण भावनावाचकताया व्यवस्थापितत्वेन स्वार्थान्वयाकाङ्क्षयैवोपपत्तौ तथा कल्पने गौरवप्रसङ्गात्। क्त्वादीनां तु न तद्वाचकत्वे[1]

[1] त1-क्त्वादीनां तत्तद्वाचकत्वे

मानमस्तीति वक्ष्याम इत्यपास्तम्। {अस्यापि लक्षणमात्रत्वेऽपि वाच्यत्वप्रसङ्गात्। त्त्वादीनां तु न तद्वाचकत्वे मानमस्तीति वक्ष्याम इत्यपास्तम्।}[१] अस्यापि लक्षणमात्रत्वेऽपि वाच्यत्वप्रतीयमानत्वयोरभावात्।

किं च,[२] धातूपस्थाप्यभावनायाः[३] करणत्वादिनानन्वयः[४] क्रियान्तराकाङ्क्षानुत्थापकता वा कुत इति विभाव्यताम्। धातूपस्थापननिबन्धन[५] एवेति चेन्न, साध्यत्वेनाभिधानविलयापत्तेः। साध्यत्वेनोपस्थापननिमित्त इति चेत्, तर्हि [६]तथान्वयविरोधि स्वतन्त्रमेव किञ्चिद् रूपं वक्तव्यम्। तदेव साध्यत्वं भाष्यादिग्रन्थाभिप्रेतमिति[७] प्रतीमः। तच्चोत्पाद्यत्वमेव। तथा च पचति[८] गच्छतीत्यादौ "विक्लित्त्य[९]नुकूलयत्नादिकमुत्पादयति", "उत्तरसंयोगानुकूलक्रियामुत्पादयती"[१०] त्याद्युत्पाद्यत्वं प्रतीयते। एतदेव[११] च कारकान्वयितावच्छेदकम्। अत एव पचतीत्येवोक्ते "केन कस्मात् कस्मै[१२] कुत्र किमि"त्याद्या[१३]काङ्क्षा तत्समर्पक[१४]कारकाणां तस्यामेवान्वयश्च[१५] संगच्छते। उत्पत्तिमत्त्वेनोपस्थितस्यैव कारकाकाङ्क्षत्वात्[१६]।

---

[१] { }एतत्कोष्टकान्तर्गतः पाठः अन्यत्र नास्ति, असङ्गतश्च।

[२] अ1-"धातूपस्थाप्यभावस्य च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्वं वा कारकान्वयितावच्छेदकरूपवत्वं वा असत्त्वभूतत्वं क्रियान्तराकाङ्क्षोत्थापकरूपवत्वं वा कारकान्वयितावच्छेदकरूपवत्वं वा सत्त्वभूतत्वम्। एवं च असत्त्वभूतासाध्यावस्थितिभावनायाः करणत्वादिनान्वयः।" अधिकम्

[३] द4-भावनयोः

[४] भार1,ब1,त्रि,1900-करणत्वादिना नान्वयः

[५] त5-निबन्ध

[६] भ2-तथान्वय - क्रियान्तराकांक्षान्वय इति टिप्पणी

[७] अ1-भाष्याभिप्रेतमिति

[८] द1-पच

[९] त5-विक्लृत्ति

[१०] त2-"उत्तरसंयोगानुकूलक्रियामुत्पादयती"नास्ति,त5-उत्तरदेशसंयोगानुकूलक्रियामुत्पादयती

[११] अ3-तदेव

[१२] अ3-"कस्मै" नास्ति

[१३] अ1,त2-"द्या"नास्ति

[१४] जो2-तत्सर्व

[१५] अ1-"च" नास्ति

[१६] 1915-कारकाङ्क्षत्वात्

तस्याः स्वयमुत्पाद्यतयावगमे[१]नासिद्धत्वादन्यक्रियासाधनत्वेनानन्वयश्च[२] भाष्योक्तो युज्यते, सिद्धस्यैव क्रियासाधनत्वात्।

## 16.3 तिङन्ते अवयवशः सिद्धत्वेन क्रियाप्रतीतिः

नन्वेवं " पचति[३] भवती " त्यपि न स्यादिति चेन्न, उत्पद्य[४]मानस्यासिद्धस्यैव सर्वत्र भवने कर्तृत्वदर्शनेन तस्यात्रानुकूलत्वात्। अत एव " पचति नश्यती " त्यादि न भवति[५]। उक्तं च कैयटेन- "भवतिक्रियापेक्षमेव तस्याः कर्तृत्वं, सर्वश्चार्थः स्वेन रूपेण भवतीति भवने कर्तृत्वमुपपन्नमेव[६]" इति।

न चैवमप्यसिद्धस्य दर्शनकर्मत्वासंभवात् "पश्य मृगो धावति" इत्यत्र वाक्यार्थक्रियायाः[७] कर्मता न स्यादिति वाच्यम्, न हि क्रियासमूहो दर्शनकर्म। " पिण्डीभूता न निदर्शयितुं शक्ये " ति भाष्य[33]विरोधात्। किं त्ववयवशः[८]। ते तु यथासंभवं सिद्धा एव कर्म भवन्ति।

उक्तं च वाक्यपदीये-

> "तत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया।
> सिद्धा तु यस्मिन् साध्यत्वं न तमेव पुनः प्रति॥ (वा.प.तृ.क्रि.49)
> मृगो धावति पश्येति साध्यसाधनरूपता॥" (वा.प.तृ.क्रि.51) इति।

समुदाये कारकान्वयोपयोग्यसिद्धत्वं प्रत्येकं दर्शनोपयोगि[९] सिद्धत्वमस्तीत्यर्थः। नन्वेवं "यः कृष्णं नमेत् स[१०] सुखं यायात्, भुक्त्वा तृप्यती"त्यादौ नमन[११]भोजनादि

---

[१] अ3,भ1-मुत्पाद्यतावगमे, 1915-स्वयमुत्पाद्यतयागमेन

[२] अ1,अ4-" च" नास्ति , द4-साधनत्वेनान्वयश्च

[३] अ4-पचति पचति

[४] अ1-उत्पाद्य

[५] अ1-"भवति" नास्ति

[६] त2-कर्तृत्वमुपात्तमेवेति

[७] भार1-वाक्यार्थक्रियायां

[८] अ1-त्ववयवाः

[९] 1915-दर्शनोपयोगि।

[१०] भार1,त3,त2- "स " नास्ति

[११] अ1-नम

क्रियायाः[१] सुखप्राप्तितृप्ति[२]क्रियासाधनत्वेनान्वयो न स्यादिति चेन्न, शाब्दं प्राधान्य[३]-मादाय विशेषणान्वयस्यौत्सर्गिकत्वेऽपि[४] क्वचिद् "अश्वेन जिगमिषती"त्यादावार्थिकप्राधान्यमादाय कारकान्वयवद् यच्छब्दोपस्थाप्योद्देश्यतावशाद्[५] आर्थिकं सिद्धत्व[६]मादाय लिङर्थ[७]साधनत्वान्वयसंभवात्। एतद्बोधनायैव[८] यच्छब्दादिप्रयोगनैयत्यं, तं[९] विना बोधाभावश्च संगच्छते। भुक्त्वेत्यादावपि क्त्वादिद्योत्यधात्वन्तरसंबन्धस्य पूर्वोत्तरकालादेश्चानुरोधादार्थिकसिद्धत्वमादायैव साधनत्वबोधः, असिद्धस्य पूर्ववृत्तित्वासंभवात्[१०]। "भोजनक्रियामुत्पाद्य तृप्यती"ति बोधात् तात्पर्यमर्यादया[११] तद्बोधसंभवात्। क्त्वादौ क्रियान्तराकाङ्क्षोत्थान[१२]मप्येतन्मूलकमेवेत्युक्तप्रायम्। तस्मादुत्पाद्यत्वमेव करणादिकारकत्वेनानन्वयितावच्छेदकं[१३] कारकान्वयितावच्छेदकं[१४] क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं च। तत्प्रतीति[१५]श्चोदाहृतवाक्यपदीय[34] भट्टपाद[१६][35]कारिको[१७]दाहृतानुभवा[१]दङ्गीकार्या[२]।

---

[१] अ1,के3,अ4-क्रिययोः, अ3-"आदि" नास्ति

[२] के3-"तृप्ति" नास्ति

[३] त3,द1-शाब्दप्राधान्य

[४] त2-औत्सर्गिकत्वेन

[५] द4,1915- "यत्" नास्ति

[६] जो2-आर्थिकसिद्धत्व

[७] के3-तिङर्थ

[८] अ1-एतद्बोधायैव

[९] अ1-"तं" नास्ति

[१०] अ1-पूर्ववर्तित्वासंभवात्

[११]अ1-तात्पर्यमादाय, त2-"स्य पूर्वोत्तरकालादेश्चानुरोधादार्थिकसिद्धत्वमादायैव साधनत्वबोधः, असिद्धस्य पूर्ववृत्तित्वासंभवात्। "भोजनक्रियामुत्पाद्य तृप्यती"ति बोधात् तात्पर्यमर्यादया तद्बोध"नास्ति

[१२] अ1-कांक्षोत्थापक, अ3-कांक्षोत्थापन

[१३]अ1,त1,त3,त5,अ4- "कारकत्वेनानन्वयितावच्छेदकं"नास्ति,भ2-करणादिकारकत्वेनान्वयितावच्छेदकं

[१४]भार1-"कारकान्वयितावच्छेदकं" इति "क्रियान्तराकाङ्क्षानुत्थपकतावच्छेदकं" इत्यनन्तरमस्ति। ब1,1900,के3,त2,1915- "कारकान्वयितावच्छेदकं" नास्ति

[१५] त5-त्वत्प्रतीति

[१६] अ1-भाट्ट, अ3,अ4-भट्ट

[१७] अ1-कारको

तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वं[3] कारकान्वयितावच्छेदक-रूपवत्त्वं वा असत्त्वभूत[4]त्वम्[5]। क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकरूपवत्त्वं[6] वा[7] कारकानन्वयिता[8]वच्छेदकरूपवत्त्वं[9] वा[10] सत्त्वरूपत्वम्[11]।

एवं चासत्त्वभूता[12] साध्यावस्थे[13]त्यादयो व्यवहाराः प्रसिद्धार्था एव[14], परन्तु धावतीत्यादौ सिद्धत्वं पश्येत्याद्यालोचने[15] प्रागुक्तरीत्यैवेति सुधीभिरूह्यम्॥ **15**॥

---

पाक इत्यत्र क्रियान्तराकाङ्क्षोत्थापकत्वं न घञुपस्थाप्यक्रियायाम् , अपि तु धातूपस्थाप्यक्रियायामेवेत्याशङ्कते - न चैवमिति॥ क्रियान्तराकाङ्क्षोत्थापकस्यैव सिद्धत्वप्रयोजकत्वे।पाक इत्यत्र धात्वर्थस्यैव, प्रकृत्युपस्थापितस्यैव। ननु पचतीत्यत्रापि धात्वर्थस्य तथोत्थापकतापत्तिरत आह – घञादिसमभिव्याहारप्रयुक्तेति॥ तेन पचतीत्यादौ न दोषोद्भावनमिति भावः। उक्तदोषं वारयति – घञादेरिति॥ स्वातन्त्र्येण न तु घञन्तशक्त्या। भावनावाचकत्वेन भावनायां स्वतन्त्रशक्त्या बोधकत्वेन। ननु स्वतन्त्रशक्तिरस्तु धातूपस्थाप्ये धात्वर्थे तथाकाङ्क्षोपस्थापकत्वमप्यस्तु इतिचेदाह – स्वार्थान्वयाकाङ्क्षयैवेति॥ घञुपस्थापितभावनाकाङ्क्षयैव आकाङ्क्षोत्थापनस्योपपादनेन

---

[1] जै-कारिकोदाहृतप्राचामनुभवा

[2] त2-दङ्गीकार्यम्, 1915- - -------कारिकोदाहृतानुभवाङ्गीकार्या

[3] अ1,अ3,भार1,द1,द4,त3,जै,ब1,जो2,के3,द3,भ2,1915,म,अ4-"वा" अधिकम्

[4] त2-असत्त्वरूपत्वम्

[5] अ4-"कारकान्वयितावच्छेदकरूपवत्त्वं वा असत्त्वभूतत्वम्" इति नास्ति

[6] अ1-क्रियान्तराकाङ्क्षोत्थापकरूपवत्वं

[7] द2-"वा"नास्ति

[8] जो2,1915-कारकान्वयिता

[9] अ1-"वा कारकानन्वयितावच्छेदकरूपवत्वं" नास्ति

[10] अ3-"असत्त्वभूतत्वम्" आरभ्य " रूपवत्वं वा" पर्यन्तं नास्ति

[11] अ1,त1,द2,त5-सत्त्वभूतत्वम्

[12] अ1-चासत्त्वभूतता

[13] भ1-साध्ये

[14] त5-प्रसिद्धा एव

[15] अ1,वा2,ब1,द1,त1,1900,के3,द3,भ3,अ4-द्यालोचनेन

धात्वर्थे तत्स्वीकारानौचित्यात्। तदाह - तथा कल्पने गौरवात् ॥ उभयोरुत्थापकत्वे गौरवात्। त्त्वादीनामिति॥ तद्वाचकत्वे साध्यत्वेन वाचकत्वे न मानमिति वक्ष्यमस्तदर्थनिरूपणे।

अपास्तम्। पूर्वं एतेनेत्यादिना साध्यत्वादि यदुक्तम् तदपास्तम्। हेतुमाह - अस्यापि क्रियान्तराकाङ्क्षेत्युक्तस्यापि, लक्षणमात्रत्वेऽपि लक्षणस्वरूपत्वेऽपि। वाच्यत्वाद्यभावात् धातुना फलस्य विक्लित्तित्वादिना व्यापारस्य फूत्कारत्वादिनैव चाभिधानात्। न तु साध्यत्वादिनेति भावः। तथा च वाच्यतावच्छेदकमेतद्वयं न भवतीति साध्यत्वेन प्रतीयमानत्वमाक्षिपति - किञ्च धातूपस्थाप्येति॥ पाकः इत्यत्र अंशद्वयम् , प्रकृतिः पच् इति घञ् प्रत्ययः च। तत्र धातूपस्थाप्यायाः करणत्वादिना कुत्राप्यन्वयो न। पश्य मृगो धावतीत्यत्र कर्मत्वेन धातूपस्थाप्यधावनस्यान्वयदर्शनेन पचति भवतीत्यत्र च कर्तृत्वेनान्वयदर्शनेनाह – करणत्वादिनेति॥ धातूपस्थाप्यायाः क्रियान्तराकाङ्क्षानुत्थापकता च भवति। एतद्वयप्रयोजकं किमिति शङ्कते - किञ्चेत्यतः विभाव्यतामित्यन्तेन॥ उभयप्रयोजनमाह – धातूपस्थापननिबन्धनेति॥ धातुना यदुपस्थानं तन्निबन्धनं यस्य अन्वयाभावस्येति विग्रहः। पुमान् स्त्रिया इत्यनेनैकशेषः। नेदं प्रयोजकमित्याह - साध्यत्वेनाभिधानेति ॥ धातूपस्थापननिबन्धनत्वेनैव निर्वाहे तत्स्वीकारवैयर्थ्यात्। तदेकं प्रयोजकमित्याह – साध्यत्वेनोपस्थापनेति॥ चेत्तर्हि इति॥ अयमाशयः - साध्यत्वेनाभिधानमस्तु करणत्वादिना अन्वयो मास्तु इति शङ्कायां तद् वक्तव्यम् येन कारणत्वादिनान्वयः प्रतिबध्येत। तच्च साध्यत्वादि एव वक्तव्यम्। एतदेवाह – तथान्वयविरोधीति॥ तथा करणत्वादिना अन्वयस्य विरोधीति। स्वतन्त्रम् उक्तभिन्नम्। यच्च तद् विरोधिरूपम् तदेव भाष्यादिसम्मतं साध्यत्वं न तु क्रियान्तरेत्यादिघटितमित्यभिप्रायः। प्रतीमः, भाष्यारूढतया जानीमः। तादृशं रूपमाह – तच्चोत्पाद्यत्वमेवेति॥ साधनाकाङ्क्षत्वम्।

करणत्वादि तु सिद्धत्वव्याप्यम् , उत्पाद्यत्वं तु तद्विरोधि असिद्धत्वरूपम्। उत्पाद्यत्वमुदाहरणेन प्रस्तौति - तथा चेत्यादिना॥ एतदेव उत्पाद्यत्वमेव, कारकान्वयितावच्छेदकम् कारकम् करणादि, तदन्वयि क्रियारूपं तदन्वयिता-वच्छेदकम् उत्पाद्यत्वम्। कारकेण किञ्चिदुत्पाद्यम् , यदुत्पाद्यम् तत्रैव तस्य अन्वयस्यौचित्यात्।

कारकाणामुत्पाद्यक्रियायामेवान्वयप्रयोजिकामाकाङ्क्षामाह - अत एवेति॥ कारकाणां मुत्पाद्यक्रियायामन्वयादेव। आकाङ्क्षा मूले स्पष्टा। तत्समर्पकेति॥ तस्या आकाङ्क्षायाः समर्पकाणां कारकाणां करणादीनां तस्यामाकाङ्क्षोत्थापकक्रियायामेवान्वयः। तादृशाकाङ्क्षोत्थापनहेतुमाह – उत्पत्तिमत्त्वेनेति॥ उत्पाद्यत्वेनोपस्थितस्य धातुनेति शेषः। क्रियारूपस्य कारकाकाङ्क्षत्वात्। क्रिया च तादृशी कारकाणि आकाङ्क्षते।

उत्पाद्यक्रियास्वरूपमाह - तस्याः स्वयमुत्पाद्यतया इति॥ तस्या उत्पाद्यक्रियायाः, स्वयं करोतीत्यादि समभिव्याहारं विनापि। घटादीनामुत्पाद्यत्वं करोत्यादिसमभिव्याहारेण प्रतीयते, अस्यास्तु स्वभावसिद्धमेवोत्पाद्यत्वम्। अन्यक्रिया स्वातिरिक्तक्रिया, तत्साधनत्वेन न अन्वयः, अनन्वय इति पुस्तकान्तरे पाठः। स एव युक्तः। उत्पाद्यक्रियायाः असिद्धत्वेन सिद्धत्वरूपसाधनत्वेनान्वयानुपपत्तेः। तदेवाह - सिद्धस्यैवक्रियासाधनत्वात्।

धातूपस्थाप्यायाः सिद्धत्वेन कारकत्वव्याप्येन धर्मेणानन्वये दोषमाह - नन्वेवं पचतीत्यादि॥ भूवादिसूत्रभाष्य-सम्मतः पचति भवतीति प्रयोगः। पाककर्तृका भवतिक्रिया इति। तदीयो बोधस्तु भवत्यर्थे धातूपस्थाप्यक्रियायाः पाकात्मिकायाः कर्तृत्वरूपसाधनत्वेनान्वया-नुपपत्तिरिति शङ्काशयः। समाधानम् – उत्पद्यमानस्यैवेति॥ भवनक्रियायाः कर्ता सर्वत्र उत्पद्यमानोऽसिद्ध एव। घटो भवतीत्यादौ सर्वत्र तथा दर्शनात्। तदेवाह – असिद्धस्यैवेत्यादिना॥ तस्य असिद्धत्वस्य अनुकूलत्वात् भवनकर्तृत्वसाधकत्वात्। अत एव भवनं प्रत्येव तथाविधस्य कर्तृत्वस्वीकारः। पचति नश्यतीति॥ सिद्धस्यैव नाशदर्शनात्। अत एव जायते अस्ति इत्यादिभावविकारेषु नाशस्यान्ते पाठः। कैयटोक्तिं प्रमाणयति – उक्तमिति॥ स्पष्टोऽर्थः।

पश्य मृगो धावतीत्यादौ असिद्धस्य धावनस्य कर्मत्वेनान्वयमाक्षिपति – नचैवमसिद्धस्येति॥ वाक्यार्थक्रिया मृगो धावतीति वाक्यार्थभूता क्रिया मृगकर्तृकोत्कटधावनरूपा। आक्षेपमपहरन् धावनस्य सिद्धत्वमुपपादयति - नहि क्रियासमूहः धावनक्रियासमूहः। प्रतिक्षणभिन्नैव धावनक्रिया, तत्र अवयवश एव कर्मत्वम्।

तदात्मिका सा सिद्धैव कर्मत्वेनान्वयिनी। वाक्यपदीयसंवादमाह -

तत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया। (वा.प.क्रि.49)

सिद्धा तु यस्मिन् साध्यत्वं न तमेव पुनः प्रति॥

मृगो धावति पश्येति साध्यसाधनरूपता। (वा.प.क्रि. 51.)

तत्र पाक इत्यादौ घञादिकृदन्ते यं प्रति यत्साधननिरूपितं क्रियायाः साध्यत्वं तं प्रति असिद्धा क्रिया। यस्मिन्साधने तु क्रिया सिद्धा तत्साधननिरूपितं तु क्रियायाः साध्यत्वम्, तं प्रति सा सिद्धैव। "पश्य मृगो धावति" इत्यत्र तिङुपात्तकर्त्रपेक्षया धावनक्रिया साध्यदर्शनापेक्षया साधनत्वं कर्मतामनुभवति। स्पष्टयति - समुदाये इति॥ कारकान्वयेति॥ तिङुपात्तकर्मान्वयोपयोग्यसिद्धत्वं न प्रत्येकमवयवशः किन्तु समुदाये। प्रत्येकमवयवशःदर्शने कर्मत्वेनान्वयोपयोगिसिद्धत्वमित्यर्थः। साध्योपस्थाप्यक्रियायाः साधनत्वेनानन्वये दोषान्तरमाह - नन्वेवं यः कृष्णं नमेदिति॥ अत्र "हेतुहेतमतो र्लिङि(पा.3.3.156)"ति लिङ्। तथा च कृष्णकर्मकं नमनम् हेतुः सुखप्राप्तिः फलम्। एवमेव भुक्त्वा तृप्यतीत्यत्रापि भुज् धातूपस्थाप्यं भोजनम् साधनं तृप्तिश्च फलम्। अत्र धातूपस्थाप्ययोः नमनभोजनयोः साधनत्वेनैवान्वयः। तथा सति धात्वर्थस्यासिद्धत्वेनान्वयाभावकथनानुपपत्तिः। तथान्वयमुपपादयति - शाब्दं प्राधान्यमिति॥ शब्दस्येदं शाब्दम्। शब्दजन्यबोधविषयीभूतं प्राधान्यमित्यर्थः। विशेष्यविशेषणभावः शाब्दबोधे भासते। तत्र तत्तन्न्यायेनैव विशेष्यविशेषणभावनिर्णयः यथा "भावप्रधानमाख्यातमि"त्यनेन आख्यातव्यापारस्य प्राधान्यम्। प्रकृतिप्रत्ययन्यायेन प्रत्ययार्थस्य प्रधानता। तत्र प्रधाने विशेषणस्य विशेषणतया अन्वयः स्वभावतो जायते। तदाह - औत्सर्गिकत्वेऽपि॥ अश्वेन जिगमिषतीति॥ प्रकृतिप्रत्ययन्यायेन यद्यपि गमनेच्छाया एव शाब्दं प्राधान्यं तथापि अश्वेनेति करणत्वस्यायोग्यतया नेच्छायामन्वयः, किन्तु धात्वर्थगमने एव। एतादृशान्वये अश्वेनेति तृतीयोपात्तस्य कारकस्यार्थतः प्रधाने गमनेऽन्वयः। इदमेवार्थिकं प्राधान्यम्। शाब्दं प्राधान्यञ्चैवं सति परित्यक्तम्।

ननु आर्थिकप्राधान्यग्रहणेऽयोग्यतामूलमिह तु मूलाभाव एव धात्वर्थस्य साधनत्वेनान्वये इत्यत आह – यच्छब्दोपस्थाप्येति॥ यः कृष्णामित्यत्र यः इति यच्छब्दः। यच्छब्दस्य उद्देश्यतासमर्पकतया यत्कर्तृकनमनस्यापि

सिद्धत्वरूपमुद्देश्यत्वम्। तथा सति लिङ्द्योत्यसाध्यसाधनभावेन नमनस्य सुखप्राप्तौ अन्वयः। भुक्त्वेत्यादौ अपि पूर्वकाले समानकर्तृकत्व-रूपधात्व-न्तरार्थसम्बन्धे च क्त्वाविधानमेव भोजनस्य सिद्धत्वेनान्वये मूलम्। न हि सिद्धत्वं विना पूर्वकालत्वसम्भवः। नापि अधात्वर्थसम्बन्ध इति ध्येयम्। एतत्सर्वं भुक्त्वेत्यादावपीत्यत आरभ्य तद्बोधसंभवादित्यादिना उक्तम्। ननु भुक्त्वेत्यादिना उपात्तक्रियायां क्रियान्तराकाङ्क्षोत्थापनापत्तिरित्यत आह –क्त्वादाविति॥

उपसंहरति – तस्मादिति॥ क्रियान्तराकाङ्क्षानुत्थापकतावचच्छेदकम् कारकान्वयितावच्छेदकं चोत्पाद्यत्वमेवेत्यत आह – उत्पाद्यत्वमेवेत्यादिना॥ उत्पाद्यत्वमेव तद्वाच्यम्। न तु साध्यत्वम्। इदमुत्पाद्यत्वमेव असत्त्वभूतत्वम्। तथा चोक्तमसत्त्वभूतो भावश्च तिङ्पदैरभिधीयते इति। क्रियान्तराकाङ्क्षोत्थापकता-वच्छेदकत्वरूपत्त्वं सत्त्वभूतत्व मित्येव परिभाषा। ननु साध्यत्वेनाभिधीयमानत्व-प्रवादस्य का गतिरित्याह – एवञ्चासत्त्वभूतेत्यादि॥ प्रसिद्धार्था एवेति॥ शास्त्रे तेन शब्देन व्यवहारमात्रं न तु कारकान्वयितावच्छेदकत्वादिप्रयोजकमिति बोध्यम्।

अत्रेदं चिन्तनीयम् - किञ्च धतूपस्थाप्यभावनाया इत्यत आरभ्य प्रसिद्धार्था एवेत्यादिना धातूपस्थाप्यायाः क्रियायाः उत्पाद्यत्वं साधितम्। तदेव च कारका-न्वयितावच्छेदकादि। साध्यत्वन्तु प्रसिद्धमेवेति महता संरम्भेण प्रतिपादितम्। तत्र विचारे क्रियमाणे साध्यत्वमुत्पाद्यत्वञ्च अभिन्नार्थकम् एव। उभयत्रापि अर्हार्थक-कृत्सत्त्वात्। गत्यर्थकोत्पूर्वकस्य पदधातोरुत्पत्तिः। उत्पत्तिश्च पूर्वमविद्यमानस्य। संसिध्यर्थकसाधधातोः साध्यमिति रूपम्। संसिद्धिरपि पूर्वमविद्यमानस्यैव। अनया रीत्या उभयोरभिन्नार्थकतैवेति प्रतीयते। धातूपस्थाप्यायाः क्रियायाः साध्यत्वेना-भिधाने प्रमाणानि च साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धनेति हरिकारिका, स्वयमेव व्यापारस्तु साध्यत्वेनाभिधीयमाना क्रियेति श्रीकौण्डभट्टोक्तिः भूषणसारे। "सुद्धात्पूर्वः" (पा. 6.1.135) इति सूत्रभाष्यमप्यत्र मानम्। अत्र उद्योतः - साधनयोगेन हि साध्यत्वेन धात्वर्थप्रतीतिः। साध्यत्वस्य साधननिरूप्यत्वात् इति। साधनानुरूपमपि साध्यत्वम् , तस्मात् साध्यत्वतिरस्कारस्तु न सन्तोषकरः, बहुषु स्थलेषु तेनरूपेण व्यवहारात्। उत्पाद्यत्वज्ञानेन झटिति कारकादिजिज्ञासेति मन्दप्रयोजनत्वेनेदमुक्तमिति।

## 17. सम्बोधनाद्यष्टकस्य क्रियान्वये एव साधुत्वम्

83. नन्वस्तु[१] धात्वर्थे एव कारका[२]णामन्वयः, न तु भावनायामेवेति नियमः। तथा च न तदनुरोधेन भावनाया वाच्यत्वं[३] घञादौ सिध्यतीत्याशङ्कां निरसितुमाह-

सम्बोधनान्तं कृत्वोऽर्थाः कारकं प्रथमो वतिः।
धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ्॥ 16॥

### 17.1 सम्बोधनान्तस्य क्रियान्वयः

संबोधनान्तस्य क्रियान्वयः[४]। तथा च समर्थ(पा.2-1-1)सूत्रे वार्त्तिकम्- "एकतिङ् वाक्यम्" इति। अत्र भाष्यम्[36]- "ब्रूहि ब्रूहि देवदत्ते"ति। अत्र "[५]वाक्यत्वादामन्त्रितनिघातः सिध्यती"ति कैयटः[37]। "समानवाक्ये निघात[६]युष्मदस्मदादेशा"[38] इत्यनेन समान[७]वाक्ये एव तद्विधानात्।
उक्तं च वाक्यपदीये-

"सम्बोधनपदं यच्च क्रियायास्तद्विशेषणम्[८]।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति॥"(वा.प.द्वि.5) इति[९]।

केचित्तु न्यायसिद्धोऽयमर्थः[१०]। तथाहि संबोधनविभक्तेरनुवाद्यविषयत्वादनुवाद्यस्य विधेयसाकाङ्क्षत्वाद्विधेयस्य च क्रियारूपत्वात् क्रियान्वयोऽर्थायातः। "हे देवदत्त त्वं सुन्दर" इत्यादौ गुणोऽपि विधेय इति चेत्, तथापि क्रियाकाङ्क्षा[११]शान्तये

---

[१] त2-न चास्तु
[२] वा2-"नन्वस्तु धत्वर्थे एव कारका" नास्ति
[३] अ1-भावनायाः धातुवाच्यत्वं, जै-भावनावाच्यत्वं
[४] 1900-क्रियायामन्वयः, जै,के3,द4,अ4-क्रिययान्वयः
[५] जो2,द3-"एक" इत्यधिकं
[६] द1-"निघात" नास्ति
[७] अ3-"समान" नास्ति
[८] जो2,1900-यच्च तत्क्रियायाः विशेषणम्
[९] अ1-" इति" नास्ति
[१०] के3,म,अ4-न्यायसिद्ध एवायमर्थः
[११] के3-क्रियान्तराकाङ्क्षा

तदध्याहारावश्यकत्वेन[१] तदन्वयसंभवादित्याहुः। इदं च[२] वार्त्तिकरीत्या। भाष्यकारानुयायिन[3] 339स्तु "पचति भवति[४], ईक्षस्व शय्यन्ते[५] हतशायिकाः, पश्य मृगो धावति" इत्यादावेकतिङ्भावात्[६] कथमेकवाक्यता, कथं वा "तिङ्ङतिङः"[७] (पा.8-1-28) इति सूत्रे[८] अतिङन्तात्[९] परस्य[१०] पर्युदासः, तिङन्तात् परस्य तिङन्तस्य वाक्यान्तरप्रविष्टतया निघाताप्रवृत्तेः।

उक्तं हि[११] वाक्यपदीये-

"बहुष्वपि[१२] तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता।

तिङन्तेभ्यो निघातस्य पर्युदासस्तथार्थवान्[१३]॥"(वा.प.द्वि.442) इति।

"तस्मात् "एकतिङ्विशेष्यकं[१४] वाक्यम्" इति वार्तिकमत[१५]मभ्युपेयम्। तत्रैक-विशेष्यकं वाक्यमित्येवास्तु। तथा च यत्र न[१६] निघातस्तत्र तिङः[१७] विनाप्युपपत्तेर्न तदध्याहारो युक्तः। अत एव "प्रकृतिसिद्धमिदं हि महात्मनाम्" इति शुद्धसुबन्तम्, "पचति भवती"ति शुद्धतिङन्तम्, "ज्योतिष्टोमेन स्वर्गकाम[१]" इति तदुभय-समुदायरूपमिति[२] तत्[३] त्रैविध्यं संगच्छत इति हि[४] वदन्ति।

---

[१] जै-तदध्याहारावश्यकेन

[२] वा2,भार1-"च" नास्ति

[३] अ4-भाष्यानुयायिन....

[४] अ1-"भवति" नास्ति

[५] द3- "तथापि क्रियाकाङ्क्षा" इत्यारभ्य "शय्यन्ते" पर्यन्तं ग्रन्थः नास्ति

[६] वा2,द1,1900,1915-वेकतिङभावात्

[७] द1-तिङस्तिङः

[८] अ1-सूत्रेण

[९] त1,त5-अतिङात्, त3-अतिङ इति,के3,अ4 -अतिङन्त इति

[१०] भार1,त3,के3-"परस्य" नास्ति

[११] अ1-"हि" नास्ति

[१२] त3-बहुधापि

[१३] अ1-तदर्थवान्

[१४] द4-विषयकं

[१५] अ1-"मत" नास्ति

[१६] के3,भ3,द6,अ4-"न" नास्ति

[१७] जो2,के3-तिङन्तं

इतः पूर्वं कारकाणां क्रियायामन्वयः, सा च क्रिया धात्वर्थ एवेत्युक्तम्। इदानीं धात्वर्थेऽन्वयं स्वीकृत्य भावनान्वयनियममाक्षिपति - नन्वस्तु धात्वर्थे कारकाणामन्वयः इति॥ कारकाणां धात्वर्थे एवान्वयं स्वीकुर्मः, धात्वर्थश्च न भावना, किन्तु तदतिरिक्तम् फलम्। तदाह – न तु भावनायामेवेति नियमः॥ स्वाभिप्रायं प्रकाशयति - तथा चेति॥ कारकाणामन्वयितावच्छेदकत्वं भावनात्वम् , तथा च भावनां विना कारकान्वयानुपपत्त्या धातोर्भावना वाच्येति यदुक्तं तन्नावश्यकम् कारकाणां धात्वर्थान्वयेनैवोपपत्तेः। तस्मात् कारकान्वयानुरोधेन ओदनाद्यनुरोधेन पाक इत्यादौ भावनाया वाच्यत्वं न सिध्यति। घञादौ घञन्तसमुदाये तद्घटक-धातोरित्यर्थः। इत्याशङ्कां निवारयितुमाह – सम्बोधनान्तमित्यादि॥ संबोधनान्त-स्य राम इत्यादेर्योऽर्थस्तस्य क्रियायामन्वयः। अत्र प्रमाणमाह - तथा च "समर्थ" (पा. 2-1-1) सूत्रे वार्तिकम् एक तिङ् वाक्यम् इति। तादृशव्याख्यानपरं भाष्यमाह - अत्र भाष्यम् ब्रूहि ब्रूहि देवदत्तेति॥ ननु देवदत्त इत्यस्य प्लुतसंज्ञायां, "प्लुतप्रगृह्या अचि नित्यमि(पा.6.1.125)" त्यनेन प्रकृतिभावापत्तौ गुणानुपपत्तिरिति चेन्न, प्राचामिति योगविभागेन सर्वप्लुतस्य वैकल्पिकत्वात्। आभीक्ष्ण्ये द्वित्वम्। स्थाने द्वित्वस्वीकारादेकतिङ्त्वं बोध्यम्। सम्बोधनान्तस्य क्रियान्वयबोधनाय भाष्याशयं संयोजयितुं कैयटव्याख्यानमाह - अत्र वाक्यत्वादा-मन्त्रितनिघातः सिध्यतीति कैयटः। वाक्यत्वादित्यस्य एकवाक्यत्वादित्यर्थः। वाक्यत्वादिति हेतुं प्रमाणयति - समानवाक्ये इति॥ वार्तिकमिदम्, समानवाक्ये एकवाक्ये। तथा च संबोधनस्य क्रियानन्वये तस्यान्यत्रान्वये वाक्यभेदः स्यादिति तदुक्तिविरोधः स्यात्तस्मात् संबोधनान्तस्य क्रियायामेवान्वयादत्र वाक्यत्वोक्तिः सङ्गच्छते। वाक्यपदीयमत्र मानत्वेनोपन्यस्यति – उक्तञ्चेति॥

सम्बोधनपदं यस्य तत्क्रियायां विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति॥ (वा.प.द्वि.5)

---

[1] अ1,अ4-स्वर्गकामो यजेत

[2] के3-रूपमिदमिति

[3] जो2-"तत्" नास्ति

[4] त5,अ4-"हि" नास्ति

यत्संबोधनपदं तत्क्रियायां विशेषणम्। तस्य क्रियायामेवान्वय इत्यर्थः। तथा स्वीकारे फलमाह – व्रजानीति॥ तथा सति संबोधनस्य क्रियायामन्वये सति। व्रजानि देवदत्त इत्यत्र "आमन्त्रितस्ये"त्यनेन समानवाक्ये विधीयमानो निघातः, अनुदात्तः स्यात्। अस्यार्थस्यापूर्वत्वं खण्डयति – केचित्त्वित्यादिना॥ अयमर्थः संबोधनस्य क्रियायामेवान्वय इति स्वीकृतोऽर्थः, न्यायसिद्धः युक्तिसिद्धो न तु विधेयतया बोध्यः। तदेवोपपादयति – तथाहीति॥ दर्शयति – सम्बोध्यतावच्छेदकरूपेण ज्ञाते एव सम्बोधनविभक्तिः, अत एव राजा भव युद्धस्वेति व्यवस्थयैव प्रयोगः। अनुवाद्यत्वेन किं सिद्धमित्याह - अनुवाद्यत्वस्य विधेयसाकाङ्क्षात् उभयोः परस्परनिरूपितत्वात्। किं विधेयमित्याह – विधेयस्य क्रियारूपत्वात् । अत्रास्याः भावात् क्रियान्वयः तेनाकाङ्क्षितत्वात्। तथाऽनया रीत्या संबोधनस्य क्रियान्वयः अर्थायातः अर्थात् सिद्धः। नतदर्थमनुशासनीयम्। इदानीं क्रियाया विधेयत्वं निरसितुमाह - हे देवदत्त! त्वं सुन्दर इत्यादाविति॥ अत्र देवदत्तानुवादेन सौन्दर्यगुणोऽपि विधीयमानस्तथा च क्रियाया एव विधेयत्वेन तत्रैव तदन्वय इति दुर्वचम्। क्रियाया एवात्रापि विधेयत्वमिति प्रतिपादयति – तथापीति॥ सर्वं वाक्यं क्रियायां परिसमाप्यते इति नियमेन अत्रापि आकाङ्क्षोपशमनाय क्रियाध्याहारेण क्रियाया विधेयत्वाहानेः। आहुः। केचिद् वार्तिकमतानुयायिनः। भाष्यकारीयसिद्धान्तमाह - भाष्यकारानुयायिनस्तु इति॥ एकतिङ् वाक्यमिति वाक्यलक्षणे वक्ष्यमाणस्थलेऽनेकतिङां सत्त्वाद् वाक्यत्वाभावात् दोष इति तानि स्थलानि दर्शयति – पचति भवतीति॥ वर्तमानकालिकैककर्तृकपाककर्तृका भवनक्रियेत्येकवाक्यतयैव बोधः। ईक्षस्व शय्यन्ते हतशायिकाः इति॥ हतानां शयनानि इव शयनानीति विग्रहे हतशायिकाः, अस्य भावप्रत्ययान्तार्थे शय्यन्त इत्यर्थेऽभेदेनान्वयः। तस्य च कर्मत्वेन ईक्षणेऽन्वयः। तथा च हतशयनसदृशशयनाभिन्नवर्तमानशयनकर्मकं प्रेरणाविषयीभूतमीक्षणमित्यत्रापि एकवाक्यतयैव बोधः। पश्य मृगो धावतीत्यत्रापि च मृगकर्तृकोत्कटधावनकर्मकं प्रेरणाविषयीभूतं दर्शनमित्येकवाक्यतयैव बोधो जायते, स च नोपपद्येत। एकतिङ् वाक्यमिति वार्तिककारीयमतसिद्धवाक्यत्वाभावात्। अनेकतिङ्त्त्वात्। तदाह - एकतिङभावात् कथमेकवाक्यता॥ सूत्रानुपपत्तिमप्याह - कथं वा तिङ्ङतिङः इति सूत्रे इति॥ अतिङन्तात्परं तिङन्तं

समानवाक्यस्थं निहन्यते इति सूत्रार्थः। कः पचतु इत्याद्युदाहरणम्। अतिङन्तादिति पर्यदासो हि पचति भवतीत्यादिव्यावृत्त्यर्थः। स च व्यर्थः स्यात्। एकतिङ्वाक्यमिति स्वीकारे पचति भवतीत्यादौ तिङ्द्वयसत्त्वात्। उक्तरीत्या वाक्यत्वाभावेन समानवाक्ये विधीयमानस्य निघातस्य स्वत एवाप्राप्तेः। तदाह – तिङन्तात्परस्य तिङन्तस्य वाक्यान्तरप्रविष्टतया निघाताप्रवृत्तेः अतिङ् इत्यस्य वैयर्थ्यात्। वाक्यपदीयकारमतमुपन्यस्यति - उक्तं हि वाक्यपदीये इति॥

बहुष्वपि तिङन्तेषु साकाङ्क्षेष्वेकवाक्यता।

तिङन्तेभ्यो निघातस्य पर्युदासस्तथार्थवान्॥(वा.प.द्वि.442) इति।

साकाङ्क्षेषु बहुष्वपि तिङन्तेषु एकवाक्यता भवति। पचति भवति, पश्य मृगो धावतीत्यादिषु इत्यर्थः। एकतिङिति वाक्यलक्षणे एतेषामेकवाक्यत्वं न स्यात्। साकाङ्क्षेषु कर्तृत्वादिनान्वयिषु।

तिङ्तिङ इत्यादिरेकवाक्यत्वे प्रमाणमाह - तिङन्तेभ्य इति॥ तथेति॥ तिङ्द्वयस्यापि एकवाक्यत्वस्वीकारे सति सूत्रे अतिङ् इति पर्युदासः अर्थवान् सार्थकः, स हि तिङन्तेभ्यः परस्य तिङन्तस्य निघातवारणाय, पचति भवतीति। एकतिङित्यस्यैव स्वीकारे तिङ्द्वयस्य वाक्यत्वाभावादेव पचति भवतीत्यादौ निघाताभावासिद्धौ अतिङ् इत्यस्यानर्थक्यात्। तस्मात् तिङ्द्वयस्यापि वाक्यत्वं स्वीकार्यमिति भावः।

तदेव प्रतिपादयति – तस्मादिति॥ एकतिङिति वाक्यलक्षणं परिष्करोति - एकतिङ्विशेष्यकं वाक्यम्॥ एकतिङर्थमुख्यविशेष्यकं वाक्यमित्यर्थः। तथा चानेकतिङ्क्त्वेऽपि एकतिङर्थस्यैव यत्र विशेष्यता तत्रैकवाक्यत्वं भवत्येवेति भावः। तथा च उक्तस्थलेषु अनेकतिङ्क्त्वेपि एकतिङर्थनिष्ठविशेष्यतासत्त्वेन न वाक्यलक्षणाव्याप्तिः। नेदमपूर्वमपि तु वार्तिकस्यैवायमभिप्राय इत्याह – वार्तिकमतमभ्युपेयमिति॥ तत्रेति। वार्तिके एकतिङित्यस्य स्थाने एकतिङ्विशेष्यकं वाक्यमित्येवोक्तमस्तु। वाक्यस्य त्रैविध्यमाह - तथा चेत्यादिना। क्वचित् तिङन्तं नोच्चार्यते लाघवात्। निघातादिर्यदि न कर्तव्यस्तदा तिङन्तपदाध्याहारो नावश्यकः। तदाह - तिङ्विनाप्युपपत्तेः निर्वाहात्। उदाहरणमाह - अत एवेति॥ प्रकृतिसिद्धमिदं हि महात्मनामिति।

अत्र तिङभावेन शुद्धसुबन्तम् शुद्धसुबन्तसमुदायात्मकं वाक्यम्। शुद्धतिङन्तो-दाहरणमाह – पचति भवतीति॥ सुबन्ततिङन्तात्मकं वाक्यमाह - ज्योतिष्टोमेन स्वर्गकामो यजेतेति॥ तदुभयसमुदायेति॥ सुबन्ततिङन्तोभयसमुदाय-रूप-मित्यर्थः। एतदेव वाक्यस्य त्रैविध्यम् वदन्ति। अत एव तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्वितेति कोशोऽपि सङ्गच्छते। तिङ्सुबन्तेत्यत्र तिङ्सुपोर्द्वन्द्वं कृत्वा अन्तशब्दस्योभयत्रापि सम्बन्धः कार्यः। द्वन्द्वान्ते श्रूयमाणं प्रत्येकमभिसंबध्यते इति नियमात्। उभयोरपि अन्तसहितयोः प्रत्येकं चयेन समासः। उभयोरपि सम्मिल्य चयेन समासश्चेति त्रिविधं वाक्यस्वरूपं सिध्यति। तथाहि - सुबन्तानां चय इत्येकोऽर्थः, रामेण भवितव्यमित्यादौ। तिङन्तचयस्योदाहरणम् – पचति भवतीति। उभयसमुदायो यथा - रामो भवति, पश्य मृगो धावतीत्यादि।

## 17.2 कृत्वोऽर्थाः

**84.**कृत्वोऽर्थाः। "क्रियाभ्यावृत्तिगणने कृत्वसुजि"(पा.**5-4-17**)त्यनेन क्रियायोग एव तत्साधुत्वावगमात्[१]। यथा[२] "सकृत् पचति, द्विः पचती"त्यादि। अत एव "द्वौ घटा"वित्यादिवद्[३] "द्विर्घट" इत्यादिकं न भवति।

## 17.3 कारकम्

कारकम्।[४] "कारके"(पा.**1-4-23**) इत्यधिकृत्य तेषां प्रक्रान्तत्वात्[५]। तत्र च करोतीति कारकमिति[६] योगाश्रयणात् क्रियानन्वयिनो न कारकत्वम्।

अत एव "ब्राह्मणस्य पुत्रं कृष्णं[७] पृच्छति" इत्यत्र[८] ब्राह्मणस्य न कारकत्वमिति स्पष्ट[९]माकरे[40]।

---

[१] अ3-तत्साधुत्वाभ्युपगमात्

[२] त1,त3,1900,त5-तथा

[३] अ1,भ2-"आदि" नास्ति

[४] अ1-"कारकाणि। जातावेकत्वम्।" अधिकम्

[५] भ1-प्रकारान्तरत्वात्

[६] के3,अ4-"कारकमिति"नास्ति

[७] अ1-कृषन्तं

[८] जै,अ4-"ब्राह्मणस्य पुत्रं कृष्णं पृच्छति इत्यत्र" नास्ति

यद्वा कारकशब्दः क्रियावचनः करोति कर्तृकर्मादिव्यपदेशानिति[२] व्युत्पत्तेः। तथा चाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियार्थक[३]कारकशब्दानुवृत्त्या क्रियान्वयिनामेव संज्ञेति भाष्यादौ स्पष्टम्।

17.4 प्रथमो वतिः

प्रथमो वतिः। "तेन तुल्यं क्रिया चेद् वतिः"(पा.5-1-115)इत्यनेन[४] विहितः। तत्र यत् तुल्यं सा क्रिया चेदित्युक्तत्वात्। यथा[५] "देवदत्तवत् पठति[६]" इत्यादि। एवं च "चैत्रवत् सुन्दरः" इत्यादौ[७] च[८] भवतीत्याद्यध्याहार्यम्[९]। अन्यथा सूत्रे क्रिया चेदित्यनर्थकमेव स्यात्[१०]।

17.5 धातुसंबन्धाधिकारनिष्पन्नः प्रत्ययः

धातुसंबन्धाधिकारे[११]। "धातुसंबन्धे प्रत्ययाः"(पा.3-4-1) इत्यधिकृत्य तेषां विहितत्वात्। यथा[१२] "भोक्तुं पचति" इति[१३]। "पातुं जलम्" इत्यादौ चा[१४]-नेयमित्याद्य[१५]ध्याहार्यमेवे[१६]त्युक्तप्रायम्।[१]

---

[१] अ3-स्फुट

[२] त्रि,म- ----व्यपदिशतीति

[३] वा2-"कारकशब्दः" इत्यारभ्य "क्रियार्थक" इत्यन्तं ग्रन्थः नास्ति

[४] अ1-इति

[५] त1-तथा,त5-तथा च

[६] अ1,के3,त्रि,अ4-पचति

[७] अ4-इत्यत्र

[८] अ1,भार1,द1,द2,त1,जै,जो2, 1900,भ2,भ3,अ4-"च" नास्ति

[९] द3-भवतीत्याद्यध्याहार्यः,भ1-भवतीत्याद्यध्याहार्यमेवेत्युक्तप्रायम्

[१०] भ1-अन्यथेत्यादि वाक्यं नास्ति,

[११] अ1-धातुसंबन्धाधिकारेति, अ3-धातुसंबन्धाधिकारनिष्पन्नं

[१२] के3-अन्यथा

[१३]अ1-"इति"नास्ति, भ3,द6,द7-"यथा भोक्तुं पचतीति, पातुं जलमित्यादौ चानेयमित्याद्यध्याहार्यमेवेत्युक्तप्रायम्" इति धातुसम्बन्धाधिकारे इत्यस्मात् पूर्वं दृश्यते

[१४] के3-"च" नास्ति

[१५] द1-"आदि" नास्ति

[१६] अ1,के2-"एव" नास्ति

कृत्वोऽर्था इति॥ कारिकास्थमिदम् ।कृत्वसुच् सुच्येत्येतौ द्वावेव प्रत्ययौ, बहुवचनन्तु प्रयोगाभिप्रायेण। एतौ प्रत्ययौ क्रियायोगे एव भवत इति। क्रियायामेवैतदन्वय इति भावः। विधायकसूत्रमाह - क्रियाया अभ्यावृत्तिगणने कृत्वसुजिति॥ "संख्यायाः क्रियाया अभ्यावृत्तिगणने कृत्वसुच्(पा.5-4-17)" इति सूत्रम्। अभ्यावृत्तिः पुनः पुनर्जन्म साध्यक्रियाया एव, न तु द्रव्यगुणयोःतयोः सिद्धस्वभावत्वात्। पुनः पुनर्दण्डः पुनः पुनः स्थूल इत्यादावपि अध्याहृतभवत्यादिक्रियाया एवाभ्यावृत्तिः। गणनञ्च कस्यचित्पदार्थस्य संख्यावत्तया बोधनम्। उदाहरणान्याह – सकृत्पचतीति॥ एकवारं पचतीति विग्रहः, एकशब्दात् सुच्। "एकस्य सकृच्च"(पा. 5-4-19)ति सुचि सकृदादेशः। सकारस्य लोपः। सकृदिति अत्राभ्यावृत्तिर्नास्ति, तथाप्यत्र गणनामात्रे सुच्। द्विः पचतीत्यादि॥ आदिना त्रिः पचतीति। अत्र "द्वित्रिचतुर्भ्यः सुजि(पा.5.4.18)"त्यनेन आभ्यवृत्तौ सुच्। पञ्चकृत्वः पचतीत्यपि बोध्यम्।अत्र "संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजि(पा.5-4-17)" त्यनेन कृत्वसुच् प्रत्ययः। एते प्रत्ययाः क्रियाया एव अभ्यावृत्तौ विधीयमाना आत्मनः क्रियायोगं प्रत्याययन्ति। एतेषां प्रत्ययानां ये अर्थास्तेषां क्रियायामन्वय इति भावः। पञ्चकृत्वो भुङ्क्ते इत्यादौ पञ्चादिसंख्योत्पत्तिका वर्तमानकालिकी एकादिकर्तृका भुजिक्रियेति बोधः। अत एवेति॥ कृत्वसुजाद्यर्थानां क्रियान्वयादेव द्वौ घटौ इति द्विर्घट इति न भवति, क्रियाभ्यावृत्तेरभावात्। कारिकोक्तक्रमेण व्याख्यानमाह - कारकम् ।अष्टकस्य साधुत्वं क्रियैवावधार्यतामित्यादिक्रमेणान्वयः। कारकस्य क्रियान्वयोपपादनायाह – कारके इत्यधिकृत्येति॥ तेषां कर्मादीनां प्रक्रान्तत्वात् प्रस्तुतत्वात्। तत्र चेति॥अधिकृतकारकशब्दे करोति क्रियां निर्वर्तयति इति कारकम् इति योगाश्रयणात् व्युत्पत्त्याश्रयणात् क्रियायामेव कारकाणामन्वय इति शेषः। तयोर्जन्यजनकभावसम्बन्धेन परस्परमाकाङ्क्षा-सत्त्वात्। क्रियान्वयिन एव कारकत्वमिति भावः। तदाह- क्रियानन्वयिनो न कारकत्वम्॥ यदा कारकशब्दः क्रियापरः, करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः अथवा यावद् ब्रूयात् क्रियायामिति तावत् कारके इति भाष्याच्च। तच्च कारके इति विषयसप्तमी अन्वयीत्यध्याह्रियते, तथा च क्रियायामन्वयी कर्मादिसंज्ञको भवतीति

---

[1] भ1- "यथा " इत्यारभ्य "त्युक्तप्रायम् " पर्यन्तं ग्रन्थः नास्ति

कर्मादिसंज्ञाविधायकानामर्थः। एतदेव पक्षान्तरमाह-यद्वा कारकशब्दः क्रियावचन इत्यादिना॥ अपादानादिकमपि क्रियान्वये एवेत्यादिसाधनायाह- तथा चाग्निमेषु इत्यादि॥

प्रथमो वतिरिति॥ वतिप्रत्ययविधायकं सूत्रमाह-तेन तुल्यं क्रियाचेद्वतिरिति॥ तेन विहितो वतिः प्रत्ययः तृतीयान्तात् तुल्यमित्यर्थे वतिः प्रत्ययः स्यात् यत्तुल्यं सा क्रिया चेदिति सूत्रार्थः। तदाह- यत्तुल्यं सा क्रिया चेदिति॥ अत्रोपमानपदार्थः उपमेयपदार्थश्च क्रियैवेति ध्येयम्। उदाहरणमाह- देवदत्तवदिति॥ अत्र देवदत्तपदं देवदत्तपठने लाक्षणिकम्पठतीति क्रियाकर्तृत्वेन उपस्थापितं यज्ञदत्तादिपदमपि यज्ञदत्तपठने लाक्षणिकम्। तथा च देवदत्तकर्तृकपठनसदृशं यज्ञदत्तकर्तृकमध्ययनमिति क्रिययोरेव सादृश्यं न तु देवदत्तयज्ञदत्तयोः यत्तुल्यं सा क्रिया चेदित्युक्तेः।

तथा च वत्यर्थसादृश्यस्य क्रिययैवान्वयः। ननु चैत्रवत्सुन्दरः इत्यत्र सौन्दर्यादिगुणे एव सादृश्यान्वयात् क्रिययोरेव सादृश्ये वत्यनुपपत्तिरिति चेन्न। तत्रापि भवत्यादिक्रियाध्याहारेण क्रिययोरेव सादृश्यात्। पर्वतो वह्निमान् धूमात् महानसवदित्यत्रापि वह्निमत्तया महानसकर्तृकभवनसदृशपर्वतकर्तृकभवनमित्येव बोधः, न तु महानससदृशःपर्वत इति बोधः।

धातुसम्बन्धाधिकारे इति॥ तदधिकारोक्तप्रत्ययानां क्रियान्वयं साधयति – "धातुसम्बन्धे प्रत्यया" (पा.3.4.1) इत्यधिकृत्य तेषां विहितत्वात्। अत्र धातु पदं धात्वर्थपरम्। "धातुसम्बन्धे प्रत्यया" (पा.3.4.1) इति सूत्रम्। ये प्रत्ययाः यस्मिन् काले उक्तास्ते धात्वर्थयोरेककालिकत्वे विवक्षिते प्राधान्येन या क्रिया प्रतीयते तस्या यत्कालिकत्वं तस्मिन् काले अप्रधानीभूतक्रियावाचिभ्यः प्रत्यया भवन्तीति कालान्तरेऽपि प्रत्ययान् विदधाति। कालं निमित्तीकृत्य ये प्रत्ययास्ते एवास्य विषयाः। वसन् ददर्श, पश्यन् ययौ इत्यत्र वासदर्शनयोर्दर्शनगमनयोश्च भूतकालिकत्वम्। तत्र तत्र भूतकाले वर्तमानार्थकलट्-स्थानिकः शतृप्रत्ययो नोपपद्येत। अतः धातुसम्बन्धे प्रत्यया इत्यनेन प्रधानीभूतक्रियाकालमादाय भूते लट्। अतीतवासकर्तृकर्तृकम् दर्शनमिति च बोधः। यद्वा सूत्रसामर्थ्यात्

प्रधानीभूतक्रियाकाल एव वर्तमानत्वेन प्रतीत्या वर्तमानकाले लट्। अतः कालार्थकस्य प्रत्ययस्य क्रियायामेवान्वयः सिध्यतीति बोध्यम्। यथा भोक्तुं पचतीति, अत्र पचतीत्यस्य कालः वर्तमानकालः, तदपेक्षया भोक्तुमित्यस्य भविष्यत्काले एव साधुत्वम्।

ननु पातुं जलम् इत्यत्र क्रिया नास्तीति क्रियायान्वयोक्तिरसङ्गतेति चेदाह- आनेयमित्यध्याहार्यमिति॥

17.6 असमस्तनञ्

**85.** असमस्तनञ्। अयं भावः[१]- "न त्वं पचसि, न युवां पचथः, चैत्रो न पचति, घटो न जायते" इत्यादौ क्रियाया एव निषेधो नञा बोध्यते। अत एव विद्यमानेऽपि[२] घटे तथा प्रयोगः[3]। तथा च "घटो नास्ति" इत्यादावप्यस्तित्वाभाव[४] एव बोध्यते। तथा च "प्रकारतासंबन्धेन नञर्थविशेष्यकबोधे भावनोपस्थितिर्हेतु[५]"रिति कार्य-कारणभावः। तथा च "भूतले न घटः[६]" इत्यत्राप्यस्तीत्यध्याहृतक्रियाया-मेवान्वयः, न तु भूतलाधेयत्वाभाववान् घट इति बोधः। कारकाणां क्रिया-तिरिक्तेऽन्वयाभावात्। अत एव "अहं नास्मि घटो नास्ती"त्यादौ पुरुषव्यवस्था, "घटा न सन्ति, घटौ न स्तः" इत्यादौ वचननियमश्चोपपद्यते। युष्मदादे-स्तिङ्सामानाधिकरण्यात्। घटाभावोऽस्ती[७]त्यन्वये[८] च स न स्यात्। अत एव "सुडनपुंसकस्य" (पा.1-1-43) इत्यत्र नपुंसकस्य नेत्यर्थे "न हि नपुंसकेन सामर्थ्यम्। केन तर्हि? भवतिना। इदं च परै[९]रप्यङ्गीकर्तव्यं[१] प्रसज्य[२]पर्यु-

---

[१] के3-असम्भवः

[२] भ1- "अपि" नास्ति

[३] भ2-घटो नास्तीति प्रयोगः इति टिप्पणी

[४] अ1-"अपि" नास्ति

[५] अ1-"हेतुः" नास्ति

[६] त्रि- तथा च भूतले कारकतासम्बन्धेन नञर्थविशेष्यकबोधे भावनोपस्थितिर्हेतुरिति कार्यकारणभावः तथा च भूतले घट

[७] अ1-घटाभावो नास्ती, भ2-घटो नास्तीत्यत्र इति टिप्पणी

[८] अ4-घटाभावोस्ति अन्वये

[९] त1-पदै

दासयोर्भेदार्थमि"ति भाष्यं[41]सङ्गच्छत[३] इति[४]। समासे त्वब्राह्मण इतिवद्भवति क्रियायोगं विनापि[५] साधुत्वमतोऽसमस्तेति। समासायोग्य इत्यर्थः। प्रसज्यप्रतिषेध इति यावत्।

एतेन[42] "यजतिषु ये यजामहं[६] करोति नानुयाजेष्वि"त्यत्र प्रसज्यप्रतिषेधः पर्युदासो वेति संशयेऽनुयाज[७]शब्दसंबन्धे समासापत्तिः। वावचनानर्थक्यं मन्यमानो वार्त्तिककारो नञ्समासादेर्नि[८]त्यतां विग्रहेण सह भिन्नार्थतां[९] च मेने[१०]। सति हि[११] वाक्यसमासयोरैकार्थ्ये[१२] समासनियमाद् वाक्यं निवर्तेतेति तदर्थं[१३] "विभाषे"(पा.2-1-11) ति सूत्रं कार्यं[१४] स्यादेव। तस्मादनुयाज[१५]पदान्वये सामर्थ्याविघातात्[१६] समासापत्तिरिति न पर्युदास इति प्राप्ते ब्रूमः। प्रतिषेधस्य प्राप्तिपूर्वकता[१७]नियमात् प्राप्तेश्च यजतिषु ये यजामहमिति[१८] शास्त्रादन्यतो[१९]ऽसंभवा च्छास्त्रीय[२०] विहितप्रतिषिद्धत्वाद् विकल्पापत्त्या पर्युदास एव। तत्र सामर्थ्यसत्त्वेऽपि विभाषा-

---

[१] अ3-परैरपि स्वीकर्तव्यम्

[२] के3,अ4-प्रसज्यप्रतिषेध-

[३] 1900-भाष्ये सङ्गच्छते

[४] अ1"इति" नास्ति

[५] अ1-"अपि" नास्ति

[६] के3,अ4-यजामहे इति

[७] 1900,1915-ऽनुपात्त

[८] द3- न समासादौ

[९] अ3-भिन्नार्थकतां

[१०] त2-"संबोधनान्तस्य" इत्यारभ्य "मेने" पर्यन्तं ग्रन्थः नास्ति

[११] त2-च

[१२] ब1-रैक्यार्थे, जै,भ3-ऐकार्थे,त्रि,द6-एकार्थे

[१३] अ1-तदर्थे, त2-पदार्थ

[१४] के3,अ4-कर्तव्यम्

[१५] अ1,अ3-दनूयाज

[१६] त2-सामर्थ्यविघातात्

[१७] द4-प्राप्तिपूर्वता

[१८] अ1-यजामह इति

[१९] अ3-शास्त्रतदन्यतो

[२०] त5-....छास्त्रीये

ध्ययनान्न समासः। तच्चावश्यकं वाक्यसमासयोरैकार्थ्यात् समासनियमप्रयुक्तवाक्यनिवृत्तिवारणाय।

यद्यपि समासे राजपदं विशेषणान्वयासहिष्णु वाक्ये तु सहिष्णु[१] इत्यस्ति विशेषः, तथाप्यर्थावैलक्षण्यमेव। अन्यथा विभाषावचनात् प्राग्विहितेनोपकुम्भादिसमासेनापि वाक्यानिवृत्तिप्रसङ्गः। उपपदसमासेन च कुम्भकारादिना[२]। न चैवमिष्टम्[३]। तस्मादनर्थकं तदानर्थक्यवच[४] इति[५] बाध[६]लक्षणे[43] सिद्धान्तितत्त्वान्नासमस्तनञः क्रियान्वयनियमः[७]। यद्यप्यत्र "वावचनानर्थक्यं[८] स्वभावसिद्धत्वादि"ति वदन्[44] वार्त्तिककारो न समासनित्यतां मेने। "एकार्थीभावसामर्थ्ये समासो व्यपेक्षायां च ने"ति भाष्य[45]पर्यालोचनया तदर्थलाभात्। एतन्नियमार्थमेव "समर्थ"[९](पा.2-1-1) सूत्रारम्भः[१०]। अन्यथा व्यर्थताया भाष्य एव स्पष्टत्वात्।

तस्मात् प्रकारान्तरेण विकल्पसिद्धेर्व्यर्थः सूत्रारम्भ इत्यभिप्रायः। एवमुपकुम्भादावबोधकत्वादेव वाक्यस्यासाधुत्वम्। "तस्माद्धेतोर्ब्रूमोऽगमकत्वादिति, न[११] ब्रूमोऽपशब्दः स्यादि"ति भाष्यतत्कैयटाभ्यां[१२] तथा लाभात्[१३]। व्युत्पादयिष्यते चैतदुपरिष्टादितीदमसङ्गतम्। तथाप्यसमस्तनञः क्रियायामनन्वयः[१४] सिद्ध एवेति निरस्तम्।

---

[१] अ1-तत्सहिष्णु

[२] त2-कुम्भकारादीनां

[३] भार1-न चैवमिष्टः, त1-नचैवमनिष्टम्

[४] त1-वचन

[५] अ1,के3,भ2,द5,त5-वचनमिति

[६] अ4-बोध

[७] त्रि-क्रियान्वयः,द5-क्रियान्वयित्वनियमः

[८] अ1-वचनानर्थक्यं

[९] ब1-"समर्थ" नास्ति

[१०] के3,अ4-सूत्रारम्भात्

[११] त2,अ4-"न"नास्ति

[१२] अ1,1900-भाष्यकैयटाभ्यां

[१३] अ4-"लाभात्" इति नास्ति

[१४] अ1-क्रियायामन्वयः

तस्माद् "[1]वायौ रूपं नास्ती"त्यादिप्रसज्यप्रतिषेधस्थले रूपप्रतियोगिकाभावादि[2]-वर्णनं न[3] युक्तम्। अपर्युदासस्थले[4] क्रियान्वयनियमस्योक्तभाष्यादावश्यकत्वादिति भावो द्रष्टव्य इति[5] दिक्॥ **16**॥

---

असमस्तनञ्॥ असमस्तनञोऽर्थस्य क्रियायामेवान्वय इत्यर्थः। तदेवोपपादयति - अयं भाव इत्यादिना॥ द्वौ नञौ प्रसिद्धौ, पर्युदासार्थकः क्रिया-प्रतिषेधार्थकश्च। तत्र प्रथमस्य तु अब्राह्मण इत्यादौ उत्तरपदार्थे ब्राह्मणादावेवान्वयः न तु क्रियायां, तथा सति असामर्थ्यात्समासो न स्यात्। द्वितीयस्य तु क्रियायामेव अन्वयः। यथा न त्वं पचसीत्यादि। तथाहि - न त्वं पचसीत्यत्र त्वत्कर्तृकपाक-क्रियाभावः इति, न युवां पचथ इत्यत्र द्वित्वविशिष्टयुष्मदर्थकर्तृकपाकक्रियाभाव इति, चैत्रो न पचतीत्यत्र चैत्रकर्तृकपाक क्रियाभाव इति बोधेषु तत्र क्रियाया नञर्थे एव अन्वयात् असमस्तनञः क्रियायामन्वयः सिध्यति। ननु उक्तस्थलेषु त्वदभाव-कर्तृकः पाकः, द्वित्वविशिष्टयुष्मदर्थाभावकर्तृक पाक इत्येव बोधोऽस्तु , तथा च बोधानुरोधेन असमस्मनञः क्रियान्वयसाधनमयुक्तमिचेन्न। तथा बोधे अभावस्यैव तिङसामानाधिकरण्यात् पुरुषव्यवस्थानुपपत्तेः। उक्तबोधे तु पुरुषव्यवस्थाया आञ्जस्येनैव सुलभात्। घटो न जायते इत्यत्र घटकर्तृकोत्पत्त्यनुकूलवर्तमान-व्यापाराभाव इति बोधः। एवञ्चात्रापि अभावक्रिययोः परस्परमन्वयः। अत एव असमस्तनञः क्रियानिषेधकत्वादेव। विद्यमानेऽपि घट इति॥ नञा क्रियया एव निषेधात् घटस्यानिषेधाच्च। तथा प्रयोगः घटो न जायते इत्येतादृशः प्रयोगः जायते इति शेषः। घटस्यविद्यमानतादशायां घटकर्तृकोत्पत्त्यनुकूलव्यापाराभावबाधात्। नञा घटाद्यभावबोधे तु उत्पत्त्यनुकूलव्यापारकर्तृत्वाभावादुक्तप्रयोगानुपपत्तिरिति भावः। तदाह - तथा चेति॥ व्यापाराभावाबोधादिति शेषः। उक्तबोधे कार्यकारणभावमाह – प्रकारतासंबन्धेनेति॥ विषयनिष्ठप्रत्यासत्त्येदम्। शाब्दबोधे नञर्थाभावस्य विशेष्यतयाह - नञर्थविशेष्यकबोध इति॥ ननु नञर्थाभावस्य

---

[1] वा2-"तद्" इत्यधिकं

[2] अ1-रूपप्रतियोगिकाभाववानिति

[3] अ1-"न" नास्ति

[4] अ1-पर्युदासस्थले

[5] के3,अ4-"भावो द्रष्टव्य इति" नास्ति

क्रियायामेवान्वय इति यदुच्यते तन्नोचितम्। भूतले न घट इत्यत्र क्रियां विनैव भूतलनिरूपिताधेयत्वाभाववानिति बोधादिति चेन्न, तत्र अस्तीत्यध्याहारेण क्रियायामेव तदन्वयात् भूतलाधिकरणघटकर्तृकसत्ताभाव इत्येव बोधाच्च। तदेवाह - न तु भूतलाधेयत्वेति॥ तथा बोधाभावे हेतुमाह – कारकाणामिति॥ प्रकृते आधेयत्वस्य क्रियायामेवान्वयस्यौचित्यात्। अत एवेति॥ नञर्थस्य घटादावन्वया-भावादेव। यद्वा क्रियायामेवान्वयादेव। अहं नास्मीति॥ नञर्थस्य क्रियायामेवान्वये अस्मदर्थाभिन्नकर्तृकवर्तमानसत्ताभाव इत्येव बोधे अस्मदर्थे तिङ्सामानाधिकरण्येन उत्तमपुरुषव्यवस्था स्यात्। अस्मदर्थाभिन्नकर्तृकसत्तेति बोधे अस्मदर्थभिन्नेन तिङ्सामानाधिकरण्यं स्यात्। न स्यादस्मत्सामानाधिकरण्यं, तथा चोत्तमपुरुषा-नुपपत्तिः। घटा न सन्ति, घटौ न स्त इत्यादौ॥ अत्रापि बहुत्वविशिष्टघटकर्तृक-वर्तमानसत्ताभाव इति, द्वित्वविशिष्टघटकर्तृकसत्ताभाव इति च बोधः, तिबर्थसंख्याया घटरूपे कर्तरि अन्वयेन तत्र द्वित्वादिसत्त्वेन वचनव्यवस्थोपपत्तिः। घटाभावबोधने तु अभावस्यैक्येन तदनुपपत्तिरेव। तदाह - युष्मदादेः तिङ् सामानाधिकरण्यात्। नाहमस्मीत्यभिप्रायेणेदम्। घटाभावोऽस्ति, घटा न सन्तीत्याद्यभिप्रायेण। प्रसज्य-प्रतिषेधनञर्थस्य क्रियायामेवान्वये भाष्यं मानमाह - अत एवेति॥ प्रसज्य-प्रतिषेधनञर्थस्य क्रियायामेवान्वयादेव। "सुडनपुंसकस्ये"(पा. 1-1-43) ति ह्रस्व-घटितः पाठः। अनपुंसकस्येत्यत्र नपुंसकभिन्नस्य सर्वनामस्थानसंज्ञेतिवेति विचारे नपुंसकस्य नेत्यर्थे समासानुपपत्तिमाह भाष्यकारः। तदाह – नपुंसकस्य नेत्यर्थे नहि नपुंसकेन सामर्थ्यम् परस्परान्वयित्वरूपम्। केन भवतिना । सामर्थ्यमिति शेषः। अध्याहृतभवतिनेति ध्येयम्। अनेन भाष्येण प्रसज्यनञर्थस्य क्रियया एवान्वय इत्यायाति। तथा च नपुंसकस्य न भवतीत्युक्तौ नञो भवतिना-न्वयः। न तु नपुंसकेन। तथा च सति उभयोः परस्परान्वयाभावात् सामर्थ्याभावः उक्तः सङ्गच्छते।

इदञ्च पर्युदासस्य समभिव्याहृतपदार्थेन क्रियाभिन्नेन, प्रसज्यस्य तु क्रिययैवेति परैरपिनैयायिकादिभिःस्वीकृतम्। अन्यथा तयोर्भेदो न स्यादित्याह भाष्यकारः। प्रसज्यप्रतिषेधनञो भेदार्थमिति, भेदार्थं विवेकार्थम्। समासे तु इति॥ ननु समासो दार्ष्टान्तिकः, अब्राह्मण इति दृष्टान्तोऽपि समास एवेत्युभयोरैक्येन कथं

दृष्टान्तदार्ष्टान्तिकभावोपपत्तिरिति चेत्तत्रोच्यते। अब्राह्मण इति प्रसिद्धस्थलत्वेन समासविशेषत्वेन दृष्टान्तता, सामान्यरूपेण च दार्ष्टान्तिकतेति कथञ्चिन्नेयम्। असमस्तनञिति॥ समासायोग्य इत्यर्थः इति। उत्तरपदार्थान्वयेऽपि समासविकल्पेन पक्षेऽसमस्तत्वात् यथाश्रुतग्रहणायोगात्। एतेन यजादिषु ये यजामहं करोति नानुयाजेषु इत्यत्रेति॥ एतेन प्रसज्यपर्युदासयोर्भेदप्रदर्शनेन। नानुयाजेषु इत्यत्र नञ् श्रवणेन उभयोः सन्देहः प्रसज्यप्रतिषेधः; पर्युदासो वेति। अनुपात्तशब्दसम्बन्धे [1]इति॥ पुस्तकान्तरे संशये इति सप्तम्यन्तः पाठः। संशये सति अनुपात्तः अनुच्चार्यमाणः शब्दः क्रिया भवत्यादिः तेन सम्बन्धे, स्वाभाववत्त्वसम्बन्धेन, नञः अनुयाजैः सम्बन्धसत्त्वात् सामर्थ्येन समासः स्यात्।

वा वचनार्थक्यमिति॥ विभाषाधिकारस्य। समासादिविधीनां विकल्पेन प्रवृत्तिरित्यर्थः। तत्र फलतो वावचनम्, तस्यानर्थक्यं वार्तिककारो मन्यते, वावचनानर्थक्यमिति। अथवा आनर्थक्यं साधयति - नञ् समासादेः॥ आदिना अन्यसमासः। नित्यतायाम् नञ् समासादिर्नित्यश्चेत् वाक्याभावप्रसङ्गे विकल्प-वचनानर्थक्यमित्यर्थः। वाक्ये प्राप्त्यभावात्। समाससमानार्थवाक्याभावमुपपादयति - विग्रहेण लौकिकविग्रहेण ।अलौकिके तु आरोपितैकार्थीभावस्य स्वीकारेण समानार्थकत्वात्। वृत्तिसमानार्थकत्वं विग्रहत्वमिति वाक्यात्मकविवरणस्य समानार्थकत्वं स्वभावसिद्धमिति, किन्तु समासाभावे वाक्येन तदर्थाप्रतीतौ तस्य भिन्नार्थकतां वार्तिककारो मन्यते। भिन्नार्थकत्वञ्च समासे विशिष्टोपस्थितिः, वाक्ये तु भिन्नोपस्थितिरिति विविच्य बोध्यम्। नन्वेवं सति वाक्यसमासयोः सर्वत्रापि भेदे क्वचिदपि अनित्यसमासो न स्याद् अविग्रहत्वरूपनित्यसमासस्यैव सम्भवादत आह - सति हि वाक्यसमासयोरैकार्थ्ये इति। वाक्यं निवर्तेतेति॥ तत्तत्समासविधिभिः विधीयमानेन समासेनेति शेषः। वाक्यसम्भवमाह – तदर्थमिति॥ वाक्यसत्त्वार्थम्। पूर्वं विभाषेत्यधिकार सूत्रस्यानर्थक्यमुक्तम्। इदानीं तत्सार्थक्यमाह - विभाषासूत्रं कार्यं स्यादेवेति॥ पक्षे वाक्यप्राप्तये। तस्मात् समासविधानस्यानित्यत्वात् अनुयाजपदान्वये, नञः इति शेषः। तथा च परस्परान्वितत्वेन समासापत्तिः।

[1] अनुयाजशब्दसम्बन्धे इति मूलमातृकासम्मतः पाठः, युक्तश्च।

अत्रेदं तत्त्वम्। नानुयाजेषु इत्यत्र वस्तुतः येयजामहं करोति इत्यत्र प्राप्तां क्रियां निषेद्धुमेव नञ् प्रयुक्तः, तस्य च क्रियया साक्षात्सम्बन्धः फलतस्तु अनुयाजेन। तं सम्बन्धमादाय समासापादनं कृतम्। इदञ्चासमर्थसमासरूपमेव। अत एवाग्रे न पर्युदास इत्युक्तम्। तदभावस्तु क्रियानिषेधकनञो योगादित्यापादकग्रन्थाशयः। ब्रूम इत्यादिना पर्युदासपक्षमेवोपपादयति- प्राप्ते ब्रूमः इति॥ यद्वा अनुपात्तशब्दः पूर्वं पठितः करोतिः, तत्सम्बन्धे तेनान्वये करोतिनान्वये सामर्थ्यम्, अत एव सामर्थ्याविघातः। समासापत्तिः। असमर्थसमासापत्तिः। अत एवाह - न पर्युदासः॥ नानुयाजेष्वित्यत्र नञा प्रतिषेधस्य सम्बन्धावश्यंभावेन प्रतिषेधस्य च यजतिषु ये यजामह इत्यादिना प्राप्तिः। तत्पूर्वक एव निषेधः अन्यतो असम्भवादिति। प्रापकप्रमाणान्तरस्याभावात्। शास्त्रविहितप्रतिषिद्धत्वाद् विकल्पापत्तिरिति॥ शास्त्रेण विधानेन विधिपक्षः, नानुयाजेष्वित्यत्र प्रसज्यस्वीकारेण प्राप्तः निषेधपक्षश्च। तथा चोभयोः शास्त्रप्राप्तत्वात् पर्यायत्वेनैव सार्थक्यात् विकल्पापत्तिरिति तु प्रतिभाति। सा चानिष्टेति॥ नानुयाजेषु इत्यत्र पर्युदास एव, न तु क्रियासङ्गतो निषेधार्थकप्रसज्यप्रतिषेधीयो नञ्। तथा अनुयाजभिन्नेषु येयजामहं करोतीत्येकवाक्यतयैवान्वये विकल्पापत्तेरवसर एव नास्ति। नानुयाजेष्वित्यत्र पर्युदासार्थकश्च नञ्। नन्वेवं सति नानुयाजेष्वित्यत्र समासः स्यादित्यत आह - तत्र सामर्थ्यसत्त्वात् ।समस्यमाननञर्थानुयाजयोः परस्परान्वयात् विभाषाध्ययनात् विभाषाधिकारात् न समासः, किन्तु असमास एव, नञो लोपादिकार्यं नेति भावः। तच्चावश्यकमिति॥ तच्च समासविभाषावचनं च आवश्यकम्। आवश्यकत्वे फलमाह - वाक्यसमासयोरैकार्थ्यात् समानार्थकत्वात्। समासनियमेति॥ अत्र नियमपदं विधिपरम् , विधिना च वाक्यनिवृत्तौप्राप्तायां विभाषाधिकारेण सा निवार्यते। तथा च समासविधानं विकल्पितम्। तेन पक्षे वाक्यस्यापि साधुत्वम्। ननु पूर्वं समासवाक्ययोर्भिन्नार्थकत्वमुक्तमिहैकार्थ्यमुक्तमसङ्गतमिति चेन्न। यत्किञ्चिन्न्यूनार्थाभिधायकत्वे सत्यतिरिक्तानभिधायकत्वस्य ऐकार्थ्यपदेन ग्रहणात्।

इदानीं पूर्वमुक्तमेवाशङ्कते - यद्यपि समासे। राजपुरुष इत्यादि समासे, राजपदं समासघटकराजपदम्। विशेषणान्वयासहिष्णु ऋद्धस्येत्यादि विशेषणान्वयानर्हम्। “सविशेषणानां वृत्तिर्न, वृत्तस्य विशेषणयोगेने”त्यनेन नियमेन वा,

समस्तराजपदार्थस्यैकदेशत्वेन च। वाक्ये तु राज्ञः पुरुष इत्याद्यात्मके सहिष्णु विशेषणान्तरान्वयार्हम्। अयमस्ति विशेषः विशेषणानर्हत्वार्हत्वविशेषः। तथापि एवं विशेषसत्त्वेऽपि । अर्थवैलक्षण्यम् अभेदः पदार्थाभेदः अस्त्येव। तत्कर्तृक-सत्तास्त्येव। तस्मादर्थवैलक्षण्यात् समासः पक्षे वाक्यम् विभाषाधिकारवचनात्।

अन्यथा - अर्थे वैलक्षण्येऽपि विभाषाप्रवृत्तौ। यद्वा विभाषाधिकारस्याभावेऽ पि समासविकल्पस्वीकारे । उपकुम्भमित्यादि समासेनापि वाक्यनिवृत्तिरिति "अव्ययं विभक्त्यादि"(पा. 2.1.6) सूत्रेषु विभाषाऽसम्बन्धेऽपि तत्प्रवृत्तिस्वीकारात् अर्थवैलक्षण्येऽपि तत्प्रवृत्तिस्वीकाराच्च वाक्यनिवृत्त्यापत्तिरेव स्यात्। उक्ताभिप्राये तु उपकुम्भमित्यादौ वाक्यनिवृत्तिरेवेति ध्येयम्। तत्र नित्यसमासस्वीकारादाह - न चैवमिष्टमिति॥ विभाषाधिकारवैयर्थ्यमाह – तस्मादिति॥ विभाषाधिकारस्य वाक्यसमासयोः साधकत्वात् । यद्वा तदर्थमेव प्रकारान्तरेणाह। प्रकारान्तरम् एकार्थीभावविवक्षया समासः, तदविवक्षया समासाभावः वाक्यमिति विभाषाफल-सिद्धेः, सूत्रारम्भः विभाषाधिकारः व्यर्थः, विकल्पविधानस्यान्यथासिद्धेः। समर्थसूत्रेति॥ तस्य सूत्रस्य पदविधेः सामर्थ्यसम्बन्धित्वप्रतिपादनं फलम्। तथा चैकार्थीभाववत्त्वे समासः, व्यपेक्षावत्त्वे वाक्यमिति तात्पर्यम्।

नन्वेवं विभाषाधिकारस्य फलाभाव इति चेन्न। क्व एकार्थीभावः, क्व च नेति लक्षणैकचक्षुष्काणां विषयनिर्धारणार्थं तदावश्यकत्वात्। मध्ये पाठसामर्थ्यात् "सुप्सुपे"(पा. 2.1.4)त्यादिना सिद्धौ "अव्ययमि"(पा. 2.1.6)त्यादिना पुनः समासविधानात्ज्ञापकाच्च "अव्ययमि"(पा. 2.1.6)त्यादिना विधीयमानानां समासानां च नित्यत्वमेव। विस्पष्टं पटुर्विस्पष्टपटुरित्यादि विग्रहप्रदर्शनाच्च "सह सुपे" (पा. 2.1.4) ति समासस्तु अनित्य इति बोध्यम्। तथा चोक्तरीत्या उपकुम्भमित्यादौ नित्यसमास एवेति तत्साधकमुपपादयति – एवमुपकुम्भा-दाविति॥ अबोधकत्वात् नित्यसमासतया वृत्त्यर्थावबोधकत्वाभावात्। एवेति॥ एवेन उपायान्तरव्यवच्छेदः युक्तेरेव साधकत्वमुक्तम्। वाक्यस्य विग्रहवाक्यस्य असाधुत्वम्। अप्रयोगः। अलौकिकविग्रहस्तु भवत्येव। तदभावे सुबन्ताभावेन समासो न स्यात् सुबन्तानामेव समासात्। अलौकिकविग्रहस्तु आरोपितसमासार्थ-वत्त्वेन समानार्थ एवेति सिद्धान्तः। तदेवाह – तस्मादिति॥ समानार्थत्वाभावात्।

तदेवाह – अगमकत्वादिति॥ वृत्त्यर्थावबोधकत्वाभावात्। वाक्यनिवृत्तिरिति शेषः। न ब्रूमः अपशब्दः स्यात्। अपशब्दः असाधुः। तथा च यथा अश्वशब्दो भिन्ने दरिद्रेऽर्थे अपशब्दः तथैव समासातिरिक्तार्थवाचकस्य वाक्यस्य समासार्थे प्रयोगे तस्यासाधुत्वमेवेति बोध्यम्। एतत्सर्वं समासशक्तौ व्युत्पादयिष्यते। एवं सत्यपि यदस्योक्तस्य कृते अन्यैरिदमसङ्गतमिति विरोधिभिर्यदुक्तम् तन्निरस्तमित्यग्रिमेणान्वयः। निरस्तत्वहेतुमाह- अपर्युदासस्थले क्रियान्वयनियमस्योक्तभाष्यादावश्यकत्वात्॥ "सुडनपुंसकस्य" (पा.1.1.43) त्यादिसूत्रस्थभाष्ये प्रसज्यप्रतिषेधस्यासमस्त नञः क्रिययैव सम्बन्धबोधनादिति।

17.7,8 यस्य च भावेनेति सप्तमी, अनादरे षष्ठी च

**86.** तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्।
साधुत्वमष्टकस्यास्य क्रिययैवावधार्यताम्॥ **17**॥

यस्य चेत्येकदेशेन "यस्य च[१] भावेन भावलक्षणम्"(पा.**2-3-37**)इति सूत्रं लक्ष्यते[२]। तत्र भावेनेत्युक्तत्वाद् भावस्य च क्रियात्मकत्वात् क्रियायोगं विना न साधुत्वमित्यर्थः। यथा[३] "गोषु दुह्यमानासु गत" इति। षष्ठी चेत्यत्रापि "षष्ठी चानादरे"(पा.**2-3-38**) इति[४] सूत्रं लक्ष्यते। अत्रापि चकारात् पूर्वसूत्रस्थं भावेनेत्यायातीत्यर्थः। यथा[५] "रुदति रुदतो वा[६] प्राव्राजीदि[७]"ति। साधुत्वमिति।[८] एतत्स्वरूपं त्व[९]साधुरनुमानेने(शक्तिनिर्णयः - का.**38**)त्यत्र वक्ष्यामः।

---

[१] जो2-"यस्य च" नास्ति

[२] अ4-लालक्ष्यते

[३] 1915-तथा

[४] अ4-इत्येतत्

[५] के3-"यथा" नास्ति

[६] जै-दुह्यमानासु इत्यत्र "सु" इत्यारभ्य "रुदतो" इत्यन्तं ग्रन्थः नास्ति

[७] 1915-प्रावाजीदिति

[८] द1-"यत्तु अपरिस्पन्दसाधनसाध्यो धात्वर्थो भावः, यथा रूपं पश्यतीत्यादौ, सपरिस्पन्दसाधनसाध्या क्रिया यथा घटं करोतीत्यादौ, तदत्र नाश्रीयते किन्तु उभयम्" इत्यधिकं

[९] त2-चा

क्रिययैवेत्येवकारोऽयोगव्यवच्छेदार्थः। तथा चैतदष्टकस्य[१] क्रियायोग एव साधुत्वं नान्यथेत्यर्थः। ननु क्रियाशब्दस्य धात्वर्थमात्रे प्रसिद्धेः फलयोगे भवतु[२] साधुत्वलाभः, न तु[३] भावनान्वयनियमो लभ्यत इति न तदनुरोधेन पाक इत्यत्र भावनावाच्यत्वं सिध्यतीति चेन्न, "भूवादि"(पा.1-3-1)सूत्रादौ क्रियाशब्दस्य भावनायामेव प्रसिद्धेः साङ्केतिकी तस्यां[४] शक्तिः, फले तु क्रियत इति यौगिकः प्रयोगः।

तथा च नावमिकाधिकरण(मी.9-2-5)न्यायेन भावनान्वय एव साधुत्वाख्यानं लभ्यते[५]। "रथन्तरं हि यद्योन्यां तदुत्तरयोर्गायती"ति वचनाद् रथन्तरयोनेः परतो बृहद्योनेः पठितत्वात् तस्यां गेयमुतो[६]त्तराग्रन्थे "न त्वावामन्य" इत्यस्याः[७] पठितत्वात् तस्यामिति संशये विशेषाभावादनियमं प्रापय्योत्तराग्रन्थे संज्ञारूपेण प्रसिद्धिः, संज्ञाशब्दश्चानपेक्ष[८]प्रवृत्तिर्बलवानिति तत्रैव गेयमित्यूहलक्षणे[46] निरूपितम्।

## 17.9 फलांशस्य भावनायां विशेषणतानिरूपणम्

किं च, फलांशोऽपि भावनायां विशेषणं कारकाण्यपि क्वचित्[९] तथाभूतान्येवेति "गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यादि"(मी.3-1-12-22)ति[१०] न्यायेन भावनामेव विशेष्यतयाङ्गीकुर्वते, न गुणभूतं फलांशमिति न तत्रान्वयः। अपि च कारकाणां नित्यपरतन्त्राणां विशेष्याकाङ्क्षायां धात्वर्थफलांशस्य तथान्वययोग्यतायामपि [तस्यापि[११]] परतन्त्रस्य विशेष्याकाङ्क्षापूरणसमर्थायां भावनायामेव

---

[१] अ4-चैवतदष्टकस्य

[२] अ1-"भवतु" नास्ति

[३] ब2-ननु

[४] 1900-तस्याः, के3,अ4-शक्तिः तस्यां

[५] जो2-लभते, 1915-साधुत्वाख्यानलभ्यते

[६] 1915-"उत" नास्ति

[७] अ1-इत्यस्य, त3-इत्यस्यां, द1,भ3-इत्यस्यापि

[८] अ1-शचान्यानपेक्ष, जो2-श्चानपेक्ष्य

[९] अ3-क्वचिच्च

[१०] वा2-"वा" इत्यधिकं

[११] "तस्यापि" इति बहुषु मातृकास्वस्ति, आवश्यकं च

विशेषातिदेशाध्यायाधिकरण(मी.8-3-5)न्यायेनान्वयः। "न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुक"[47] इति न्याये[१] ह्याकाङ्क्षाशमकत्व[२]क्लृप्ति[३]रेव बीजम्। तत्तुल्यमत्रापि।

एवं च "विशेष्यतासंबन्धेन कारकप्रकारकशाब्दबोधं प्रति धातुजन्यभावनोपस्थितिः कारणमि"ति कार्यकारणभावस्य क्लृप्तत्वाद्यत्रापि पक्ता[४] पाक[५] इत्यादौ भावना गुणभूता[६], तत्रापि[७] क्लृप्तकार्यकारणभावानुरोधात्[८] तस्यामेवान्वयः कल्प्यत[९] इति न फलांशे तदन्वयः।

[१०]फलांशोपस्थितिरेवास्तु कारणं "काष्ठेनोदनस्य पक्ते"त्यादौ क्लृप्तत्वादिति चेन्न, कारकीभूतधात्वर्थस्य भावनायामनन्वयापत्तेः। न हि स्वयमेव स्वकारकम्[११]। विधिवाक्ये धात्वर्थफलांशस्य करणतयान्वयेन तत्र कारकान्वये वाजपेयाधिकरण (मी.1-4-6) भङ्गापत्त्या करणान्तरोप[१२]संग्रहेण प्रयोग[१३]विधेरबोधकता[१४]पत्तेश्च। क्रियान्वयित्वं विना कारकत्वस्यैव दुर्वचत्वाच्च। फलान्वयित्वस्य[१५] तत्रैवा[१६]-व्याप्तेरयोगादित्यादि कारकार्थनिर्णये वक्ष्यते।

---

[१] अ1,त2-न्यायेन

[२] अ1-काङ्क्षायाः शामकत्व, 1900,1915-शामकत्व

[३] त्रि-.....सिद्धि

[४] के3,म-पक्ता अपि

[५] भार1,द1,त1,वा2,1900-पाचक

[६] अ1-गुणीभूता

[७]त्रि- गुणभूता तत्रापि इत्यस्य स्थाने "गुणभूता तत्रापि धातुजन्यभावनोपस्थितिः कारणमिति कार्यकारणभावस्य क्लृप्तत्वात् यत्रापि पक्ता पाक इत्यादौ भावना गुणभूता तत्रापि" इत्यस्ति

[८] अ4-......नुरोधेन

[९] द7-कल्पते

[१०] द6-ननु इत्यधिकम्

[११] अ3-स्वप्रकारकं

[१२] अ3-कारणान्तरोप

[१३] त्रि-प्रयोगे

[१४] अ4-बोधत्वा

[१५] अ3-फलान्वयस्य

[१६] भ2-तत्रैव-फले इत्यर्थः, ज्योतिष्टोमेन यजेतेत्यादौ भावनायां करणत्वेनान्वयात् इति टिप्पणी

तस्मात् पाक इत्यादावोदनस्येत्यादिकारकान्वयाय भावनाया वाच्यत्वमावश्यकमिति सिद्धम्।

केचित्तु[१] "भूतले घटो, देवदत्तो घटं[२], देवदत्तेनौदन" इत्यादौ क्रियावाचकतत्तत्पदं[३] विना शाब्दबोधस्याकाङ्क्षानिवृत्तेश्चादर्शनान्न क्रियायोगं विना साधुत्वम्। न च क्रियारूपार्थाध्याहारेणापि शाब्दबोधाकाङ्क्षानिवृत्त्योः संभवान्न तद्वाचकपदप्रयोगावश्यकत्वम्[४], पदजन्यपदार्थोपस्थितेरेव [५] शाब्दबोधोपयोगि त्वात्। पदानां संभूयान्वयबोधकत्वव्युत्पत्तेश्चेत्याहुः[६]। एतन्मते "पाकः सुन्दर" इत्यादावप्याकाङ्क्षासत्त्वात् क्रियायोगं विना असाधुतापत्तिः[७]। इष्टापत्तिर्भाष्यविरुद्धेति तद्विदां स्पष्टम्। फलांशान्वयलाभेनो[८]पपत्तौ भावनान्वयालाभश्चेति तु चिन्त्यम्॥ **17**॥

---

यस्य च भावेनेति॥ "यस्य च भावेन भावलक्षणमि(पा.2.3.37)"ति सूत्रं लक्ष्यते। घटितत्वसम्बन्धो लक्षणा। ननु भावपदं पदार्थमात्रपरमित्यत आह - तत्र भावेनेति॥ भाव्यते कारकेणेति व्युत्पत्त्या क्रियार्थः भावशब्दः। तेन क्रियायोगे एव षष्ठीविधानेन षष्ठ्यर्थस्य क्रियायोगो निश्चीयते। ज्ञाप्यज्ञापकभावः सम्बन्धः। तथा च गोषु दुह्यमानासु गतः इत्यत्र गोदोहनकर्माभिन्नगोनिष्ठज्ञापकतानिरूपितज्ञाप्यतावद् तत्कालिकगमनाश्रय इति बोधः। क्रिययोर्ज्ञाप्यज्ञापकभावः सम्बन्धः। कारिकायां षष्ठी चेत्यनेन द्वितीयमपि सूत्रं बोध्यते।

तदाह - षष्ठी चेत्यत्रापि षष्ठी चानादरे इति॥ आनादराधिक्ये गम्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः। क्रिययोर्लक्ष्यलक्षणभावे यस्येत्यनेन सप्तम्येव। अनादराधिक्ये तु भावलक्षणे षष्ठी सप्तम्यौस्त इति विशेषः। भावलक्षणमित्युक्तेर्ज्ञाप्यतायाः क्रियायामेव सत्त्वाच्च तत्रैवान्वयस्यौचित्यम्। द्वितीयस्यो-

---

[१] भ1-केतु

[२] अ1-देवदत्ताय घटः

[३] अ1-तत्पदं

[४] के3-पदावश्यकम्

[५] त2-"विना" इत्यारभ्य "पदार्थोपस्थितेरेव" इति पर्यन्तं ग्रन्थः नास्ति

[६] भ1-श्चाहुः

[७] अ1,1900,त्रि-असाधुतापत्तेः

[८] त5-फलांशान्वये लाभे नो

दाहरणमाह - रुदति रुदतो वा प्राव्राजीदिति॥ अत्र रोदनकर्त्रभिन्नपुत्रादि विशिष्टमतीतकालिकं यद् व्रजनं तदाश्रयः पित्रादिरिति बोधः। व्रजने पुत्रादि-वैशिष्ट्यञ्च स्ववृत्तिरोदनकालिकत्वं स्वविषयकानादरसामानाधिकरण्यमेतदुभयसम्बन्धेन।

कारिकोक्तमंशमाह – साधुत्वमिति॥ कारिकोक्तस्याष्ट कस्य साधुत्वं क्रिययैवेति॥ एवकारस्य अयोगव्यवच्छेदोऽर्थः। कोशादौ तथैव निर्णीतत्वात्। अष्टकस्यान्वयिनी क्रियैव, नान्यः पदार्थः, तेन अष्टकान्वयायोगः क्रियायां यः प्राप्तस्तस्यैव व्यवच्छेदस्तस्य व्यवच्छेदो व्यावृत्तिः एवकारेण क्रियते। तथा क्रियान्वयोऽवश्यम्भावीति फलति। क्रियां विना अष्टकस्यासाधुत्वमपीति। तदाह मूले - तथा चेत्यादिना॥

कारिकायां व्यापारात्मकक्रियापदमन्यथा व्याख्याति - ननु क्रियाशब्दस्य धात्वर्थमात्रे प्रसिद्धेरिति॥ धात्वर्थमात्रेति मात्रशब्दः कात्स्न्यार्थकोऽत्र। तथा च क्रियापदेन धातोर्यौ फलव्यापारौ अर्थौ तावुभावपि गृह्येते। प्रकृते च क्रियते या इति क्रियापदेन फलग्रहणे क्षत्यभाव इति। तथा च उक्तानां धात्वर्थरूपफलात्मक-क्रियान्वय इत्येवोच्यतां तथात्वेनैव तेषां साधुत्वमिति भावः। तथा च धात्वर्थ-फलान्वयेन निर्वाहे भावनान्वयनियमोऽसिद्धः। फलस्यापि क्रियापदव्यपदेशात् क्रियान्वयित्वं कारकत्वमित्यपि साधु। तदनुरोधेनेति॥ कारकाणां क्रियान्वया-नुरोधेनेत्यर्थः। पाकः इत्यत्र ओदनादीनां कर्मत्वेनान्वयानुरोधेन धातोः व्यापार-वाचकत्वाभ्युपगमो व्यर्थः यद्वा अप्रामाणिकः। ओदनादेः धात्वर्थफलात्मक-क्रियान्वयेनैवोपपत्तेः।

खण्डयति - भूवादिसूत्रादाविति॥ सूत्रे वादिग्रहणानुगतक्रियावाचक-त्वस्यैव धातुत्वबोधनात् क्रियापदस्य भावनायामेव शक्तत्वात् तदेवाह – साङ्केतिकीति॥ सङ्केतः पाणिन्यादिमुनिकृतः भूवादीनां भावात्मकक्रियायां शक्ति-रित्याकारकः संकेतः। ततः आगता शक्तिः।

ननु क्रियाविशेषणमित्यत्र फलमपि क्रियात्वेन व्यवहृतम् इत्यत आह – फलेत्विति॥ तथा च योगात् रूढिर्बलीयसीति क्रियापदेनात्र भावनायाः ग्रहणम्। तदेतद् मीमांसाधिकरणेन साधयति – नावमिकाधिकरणन्यायेनेति॥ रथन्तरशब्दः

सामवेदीयमन्त्रविशेषस्य संज्ञा। रथन्तरं हि योन्यां तदुत्तरयोर्गायति - इति श्रूयते। तत्रेदानीं संदिह्यते – रथन्तरयोन्यपेक्षया उत्तरत्वविशिष्टयोर्योन्योः रथन्तरमुत्तरयो र्गायतीति श्रुतिघटकेन उत्तरयोरितिपदेन ग्रहणम् उत्तरानामकग्रन्थ पठितऋचोर्वा ग्रहणमिति। तत्र उत्तरत्वविशिष्टयोरित्यर्थे किं निरूपितमुत्तरत्वमि त्यवध्याकाङ्क्षा जायते। ग्रन्थस्य ग्रहणे तु अवध्याकाङ्क्षा न जायते इत्यनपेक्ष्य बोधकत्वेन बलवत्त्वादुत्तराग्रन्थ पठित ऋचोरेव ग्रहणमिति मीमांसाया नवमाध्याये निर्णीतम्। तेन रूढेर्बलवत्त्वं स्पष्टमेव बोध्यते। तथा च वेदे रथन्तरयोन्युत्तरं बृहद्योनिः पठिता। तस्यां रथन्तरं न गीयते किन्तु उत्तराग्रन्थपठितऋक्ष्वेव।

इदमेवाह मूले -रथन्तरं हि यद् योन्यमित्यादिना॥ अत्र उत्तराशब्दो वर्तते, तत्रैव सन्देहः, रथन्तरयोनेः परतो बृहद् योनेः पाठः। उत्तराग्रन्थे उत्तराशब्दः संज्ञाशब्दः। संज्ञाशब्दस्योत्तराग्रन्थपरत्वं सिद्धम् , संज्ञा शब्दस्य झटित्यर्थोप-स्थापकत्वात्। तत्रैव उत्तराग्रन्थे।

पुनरपि क्रियाशब्दस्य भावनापरत्वमेव न तु फलपरत्वमित्याह – किञ्चेति॥ प्रधानानुरोधेन क्रियाशब्दो भावनापर एव न तु फलपरः। तदुपपादयति – धात्वर्थे अंशद्वयम्, फलांशो व्यापारांशश्च। तत्र फलांशो भावनायां विशेषणं जनकत्व-सम्बन्धेन। कारकाणि अपि धात्वर्थभावनायामेव विशेषणानि। तथा च कारकाणां फलात्मकक्रियायामन्वयानौचित्यमेव गुणानाञ्च परार्थत्वादिति न्यायात्। कारकाणां क्वचिदिति कथनन्तु पाचक इत्यादौ कारकाणां विशेष्यत्वं दृष्ट्वा संयोजनीयम्। तत्र भावनाया एव विशेषणत्वात्।

ननु नीलघटवद् भूतलमित्यत्र नीलघटयोर्विशेषणतया परार्थत्वेऽपि परस्परान्वयदर्शने नेदमयुक्तमित्यत आह - अपि चेति॥ कारकाणि परतन्त्राणि। क्रियार्थत्वमेव तेषां पारतन्त्र्यम् । फलात्मकक्रियापि कारकसाध्यैवेति तदाकाङ्क्षितत्वादाह – धात्वर्थफलांशेति॥ फलान्वययोग्यतां खण्डयति - तस्यापि परतन्त्रस्येति॥ तस्यापि फलांशस्यापि। परतन्त्रस्य क्रियापेक्षत्वेनेति शेषः।

फलांशस्य पारतन्त्र्योपपादनमाह – विशेष्याकाङ्क्षापूरणेति॥ फलांशो विशेषणं, तस्य विशेष्याकाङ्क्षा जायते, तच्छमनं भावनया भवतीति फलांशो

भावनापेक्षस्तत्रैव तदन्वय इति कारकाणां फलांशस्य च भिक्षुकत्वमेवेति न तयोः परस्परान्वयः, न हि भिक्षुको भिक्षुकान्तरं याचितुमर्हतीति न्यायात् । समानयो-रुपकार्यभावस्यानौचित्यम् न्यायमूलम्।

ग्रन्थकारस्तु न्यायबीजं प्रकारान्तरेण प्रस्तौति - न्याये हि – आकाङ्क्षेति॥ आकाङ्क्षा, उपकार्योपकारभावादिना परस्परमन्वयाकाङ्क्षा, तच्छामकत्वक्लृप्तिरेव मूलम् इत्यर्थः। तत्तुल्ययोः कारकफलांशयोरपि नाकाङ्क्षा। उक्ताशयं कार्यकारण-भावेन साधयति - एवञ्च विशेष्यतासम्बन्धेन कारकशाब्दबोधं प्रतीति॥ तथा चैतत्कार्यकारणभावसिध्यर्थः कारकाणां भावनान्वय आवश्यकः।

नन्वस्य कार्यकारणभावस्य कृदन्तस्थले पाचक इत्यादौ व्यभिचारः, तत्र कारकस्यैव विशेष्यत्वादित्यत आह - यत्रापि पाचकः, पक्तेत्यादौ भावना गुणभूतेति॥ तत्र हि व्यापाराश्रय इत्येव बोधात्। तत्रान्यथा कार्यकारणभावः स तूक्त एव। एवं सत्यपि भावनाकारकयोरेव परस्परमन्वयः। विक्लित्त्यनुकूल-व्यापाराश्रय इति बोधाकारे तयोरेव अन्वयानुभवात्।

फलांशे कारकाणामन्वयाभावो य उक्तस्तत्साधयन्नाह - एवं च विशेष्यता-संबन्धेनेति॥ कृदन्तस्थले कर्त्रादिकारकाणामेव विशेष्यत्वादाह – विशेष्यता-संबन्धेनेति॥ अन्यत्स्पष्टम्। फलांशोपस्थितिरिति॥ कारकीभूतधात्वर्थस्य पश्य मृगो धावतीत्यादौ धावनस्य तस्य भावनात्मकक्रिययैवान्वयात्। विधिवाक्ये इति॥ यजेतेत्यादौ। धात्वर्थफलांशस्य यागादेः, कारकान्वये वा आदिना द्रव्यान्वये वा। यागेन स्वाराज्यं भावयेदित्यादौ स्वाराज्यादौ वान्वये। भङ्गापत्त्या। यागादेः करणत्वेन भावनान्वयस्यैव सिद्धान्तितत्वात्। भावनातिरिक्ते करणत्वेनान्वयोपसंग्रहेण। अबोधकतापत्तेः इष्टाबोधकत्वापत्तेः। कारकाणां फलान्वयं पुनरपि दूषयति – क्रियान्वयित्वं विनेति॥ भावनात्मकक्रियान्वयित्वं विनेत्यर्थः। कारकत्वस्येति॥ भावनात्मकक्रियान्वयित्वस्यैव कारकत्वात्। ननु फलान्वयित्वमेवास्तु कारकत्वमित्यत्राह - तत्राव्याप्तेः। करोति क्रियां निर्वर्तयतीति व्युत्पत्त्या भावनात्मकक्रियापेक्षतया भावनान्वयिनि कारके फलान्वयित्वस्याव्याप्तेः। अयोगात् फलान्वयित्वरूपस्य कारकत्वस्यायोगादित्यन्वयः।

उपसंहरति - तस्मात् इति॥ कारकाणां भावनान्वय इत्यस्य साधनादेव पाक इत्यत्र धातुनोपस्थापितायां भावनायामोदनादेः कारकान्वयाय तत्र षष्ठ्युपपादनाय च धातोर्भावनावाचकत्वमावश्यकम्, युक्तिशास्त्रसिद्धमित्यर्थः। कारकाणां क्रियापेक्षत्वं प्रकारान्तरेण प्रतिपादयति - भूतले घट इत्यादौ॥ श्रूयमाणक्रियापदाभावेऽदोषदर्शनात् क्रियान्वयित्वं कारकत्वमिति निर्मूलम् , क्रियाया अभावेऽपि कारकत्वोपपत्तेरित्यभिप्रायः। सर्वं वाक्यं क्रियायामेव समाप्यत इति नियमेन तत्र सर्वत्र क्रियापदाभावे शाब्दबोधस्यासिद्धेः, कारकाणां क्रियाकाङ्क्षत्वेन क्रियापदाभावे क्रियाकाङ्क्षाया अनिवृत्तेः।

तदाह - न साधुत्वम्। अर्थाध्याहारवादमाक्षिप्य निरस्यति - उक्तस्थलेषु क्रियाया आवश्यकत्वे। क्रियाया एवाध्याहारेणोपपत्तौ क्रियापदाध्याहरो नावश्यकः। पदाध्याहारवादी निरस्यति - उच्चारित एव प्रत्यायको भवतीति भाष्यात् , यथाकथञ्चि-दुपस्थितार्थबोधस्वीकारे घटादिपदादाकाशोपस्थितौ आकाशादिबोधापत्तेः। तदुक्तं मूले – पदजन्येति॥ पदनिष्ठशक्तिजन्येत्यर्थः।

ननु क्रियापदं विनापि यावत्पदैरेवास्तु शाब्दबोध इत्यत आह - पदानां संभूयेति॥ यावत्पदार्थानां शाब्दबोध इष्टस्तावदर्थबोधकपदानामिति। एकवैकल्ये शाब्दबोधानुपपत्तेरिति बोध्यम्।

एतन्मते इति॥ कारकाणां क्रियान्वयवादिमते। पाकः सुन्दरः इत्यादौ आकाङ्क्षासत्त्वात् क्रियाकाङ्क्षासत्त्वात्। क्रियायोगं विनेति॥ तं विना आकाङ्क्षानिवृत्ते-रयोगात्। अध्याहारेणैव निराकाङ्क्षप्रतिपत्तिसम्भवात्। इष्टापत्तिरिति॥ असाधुत्वा-पत्तेरिष्टापत्तिः।

सा च भाष्यविरुद्धा। "सहयुक्तेऽप्रधान" (पा.2.3.19) इति सूत्रस्थप्रधानग्रहणप्रत्याख्यानपरकभाष्यविरोधोऽप्यत्र बोध्यः। भाष्यकृता प्रथमार्थस्यापि क्रियायोगेन कारकविभक्तित्वमाश्रित्य कारकविभक्तेर्बलवत्त्वमादाय पुत्रेण सहागतः पितेत्यत्र पितुः प्रथमाविभक्तिसाधनात्। तिङ् समानाधिकरणे प्रथमेति वदतो वार्तिककारस्यापि विरोधाच्च। चिन्त्यम्। भावनान्वयबोधकयुक्तीनामभावात् अस्य चिन्त्यतेति भावः।

18. प्रथमवतेः नञश्च क्रियाभिन्नेऽन्वयस्य अयुक्तत्वप्रतिपादनम्

**87.**यत्तु "भूतले[१] न घटः" इत्यत्र "भूतलाधेयत्वाभाववान् घट" इति बोधान्न क्रियाध्याहारापेक्षा। एवं "पर्वतो वह्निमान् भवितुमर्हति धूमात्, महानसवदि"ति वेदान्ति[२]कृतप्रयोगे प्रतिज्ञा[यां क्रि][३]या[४]पदप्रयोगो वृथेति क्वचित् तर्के दूषितम्[५]। तदनूद्य दूषयति-

> यदि पक्षेऽपि वत्यर्थः कारकं च नञादिषु।
> अन्वेति त्यज्यतां तर्हि चतुर्थ्यां स्पृहिकल्पना॥ **18**॥

आदिना सप्तम्यादेर्घटादावन्वयो गृह्यते[६]। अत एव [भूतले घट इत्यत्र]"[७]भूतलाधेयो घट" इति नैयायिका[८] व्याकुर्वते। चतुर्थ्यां स्पृहिकल्पना त्यज्यतामित्यन्वयः। पुष्पेभ्य इति चतुर्थ्यां श्रुतायां स्पृहयतीत्यध्याह्रियते, न पदान्तरमर्थमात्रं[९] वेति[१०] त्यज्यतामित्यर्थः। विधायकनियमस्तु समान एवेति भावः॥ **18**॥

---

क्रियायोगं विना वाक्यापूर्तिं खण्डयतो मतमाह - यत्तु भूतले न घट इत्यादि॥ भूतले घट इत्यत्र नञर्थस्य घटादेवेवान्वयो न तु क्रियायाम्। तथा सति बोधमाह -

भूतलाधेयत्वाभावान् घट इति॥ अत्र नञर्थाभावस्य घटेऽन्वयोऽनुभूयते। महानसवदित्यत्र वह्निमन्महानसवद् वह्निमत्पर्वत इति च बोधः क्रियायोगं विनैव जायते इति तदभिप्रायः। तदाह - क्रियापदप्रयोगो वृथा निरर्थकः

---

१ जो2-अनु भूते

२ अ1-वेदान्त

३ [ ] – एतत्कोष्टकान्तर्गतः एतन्मातृकां विहाय प्रायः सर्वत्रास्ति, आवश्यकश्च।

४ भ1- "क्रिया" नास्ति

५ अ1-तर्के उद्घोषितं दूषितम्

६ अ1- "गृह्यते" नास्ति

७ "भूतले घट इत्यत्र" इत्यधिकं प्रायः सर्वास्वन्यासु मातृकासु

८ अ3,भ1-नैयायिकनव्या

९ अ1-पदान्तरमर्थान्तरं, जो2,द2,अ4-पदार्थान्तरमर्थमात्रं

१० ज1-चेति

इति क्वचित् तर्के दूषितम्। दूषितत्वं क्रियायोगे। तदनूद्य क्रियायोगनिष्ठदूषितत्वमुपस्थाप्य दूषयति क्रियायोगाभावेऽपि अन्वयप्रकारमिति शेषः।

यदि पक्षेऽपि वत्यर्थः कारकं च नञादिषु।
अन्वेति त्यज्यतां तर्हि चतुर्थ्या स्पृहिकल्पना॥ 18। इति।

यदि वत्यर्थः "तेन तुल्यमि"(पा. 5.1.115) ति सूत्रेण विधीयमानवत्यर्थः सादृश्यम्, महानसप्रतियोगिकसादृश्यवान् पर्वत इति बोधे, पक्षे, पर्वतो वह्निमान् महानसवदित्यनुमितौ पर्वते अन्वेति न तु क्रियायाम्, भूतले न घट इत्यादौ भूतलनिरूपिताधेयत्वाभाववान् घट इति बोधे आधेयत्वकारकं नञर्थाभावे च अन्वेति, न तु क्रियायाम् अनुशासनविरोधेऽपीति शेषः। तर्हि चतुर्थ्याः "स्पृहेरीप्सित" (पा.1.4.36) इति सूत्रेण विधीयमानायाः चतुर्थ्याः विधानाय स्पृहधातुप्रयोगकल्पनमपि त्यज्यताम्, पदान्तरकल्पनयापि पुष्पादिविषयकेच्छया धात्वन्तरेणापि प्रतीतिसम्भवादिति कारिकार्थः।

नञादिष्वित्यत्र आदिपदेन ग्राह्यमाह – आदिनेति॥ भूतले घट इत्यत्र सप्तमी भूतले इति। तत्र सप्तम्यर्थ आधेयत्वं, तस्य घटादौ एवान्वयः। बोधस्तु मूलोक्तः। नैयायिकानां प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारात्। यत्र पुष्पेभ्यः इत्येवोक्तम् तत्र चतुर्थ्युपपत्तये, स्पृह धातोरेवाध्याहारः "स्पृहेरीप्सित (पा.1.4.36)" इत्यनुशासनात्। न तु पदान्तरस्य इच्छतीत्यादेः। अर्थान्तरमिच्छादिभिन्नमित्यर्थः, त्यज्यतां स्पृहिकल्पनेतिशेषः।

नन्वत्र "स्पृहेरीप्सित" (पा.1.4.36) इत्यनुशासनं विनिगमकम् इति चेन्न। वत्यादि स्थलेऽपि "तेन तुल्यमि" (पा.5.1.115) त्याद्यनुशासनस्यापि तुल्यतया विद्यमानत्वात्, क्रियायोगे वतेः साधनात्।

वैयाकरणानां मते तु महानसपदम् महानसवृत्तिवह्निकर्तृकसत्तापरम्, पर्वतपदञ्च पर्वतवृत्तिवह्निपरम् अस्तीत्यध्याह्रियते। तथा च महानसवृत्तिवह्निकर्तृकसत्तासदृशी पर्वतादिवृत्तिवह्निकर्तृका सत्तेति बोधः। भूतले न घट इत्यादौ आधेयस्य नञर्थाभावस्य क्रियायामेवान्वयः। भूतलाधिकरणकघटकर्तृकसत्ताभावः इति बोधश्च। तथा च क्रियायामेवोभयत्राप्यन्वयः।

## 19. कर्तरि विहितानामिन्यादीनां क्रिययैवान्वयः

**88.** एवं कर्तरि विहितानामिन्यादीनां[१] क्रिययैवान्वय इत्याह[२]-

अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।
क्रिया संबध्यते तद्वत् कृतपूर्व्यादिषु स्थिता[48] ॥ **19** ॥

न विविच्य ग्रहो ग्रहणं यस्याः सा तथा। गत इत्यादावविग्रहापि क्रिया ग्रामादिकर्मभिर्यथा संबध्यते तथा कृतपूर्व्यादि[३]ष्वपीत्यर्थः।

ननु वृत्तेरेकार्थीभावरूपत्वाद्[४] गत इत्यादौ पदार्थैकदेश[५]कृतौ कथं ग्रामाद्यन्वय इति चेन्न, "देवदत्तस्य गुरुकुलमि"त्यादावन्वयाय समासे वक्ष्यमाणरीत्यो[49]पपत्तेः।

केचित्तु "कर्तृकरणे कृता बहुलम्"(**पा.2-1-32**), "द्वितीया श्रितातीत"(**पा.2-1-24**),[६] इत्यादिज्ञापकान्न दोष इत्याहुः, तन्न, एकदेशान्वयस्थले च शाब्दबोधोपयुक्ताकाङ्क्षाविरहो बीजं शङ्कायाः[७]। वचनबलाच्च तदुद्धाराभावात्। "कृतपूर्वी कटमि"त्यत्र एककटाभिन्नाश्रयिका योत्पत्तिस्तदनुकूलव्यापारवानिति बोधः। तस्मात् पाक इत्यादौ धात्वंशार्थमादाय कर्मकरणादिविभक्तिवत् "कृतपूर्वी कटमि"त्यादावपि कर्त्राद्यर्थकाः प्रत्यया इति स्थितम्[८] ॥ **19** ॥

---

प्रसङ्गे हि बुद्धिस्थक्रियान्वयिपदार्थानाह - एवं कर्तरि विहितानामिन्यादीनामिति। इत्यादीनामित्यपपाठः।

अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।
क्रिया संबध्यते तद्वत् कृतपूर्व्यादिषु स्थिता ॥

---

[१] 1915-विहितानामित्यादीनां

[२] अ3-इत्याहुः

[३] भ1-कृतपूर्वादि

[४] जो2-वृत्तेरेकार्थभूतत्वात्

[५] 1900,त्रि-पदार्थैकदेशे कृतौ

[६] अ1-"अतीत" नास्ति त2-"देवदत्तस्य गुरुकुलमित्यादावन्वयाय समासे वक्ष्यमाणरीत्यो[८]पपत्तेः। केचित्तु "कर्तृकरणे कृता बहुलम्"(पा.2-1-32), "द्वितीया श्रितातीत"(पा.2-1-24) "नास्ति

[७] अ3-न शङ्कायाः, भार1,त3-"शङ्कायाः" नास्ति, द1-शङ्कायां

[८] अ1-सिद्धम्

यथा गतादिस्था अविग्रहा क्रिया ग्रामादि कर्मभिः सम्बध्यते, तद्वत् कृतपूर्व्यादिषु स्थितापि गुणीभूतापि कारकादिना सम्बध्यते इत्यन्वयः। ग्रामं गत इति दृष्टान्तः। अत्र गतः इति कर्तरि प्रत्ययः। कृदन्तस्थले एकार्थीभावस्वीकारेऽपि अजहत्स्वार्थया गत इत्यस्य गमनकर्तेति बोधः। अत आह - अविग्रहा इति॥ न विविच्य स्वातन्त्र्येण ग्रहो ग्रहणं यस्याः सा, गुणीभूतेति तदर्थः। एकोपस्थितौ गमनस्य कर्तरि विशेषणतया भानात् , तस्यामेव गुणीभूतायां ग्राममिति ग्रामादिकर्मणामन्वयो यथा, तथा कृतपूर्व्यादिषु स्थिता गुणीभूता करणादिक्रिया कर्तृभिः सम्बध्यते। गुणीभूतायामपि कटादेरन्वयः इत्यर्थः। इन्यादिपदेन इन् प्रत्ययान्तः कृतपूर्वी इति गृह्यते। पूर्वं कृतमनेनेति लौकिकविग्रहः। तत्र पूर्वमिति क्रियाविशेषणम्। "सह सुपे ("पा.2.1.4)त्यनेन समासः। अनेनेत्यनुवृत्तौ कृतपूर्वशब्दात् "पूर्वादिनिः" (पा.5.2.86), "सपूर्वाच्च" (पा.5.2.87)त्यनेन इनिप्रत्ययस्तद्धितः। अत्र कटादिकर्मणोऽविवक्षया कृञ्धातोरकर्मकत्वेन "नपुंसके भावे क्त" (पा.3.3.114) इति भावे एव क्त प्रत्ययः। तथा च कृत अम् पूर्व अम् इत्यलौकिकविग्रहे कटादीनामसन्निधानात् नान्वयः। इनि प्रत्यये कृतपूर्वीति जायते। तस्य च पूर्वं कृतवानित्यर्थः। किं कृतवानिति जिज्ञासायां कटमित्यन्वेति। तच्च कर्मत्वं न क्तप्रत्ययेन अभिहितम्। तस्य कर्तरि विधानात्। प्राधान्येन कृद्योगाभावान्न "कर्तृकर्मणोः कृती" (पा.2.3.65)त्यनेन षष्ठी। एकत्वविशिष्टकटाभिन्नाश्रयिका या उत्पत्तिस्तदनुकूलव्यापाराश्रयाभिन्नो देवदत्तादिरिति कृतपूर्वी कटमित्यतो बोधः, तथा चात्रापि गुणीभूतापि उत्पत्त्यनुकूला क्रिया इन्यर्थकर्त्रा देवदत्तेन सम्बध्यते। ननु वृत्तिमात्रे समुदायशक्तेः स्वीकारेणात्रान्तर्गतायाः क्रियायाः पदार्थैकदेशत्वेन तत्रान्यान्वयानुपपत्तिः, "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेने"ति नियमादिति शङ्कामुत्थापयति - ननु वृत्तेरेकार्थीभावरूपत्वादित्यादिना॥ एकार्थीभावरूपसामर्थ्ये एव तद्विधानात्। एकार्थीभावश्च विशेष्यविशेषणभावानवगाहिनी एकोपस्थितिरेव। गत इत्यत्र संयोगानुकूलव्यापाराश्रय इत्येव विशिष्टो बोधस्तत्र व्यापारस्य विशेषणतयैवोपस्थितिः। अतस्तस्य पदार्थैकदेशत्वम्। नियमे पदार्थपदेन पदनिष्ठशक्तिग्रहाधीनोपस्थितीयमुख्यविशेष्यस्य ग्रहणेन विशेषणस्य पदार्थैकदेशत्वात्। अतो नियमविरोधात् ग्रामादेः क्रियान्वयासम्भवेन दृष्टान्तत्वानुपपत्तिरिति भावः। तदाह -कथं

ग्रामाद्यन्वय इति॥ समादधाति – देवदत्तस्येति॥ “समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवदि”ति कारिकाव्याख्यानावसरे समास शक्तौ वक्ष्यते। अयमभिप्रायः- पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिः, नित्यसाकाङ्क्षस्थलातिरिक्तविषया। नित्यसाकाङ्क्षत्वञ्च स्वनिरूपकाकाङ्क्षाव्याप्यज्ञानविषयत्वम्। स्वं नित्यसाकाङ्क्षम्। देवदत्तस्य गुरुकुलम् इत्यत्र यद् गुरुत्वज्ञानम्, तत्र गुरुत्वस्य निरूपकं किमित्याकाङ्क्षा नियमेन जायते। अतो गुरुत्वज्ञानं व्याप्यं निरूपकाकाङ्क्षा व्यापिका। तथा च तादृशव्यापकाकाङ्क्षाव्याप्यं गुरुत्वज्ञानं तद् विषयत्वं गुरुत्वे इति समन्वयो बोध्यः। तथा च देवदत्तस्य गुरुकुलमित्यत्र षष्ठ्यर्थो निरूपितत्वम्। देवदत्तनिरूपितगुरुत्ववत्कुलमिति बोधः। तथा चात्र पदार्थैकदेशेऽप्यन्वयः। नित्यसापेक्षस्थले हि पक्षद्वयमस्ति। देवदत्तस्य गुरुकुलमित्यत्रविशेषणीभूतदेवदत्तादेः गुर्वादिद्वारकस्वनिरूपित-गुरुत्ववदुत्पाद्यत्वसंबन्धेन कुलादिरूपविशेष्ये एवान्वयः इति एकः पक्षः। एतदुक्तं श्रीहरिणा -

> समुदायेन हि सम्बन्धो येषां गुरुकुलादिना।
> संस्पृश्यावयवास्ते तु युज्यन्त तद्वता सह॥ (वा.प.तृ.वृत्ति.47)

अत्रावयवद्वारकः समुदायेन सम्बन्धः सामर्थ्यादवयवमपि विशेषणं स्पृशति। अत्र पक्षे समुदायनिरूपित सम्बन्धे षष्ठी। पदार्थैकदेशगुरुत्वादिनिरूपितसम्बन्ध एव षष्ठीति द्वितीयः पक्षः। अस्मिन् पक्षे देवदत्तादेः गुरुकुलमित्यत्र गुरुत्वरूपे पदार्थैकदेशे देवदत्तादेः निरूपितत्वसम्बन्धेनान्वयः। व्यपेक्षा चात्र मन्तव्या। तदुक्तं हरिणा -

> सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।
> वाक्यवत्सा व्यपेक्षा हि वृत्तावपि न हीयते॥ (वा.प.तृ.वृत्ति.48)

तत्रान्तिमपक्षाभिप्रायेण कारिकोक्तोऽर्थः सङ्गमनीयः इति न किमपि दूषणम्। प्रकारान्तरेणात्र एकदेशान्वयं साधयति – केचित्त्वित्यादिना। ग्रामं गतः, देवदत्तस्य गुरुकुलमित्यादौ योऽहि एकदेशान्वयः, सः नित्यसाकाङ्क्षत्वात् न समाधेयः। अपि तु विधिबलादेवोपपादनीयः। विधयश्च - “कर्तृकरणे कृता बहुलम्” (पा.2.1.32) “द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तपन्नै”(पा.2.1.24)रित्यादयः। कर्तरि करणे च या तृतीया तदन्तम् कृदन्तेन समस्यते इति प्रथमस्यार्थः, हरिणा त्रातः हरित्रातः,

नखैर्भिन्नः नखभिन्न इति तदुदाहरणम्। अत्र हरेः नखानाञ्च गुणीभूतत्राणादिक्रियायामेवान्वयः। यदि पदार्थ इति नियमेन पदार्थैकदेशान्वयो न स्यात्तदा लक्ष्याभावात् सूत्रमेव व्यर्थं स्यादतः पदार्थैकदेशान्वयोऽपि क्वचिद् ज्ञाप्यते। श्रितादिप्रकृतिकसुबन्तेन द्वितीयान्तं समस्यते इति द्वितीयस्यार्थः, ग्रामं गतः ग्रमगत इत्यादीनि तदुदाहरणानि। अत्रापि ग्रामादेः कर्मण्येव गुणीभूतायां गम्यादिक्रियायामेवान्वयम् आदाय समासः। तथा चानेनापि तदेव ज्ञाप्यते। एवं सति क्वचिदेकादेशान्वयोऽपि साधुरिति कल्पनेन आक्षिप्तदोषनिरसनमिति यत्तु वादिनोऽभिप्रायः। पक्षमिमं खण्डयति – तन्नेत्यादिना॥ एकदेशेऽन्वयाशङ्कायाः उभयोरेवान्वयिनोः परस्पराकाङ्क्षाया अभाव एवोत्थापकः, यत्र च भवति परस्परमाकाङ्क्षा क्रियाकारकयोः ग्रामं गच्छतीत्यादौ निश्चयेन, तत्र परस्परमन्वयो जायते न तत्र अन्वयाशङ्का (सन्देहः)। एकदेशान्वयस्थले निरुक्ताकाङ्क्षाया अभावेन अत्र पदार्थैकदेशेऽन्वयोऽस्तु न वेति शङ्का उदेति। निरूप्यनिरूपकस्थले परस्पराकाङ्क्षा दर्शनेनान्वयोपपादानं क्रियते। तथा च नित्यसापेक्षत्वमेव तत्रैकादेशान्वयप्रयोजकम्, न तु ज्ञापकाश्रयणमिति उत्तरग्रन्थाशयस्तदाह - एकादेशान्वयस्थले च शाब्दबोधयुक्तेत्यादि॥ शाब्दबोधं प्रति आकाङ्क्षाज्ञानस्य कारणत्वात्। तादृशशाब्दबोधे उपयुक्ता उपयोगिनी या आकाङ्क्षा तस्याः विरहः शङ्कायाः बीजमुत्थापकम्। यत्र परस्पराकाङ्क्षा नास्ति तत्रान्वयाशङ्कावचनबलादिति "कर्तृकरण"(पा.2.1.32) इत्यादिवचनबलादित्यर्थे तदुद्धाराभावात्, एकदेशान्वयानुपपत्तेरुद्धाराभावात्। नित्यसापेक्षत्वेनैव निर्वाहस्यौचित्यादित्येव युक्तमिति भावः। नन्वेवं रीतेरदर्शनमित्याह – तस्मादिति॥ काष्ठैः पाकः इत्यत्रेति॥ काष्ठैः पाक इति करणविभक्तिः, ओदनस्य पाक इत्यत्र कर्मविभक्तिर्बोध्या।

20. घञादिप्रकृत्युपस्थाप्यक्रियामादाय कृत्वोऽर्थाः स्युरेव

**89.** अथ यदि घञादि[1]प्रकृत्युपस्थाप्यक्रियामादाय प्रत्ययस्तुमुनादिः, तर्ह्येकः पाकः[1], द्वौ त्रयश्चत्वारो वेत्यादौ "द्वित्रिचतुर्भ्यः"(पा.5-4-18) इति[2] सुच्, पञ्चेत्यत्र कृत्वसुच्[3] स्यात्। तुमुनादितुल्यत्वादित्याशङ्क्य समाधिमाह-

[1] अ1- "घञादि" नास्ति

कृत्वोऽर्थाः क्त्वातुमुन्वत् स्युरिति चेत् सन्ति हि क्वचित्।
अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाश्रयात्॥ 20॥

क्त्वादयो यथा धात्वंशक्रियां निमित्तीकृत्य जायन्ते "भोक्तुं पाको, भुक्त्वा पाकः[४], भुक्त्वा गन्ते"त्यादौ, तथा कृत्वोऽर्था अपीति चेदिष्टापत्तिः। द्विर्वचनमित्यादौ दृष्टत्वात्। "सकृत्पाक" इत्यादिकं चानभिधानादेव न भवतीत्याह- अतीत्यादि[५]। अभिधानं तत्तत्प्रयोगाः[६]। तथा च यत्र तादृश[७]मर्थमभिधातुं कृत्वोऽर्थाः समर्थास्तत्र[८] स्युरेव। यथा द्विर्वचनं द्विरण्विधिरित्यादौ। न चैवं प्रकृते {श्रुते}[९]ऽतो नेत्यर्थः।

केचित्तु "क्रियाभ्यावृत्तिगणने कृत्वसुजि"(पा.5-4-17)त्यत्र क्रियाग्रहणं व्यर्थम्[१०], तस्या एवाभ्यावृत्ति[११]संभवात्। तथा च व्यर्थं सत् तदेव ज्ञापयति यदिह सूत्रे साध्यस्वभावैव[१२] क्रियोपादीयत इति न दोषः, तर्हि द्विर्वचनमित्यपि न स्यात्। सत्यम्, "द्विर्वचनेऽचि"(पा.1-1-59) इति ज्ञापकात् तत्सिद्धे[१३]रित्याहुः। तस्माद्धातुवाच्या भावनेति निर्दोषमिति दिक्॥ 20॥

---

ननु गुणीभूतक्रियामादायान्वयेऽपि तुमुन्नादयः साधवस्तदा सकृत्पाकः, द्विःपाकः त्रिःपाक इत्यादयः प्रयोगाः स्युरिति शङ्कते - अथ यदि घञादि इति॥ पाक इत्यत्र पच् प्रकृत्युपस्थापितक्रियान्वयेन यथा भोक्तुं पाक इत्यादौ तुमुन्नादिः

---

[१] भ3-"पाक"नास्ति
[२] द5-"इति"नास्ति
[३] जो2-"च" इत्यधिकं
[४] अ1-भुक्तः पाकः, 1900,के3,1915,अ4-"भुक्त्वा पाकः" नास्ति
[५] अ3-अतिप्रसङ्ग इत्यादि
[६] अ1,त2-तत्प्रयोगः, अ3-तत्तत्प्रयोगः
[७] के3-यादृश
[८] अ1- " समर्थाः" नास्ति, त2-समर्थास्ते
[९] {} एतत् कोष्ठान्तर्गतः पाठः अन्यत्र नास्ति
[१०] त2-युक्तम्
[११] अ3,म-एवावृत्तिसंभवात्
[१२] अ1-स्वभावेनैव
[१३] त5-तत्सिद्धि

प्रत्ययस्तथा तामेव क्रियामादाय एकः पाकः द्वौ पाकौ त्रयः पाका इत्याद्यर्थे सुजादयो भवन्तु, प्रकृत्युपस्थाप्यपचिक्रियायाः सत्त्वात्, क्रियायोगे एव तेषां विधानात्।
अत्राह-

कृत्वोऽर्थाः क्त्वातुमुन्वत् स्युरिति चेत् सन्ति हि क्वचित्।
अतिप्रसङ्गो नोद्भाव्योऽभिधानस्य समाश्रयात्॥

भोक्तुं पाकः, भुक्त्वा पाक इत्यादौ "तुमुन् ण्वुलौ क्रियायां क्रियार्थायाम्" (पा.3.3.10) "समानकर्तृकयोः पूर्वकाले" (पा.3.4.21)इत्यादिना क्रियावाचकोपपदे क्रिययोः पूर्वोत्तरकाले विधीयमानाः तुमुन्नादयः गुणीभूतां क्रियामादाय यथा जायन्ते तथा कृत्वोऽर्थाः सुजादयोऽपि स्युः। तथा च एकः पाकः इत्यत्र सकृत्पाकः, द्वौ पाकौ त्रयः पाकाः इत्यत्र "द्वित्रिचतुर्भ्यः सुजि" (पा.5.4.18)ति द्विः पाकः त्रिः पाकः इति स्युरिति चेदिष्टापत्तिः। "द्विर्वचनेऽचि" (पा.1.1.59) इत्यादौ तथा दृष्टत्वात्। एवमेव द्विःप्रयोगः, द्विरागमनमित्यादयोऽपि प्रयोगाः भवन्ति। अत्र भाष्यप्रदीपो-द्योतकाराः "एकस्य सकृच्च" (पा.5-4-19)ति सूत्रे - "भोक्तुं पाक इत्यादेरसाधुत्वं प्रतीयते। तथाहि - अथानुवर्तमाने क्रियापदे इह कस्मान्न भवति एकः पाकः इति। पूर्वयोर्योगयोश्चापि कस्मान्न भवति द्वौ पाकौ त्रयः पाकाः, चत्वारः पाका इति। नैतत् क्रियागणनम्, किन्तर्हि द्रव्यगणनमेतत्। एतेन भावघञन्तापाकादिसमभिव्याहारे कृत्वोऽर्थानामसाधुत्वं लभ्यते। पञ्चकृत्वः पचतीत्यादौ तु भवत्येवेति बोध्यम्।" इति।

ननु एकः पाक इत्यादौ सकृत्पाकः इत्यपि स्यादत आह - कारिकायाम् अतिप्रसङ्गस्तु इत्यादि॥ तद्व्याख्यामाह मूले - सकृत्पाक इत्यादिकमित्यादिना॥ अभिधानपदार्थमाह – तत्तत्प्रयोगाः। ते च शिष्टकृताः बोध्याः। अभिधानं विवृणोति - तथा चेति॥ कृत्वसुजादयो यत्र स्वार्थाभिधाने समर्थाः, अभिधायकाः तत्र भवन्तु यथा द्विर्वचनमिति। अत्र क्रियाया आवृत्तेः सत्त्वात्। सकृत्पाक इत्यादौ तु क्रिया-वृत्तेरभावान्नेति भावः।

वस्तुतस्तु कृत्त्वोऽर्थविधायके क्रियाया एवाभ्यावृत्तिसम्भवेनार्थतः एव क्रियालाभे क्रियाग्रहणस्योत्तरार्थताया उक्तत्वेन गुणीभूतायामपि क्रियायां कृत्वोऽर्थ-प्रत्ययानां साधुत्वम्। अत एव "द्विर्वचनेऽची" (पा.1.1.59)ति सङ्गच्छते।

मतान्तरमाह - केचित्तु इति॥ अभ्यावृत्तिः पुनः पुनर्जन्म सा च साध्यस्वरूपायां क्रियायामेवेति सूत्रे अभ्यावृत्तिग्रहणेनैव क्रियालाभे क्रियाग्रहणं व्यर्थम् सत्तदेव साध्यमात्रस्वभावाया एव ग्रहणे ज्ञापकमित्यर्थः। तथा च पचत्यादितिङन्तस्थले एव तन्मात्रस्वभावायाः सत्त्वेन भोक्तुं पचति द्विः पचतीति भवति। पाक इत्यत्र प्रकृत्या उपस्थितायाः न साध्यमात्रस्वभावत्वम्। घञादिना सिद्धत्वेनापि भानात्। न दोषः न द्विः पाक इति प्रयोगरूपो दोषः। नन्वेवं द्विर्वचनमित्याद्यनुपपत्तिरत आह – तर्हीत्यादिना॥ अत्र यः सिद्धान्तः स तु वस्तुतस्त्वित्यादिनोक्त एव। तस्मादिति॥ उक्तयुक्तेः।

21. आख्यातस्य कर्तृकर्मार्थकत्वं त्यक्त्वा भावनावाचकत्वं वदतां मीमांसकानां प्रायश्चित्तानुष्ठानापत्तिः

**90.**वस्तुतो धातोर्भावनानभिधायकत्वे[1] आख्यातस्य कर्तुरनभिधायकत्वे चा[2]साधुत्वं स्यादित्याह भेद्येतीति संप्रदायः।वस्तुतस्तु वक्ष्यमाणरीत्या धातोरिवाख्यातस्यापि भावनाबोधकत्वज्ञानाच्छाब्दबोधदर्शनादाख्यातस्यापि भावनायां शक्तिरित्याशङ्कायामाह-

भेद्यभेदकसंबन्धोपाधिभेदनियन्त्रितम्[3]।
साधुत्वं तदभावेऽपि[4] बोधो नेह निवार्यते॥**21**॥

भेद्यं विशेष्यम्, भेदकं विशेषणम्। तयोर्यः संबन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वमित्यर्थः।

अयं भावः- यस्मिन्[5] विशेष्ये यादृश[6]विशेषणान्विते यादृगानुपूर्व्या[7] सूत्रवार्तिकभाष्यकाराद्यन्यतमेन साधुत्वमुक्तम्, स शब्दस्तत्र साधुरन्यत्रासाधुरेव। अत एव

---

[1] अ1,जो2-"धातोः" नास्ति
[2] त1,त5,म -वा, जै-वा चा
[3] द1,ब1,1900,1915,म-निबन्धनम्
[4] त1-तदभावेति
[5] भ1-अस्मिन्
[6] त5-यादृशे
[7] जो2-यादृगानुपूर्व्याः,अ4-यादृशानुपूर्व्या

दन्त्यमध्योऽस्वशब्दो[१]ऽश्वे साधुर्न, किं तु[२] दरिद्रे[३]। एवं तालव्यमध्योऽश्वशब्दोऽश्वे[४] साधुः, न[५] दरिद्रे[६]। एवमाख्यातस्य कर्तुरनभिधायकत्वे धातोश्च भावनानभिधायकत्वेऽसाधुत्वमेव[७] स्यात्। व्याकरणेन तथैव साधुत्व[८]बोधनादिति[९]। एवं चास्तु तिङस्तत्र[१०] शक्तिः[११], सर्वे सर्वार्था इत्यस्यैव स्वीकारात्। परन्तु तत्रार्थेऽसाधुत्वं स्यादिति।

नन्वेतदर्थस्य[१२] जैमिनिप्रभृतिभिराचार्यैः साभि[१३]निवेशमुपपादितत्वात् कथं तद्वचसामसाधुतां[१४] ब्रूषे इति चेन्न, तेषामत्र तात्पर्याभावात्। व्याकरणस्य च[१५] कोशादिवच्छक्तिपरिच्छेदकत्वात्। तथा च पठन्ति[१६]-

"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यव्यवहारतश्च[१७]।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥"[50] इति।

तस्मादेतदर्थे व्याकरणं बलीय इति दर्शनान्तराणां पन्थाः। व्याकरणस्य तत्तदर्थपुरस्कारेण तेषां तेषां[१८] पदानां साधुत्वबोधनार्थ[१]मेव प्रवृत्तिः।

---

[१] त2-"स्तत्र साधुरन्यत्रासाधुरेव। अत एव दन्त्यमध्योऽस्वशब्दो"नास्ति
[२] त2-"किं तु" नास्ति
[३] जो2-ऽश्वे असाधुर्नतु दरिद्रे, 1900,त्रि-"साधुः" इत्यधिकं
[४] के3,अ4-अश्वे एव
[५] जो2-न तु
[६] त2- "एवं तालव्यमध्योऽश्वशब्दोऽश्वे[६] साधुः, न[६] दरिद्रे। "नास्ति
[७] अ3-भावनानभिधायकत्वे चासाधुत्वमेव,भ1- "धातोश्च भावनानभिधायकत्वे" नास्ति
[८] त2-साधुत्वस्य
[९] त्रि-द्योतनादिति, म- "इति"नास्ति
[१०] अ1-अथवा एवं वास्तु तिङन्तस्य
[११] अ1- "शक्तिः" नास्ति
[१२] ज2-नन्वेतदर्थस्यैव
[१३] जो2-सभा
[१४] त2,भ1-मसाधुत्वं
[१५] अ3,त2- "च"नास्ति
[१६] अ1-वदन्ति
[१७] अ1,द1,जो2,1900,त2,भ1,भ2,1915-वाक्याद्व्यवहारतश्च
[१८] वा2,द1-"तेषां" नास्ति

तदुक्तं वाक्यपदीये-

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।[२]" (वा.प.प्र.142)

तथा च श्लोकमध्यस्थव्याकरणपदमर्थसिद्धार्थकथनम्[३], नतु[४] कोशादिवच्छक्तिग्रहार्थमेव[५] प्रवृत्ति रेतस्ये[६]त्यादिकः सैद्धान्तिकः पन्थाः[७]।

21.1 असाधोरपि बोधनिरूपणम्

नन्वेवंविधः[८] शब्दो यद्यसाधुः, तर्हीतो[९] बोधो न स्यात्। शाब्दबोधे साधुत्वज्ञानस्य कारणत्वात् तदभावनिश्चयस्य प्रतिबन्धकत्वाच्चेति[१०] चेन्न,

वस्तुतोऽसाधुत्वेऽपि[११] कारणीभूतसाधुत्वज्ञानसंभवादित्यभिप्रेत्याह- बोध इति। बोधोऽस्तु नाम, असाधुत्वं तु स्यादेवेत्यर्थः।

अत एव "सिद्धे शब्दार्थसंबन्धे"[१२](पा.वा.1) इत्यत्र भाष्यकृतो वदन्ति[51]- "समानायामर्थावगतौ[१३] साधुभिश्चासाधुभिश्च[१४] गम्यागम्येतिवन्नियमः[१५] क्रियते" इति।

---

[१] त्रि-द्योतनार्थ

[२] के3,अ4-"इति"इत्यधिकम्

[३] अ1-कथनपरम्

[४] के3-परन्तु

[५] 1900,1915-ग्रहार्थमेवं

[६] भार1,द1,वा2,त3,जो2,1900,1915-प्रवृत्तिरस्ये

[७] जै-"पन्थाः" नास्ति, त1-प्रवृत्तिरित्यादिकं सिद्धान्तिकःपन्थाः

[८] त2-विधिः

[९] अ1,त2-तर्हि ततो

[१०] वा2,भार1,त3,जो2,1900-प्रतिबन्धकत्वादिति

[११] द1-वस्तुत असाधुत्वेऽपि

[१२]अ4- "लोकतोर्थप्रयुक्ते" इत्यधिकम्

[१३] अ1,अ3,वा2,द1,भ1,भ3,1915-समानार्थावगतौ

[१४] द4- "असाधुभिः " इति नास्ति

[१५] अ1- "इति" नास्ति

वस्तुतः साधुत्वज्ञानं न[१] कारणम्, तदभावनिश्चयश्च[२] न प्रतिबन्धक इत्यसाधुरनुमानेने(वै.सि.का.38 - शक्तिनिर्णयः)त्यत्र[३] वक्ष्यामः।

---

ननु सिद्धान्ते धातोर्भावनायामाख्यातस्य कर्त्रादौ शक्तावपि येषाम्मते धातोर्न भावनायां शक्तिरपित्वाख्यातस्यैव, आख्यातस्य कृतिभावनयोः शक्तिः न तु कर्त्रादौ, तथा च तत्र शक्तावपि साधुत्वासाधुत्वयोरनिर्णय इत्यत्राह - वस्तुतो धातो-र्भावनानभिधायकत्वे इति॥ परमतरीत्येदम्। आख्यातस्येत्यादि॥ इदमपि परमतेनैव। अतः सिद्धान्तमाह – असाधुत्वमिति॥ आह भेद्येतीति सम्प्रदायः। व्याकरणसम्प्रदायः परम्परागतः सिद्धान्तः। भेद्येत्यनेन

भेद्यभेदकसंबन्धोपाधिभेदनिबन्धनम्।
साधुत्वं तदभावेऽपि बोधो नेह निवार्यते॥

इति कारिका लक्ष्यते। पूर्वार्द्धस्येदमवतरणम्। उत्तरार्द्धस्यावतरणमाह - वस्तुतस्तु वक्ष्यमाणरीत्येति॥ वक्ष्यमाणरीत्या शक्तिप्रकरणोक्तरीत्या। यथा वैयाकरणैः भावनाबोधं प्रति धातोर्ज्ञानम् कारणम् , तथा च भावनाबोधकत्वं धातौ, तथैव यन्मते आख्यातज्ञानम् भावनाबोधकमित्यनुभवस्तन्मते भावनाबोधकत्वरूपाख्याते शक्तिरस्तु इति पूर्वपक्षस्याशयः। एतत्पक्षद्वये सिद्धान्तमाह – भेद्यभेदकसम्बन्धेत्यादि॥ कारिकार्थमाह – भेद्यमिति॥ भिद्यते व्यावर्त्यते यत्तद् भेद्यम् विशेष्यम्। विशेष्यस्यैव विशेषणादिना व्यावृत्तिलाभात्। भेदकम् विशेषणं, भिनत्ति व्यावर्तयतीति भेदकम्। भेद्यञ्च भेदकञ्च भेद्यभेदके। तयोर्यः सम्बन्धो विशेष्यविशेषणभावः स एवोपाधिः व्यावर्तको धर्मस्तस्य यो भेदो विशेषः येन सम्बन्धेन समवायादिना विशेष्यविशेषणभावः सः सम्बन्धविशेषो निबन्धनं ज्ञापकं यस्य तत्। अयमाशयः - घटशब्दस्य घटत्वविशिष्टोऽर्थः लोककोशाद्यनुमतस्तत्र यद् घटत्वादि तदेव भेदकं विशेषणमुच्यते। यश्चाश्रयीभूतो घटादिः स विशेष्यमुच्यते। तयोः विशेष्य-विशेषणभावः सम्बन्धः स एव व्यावर्तकः उपाधिः, तस्य विशेषः समवायादिः, समवायसम्बन्धेन घटत्वविशिष्टघट एव घटपदेन बोध्यते, न तु घटत्वविशिष्टपटो न

---

[१] अ1- "न" नास्ति

[२] त1-निश्चयस्य,त2-तदभावानिश्चयो,भ1-निश्चयो

[३] त5,ज2-इत्यसाधुरनुमानेत्यत्र

वा पटत्वविशिष्टो घटः न वा घटविशिष्टघटत्वं घटपदेन बोध्यते। इयमेव व्यावृत्तिः। तथा च यस्मिन् विशेष्ये विशेष्यतया भासमाने घटादौ यादृशघटत्वादि-विशेषणान्विते यादृशानुपूर्वीविशिष्टस्य कोशव्याकरणकारैः साधुत्वेन बोधकत्वमुक्तम् सः शब्दस्तादृशेऽर्थे साधुः, अन्यत्रासाधुः, अर्थविशिष्टशब्दानामेव साधुत्वस्य बोधितत्वात्। एतदुक्तम् अयं भाव इत्यतः असाधुरेवेत्यन्तेन॥ फलितमाह - अत एवेति॥ दन्त्यो वर्णो मध्ये यस्य स दन्त्यमध्यः अस्वशब्दः, दरिद्रत्वविशिष्टेऽर्थे साधुः घोटकेऽसाधुः। तालव्यमध्यः अश्वशब्दः, अश्वत्वविशिष्टे साधुः, दरिद्रेऽसाधुः। कोशादिभिस्तथैव बोधनात्। प्रकृतार्थमाह - भावनायां धातुः साधुः, कर्त्रादौ आख्यातं साधु। हेतुमाह – व्याकरणेनेति॥ व्याकरणम् "भूवादय"(पा. 1.3.1) इति शास्त्रं "लः कर्मणि चे" (पा. 3.4.69)त्यादि च शास्त्रम्। ननु "सर्वे सर्वार्थवाचका" इत्यनेन आख्यातस्यापि भावनावाचकत्वमेवेत्यत आह - एवञ्चास्तु इत्यादि॥ वाचकत्वेऽपि साधुत्वाभावः। सर्वार्थवाचकत्वेऽपि साधुत्वस्य कोशव्याकरणादि-निबन्धनत्वेन सर्वार्थनिरूपितसाधुत्वस्य नियन्त्रितत्वात्। ननु मीमांसकानां मते आख्यातस्य भावनायां शक्तेः स्वीकाराद् भावनार्थे आख्यातस्यासाधुत्वोक्ति-रनुपपन्नेति शङ्कते - नन्वेतदर्थस्य जैमिनिप्रभृतिभिरिति॥ एतदर्थस्य आख्यातस्य भावनावाचकत्वरूपस्यार्थस्य, जैमिनिप्रभृतिभिः मीमांसाचार्यैः, साभिनिवेशम् सद्युक्त्युपन्यासेन, उपपादितत्वात् साधितत्वात् ,तद्वचसाम् आख्यातं भावनायां शक्तमिति वचसाम् , असाधुत्वम् असमीचीनत्वं कथं ब्रूषे त्वं वैयाकरणः। निरस्यति -- तेषामत्र तात्पर्याभावात्॥ मीमांसकानां प्राधान्येन शक्तिबोधने तात्पर्याभावात्। शक्तिग्राहकेषु तेषामनुपादानात्। नन्वस्तु वैयाकरणानामपि तथात्वमित्यत आह - व्याकरणस्य चेति॥ तत्तदर्थपुरस्कारेण प्रकृत्यर्थप्रत्ययार्थपुरस्कारेण अन्वय-व्यतिरेकाभ्यां तत्तदर्थव्युत्पादनेन साधुत्वबोधने एव तात्पर्यात् ।साधुत्वानुशासनेऽत्र शास्त्रे इति भाष्योक्तेश्च। श्रीहरिसम्मतिमाह - तदुक्तं वाक्यपदीये – साधुत्वज्ञान-विषया सैषा व्याकरणस्मृतिः।इति॥

एषा व्याकरणस्मृतिः साधुत्वज्ञानविषया, व्याकरणेन साधुत्वमेव प्रतिपाद्यम् इत्यर्थः। ननु व्याकरणस्यापि शक्तिपरिच्छेदकत्वमसिद्धमित्यत आह - व्याकरणस्य

कोशादिवदिति॥ यथा कोशादिभिः शब्दार्थपरिच्छेदः, शक्तिनिर्णयस्तथा व्याकरणेनापि शक्तेः परिच्छेदः। तथा च पठन्ति -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

तस्मादेतदर्थे व्याकरणं बलीय इति॥ शक्तिग्राहकेषु व्याकरणस्य प्राधान्येन सङ्केतितत्वादेव। एतदर्थे शब्दानां साधुत्वेन बोधकत्वरूपेऽर्थे। बलीयः जैमिनि-प्रभृतिभिरुक्तार्थापेक्षया। सर्वैर्दर्शनैरस्यार्थस्य स्वीकृतत्वात्। ननु व्याकरण-मीमांसान्यायादीनां परस्परं प्रतिद्वन्द्वितया व्याकरणोक्तस्यार्थस्य जैमिन्यादिभि-रग्राह्यत्वापत्तिरित्यत आह - तथा च श्लोकमध्यस्य व्याकरणपदमिति॥ श्लोकः शक्तिग्रहं व्याकरणेत्यादिः। तन्मध्यस्थव्याकरणपदमित्यर्थः। कोशादिभिर्यस्य शब्दस्य यदर्थबोधकत्वमुक्तम् तस्यैव तत्र साधुत्वबोधकं व्याकरणम् , न तु कोशादिकमिव स्वयं शक्तिबोधकम्। तथा च सर्वसम्मतार्थबोधकत्वेन व्याकरणस्य बलीयस्त्वमिति भावः।

मीमांसकमते शक्तत्वसाधुत्वयोः समनियततया साधुत्वाभावेऽसाधुभ्यो बोधो न स्यादिति शङ्कते - नन्वेवंविध शब्दो यदि असाधुरित्यादिना॥ एवं विधः व्याकरणादिद्वारा असाधुत्वेन बोधितः। तर्हि इतः असाधोर्बोधो न स्यात्, साधोरेव बोधकत्वात्। तदाह - शाब्दबोधे इत्यादि॥ खण्डनहेतुमाह - वस्तुतः असाधुत्वेऽपि॥ कारणीभूतं शाब्दं प्रति यत् साधुत्वज्ञानं तस्य सम्भवात्। ननु असाधौ साधुत्वज्ञानानुत्पत्तिः, साधुत्वज्ञानपदेन भ्रमात्मकज्ञानस्य ग्रहणेनादोषात्। इदं समाधानं मीमांसकरीतिमादायेति प्रतीयते। सिद्धान्तस्तु कारिकायां उक्तम् तत्प्रतीकमुपादाय मूलव्याख्यायां इत्यभिप्रेत्याह - बोध इति॥ असाधुभ्यो बोधोऽस्तु। असाधुत्वं तु अस्त्येवेति भावः। वैयाकरणमते शक्तत्वसाधुत्वयोः समनियतत्वा-भावात्। तथा चोक्तं वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोरिति।

भाष्यमत्र मानरूपेणोपन्यस्यति - अत एव सिद्धे शब्दार्थसम्बन्ध इति॥ साधुभिश्चासाधुभिश्च समानायामर्थावगतौ इति अन्वयः। तेन अर्थावगमं प्रति साधुज्ञानं असाधुज्ञानमुभयमपिकारणमिति बोधजनकत्वरूपा शक्तिर्यथा साधुषु तथैव असाधुष्वपि अनेन भाष्येण सिद्ध्यति। सिद्धान्तमाह - वस्तुतस्तु इति॥

शक्तिनिरूपणे एतत्साधकमुपन्यस्तम्। तत्र

> असाधुरनुमानेन वाचकः कैश्चिदिष्यते।
> वाचकत्वाविशेषेऽपिनियमः पुण्यपापयोः॥ (का.37)

इत्युत्तरार्धेन व्याकरणसिद्धान्त उक्तः।

## 21.2 "नानृतं वदेत्" इति निषेधनविषयकमीमांसकसिद्धान्तविरोधशङ्का

**91.** इदं पुनरिहावधेयम्- उक्तरीत्या कर्तुराख्यातार्थत्वे[1] व्याकरणसिद्धान्तासंगतावपि[2] दर्शपूर्णमासप्रकरण[3]पठित[4]"नानृतं वदेत्" इति निषेधवाक्यस्य क्रत्वर्थत्वं[5] न सिद्ध्येत्। तथा च क्रतावपभाषणे क्रतुवैगुण्यनिवारणार्थं[6] प्रायश्चित्तानुष्ठानादिसकलयाज्ञिकमीमांसकादिशिष्टाचारविरोधः।

तथा हि - "नानृतमि"त्यस्य [प्रकरणात् क्रत्वर्थत्वं, आख्यातेन कर्तुरुक्तत्वाच्छ्रुत्या च पुरुषार्थत्वम् । तत्र "श्रुतिलिङ्गवाक्य][7]प्रकरणस्थानसमाख्यानां समवाये पार[8]दौर्बल्यम्, अर्थविप्रकर्षात्" (मी.3-3-7-14)इति न्यायाच्छ्रुतेर्बलवत्त्वात् तद्बलात्[9] पुरुषार्थत्वमेव स्यात्। किं च, सर्वत्रैव यो यदर्थं[10] प्रवृत्तः सन् निवार्यते, स तदर्थमेव प्रतिषेध्यो[11] भवति। आख्यातस्य कर्त्रर्थत्वे च पदश्रुत्यानृतवदन[12]निषेधः[1] पुरुषार्थ एव स्यादिति नाख्यातार्थः[2] कर्ता[3]।

---

[1] द2-"कर्तुराख्यातार्थत्वे" नास्ति

[2] अ1-व्याकरणसिद्धान्तभङ्गापत्तेः

[3] त1-"प्रकरण"नास्ति

[4] जो2,द2-पठितस्य

[5] अ1-क्रत्वर्थं

[6] के3,अ4-निराकरणार्थं, द3- "व्याकरणसिद्धान्त" इत्यत्र "न्त" इत्यारभ्य "निवारणार्थं" पर्यन्तं ग्रन्थः नास्ति

[7] [ ] – एतत्कोष्टकान्तर्गतः एतन्मातृकां विहाय प्रायः सर्वत्रास्ति, आवश्यकश्च।

[8] त1-व्यापार,क3,अ4-पर

[9] ब1,1900,1915-"तद्बलात्" नास्ति

[10] अ1-यमर्थं

[11] वा2,1900,ब1,त्रि-प्रतिषिद्धो, अ1,अ3,त1,भार1,द1,द4,त3,जो2,जै,त2,भ1,भ3,1915-प्रतिषेधो

[12] अ1-वचन

न च कर्तुरवाच्यत्वे "लः कर्मणि"(पा.3-4-69) इति सूत्राप्रामाण्यम्। यथा वृद्धिगुणशब्दौ[४] लोकवेदयोरादैजदेङां वाचकत्वेनादृष्टावपि वैयाकरणैः स्वशास्त्रे परिभाषितौ, यथा वाऽसन्नेव[५] लकार उत्प्रेक्षितः, तथैव कर्तृकर्मादिवाचकत्व[६]स्यापि संभवात्। यत्र तु न्यायानुगतिः[७], तत्र लोकवेदयोरपि न[८] तदुक्तार्थपरिग्रहः।

न चैतावता स्मृतेरप्रामाण्यम्[९], अर्थवादवत्[१०] तात्पर्यविषये प्रामाण्यात्। एवं कृत्प्रत्ययस्थले "जञ्जभ्यमानो[ऽनु]ब्रूयात्[११] मयि वै[१२] ल(द)क्षक्रतू[१३]" इत्यादौ वाक्यात् पुरुषार्थत्वसिद्धये[१४] कर्तुर्वाच्यत्वमावश्यकमिति नोक्ता[१५] प्रतिबन्दिरपीति मीमांसकानामुत्तरमवशिष्यते[१६]।

---

मीमांसकमतविरोधमुत्थापयति - इदं पुनरिहावधेयम् इत्यादिना॥ वैयाकरणनये "लः कर्मणी"(पा.3.4.69)ति सूत्रेण आख्यातस्य कर्त्राद्यर्थे शक्तिरिति स्वीक्रियते। तत्र "नानृतं वदेदि"त्यादौ मीमांसोक्तसिद्धान्तेन विरोधस्तदाह - क्रत्वर्थत्वं न सिध्येदिति॥

---

[१] अ4-अनृतवाद इव निषेधः

[२] द3- "प्रवृत्तः सन्" इत्यारभ्य "नाख्यातार्थः" पर्यन्तं ग्रन्थः नास्ति

[३] अ3- "कर्ता" नास्ति

[४] अ1-गुणवृद्धिशब्दौ

[५] अ3- " वा" नास्ति , 1900- वासन्नैव

[६] भ1-"त्वेनादृष्टावपि" इत्यारभ्य"कर्तृकर्मादिवाचकत्व" पर्यन्तं ग्रन्थः नास्ति

[७] अ1-न्यायागतेः, द1,भ1- न्यायाननुगतिः

[८] त1,के3,अ4-"न" नास्ति

[९] ब2- सूत्राप्रामाण्यम्

[१०] जै-"वत्" नास्ति

[११] [ ] – एतत्कोष्टकान्तर्गतः एतन्मातृकां,अ1,अ3,द1,त3,जो2,भ1,भ2,भ3- मातृकाश्च विहाय प्रायः सर्वत्रास्ति, आवश्यकश्च।

[१२] अ1,अ3,द4- " वै " नास्ति

[१३] अन्यत्र सर्वत्र दक्षक्रतू इत्येव पाठः

[१४] अ1- "कर्तृवाच्यत्वसिद्धये" अधिकं

[१५] त2-नोक्त

[१६] भ1-मुत्तरमविष्टम्(मवशिष्टम्?),द7-मवशिष्टम्

तथाहि - सूत्रादिप्रमाणैः कर्तुराख्यातार्थत्वे साधितेऽपि दर्शपूर्णमास-प्रकरणपठितस्य "नानृतं वदेदि"ति निषेधवाक्यस्य क्रत्वर्थत्वं (क्रतूपकारकत्वं) न सिध्येत्। तत्रत्या इयं स्थितिः। यागे अपशब्दप्रयोगे जाते याज्ञिकैः क्रतुवैगुण्य-निवारणार्थं प्रायश्चित्तमनुष्ठीयते तदसङ्गतं स्यात्।

अथेत्थं बोध्यम् - नानृतमित्यस्य दर्शपूर्णमासयागप्रकरणे पठितत्वात् क्रत्वर्थत्वं प्राप्तम्। आख्यातेन त्वन्मते कर्तुरुपस्थितौ श्रुत्या पुरुषार्थत्वम्। "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमि"ति न्यायात्। तथा च वैयाकरणमते निषेधस्य पुरुषार्थत्वमेव स्यात् श्रुतेः प्रकरणापेक्षया प्रबलत्वात्। इष्यते तु क्रत्वर्थत्वम्।

मीमांसकमते आख्यातश्रुत्या भावनोपस्थितौ क्रत्वर्थत्वोपपत्तिः। तथा च निषेधस्य क्रत्वर्थत्वसिद्धये आख्यातवाच्यैव भावनेति मन्तव्यम्। अन्यथा दोषमाह - तथा चेत्यतः विरोध इत्यन्तेन॥ तथा हीति॥ नानृतमिति क्रतुप्रकरणे पठितम् । अतः प्रकरणात् क्रत्वर्थत्वं प्राप्तम् , आख्यातस्य कर्तृशक्तौ श्रुत्या पुरुषार्थत्वम्। तथा चोक्तन्यायात् पुरुषार्थत्वमेव प्राप्तमिति मूलोक्तार्थः।

पुनरपि दोषमाह - किञ्च सर्वत्रैव यो यदर्थं प्रवृत्तः सन् निवार्यते, अनृतवदनं प्राप्तम् निवार्यते, एतदर्थमेव पुरुषार्थत्वमेव निषेधस्य प्राप्तम्। अतो नाख्यातार्थः कर्ता मन्तव्य इति द्वितीयशङ्काया भावः। क्रत्वर्थत्वसिद्धये आख्यातार्थः भावनेति स्वीकारे अनुशासनविरोधमुत्थापयति। न च कर्तुरवाच्यत्वे इत्यादिना॥ "लः कर्मणी" (पा.3.4.69)ति सूत्रेण कर्तरि कर्मणि च आख्यातविधानात् भावना-वाचकत्वे तद्विरोधः इति भावः। सूत्रप्रामाण्यात् कर्तुरेव वाच्यत्वम्।

सूत्रप्रामाण्यमेव प्रबलयति -- यथेत्यादिना॥ लोके वृद्धिशब्दस्य वर्द्धनम् अर्थः न तु आदैचः, गुणशब्दस्य लोके रूपरसादीनां दयादाक्षिण्यादीनां वाचकत्वं न तु अदेङः। तथा लोकेऽप्रसिद्धेषु आदैक्षु वृद्धिसंज्ञायाः, अदेङ्षु गुणसंज्ञाया अलोकवेदसिद्धेषु वैयाकरणैः "वृद्धिरादैच्" (पा.1.1.1) "अदेङ् गुण" (पा.1.1.2) इति सूत्रैः शक्तिर्बोधिता, तथा "कृत्रिमाकृत्रिमयोः कृत्रिमे कार्य-सम्प्रत्यय" इति परिभाषया गुणवृद्धिशब्देन शास्त्रे तेषामेव ग्रहणम् न तु लोक-

प्रसिद्धानां, तथैवाख्यातस्यानुशासनबलात् कर्त्रादिरूप एवार्थः।

तदाह - यथा वासन्नेव लकारः उत्प्रेक्षितः। लोकादौ अप्रसिद्ध एव कर्त्रादौ कल्पितः केवलं शास्त्रप्रक्रियानिर्वाहार्थम् इत्यर्थः। तेन च कर्त्रादिवाचकत्वमप्यवश्यं स्वीकार्यमेव। इदानीं भावनावादी पूर्वोक्तमभिप्रायमन्यथयति - यत्र तु न्यायानुगतिः। न्यायः श्रुतिलिङ्गवाक्येत्याद्युक्तः, तस्य अनुगतिः प्रवृत्तिः, तत्र लोके वेदे च तदुक्तस्य अर्थस्य "लः कर्मणी"(पा. 3-4-69)ति सूत्रादिना कर्तृवाचकत्वस्य न परिग्रहः किन्तु त्याग एव इत्यर्थः। एवं च आख्यातस्य कर्तृवाचकत्वं न्यक्कृत्य भावना-वाचकत्वमास्थेयम्।

नन्वेवं सति "लःकर्मणी" (पा.3.4.69)ति स्मृतेरप्रामाण्यम्, अर्थवाद-वाक्यानामिव वाच्ये प्रामाण्याभावात्। तात्पर्यविषयीभूतेऽर्थे एव प्रामाण्यानुगमात्। तच्च तात्पर्यं भावनायामेवेति तस्य हृदयम्। सूत्राप्रामाण्यमिति पाठः। नन्वेवं सति कृत्स्थलेऽपि भावनया प्रत्ययार्थत्वमेवास्त्विति चेदत्राह - एवं कृत्स्थले इति॥ तत्र जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू इति वैदिके पुरुषार्थत्वसिद्धये कृतः कर्त्रर्थकत्वस्वीकारात्।

तथाहि - दर्शपूर्णमासे श्रूयते "जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू" इति। जञ्जभ्यमानो जृम्भां कुर्वाणः मयि दक्षक्रतू इति शब्दघटितं मन्त्रमनुब्रूयादित्यर्थः। तत्रायं सन्देहः- अस्य मन्त्रस्य शुद्धपुरुषसंस्कारकतया पुरुषार्थत्वम्, उत क्रतुयुक्त-पुरुषसंस्कारकतया क्रत्वर्थमिति। तत्र शानचा कृत्प्रत्ययेन कर्तुरुपस्थितत्वात् प्रकृतवाक्येन पुरुषसंस्कारकत्वं प्राप्नोति। क्रतुप्रकरणे पठितत्वात् प्रकरणेन क्रतूपकारकत्वस्य प्राप्तावपि प्रकरणापेक्षया वाक्यस्य बलीयस्त्वेन क्रतुधर्मत्वं न युक्तमिति पूर्वपक्षः। तस्य उत्तरम्। यत्र श्रुतिप्रकरणयोर्विरोधस्तत्र श्रुतेर्बलवत्त्वेन प्रकरणस्य बाधः। यत्र विरोधाभावस्तत्रोभयोः समावेश एव। तथा च शानचा कर्तु-रुपस्थितत्वेऽपि क्रतुसम्बद्धपुरुषसंस्कारद्वारा क्रतुसंस्कारोऽपि सिध्यति। तथा चात्र तद्वाक्यात् पुरुषार्थत्वसिद्धये शानचः कर्तृवाचकत्वस्य आवश्यकत्वात् न भावना कृत्प्रत्ययवाच्या। एवं सति कृस्थलीया प्रतिबन्दिरपि आख्यातस्थले नास्ति। समानविरोध्युत्तरं प्रतिबन्दिः। कृत्स्थले यदि प्रत्ययार्थः कर्ता तर्हि आख्यात-

स्थलेऽपीति प्रतिबन्दिस्वरूपम्। तदनयारीत्या आख्यातस्य भावनावाचकत्वं वदतां मीमांसकानामुत्तरम् अवश्यं देयमित्यर्थः।

21.2.1 पूर्वोक्तशङ्कापरिहारः

**92.**अत्रेदं वक्तव्यम्- कर्तृवाच्यत्वावाच्यत्वाभ्यामुक्तसिद्धान्तसङ्गमः, तस्माच्च तत्सिद्धिरित्य[१]न्योन्याश्रयादसंगतमेतत्। किं च[२],कर्तुराख्यातार्थत्वेऽपि श्रुतिप्रकरणाभ्यामस्तु क्रतुयुक्तपुरुषार्थधर्मोऽयं[३] प्रतिषेधः।

न च प्रकरणाच्छ्रुतिः कल्प्या, तया च विनि[४]योगः कार्यः। तथा च प्रथमत एव[५] श्रुत्या पुरुषार्थत्वनिर्णये न[६] क्रतावप्यन्वय[७] आकाङ्क्षाविरहादिति वाच्यम्। एवं हि जञ्जभ्यमानवाक्यस्य[८] वाक्य[९]प्रकरणाभ्यां पुरुषसंस्कारमुखेन क्रत्वर्थत्वसिद्धान्तः[52] प्रस्थितः स्यात्। यत्तु पुरुषसंस्कारमुखेनानृतवदनस्य[१०] क्रत्वर्थत्वे[११] पुरुषांशेऽनुवादः[१२] स्वीकार्यः। ततश्चाविशेषादृत्विजामप्याध्वर्यवादिसमाख्यया प्राप्तानां निषेधः स्यादिति। तज्ज[१३]ञ्जभ्यमानवाक्येऽपि समानम्। तत्रेष्टापत्तौ प्रकृतेऽपि[१४] तां को वारयिता[१५]? एवं च[१] क्रतुयुक्त[२]पुरुषधर्मतैव। अत एव "यद[३]र्था प्रवृत्तिः, तदर्थः प्रतिषेध" इत्यपि संगच्छते।

---

[१] के3-"इति" नास्ति
[२] भ1- "किं च" नास्ति
[३] अ3,1915- "अर्थ" नास्ति, ज2- "धर्म" नास्ति
[४] के3-"नि" नास्ति
[५] जो2-"एव" नास्ति
[६] 1900-निर्णयेन,के3-"न" नास्ति
[७] भ2-न्वयः।
[८] त2-तज्जन्यवाक्यस्य
[९] त2,भ1- "वाक्य " नास्ति
[१०] अ4-....वदननिषेधस्य, अ1-वचनस्य
[११] भ1-क्रत्व
[१२] त2-पुरुषांशानुवादः
[१३] अ3-तत्तु ज, जो2-"तत्" नास्ति
[१४] अ3- "अपि" नास्ति
[१५] अ1-वारयति,द2-निवारयति,भ2,द5-निवारयिता

वस्तुतः

"स्त्र्युपाय[४]मांसभक्षादि[५]पुरुषार्थमपि[६] श्रितः[७]।
प्रतिषेधः क्रतोरङ्गमिष्टः[८] प्रकरणाश्रयात्॥ [53]"

इत्यत्रोक्त[९]नियमे[१०] व्यभिचारो[११] भट्टपादैरेवोक्त इति ध्येयम्[१२]।

वस्तुतः कर्तुर्वाच्यत्वेऽपि क्रियाया एव प्राधान्यात् कर्तुर्गुणभूतत्वाच्चानृतवदन[१३]-निषेधभावनाया न[१४] पुरुषार्थत्वम्[१५]। एवं च भावनायाः कैमर्थ्याकाङ्क्षायां प्रकरणाद् भवतामिव शुद्धं[१६] क्रत्वर्थत्वमिति। कृत्प्रत्ययस्थले पुनःकर्तुर्विशेष्यत्वात् तत्संस्कार[१७]मुखेनैव क्रत्वर्थतेति सहृदयैराकलनीयमिति[१८]।

इदं पुनरिहावशिष्यते- "नानृतं वदेत्" इत्य[१९]नारभ्याधीतवचनस्य[१] दर्शपूर्ण-मासप्रकरणपठितस्य "नानृतं वदेत्" इत्यस्यापि च विनिगमनाविरहाच्छब्दा-नृत[२]मर्थानृतं[३] चेत्युभयमपि निषेध्यमित्यन्यत्र[४] निर्णीतम्[54]।

---

[१] अ1-एवं निषेधश्च
[२] त2,त5- "युक्त"नास्ति
[३] त2- "यद"नास्ति
[४] म-स्त्र्युपगत
[५] अ1-हेयमांसभक्षणादि, अ3,जो2-भक्षादिः
[६] के3,अ4-पुरुषार्थमिह
[७] अ1-श्रौतः, के3-श्रुतः
[८] अ1-मिष्टं
[९] के3,अ4-इत्युक्त
[१०] त2-निर्णये
[११] भ1- नियमो व्यभिचारेण
[१२] जो2-ध्येयः
[१३] अ1-वचन
[१४]त1-"न" नास्ति
[१५] त्रि-पुरुषार्थत्वम् न, ज1- न पुरुषत्वम्
[१६] अ1,त2-सिद्धं
[१७] जो2-न संस्कार, त2-"तत्" नास्ति
[१८] अ1 –राकल्यमिति,अ4-रकालनीयमिति
[१९] के3-"नानृतं वदेत् इति" नास्ति

21.3 व्याकरणस्य प्रामाण्यम्

तथा च साधुत्वनिर्णायकसूत्रवार्तिकभाष्यकारैस्तिङां कर्तर्येव साधुत्वकथनात् तदुल्लङ्घनेन[5] याज्ञे कर्मणि भावनारूपेऽर्थे प्रयुञ्जाना मीमांसकादयश्चतुर्थीमिव षष्ठ्याद्यर्थे कथं न प्रत्यवयन्तु। तथा च साङ्गा[6]नुष्ठानेऽपि तेषामेव प्रायश्चित्ता-नुष्ठानापत्तिः[7]। न च निर्मूलत्वादेतदनुशासनमनादरणीयम्। "तस्माद् ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति श्रुतेः;

"पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥"

इति पराश[रोपपुरा]णादेश्चानेकशो दर्शनात्।

न च लकारवत् कर्त्राद्यर्थकत्वमपि कल्पितम्, सर्वत्र कल्पितप्रकृतिप्रत्ययविभाग-मादायैव पर्यवसितानामर्थविशेषे साधुत्वबोधकत्वस्वीकारात्[8]। तस्मादेत-द्दोषनिरासार्थं कर्तृकर्मणोर्वाच्यत्वमावश्यकमिति सिद्धम्॥ **21**॥

इति वैयाकरणभूषणे धात्वाख्यातसामान्यार्थयोर्निरूपणं[9] समाप्तम्[10]।

---

अयमाशयः - उक्तक्रमेण कर्तृवाच्यत्वे सिद्धे उक्तसिद्धान्तः जञ्जभ्यमानोऽ-नुब्रूयादित्यत्रत्यः सिद्धान्तः, कर्तृवाच्यत्वाभावे (भावनावाच्यत्वे) नानृतं वदेदिति स्थलीयः सिद्धान्तश्च सङ्गमनीयः अनुकूलनीयः। तदुपादानाय च कर्तृवाच्यत्वा-

---

[1] जो2-वदनस्य
[2] ज2-च्छाब्दानृतं
[3] अ1-अर्थकृतं
[4] भार1,भ2,द5-इत्यत्र
[5] त2-तदुल्लङ्घने
[6] त2-समा
[7] के3-अनापत्तिभयम्
[8] भ1-बोधकत्वमपिकल्पितम्
[9] द7- इति वैयाकरणभूषणे तिङर्थनिर्णयः
[10] अ1-सामान्यनिरूपणम्। श्रीकृष्णार्पणमस्तु। अ3-सामान्ययोर्निरूपणं समाप्तम्।, भ1,- इति कोण्डभट्टनिर्मितवैयाकरणभूषणे तिङर्थनिर्णयः समाप्तः,भ2,द5-"शुभमस्तु श्रीरस्तु श्रीरामाय नमः" इत्यधिकम्, भ3,द6- श्री शिव इत्यधिकम्,,त्रि- "समाप्तम्" नास्ति

वाच्यत्वे चाश्रयणीये इति परस्पराकाङ्क्षासत्त्वेनान्योन्याश्रयो दोषः। तस्मात् मीमांसकमतमिदं न समीचीनमिति भावः।

ननु आख्यातस्य कर्तृवाचकत्वे "नानृतं वदेदि"त्यत्र श्रुत्या पुरुषार्थत्वापत्तिवारणं त्वन्मते न सम्भवतीत्याह - किञ्च कर्तुराख्यातार्थत्वेऽपीति॥ यद्यपि श्रुत्या पुरुषार्थत्वं प्राप्तं नत्विष्टं क्रत्वर्थत्वम् , यत्रोभयोर्विरोधस्तत्र बाध्यबाधकभावः, यत्रोभयोः समावेशस्तत्र विरोधाभावात् समावेश एव कार्यः।तथा च क्रतुसंयुक्तपुरुषसंस्कार एव इष्यताम्। तथा च सति सर्वं समञ्जसमेवेति संक्षेपः।

मीमांसकः पुनरपि शङ्कते - न च प्रकरणाच्छ्रुतिः कल्प्येति॥ "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादि"ति न्यायशरीरम्, तत्रैतेषां समवाये पारदौर्बल्यम् , परं परं दुर्बलमिति तस्यार्थः। तत्र निरपेक्षो रवः श्रुतिः, सामर्थ्यं लिङ्गम्। यदुक्तम् - सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते। इति। समभिव्याहारो वाक्यम्। समभिव्याहारो नाम द्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणम्। उभयाकाङ्क्षाप्रकरणम्। प्रयाजादीनां दर्शपूर्णमासादिभिरुपकार्योपकारकयोराकाङ्क्षा। देशसामान्यं स्थानम्। तच्च द्विविधं पाठसादेश्यम् अनुष्ठानसादेश्यञ्च। समाख्या यौगिकः शब्दः। तदेवं श्रुत्यादीनां सामान्यतो लक्षणानि उक्तानि। तेषामुदाहरणानि बाध्यबाधकभावबीजानि च सप्रपञ्चं मीमांसाशास्त्रे निरूपितानि तत एवावगन्तव्यानि। तदेतेषु प्रमाणेषु श्रुतेरेव सर्वापेक्षया प्राबल्यं, निरपेक्षत्वात्। विनियोजकप्रमाणान्तरानपेक्षत्वात्। लिङ्गादीनि तु पञ्च प्रमाणानि स्वस्वपूर्ववर्ति यावत् प्रमाणापेक्षयैव विनियोगं कुर्वन्ति। किञ्च लिङ्गादीनां मौलिकप्रामाण्याय श्रुत्यपेक्षत्वमिति सर्वेषु प्रमाणेषु स्वविनियोगसिद्धये काचन श्रुतिरवश्यमेवाश्रयणीयेति मत्त्वाह मूले - प्रकरणाच्छ्रुतिः कल्प्या इति॥ तथा प्रकरणकल्पितया श्रुत्या च विनियोगः उपयोगः कार्यः। श्रुत्यनुसारेणैव मन्त्राणां संस्कारत्वादिविनियोगः कर्तव्यः। तथा चाख्यातस्य कर्त्रर्थकत्वे आख्यातश्रुत्या कर्तुरुपस्थितौ तत्रैव विनियोगे पुरुषार्थत्वापत्तिस्तदवस्थैवेति भावः। तथा च सकृन्न्यायात् क्रत्वर्थत्वस्येष्टस्यानापत्तिः। इष्टापत्तिं परिहरति - एवं हि जञ्जभ्यमानवाक्येति॥ तत्र हि वाक्यप्रकरणोभयवशात् क्रतुविशिष्टपुरुषसंस्कारप्रतिपादकसिद्धान्तस्य हनिरेव स्यात्। वाक्येन पुरुषसंस्कारस्यैव प्राप्तेः। तदाह - सिद्धान्तः

प्रस्थितः स्यात्॥ हीनः स्यादिति तदर्थः। तथा च प्रकरणकल्प्यश्रुतिमात्रेणार्थनिर्णयस्यानौचित्यमेव , किन्तु तदुभयप्रामाण्येन समावेशपक्षो यथा जञ्जभ्यमानप्रकरणे तथा नानृतमिति प्रकरणेऽपि स्वीकार्यः, तथा च न कोऽपि दोषः। पुरुषसंस्कारस्य विध्यविषयत्वमुपपादयति - यत्तु पुरुषसंस्कारमुखेनेति॥ उक्तरीत्या शानजादिना उपस्थितकर्तृसंस्कारमुखेन तदनुवादेन क्रतुसंस्कारे प्रतिपादनीये क्रतुसंस्कार एव प्रतिपादितः स्यात् , तत्रैव च विधिविनियोगो न तु पुरुषसंस्कार इत्यभिप्रायः। तदाह - पुरुषांशोऽनुवादः इति॥ ततश्च ऋत्विजादीनामपि पुरुषविशेषाणामपि संस्काराप्राप्तिरेव। ननु पुरुषपदेनयज्ञीयपुरुषग्रहणम्। ऋत्विजादीनां यज्ञीयपुरुषत्वानुपपत्तिरित्यत आह – समाख्येति॥ ऋतिषु यजति, अध्वरं युनक्तीति व्युत्पत्त्या तेषामपि यज्ञसम्बन्धित्वेन पुरुषत्वबोधनात्। तत्खण्डयति - तज्जञ्जभ्यमानवाक्येऽपि समानम्। स्वसिद्धान्तेऽपि त्वया यथा तत्र पुरुषसंस्कारस्य विधिविषयत्वम् एव स्वीकृतं नानुवाद्यत्वं तथेहापि स्वीकार्यत्वात् । तत्र त्वया पुरुषार्थत्वस्य इष्टत्वापत्तिर्यदि स्वीकृता तथात्र वारणे विनिगमनाभावः। तथा च उभयत्रापि क्रतुयुक्तपुरुषसंस्काराभिधानेन तत्रत्यग्रन्थोपपत्तिः। एवं स्वीकारे स्वीकृतस्य यदर्था प्रवृत्तिस्तदर्थः प्रतिषेधः इति न्यायस्य सङ्गतिः। यदर्था यज्ञार्था प्रवृत्तिः तदर्थो यज्ञार्थः प्रतिषेधः। क्रतुयुक्तपुरुषसंस्कारोपपादने क्रत्वर्थस्यापि सिद्धेः। तथा चोक्तं भट्टैः-

स्त्र्युपायमांसमक्षादिपुरुषार्थमपि श्रितः।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात्॥ (त.वा.1-3-8-29)

स्त्र्युपायस्त्र्युपगमनम् ।"न स्त्रियमुपेयात् , न मांशमश्नीयात्" आदिना "नानृतं वदेदि"त्यादयः प्रतिषेधाः पुरुषार्थत्वं श्रिताः। प्रकरणाश्रयात् क्रतुप्रकरणाश्रयात् क्रतोरङ्गम् क्रत्वर्थत्वन्तेषामिति। अनेनाप्युक्तार्थसिद्धिः। इदमेवाह - वस्तुत इत्यादिना॥ उक्तनियमे प्रकरणात् श्रुतिपरिकल्प्यो यो नियम उक्तः, तत्र व्यभिचारः, श्रीभट्टोक्तैः। इदानीमाख्यातस्य कर्तृवाचकत्वेऽपि भावनायाः शाब्दबोधीयप्रधानतामादाय क्रत्वर्थत्वमुपपादयति - वस्तुतः कर्तुर्वाच्यत्वेऽपि॥ आख्यातवाच्यत्वेऽपि। क्रियायाः धातुवाच्याया एव प्राधान्यात् शाब्दबोधे प्राधान्येन भानात्, कर्तुः गुणभूतत्वात् , क्रियां प्रतीति शेषः। "नानृतं वदेदि"ति श्रुत्या प्रतीयमाना-

नृतोच्चारणनिषेधभावनायाः न पुरुषार्थत्वम्। अपि तु क्रत्वर्थत्वमेव। भावनाया निषेधभावनाया कैमर्थ्याकाङ्क्षायां, किमर्थं न वदेदिति रूपायां भवतामिव मीमांसकानामिव प्रकरणात् क्रतुप्रकरणात् क्रत्वर्थत्वमेव अनृतवदननिषेधस्य। जञ्जभ्यमानप्रकरणे तु विशिष्टस्यैव संस्कार इति सहृदयैः पक्षपातशून्यैराकलनीयं ग्राह्यमिति।

"नानृतं वदेदि"ति अनारभ्य किञ्चिदनभिधाय अधीतस्य वचनस्य "नानृतं वदेदि"त्यपूर्वस्य शब्दानृतं अपभ्रंशोच्चारणम् अर्थानृतम् क्रतुरूपार्थानृतं तदुभयस्य निषेधे इति तु प्रसङ्गत उक्तम्।

फलितमाह - तथा चेति॥ तत्तत्प्रमाणैरुक्तैः कर्तृवाचकत्वेन तिङां साधुत्वम्। तदुल्लङ्घनेन कर्तृवाचकत्वमुपेक्ष्य भावनावाचकत्वस्वीकारेण यागे कर्मणि भावनायामाख्यातप्रयोगं कुर्वाणाः मीमांसका प्रत्यवायभाजो भवन्तु। दृष्टान्तमाह – षष्ठ्याद्यर्थे॥ अभिमतार्थस्योपलक्षणम्। एवमेव चतुर्थीअभिमतविभक्तेरुपलक्षणम्। तथा च राज्ञः पुरुष इति षष्ठ्यर्थे चतुर्थीं प्रयुञ्जानाः यथा प्रत्यवायेन युक्ताः भवन्ति तद्वत्।

तथा च साङ्गानुष्ठानेऽपि इति॥ साङ्गस्य यज्ञस्यानुष्ठाने जातेऽपि उक्तासाधुप्रयोगे "नानृतं वदेदि"ति निषेधोल्लङ्घनप्रयुक्तप्रायश्चित्तानुष्ठानस्यावश्य-कर्तव्यत्वापत्तिस्तेषामेव स्यात्। ननु अनुशासनाश्रयणेन साधुत्वासाधुत्वं यदुक्तं वैयाकरणेन तन्नाभ्युपेयम् , अनुशासनस्य निर्मूलत्वादिति प्रक्षिप्य समाधत्ते - न च निर्मूलत्वादेतदिति॥ निर्मूलत्वेनादरणीयत्वं निरस्यति – तस्मादित्यादिना॥ तस्माद् वक्ष्यमाणहेतोरित्यर्थः। तस्मादित्यनेनोपक्षिप्तम् हेतुद्वयमाह - ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोध्येयो ज्ञेयश्चेति॥ निष्कारणः दृष्टफलमनपेक्ष्येत्यर्थः। अनेनागमेन व्याकरणस्यावश्याध्येयत्वेन बोधनात् समूलत्वं ध्वनितम्। तेनाक्षिप्तनिर्मूलत्व-निवृत्तिः। व्याकरणस्य साधुत्वान्वाख्यापकत्वं पुष्णाति -

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥ इति।

पाणीनीयं व्याकरणं महाशास्त्रम्। अन्यानि शास्त्राण्येव। इदन्तु महाशास्त्रम्।

अनेनान्यशास्त्राणामपि एतदपेक्षत्वम्। अस्य चानपेक्षत्वरूपं प्रामाण्यम्। अतो मूलभूतशास्त्राणामपि इदं मूलम्। अस्य स्वयं मूलभूतत्वेन निर्मूलं स्वतः प्रामाण्यं सिद्धम्। पदसाधुत्वं लक्ष्यतेनेनेति व्युत्पत्त्या साधुत्वज्ञापकत्वमस्य स्वरूपम्। अत एवास्य सर्वैर्ग्राह्यत्वमाह – सर्वोपकारकमिति॥ यतः सर्वेषां शास्त्राणामुपकारकमतो ग्राह्यत्वमित्यर्थः। नेदं कपोलकल्पितमित्याह – पराशरेत्यादि॥

ननु भवन्मते वाक्यस्फोटस्यैव मुख्यत्वेन लकाररूपवाचकस्य तदर्थस्य कर्त्रादेश्च कल्पितत्वेन त्वदुक्तार्थस्य कथं प्रामाण्यमित्यत आह - न च लकारवदि-त्यादिना॥

समाधानमाह – वाक्यान्वाख्यानस्य द्वारीभूतत्वात्तत्कल्पनायाः, आपेक्षिकसाधुत्वबोधने तेषां तात्पर्यात्। उपसंहरति- तस्मादेतद्दोषेति॥ असाधुत्वा-दिदोषनिरासार्थं साधुत्वोपपत्तये च कर्तुर्वाच्यत्वमावश्यकमनुशासनानुरोधादिति सिद्धम्। उपपादकयुक्त्या सिद्धान्तितम्।

धात्वर्थो विवृतो भक्त्या शिवस्यैव यथामति।
विदुषां परितोषश्चेत् साफल्यं स्याच्छ्रमस्य मे॥

इति श्री न्यायमीमांसादिशास्त्रगतमतविमर्शनपुरस्सरं
व्याकरणदर्शनोपचितधातुलकाराद्यर्थप्रतिपादनैकलक्ष्येण गर्गवंशावतंसानां
पण्डितश्रीरामनिरञ्जनशर्मणां पुत्रेण राष्ट्रपतिसम्मानितानाम्
अनेकविधशास्त्रविदां सर्वतन्त्रस्वतन्त्राणां
पण्डितश्रीरामप्रसादत्रिपाठिचरणानां कृपापात्रेण शिष्येण
राष्ट्रपतिसम्मानादिविविधपुरस्कारभाजा रामयत्नशुक्लेन विहितायाः
श्रीमत्कौण्डभट्टपादैः विरचितस्य बृहद्वैयाकरणभूषणस्य
"निरञ्जनी"त्याख्यायाः टीकायाः धात्वाख्यातसामान्यार्थनिरूणं समाप्तम् ।

[1] नि.अ1.पा1

[2] भावार्थाधिकरणम्-(मी.2-1-1) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 द्वितीयभागः –पृ.268

[3] कर्त्रधिकरणम्-(मी.3-4-4) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1989 चतुर्थभागः – पृ.463

[4]भावार्थाधिकरणम्-(मी.2-1-1) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 द्वितीयभागः –पृ.269

[5] भावार्थाधिकरणम्-(मी.2-1-1) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 द्वितीयभागः –पृ.271

[6] व्या.म.भा. –(सू. उणादयो बहुलम् 3-3-1) भागः-4 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 286

[7]भावार्थाधिकरणम्-(मी.2-1-1) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 द्वितीयभागः –पृ.264-268

[8] व्या.म.भा. (सू. अकथितं च 1-4-51)– भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 390

[9]व्या.म.भा. (सू. भूवादयो धातवः- 1-3-1) – भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 153

[10] "भूवादीनां वकारोय"मिति श्लोकवार्तिकस्य उत्तरार्थः, संप्रति प्रकाशितेषु भाष्यपुस्तकेषु न दृश्यते।

[11] इयं कारिका न्यायसुधायां भक्षानुवाकस्य विनियोगाधिकरणे(मी.द.3-2-9) उल्लिखिता। मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 चतुर्थभागः – पृ 95

[12] इयं कारिका तन्त्रवार्तिके भावार्थाधिकरणे उपलभ्यते। तत्र "धर्म्यंशे" इत्यस्य स्थाने "कर्त्रंशे" इत्यस्ति। भावार्थाधिकरणम्-(मी.2-1-1) मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 द्वितीयभागः – पृ 268

[13] "प्राकृतमेवैतत् कर्म यथा कटं करोति" – व्या.म.भा. (सू. "कालाध्वनोः" - 2-3-5)– भागः-3 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 268)

[14]"कट आस्त इत्यादौ कटादेरासनया व्याप्तिर्नास्ति, अपि तु मासादिरेवासनादिक्रियापरिच्छेदायोपादीयमानो व्याप्यत इति तस्यैव कर्मता, न तु कटादेरुपश्लिष्टमात्रस्याधिकरणस्येति सर्वं सुस्थम्" (वा.प.तृ. द्वि.भा. पृ 217 – संपूर्णानन्द वि.वि. प्रकाशनम् – 1980)

[15](व्या.म.भा. (सू. अकथितं च – 1-4-51)– भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 392

[16] व्या.म.भा. (सू. अकथितं च – 1-4-51)– भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 390

[17]व्या.म.भा. (सू. गतिबुद्धि – 1-4-52)– भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 400

[18] "कर्मकर्तृविषये विक्लित्तिमात्रवचनः पचिः, पच्यते ओदनः स्वयमेवेति। कर्मैव ह्यत्र कर्ता। तद्व्यापारश्च विक्लित्तिरेवेति सैवाभिधीयते।" (वा.प.तृ. द्वि.भा. पृ 196 – संपूर्णानन्द वि.वि. प्रकाशनम् – 1980)

[19] व्या.म.भा. (सू. अकथितं च – 1-4-51)– भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 390

[20] वै.सि.भू.-शक्तिनिर्णयः- पृ238-242(1900)

[21] नैषधीयचरितम् – 12 - 106

[22] अस्य मूलं मृग्यम्। विदग्धमुखमण्डनस्थोऽयमिति केचित्। "कूर्मक्षीरचये स्नातः कूर्मलोमपटावृतः। गन्धर्वनगरध्वंसी" इति तत्र तत्र पाठान्तराणि।

[23] सुबर्थनिर्णये (वै.सि.का.24) पृ 126-127(1900)

[24] व्या.म.भा. – भागः-4 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 166

[25] मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी- 1987 द्वितीयभागः – पृ 273

[26] "कृदभिहितो भावो द्रव्यवत् भवति"इति उपलभ्यमानः पाठः। व्या.म.भा. –(सू. उपपदमतिङ् – 2-2-19) भागः-3 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 193, भागः-4 (सू. सार्वधातुके यक् – 3-1-67) पृ 141, भागः-5 (सू. स्त्रियाम् – 4-1-3) पृ 34, भागः-6 (सू. एकस्य सकृच्च – 5-4-19) पृ 495, भागः-7 (सू. गतिकारकोपपदात् कृत् – 6-2-139) पृ 758

[27] वा.प.तृ.क्रि - 46

[28] "कृद्योगा च" वा.1346 "षष्ठी"(पा. 2-2-8)सूत्रभाष्ये। व्या.म.भा. – भागः-3 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 180

[29] वा.प.तृ.क्रि - 47

[30] कृदभिहितो भावो द्रव्यवत् भवति" इति उपलभ्यमानः पाठः। व्या.म.भा. –(सू. उपपदमतिङ् – 2-2-19) भागः-3 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 193, भागः-4 (सू. सार्वधातुके यक् – 3-1-67) पृ 141, भागः-5 (सू. स्त्रियाम् – 4-1-3) पृ 34, भागः-6 (सू. एकस्य सकृच्च – 5-4-19) पृ 495, भागः-7 (सू. गतिकारकोपपदात् कृत् – 6-2-139) पृ 758

[31] भावार्थाधिकरणम्-(मी.2-1-1)-मी.द.(टीकापञ्चकसनाथीकृतं)-ताराबुक् एजन्सी-वाराणसी- 1987 द्वितीयभागः –पृ 271

[32] व्या.म.भा. –( सार्वधातुके यक् – 3-1-67) भागः-4 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 141

[33] व्या.म.भा. – भागः-2 (सू. भूवादयो धातवः – 1-3-1) पृ 158, भागः-4 (सू. निष्ठा – 3-2-106) पृ 242, भागः-4 (सू. परोक्षे लिट् – 3-2-115) पृ 252 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली

[34] वा.प.तृ.क्रि – 49,51

[35]"यादृशी भावनाख्याते" - भावार्थाधिकरणम्-(मी.2-1-1)-मी.द.(टीकापञ्चकसनाथीकृतं)-ताराबुक् एजन्सी-वाराणसी- 1987 द्वितीयभागः –पृ 271

[36] व्या.म.भा. – भागः-3 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 44 (भाष्ये "ब्रूहि ब्रूही " त्येवास्ति)

[37] व्या.म.भा. -- भागः-3 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 45

[38] व्या.म.भा. – भागः-3 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 44

[39] "यथानेकमपि"(पा.प.द्वि.6) इति कारिकायाः व्याख्या, "तिङन्तान्तरयुक्तेषु"(वा.प.द्वि.444) इति कारिकाव्याख्या च।

[40] व्या.म.भा. –(सू. कारके- 1-4-23) भागः-2 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 347

[41] व्या.म.भा. – भागः-1 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 355

[42] "एतेन" इत्यारभ्य "सिद्ध एवेति" – इत्यन्तः ग्रन्थः शास्त्रदीपिकायां प्रदेशानारभ्यविधानयोः निषेधस्य पर्युदासतानिरूपकस्य दशमाध्याये अष्टमपादे प्रथमाधिकरणस्य (सू.1-4) अनुवादः–कृष्णदास अकाडमी-वाराणसी–1988 पृ770 -773

[43] मी.द.(10-8-1-1,4)

[44]व्या.म.भा. –(सू. समर्थः पदविधिः 2-1-1) भागः-3 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 27

[45] द्र. पूर्वत्र पृ 27,28

[46] शास्त्रदीपिका – 9-2-5- 23,24 - कृष्णदास अकाडमी-वाराणसी–1988 पृ 604-605

[47] शास्त्रदीपिका – 8-3-5-10 - कृष्णदास अकाडमी-वाराणसी–1988 पृ 567

[48] इयं कारिका वाक्यपदीये तृतीयकाण्डे वृत्तिसमुद्देशे 67 कारिकारूपेण उपलभ्यते।

[49] " बहूनां वृत्तिधर्माणां"(वै.सि.का.32) इति कारिकाव्याख्यायाम्। पृ 202(1900)

[50]बहुषु शाब्दबोधग्रन्थेषु उद्धृतोयं श्लोकः। आकरस्त्वन्वेषणीयः।

[51] व्या.म.भा. –(पस्पशाह्निकं) भागः-1 राष्ट्रियसंस्कृतसंस्थानम्-दिल्ली पृ 58

[52]जञ्जभ्यमानाधिकरणम्-(मी.3-4-5-15)-मी.द.(टीकापञ्चकसनाथीकृतं)-ताराबुक् एजन्सी-वाराणसी- 1987 चतुर्थभागः –पृ 512, शास्त्रदीपिका – (3-4-9-20,21,22) - कृष्णदास अकाडमी-वाराणसी–1988 पृ 268

[53] व्याकरणाधिकरणे तन्त्रवार्तिके (1-3-8-29)- मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी-1987 प्रथमभागः – पृ 593

[54] व्याकरणाधिकरणे तन्त्रवार्तिके (1-3-8-29)- मी.द.(टीकापञ्चकसनाथीकृतं) -ताराबुक् एजन्सी- वाराणसी-1987 प्रथमभागः – पृ 596

# प्रकाशः – वैयाकरणसिद्धान्तभूषणस्य विषमस्थलटिप्पणी

श्रीशेषभूषणं नौमि शेषार्थस्य प्रदायिनम्।
भूषणं कोण्डभट्टस्य प्रकाशेन विभूषये॥

< 1 > (पृ.1)

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्यशिक्षार्थं च आदौ मङ्गलमाचरति - श्रीलक्ष्मीरमणमित्यादिना। अस्य मङ्गलस्य भूषणसारेऽपि स्थितत्वात् सर्वैर्व्याख्यातृभिः स्वस्वसम्प्रदायाद्यनुसारं व्याख्याः रचिताः। ताःसर्वा अपि निरञ्जनी - व्याख्यायां सङ्गृहीता इति पुनर्नात्र वितन्यन्ते। उपलभ्यमानं भट्टोजिवंशैतिह्यमनुलक्ष्य भट्टोजीवंश्यानां कुलदैवतम् अधितिरुमलगिरि राराजमानः कलौ वेङ्कटनायक इति प्रसिद्धः श्रीवेङ्कटेश्वरः। अतोऽत्र स एव श्रीलक्ष्मीरमणः। अतश्च श्रीश्च असौ लक्ष्मीः श्रीलक्ष्मीः, तस्याः रमणः श्रीलक्ष्मीरमण इत्येव युक्तम्। अत्र च श्रीशब्दः यौगिकः तन्त्रेण "श्रयति विष्णुं, श्रीयते च तेन" इति लक्ष्म्याः नित्यानपायित्वं सूचयति। ततश्च नित्यानपायिनी या लक्ष्मीः तस्याः रमणः इत्यर्थः। किञ्च सैव पुरुषकाररूपिणी, तस्याः प्रेरणयैव विष्णुः सर्वजगद्रक्षकः भक्तानुग्राहक इति संप्रदायः। अतः कौण्डभट्टोऽपि तादृशलक्ष्म्याः साहाय्येन परमात्मनः विष्णोः अनुग्रहं प्रार्थयते।

गौरीरमणरूपिणमिति॥ कौण्डभट्टस्य अद्वैतसिद्धान्तानुयायित्वेन "कुर्याद्धरिहरार्चनम्, यथा विष्णुस्तथा शिव" इत्यादिवचनाच्च हरिहरयोः अभेदेनैवोपासना करणीयेति तेषां नियमात् तदनुसारं लक्ष्मीरमणस्य गौरीरमणाभेदं प्रस्तौति कौण्डभट्टः गौरीरमणेत्यादिना। अद्वैतिषु केचन वैष्णवाः केचन शैवाश्च। यथा च अप्पय्यदीक्षितः शैव इति मधुसूदनसरस्वती वैष्णव इति च प्रसिद्धिः।एवं केचन हरिहरनाथभक्ताः। तत्र तृतीयकोटीमापन्नः भट्टोजीवंशः। भट्टोजीप्रपितामहः तिरुमलसोमयाजी वृषाकपायीरमणप्रसाद इति ख्यातः। यदा दक्षिणदेशे शैववैष्णवभेदः नितरां सर्वान् व्याकुलीकरोति स्म तदा आन्ध्रदेशे हरिहराद्वैतवादोऽयं बहु प्रचारे आसीत्।अभिन्नं हरिहरतत्त्वम् एतेषामुपास्यम्। एतदेव सूचयति गौरीरमणरूपिणमिति विशेषणेन।

अथ गौरीरमणरूपिणमिति णिनिप्रत्यान्तम् उत षष्ठ्यन्तात् मत्वर्थीयेन्यन्तमिति विचारोऽपि कृतः व्याख्यासु। तत्र बहुभिः णिन्यन्तत्वपक्ष एवादृतः। "णिनिप्रत्ययान्तत्वमेव युक्तमिति भासते। गौरीरमणस्य रूपमस्मिन्नस्तीति कथनापेक्षया लक्ष्मीरमण एव

आत्मनः गौरीरमणेन सह अभेदं ग्राहयतीति कथनस्य सन्दर्भानुगुणत्वात्"। इति तत्त्वदर्शिन्याम् अस्मद्गुरुचरणाः श्रीसूर्यनारायणशास्त्रिपादाः। युक्तं चैतत्। अत्र श्रीलक्ष्मीरमणशब्दः कौण्डभट्टस्येष्टदेवं वेङ्कटेश्वरं बोधयति। अयं च भगवान् वक्षसि लक्ष्मीं वहन् स्वीयां विष्णुतां ख्यापयन्नपि भुजाभरणरूपेण शेषप्रतिकृतिरूपं पञ्चशीर्षं नागं धारयन् ईश्वरं स्मारयन् भक्तान् भ्रामयति ।भगवतः उत्सवेषु उपयुज्यमानस्य शेषवाहनस्यापि पञ्च सप्तावा शीर्षाणि भवन्ति। ततश्च पञ्चशीर्षस्सप्तशीर्षो वा नागप्रतिकृतिविशेषः शेषस्य प्रतीकभूतः। ततश्च शेषनागाभरणेन गौरीरमणं रूपयति आत्मानं गौरीरमणाभिन्नतया बुद्धिविषयं करोतीति तथाभूत इति व्याख्या अत्र युक्ततमेति भाति। यदि च इन्यन्तत्वं समर्थनीयं तर्हि नित्ययोगे मत्वर्थः इनिः इति युक्ततमम्।

अनेन च श्लोकेन कौण्डभट्टः अखण्डस्फोटरूपं "ब्रह्म पुच्छं प्रतिष्ठे"ति आनन्दमयकोशादपि अन्यम् आन्तरम् परमात्मानं स्फोटशब्देन सूचयन् तद्विवर्तरूपवर्णस्फोटादिकमेवास्य ग्रन्थस्य विषय इति सूचयति॥ 1 ॥

"यथोत्तरं मुनीनां प्रामाण्यमि"ति मुनित्रये महाभाष्यकारस्यैव परमं प्रामाण्यं सम्प्रदायेनाभ्युपगतम्। यतः सूक्ष्मरूपेण सूचनामात्ररूपेण च स्थितानां वैयाकरणसिद्धान्तानां स्पष्टतया प्रतिपादनं, तेषां समेषामपि सूत्रवार्तिकाभ्यामेवोन्नयनं च महाभाष्यकारेण पतञ्जलिनैव कृतम्। अतश्च महाभाष्यं विना तेषां ज्ञातुमशक्यत्वात् तदनन्तरग्रन्थानां समेषां तस्यैव भाष्यस्य जीवातुभूतत्वाच्च तत्र प्रतिपादितानां समेषां वैयाकरणसिद्धान्तानां तत्त्वतः प्रतिपत्तिः आवश्यकीति तदर्थं शेषावतारभूतस्य पतञ्जलेः स्मरणपूर्वकं तत्प्रतिपत्त्यर्थं शेषभूषणं स्तौति - अशेषफलदातारमिति॥ अत्र शेषभूषणशब्देम अभिप्रेतः विष्णुः अथवा शिवो वेत्यत्र व्याख्यातृषु विप्रतिपत्तिः। शेषः भूषणं यस्य अलङ्कारत्वेन पर्यङ्कत्वेन वेति शेषभूषणशब्दः शिवकेशवयोरुभयोरपि प्रतीतिं जनयति। तत्र दर्पणे "शेषभूषणशब्देन विष्णुरेव विवक्षितः। यतः शेषः आदिशेषः विष्णोरेव सेवकः शेषभूतश्चेति विष्णोराराधनेन तच्छेषभूतस्याराधनमपि कृतप्रायमिति, स्वामी यदि सन्तुष्टः तर्हि सेवकादभीष्टं साधयिष्यतीति विष्णुप्रेरितः शेषः तदवताररूपः पतञ्जलिः प्रसन्नस्सन् अभीष्टदो भवती"ति सम्यक् व्याख्यातम्। उक्तं च - "शेषोऽनन्तः। स भूषणं यस्येत्यर्थः" इति।

अन्ये प्रायः सर्वे व्याख्यातारः अस्य श्लोकस्य शिवस्तुतिपरत्वं वदन्ति। प्रथमश्लोकेन लक्ष्मीरमणः स्तुतः इदानीं व्याकरणशास्त्रमूलभूतस्य शिवस्य स्तुतिः क्रियते इति

च तेषां व्याख्या। अत्रेदं विचारणीयम्। प्रथमश्लोकस्य सर्वैरपि व्याख्यातृभिः "कुर्याद्धरिहरार्चनम्" इत्यादिवचनैः द्वयोरपि स्तुतिपरत्वमेव उक्तम्। तदेव हि युज्यते। अत एव "गौरीरमणरूपिणमि"ति विशेषणमपि सङ्गच्छते। "शिवाय विष्णुरूपाय शिवरूपाय विष्णवे" इत्यादिवचनात् तदुभयरूपमद्वयं च ब्रह्मस्तुत्यमिति प्रथमश्लोक एव शिवस्तुतिपरोऽपीति तदकरणरूपां न्यूनतां प्रदर्श्य तन्निवारणार्थं शिवं स्तौति इति द्वितीयकारिकायाः अवतरणग्रन्थो न युक्तः।

अत्र सर्वैरपि "शेषस्य पतञ्जलेः अशेषार्थलाभार्थं पतञ्जलिरेव प्रार्थनीयः कथं शेषभूषणः प्रार्थ्यते" इत्याशङ्क्य "स्वामी यदि सन्तुष्टः तर्हि सेवकात् स्वनियोज्यात् सर्वं कारयिष्यती"ति शेषभूषणस्य स्तुतिः समर्थिता। अतश्च सेव्यसेवकभावः ययोः प्रसिद्धः तयोरेवात्र शेषशेषभूषणशब्दाभ्यां ग्रहणमिति स च सेव्यसेवकभावः आदिशेषनारायणयोरेव प्रसिद्ध इति अत्र शेषभूषणपदं विष्णुपरमित्येव युक्तम्। पतञ्जलिस्तु सहस्रफणस्य आदिशेषस्यैव अवतार इत्यत्र न कस्यचित् भ्रमः।

इदानीमत्र अन्या शङ्का उदियात् यत् शेषः शय्यारूपः कथमलङ्कारः स्यादिति। शेषः भूषणं यस्येति बहुव्रीहिसमासे खलु इयं शङ्का। अत्र शेषस्य भूषणम् इति षष्ठीतत्पुरुषोऽपीति शेषस्यैव अलङ्कारभूतः परमात्मा नारायणः बोध्यते इति न काप्यनुपपत्तिः।

किञ्च शेषभूषणशब्दस्य बहुव्रीहित्वेऽपि विष्णुरेव बोध्यते। स च तिरुमलक्षेत्रस्थितः श्रीवेङ्कटेश्वरः। अयं च कौण्डभट्टवंशीयानां कुलदैवतमिति पूर्वमेव प्रतिपादितम्। अयं च वेङ्कटेश्वरः वक्षसि लक्ष्मीं धारयन् स्वस्य नारायणत्वं ख्यापयति। भुजाभरणरूपेण शेषप्रतिकृतिं नागं धरति। अस्य द्वयोरपि भुजयोः नागमुद्राङ्कित-भुजकीर्ती स्तः। तथैव कटिसूत्ररूपेणापि नागमेव धत्ते । वैखानसागममनुसृत्य वेङ्कटेश्वरस्य उत्सवेषु भगवता मणिबन्धे धार्यमाणे रक्षासूत्रे आदिशेषस्य आवाहनं क्रियते। किञ्च श्रीमन्नारायणस्य सर्वेषु भृत्येषु शेष एव अत्यन्तसन्निहितत्वेन संभाव्यते सम्प्रदाये।

उक्तं च –

"निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः ।
शरीरभेदैस्तव शेषतां गतैः यथोचितं शेष इतीर्यते जनैः ॥"

(आलवन्दार् स्तोत्रं-40)

शेष इति च अन्वर्थं नाम। ततश्च शेषनारायणयोः द्वयोः परस्परं भूषणभूष्यभावः। एतादृशं

सान्निहित्यं शिवशेषयोः न प्रसिद्धम्। अतः शेषभूषणः वेङ्कटेश्वरः स्वकुलदैवतमत्र स्तोत्रविषय इति युक्तम्।

किञ्चास्मिन् श्लोके सम्प्रदायसिद्धः भगवद्भक्तयोर्मध्ये स्थितः शेषशेषिभाव-सम्बन्धोऽपि सूचितो भवति। अयं च शेषशेषिभावः अद्वैतदर्शनेऽप्यङ्गीकृत एव। श्रीशङ्कराचार्या एव स्वविरचिते विष्णुषट्पदीस्तोत्रे इत्थं वदन्ति -

''सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम्।
सामुद्रो हि तरङ्गः कथमपि समुद्रो न तारङ्गः॥'' (विष्णुषट्पदीस्तोत्रम्-3)

अत्र ''तवाहं'' इत्यनेन भगवच्छेषत्वमात्मनः प्रथयन्ति आचार्याः। शेषभूषण-शब्दोऽपि अमुमेवार्थं द्योतयति। किञ्चायं शेषभूषणशब्दःतन्त्रेण भगवतो वेङ्कटेश्वरस्य शेषाचलशिखरनिवासमपि सूचयति। शेषवंशः भट्टोजिगुरुवंशः। भट्टोजिगुरोरपि सूचकमिदम्।

किञ्चानेन भूषणसारप्रतिपाद्यस्यापि सूचनं भवति। तथाहि - भूषणसारस्तु आर्थिकः ग्रन्थः। अत्र च प्रथमं पदार्थनिश्चयः, अनन्तरं पुनः पदार्थानां परस्परं विशेषण-विशेष्यभावेन अन्वयश्च विषयौ। अत्र प्रथमश्लोकेन स्फोटरूपस्य जगतः ब्रह्मविवर्तरूपेण कथनद्वारा वर्णादिस्फोटानां तद्बोध्यार्थानां च निरूपणमत्रविषय इति सूचितम्। द्वितीयेन चानेन तेषां निश्चितानां पदार्थानां मध्ये किं विशेष्यम् किं विशेषणम् इत्यादिनिरूपणमपि विषय इति सूचितम्। अतश्च प्रथमश्लोके ''स्फोटरूपम्'' इति साभिप्रायं, तथा द्वितीये च श्लोके ''शेषाशेषार्थलाभ'' इति साभिप्रायम्। शेषः विशेषणम् ,अशेषः विशेष्यमिति तयोः अर्थयोः **विशेषणत्वविशेष्यत्वयोः** लाभः -प्राप्तिः अर्थात् ज्ञानमित्यर्थः। अतश्च श्लोकद्वयेन ग्रन्थप्रतिपाद्यमपि सूचयन् अनुबन्धचतुष्टयमत्र सूचयतीति ज्ञेयम्॥ 2 ॥

< **2** > (पु.6)

पाणिनीये सम्प्रदाये प्रसिद्धेषु अङ्गुलिगण्येषु वैयाकरणेषु अन्यतमः भट्टोजीदीक्षितः। अयं भट्टोजीदीक्षितः कौण्डभट्टस्य साक्षात् पितृव्यः। तस्यैव भट्टोजी-दीक्षितस्य कारिकाः व्याचिख्यासिता इति पितृव्यं भट्टोजीदीक्षितमपि नौति वाग्देवी-त्यादिना। यस्य मुखं सर्वदा सरस्वत्याः नृत्यरङ्गः प्रियतमं स्थानं, तादृशः भट्टोजीदीक्षितः। अनेन सर्वशास्त्रविषयाः भट्टोजीदीक्षितस्य जिह्वाग्रे विलसन्तीति सर्वशास्त्रार्थतत्त्वज्ञता तस्य प्रस्तूयते॥ 3 ॥

एवं नमस्क्रियाप्रार्थनादिरूपं मङ्गलं कृत्वाऽपि एतदपर्याप्तमिति मन्वानः मुनित्रयं स्वजनकं रङ्गोजिभट्टं गणपतिं च प्रणमति प्रतिपाद्यविषयमपि सूचयति-पाणिन्यादी-

त्यादिना। द्वैतध्वान्तनिवारणैकफलिकाम् इति विशेषणेन स्वपितुः इतरमतनिराकरणपूर्विकाम् अद्वैतमतप्रचारनिष्ठां ज्ञापयन् कौण्डभट्टः किञ्चित्प्रसिद्धमैतिह्यं स्वपितृविषयकं सूचयति । तथाहि - केलदिवेङ्कटभूपः इति कश्चित् राजा दक्षिणभारते कर्णाटकेषु षिमोगा मण्डले इक्केरीति ग्रामं राजधानीकृत्य विजयनगरमहाराजानाम् अधीनः सन् तन्मण्डलं पालयन् प्रसिद्धः आसीत् , यस्य सभायां रङ्गोजीभट्टः आस्थानपण्डितः आसीत्। यद्यपि विजयनगरराजानः वैष्णवमतसमर्थका आसन् ,अथापि राजा वेङ्कटभूपः शुद्धाद्वैतवेदान्तस्य प्रचारकः समर्थकश्चासीत्। अस्यैव सभायां भट्टोजीदीक्षितः अपि आसीत्। अयं च भट्टोजीदीक्षितः अस्यैव राज्ञः प्रेरणया "तत्त्वकौस्तुभ"ग्रन्थमरचयत्।

एकदा अस्य राज्ञः सभायां "विद्याधीश वडेरु"इति मध्वयतिना सह रङ्गोजिभट्टस्य वेदान्ते वादः आसीत्। मध्वयतिः द्वैतसिद्धान्तानुयायी, प्रसिद्धानां वादिराजानां शिष्यः। रङ्गोजिभट्टश्च अद्वैतसिद्धान्तानुयायी। अयं च वादः केलदि वेङ्कटभूपस्य समक्षमेव प्राचलत्। तस्मिन् वादे माध्वभट्टारकं जित्वा आन्दोलिकां पुरस्काररूपेण प्राप्तवान् रङ्गोजिभट्टः। रङ्गोजिभट्ट एव कौण्डभट्टस्य गुरुरपि। एतत्सर्वं स्वयमेव कथयति कौण्डभट्टः--

"विद्याधीशवडेरुनामकयतिश्रीमाध्वभट्टारकं
जित्वा केलदि वेङ्कटय्य सविधेऽप्यान्दोलिकां लब्धवान्।
यश्चक्रे मुनिवर्यसूत्रविवृतिं सिद्धान्तभङ्गं तथा
माध्वानां तमहं गुरूपमगुरुं रङ्गोजिभट्टं भजे ॥"इति॥

अथास्य ग्रन्थस्य प्रधानं लक्ष्यं वैयाकरणसिद्धान्तानां मीमांसकैः नैयायिकैश्च दूषितानां तत्तन्मतखण्डनपुरस्सरं पुनः प्रतिष्ठापनम्। तदेव कथयति – गौतमजैमिनीयवचनव्याख्यातृभिः दूषितानित्यादिना । अत्र विशेषान्तरमपि सूचयति। न्यायशास्त्रप्रवर्तकाचार्यः गौतमः। मीमांसाशास्त्रप्रवर्तकाचार्यः जैमिनिः। आभ्यां शास्त्रद्वयप्रवर्तकाभ्यां ऋषिभ्यां सह वैयाकरणानां नास्ति विरोधः। परन्तु तत्सूत्रव्याख्यातारः तदनुयायिन एव तन्मतमन्यथा व्याख्यातवन्तः। अतोऽस्माकं तद्व्याख्यातृभिरेव विरोधः न तु मूलभूतशास्त्रकृद्भिः । इति। अनेन चास्मिन् ग्रन्थे प्राधान्येन विचार्यमाणः वैयाकरणसिद्धान्तो विषयः, तज्जिज्ञासुरधिकारी, तज्ज्ञानं प्रयोजनं, प्रतिपाद्यप्रतिपादकभावः सम्बन्धश्चेति अनुबन्धचतुष्टयं सूचितम्॥ 4 ॥

एवं पुनःपुनः गणपतिं गुरून् वागधिष्ठात्रीं सरस्वतीं च नत्वा कोण्डभट्टःप्रकृतग्रन्थरचनाप्रतिज्ञां करोति –श्रीकोण्डभट्टः इत्यादिना।5।

< 3 > (पु.9)

एतावता स्वेष्टदेवता - मुनित्रय - गणपति - जनक - पितृव्यादिनमस्कारात्मकं मङ्गलं कृत्वा इदानीं स्वपितृव्येण भट्टोजिदीक्षितेन विरचिताः वैयाकरणसिद्धान्त-मतोन्मज्जननाम्ना प्रसिद्धाः कारिकाः व्याख्यातुमारभते कौण्डभट्टः।

ग्रन्थादौ सर्वैरपि मङ्गलमाचरणीयमिति सम्प्रदायमनुसृत्य भट्टोजिदीक्षितोऽपि स्वीयकारिकामयग्रन्थस्यादौ पतञ्जलिस्मरणपूर्वकं मङ्गलमाचरन् शिष्यशिक्षार्थं ग्रन्थादौ निरबध्नात्। तदेव सूचयति कौण्डभट्टः प्रारिप्सितेत्यादिना। प्रारिप्सितस्य प्रारब्धुमिष्टस्य अस्य ग्रन्थस्य ये प्रतिबन्धकाः -विघ्नाः तेषां व्यूहस्य -समूहस्य उपशमनाय -प्रशमाय। भट्टोजिदीक्षितः अनेन श्लोकेन न केवलं मङ्गलमात्रमाचरति किन्तु चिकीर्षितस्य ग्रन्थस्य विषयं प्रतिपाद्यस्य प्रामाण्यं च सूचयति। फणिः -शेषावतारः पतञ्जलिः। तेन भाषितं भाष्यं महाभाष्यमिति प्रथितम्। एतच्च समुद्रतुल्यम्। समुद्रः यथा अधृष्यः अभिगम्यश्च यादोरत्नैः, तथैव विषयगाम्भीर्येण अधृष्यः सरसया विशिष्टया च शैल्या अभिगम्यश्चेति समुद्रसादृश्यम्। भाष्यमेव अब्धिरिति रूपकसमासः। यथा च अब्धेः मन्थनेन तत्सार-भूताः पदार्थाः चन्द्रलक्ष्मीकौस्तुभादयः उद्धृताः तथैव अस्य भाष्यस्य सम्यगध्ययनेन सारभूताः वैयाकरणसिद्धान्ताः उद्धृताः ये च कौस्तुभतुल्याः । अत एव हि तत्संग्रहस्य "शब्दकौस्तुभ" इति अन्वर्थं नाम । अनेन महाभाष्यस्य सारभूतः पदार्थः सर्वोऽपि शब्दकौस्तुभग्रन्थरूपेण प्राकाश्यं नीतः इति सूचयति। यथा च समुद्रस्य मन्थनमतीव दुष्करं तथैव महाभाष्यसमालोचनमपीति महाभाष्यस्य गाम्भीर्यमपि अनेन प्रकाश्यते ।

तथा च महताप्रयत्नेन महताप्रणिधानेन महाभाष्यस्य पुनः पुनः अध्ययनेन पुनः पुनः परिशीलनेन च शब्दकौस्तुभग्रन्थः रचित इति तत्र सर्वोऽपि विषयः प्रामाणिकः वैयाकरणैः उपादेयश्चेति सूचितम्। सोऽपि ग्रन्थः अत्यन्तं विपुल इति अध्येतृणां सौकर्यार्थं तत्रत्याः विषया एव कारिकारूपेण संक्षिप्यन्ते इत्यर्थः। अनेन अस्य कारिकाग्रन्थस्य तन्मूलभूतशब्दकौस्तुभग्रन्थस्य च प्रामाण्यं सिद्धमिति अस्य उपादेयतायां सन्देहलेशोऽपि नावश्यक इति सूचयति - आधुनिकोत्प्रेक्षितत्वनिरासायेति । अन्यथेति। शब्दकौस्तुभोक्तविषयाणाम् आधुनिकोत्प्रेक्षितत्वानिरासे । अस्यापि। शब्द-कौस्तुभमूलस्य अस्य अपि आधुनिकोत्प्रेक्षितत्वापत्त्या कारिकाग्रन्थस्य अनुपादेयता आपद्येतेति भावः।

अथात्र शङ्का उदियात् यत् वैयाकरणसिद्धान्तज्ञानाय महाभाष्ये वर्तमाने महाभाष्यमूलस्यापि शब्दकौस्तुभस्य तन्मूलककारिकाग्रन्थस्य वा अध्यनस्य का आवश्यकता इति। तदेव समाधत्ते श्लोके भाष्याब्धिरिति । अत्र भाष्याब्धिरिति साभिप्रायमित्यर्थः। तथा हि – समुद्रे अन्तर्विद्यमानाः अनर्घाः रत्नविशेषाः न सामान्यैः द्रष्टुमपि शक्याः, अपितु तदवगाहननिपुणैरेव। यदि च तान्येव बहिरानीय कुत्रचित् स्थापितानि तर्हि तानि न केवलं सर्वैः द्रष्टुमेव शक्यानि अपि तु स्वस्वरुच्यनुसारम् उपयोक्तुमपि शक्यानि। तथैव भाष्ये वैयाकरणसिद्धान्ताः अत्यन्तं निगूढाः सन्ति यानि सामान्यवैयाकरणैः अध्येतृभिः अन्यैश्च ज्ञातुमशक्यानि। अतस्तान्येव ततः महता प्रयासेनोद्धृत्य शब्दकौस्तुभरूपेण संग्रथ्य भट्टोजिदीक्षितेन स्थापितानि वैयाकरणानामन्येषां चोपयोगाय। अतः भाष्याध्येतृभिरपि वैयाकरणसिद्धान्तजिज्ञासुभिरन्यैश्च शब्दकौस्तुभः उपादेय एव, स च प्रमाणभूत एवेति ॥1 ॥

< 4 > (पृ.12-14)

प्रायश इति। "संबोधनान्तं कृत्वोर्थाः" इति कारिकाव्याख्याने बृहद्भूषणे " एकविशेष्यकं वाक्यमित्येवास्तु। तथाच यत्र न निघातः तत्र तिङं विनाप्युपपत्तेः न तदध्याहारो युक्तः। अत एव "प्रकृतिसिद्धमिदं हि महात्मनाम् "इति शुद्धसुबन्तम्। "पचति भवती"ति शुद्धतिङन्तम्। "ज्योतिष्टोमेन स्वर्गकामो यजेत" इति तदुभयसमुदायरूपमिति तत्त्रैविध्यमिति वदन्ति" इति सुबन्तचय-तिङन्तचय-सुप्तिङन्तचयरूपेण वाक्यत्रैविध्यमुक्तम्। तथा च यत्र वाक्ये तिङन्तं न श्रूयते तत्र सर्वत्र क्रियावाचकशब्दस्य तदर्थस्य वाध्याहारो नावश्यक इति कौण्डभट्टमतम्। "आख्यातं सविशेषणं वाक्यम्" इति वाक्यलक्षणे आख्यातपदं प्राधान्येन क्रियाबोधकोपलक्षणम् इति भावकालविध्याद्यर्थककृदन्तानामपि वाक्यलक्षणे आख्यातपदेन ग्रहणमिति कौण्डभट्टहृदयम्। एतदेव सूचयति कौण्डभट्टः प्रायश इत्यनेन ।

सुबन्तानामिति। "सत्त्वप्रधानानि नामानि, यत्रोभे भावप्रधाने भवत" इति निरुक्तात् सुबन्तानाम् आख्यातविशेषणत्वसिद्धेरिति भावः। नामपदमपि अन्वर्थं "नमन्त्याख्यातार्थं प्रति विशेषणीभवन्ती"ति व्युत्पत्त्या। तथा च विशेषणीभूतसुबन्तार्थनिरूपणात् विशेष्यभूततिङन्तार्थनिरूपणं युक्तम्। तत्रापि "नामान्याख्यातजानीति शाकटायनः, नैरुक्तसमयश्च", "सर्वं नाम धातुजमाह शकटस्य च तोकम्"इत्यादिवचनैः उपसर्गनिपातातिरिक्तनाम्नां धातुप्रकृतिकत्वं सर्वसम्मतम्। धातोः तिङ्कृतित्वं च निर्विवादम्। ततश्च धातोः नामाख्यातप्रकृतित्वात् प्रक्रियायां तस्य प्राधान्यं सिद्धम्।

"भावप्रधानमाख्यातमि"ति निरुक्तात् "क्रियाप्रधानमाख्यातम् , क्रियावचनो धातुः, भाववचनो धातुरि"त्यादिभाष्याच्च तिङ्प्रकृतिभूतधातोः तदर्थस्य च प्राधान्यात् प्रथमं धात्वर्थनिरूपणमिति भावः।

अत्रैतदवधेयम् । आख्यातशब्दः तिङन्ते तिङि तिङ्प्रकृतौ(धातौ) कालादि-विशेषविशिष्टभावकर्तृकर्मकृदन्ते च तत्र तत्र शास्त्रकारैः स्वीकृतो दृश्यते। तद्यथा – प्राचीनेषु सर्वेष्वपि शास्त्रग्रन्थेषु आख्यातशब्दः तिङन्ते एव प्रयुक्तः। अर्वाचीनेषु तु सर्वेषु स एव तिङ्विषये प्रयुक्तो दृश्यते। "नामान्याख्यातजानीति शाकटायनः, नैरुक्त-समयश्च" इत्यत्र प्रयुक्तः आख्यातशब्दः धातुपरः,महाभाष्यकारेण तस्य "सर्वं नाम धातुजमाह शकटस्य च तोकम्" इति विवरणात्। त्वया शयितव्यमित्यादिषु अस्त्यध्या-हारमनङ्गीकर्तृणां मते शयितव्यमित्याद्यपि आख्यातपदवाच्यम्। कौण्डभट्टस्य मते तु आख्यातपदार्थो धातुरेव।

प्राय इति। समानाधिकरणसुबन्तानां षष्ठ्यन्तानाम् उपपदविभक्त्यन्तानां च सुबन्तविशेषणत्वात् उक्तं प्राय इति।

इच्छावशादिति। तैत्तिरीयोपनिषदि यथा पुच्छभूतपरब्रह्मतत्त्वस्य निरूपणं अन्नमय-प्राणमय-मनोमय-विज्ञानमय-आनन्दमयकोशादिनिरूपणद्वारा कृतम् तथा वर्ण-पद-अखण्डपद-वाक्य-अखण्डवाक्यस्फोटनिरूपणद्वारा परतत्त्वस्य शब्दब्रह्मणः निरूपणं कार्यमित्याकारः इच्छाविशेष भावः। उक्तं च दीक्षितेनैव स्फोटनिर्णये

"पञ्चकोशादिवत्तस्मात् कल्पनैषा व्यवस्थिता।
उपेयप्रतिपत्त्यर्थाः उपाया अव्यवस्थिताः॥" (वै.सि.का.67)इति।

उपसंहारे च

"इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम्।
ब्रह्मैवेत्यक्षरं प्राहुः तस्मै पूर्णात्मने नमः॥" (वै.सि.का.72)इति च।

फलव्यापारयोरिति। धातुः फलं व्यापारः इत्यर्थद्वये स्मृतः। फलव्यापारयोः वाचकः धातुः। अनेन धातुवाच्यत्वं फलव्यापारयोः प्रतिजानीते। तिङस्तु आश्रये स्मृताः। आश्रयस्य सम्बन्ध्याकाङ्क्षया पूर्वं धात्वर्थतयोपात्तौ फलव्यापारावेव सम्बध्येते इति फलाश्रये व्यापाराश्रये च तिङः स्मृताः इत्यर्थः। अनेन फलाश्रयव्यापाराश्रयवाचकत्वं तिङां सूचयति। फलाश्रयः कर्म, व्यापाराश्रयः कर्ता । तथा च कर्तृकर्मणोः तिङ्वाच्यत्वं प्रतिजानीते। अनेन च "लः कर्मणी" (पा. 3-4-69)ति सूत्रं स्मर्यते इति भावार्थकत्वं

भावतिङामपि सूचितप्रायम्। अथवा भावे विहितानां तिङाम् धात्वर्थानुवादकत्वात् अन्यतिङामेवात्र कारिकायां तिङ्पदेन स्वीकारः इति न कश्चिद्दोषः। यद्यपि संख्या-कालावपि तिङर्थौ। अथापि तयोः तिङर्थत्वे न कस्यापि विप्रतिपत्तिः, किन्तु कर्तृकर्मणोः तिङर्थत्वे एवेति तत्सूचयितुं कर्तृकर्मणोः तिङर्थत्वप्रतिपादनम्। अतः न न्यूनता । अत एव भूषणे स्पष्टतयोक्तम् - तिङर्थः कर्तृकर्मसंख्याकालाः इति।

अत्रायं विशेषः - फले व्यापारे च धातोः एकवृन्तगतफलद्वयन्यायेन पृथक् शक्तिः, अर्थात् एकैव शक्तिः द्वयोः पृथक् उपस्थितिप्रयोजिका। यथा च तिङि कर्तृ-काल-संख्यानाम् , नाम्नि जातिव्यक्त्योः, सुपि संख्याकारकयोश्च वाचकत्वपक्षे च शक्तिः एका । अर्थात् सर्वदा तयोः द्वयोः धातुतः बोधः। अनेकार्थप्रतिपादकत्वेऽपि अत्र नानार्थत्व-व्यवहारस्तु न। सर्वेषामपि एकोपस्थितिविषयत्वात्। तिङि तु कालसंख्ययोः सर्वदा उपस्थितिसद्भावेऽपि कर्तृकर्मणोस्तु न एकोपस्थितिविषयत्वम् ।अतश्च हरिपदादिष्विव नानार्थत्वम्। अतश्च तिङि कर्तृ-काल-संख्याबोधिका एका शक्तिः, कर्म-काल-संख्या-बोधिका अपरा शक्तिः, भाव-काल-संख्याबोधिका च अन्या शक्तिः इति शक्तित्रयम्। तत्र च शबादिसमभिव्याहारः कर्त्रादित्रिकशक्त्युद्बोधकः, सकर्मकधातु-समभिव्याहृतयगादिः कर्मादित्रिकशक्त्युद्बोधकः, अकर्मकधातु-समभिव्याहृतयगादिः भावादित्रिकशक्त्युद्बोधक इति विवेकः। अत्र च धात्वर्थभूतयोः फलव्यापारयोः मध्ये तिङ्समभिव्याहारे सर्वदा व्यापारः विशेष्यरूपेण फलं विशेषणरूपेण च भासते। धात्वर्थफलस्य विशेषणत्वेन धात्वर्थव्यापारे अन्वयः इत्यर्थः। तथा च धात्वर्थफलप्रकारकबोधं प्रति विशेष्यतया तिङ्समभिव्याहृतधातूपस्थापितव्यापारोपस्थितिः कारणमिति कार्यकारणभावः फलितः। फलव्यापारयोश्च मध्ये जन्याजन्यसाधारणः "अनुकूलत्वं" संसर्गः। स च अपदार्थोऽपि संसर्गमर्यादया भासते। तथा च "फलानुकूलः व्यापारः" धात्वर्थः सिद्ध्यति। तदेवोक्तं "फलव्यापारयोः साध्यसाधनभावः संसर्गः" इति। एवं पदार्थः प्रतिज्ञातः। अत्र पदशब्देन "शक्तं पदमिति" नैयायिकपारिभाषिकं पदमभिप्रेतम्। तथा च धातुपदं तिङ्-पदमिति शास्त्रीयः व्यवहारः।

अनन्तरमिदानीम् वाक्यार्थं प्रतिजानीते। अत्र च वाक्यं नाम न सुप्तिङन्तचय-रूपम्। किन्तु शक्तपदसमूहरूपम्। अतश्च "धातुः तिङ्" अनयोः समूह इत्यर्थः। तत्र विशेषणविशेष्यभावं वैयाकरणाभिमतं प्रतिजानीते - धात्वर्थः प्रधानम् तिङर्थः विशेषणमिति। अनेन तिङन्ते धात्वर्थविशेष्यको बोधः इति प्रतिज्ञाविषयः इति सूच्यते।

तत्रापि कर्तृकर्मणोः क्रमशः व्यापारे फले च विशेषणत्वेनान्वयः इति कारिकायाः तात्पर्य-भूतोऽर्थः।

विशेषणविशेष्यवाचकपदयोः समानवचनकत्वनियमात् कथं स्मृता इति बहुवचनान्तस्य धातोर्विशेषणत्वम् इत्याशङ्कायामाह-"स्मृत" इति वचनविपरिणामेना-न्वयः। अनन्वितार्थकविभक्त्यादित्यागेन अन्वितार्थकविभक्त्यादिकल्पनं विपरिणामः।

ननु फलव्यापारयोः पृथक्शक्तिस्वीकारे तयोः अनन्वितयोरेव बोधविषयता स्यात् पुष्पवन्तादिपदवत्। पुष्पवन्तपदं हि सूर्यचन्द्रयोः शक्तम् "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" इति कोशात् । तथा वृषाकपिशब्दः शिवकेशवयोः वाचकः। तथा वृषाकपायीशब्दोऽपि श्रीगौर्योर्वाचकः।तत्र सर्वत्र शब्दादुपस्थितयोः तयोस्तयोरर्थयोः परस्परमनन्वितयोरेव बोधः। अथ तिबाद्युपस्थापितयोः कर्त्रेकत्वयोरिव परस्परमन्वयोप-पत्तिरित्युच्येत तर्ह्यपि तयोरुद्देश्यविधेयभावेनान्वयः स्यात्। अतः पृथक्शक्तिर्नोचितेति चेन्न। एकपदोपस्थापितयोरुद्देश्यविधेयभावेनान्वयव्युत्पत्तेः सङ्कोचात्। अयं च सङ्कोचः नैयायिकैः मीमांसकैश्च क्वचिदभ्युगतः। तत्र नैयायिकैः आख्यातार्थकृतिवर्तमानत्वयोः मीमांसकैः कृतीष्टसाधनत्वयोश्च सम्बन्धान्तरेणैवान्वयोऽभ्युपगतः। वस्तुतस्तु भिन्नभिन्न-शक्त्या उपस्थापितयोरेव उद्देश्यविधेयभावेनान्वयः। धातुना तु फलव्यापारयोः एकयैव शक्त्या उपस्थितेः न तयोः तथान्वयापत्तिः। अत एवात्र धातौ एकवृन्तगतफलद्वयन्यायेन शक्तिरुक्तेति सरलाकाराः गोपालकृष्णशास्त्रिणः। नव्यैः नैयायिकैः मीमांसकैश्च धातोः फलव्यापारयोः पृथक्शक्तिमङ्गीकृत्य द्वयोः परस्परं जन्यत्वादिना अन्वयः स्वीकृतः। अतः संसर्गमर्यादया जन्यत्वादेः सम्बन्धस्य बोधविषयत्वं निराबाधम्। एतदेवोक्तम् एतद्व्याख्यायां कौण्डभट्टेन - "फलव्यापारयोः साध्यसाधनभावस्तु संसर्गः। अतो जनकत्वांशे शक्तिं विनापि फलजनकत्वं व्यापारे सुलभम्।" इति।

गदाधरभट्टाचार्येण व्युत्पत्तिवादे पञ्चमीकारके फलव्यापारयोः खण्डशः शक्तिपक्षे काचन शङ्का उद्भाविता समाहिता चेत्थम् - यदि च फलव्यापारयोः शक्तिभेदे एकार्थपरित्यागेन अपरार्थबोधप्रसङ्गवत् "धातुः फलविषयकं व्यापारविषयकं च बोधं जनयतु" इति सङ्केताभ्युपगमेऽपि पुष्पवन्तपदशक्त्यविशेषेण तत इव सकर्मकधातुतोऽपि विशेषणविशेष्यभावानापन्नस्यैव बोधः स्यात् ,न तु तदापन्नार्थद्वयविषयक इत्युच्येत - तदा सङ्केतस्य अवच्छेद्यावच्छेदकभावावगाहित्वमपि स्वीकरणीयम्। विशेषणविशेष्य-भावेन भासमानयोरेव फलव्यापारयोः विषयताद्वयमवच्छेद्यावच्छेदकभावापन्नमिति तथैव

तयोः भानम्। पुष्पवन्तपदसङ्केते च चन्द्रसूर्यविषयतयोः अवच्छेद्यावच्छेदकभावो न भासते, अतस्तयोः विश्रृङ्खलमेवभानम् इति न काप्यनुपपत्ति'' रिति।

अस्य ग्रन्थस्यायमाशयः - धातोः फलव्यापारयोः खण्डशः शक्तिरिति मते "धातुः फलविषयकं व्यापारविषयकं च बोधं जनयतु" इत्याकारा ईश्वरेच्छा शक्तिः। सैव सङ्केतः। एवञ्च "पुष्पवन्तपदं सूर्यविषयकं चन्द्रविषयकं च बोधं जनयतु" इत्याकार-सङ्केतवता पुष्पवन्तपदेन यथा परस्परमनन्वितयोरेव सूर्यचन्द्रयोः भानं तथा फल-व्यापारयोरपि परस्परमनन्वितयोरेव शाब्दबोधे भानं स्यात् नत्ववच्छेद्यावच्छेदक-भावेनान्वितयोरिति शङ्का। समाधानं चेत्थम्। फलव्यापारयोः खण्डशः शक्तिरिति पक्षेऽपि सङ्केतः "धातुः फलविषयकं व्यापारविषयकं च बोधं जनयतु" इत्याकारो न । किन्तु "यगाद्यसमभिव्याहृततिङ्समभिव्याहृतधातुपदं फलविषयकत्वावच्छिन्नव्यापार-विषयकताशालिशाब्दबोधं जनयतु" इत्याकारः, यगादिसमभिव्याहृततिङ्समभिव्याहृत-धातुपदं व्यापारविषयकत्वावच्छिन्नफलविषयकताशालिशाब्दबोधं जनयतु" इत्याकारश्च। तस्मात् द्वयोरपि विषयतयोः अवच्छेद्यावच्छेदकभावावगाहित्वेन तथा शाब्दबोधो भवति। पुष्पवन्तपदे तु सङ्केते द्वयोः सूर्यचन्द्रविषयतयोः अवच्छेद्यावच्छेदकभावो न भासते। तस्मात् तत्र न विशेषणविशेष्यभावावगाहि शाब्दबोधः।

नैयायिकैस्तावत् गदाधरादिभिः कर्तृप्रत्ययसमभिव्याहारे भावे च फलप्रकारक-व्यापारविशेष्यकः कर्मप्रत्ययसमभिव्याहारे व्यापारप्रकारकफलविशेष्यकश्च बोधोङ्गीकृतः तिङन्ते कृदन्ते चोभयत्र। कौण्डभट्टेन तु सर्वत्र तिङन्ते फलप्रकारकव्यापारविशेष्यकः बोधः अङ्गीक्रियत इति तदनुसारं सङ्केतः एवं वक्तव्यः - "तिङ्समभिव्याहृतधातुपदं फल-विषयकत्वावच्छिन्नव्यापारविषयकताशालिबोधजनकम्" इत्याकारकं "कर्मकृदितरप्रत्यय - समभिव्याहृतधातुपदं फलविषयकत्वावच्छिन्नव्यापार विषयकताशालिबोधजनकम्" इति वा। कर्मकृदन्तं परित्यज्य अन्यत्र तिङन्ते कृदन्ते च धातोः फलविशेषणकव्यापार-विशेष्यकबोधस्यैव तन्मते इष्टत्वात्। कर्मकृदन्ते तु फलविशेष्यक एव बोधः "रामेण बाणेन हतो वाली" इत्यादिषु "रामकर्तृकबाणकरणकप्राणवियोगाश्रयः वाली"ति बोधस्य शब्दकौस्तुभे प्रौढमनोरमायां च भट्टोजीदीक्षितेन प्रतिपादितत्वात्। उक्तं च कर्मसंज्ञासूत्रे कौस्तुभे दीक्षितेन "फलभावनयोस्तु विशेषणविशेष्यभावो विपरीत" इति । कर्मकृदन्त-स्थले इति शेषः।

अथैवं पृथक्शक्तिं स्वीकृत्य तत्रागतानां शङ्कानां परिहाराय विशिष्टसङ्केत-स्वीकारः उद्देश्यविधेयभावेनान्वयवारणार्थं तस्याः व्युत्पत्तेः सङ्कोचः इत्यादिक्लेशाः किमर्थं वोढव्याः, धातोरेव फलविशिष्टे व्यापारे शक्तिः कल्प्यताम् , फलस्य विशेष्यत्वापेक्षायां व्यापारविशिष्टफले च। कर्मकृत्प्रत्ययः व्यापारावच्छिन्नफलबोधने तात्पर्यग्राहकः तद्भिन्न-प्रत्ययः फलावच्छिन्नव्यापारबोधने तात्पर्यग्राहकश्च भवतु , प्राचीनैः नैयायिकैः "फलाव-च्छिन्नव्यापारे" एव धातोः शक्तिरङ्गीकृता इति चेदुच्यते - अस्मिन् पक्षे धातोः शक्तिद्वयं कल्पनीयमिति नानार्थता भवति। तत्र शक्तिः फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च कल्प्यत इति शक्यतावच्छेदकं फलावच्छिन्नव्यापारत्वं व्यापारत्वावच्छिन्नफलत्वं च स्वीकर्तव्यमिति गुरुधर्मस्य शक्यतावच्छेदकत्वापत्तिः।

किं च विशिष्टस्यैव शक्यत्वे "तण्डुलं पचती" त्यादौ तण्डुलादेः कर्मणः धात्वर्थफले अन्वयानुपपत्तिः, विशिष्टशक्ति-स्वीकारे विशिष्टस्यैव पदार्थत्वेन तत्र फलस्य पदार्थैकदेशत्वात् "पदार्थः पदार्थेनैवान्वेति न पदार्थैकदेशेन" इति न्यायात्। अयं च न्यायः अवश्यमङ्गीकरणीयः। अन्यथा घटपदात् उपस्थापिते घटत्वविशिष्टरूप-पदार्थैकदेशभूते घटत्वे नित्यत्वाभिप्रायेण "नित्यो घटः" इति प्रयोगः स्यात्। नन्वेवं "सुन्दरः घटः" इत्यपि प्रयोगः न स्यात्। पदार्थैकदेशे घटे सुन्दराद्यनन्वयादिति चेन्न। उक्तन्याये पदार्थैकदेशशब्देन इतरविशेषणत्वेन ज्ञायमानः पदार्थैकदेश एव स्वीक्रियते। "सुन्दरः घटः" इत्यादिषु घटशब्दादुपस्थितघटत्वविशिष्टघटपदार्थैकदेशस्य घटस्य इतराविशेषणत्वेन तत्र सुन्दरादिपदार्थान्तरान्वये न काचिदनुपपत्तिः। वस्तुतस्तु सुन्दरादिविशेषणयोगः विशिष्टस्यैव। तत्र विशिष्टे विशेष्यतया भासमान एव तस्यान्वयः फलति। अतः न कश्चिद्दोषः।

नागेशानुयायिनस्तु विशिष्टशक्तिपक्षमेव समर्थयन्ति। तदित्थं - प्रामाणिक-गौरवस्य अदोषत्वात् गुरुधर्मस्य शक्यतावच्छेद-कत्वेऽपि न क्षतिः। "पदार्थः पदार्थेनै-वान्वेती"तिन्यायस्य धात्वर्थविषये सङ्कोचः क्रियते। अर्थात् व्युत्पत्तिवैचित्र्यात् अत्र एकदेशान्वयोऽपि स्वीक्रियते। स्वीकृतश्च एकदेशान्वयः नैयायिकैः जगदीशादिभिः फलावच्छिन्नस्य व्यापारस्यैव सर्वत्र धातुवाच्यत्वमिति पक्षे। अतः फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च पृथक् धातोः शक्तिद्वयमित्येव युक्तमिति ।

पृथक् पृथक् उपस्थितयोरपि धात्वर्थयोः फलव्यापारयोः प्रथममन्वयः अन्तरङ्गत्वात्। द्वयोरपि अर्थयोः समानपदेन समकालमुपस्थितिरेवान्तरङ्गत्वप्रयोजकम्।

एतदेव समानाभिधानश्रुतिरिति मीमांसकैरुच्यते। ततः परमेव पदार्थान्तरेण सम्बन्ध इति "गमनं न स्पन्दः" इत्यादिषु विशेष्यभूतव्यापारे एव स्पन्दभेदः प्रतीयते न तु फले। न चैवं "स्तोकं पचति" इत्यादिषु स्तोकादेः विशेषणीभूतफलेऽन्वयो न स्यादिति वाच्यम्। क्रियाविशेषणानां विशेषणीभूतेऽपि अन्वयस्य अभ्युपगमात्।

< 5 > (पृ.18-19)

"कर्मवत्कर्मणा तुल्यक्रिय" (पा.3-1-87) इति सूत्रे भाष्ये इति। "आत्मसंयोगे अकर्मकर्तुः कर्मदर्शनात्" इति "पदलोपश्च" इति तत्सूत्रस्थवार्तिकव्याख्याने "आत्मसंयोगे अकर्मकर्तुः कर्म दृश्यते। क्व? हन्त्यात्मानं, हन्यत आत्मेति। विषम उपन्यासः। हन्त्यात्मानमिति कर्म दृश्यते, कर्ता न दृश्यते। आत्मना हन्यत इति च कर्ता दृश्यते कर्म न दृश्यते। पदलोपश्चात्र द्रष्टव्यः। हन्त्यात्मानमात्मा।आत्मना हन्यत आत्मेति। कः पुनः आत्मानं हन्ति, को वात्मना हन्यते। द्वावात्मानौ, अन्तरात्मा शरीरात्मा च।अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति। शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवति।" इत्युक्तम्। उक्तं च वाक्यपदीये –

एकस्य बुद्ध्यवस्थाभिः भेदे च परिकल्पिते।
कर्मत्वं करणत्वं च कर्तृत्वं चोपजायते॥ (वा.प.तृ.साधन.104) इति।

ततश्च अनेन भाष्येण एकस्यापि वस्तुनः बुद्ध्या भेदकल्पनेन एकदैव कर्तृकर्मकरणादिव्यवहारः सुकर इति, भेदकल्पनां विना एकस्य वस्तुनः तथा व्यवहारः अयुक्त "आकडारादेका संज्ञा" (पा.1-4-1 ) इति नियमात् इति च ज्ञायते।

अथ फलप्रयोजकक्रियैव व्यापारः। तदाश्रयत्वमेव कर्तृत्वम्।तच्च सर्वकारकसाधारणम्। एतादृशं कर्तृत्वमेव स्वातन्त्र्यम्।करणादिकारकेषु स्वस्वकरणत्वादिभिस्सह फलप्रयोजकक्रियाश्रयत्वरूपं कर्तृत्वमप्यस्ति। तथा च एतादृशं कर्तृत्वमाश्रित्य परत्वात् कर्तृसंज्ञायां करणादिसंज्ञाविधानमेव व्यर्थं स्यात्। अतः तत्तत्संज्ञानां निरवकाशत्वरूपापवादत्वसिद्ध्या करणादिसंज्ञाभिरेव कर्तृसंज्ञायाः बाधः स्यादिति फलप्रयोजकक्रियायाः व्यापारत्वेन धात्वर्थत्वेपि न दोष इति शङ्कते – न चेति।अगत्येति। करणादिसंज्ञाविधानान्यथानुपपत्त्येत्यर्थः। गतेर्वक्ष्यमाणत्वात् इति। प्रकारान्तरेण कर्तृत्वस्य निरूपणेन तस्य करणत्वादिभिस्सह सामानाधिकरण्याभावस्य अत्रैवाग्रे निरूपयिष्माणत्वादिति भावः। एतत्कारिकाव्याख्यायामेवाग्रे - "एवं सर्वेषां कारकाणां व्यापाराः वाच्याः।यदा यो यस्य बुद्धिस्थः तदा सोभिधीयते, तदैव तदाश्रयः कर्ता। अत एव काष्टं पचति, स्थाली पचतीति संगच्छते। एवं च काष्टेन पचतीत्यपि नानुपपन्नम्, तदा

तद्व्यापारस्य धात्वर्थत्वाविवक्षणात्। एतेन काष्ठक्रियाया वाच्यत्वे तृतीया न स्यात्, अवाच्यत्वे प्रथमा न स्यादित्यादिकमपास्तम्।" इति, तथा कारकार्थनिर्णये(सुबर्थनिर्णये) कर्तृत्व-निरूपणसंदर्भे - "स्वतन्त्रः कर्ता"(पा.1-4-54), स्वातन्त्र्यं च धातूपात्तव्यापारवत्वम् , "धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते" इति वाक्यपदीयात्। अत एव स्थाल्यादि-व्यापारस्यापि धातुनाभिधाने स्थाल्यादेः कर्तृत्वं, स्थाली पचति इति दर्शनात्।" इति च ग्रन्थेन धातूपात्तव्यापाराश्रयत्वमेव कर्तृत्वं न तु अन्यादृशमिति वक्ष्यमाणरीत्ये-त्यर्थः।"कारक" (पा. 1-4-23) सूत्रे भाष्ये च " सिद्धं तु प्रतिकारकं क्रियाभेदात् पचादीनां करणाधिकरणयोः कर्तृभावः" इति वार्तिकव्याख्यायां "सिद्धः करणाधिकरणयोः कर्तृभावः।कुतः? प्रतिकारकं क्रियाभेदात् पचादीनाम् । कोसौ प्रतिकारकं क्रियाभेदः पचादीनाम्? "अधिश्रयणोदकासेचनतण्डुलावपन-एधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः" -अधिश्रयणोदकासेचनतण्डुलावपन-एधोपकर्षणक्रियाः कुर्वन्नेव देवदत्तः पचती-त्युच्यते। तत्र तदा पचिर्वर्तते। "द्रोणं पचति आढकं पचति इति सम्भवनक्रिया धारणक्रिया चाधिकरणस्य पाकः"- द्रोणं पचत्याढकं पचतीति संभवनक्रियां धारणक्रियां च कुर्वती स्थाली पचतीत्युच्यते। तत्र तदा पचिर्वर्तते। "एधाः पक्ष्यन्ति आविक्लित्ते-र्ज्वलिष्यन्तीति ज्वलनक्रिया करणस्य पाकः"- एधाः पक्ष्यन्त्याविक्लित्तेर्ज्वलिष्यन्तीति ज्वलनक्रियां कुर्वन्ति काष्ठानि पचन्तीत्युच्यन्ते, तत्र तदा पचिर्वर्तते।" इत्यादिना धातूपात्तव्यापाराश्रयत्वमेव कर्तृसंज्ञाप्रयोजकमित्युक्तम्। तत्र हि ''तत्र तदा पचिर्वर्तते" इति वाक्येन तत्तदर्थस्य तदा तदा पचिशक्यता, तदाश्रयत्वेन तत्तत्कारकस्य तदा तदा कर्तृत्वमिति स्पष्टतया सूचितम्। तत्तद्व्यापारस्य फलप्रयोजकत्वेपि धात्वर्थत्वाविवक्षायां करणत्वादिकमिति एतद्भाष्याशयः। एतदेवोक्तं वाचस्पतिमिश्रैः न्यायवार्तिकतात्पर्य-टीकायां - "यस्य हि व्यापारं प्राधान्येन धातुराख्यातप्रत्ययो वा अभिधत्ते स स्वतन्त्रः कर्ता। तथा हि - विक्लिद्यन्ति इत्यत्र तण्डुलादयः कर्तारः, पचन्तीत्यत्र देवदत्तादयः। तत्कस्य हेतोः ? एकत्र तण्डुलादेः व्यापार उपात्तोऽन्यत्र देवदत्तादे" रिति। ततश्च करणादिसंज्ञानां तत्तद्व्यापारस्य धात्वर्थत्वाविक्षायां चारितार्थ्यात् न तेषां कर्तृसंज्ञापवाद-त्वमिति भावः।

**< 6 >** (पु.21-22)

यदनन्तरमिति। अधिश्रयणादिव्यापारेषु क्रमोत्पन्नेषु यद्व्यापारोत्तरक्षणे विक्लित्ति-रूपफलोत्पत्तिः तस्यैव क्रियेति व्यवहारः, न वा समूहस्य न वा प्रत्येकं तत्पूर्वतन-व्यापाराणाम् इति कश्चन पक्षः। सोऽत्र खण्डनार्थमुपक्षिप्यते। पक्षे चास्मिन् फलोत्पत्त्य-

व्यवहितपूर्वक्षणवृत्तिव्यापारस्यैव क्रियात्वम्। तत्पूर्वतनानां तु न। किन्तु तादर्थ्यात् – फलोत्पत्त्यव्यवहितपूर्वक्षणवृत्तिव्यापारार्थत्वात् - पूर्वपूर्वव्यापारस्य उत्तरोत्तरव्यापारफल-कत्वात् स्थूणा इन्द्र इतिवत् औपचारिकः(लाक्षणिकः) तेषु क्रियाव्यवहारः इति भावः। एतदेव अनन्तरं फलं यस्या इति वाक्यपदीये उक्तम्। तत्खण्डयति – सम्भवतीति। यत्र च पदस्य मुख्यवृत्त्या विवक्षितार्थाबोधकत्वं तत्रैव लक्षणा, यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य मुख्यवृत्त्या(शक्त्या) तीररूपार्थाबोधकत्वमिति तत्र तीरबोधाय लक्षणा आश्रीयते। तीरे गङ्गापदस्य सङ्केतितत्वाभावात्। क्रियापदस्य तु न तथा। लोकव्यवहारेण तस्य क्रमिके व्यपारसमूहे तत्तसमूहान्तर्गते प्रत्येकस्मिन् व्यापारे च शक्तिसिद्धेः। अतः लक्षणा-श्रयणमयुक्तम्। तेषां लक्ष्यत्वे तु धातुवाच्यत्वानुपपत्त्या तदाश्रयाणां देवदत्तादीनां कर्तृत्वं न स्यात्।

फलोत्पत्त्यव्यवहितपूर्वक्षणवृत्तिव्यापारस्यैव क्रियात्वे दोषोऽपीत्याह – काष्ठादीति। "देवदत्तः काष्ठैः ओदनं पचति" इत्यत्र विक्लित्तिरूपफलोत्पत्त्यव्यवहितपूर्वक्षणवृत्ति-व्यापारत्वेन काष्ठक्रियायाः विवक्षायां तस्या एव धात्वर्थत्वात् काष्ठानामेव कर्तृत्वं स्यात् न तु देवदत्तस्य। इष्यते तु तदापि देवदत्तस्यैव कर्तृत्वं, तन्न सिध्येदिति भावः।

दोषान्तरमप्याह – आरब्धेऽपीति। अधिश्रयणादीनां क्रियात्वाभावेन धात्वर्थत्वा-भावात् तत्र वर्तमानत्वाद्यन्वयाभावेन तासु वर्तमानास्वपि पचतीति इष्टः प्रयोगो न स्यात्, प्रत्युत पक्ष्यतीति अनिष्टः प्रयोगः स्यादिति भावः।

< 7 > (पृ.23-25)

जातिमन्य इति। वाक्यपदीये तृतीयकाण्डे जातिसमुद्देशे विंशतितमेयं कारिका। अस्या अयं भावः – देशकालादिभेदभिन्नासु "इयं गौः इयं गौः" इति पार्थक्येन उपदेशाविषया-स्वपि गवादिव्यक्तिषु "इयं गौः इयं गौः" इति प्रख्याविशेषकारणीभूतः सर्वगोव्यक्त्यनुगतः नित्यश्च कश्चिद्धर्मविशेषः व्यक्तेः पृथक् प्राथमिकोपदेशसमये एव गृह्यमाणः जातिः इति, तद्धर्मावच्छिन्नाः एकैकशः व्यक्तय इति च यथा, तथा देश-कालकर्तृकर्मादिना भिन्नासु पचिक्रियासु उपदेशाविषयास्वपि "इयं पचिक्रिया, इयं पचि-क्रिया" इत्येवं प्रख्याविशेषकारणीभूतः कश्चन धर्मविशेषः तत्तत्पचिक्रियाव्यक्तेः पृथक् प्राथमिकोपदेशसमये एव गृह्यमाणः पचित्वरूपो जातिः । सा च नित्या अधिश्रयणा-द्यधःश्रयणान्तव्यापारसमुदायनिष्ठा, वस्तुतः नित्यत्वात् असाध्यापि स्वाश्रयीभूतानां स्वाभिव्यक्तिहेतुक्रियाव्यक्तीनां साध्यत्वात् तद्धर्मोपरक्ता साध्यत्वेन ज्ञानविषया भवति।

सैव च क्रिया। सैव धात्वर्थो व्यापारः। तदाश्रयः कर्ता। जातिरूपक्रियायाः स्वाश्रयाश्रयत्वसम्बन्धेन कर्तर्यन्वयः।तेन सम्बन्धेन क्रियाश्रयत्वमेव कर्तृत्वम्।इति। पक्षेऽस्मिन् अधिश्रयणाद्यधःश्रयणान्ते व्यापारसमूहे एव पचित्वमिति चेतनगतव्यापारस्यैव धात्वर्थत्वमिति स्थाली पचति, काष्ठानि पचन्ति, दण्डः पचति इत्यादिषु स्थाल्यादिगतव्यापारस्य धात्वर्थत्वाभावेन तदाश्रयाणां कर्तृत्वं न स्यात्। अथ पचिक्रियासम्बद्धसर्वकारकव्यापारेषु पचित्वमभ्युपेयते तर्हि तत् विक्लित्तिरूपफलानुकूलत्वरूपमेव स्यात् इति तदेव पचित्वजातिरिति पर्यवस्यति। ततश्च पूर्वोक्तलक्षणे एवास्य पर्यवसानात् पूर्वोक्त एव दोषः अत्रापि इति भावः। तदेवोपपादयति – दण्डादिव्यापारस्यापीत्यादिना। किञ्चास्मिन् पक्षे एकाकारस्य पचित्वस्याभावात् सर्वानुगतत्वेन नैको धर्म इति जातिरेव न सिध्यति। तथा च कस्मिंश्चित् निश्चिते क्रियासमूहे एव पचित्वं स्वीकरणीयम्। तथा च यदि अधिश्रयणाद्यधःश्रयणान्ते एव व्यापारसमूहे पचित्वं नान्यत्र, तर्हि दण्डादिव्यापारस्य पचित्वाभावात् पचधातुशक्यत्वाभावे दण्डः पचतीत्यादि प्रयोगो न स्यात्। तदेवाह –तत्र जातिर्नास्तीतिचेदित्यादिना। दण्डः पचतीति। अत्र दण्डव्यापारः आलोडनरूपः दर्व्यादिसाधारणः। महाकटाहेषु पाके आलोडनाय दण्ड एवोपयुज्यते।

अथ जातिः क्रियेति मते पक्षान्तरमपि वाक्यपदीये इत्थमस्ति –

> अन्ते या वा क्रिया भागे जातिः सैव क्रिया स्मृता।
> सा व्यक्तेरनुनिष्पादे जायमानेव गम्यते॥ (वा.प.तृ.क्रि.21)

क्रमिके व्यापारसमूहे अन्तिमे क्रियाभागे यो व्यापारः तन्निष्ठा जातिरेव क्रिया। यदव्यवधानेन फलोत्पत्तिः स एव व्यापारः अन्तिमत्वेन परिगण्यत इति स एव तज्जात्याश्रयः। तत्पूर्वतनाः व्यापाराः तदुपकारकाः, तदर्थत्वात् क्रियापदव्यपदेश्याः भवन्ति। एतच्च स्पष्टीकृतं तत्रैव ।

यथा –

> अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः।
> प्रधानभूतां तादर्थ्यात् अन्यासां तु तदाख्यया॥ (वा.प.तृ.क्रि.15) इति।

अयमपि पक्षो न युक्तः। फलानुकूलक्रियाया एव धात्वर्थत्वे सर्वकारकक्रियाणां तथाभूतत्वेन तदाश्रयत्वेन सर्वत्र कर्तृसंज्ञापत्तेः इतःपूर्वमेवोक्तत्वात्। एतदेव स्पष्टयति एतेनेत्यादिना निरस्तमित्यन्तेन।

एवं क्रियायाः दुर्निरूपत्वे शङ्किते स्वसिद्धान्तानुसारं तन्निरूपयति –भावनाभिध इत्यादिना। भावना अभिधा अभिधानं स्ववाचकशब्दः यस्य सः भावनाभिधः इति विग्रहः।

यः व्यापारः भावनापदेन व्यवह्रियते शास्त्रान्तरेषु स एवात्र शास्त्रे क्रियाशब्देन व्यवह्रियते इत्यर्थः। तथा च मीमांसकैः नैयायिकैश्च यः व्यापारविशेषः भावनाशब्देन व्यवह्रियते स सर्वोऽपि वैयाकरणैः क्रियाशब्देन संगृह्यते। मीमांसकाग्रणीः मण्डनमिश्रः "पूर्वापरीभूतं भावमाख्यातमाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्" इति निरुक्तवचनं प्रमाणीकृत्य फलानुकूलं स्पन्दव्यापारादिपर्यायम् अधिश्रयणाद्यारभ्य अधःश्रयणादिपर्यन्तं क्रियासमूहं भावभावनापदवाच्यं मनुते। पूर्वोक्तनिरुक्तगतं भावपदं भूधातोः णिजन्तात् भावे घञि निष्पन्नं भवनानुकूलव्यापारं बोधयति। भावभावनाशब्दौ पर्यायौ। पचति पाकं करोतीति विवरणमप्यत्र प्रमाणम्। अत्र करोतिः उत्पादनार्थः। उक्तं च तेन भावनाविवेके –

उदासीनत्वविच्छेदलक्ष्यं धात्वर्थकारणम्।
स्पन्दव्यापारपर्यायं करोत्यर्थं प्रचक्षते॥ इति।

तथा च सर्वोऽपि फलोत्पादकः व्यापारः चेतनाचेतनसाधारणः आन्तरो वा बाह्यो वा भावभावनाक्रियादिपदबोध्य इति तस्य मतम्। उदयनादिप्राचीननैयायिकाः क्रियायां चेतनाचेतनवृत्तित्वेन भेदं परिकल्प्य चेतनक्रियां कृतिशब्देन अचेतनक्रियां भावनाशब्देन च व्यवाहरन्। उक्तं च उदयनाचार्येण न्यायकुसुमाञ्जलौ पञ्चमस्तबके

कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना॥ इति।(न्या.कु.5-9)

चेतनाचेतनकारकसमुदायेन कार्ये निष्पाद्यमाने चेतने एव कर्तृव्यवस्था आनुभविकी। तस्मादपि मुख्यभूता कृतिः यत्न एव। अतः करोतिना विव्रियमाणत्वादाख्यातमपि यत्नार्थकम्। परस्मिन् - अन्यत्र गौणे, या कृतिः व्यवह्रियमाणा "तन्तवः कुर्वन्ती"त्यादौ सा केवलमनुकूलव्यापारात्मकभावनामात्रम् इति ।आधुनिकाः मीमांसकास्तु व्यापारभावनयोः भेदं कल्पयन्ति। तन्मते च कृतिपर्यायता भावनायाः,भवितुर्भवनानुकूलो भावुकव्यापारविशेषो भावनेति तल्लक्षणात्। तथा च भावनापदार्थे नैयायिकमीमांसकयोर्मतभेदेऽपि अस्मन्मते सर्वविधस्यापि व्यापारस्य आन्तरस्य बाह्यस्य च भावनात्वमिति तादृशस्य सर्वस्यापि व्यापारस्य भावनाभिधेति शब्देन क्रियारूपतां प्रदर्श्य तस्य धात्वर्थतां च प्रतिपादयति । भावकृदुपस्थाप्यक्रियायाः धात्वर्थत्वाभावबोधनाय साध्यत्वेनेत्यादि। वक्ष्यतीति। अत्रैव पञ्चमकारिकयेति शेषः।

व्यापारो भावनेति। व्यापारो भावना सैवोत्पादना सैव च क्रिया - चस्त्वर्थे। स च व्यापारपदोत्तरं योजनीयः । तदुक्तं भूषणसारे "व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया" इति।"क्रिया व्यापार" इति लक्षणम्। एतावन्मात्रोक्तौ "क्रिया" इति

कृदन्ताभिहितक्रियाया अपि धातुवाच्यव्यापाररूपक्रियात्वापत्तिरतः उत्पादनेति विशेषणम्। सा क्रिया उत्पादनैव - उत्पाद्यत्वेनाभिधीयमाना एव - साध्यत्वेनाभिधीयमाना एवेति यावत्। क्रियादिकृदन्ताभिहितक्रियायाः सिद्धत्वेनाभिधानात् न तत्रातिव्याप्तिः। अत एव च तिष्ठति भवति पुत्रीयतीत्यादौ नाव्याप्तिरपि। अन्यथा परिस्पन्दरूपक्रियात्वाभावात् तत्र लक्षणमव्याप्तं स्यात्। नन्वेवमपि धातुवाच्यफले विक्लित्त्यादावतिव्याप्तिः। तस्यापि साध्यत्वेन भानात्क्रियात्वाच्चेत्यत आह - भावना सैवेति। सा क्रिया भावनैव भावनापर-नामिकैव। भावना च भवितुर्भवनानुकूलो भावुकव्यापारविशेषः फूत्कारादिः, न तु विक्लित्त्यादिरिति न तत्रातिव्याप्तिः। एवञ्च भावनाकृतियत्नादिपदैरभिधीयमानोऽपि व्यापार एव सोऽपि धात्वर्थ एवेति च लभ्यते। एव शब्दो भिन्नक्रमः। एवञ्च भावनापरनामिकैव उत्पाद्यत्वेन रूपेणाभिधीयमानैव च या क्रिया स व्यापार इति पर्यवसितोऽर्थः। अथवा क्रियायाः लक्षणं "व्यापारविशेषः क्रिये"ति। तत्र व्यापारविशेषस्य भावनादिकं विशेषणम्। एवञ्च भावनाभिधः साध्यत्वेनाभिधीयमानो व्यापारविशेषः क्रियेति लक्षणं सिद्ध्यति।

< 8 > (पु.29-30)

लीलावत्युपाय इति। वल्लभाचार्यकृतः न्यायलीलावतीग्रन्थः न्यायशास्त्रे अतीव प्रसिद्धः। अस्य च प्रकाश-विवेक-विभूति-रहस्य-कण्ठाभरणाद्याः अनेकाः व्याख्याः अपि प्रसिद्धाः। एतासु सर्वासु वर्धमानकृता प्रकाशव्याख्यैव प्राचीना प्रसिद्धा च। उपायनाम्ना तु इदानीं कापि प्रचारे नास्ति। परन्तु वर्धमानस्य प्रकाशव्याख्याया एव उपाय इति नामान्तरमिति निरूपयन्ति वङ्गे नव्यन्यायचर्चेति ग्रन्थे दिनेशचन्द्रभट्टाचार्याः। गङ्गेशस्य पुत्रोऽयं वर्धमानः स्वपितृकृतमणिग्रन्थस्य तथा प्राचीनानां बहूनां न्यायग्रन्थानां च व्याख्यामकरोत्। अस्य सर्वाः व्याख्याः इदानीं प्रकाशनाम्नैवोपलभ्यन्ते। परन्तु ताः प्राचीनकाले उपायनाम्नैव प्रथिताः आसन्। उपायकारकनाम्नैव अयं समनन्तरैः विद्वद्भिः संकीर्तित इत्यपि कथयन्ति दिनेशचन्द्रभट्टाचार्याः। तथा च लीलावतीप्रकाश एव लीलावत्युपाय इति सिद्धम्। न्यायलीलावत्यां जलप्रकरणे जले अभास्वरशुक्लरूपस्य मधुररसस्य च साधनात्परं तैलस्य जलत्वसाधनसंदर्भे तद्गतद्रवत्वस्य कनकद्रवत्वघृत-द्रवत्वभेदसाधनप्रसङ्गे तैले आप्यमेव सांसिद्धिकं द्रवत्वं, स्नेहश्च अपामेवेत्युक्तम्। ततश्च सांसिद्धिकद्रवत्वं स्नेहश्च जलस्य द्रव्यान्तरात् भेदके इति तात्पर्येण तत्र जलनिरूपण-मुपसंहृतम्। तत्र हि प्रकाशे "जलत्वमपि भेदकं, जलशब्दसङ्केतग्रहो न व्यक्तिमात्रे न वा व्यक्तिविशेषे इत्यनुगतधर्मस्य बाधकाभावाज्जातित्वात्" इति जातेः भेदकत्वं वदन् जल-शब्दशक्यतावच्छेदकतया जलत्वजातिः साधिता। अत्रेदं तत्त्वम्। शाब्दं ज्ञानं सर्वमपि

सप्रकारकत्वात् विषयतात्रयमवगाहते। ततश्च जलशब्दजन्यज्ञाने विशेष्यताख्य-विषयतया जलरूपं द्रव्यं भासते। प्रकारताख्यविषयतया तद्गतो धर्मः भासते। स एव जलत्वमित्यभिधीयते। स च जलत्वरूपो धर्मविशेषः सर्वजलद्रव्यानुगत इति तत्त्वेन तस्य जातित्वमित्यर्थः। अत्र च जलत्वस्यैव शक्यतावच्छेदकत्वात् तस्य सर्वानुगतत्वाच्च जातित्वमिति शक्यतावच्छेदकतयापि जातिः सिध्यतीति भावः। नन्वेवं विभुशब्दशक्यता-वच्छेदकतया विभुत्वस्यापि जातित्वं स्यात्, तस्य जातित्वं तु नेष्टं भूतत्वेन साङ्कर्यादिति चेदुच्यते – असति बाधके एव शक्यतावच्छेदकस्य जातित्वम्। विभुत्वे तु बाधकसत्त्वात् न जातित्वमित्यर्थः। एवं च पचिशब्दशक्यतावच्छेदकतया तच्छक्यगतधर्मे जातित्वे न किञ्चित् बाधकमिति भावः।

द्रव्यानुगतबुद्ध्येति। न्यायलीलावत्यां द्रव्यनिरूपणे "न चानुगतबुद्धिगम्या जातिः तदपायात् व्यावर्तते, गृहीतसमयस्य रत्नत्ववद्भानात्" इति अनुगतबुद्धिगम्यत्वं जातेः प्रतिपादितम्। तद्व्याख्याने प्रकाशविवृतौ "मिश्रास्तु द्रव्यानुगतबुद्धेरेव द्रव्यत्वं सिध्यति। उपाध्यननुसन्धानेऽपि तथा प्रतीतेः। स्पर्शवत्त्वप्रतीतिस्तु नोपाध्यननुसन्धाने, येन तयापि जातिराक्षिप्येतेति वदन्ति।" इति मिश्रमतमुपन्यस्तम्। "इदं द्रव्यं इदं द्रव्यमि" त्यनुगत-प्रतीत्या पृथिवीत्वादिज्ञानं विनैव द्रव्यत्वं सिध्यति। स्पर्शवत्त्वेन तु पृथिवीत्वाद्युपाध्य-नुसन्धानेनैव द्रव्यत्वं साधनीयमिति तस्य विलम्बप्रतिपत्तिकरत्वात् न तत्साधकत्वमित्यर्थः। उक्तं च प्रकाशे वर्धमानेन "द्रव्यमिति प्रत्यक्षं तावत् सर्वसिद्धम्। तच्च यथा पृथिव्यां तथा जलतेजसोरपीति उभयसाधारणं निमित्तं सिध्यति। तच्च न पृथिवीत्वादिकम्, एकदेश-वृत्तित्वात्, न गुरुत्वादिकं, तदज्ञानेऽपि धूमादौ द्रव्यमिति प्रत्यक्षात्। तच्च जातिः, तथात्वे बाधकाभावात्।" इति।

गुणपदशक्यतावच्छेदकतयेति। रघुदेवभट्टाचार्यस्य वचनमिदम्। तेन रघुनाथ-शिरोमणिकृतस्य पदार्थतत्त्वनिरूपणस्य व्याख्या रचिता। तत्र गुणत्वजातिखण्डनपर-ग्रन्थव्याख्यासन्दर्भे "इदमत्र बोध्यम्। असति बाधके गुणपदशक्यतावच्छेदकत्वेन गुणत्वजातेः सिद्धौ बाधकाभावः। इदं "पूर्णाय परमात्मने नम" इत्यत्र ईश्वरे आत्मपद-व्यपदेशं कुर्वतो दीधितिकृतोऽपि सम्मतम्। अन्यथा आत्मपदशक्यतावच्छेदकत्वं विना ईश्वरसाधारणात्मत्वजातौ युक्त्यन्तराभावेन तथा व्यपदेशोऽसङ्गतः स्यात्।" इति। (द्र. हरिहरशास्त्रिकृता न्यायलीलावत्याः कण्ठाभरणसविवृतिप्रकाशोपेतायाः टिप्पणी – पृ 105)।

गुणपदशक्यतावच्छेदकतया –अस्यायं भावः। शक्त्या पदैः प्रतिपाद्येषु सर्वेष्वर्थेषु शक्यता सामान्यो धर्मः। तेन धर्मेण घटपटयोरर्थयोः भेदः न सिध्यतीति तद्गतशक्यतायाः अवच्छेदकः(भेदकः) कश्चन धर्मविशेषः अवश्यं स्वीकार्यः, यदवच्छिन्नया शक्यतया घटपटयोः भेदः सिध्यति। अर्थात् घटपटयोः साधारण्येन वर्तमाना शक्यता तत्तद्धर्मोपरक्ता भिन्ना भिन्ना प्रतीयते। यथा आकाशस्यैकत्वेऽपि घटमठाद्युपाधिभिः घटाकाशः मठाकाश इति भेदः तथा शक्यता घटत्वपटत्वादिभिः वस्तुतः एकापि भिद्यते। तथा च तत्र भेदकधर्मरूपेण स्वीक्रियमाणः घटत्वपटत्वादिरूपो धर्मः तत्तत्पदवाच्यसर्ववृत्तित्वात् जातिः भवति इति नैयायिकसिद्धान्तः। एवं गुणपदार्थस्य गुणस्य पदार्थान्तरैः द्रव्यादिभिः भेदाय गुणत्वं शक्यतावच्छेदकं स्वीकार्यमिति तस्य सर्वगुणानुगतत्वात् जातित्वं सिध्यतीति भावः। अपरैरिति। मिश्रैः रघुदेवभट्टाचार्यैश्चेत्यर्थः। तच्चेति। तत् - पचिपदशक्यतावच्छेदकं व्यापाररूपम् । जातिरिति। पच्यर्थभूतेषु सर्वेषु फूत्कारादिष्वनुगतत्वात्, अनुगतस्यैव धर्मस्य जातित्वात्। ननु तत्तपदशक्यतावच्छेदकस्य सर्वत्र जातिरूपेण लोकानुभवाभाव इति चेदाह - उपाधिर्वेति।

एतत् खण्डयति – तन्नेति। येन रूपेणेति। यत्प्रकारतयेत्यर्थः। बोधे यद् विशेषणतया भासते तस्यैव शक्यतावच्छेदकत्वं नतु बोधाविषयस्येति, फूत्कारत्वादीनामेव पच्यर्थे विशेषणतया भानात् तेषामेव शक्यतावच्छेदकत्वं युक्तम् ।पूर्वं दृष्टान्ततया प्रदर्शितेषु जलद्रव्यगुणादिषु यज्जलत्वादि शक्यतावच्छेदकं तद्विशिष्टमेव जलादिकं शाब्दबोधे भासते इति तेषां जलत्वादीनां शक्यतावच्छेदकत्वं युज्यते।दार्ष्टान्तिके पचादौ शक्यतावच्छेदकत्वेन कल्प्यमानस्य फूत्कारत्वाद्यतिरिक्तस्य लोके बोधाविषयत्वात् तत्कल्पनमनुचितमिति भावः।ननु फूत्कारादीनां शक्यतावच्छेदकत्वे शक्यतावच्छेदकनानात्वापत्तिः, अतः कश्चन लघुभूतः साधारणश्च धर्मः कल्प्यते शक्यतावच्छेदकलाघवायेति चेदिदं प्रष्टव्यम् , तस्याः कल्पनायाः प्रयोजनं किमिति।किं तत् तस्य तत्तत्पदजन्यबोधे प्रकारतया भानं ? तत्तु न भवत्येव। तथा लोकानुभवाभावात्।तदेव कथयति – कल्प्यमानेति। तत्तच्छब्दात् यद्विशेष्यकः यत्प्रकारकश्च बोधो लोके अनुभूयते स एव तत्तत्पदार्थ इति लोकप्रसिद्धधर्मपुरस्कारेणैव शाब्दबोधः न तु कल्पितधर्मपुरस्कारेण। तथा च कल्पितधर्मस्य शाब्दबोधविषयत्वस्यैवाभावे तस्य सर्वथा निष्प्रयोजनत्वेन तत्कल्पनमेवायुक्तमिति। प्रकृतसन्दर्भे प्रयुक्तः अवच्छेदकशब्दः अवच्छिनत्ति व्यावर्तयति स्वाश्रयमर्थान्तरेभ्य इति व्युत्पत्त्या भेदकपरः, नतु अन्यूनानतिरिक्तपरः इति ज्ञेयम्।

लीलावत्युपाये (लीलावतीप्रकाशे) गुणत्वजातिः प्रकारान्तरेणापि साधिता इत्थं – संयोगविभागोभयासमवायिकारणत्वसमवायिकारणत्वशून्ये जातिमति यत्कारणत्वं तदसति बाधके जातिरूपधर्मावच्छेद्यमिति गुणत्वं सामान्यममङ्गीकरणीयम् – इति। अस्यायमर्थः। संयोगविभागोभयासमवायिकारणत्व-समवायिकारणत्वशून्ये पदार्थे(गुणरूपे) वर्तमाना कारणता किञ्चिद्धर्मावच्छिन्नेति तत्कारणतावच्छेदकरूपेण स्वीक्रियमाणो धर्मः असति बाधके जातिरिति गुणत्वजातिः सिद्ध्यतीति। अत्र कर्मव्यवच्छेदाय संयोगविभागोभया-समवायिकारणत्वविशेषणम्। द्रव्यव्यवच्छेदाय समवायिकारणत्वशून्येति। अत्र च अवच्छेदकत्वम् अन्यूनानतिरिक्तत्वरूपम्। अत्र अवच्छेदकस्य जातिरूपत्वात् अवच्छेदकत्वमपि जातेरेव। तत्स्वरूपस्यैव तत्त्वात्। तथा च कारणतावच्छेदकत्वेन शक्यतावच्छेदकत्वेन च जातिः नैयायिकैः साधिता।

न च कारणतावच्छेदकत्वादिनापि जातिर्नसिद्ध्येदिति। अस्य अयं भावः – येन रूपेण बोधः तस्यैव शक्यतावच्छेदकत्वमिति अनुभूयमानतत्तद्धर्मस्यैव लाघवगौरव-विचारं विना शक्यतावच्छेदकत्वस्वीकारे येन येन रूपेण यस्मिन् यस्मिन् कारणताबोधः तत्तद्धर्मस्यैव लाघवगौरवविचारं विना कारणतावच्छेदकत्वमङ्गीकरणीयम्। तथा च घटं प्रति दीर्घदण्डः कारणमिति कारणतावच्छेदकं दीर्घदण्डत्वं स्यात्। तस्य च धर्मस्य सर्व-दण्डवृत्तित्वाभावात् कारणतावच्छेदकरूपेण जातिः न सिद्ध्येत्। तत्र लघुः दण्डत्वरूपो धर्मः कारणतावच्छेदकत्वेन स्वीकृतश्चेदेव तस्य सर्वविधदण्डवृत्तित्वात् जातिरूपता सिद्ध्यति। इदानीं तन्न सिद्ध्येदिति। समाधत्ते – कल्प्यमान लघुरूपेणेति। अस्यायं भावः – घटं प्रति कारणीभूते दीर्घदण्डे दीर्घदण्डत्वमिव दण्डत्वमप्यस्ति, ययोर्मध्ये दण्डत्वं लघु सर्वदण्डव्यापकं च। अतः तस्यैव दण्डत्वस्य कारणतावच्छेदकत्वं युक्तम् ।(घटं प्रति कारणीभूतो दण्डः यथा दीर्घदण्डो भवति तथा दण्डोऽपि भवति। ततश्च लघुरूपेण दण्डरूपेण कारणत्वे संभवति दीर्घदण्डरूपेण कारणता न युक्तेति लघोरेव दण्डत्वस्य कारणतावच्छेदकत्वं कल्प्यते इति कारणतावच्छेदकत्वेन लघुधर्मकल्पना युक्तैव) इति। तर्हि शक्यतावच्छेदकमपि तथा कल्प्यतामिति चेदाह – अत्र चेति। सिद्धरूपेणेति। पच्यर्थफूत्कारादीनां फूत्कारत्वेनैव लोके बोध इति तेषु व्यापारत्वाप्रतीतेः बोधाविषयस्य व्यापारत्वस्य कल्पनं नोचितम्।

किञ्च तथा व्यापारत्वस्य कल्पनायां लाघवापेक्षया गौरवमेवाधिकमित्याह – कार्यकारणभावान्तरकल्पने गौरवमिति। लोकेन अनुभूयमानस्य फूत्कारत्वेन फूत्कारबोधस्य विषये फूत्कारत्वावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति फूत्कारत्वा-

वच्छिन्नविषयकवृत्तिज्ञानं कारणमिति यथा कार्यकारणभावः कल्प्यते तथा व्यापारत्वेन फूत्कारबोधाङ्गीकारे व्यापारत्वावच्छिन्नविषयकशाब्दत्वावच्छिन्नं प्रति व्यापारत्वावच्छिन्नविषयकवृत्तिज्ञानं कारणमिति कार्यकारणभावान्तरं कल्पनीयमिति गौरवमेव, न तु लाघवमिति।

< 9 > (पृ.33-35)

पचादिधातूनां फूत्काराद्यर्थवाचकत्वे तत्र विद्यमानाः फूत्कारत्वाधःसन्तापनत्वादयो धर्माः शक्यतावच्छेदकाः स्युरिति अनेकशक्यतावच्छेदकत्वे हर्यादिपदवत् नानार्थत्वं स्यात् । न चेष्टापत्तिः । हर्यादिपदेष्विव प्रकरणादिभिः अर्थान्तरबोधस्य निरोधे समकालं फूत्कारादीनां बोधानापत्तिः। पचतीत्यत्र अधिश्रयणमारभ्य अधःश्रयणपर्यन्तानां यत्नसहितानां समूहस्य बोधस्य इष्टत्वेन तदनापत्तेः इति शङ्का।

समाधत्ते - न च नानार्थतापत्तिः इत्यादिना। नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वं हि नानार्थत्वम्। यथा - हरिशब्दस्य विष्णौ इन्द्रे रवौ सर्पे सिंहे हये भेके च शक्तिः। सा च शक्तिः विष्णुत्वेन्द्रत्वसिंहत्वादिनानाधर्मावच्छिन्ना। तादृशशक्तेः निरूपकः हरिशब्दः। तन्निष्ठनिरूपकतावच्छेदकधर्मः हरीतिवर्णानुपूर्वी। सा च एकैवेति तादृशैकधर्मवत्त्वं हरिशब्दे अस्तीति हरिशब्दो नानार्थ इत्युच्यते। एतादृशनानार्थत्वं पचादीनामप्यस्तीति शङ्का।

समाधानं तु तदादिन्यायेनेत्यादि । तद्-इदम्-एतदित्यादिसर्वनाशब्दैः घटत्वपटत्वादिविरुद्धधर्मविशिष्टानेकार्थप्रतिपादनेऽपि यथा न नानार्थत्वं तथाऽत्रापीत्यर्थः। तथा हि – तदिदमादिसर्वनामभ्यः घटपटादयोऽनेकेऽर्थाः घटत्वादितत्तद्विशेषधर्मपुरस्कारेण यद्यपि प्रतीयन्ते, तथापि न ते हर्यादिशब्दवदनेकार्था इत्युच्यन्ते। यतः तत्र घटत्वादिनानाधर्मावच्छिन्ना अपि अनुगतबुद्धिविषयत्वरूपैकधर्मपुरस्कारेण प्रतीयन्ते। अनुगतैकधर्मपुरस्कारेण नानाधर्मावच्छिन्नप्रत्यायकस्य न नानार्थत्वम्। द्रव्यत्वेन घटपटाद्यर्थप्रतिपादकद्रव्यशब्दवत्।

अननुगतनानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वमेव नानार्थत्वम्। शक्यतावच्छेदकानां नानात्वेऽपि शक्यतावच्छेदकतावच्छेदकस्यैकत्वे न नानार्थत्वमिति यावत्। अत्र च शक्यतावच्छेदकतावच्छेदकं च बुद्धिविषयत्वम्। तदेकधर्मपुरस्कारेण अनेकशक्यतावच्छेदकावच्छिन्नानां बोध इत्यर्थः।

नन्वेवं पचतीत्यादितः यथा फूत्कारत्वादिनानाशक्यतावच्छेदकावच्छिन्नानां बोधः, तथा बुद्धिविषयतावच्छिन्नत्वेनापि बोधः स्यात् ,यादृशः शक्तिग्रहः तादृश एव बोध इति नियमादिति चेन्न। बुद्धिविषयत्वस्योपलक्षणत्वेन उपलक्षणस्य तत्तत्पदशक्तिग्रहाविषयत्वेन शाब्दबोधेऽभानात्। उपलक्षणत्वं च तत्पदजन्यबोधविषयत्वेन तत्पदशक्तिग्रहाविषयत्वम्। तथा च तदादिसर्वनामसु यथा नैयायिकैः बुद्धिविशेषविषयतोपलक्षितघटत्वपटत्वादिनानाशक्यतावच्छेदकावच्छिन्नानां बोधः अङ्गीक्रियते तेनमार्गेण एकबुद्धिविषयत्वोपलक्षितफूत्कारत्वादिनानाशक्यतावच्छेदकावच्छिन्नानां फूत्कारादीनां क्रियाणां तत्तद्धातुशक्यत्वेन स्वीकारः आवश्यकः तत्तद्रूपेण बोधार्थमिति कौण्डभट्टस्य हृदयम्।

तत्र प्रमाणमाह - गुणभूतैरिति। क्रमजन्मनां क्रमेण जन्म उत्पत्तिःयेषां तेषाम् अधिश्रयणादीनां समूहः क्रिया इति व्यपदिश्यते इत्यन्वयः। कीदृशः स समूह इति चेदाह – गुणभूतैरवयवैः युक्तः इति। गुणभूतैः फूत्कारत्वादिना तत्तद्रूपेण भासमानैः फूत्कारादिव्यापारैर्युक्तः।क्षणनश्वराणां क्रमशः उत्पन्नविनष्टानां समूहः कथं सिध्यतीति चेदाह – बुध्येति। यद्यपि स समूहः प्रत्यक्षाविषयः तथापि समूहालम्बनात्मिकया बुध्या प्रकल्पितः विकल्परूपः। शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति लक्षणलक्षित इत्यर्थः। शब्दज्ञानमात्रेण बुद्धावनुपतनशीलः बाह्यार्थशून्यः विशेषेण बुद्धिविशेषेण कल्प्यत इति विकल्पः, बुद्धिपरिकल्पित इत्यर्थः। ननु फूत्काराद्यवयवेषु पृथक् पृथक् भासमानेषु कथम् एका क्रियेति व्यवहार इति चेदाह – बुध्या प्रकल्पितः अभेद इति।एकबुद्धिविषयत्वेन फूत्कारत्वादिनानाशक्यतावच्छेदकावच्छिन्नानां फूत्कारादीनां समूहे यतः अभेदः -एकत्वं परिकल्पितः अतः एका क्रियेति व्यवहारोप्युपपद्यत एव। अत्र बुध्याप्रकल्पिताभेद इति पाठान्तरम्।अस्मिंश्च पाठे स्पष्टताधिका।बुध्या प्रकल्पितः अभेदः यस्येति बहुव्रीहिणा अन्यपदार्थभूते समूहे एकत्वारोपस्य स्पष्टत्वात्।अत्र बुध्या प्रकल्पित इति उभयान्वयी, बुध्या प्रकल्पितः समूहः बुध्या प्रकल्पितः अभेद इति। ततश्च तदादिन्यायेन बुद्धिविशेषविषयत्वोपलक्षितफूत्कारत्वाद्यवच्छिन्नेषु पचादेः शक्तिरिति एतत्कारिकया स्पष्टं प्रतीयत इति भावः।

तदेव विवृणोति – क्रमजन्मनां व्यापाराणां समूहे एकत्वम् - अभेदः बुध्या संकलनात्मिकया प्रकल्पितः। स च समूहः स्वभावतो गुणभूतैरवयवैर्युक्त इत्यर्थ इति। अत्र एकत्वबुध्या इति पाठान्तरम्। तदा क्रमजन्मनां समूहः एकत्वबुध्या प्रकल्पितः, स च तथाकल्पितः समूहः गुणभूतैरवयवैर्युक्त इत्यन्वयः।प्रथमपाठे समूहे एकत्वं बुध्या प्रकल्प्यत इति, द्वितीयपाठे समूहः एकत्वबुध्या प्रकल्प्यत इति भावभेदः स्पष्टः।

वाक्यपदीयकारिकायां हि अभेदपरिकल्पनं स्पष्टमभिहितमिति तदाशयकः प्रथमपाठः युक्त इति विभावयामः। तत्र अभेद इत्यध्याहार्यम्। ततश्च न विशेषणविशेष्यभावानुपपत्तिशङ्का। अत्र च "एका क्रिया" इति रूपप्सूत्रस्थं भाष्यं मानम्।

एतस्य धातुवाच्यत्वे मानं तु वक्ष्यत इति। सर्वनामाव्ययादीनामिति(वै.सि.का.10) धात्वर्थत्वं क्रियात्वमिति(वै.सि.का.11) इति कारिकाद्वये, तत्रापि विशिष्य द्वितीये "क्रियाशब्दस्य साध्यत्वेनाभिधीयमानव्यापारे एव साङ्केतिकशक्तेः स एव गृह्यते सूत्रे वाशब्दसूचनयेति सूत्रं धातोः क्रियार्थत्वसाधनायाभिहितम् " इत्यादिना।

**< 10 >** (पृ.38)

अयं प्रत्ययवाच्य एवेति मीमांसकाः। अयं व्यापारः भावनापरपर्यायःतिङ् प्रत्ययवाच्यः इति मीमांसकराद्धान्तः। उक्तं च कुमारिलभट्टैः भावार्थाधिकरणे –

"तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः।

प्रत्ययश्रुतिवेलायां भावनात्मावगम्यते॥"(त.वा.1-1-24)इति,

"यदि कर्त्रा धात्वर्थेन वा भावना गम्येत ततः पाचकपाठकादिपदेष्विव तिरोहितरूपावगम्येत। प्राधान्यात्तु शब्दार्थत्वाध्यवसानमिति"। इति च। अत्र फलं धात्वर्थः स्पन्दव्यापारादिपर्याया भावना आख्यातार्थ इति प्राचीनमीमांसकमतमभिप्रेतम्।

**< 11 >** (पृ.40-41)

अथ कर्तृकर्मणोराख्यातार्थत्वसमर्थनार्थमवतारयति - अथेति। कर्तृकर्मणोराख्यातार्थत्वे किं प्रमाणम्। न च पचतीत्यादिषु कर्तृसामान्यप्रतीतिरेव प्रमाणम्। अन्यथा "कः पचति" इति कर्तृविशेषजिज्ञासा एव नोदियात्। विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वात् इति वाच्यम्। तस्याः प्रतीतेः कर्तृशक्तिं विनापि प्रकारान्तरेण साधयितुं शक्यत्वात्। तथा च "अनन्यलभ्यः शब्दार्थ" इति न्यायेन तत्र प्रतीतोऽपि कर्ता न तद्वाच्यार्थः। अन्यथा "गङ्गायां घोष" इत्यादौ गङ्गाशब्दात्तीरबोधात् तीरेऽपि शक्तिकल्पनापत्तिः। ननु कथं तस्य अन्यलभ्यत्वमिति चेदुच्यते - तत्प्रतीतिश्च इति। फलाश्रयव्यापाराश्रयप्रतीतिरित्यर्थः। आक्षेपात् लक्षणया वेति। भाट्टमीमांसकानां मतमिदम्। तिङन्ते हि भावनैव मुख्यतया प्रतीयते। "भावार्थाः कर्मशब्दाः" (मी 2-1-5-1)इति जैमिनिसूत्रं "भावप्रधानमाख्यातम्" इति निरुक्तं चात्र प्रमाणम्। भावो नाम भावना। तथा च प्रधानतया ज्ञायमानस्य प्रत्ययार्थत्वं युक्तमिति तिङन्तबोध्यार्थे मुख्यविशेष्यतया भासमानायाः भावनायाः तिङर्थत्वं कल्प्यते। तथा च तिङां भावनायां

शक्तिः। तिङर्थसंख्यायाः भावनायामन्वयायोग्यत्वात् पचतीति पदश्रवणसमनन्तरं "कः पचति" इति कर्तृविशेषविषयकजिज्ञासोपस्थितेश्च कर्ता कर्त्राख्याते ,कर्म कर्माख्याते च आख्यातेन बुध्येते इति स्वीकर्तव्यम्। स च बोधः न शक्त्या। अन्यायोऽनेकार्थत्वमिति न्यायात् ,भावनायाः तिङर्थत्वेन व्यवस्थापनाच्च। तथा चाश्रयबोधः द्विधा उपपादयितुं शक्यः। तत्र एकः प्रकारः आक्षेपः। आक्षेपो नाम अर्थापत्तिः। अर्थापत्तिः प्रमाणान्तरत्वेन मीमांसकैरङ्गीक्रियते। "येन विना यदनुपपन्नं तत्तेन आक्षिप्यते" इति न्यायः। यथा - "पीनो देवदत्तः दिवा न भुङ्क्ते" इति वाक्ये अभुञ्जानस्य पीनत्वानुपपत्त्या पीनत्वं रात्रिभोजनमाक्षिपति । तथा च रात्रौ भुङ्क्ते इत्यर्थः सिद्ध्यति। तथा अत्रापि भावना नाम पुरुषप्रयत्नः। सा च कर्तारं विना अनुपपन्ना कर्तारमाक्षिपति। आक्षिप्तकर्तरि आख्यातार्थसंख्यायाः अन्वयः। आक्षेपप्रमाणलभ्यस्यापि अर्थस्य शाब्दबोधे भानमङ्गीक्रियते। अथ "शाब्दमशाब्देन नान्वेति" इति न्यायात् अशाब्दे आक्षिप्तकर्तरि शाब्दस्य संख्याविशेषस्यान्वयो न स्यादित्युक्तौ तु कर्तृकर्मणोः आख्यातलक्ष्यत्वं स्वीक्रियते। लक्षणा च पदवृत्तिः। तथा च लक्षणयोपस्थितस्य अर्थस्य शाब्दत्वात् तत्र संख्यान्वयोऽपि भवति। इयं च लक्षणा निरूढलक्षणा।अतः अन्वयाद्यनुपपत्तिप्रतिसन्धानापेक्षापि न। तथा च तिङ्प्रत्ययः शक्त्या भावनां लक्षणया कर्तृकर्मणी च बोधयति इत्यर्थः। वृत्तिद्वयलभ्योऽप्यर्थः युगपदेव शाब्दबोधे भासते इति तेषामाशयः। अयमेव लक्षणापक्षः। अत्र च युगपत् वृत्तिद्वयं स्वीकृत्य तद्बोध्ययोः परस्परमन्वयः वक्तव्यः स च अप्रसिद्धः। "गङ्गायां मीनघोषौ स्तः" इत्यत्र गङ्गापदे वृत्तिद्वयमाश्रित्य मीनघोषयोः पृथक् पृथक् अधिकरणस्य बोधोऽस्तीति चेदपि वृत्तिद्वयोपस्थापितयोः अर्थयोः परस्परमन्वयः न कुत्राप्यनुभवसिद्धः। किञ्च पदवृत्तिकल्पनागौरवमपि इति चेत् तर्हि आक्षेप एवास्तु। आक्षेपलभ्यस्यैव शाब्दबोधे भानं तत्र शाब्दान्वयश्च अङ्गीकरणीयः। अथवा आक्षेपशब्देन अनुमानं बोध्यते। "भावना क्वचिदाश्रिता गुणत्वात् सकर्तृका वा कार्यत्वात् घटवत्" इति अनुमित्या कर्ता विषयीक्रियते इत्यर्थः। भाट्टेष्वेव प्राचीनाः कर्तृकर्मणोराक्षेपवादिनः। नव्यास्तु लक्षणावादिनः। अतिरिक्तवृत्तिकल्पनायां गौरवेऽपि तस्यार्थस्य शाब्दत्वसम्पादनार्थं वृत्तिः कल्पनीयैव, फलमुखगौरवस्यादुष्टत्वात् इति तेषामाशयः।

नैयायिकमतेन प्राभाकरमतेन चाह – प्रथमान्तपदेनेति। अथ प्राभाकराः नैयायिकाश्च प्रथमान्तपदादेवाश्रयोपस्थितिं स्वीकुर्वन्ति। पक्षेऽस्मिन् आक्षेपपक्षे उक्तः कर्तृकर्मणोः अशाब्दत्वदोषोऽपि नास्ति, तथा युगपत् वृत्तिद्वयकल्पनादिरूपदोषोऽपि नास्ति। नैयायिकमते तिङर्थकृतेः प्रथमान्तार्थे आश्रयतासम्बन्धेनान्वयात् कृत्याश्रयस्य

कर्तुः प्रतीतिः सिद्ध्यति। प्राभाकरमते धात्वर्थस्य फलस्य पाकगत्यादेः कृतिमत्त्वाश्रयत्वादिसम्बन्धेन प्रथमान्तचैत्रादौ अन्वयात् कर्तुः प्रतीतिः। तथा च "शाब्दीह्याकाङ्क्षा शब्देनैव पूर्यते" इति व्युत्पत्तिविरोधोऽपि नास्ति। शाब्दी - शाब्दबोधविषयिणी, आकाङ्क्षा - जिज्ञासा, शब्देनैव - वृत्त्या पदार्थोपस्थितिद्वारा विषयसिद्धिसंपादनेन, प्रपूर्यते - निवार्यते इति तदर्थः। तथा च त्रिभिरुपायैः आश्रयबोधसिद्धेः न तत्र शक्तिकल्पना युक्ता इति वदतां मीमांसकनैयायिकादीनां मतं निराकरोति – अत्रोच्यत इत्यादिना।

< **12** > (पृ.44-45)

कृत्यपि तन्न स्यादिति। लकारस्य स्थाने विधीयमानेषु शानजादिकृत्प्रत्ययेष्वित्यर्थः। पचमान इत्यादि कृत्यपीति पाठान्तरम्। मीमांसकमते नैयायिकमते च स्थानिन एव वाचकत्वस्वीकारेण आदेशभूतानां तिङां शानजादीनां च साक्षादर्थ-बोधकत्वाभावेन तत्स्मृतस्य स्थानिभूतलकारस्यैव वाचकत्वेन तिङ्क्ष्विव शानजादिष्वपि भावनायाःकृतेरेव वा बोधः स्यात् , न तु कर्तुरिति तात्पर्यम्। तत् कर्तृवाचित्वम् ।

अपसिद्धान्तापत्तेरिति। नैयायिकाः मीमांसकाश्च वाक्यस्फोटं पदस्फोटं वा नाङ्गीकुर्वन्ति किन्तु वर्णस्फोटमेव। अर्थात् प्रकृतिप्रत्ययादिरूपपदस्यैव वाचकत्वं स्वीकुर्वन्ति यच्च वैयाकरणानां मते वर्णस्फोटः। तत्रापि स्थानिनामेव वाचकत्वं नादेशानामिति तेषां राद्धान्तः। पचमान इत्यादिषु कर्तृबोधार्थं यदि आदेशानां वाचकत्वमभ्युपेयते तर्हि स्वसिद्धान्तभङ्गः। न केवलमेतत्। आदेशानां वाचकत्वस्वीकारे हरेऽवेत्यादिवाक्यादेशेषु वाक्यरूपेषु, "वःनः" इत्यादिपदादेशेषु पदरूपेषु च वाचकत्वं स्वीकृतप्रायमिति अनिच्छतापि पदवाक्यस्फोटावङ्गीकार्यावेव स्याताम् इति स्वसिद्धान्तविरोध इति भावः।

इष्टापत्तिरिति। शानजादिकृत्सु स्थानिन एव वाचकत्वमिति तत्रापि कृतेः भावनायाः एव वा वाच्यत्वमिष्टमित्यङ्गीकारः।

व्युत्पत्तिभङ्गापत्तेरिति। पचन् देवदत्तः, शयानः देवदत्तः इत्यादिषु पाककर्त्रभिन्नः देवदत्तः शयनकर्त्रभिन्नः देवदत्त इति अभेदसम्बन्धेन बोधो लोकेऽनुभूयते। सः न स्यात्। प्रत्युत लकारार्थकृतेः आश्रयतारूपभेदसंबन्धेन देवदत्ते अन्वयात् पाककृत्याश्रयः देवदत्त इति शयनकृत्याश्रयःदेवदत्त इति च बोधः स्यात्। ततश्च समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय इति व्युत्पत्तिभङ्गः स्यात्। तथा हि - यत्र द्वयोः प्रातिपदिकयोः समाना विभक्तिः तयोरर्थयोः अभेदेन अन्वय इति अस्याः व्युत्पत्तेरर्थः। पूर्वोक्ते पचन् देवदत्त इति युग्मे

शयानः देवदत्त इति युग्मे च समाना विभक्तिः दृश्यते। तथा च पचन् देवदत्त इति युग्मे पचन्पदार्थस्य देवदत्तपदार्थेन, शयानः देवदत्त इति युग्मे शयानपदार्थस्य देवदत्तपदार्थेन च अभेदः वक्तव्यः। स च पचन् शब्दस्य पाककर्ता इति, शयान इत्यस्य शयनकर्तेति च यदि वाच्योऽर्थः तर्ह्येव सिध्यति। लादेशभूतशतृशानचोः कृत्यर्थकत्वे तु पाककृतिः इति पचन् शब्दात्, शयनकृतिरिति शयानशब्दाच्च बोध इति पाककृति-देवदत्तयोः शयनकृति-देवदत्तयोश्च भिन्नत्वेन अभेदः उपपादयितुं न शक्यः। ततश्च व्युत्पत्तिविरोधः स्पष्टः।

जञ्जभ्यमानाधिकरणोच्छेदेति॥ भारतीयेतिहाससंशोधकमण्डलात् प्राप्तायां (भार1) मातृकायाम् अस्य टिप्पणी इत्थमुपलभ्यते - "जञ्जभ्यमानाधिकरणोच्छेदेति॥ तत्र हि "जञ्जभ्यमानोऽनुब्रूयान्मयि दक्षक्रतू" इति दर्शपूर्णमासप्रकरणे श्रूयते। तत्र जपः शुद्धपुरुषधर्म उत क्रतुयुक्तपुरुषसंस्कारः, क्रतोरेववेति सन्दिह्य वाक्याद्गात्रविनामपूर्वक-विदारितमुखपुरुषार्थत्वावगतेः वाक्यस्य प्रकरणेन संकोचायोगात् न क्रतुयुक्तपुरुष-धर्मत्वमिति पूर्वपक्षयित्त्वा वाक्यप्रकरणयोरविरोधेनापि तादृशपुरुषसंभवात् तत्संस्कार-मुखेन क्रत्वर्थत्वमिति क्रतुयुक्तपुरुषधर्मत्वं जपस्य सिद्धान्तितम्। कृति कर्तुरवाच्यत्वे हि शानचोऽकर्त्रर्थत्वेन न तत्सिध्यतीति तदधिकरणवैयर्थ्यप्रसंग इति तात्पर्यम्। पुरुषार्थत्वं क्रतुयुक्तपुरुषार्थत्वम्, यथाश्रुतेऽसंगतेरिति।"

अस्येदं तत्त्वम्। दर्शपूर्णमासप्रकरणे पठितस्यास्य मन्त्रजपविधेः क्रत्वर्थत्वं वा पुरुषार्थत्वं वा इत्यादिविचारः मीमांसाशास्त्रे तृतीयाध्यायस्य चतुर्थे पादे नवमेऽधिकरणे कृतः । अत्र हि जञ्जभ्यमान इति कर्तरि शानच् प्रत्ययः ।"कर्तरि कृत् " (पा. 3-4-67) इत्यनुशासनेन कृतामुत्सर्गतः कर्तृबोधकत्वात् । तथा चानेन विधि वाक्येन विहितस्य "मयि दक्षक्रतू" इतिमन्त्रजपस्य शुद्धपुरुषार्थत्वम् उत क्रतुयुक्तपुरुषार्थत्वम्, उत क्रत्वर्थत्वमिति सन्देहः। कृताम् उत्सर्गतः कर्तृवाचकत्वस्य व्याकरणेन बोधितत्वात् शानच्प्रत्ययस्य कर्तार्थः। प्रत्ययार्थप्राधान्यन्यायेन कर्तुः प्राधान्यम्। ततश्च वाक्यमुख्यविशेष्यतया कर्तुः भानात् अस्य विधेः वाक्यप्रमाणेन केवलपुरुषार्थत्वम् इति प्रथमा कोटिः। अथास्य दर्शपूर्णमासप्रकरणपठितत्वेन वाक्यप्रकरणाभ्यां सम्भूय निर्णये क्रतुयुक्तपुरुषार्थत्वमिति द्वितीया कोटिः। केवलं प्रकरणस्य निर्णायकत्वेन स्वीकारे क्रत्वर्थत्वमिति तृतीया कोटिः। अत्र पूर्वपक्षः - अनेन वाक्येन तावत् वाक्यप्रमाणेन जञ्जभ्यमानपुरुषधर्मतैव प्रतीयते , प्रकरणेन तु क्रत्वर्थत्वमिति द्वयोः प्रमाणयोः विरोधस्य सत्त्वात् वाक्यात् पुरुषसंस्कार-कत्वमेवेति। तत्रायं सिद्धान्तः – वाक्यप्रकरणयोः विरोधे एव बाध्यबाधकभावः। नास्त्यत्र तयोः विरोधः। जञ्जभ्यमानपदस्य कर्तृवाचकत्वेन तादृशपुरुषस्य क्रतावपि सत्त्वात्

तत्संस्कारमुखेन क्रत्वर्थतायाः सम्भवात् ।तथा च विरोधे एव बलाबलचिन्ता ।अत्र तु वाक्यप्रकरणयोः विरोधाभावात् जञ्जभ्यमानवाक्यानुवचनस्य वाक्यप्रकरणाभ्यां क्रतुयुक्त-पुरुषधर्मत्वम् । इति। मूले पुरुषार्थत्वमित्यस्य क्रतुयुक्तपुरुषार्थत्वम् इत्यर्थः। शानचः लस्थानिकत्वेन कृतिबोधकत्वे तु वाक्यात् पुरुषस्याप्रतीत्या जपस्य पुरुषार्थत्वनिर्णायकस्य अस्य अधिकरणस्य अनुपपत्तिः। अतः लस्थानिकत्वेन शानचः कृत्यर्थकत्वे इष्टापत्तिः नोचितेति भावः।

< 13 > (पृ.47-48)

अत्र नैयायिका इति। इदं हि प्राचीननैयायिकमतं न्यायमञ्जर्यां कुसुमाञ्जलौ चोपलभ्यते। तदित्थम् -धात्वर्थः फलं, कृतिः आख्यातार्थः। तत्रैव तिङां शक्तिः। रथो गच्छतीत्यादौ तिङाम् अनुकूलव्यापारे लक्षणा। उक्तं च कुसुमाञ्जल्याम् आचार्यैः –

कृताकृतविभागेन कर्तृरूपव्यवस्थया।

यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना॥ (न्या.कु.पञ्चम.9)

लोके तावत् घटो मया कृतःनाङ्कुरः इति व्यवहारः प्रसिद्धः। तस्य च घटो मत्प्रयत्नजन्यः अङ्कुरस्तु मत्प्रयत्नजन्यो नेति तात्पर्यम्। ततो ज्ञायते कृञ् धातुः यत्नवाचीति। एवं कार्यं यत्र चेतनाचेतनसमुदायेन निष्पाद्यते तत्र चेतने एव कर्तृव्यवस्था आनुभविकी। तस्मात् मुख्यभूता कृतिः यत्न एव। अतश्च करोतिना विव्रियमाणानां तिङाम्(आख्यातानां) अपि यत्नवाचित्वं सिद्ध्यति।तन्तवः कुर्वन्तीति तु गौणः प्रयोगः। तत्र केवलमनुकूलव्यापारा-त्मकभावनैवाख्यातार्थः। भावनैव यत्नात्मा सर्वत्राख्यातगोचरः। न खलु सा भावना धातुनाभिधीयते। धातूनां क्रियाफलमात्राभिधायित्वात्। कृतित्वस्य जातिरूपस्य शक्यता-वच्छेदकत्वे लाघवाच्च कृति रेवाख्यातार्थः। इति।

आख्यातार्थकृतेश्च प्रथमान्तार्थे अन्वयः।भावनायाः शुद्धप्रातिपदिकार्थमात्रा-काङ्क्षत्वात्। तेन प्रथमान्तेनैव कर्तुः उपस्थितेः कर्तरि पुनः तिङां शक्तिः नोचिता। नापि आख्याताभिहितसंख्यायाः कर्तरि अनन्वयप्रसङ्गः। भावनान्वयिन्येव सङ्ख्यान्वयोपपत्तेः। उक्तं चाचार्यैः कुसुमाञ्जल्याम् – सङ्ख्यापि तावदियं भावनानुगामिनी, यं यं भावनान्वेति तं तं सङ्ख्यापीति स्थितेः, एकप्रत्ययवाच्यत्वनियमात्। इति।

नाप्यभिधानव्यवस्थोच्छेदः। तिङ्विषये कर्तृकर्मसंख्याभिधानमेव तन्नियामकम् । कृदादौ तु कर्त्राद्यभिधानमेव तन्नियामकम्। ननु कृत्यभिधानमेव अभिधानव्यवस्था-नियामकमस्तु। कृत्स्वपि सर्वत्र कृतेः प्रतीतेः भवद्भिरङ्गीकृतत्वादिति चेन्न। तथा सति

कर्मकृत्स्वपि कृतेः प्रतीतेः कर्मणि प्रयोगेऽपि कर्तृवाचकात् प्रथमापत्तिः। कर्मकृतां फलमप्यर्थः। तत्र फलं विशेष्यं कृतिः विशेषणम्। ततश्च कर्मणि प्रयोगे कर्तृतृतीयायाः आधेयतामात्रमर्थः। कर्मणि तिङः अपि कृतिफले अर्थः। कृतिः विशेषणमित्यादि पूर्ववत्। चैत्रो गन्ता, मित्रा पक्त्री, गतं पुरम् इत्यादिषु सामानाधिकरण्योपपत्तयेऽपि कृतां कर्तृकर्मवाचकत्वमभ्युपेयम्। इति।

न च कृत्यभिधानादिति। "चैत्रेण पच्यते इत्यत्रापि कृतिभानम् आख्यातात् , तृतीयार्थश्च वृत्तित्वम् इत्येवं वादिनैयायिकमते दूषणाभिधानमिदम्। स्वीकारेत्वाह - मित्रेति" इति टिप्पणी पुण्यपत्तनस्थदक्कन् कालेज्तः प्राप्तायां द्वितीयमातृकायाम् (द.2) उपलभ्यते।

समानाधिकरणस्यैवेति। ययोः विशेषणविशेष्ययोःअनियतलिङ्गयोः सामानाधिकरण्यं तयोः समानलिङ्गकत्वम् तयोश्च अभेदेनैव अन्वय इति नियमः। तथा च तादृशं समानलिङ्गकत्वम् अभेदान्वयप्रयोजकम्। यथा देवदत्तः पाचकः, मित्रा पक्त्री, गतं पुरम् इति। अयं च पूर्वोक्तः नियमः सर्वैरवश्यमभ्युपगन्तव्यः। अन्यथा राज्ञः स्त्री इत्यादि वैयधिकरण्येन विशेषणेऽपि समानलिङ्गकत्वापत्तिः। तथा च यत्र यत्र समानाधिकरणयोः विशेषणविशेष्ययोः समानलिङ्गता तत्र तत्र अभेदान्वयः इति नियमः सिद्ध्यति। देवदत्तः पाचक इत्यादिषु देवदत्तादिकं समानाधिकरणं विशेषणमिति तेषां पाचकादिभिः अभेदः वक्तव्यः। देवदत्तादिपदानां द्रव्यवाचित्वात् तेषां द्रव्यवाचिभिरेव सामानाधिकरण्यमुपपादयितुं शक्यते।

यदि च कृतां लकारवत्कृतिवाचकत्वं तदा पाचकादिपदानां देवदत्तादिपदैः समानलिङ्गत्वेऽपि पाककृत्याद्यर्थकत्वेन द्रव्यवाचकत्वाभावात् देवदत्तादिभिः अभेदान्वय उपपादयितुमशक्य इति पूर्वोक्ताभेदान्वयनियमभङ्गः। नन्वस्तु एतादृशस्थले नियमस्य सङ्कोच इतिचेत् दोषान्तरमाह – एवमाख्यातार्थस्येति।

नैयायिकैः आख्यातार्थस्य प्रथमान्तार्थे विशेषणतया अन्वयोऽभ्युपेयते। चैत्रः पचतीत्यत्र पाककृत्याश्रयः चैत्रः इति बोधाभ्युपगमात्। एवं पक्ता तृप्यतीत्यस्य प्रीत्याश्रयः पक्ता इति बोधः वर्णनीयः। यदि च पक्तृपदार्थः पाककृतिः स्यात् तर्हि तृप्त्याश्रया पाककृतिरिति बोधो वर्णनीयः। ततश्च द्वयोः तृप्तिपाककृत्योः आश्रयाश्रयिभावेन अन्वययोग्यताया अभावात् अन्वयो न स्यात्। तदाह –पाकानुकूला कृतिस्तृप्यतीत्यादि। तृप्त्याश्रया पाककृतिरिति बोधापत्तिरिति तात्पर्यम्। लोके तावत् पाचकादीनां कृदन्तानां

द्रव्यवाचित्वमेवानुभूयत इति कृतां कर्त्रादिकारकवाचित्वम् अवश्यमेव स्वीकार्यमिति। पाचकमाहूय, पाचकं पश्येत्यादौ पाककृतेः आह्वानदर्शनकर्मतया विवक्षायाः अभावात् , प्रत्युत तत्कर्तुरेव दर्शनकर्मतया विवक्षितत्वात्।

< 14 > (पृ.51-53)

भावनान्वयिनि संख्यान्वय इत्यादि। अस्य च ग्रन्थभागस्य पूर्वप्रदर्शित-नैयायिकमतखण्डनपरत्वमेव। परन्तु अयं ग्रन्थः किं वैयाकरणानाम् उत नव्य-नैयायिकानामिति विकल्पः। अयं च वैयाकरणानामेवेति बहवः। केचिच्च इदमित्थमिति निर्धारयितुमशक्ताः पूर्वोक्तखण्डनपरत्वमेवेत्युक्तवन्तः। अत्र च सन्देहे कारणं चेदम् – अयं ग्रन्थः तस्मात्प्रथमान्तपदोपस्थाप्य एव संख्यान्वय इत्युपसंहारानुरोधात् नैयायक-नव्यानामिति, संख्यायाः प्रत्ययार्थत्वात् भावनायाश्च धात्वर्थत्वस्य वक्ष्यमाणत्वादिति ग्रन्थात् वैयाकरणानामिति च आपाततः प्रतीयते इति सन्देहः। अतस्तत्र अनिश्चितिः। परन्तु एतत्खण्डनग्रन्थान्ते तस्मात् प्रथमान्तपदोपस्थाप्य एव संख्यान्वय इति कथनात् अयं नैयायिकानामेवेति निश्चप्रचम्। अत एव एतद्ग्रन्थान्ते इति पुनस्तन्नवीनाः इति नैयायिकमतस्योपसंहारः सङ्गच्छते। अत्रोच्यते इत्यादिना तत्खण्डनञ्च। अतोऽयं खण्डनप्रकारो नव्यनैयायिकानामेव। शब्दशक्तिप्रकाशिकायामपि भावनान्वयिनि सङ्ख्यान्वय इतिविषयस्य इत्थमेव खण्डनमुपलभ्यते।

भावनान्वयिनि संख्यान्वय इत्यस्य अयुक्ततायाम् अनेका युक्तयः प्रदश्यन्ते। तत्र प्रथमा युक्तिः अस्य नियमस्य व्यभिचारः। स च भावनान्वयिनि संख्यायाः अनन्वयरूपः, भावनानन्वयिन्येव संख्यान्वयरूपश्च। तदेव उपपादयति- न पचतीत्यादिना। देवदत्तः न पचति इत्यस्य विक्लित्त्यनुकूलकृत्यभाववान् देवदत्त इति नैयायिकाभ्युपगतो बोधः। अत्र तिङर्थकृतेः नञर्थाभावेऽन्वयः, अभावस्य च देवदत्ते। अत्र च तिङुपात्ता संख्या भावना-न्वयिनि नञर्थे नान्वेति, परन्तु भावनानन्वयिन्येव प्रथमान्तार्थे देवदत्ते इति अस्य नियमस्य व्यभिचारः। तथा च समानपदोपात्तयोः संख्याभावनयोः एकत्रान्वयनियम एव व्यभिचरित इति सा युक्तिः न युक्तेति भावः। अत्र भावनाशब्दः कृतिपर्यायतया कृति-व्यापारयोः सामान्यवाचकत्वेन वा प्रयुक्तः।

उदयनाचार्यादनन्तरैः नैयायिकैः व्यापारस्य धात्वर्थता, कृतेः आख्यातार्थता च स्वीकृता। तस्मिन् पक्षे भावनापदवाच्यव्यापारस्य संख्यायाश्च समानपदोपात्तत्वमपि न सिद्ध्यति। भावनान्वयिनि संख्यान्वय इत्यस्य सुतरामसंभवश्च। यतः व्यापाररूप-

भावनायाः कृतावन्वयः, संख्यायास्तु प्रथमान्तार्थे इति भेदस्य स्पष्टत्वात्। गौणे च प्रयोगे रथो गच्छतीत्यादावपि आश्रयत्वे आख्यातस्य लक्षणास्वीकारात् भावनायाः आख्यातार्थाश्रयत्वे एवान्वयः न तु साक्षात् प्रथमान्तार्थे। अतश्च संख्याभावनयोः एकत्रान्वय इति कथमपि न युज्यते। एतदेव स्पष्टयति – भावनायाः धात्वर्थत्वस्य वक्ष्यमाणत्वादित्यादिना। समानपदोपात्तत्वस्यैवाभावाच्चेति। भावनायाः धातुवाच्यत्वं, संख्यायास्त्वाख्यातवाच्यत्वमिति भिन्नपदोपात्तत्वात् समानपदवाच्यत्वं द्वयोः नास्तीति, समानपदोपात्तत्वेन एकत्रान्वय इत्यपि वक्तुमशक्यमित्यर्थः।

नन्वत्र भावनापदं न व्यापारपरं, किन्तु कृतिपरम्। संख्याकृत्योस्तु समानपदोपात्तत्वमक्षतमेव। अतः न पूर्वोक्तदोषः। विशेष्यतया आख्यातार्थसंख्याप्रकारकबोधं प्रति तेनैव सम्बन्धेन भावनाप्रकारकाभावातिरिक्तविषयत्वेनोपस्थितिर्हेतुरिति कार्यकारणभावः स्वीक्रियते। तथा च नञर्थं परित्यज्य अन्यत्र सर्वत्र भावनान्वयिन्येव संख्यान्वयात् न व्युत्पत्तिभङ्गः इति चेदाह – विशेष्यतयेत्यादि। गौरवाच्चेति। विशेष्यतया संख्यान्वयबोधं प्रति तेनैव सम्बन्धेन आख्यातार्थभावनाप्रकारकविषयविशेषस्य उपस्थितेः हेतुत्वं गुरुभूतमिति भावः। तदुक्तं – भावनाप्रकारकबोधसामग्रीत्वेनेति। भावनाप्रकारकबोधविशेष्यत्वेनेत्यर्थः। संख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमित्यपेक्षया संख्याप्रकारकबोधे भावनाप्रकारकबोधविशेष्यत्वेन प्रथमान्तपदजन्योपस्थितिः कारणमिति गुरुभूतमित्यर्थः।

भावनान्वयनियामकस्येति। अस्यायं भावः - आख्यातजन्यभावनाप्रकारकबोधे विशेष्यतया प्रथमान्तार्थोपस्थितिः कारणमिति हि कार्यकारणभावः नैयायिकसम्मतः। संख्यान्वयबोधे तु भावनान्वय्युपस्थितिः कारणमिति कार्यकारणभावान्तरम्। तत्र भावनान्वयी च क इत्याकाङ्क्षायां प्रथमान्तार्थ एव पर्यवस्यति। तथा च भावनान्वयिनि संख्यान्वय इति पक्षे संख्यान्वयाय प्रथमान्तार्थस्य भावनान्वयित्वेनोपस्थितिः, तत्र च पुनः विशेष्यतया भावनाप्रकारकबोधं प्रति प्रथमान्तपदार्थोपस्थितिः कारणमिति कार्यकारणभावान्तरज्ञानस्य कारणत्वमिति तदपेक्षया यथा विशेष्यतया भावनाप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणं, तथा संख्याप्रकारकबोधं प्रत्यपि प्रथमान्तपदजन्योपस्थितेरेव कारणत्वे लाघवमिति भावः। तदेवोपपादयति – तद्धेतोरिति।

अयं भावः - प्रथमान्तपदजन्योपस्थितिः भावनाप्रकारकबोधे कारणम्। भावनान्वयित्वेन प्रथमान्तपदजन्योपस्थितिः संख्याप्रकारकबोधे कारणम् इति कार्यकारणभाव-

द्वयं संख्याभावनयोरन्वयविषयकं कल्प्यते। नैतद्युक्तम्। उभयत्रापि साक्षात् परम्परया वा प्रथमान्तपदजन्योपस्थितेरेव हेतुत्वात्। तद्धेतोः – भावनाप्रकारकबोधे प्रथमान्तपद-जन्योपस्थितिरूपहेतोरेव, तद्धेतुत्वे - संख्याप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति रीत्या संख्याप्रकारकबोधकारणत्वे सति, मध्ये भावनान्वयित्वेन तस्योपस्थितेः हेतुत्वे प्रयोजनं नास्ति। प्रत्युत गौरवायैव कल्पते इति।

किञ्चात्र भावनान्वयिनि संख्यान्वय इति पक्षे विनिगमकमपि नास्तीत्याह – भावनान्वयिनीति। भावनान्वयिनि संख्यान्वय इत्येव किमर्थं स्वीकरणीयम्। संख्यान्वयिनि भावनान्वयः इति कुतो न। अत्रैकपक्षसाधकयुक्त्यभावात् उभयथापि वक्तव्यं स्यात्। उभयत्र नञ्घटितवाक्ये दोषः समानः। तथा च पूर्वोक्तव्यभिचारादिकं समीक्ष्य भावनान्वयिनि संख्यान्वय इति पक्षः नोपादेयः। किन्तु लाघवात् प्रथमान्तपदोपस्थाप्ये संख्यान्वय इत्येव पक्षः स्वीकार्यः। तदाह – तस्मादिति॥

भावनान्वयिनीत्यारभ्य इति पुनस्तन्नवीना इति यावत् वर्तमानो ग्रन्थः तत्कालीननव्यतार्किकमतम् प्रतिपादयति। मतमिदं शब्दशक्तिप्रकाशिकायाम् आख्यातार्थनिरूपणप्रसङ्गे प्रदर्शितम्। इदं च दीधितिकाराणां मतं भवितुमर्हति, यद्यपीद-मेव सर्वैः समनन्तरैरपि अभ्युपेतम्। तदेव शब्दशक्तिप्रकाशिकोक्तमत्र संक्षिप्यते –

भावनान्वयिनि सङ्ख्यान्वय इत्ययुक्तम्। न पचतीत्यत्र भावनानन्वयिन्येव कर्तरि तदन्वयात्। तस्मात् प्रथमान्तपदोपस्थाप्ये एव तदन्वयः। प्रथमान्तपदोपस्थाप्यत्वमेव तन्नियामकम्। एवं च विशेष्यतासंबन्धेन अख्यातार्थसंख्याप्रकारकबोधं प्रति इतराविशेष-णीभूतप्रथमान्तपदजन्योपस्थितिः विषयतया कारणमिति लघुभूतः कार्यकारणभावः फलति। यथा च वैयाकरणैः आख्यातेन कर्तृकर्मान्यतरबोधे शबादीनां द्योतकत्वमभ्यु-पेयते तथैवास्माभिः संख्यायाः कर्तृकर्मान्यतरान्वये शबादीनां द्योतकत्वं स्वीक्रियते।

न चाभिधानव्यवस्थोच्छेदः।कृत्यनभिधानमेव कर्तुरनभिधानम्। फलानभिधान-मेव कर्मणोऽनभिधानम्।इदं च तिङ्कृत्साधारणम्।कृत्प्रत्ययाभिहितकर्त्रा कृतेराक्षेपात् तत्रापि कृत्यभिधानं सेत्स्यति।तथा च मुख्यभाक्तसाधारणकृत्यनभिधानमेव कर्तुर-नभिधानम्। कर्मप्रत्ययस्य फलमर्थः।कर्मकृतां कृतिवाचकत्वं नास्ति। कर्मणि प्रयोगे तृतीयाया एव कृतिवाचकत्वम्। कर्मकृत्सु कर्मणा फलस्याक्षेपः।तथा च मुख्यभाक्त-साधारणफलानभिधानमेव कर्मणोऽनभिधानम्।

कर्तृकर्मसंख्याभिधानमेव तिङन्ते अभिधानव्यवस्थानियामकमिति, कृदन्ते तु कर्तृकर्मणोरभिधानमेव तन्नियामकमिति प्राचीनमतं न युक्तम्। उभयत्र एकविधव्यवस्थायाः सम्भवे भिन्नभिन्नव्यवस्थास्वीकारे गौरवात्।

नन्वेवं कृतामपि कर्तृकर्मवाचित्वं न स्यादिति चेन्न। कृताम् अभिधानव्यवस्थासिद्ध्यर्थं कर्तृकर्मवाचित्वस्य अनपेक्षितत्वेऽपि चैत्रो गन्तेत्यादौ सामानाधिकरण्यसिद्ध्यर्थं कर्तृकर्मवाचकत्वम् अवश्यमभ्युपेयम्। इति।

देवदत्तः पाचक इत्यादिसामानाधिकरण्याद्यनुपपत्त्याद्येव तत्साधकमिति। देवदत्तः पाचक इत्यादिलोकप्रसिद्धसामानाधिकरण्यानुपपत्तिरित्यर्थः। अत्र आदिपदेन पक्ता तृप्यति, पाचकमानयेत्यादौ अन्वयानुपपत्तिः, विवक्षितार्थासिद्धिरित्यादिकमूह्यम्।

< 15 > (पृ.57-58)

अत्रोच्यते इत्यादि। भावनान्वयिनि आख्यातार्थसंख्यान्वय इति प्राचीननैयायिकमते कार्यकारणभावे गौरवं प्रदर्श्य नव्यनैयायिकैः इतराविशेषणीभूतप्रथमान्ते तस्याः अन्वय इति पक्षे कार्यकारणभावे लाघवं प्रदर्शितम्। नव्यैः स्वप्राचीनमतस्य तिरस्कारे कार्यकारणभावलाघवमेव युक्तिरूपेण प्रतिपादितम्। तामेव परिपाटीमाश्रित्य नव्यनैयायिकमतं खण्डयितुमुपक्रमते – अत्रोच्यत इत्यादिना। नैयायिकैरेतावता तिङ्पदोपस्थाप्यसंख्यायाः पदान्तरोपस्थाप्ये (प्रथमान्तोपस्थाप्ये) अन्वय उक्तः। अस्माभिस्तु वैयाकरणैः तिङर्थसंख्यायाः स्वपदोपात्तार्थान्तरे(तिङर्थान्तरे) कर्तरि कर्मणि वा अन्वयः उच्यते। एकपदोपात्तस्य अर्थस्य तत्पदोपात्तार्थान्तरे एवान्वयस्वीकारे पदान्तरार्थाननुसन्धानप्रयुक्तं लाघवमधिकम्। तथा च तिङर्थसंख्याप्रकारकबोधं प्रति विशेष्यतया तिङर्थकर्तृकर्मान्यतरोपस्थितिः हेतुरिति कार्यकारणभावः फलितः। अतः नव्यनैयायिकमतापेक्षया वैयाकरणमते एव लाघवमधिकमिति कर्तृकर्मणोः आख्यातवाच्यत्वमेव युक्तम्। तदाह – कर्तृकर्मणोः तिङ्वाच्यत्वमावश्कमिति।

अथ नैयायिकाभ्युपगते तिङ्वाच्यसंख्याप्रकारकबोधं प्रति विशेष्यतया प्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावे गौरवं प्रदर्शयति – एतदाकाङ्क्षायाः इत्यादिना। नैयायिकाभ्युपगते कार्यकारणभावे तिङ्पदं प्रथमान्तं चेति पदद्वयं घटितम्। अस्माकं तु तिङ्पदमेकमेव। अतः भवतः कार्यकारणभावः अस्माकं कार्यकारणभावापेक्षया गुरुभूतः। न केवलमेतत्। चन्द्र इव मुखं दृश्यते इत्यत्र इवार्थविशेषणीभूते चन्द्रे तिङर्थसंख्यानन्वयाय पूर्वोक्तकार्यकारणभावः नैयायिकाभ्युपगतः तिङ्वाच्यसंख्याप्रकारकबोधं

प्रति विशेष्यतया इतराविशेषणीभूतप्रथमान्तपदजन्योपस्थितिः कारणमिति परिष्करणीयः। तथा तस्य इतराविशेषणीभूतेति विशेषणघटितत्वेन महद्गौरवम्। तदेवाह – सुतरां गौरवाच्चेति।

अभ्युपेत्यवादेन पुनः नैयायिकः कथयति – अस्तु नाम भवन्मते लाघवम्। परन्तु यः आख्यातार्थं कृतिं मन्यते तस्य बोधोपपत्तये अनिच्छतापि भवता अस्मदभिप्रेतः कार्यकारणभावः अवश्यं वक्तव्यः खलु। तदेवाह – नचाख्यातेत्यादिना। वैयाकरणोऽपि नैयायिकं तन्मतेनैवोत्तरयति – एवं हीति।

अत्रेदमवधेयम्। प्रथमान्तमुख्यविशेष्यता-वादिनः नैयायिकाः प्राभाकराश्च। तत्र प्राभाकराः धातोः केवलफलवाचकत्वं लिङतिरिक्त-लकाराणां केवलं कालसंख्यावाचकत्वं च स्वीकुर्वन्ति। धात्वर्थफलस्य साक्षात् प्रथमान्तार्थे स्वजनकव्यापाराश्रयत्वसंबन्धेन अन्वयमुपगच्छन्ति। ततश्च तन्मते विशेष्तासंबन्धेन धात्वर्थप्रकारकशाब्दबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति व्युत्पत्तिः कल्प्या। साऽपि इतराविशेषणत्वघटिता एव। अथ नैयायिकमतं परिशीलयामः तदपि बहुधा दृश्यते। कुसुमाञ्जलिकाराणां मते धात्वर्थः फलं, कृतिः आख्यातार्थः, व्यापारस्तु न कस्याप्यर्थः। ततश्च फलस्य कृतौ साक्षादन्वयासंभवात् संसर्गविधया भासमानव्यापारद्वारा कृतावन्वयः, कृतेश्च पूर्ववत् प्रथमान्तेऽन्वयः वक्तव्यः। तदनुसारं च काचित् व्युत्पत्तिः कल्प्या। अथ केवलव्यापारः विशिष्टव्यापारो वा धात्वर्थ इति मते कर्मणि प्रयोगे तिङां फलेऽपि शक्तिः स्वीकार्येति तदनुसारं कार्यकारणभावः कश्चिदन्यः कल्पनीयः। अथ रथो गच्छति इत्याद्यचेतनकर्तृकस्थले तथा जानातीत्यादिसविषयकधातुस्थले च तिङर्थकृतेः बाधात् तत्र तिङः आश्रयत्वे लक्षणां प्रकल्प्य प्रथमान्ते अन्वयाय पृथक् कार्यकारणभावः कल्प्यते। संयोगानुकूलव्यापाराश्रयत्ववान् रथ इति, देवदत्तो घटं जानातीत्यादौ च घटविषयकज्ञानाश्रयत्ववान् देवदत्त इत्यादि बोधो व्रर्ण्यते। अत्रायं विवेकः – देवदत्तः पचतीत्यत्र तिङर्थकृतेः आश्रयतासंबन्धेन प्रथमान्तार्थेऽन्वयः। ततश्च तत्र आश्रयत्वं संसर्गः। रथो गच्छतीत्यत्र तु आश्रयत्वं तिङ्पदार्थःइति भेदः॥ इदानीमत्र कश्चिदेवं मनुते – रथो गच्छतीत्यत्रापि तिङः आश्रयत्वे लक्षणा मास्तु। तत्र लकारस्य कालः संख्या चार्थः। धात्वर्थव्यापारस्यैव साक्षात् प्रथमान्तोपस्थाप्ये आश्रयत्वेनान्वयः। पक्षे चास्मिन् लक्षणानाश्रयणरूपं लाघवमस्ति। तथा चात्र विशेष्यतया धात्वर्थभावना(व्यापार)प्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावः फलितः। एवंविधस्य

कार्यकारणभावस्य अचेतनकर्तृकस्थले सविषयकधातुस्थले च नैयायिकमते अवर्जनीयत्वात् , कृतेरपि धात्वर्थत्वे अनेन एकेनैव कार्यकारणभावेन सर्वत्र बोधः सुकरः। अन्यथा कृतेः तिङर्थत्वे धात्वर्थव्यापारप्रकारकशाब्दबोधं प्रति विशेष्यतया तिङर्थोपस्थितिः कारणं, तिङर्थकृतिप्रकारकशाब्दबोधं प्रति विशेष्यतया प्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयं कल्पनीयमिति गौरवम्। ततश्च तस्य तस्य तत्तत्पदार्थत्वे यदि लाघवमेव युक्तिः तर्हि नैयायिकेन कृतेरपि धात्वर्थत्वमेव स्वीकार्यमिति।

तदेवोपपादयति – रथो गच्छति इत्यादिना आख्यातस्य आश्रयत्वलक्षणाभ्युपगमानापत्तेरित्यन्तेन। धात्वर्थस्य साक्षात् प्रथमान्तार्थेनान्वये लाघवान्तरमपि प्रदर्शयति – रथेन ग्रामो गम्यत इत्यादाविति। नव्यैः नैयायिकैः फलव्यापारयोरुभयोरपि धात्वर्थत्वमभ्युपगम्यत इति धात्वर्थफलस्यैव साक्षात् प्रथमान्तार्थे अन्वयस्वीकारे लाघवम्। किं च फलस्य तिङर्थत्वे फलस्य बोधे द्विधा भानमङ्गीकार्यम्। तथा बोधोऽपि अनुभवविरुद्धः इति कृतेः फलस्य च धात्वर्थत्वमेव युक्तमिति। गदाधरभट्टाचार्यः व्युत्पत्तिवादे पञ्चमीकारके विशिष्टव्यापारो धात्वर्थ इति मते पूर्वोक्तां कर्मणि प्रयोगे फलस्य द्विधाभानापत्तिं प्रदर्श्य फलव्यापारयोः उभयोः पृथग्भूतयोः एकवृन्तगतफलद्वयन्यायेन धात्वर्थत्वं कौण्डभट्टवदङ्गीकरोति। कर्मणि प्रयोगे च फलव्यापारयोः विशेषणविशेष्यभावे व्यत्यासं स्वीकृत्य विशेष्यभूतफलस्य प्रथमान्तार्थे अन्वयमङ्गीकरोति॥

विवेचयिष्यत इति। आख्यातार्थभावनाप्रकारकशाब्दबोधं प्रति प्रथमान्तपदोपस्थितिः कारणमित्यस्य व्यभिचारः अत्रैव अग्रे प्रदर्शयिष्यते – वस्तुतस्तु पश्य मृगो धावति, पश्य नृत्यति भवति, पचति भवति इत्यादौ धावनादिभावनायाः दर्शनादौ विशेषणतया अन्वयबोधानुरोधात् वक्तुरपि तथैव तात्पर्यात् भाष्यकारैरपि तथैवाभ्युपगमेन एतादृशेषु एकवाक्यताप्रतिपादनाच्च नाख्यातार्थभावनाप्रकारकशाब्दबोधं प्रति प्रथमान्तपदोपस्थितेः कारणत्वमित्यादिना।

**< 16 > (पु.59-60)**

पचतिकल्पं चैत्र इति। "ईषदसमाप्तौ कल्पप् देश्यदेशीयरः" (पा. 5-3-67)इति सूत्रेण ईषदसमाप्त्यर्थबोधने सुबन्तात् तिङन्ताच्च कल्पप् – देश्य – देशीयर् प्रत्ययाःविधीयन्ते। अत्र "तिङश्चे" (पा. 5-3-56) ति सूत्रस्यानुवृत्तेः एते तिङन्तादपि भवन्ति। तत्र तिङन्तादुदाहरणं पचतिकल्पं चैत्र इति। अत्र कल्पप् प्रत्ययः ईषदसमाप्तिविशिष्टे अर्थे वर्तमानात् तिङन्तात् पचतिशब्दात् कृतः ईषदसमाप्तं पचत्यर्थं बोधयति।

कोऽसौ पचत्यर्थः? वैयाकरणानां मते विक्लित्त्यनुकूलो व्यापारः। नैयायिकानां मते विक्लित्त्यनुकूलव्यापारानुकूला कृतिः। उभयत्र व्यापारकृत्योः विशेष्यत्वात् तयोरेव ईषदसमाप्तिरत्र कल्पप्प्रत्ययेन बोध्यते। तथा च ईषदसमाप्तः विक्लित्त्यनुकूलः व्यापारः, ईषदसमाप्ता विक्लित्त्यनुकूलव्यापारानुकूला कृतिः इति वा अर्थः। अत्र व्यापारस्य कृतेश्च अद्रव्यत्वात् तत्र पुंस्त्रीलिङ्गयोरनुपपत्त्या सामान्ये नपुंसकमिति नपुंसकत्वं कल्प्यते। कल्पपः तद्धितत्वेन तदन्तस्य प्रातिपदिकत्वात् सौ नपुंसकत्वादमि पूर्वरूपे च पचतिकल्पमिति रूपम्। एवं पचतःकल्पं, पचन्तिकल्पमित्यपि भवति। तिङन्तात् कल्पपि सर्वदा एकवचनमेव। तदपि औत्सर्गिकमेकवचनम्। कृतिव्यापारयोः अद्रव्यत्वेन तत्र संख्यान्वयायोगात्।

अत्रेयं शङ्का । पचतिकल्पं चैत्र इति वाक्यस्य बोधः कथम्? अत्र पदद्वयमपि प्रथमान्तम्। अतः समानाधिकरणप्रातिपदिकार्थयोः अभेदान्वयव्युत्पत्तिमाश्रित्य यदि बोधं वर्णयामः तर्हि पाककृत्यभिन्नः पाकव्यापाराभिन्नो वा चैत्र इति बोधो भवेत् यश्च नाभिप्रेतः। पदद्वये विरुद्धविभक्त्यभावात् भेदेन अन्वयानापत्त्या पाककृत्याश्रयः पाकव्यापाराश्रय इति वा इष्टः बोधः न भवेत् ।एवं च पूर्वोक्तयोः द्वयोः व्युत्पत्त्योः व्यभिचारः। यदि च योग्यतामनुसृत्य तत्तत्पदार्थानामन्वयः वक्तव्यश्चेत् कृत्प्रत्ययस्य कृतौ शक्तावपि पक्ता चैत्र इत्यादौ पाककृत्याश्रयः चैत्र इति बोधः सिद्ध्यतीति कृतां कर्तरि शक्तौ सामानाधिकरण्येनान्वयः हेतुर्न भवति। सामानाधिकरण्यं विनापि निर्वाहोपपत्तेः।

पचतितरां मैत्र इति। "द्विवचनविभज्योपपदे तरबीयसुनौ" (पा. 5-3-57)इति सूत्रेण अतिशयितार्थबोधने तरप् ईयसुन्प्रत्ययौ विहितौ। अत्रापि "तिङश्चे" (पा. 5-3-56)ति सूत्रस्यानुवृत्तेः एतौ तिङन्तादपि भवतः। तथा च अतिशयेन पचति इत्यर्थे पचतीति तिङन्तात् तरप्प्रत्यये ततः "किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे" (पा. 5-4-11) इति आमि पचतितरामिति रूपम्। अत्रापि पाककृतेः पाकव्यापारस्य वा अतिशयः विवक्षित इति विशेष्यभूतकृतिव्यापारयोः अद्रव्यत्वात् सामान्ये नपुंसकम् औत्सर्गिकमेकवचनं च। अत्राप्यनुपपत्त्यादि पूर्ववत्।

< 17 > (पृ.64)

अयमत्रास्य प्रघट्टकस्य सारः। समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयःइति व्युत्पत्तेः घटो न, राज्ञः सुतस्य धनम् इत्यत्र, भेदान्वयबोधे एकपदोत्तरविभक्तिविरुद्धविभक्तिमत्पदजन्योपस्थितिः हेतुः इति व्युत्पत्तेः पचतिकल्पं चैत्रः,पचतितरां मैत्रः इत्यत्र

च व्यभिचारः वैयाकरणेन प्रदर्शितः। तद्दोषपरिहाराय नैयायिकः इत्थं यतते – समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय इति व्युत्पत्तौ निपातातिरिक्तत्वविशेषणात् घटो न इत्यत्र न दोषः। राज्ञः सुतस्य धनमित्यत्र यद्यपि उभयत्र षष्ठी, तथापि सा समानाधिकरणा न, अतस्तत्रापि न दोषः। एतत्सिद्धवत्कृत्य पचतिकल्पं चैत्र इत्यत्र प्रदर्शितव्युत्पत्तिव्यभिचारमित्थं निराकर्तुं प्रयतते – आख्यातस्य कर्तरि लक्षणेत्यादिना।

अयं भावः – पचतिकल्पं चैत्रः पचतितरां मैत्र इत्युभयत्र सामानाधिकरण्यमेव। द्वयोर्युग्मयोः समानविभक्तिकत्वात्। तथा च तत्र अभेदेनैवान्वय इति न व्युत्पत्तिविरोधः, व्यभिचारो वा। ननु आख्यातस्य भवन्मते कृत्यर्थकत्वात् कथं चैत्रेण सामानाधिकरण्यमिति चेत् न ब्रूमः कृतिचैत्रयोःसामानाधिकरण्यम्। अपितु कर्तृचैत्रयोरेव। अत्र कर्तृबोधः कथमिति चेत् - उच्यते। अस्ति हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयःइति व्युत्पत्तिः। तथा अत्र द्वयोः नामार्थयोः कृतिचैत्रयोः अभेदान्वयः वक्तव्यः। स चानुपपन्न इति अन्वयानुपपत्तिरूपं लक्षणमाश्रित्य आख्यातस्य कर्तरि लक्षणा आश्रीयते। ततश्च ईषदसमाप्तपाककर्ता अत्र पचतिकल्पशब्दार्थः। तेन च चैत्रपदार्थस्य अभेदान्वयः भवत्येव। एवं च न व्युत्पत्तिविरोधः। एवमेव पचतितरां मैत्र इत्यत्रापि।आख्यातस्य कृतावेव शक्तिः,यत्र चान्वयानुपपत्तिः तत्र लक्षणया कर्तार्थः। अतो न दोषः इति।

वैयाकरणः पुनस्तत्र दोषमुद्भावयति – यत्र यत्र अन्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वा तत्र तत्र लक्षणया आख्यातस्य कर्तृबोधकत्वमङ्गीक्रियते चेत् पक्ता गच्छतीत्यर्थे पचतिकल्पं गच्छतीति प्रयोगः भवता अनिच्छतापि अङ्गीकरणीयः। इष्टापत्तौ एतादृशेषु सर्वेषु लक्ष्येषु नामाख्यातार्थयोरभेदान्वयदर्शनात् आख्यातस्य कर्तृवाचकत्वं भवता अङ्गीकृतप्रायं स्यात्। एवं चैत्रः पचति इत्यादिष्वपि बहूनामाख्यातस्य कर्तरि तात्पर्यात् सर्वत्र आख्यातस्य कर्तरि शक्तिरेवाभ्युपेतव्या।तथा चेत् सिद्धमस्माकं मतमेव।

अथ अत्र लक्षणया कर्तृबोधः आख्यातात् न, अर्थात् नात्र आख्यातस्य कर्तरि लक्षणा, अपितु कल्पप्रत्ययस्य, तस्यैव नामताप्रयोजकत्वात् इत्यपि नैयायिकेन भवता वक्तुं न शक्यम्। तथा सति तत्कर्तृद्वित्वबहुत्वविवक्षायां कल्पबन्तात् द्विवचनबहुवचनापत्तिः। ततश्च आचार्यकल्पौ आचार्यकल्पाः इतिवत् पचतिकल्पौ पचतिकल्पाः इति प्रयोगापत्तिः।

ननु सामानाधिकरण्येन बोधे समानसुब्विभक्तिमत्त्वं तन्त्रम्।तच्च पचति चैत्र इत्यत्र नास्ति, सुप्तिङोः विरुद्धविभक्तित्वात् । ततश्च भेदेनैव अन्वयः वक्तव्य इति चेत् तदपि

न। स्तोकं पचति, ज्योतिष्टोमेन यजेतेत्यादौ स्तोकपाकयोः ज्योतिष्टोमयागयोश्चा भेदान्वयो न स्यात्। अत्र चाभेदान्वयः सर्वानुभवसिद्धः। स च अपलपितुं न शक्यः।अतश्च पूर्वोक्तं व्युत्पत्तिद्वयं विहाय एका एव व्युत्पत्तिरित्थं कल्प्या – भेदेन नामार्थप्रकारकबोधे सार्थक-सुब्निपातजन्यैवोपस्थितिः कारणमिति। यत्र च न भेदान्वयः तत्र अभेदान्वयः अर्थसिद्धः। घटो न इत्यत्र सार्थकः निपातः। राज्ञः सुतस्येत्यत्र सार्थिका षष्ठी। अतः उभयत्र भेदान्वय एव। स्तोकं पचति ज्योतिष्टोमेन यजेतेत्यादौ द्वितीयातृतीये विशेषणविभक्ती। विशेषणविभक्तेः साधुत्वार्थकत्वात् न तयोः सार्थकविभक्तित्वम्। अतश्च अभेदान्वयः सिद्ध्यति। अभेदबोधे च विरुद्धविभक्तिराहित्यं तन्त्रम्। सुप्तिङोश्च न विरोधः। समानार्थत्वात् समानपद(विभक्ति)वाच्यत्वाच्च। तथा च तिङर्थेन सह प्रथमान्तार्थ-स्याभेदबोधो दुर्वारः।तदेवोक्तं अभेदबोधो दुर्वार इति वक्ष्याम इति।

< **18** > (पु.67-68)

पूर्वं कृतां कर्तृवाचकत्वमनादृत्य आख्यातानामिव कृतिवाचकत्वे चैत्रो गन्ता इतिवत् चैत्रे गन्तेति स्यादित्यापत्तिःप्रदर्शिता नैयायिकैः।तस्य खण्डनार्थमुपक्रमते – यत्तु चैत्रेति। अयं भावः। आख्यातानां कर्तृवाचित्वमनादृत्य कृतिमात्रार्थकत्ववादे चैत्रनिष्ठा संयोगानुकूला कृतिरित्यर्थे चैत्रे गच्छतीत्यापत्तिः। अस्य वारणाय विशेष्यतयाख्यातार्थ-कृतिप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितिः कारणमिति कार्यकारणभावः स्वीकार्यः, यश्च वैयाकरणमते नावश्यकः। तथैव कृत्प्रत्ययार्थोऽपि कृतिरेवास्तु। चैत्रे गन्तेति प्रयोगस्य तु विशेष्यतया कृदर्थकृतिप्रकारकबोधं प्रति समानाधिकरणपदजन्योपस्थितिः हेतुः इति कार्यकारणभावस्वीकारेण वारयितुं शक्यत्वात्। ननु कृतां कृतौ शक्तिस्वीकारे कार्यकारण-भावान्तरकल्पनायां गौरवात् कृतां कर्तर्येव शक्तिः कल्प्यते इति चेत् तर्हि आख्याताना-मपि कृतौ शक्तौ पूर्वोक्तकार्यकारणभावकल्पनारूपं गौरवमस्त्येव। तथा च यदि भवता कार्यकारणभावान्तरकल्पनायां गौरवमिति मत्या कृतां कृतौ शक्तिः त्यज्यते तर्हि आख्यातानां विषयेऽपि कार्यकारणभावान्तरकल्पनायां गौरवमस्त्येवेति सापि परित्यक्तव्या स्यात्। अभेदबोधे च न समानविभक्तिमत्त्वरूपं सामानाधिकरण्यं कारणं किन्तु अविरुद्धविभक्तिमत्त्वं तन्त्रमिति वक्ष्यमाणरीत्या कृदर्थवदाख्यातार्थकर्तुरपि प्रथमान्तेन सामानाधिकरण्यमुपपद्यत एव। तथा च आख्यातानां कृतिवाचकत्वापेक्षया कर्तृवाचकत्वे एव लाघवमिति भावः।तदेवोक्त्वा उपसंहरति – कृदर्थवदभेदबोधे वक्ष्यमाणरीत्या कार्य-कारणभावेन निर्वाहोपपत्तेरिति दिगिति।केचिदिति। अनेन अरुचिः सूच्यते। पक्ता चैत्र इत्यस्यापि नामार्थव्युत्पत्त्यविषयत्वापत्तेः।

< 19 > (पु.70-73)

शुक्लादिशब्दानां घटादिशब्दसामानाधिकरण्येन द्रव्यवाचित्वे वक्तव्ये तथानुक्त्वा शक्यतावच्छेदकलाघवलोभात् गुणवाचकत्वमभ्युपगतं नैयायिकैः। तादृशमेव लाघवं कृदादिप्रत्ययार्थनिर्धारणेऽपि स्वीकार्यम्। तदेव प्रतिपादयति – रूपमात्रे इति। रूपवति शुक्लादिशब्दानां शक्तिस्वीकारे तत्तद्रूपेषु अनेकेषु नानाशक्यतावच्छेदकत्वापत्तिरिति भीत्या तेषां रूपवति शक्तिं परित्यज्य रूपमात्रे शक्तिः स्वीक्रियते। तथा कृतां कर्तरि शक्तौ नानाकृतिषु शक्यतावच्छेदकत्वापत्तिः समेति लाघवानुरोधात् तत्रापि कृतावेव शक्तिः कल्प्या स्यात्, उभयत्र भेदाभावात्।

ननु कृतां कृति वाचकत्वे पाठकादिशब्दैः सामानाधिकरण्यम् अभेदान्वयश्च न स्यादिति चेन्न। नीलो घट इत्यादाविव उपपत्तेः। अत्र हि द्वयी गतिः। नीलशब्दस्य तद्वति लक्षणामाश्रित्य अभेदान्वयः, लक्षणां विनैव समानविभक्तिमत्त्वेऽपि गुणस्य द्रव्येन सह अभेदेनान्वययोग्यताविरहात् अभेदान्वयव्युत्पत्तिसङ्कोचेन भेदान्वयो वा। तथैव कृतां कृति शक्तावपि तदाश्रये लक्षणामाश्रित्य अभेदान्वयः, लक्षणां विनैव समान-विभक्तिमत्त्वेऽपि कृतेः द्रव्येन सह अभेदेनान्वययोग्यताविरहात् अभेदान्वय-व्युत्पत्तिसङ्कोचेन भेदान्वयो वा। तथा च कृतां कृतिवाचकत्वेऽपि न सामानाधि-करण्याद्यनुपपत्तिरिति भावः। तदेवाह – केवलकृतौ शक्तिसाधकेनाविशेषादिति।

गुणोपायेति। वैशेषिकसूत्राणाम् उदयनाचार्यरचिता व्याख्या किरणावली। उदयनाचार्यस्य किरणावल्याः गुणखण्डस्य वर्धमानविरचिता व्याख्या प्रकाशनाम्ना इदानीं प्रथिता। तस्या एव उपाय इति नाम्ना व्यवहार आसीत्। वर्धमानस्य सर्वा व्याख्याः इदानीं प्रकाशनाम्ना व्यवह्रियमाणाः आदौ उपायनाम्नैव प्रथिता इति पूर्वमेवास्माभिः लीलावत्युपायप्रस्तावे न्यरूपि। यतः वर्धमानेन किरणावल्याःगुणखण्डस्यैव व्याख्या कृता अतस्तस्याः गुणोपाय इति व्यवहारः। तत्र द्वित्वप्रत्यक्षविचारे अयं ग्रन्थः।

तत्र हि द्वित्वादिसंख्यायाः उत्पत्तिविनाशप्रक्रिया इत्थं निरूपिता। इन्द्रिय-सन्निकर्षः, तस्मादेकत्वसामान्यबुद्धिः, ततोऽपेक्षाबुद्धिः अयमेकः अयमेक इतिरूपा, ततो द्वित्वं , तस्माद्द्वित्वसामान्यज्ञानम् , ततो द्रव्यज्ञानम् (अनुभवरूपम्), ततः संस्कार इत्युत्पत्तिक्रमः। विनाशक्रमस्तु अपेक्षाबुद्धितः एकत्वसामान्यज्ञानस्य द्वित्वोत्पत्ति-समकालं(द्वित्वोत्पत्तिक्षणे एव) विनाशः, द्वित्वसामान्यज्ञानात् द्वित्वगुणज्ञानसमकालम् अपेक्षाबुद्धेः नाशः, द्वित्वसामान्यज्ञानस्य द्वित्वगुणज्ञानात् विनाशः, इत्यादि। उत्तरोत्तर-

बुद्ध्या पूर्वपूर्वबुद्धिनाश इति वैशेषिकसिद्धान्तः। तत्र अपेक्षाबुद्धिनाशात् द्रव्यबुद्धिसमकालं द्वित्वस्य नाश उक्तः। तत्रायं विचारः – द्वित्वबुद्ध्यभावे कथं तद्विशिष्टज्ञानमिति। तस्मिंश्च विचारे अवच्छेदकत्वस्य विशेषणत्वेन उपलक्षणत्वेन च निरूपणं कृतम्। तत्रैव विशेषणत्वनिरूपणसन्दर्भे – समानाधिकरणमवच्छेदकं विशेषणम्, अतद्व्यावृत्तिः विशिष्टत्वम्[1] – इति उदयनाचार्यैः विशेषणं लक्षितम्। तद्व्याख्यासन्दर्भे वर्धमानेन समानाधिकरणमितिप्रतीकमुपादायेत्थं तत्स्वरूपनिरूपणं कृतम् – ननु सामानाधिकरण्यम् नैकविभक्तिनिर्देश्यत्वम्, प्रयोगस्य वस्त्वव्यवस्थापकत्वात्। नाप्येकाधिकरण्यम्[2]– इत्यादिना आक्षिप्य – यदन्विततया ज्ञाते एव विशेष्ये तात्पर्यविषयीभूतेतरान्वयधीः तद्व्यवच्छेदकं विशेषणम्, अनेवंभूतमवच्छेदकम् उपलक्षणमिति परिष्कृतम्।

अस्यायमर्थः। नीलो घट इति प्रयोगेणैव गुणद्रव्ययोः सामानाधिकरण्यमवगम्यते नान्यथेति वक्तुं न शक्यम्। प्रत्यक्षादिभिरपि तत्सामानाधिकरण्यावगमात्। शब्दप्रयोगान्नार्थसिद्धिः, अर्थसिद्धावेव प्रयोगः। इति। यद्यपि तद्वाक्यस्य तत्र सन्दर्भो भिन्नः, तथापि समानविभक्तित्वमेव न सामानाधिकरण्यप्रयोजकमित्यत्र प्रमाणं भवितुमर्हतीति तदत्र प्रमाणतयोपन्यस्तम्।

भोक्ता तृप्यतीति। अत्र भोक्तृशब्दे भुजधात्वर्थो भोगः तृच्प्रत्ययार्थः कृतिः, धात्वर्थभोगस्य प्रत्ययार्थकृतौ जन्यत्वेनान्वयः। तथा च भोगजनिकाकृतिरित्यर्थः। तृप्यतीत्यस्यापि तृप्त्यनुकूला कृतिरित्यर्थः। उभयोरपि पदार्थयोः कृत्योरभेदः। ततश्च सामानाधिकरण्यस्य (अभेदस्य) नानुपपत्तिः इति।

न च आख्यातार्थकृतेः प्रथमान्तार्थे एवान्वयव्युत्पत्तेः तस्याः कृदर्थकृतौ नान्वय इति वाच्यम्। न पचति चैत्र इत्यत्र आख्यातार्थकृतेः प्रतियोगितासम्बन्धेन नञर्थे अन्वयात् तत्र यथा तद्व्युत्पत्तेः सङ्कोचः तथा कृदाख्यातार्थयोः विषयेऽपि सङ्कोचस्य शक्यत्वात्। तथा च सामानाधिकरण्येन कृत्प्रत्ययार्थकृतौ आख्यातार्थकृतेः अन्वये बाधकाभावः।

अथ तादृशबोधस्य अनुभवविरुद्धत्वात्याह – अस्तु वेति। ननु कृतां कृतौ शक्तेरप्रसिद्ध्या कथं लक्षणा इति चेदाह – केवलपक्तेति। प्रथमान्तपदासन्निधाने केवलं पचती-

---

[1] किरणावली – पु.130 गायकाड् ओरियण्टल् सिरीस् 154 - 1971

[2] किरणावली(गुण)प्रकाशः – प्रथमभागः –पु. 71 – government press – Allahabad – 1933.

त्यादिप्रयोगे यथा पाककृतेरेव प्रतीतिः तथा देवदत्तादिसमानाधिकरणपदाभावे केवलं पक्तेति प्रयोगे पाककृतेः प्रतीतिस्सिद्ध्यत्येव कृतां कृतिवाच्यकत्वपक्षे। तथा च कृतेः बोधस्य क्वचित् सिद्धत्वात् समानाधिकरणपदप्रयोगे लक्षणायां बाधकं नास्तीति भावः।

< 20 > (पु.78-80)

न्यायनये सर्वत्रेति। अन्वयानुपपत्तेः तात्पर्यानुपपत्तेर्वा लक्षणाबीजत्वेन तदभावे लक्षणा न भवतीति तेषां मतम्। तथा च पचतीति केवलतिङन्तप्रयोगे अन्वयानुपपत्ते-रभावात् तात्पर्यस्य च ज्ञातुमशक्यतया तदनुपपत्तेरप्यभावात् लक्षणा न भवति। मीमांसक-मते तु कर्तृकर्मणोः निरूढलक्ष्यतेति तन्मते निमित्ताभावेऽपि लक्षणा भवितुमर्हति। तथा चानुपपत्तिमूलिका लक्षणा नैयायिकानामेवेति भावः।

मीमांसकास्त्विति। भाट्टमीमांसका इत्यर्थः। तेषां मते फलं धात्वर्थः, भावना कालः संख्या च आख्यातार्थः। तत्र भावना प्रधाना। भावप्रधानमाख्यातमिति निरुक्तात्। कर्तृकर्मणी तु न आख्यातशक्ये। अपितु आक्षेपलभ्ये। आक्षेपश्च अर्थापत्तिः। यद्विना यद् अनुपपन्नं तत्तेनाक्षिप्यत इति आश्रयं विना भावनायाः असम्भवात् भावनया तयोराक्षेपः। आक्षेपलभ्ययोः तयोः कर्तृकर्मणोः आख्यातार्थसंख्यान्वयः।

देवदत्तः पचतीत्यस्य च देवदत्तैककर्तृका विक्लित्त्यनुकूला भावनेति भावना-मुख्यविशेष्कः बोधः। कृत्प्रत्ययस्थले तु कर्त्रादिकमेव प्रत्ययार्थः। भावना तु आक्षेप-लभ्या। सत्त्वप्रधानानि नामानीति निरुक्तात्। आख्यातस्थले भावनायाः कृत्स्थले कर्तृ-कर्मणोश्च शक्यत्वे प्राधान्येनावगतिरेव प्रमाणम्। अन्यायोनेकार्थत्वमिति न्यायात् अनन्यलभ्यः शब्दार्थ इति न्यायाच्च अर्थापत्तिरूपप्रमाणान्तरलभ्येषु कर्तृकर्म (आख्यातस्थले) भावना (कृत्स्थले)सु न शक्तिः।

न चाख्याते कर्तृकर्मणोरवाच्यत्वे अभिधानव्यवस्थानापत्तिः। "अनभिहित" (पा.2-3-1) सूत्रस्थानभिहितपदस्य बोधाविषयत्वार्थकत्वात्। बोधश्च शक्त्या आक्षेपाद्वा। प्रधानतया बोधविषयत्वस्यैव शक्यार्थतानियामकत्वात् नाख्याते भावनायाः, न वा कृत्सु कर्तृकर्मणोराक्षेपलभ्यत्वम्। तथासति प्राधान्याभावप्रसङ्गात्। इति तन्मतसंक्षेपः। अयं च ग्रन्थः तन्त्रवार्तिकस्थे भावार्थाधिकरणे[3] स्थितस्य अनुवादः।

---

[3]भावार्थाधिकरणम्(मी.2-1-1)

< 21 > (पृ.83-85)

यथाकथंचिदिति। अस्यायं भावः – अभिधानशब्दः लोके शक्तिपर्यायतयैव प्रसिद्धः। तादृशः प्रसिद्धोऽर्थः परित्यज्यते मीमांसकैः। तथा च शब्दप्रमाणं परित्यज्य प्रमाणान्तरमाश्रित्य ज्ञानविषयत्वरूपोऽर्थः स्वीक्रियते। तदेव सूच्यते यथाकथंचिदित्यनेन। भावनाक्षेप इति। भावनया आक्षेप इत्यर्थः। भावना च आश्रयं विनाऽनुपपन्ना स्वाश्रयमाक्षिपतीति मीमांसकानां राद्धान्तः। तन्मतमेवाश्रित्य तन्मते दोषमुद्भावयति - कर्मप्रत्ययेऽपीति। तैः कर्मणि प्रयोगेऽपि आख्यातेन भावनायाः वाच्यत्वमभ्युपेयते। अन्यथा कारकाणामनन्वयापत्तेः। तथा च तत्रापि आक्षेपेण कर्तृबोधे कर्तुरभिहितत्वात् रामेण गम्यत इत्यत्र कर्तुः तृतीयानापत्तिरिति। वस्तुतः अयं च दोषः आपाततः यत्र यत्र भावनाप्रतीतिः तत्र तत्र कर्तुराक्षेप इत्यभ्युपगम्य। शबादिविकरणानां द्योतकत्वमाश्रित्य कर्तरि प्रयोगे भावनया कर्तुः, कर्मणि प्रयोगे च कर्मण एवाक्षेपात् कर्मणि प्रयोगे कर्तुरनभिधानात् तृतीया भवत्येव। उक्तं च कर्त्रधिकरणे वार्तिके[4] –

"यस्यापि कारकं वाच्यं तस्याप्येतत् प्रसज्यते।
नचोभयाश्रितं दोषमेकश्चोद्यो विचारयन्॥
यल्लक्षणो हि भवतः कर्ता सन्नभिधीयते।
कर्म वा तादृशस्यैव यत्र संख्याभिधीयते॥

तद्यदि मम कर्मोत्पन्नलकारेष्वपि कर्तुरेव संख्या प्राप्नोति, तवापि तर्हि तत्र कर्त्रभिधानेन भवितव्यम्। अथ तत्रैव कथंचित् कर्तुरनभिधानं, तद्वन्ममापि संख्यानभिधानमिति अदोषः। तदेतदवश्यमावाभ्यामेव परिहर्तव्यम्" इति। यतः अयं दोषः उभयोः समः, अतः नैकःपर्यनुयोक्तव्यः। तत्र समाधानमपि उभयोः समम्।

इत एवारुचेराह- आख्याते शक्त्येत्यादि। आख्याते शक्त्या कर्तुर्बोधः भावनायाश्च आक्षेपात् , तथा कृत् प्रत्यये शक्त्या कृतेः (भावनायाः)बोधः, कर्तुश्च आक्षेपात् इति वैपरीत्यमित्यर्थः। वाच्यत्वे च प्रदर्शितां विनिगमनामनुवदति- यत्त्विति। भावप्रधानमाख्यातमिति निरुक्तबलात् आख्याते भावनायाः प्राधान्यं, सत्त्वप्रधानानि नामानि इति निरुक्तबलात् कृत्सु आश्रयस्य च प्राधान्यमित्यवगम्यते। यः प्रधानतया अवगम्यते स शक्यार्थः, यश्चाप्रधानः स आक्षेपलभ्य इति विनिगमना अस्त्येव। तन्निराकरोति- आक्षेपलभ्यस्यापीति। सर्वत्र प्रधानस्य वाच्यत्वमन्यस्याक्षेपलभ्यत्वमिति यदि अनुस्रियते तर्हि

[4] मीमांसादर्शनं सतन्त्रवार्तिकम् – कर्त्रधिकरणम्(3-4-4-13) – चतुर्थभागः – पृ 482-483

तत् प्रमाणं भवितुमर्हति। परन्तु वस्तुस्थितिः न तथा। जात्या आक्षेपलभ्यस्यापि तैः व्यक्तिविशेषस्य प्राधान्याभ्युपगमात्। घटादिशब्दानां जातावेव शक्तिः, व्यक्तेस्तु आक्षेपलभ्यत्वमिति मीमांसकानां सिद्धान्तः। घटमानयेत्यादिषु घटशब्दवाच्यजातेः साक्षादानयनक्रियाकर्मत्वानापत्त्या तदाक्षिप्तव्यक्तौ द्वितीयार्थकर्मत्वान्वयः स्वीक्रियते। प्रत्ययानां स्वप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेःसत्त्वेऽपि प्रकृत्यर्थस्य साक्षात् प्रत्ययार्थान्वयायोग्यत्वात् आक्षिप्तव्यक्तिं विशेष्यीकृत्य तद्वारान्वयः अभ्युपगम्यते। तथा च प्रकृत्यर्थविशेष्येणैव प्रत्ययार्थान्वयात् आक्षिप्तव्यक्तेः प्रकृत्यर्थविशेष्यत्वं प्राधान्यं च स्वीक्रियते। तथा चात्र आक्षिप्तस्यापि प्राधान्याभ्युपगमात् सर्वत्र प्रधानतयावगम्यमानस्य शब्दवाच्यत्वमिति मीमांसकेन वक्तुं न शक्यमिति।प्रधानस्य शब्दवाच्यत्वे विनिगमनाविरह इति भावः। तदेवोपपादयति- अन्यथेत्यादिना।

आकृत्यधिकरणमिति। गवादिशब्दानां गोत्वजातिविशिष्टव्यक्तिबोधकत्वेन "नागृहीतविशेषणा विशिष्टबुद्धि" रिति न्यायेन विशिष्टबुद्धेः विशेष्यज्ञानापेक्षित्वात् प्रथमं विशेषणस्य गोत्वस्य शब्दवाच्यत्वमभ्युपेयम्। तथा च जात्या आक्षेपादिना व्यक्तिबोधात् "अनन्यलभ्यः शब्दार्थः" इति न्यायेन व्यक्तेरन्यप्रमाणलभ्यत्वात् तस्याः शब्दार्थत्वं नेति बोधकं पूर्वमीमांसाशास्त्रीयमधिकरणम् आकृत्यधिकरणमि(मी.1.3.33.)ति प्रसिद्धम्। "आकृतिस्तु क्रियार्थत्वात्" (मी.1.3.9.33) इति तत्र सिद्धान्तसूत्रम्। तत्र हि – आलम्भन-प्रोक्षण-विशसनादिप्रयोगचोदनायाः व्यक्तिपक्षे भावात् , आकृतिपक्षे चाभावात् ब्राह्मणो न हन्तव्यः, सुरा न पेया इत्यादिप्रतिषेधचोदनायाश्च व्यक्तिपक्षे एव सम्भवात् , "देवदत्त गामभ्याजे" त्येवमादिलौकिकव्यवहारचोदनायाश्चोपपत्तेः व्यक्तिः शब्दार्थः। संख्याकारकोपपत्तेश्च इति पूर्वपक्षः।

तत्र सिद्धान्तः – आकृतिः पदार्थः। श्येन चितं चिन्वीत इति श्रवणात्। अस्य हि वाक्यस्य श्येनमिव चितम् अग्निस्थलं चयनेन निर्वर्तयेत् इति वाक्यार्थः। ततश्च यया कयाचित् श्येनव्यक्त्या सदृशस्याग्नेः चेतुमशक्यत्वात्, सर्वव्यक्तिसादृश्यासम्भवात्, अतीतानागतव्यक्तिसादृश्यानुपपत्तेश्च श्येनाकृतिसादृश्यसम्पत्तिसम्भवाच्च आकृतिः शब्दार्थ इति निश्चीयते। गवादिशब्दाः अपि जातिवचना एव।

पूर्वं सामान्यविज्ञानात् चित्रबुद्धेरनुद्भवात्।
गामानयेति वाक्याच्च यथारुचि परिग्रहात्॥ [5]

---

[5]मीमांसादर्शनं सतन्त्रवार्तिकम् – आकृत्यधिकरणम्(1-3-9) प्रथमभागः – पृ 684

गोशब्दोच्चारणे हि पूर्वमेवागृहीतासु व्यक्तिषु सामान्यं प्रतीयते। तदाकारज्ञानोत्पत्तेः पश्चात् व्यक्तयः प्रतीयन्ते। अतश्चाकृतिप्रत्ययस्य निमित्तान्तराभावात् व्यक्तिप्रत्यये च पूर्वं प्रतीतसामान्यनिमित्तत्वात् आकृतिः शब्दार्थ इति विज्ञायते। यदि च व्यक्तयोऽभिधेयाः स्युः ततः तासां चित्रखण्डमुण्डादिविशेषस्वरूपग्रहणात् शब्दोच्चारणे विचित्रा बुद्धिः स्यात्। तथा न, अपि तु एकाकारैव उत्पद्यते। ततश्च आकृतिः शब्दार्थ इति निश्चीयते। गामानयेति चोदितेऽर्थप्रकरणाभावे यां काञ्चित् सामान्ययुक्तां व्यक्तिमानयति, न सर्वाम्, न विशिष्टाम्। यदि च व्यक्तेरेवाभिधेयत्वं ततः सर्वासामानयनप्रसङ्गः। शब्देन सर्वव्यक्त्यभिधानमपि न युक्तम्। अनेकवाचकशक्तिकल्पनाप्रसङ्गात्। शब्दार्थसम्बन्धस्य अनित्यतापत्तेः। सम्बन्धाग्रहणे व्यवहारानापत्तेः। अतः आकृतिरेव शब्दार्थ इति॥ विस्तरस्तु तन्त्रवार्तिकादिभ्यो ज्ञेयः।

ननु तत्रापि प्राधान्यात् व्यक्तिरेव वाच्याऽस्तु इति चेत् महता प्रयासेन जातेः वाच्यत्व-साधकं आकृत्यधिकरणमेव व्यर्थं स्यात्। तदाह – दत्तजलाञ्जलि स्यात् इति। दत्तः जलाञ्जलिः यस्मै इति बहुव्रीहिः। विचारः सर्वोऽपि व्यर्थः स्यादिति भावः।

स्वस्वरूपनिरूपकत्वेन गुणत्वमिति। कर्तुः स्वरूपं भावनानिरूप्यम्। तथा च भावनानिरूपकं, कर्तृत्वं निरूप्यम्। निरूप्यनिरूपकयोर्मध्ये निरूपकं विशेषणम्। निरूप्यं विशेष्यम्। अतः कृत्प्रत्ययस्थले भावना विशेषणं, कर्ता विशेष्यः, ततश्च कर्तुः प्राधान्यं तत्र अक्षतम्। जातिव्यक्त्योस्तु जातिः परिच्छेदिका, व्यक्तिः परिच्छेद्या। ततश्च परिच्छेद्य-परिच्छेदकयोर्मध्ये परिच्छेद्यस्य प्राधान्यात् आक्षिप्ताया अपि व्यक्तेः प्राधान्यम् इति अस्य ग्रन्थस्य तात्पर्यम्। तन्निराकरोति - एतादृशविशेषस्य अप्रयोजकत्वादिति। परिच्छेदकस्य अप्रधानत्वं परिच्छेद्यस्य प्रधानत्वमिति चेत् आख्यातस्थलेऽपि भावनायाः जातिवत् परिच्छेदकत्वात् व्यक्तेरिव कर्तुरेव प्राधान्यापत्तिः। तदाह- व्यक्तिवद्विशेष्यत्वापत्तेश्चेति। अतः भवता एवमपि वक्तुं न शक्यमिति भावः।
धन्धनम् । प्रतारणम्।

< 22 > (पृ.87-89)

अथ भावनयेत्यारभ्य - त्वयाप्येवं स्वीकर्तव्यत्वाच्चेत्यन्तग्रन्थस्य अयमाशयः। मीमांसकः स्वमितमित्थं पुनः समर्थयितुं यतते – भावनयैव कर्तुः आक्षेपः करणीयः। न तु कर्त्रा भावनायाः आक्षेपः। तथा सति कर्मणि प्रयोगे भावनायाः बोधो न स्यात्। यदि च भावना आख्यातार्थः तर्हि कर्तरि प्रयोगे कर्तुः कर्मणि च कर्मणः आक्षेपो भवितुमर्हति।

अत्र वैयाकरणः पर्यनुङ्क्ते - आख्यातार्थतया कर्तृकर्मणोः स्वीकारेऽपि उभाभ्यामुभयत्र भावना आक्षेपेण लब्धुं शक्यैव। अतः नेयं युक्तिः भावनावाच्यत्वसाधिका। मीमांसकः पुनः स्वमतसमर्थनार्थं प्रयतते - यदि च कर्तृकर्मणी आख्यातार्थः, तर्हि उभाभ्यां भावनायाः आक्षेपः कर्तव्यः। भावना आख्यातार्थश्चेत् एकयैव द्वयोराक्षेप इति लाघवम् इति। वैयाकरणः पुनः तत्र समाधत्ते – नात्र भवत्पक्षे लाघवम्। भावनया कर्तृकर्मणोः उभयोः आक्षेप्यत्वस्य भवता स्वीकर्तव्यत्वात्। कर्तृकर्मणोः आक्षेपकत्वं वा, तयोः आक्षेप्यत्वं वेति पक्षद्वयं समानम्। अतः न भवत्पक्षे लाघवम्। किं च भवता कर्मकर्तृवाचककृत्सु कर्तृ-कर्मभ्यां भावनायाः आक्षेप्यत्वं स्वीकृतमेव। तथा आख्यातेऽपि भवतु। उभयत्र (आख्याते, कृत्सु च) एका रीतिश्चेति लाघवम्। इति। अयं ग्रन्थः मीमांसकवैयाकरणयोः संवादरूपः॥ नात्र नैयायिकसम्बन्धः किञ्चिदपि।

अनन्यलभ्यत्वादेश्चोभयत्र तुल्यत्वात् इति। अनन्यलभ्यत्वं भावनातदाश्रययोः तुल्यम्। आदिशब्देन आक्षेपलभ्यत्वं वा उभयत्र तुल्यम्। एकस्य पदार्थत्वे निश्चिते अपरस्य आक्षेपलभ्यत्वं स्वयं सिध्यतीति भावः। कृत्प्रत्ययस्य कर्तरि शक्तिपरिच्छेदकं "कर्तरि कृत्"(पा. 3-4-67) इति सूत्रं यथा तथा लकारस्य कर्तरि शक्तिपरिच्छेदकं "लः कर्मणी"(पा. 3-4-69)ति सूत्रम्। तत्रापि "कर्तरि कृदि"(पा. 3-4-67)ति सूत्रादेव कर्तरीत्यनुवृत्तेः। अतः कर्तरीति पदमुभयत्र सममिति, तस्य कर्त्रर्थकत्वे कर्तुः पदार्थत्वं, भावनायाः आक्षेपलभ्यत्वम्। तस्य कर्तृपदस्य कर्तृत्वपरत्वे भावनायाः पदार्थत्वं, कर्तुः आक्षेपलभ्यत्वम्। एतदुभयत्र लकारेषु कृत्सु च समानमित्यर्थः।

कर्त्रधिकरणे(मी.3.4.4.) शाबरभाष्याद्युक्तमनुवदति – अथ लः कर्मणीति। तत्र हि –" विधेर्वा संयोगान्तरात् " (3.4.4.-13) इति सूत्रस्थमिदं शाबरभाष्यम् – "ननु कर्तरि कर्मणि च लकारः श्रूयते। नासौ कर्तरि कर्मणि वा श्रूयते। किन्त्वेकस्मिन्नेकवचनं द्वयो-र्द्विवचनं बहुषु बहुवचनमिति तत्रापरं वचनम्। तत्रैवमभिसम्बन्धः क्रियते - एकस्मिन् कर्तरि द्वयोः कर्त्रोः बहुषु कर्तृषु इति। एवं कर्मण्येकत्वादिसम्बन्धः। तत्र नैवं भवति कर्तरि भवति एकस्मिंश्चेति। कथं तर्हि कर्तरि एकस्मिन् एकवचनं – कर्तुरेकत्वे इत्यर्थः। एवं द्वित्वे बहुत्वे कर्मणि च। एवं वर्ण्यमाने लौकिकन्यायानुगतः सूत्रार्थो वर्णितो भवति। सूत्राक्षराणि च न्यायानुगतानि भवन्ति। आगमो[6]ऽपि चायमेव – यदेकत्वादयो विभक्त्यर्थाः, तदा कर्मादयो विशेषणत्वेनेति। नन्वेतदप्यस्ति। यदा कर्मादयो विभक्त्यर्थाः तदैकत्वादयो

[6] आगमः - व्याकरणम्

विशेषणत्वेनेति। उच्यते। अर्थप्राप्ता[7] हि कर्मादयस्ते न भवन्ति शब्दस्याभिधेयभूताः। न त्वेकत्वादयोऽर्थात्प्राप्नुवन्ति। तेन ते शब्दार्थभूताः। तस्माद्यद्यपि विशेषणमेकत्वादयः तथापि विशेषणमेवाभिधीयते। यथा "हिरण्यमालिनः ऋत्विजः प्रचरन्ति" इति हिरण्यमालित्वं विशेषणत्वेन तथापि तदेव विधीयते। तस्मात् कर्तुरेकत्वं शब्दार्थो न कर्ता। ननु कर्तुरेकत्वादेकवचनं कर्तुर्द्वित्वात् द्विवचनं कर्तुर्बहुत्वाद्बहुवचनम्। तेन नूनं कर्ता शब्दार्थ इति गम्यते। उच्यते। नैतदनुमानाच्छक्यम्। कर्ता अनुष्ठेयक्रियावगमादेव अवगम्यत इति प्रत्यक्षम्। तस्मात् केनचिन्न बाध्यते। एकवचननिर्देशे कर्त्रैकत्वं गम्यते। द्विवचननिर्देशे कर्तुर्द्वित्वं,बहुवचननिर्देशे कर्तुर्बहुत्वम्। तदपि प्रत्यक्षम्। कतरदत्रानुमानं बाधितुमर्हतीति यथाऽऽकृति वचने शब्दे द्विवचने द्रव्यभेदोऽगम्यते, एकवचने द्रव्यैकत्वं तद्वदिहापि द्रष्टव्यम्।[8] द्वाभ्यामपि वाक्यकारभाष्यकाराभ्यां बहुवचनवार्तिकेऽनभिहितवार्तिके च द्वावपि कर्मत्वाद्येकत्वादिवाच्यत्वपक्षौ दूरमनुसृत्यान्ते निर्दोषतयाऽवधारितम्। कर्मादिविशिष्टा एकत्वादयो विभक्त्यर्थाः। इतरथा येषु केषुचित् बहुवचनं प्राप्नोति। अनभिहिताधिकारश्च न कर्तव्यः स्यात्। एतद्वार्तिकोपसंहारे स्पष्टं भाष्यकारेणोक्तम् – "एकत्वादिषु विभक्त्यर्थेषु कर्तव्योऽनभिहिताधिकारः कर्मादिषु त्वनर्थः" इति।

समाधत्ते - द्विवचनादिसंज्ञेत्यादिना। द्विवचनादिसंज्ञायाः तिबाद्यादेशनिष्ठत्वेन "द्व्येकयो" (पा. 1-4-22)रित्यस्य तिबादिविधिना सह एकवाक्यता पदैकवाक्यता। सा च वाक्यार्थावगतेः पूर्वमेव। तिबादिविधेः लकारविधेश्च वाक्यैकवाक्यता। सा च द्वयोर्वाक्ययोः पृथक् पृथगर्थबोधे जाते, ततः परं भवति। वाक्यैकवाक्यतायां पूर्वं द्वयोः वाक्ययोः अर्थबोधः पृथक् पृथक् अपेक्षितः। तथा च "लःकर्मणी" (पा. 3-4-69)त्यस्य प्राथमिको बोधः लकारः केवलकर्तृकर्मादिवाचक इत्येव। न तु कर्तुरेकत्वे इत्यादिरूपः इति भावः। तदा तत्सूत्रे एकवचनादिपदाभावात्। "लः कर्मणी" (पा. 3-4-69)ति लविधिलभ्यो यो लकारः तदनूद्य "द्व्येकयो" (पा. 1-4-22)रित्यादिना आदेशाः विधीयन्ते। कर्तृग्रहणं लविधावस्ति। नत्वादेशविधौ। अतः "लःकर्मणी" (पा. 3-4-69)ति सूत्रेण लकारार्थतया बोधितः कर्ता द्विवचनादिसंज्ञाविनिर्मुक्तः एव। अत्र विचारे सर्वत्र कर्तृग्रहणं कर्तृकर्मणोरुपलक्षणम्।

स्फुटमन्यन्मनोरमायाम् इति। "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा. 3.4.69) इति सूत्रे मनोरमायाम् अयं विचारः अत्र नैयायिकाः इत्यारभ्य विहितः।

---

[7] अर्थप्राप्ताः – प्रकारान्तरेण आक्षेपादिना प्राप्ता इत्यर्थः।

[8]सतन्त्रवार्तिकं मीमांसादर्शनम् - (P.475-476-चतुर्थो भागः)

स एवात्र यथावन्निर्दिश्यते। यतो हि तत्रत्य एव विषयःसर्वोऽपि कौण्डभट्टेन अनूदितः। तथा हि - अत्र नैयायिकाः। लकाराणां कृतावेव शक्तिः लाघवात्, न कर्तरि। कृतिमतः कर्तृत्वेन तत्र शक्तौ गौरवात्। प्रथमान्तपदेनैव तल्लाभाच्च। देवदत्तः पचतीत्यत्र देवदत्तः विशेष्यो, यत्नो विशेषणम्, आश्रयत्वं तु संसर्गः। इति। तन्न। पचन्तं देवदत्तं पश्य, पचते देवदत्ताय देहि इत्यादौ शतृशानजादीनामपि तिबादिवत् लादेशत्वाविशेषेण तेभ्यः कृतिमात्रबोधा-पत्तेः। न चेष्टापत्तिः। तत्राभेदसंसर्गस्यैव वक्तव्यतया कर्तृवाचकत्वस्यैव त्वयाभ्युपगमात्। नामार्थयोरभेदस्यैव संसर्गत्वात्।

नन्वत एव गौरवप्रामाणिकतया शत्रादीनां कर्तरि शक्तिः, तिबादीनां कृतावेवेति वैषम्यमिति चेत् – मैवम्। स्थान्येव वाचको लाघवान्न त्वादेशो गौरवादिति हि तव मतम्। अत एव राम इत्यादौ सुत्वेनैकत्वे शक्तिरित्यादिस्त्वदीयानां व्यवहारः। एवं स्थिते तिबादीनां शत्रादीनां च स्मारकतया लिपिस्थानीयत्वं, बोधकस्तु लकार एव। स च शत्राद्यन्ते कर्तरि शक्त इति स्थिते तिङन्ते कथं कृतिं बोधयेत्। अन्यायश्चानेकार्थत्वम् इति न्यायात्। अथ वैयाकरणमतमाश्रित्य सर्वत्रादेशा वाचका इति ब्रूषे, तर्हि घटं, घटेन, हरेऽव, विष्णोऽवेत्यादिषु सर्वे सर्वपदादेशा इति न्यायेन पदस्फोटो वाक्यस्फोटश्च सिद्ध्येदिति महत्तवानिष्टम्। [9](ननु प्रत्येकं पदानामवधृतशक्तिकानां समुदायेन यथाव्युत्पत्तिस्थितानां तदर्थोपस्थापनद्वारा वाक्यार्थबोधसम्भवात् न तयोरापत्तिरिति चेदाह -) किं च "कर्तरि कृत्" (पा. 3.4.67) इति कर्तृग्रहणं तदेव "लःकर्मणि" (पा. 3-4-69) इति सूत्रे चकारेणानुकृष्यते, तत्कथं ण्वुलादीनां लकाराणां च शक्तौ वैलक्षण्यम्। न च नामार्थयो-रभेदः संसर्गः एव ण्वुलादौ कर्तुर्वाच्यत्वे बीजमिति वाच्यम्। पचतिरूपं, पचतिकल्पं देवदत्तः इत्याद्यनुरोधेन तिङ्क्ष्वपि कर्तुरेव वाच्यत्वौचित्यात्।

ननु तिङ्क्त्ययो न नामेति चेत् अकोऽपि नेति तुल्यम्। अकान्तं नामेति चेत् रूपबाद्यन्तं नामेति तुल्यम्। किञ्च "युष्मदि समानाधिकरणे स्थानिन्यपि मध्यमः"(पा. 1-4-105) "अस्मद्युत्तमः" (पा.1-4-107 ) इति सामानाधिकरण्यप्रयुक्ता पुरुष-व्यवस्था अभिहिते कर्तरि प्रथमा (म.भा.) इत्यादिकं च कर्तृवाच्यतायां प्रमाणम्। यत्तु "अनभिहिते" (पा. 2-3-1 )इत्यस्यानभिहितसंख्याके इत्यर्थवर्णनम् तन्न। कृत्तद्धित-समासेषु संख्याभिधानस्याप्रसिद्धत्वात्। अपि च धातूपात्तव्यापाराश्रयः कर्ता। तदाश्रय-मात्रं कृतां लकाराणां चार्थो न तु व्यापारोऽपि, तस्य धातुनैव लभ्यत्वात्। अत एव कर्ता

---

[9] ( ) अत्र एतत्प्रकोष्ठान्तर्गतः ग्रन्थः बृहच्छब्दरत्नस्थः।

कारक इत्यादावपि नानन्वयः। (आदिना करोति, ज्ञाता इत्यादिर्बोध्यः। एवं चात्र आश्रयपरत्वे सर्वत्रैकरूपतैवोचिता। अत एव कर्तृग्रहणस्य न नानार्थता) रथो गच्छतीत्यादावपि न कदाचिदनुपपत्तिः। अस्मन्मते धातूपात्तव्यापाराश्रयत्वस्य रथेऽपि सत्त्वात्। तव तु अत्र यत्नं त्यक्त्वा व्यापारे लक्षणायाः कर्तव्यतापत्तेः। (न च व्यापारे लक्षणेति वाच्यम्। शक्यतावच्छेदकलक्ष्यतावच्छेदकयोः वैषम्ये बीजाभावेन, व्यापारत्वस्य गुरुत्वेन लक्षणायाः वक्तुमशक्यत्वात्। भावे लविधानस्य वैयर्थ्यापत्तेश्च। फलं द्वितीयार्थ इति सिद्धान्तहान्यापत्तेश्च। देवदत्तो गच्छतीत्यादाविव क्लृप्तधातुशक्त्यैवोपपत्तेश्च। रथो ग्रामं गच्छतीत्यादौ प्रकृतधातूपात्तव्यापारजन्यप्रकृतधातूपात्तफलाश्रयत्वाभावेन कर्मतानापत्तेश्च। रथस्य कर्तृत्वानापत्तेश्च। आख्यातोपात्तव्यापाराश्रयत्वं कर्तृत्वमिति न युक्तम्। आमन्ते कृति च दोषापत्तेः। लकारविधितिबादिविध्यादौ अन्योन्याश्रयापत्तेश्च। रथेन ग्रामो गम्यते इत्यादावनन्वयापत्तेश्च। न च गमेः संयोगार्थत्वम्। आख्यातस्याश्रयपरत्वमिति वाच्यम्। पूर्वोक्तदोषापत्तेः। लविधौ कर्मपदस्य धर्मिपरत्वे साहचर्यात् कर्तृपदस्यापि तदापत्तेश्च। व्यापारावबोधानापत्तेश्च। किं च आख्यातप्रत्ययेन क्वचित् कृतेः, क्वचिदाश्रयस्य, क्वचिद्व्यापारस्य, धातुना क्वचित् कृतेः, क्वचित् प्रत्ययेन बोध इत्यर्थापत्तौ अनेकक्लिष्टकार्यकारणभावापत्तिः। अपि चाख्यातार्थसंख्याप्रकारकबोधं प्रतीतराविशेषणीभूतप्रथमान्तपदजन्योपस्थितेः कारणत्वं वाच्यम्। तच्च गुरुभूतम्। अनेकपदघटितत्वात्।) एवं स्थितौ कृतौ शक्तिरित्यस्योक्तिसम्भव एव नास्ति। कृतेरपि व्यापारविशेषतया प्रायेण धातुत एव लाभात्। क्वचित् त्वयापि तस्यास्त्यक्तव्यत्वात्। एतेन कर्त्रधिकरणे आख्यातवाच्यत्वं कर्तुर्निरस्य जञ्जभ्यमानाधिकरणे शानजर्थत्वं स्वीकुर्वन्तो मीमांसकाः प्रत्युक्ताः। (एतेन कर्तुराख्यातार्थत्वे "नानृतं वदेदि"ति निषेधस्य क्रत्वर्थत्वं न सिद्ध्येत्। श्रुत्या पुरुषार्थत्वप्रसङ्गादिति नव्यमीमांसको(पार्थसारथिमिश्रो)क्तमपास्तम्। कर्त्रवाच्यत्वे उक्तसिद्धान्तः, उक्तसिद्धान्तानुरोधेन तदवाच्यत्वम् इति परस्पराश्रयग्रस्तत्वाच्च। अत एव अनृतवदनिषेधस्य क्रतुयुक्तपुरुषार्थता। यथा जञ्जभ्यमानेत्यस्य पुरुषसंस्कारमुखत्वेन क्रत्वर्थत्वमिति मीमांसकैकदेशिनः। किञ्च कर्तुरप्राधान्यान्न दोषसम्भावना। यदप्युक्तं कृतौ आख्यातस्य विशेष्यानुरोधाच्छक्तिः। आश्रयस्य त्वाक्षेपाल्लाभः। "लः कर्मणी" (पा. 3-4-69)ति सूत्रं लाक्षणिकानुशासनमिति। तन्न। त्वद्बोधस्य त्वदीयव्युत्पत्त्यनुसारित्वात् पदार्थाव्यवस्थापकत्वेन विशेष्यत्वे मानाभावात्। विशेष्यस्य शक्यत्वमेव इत्यङ्गीकारे आकृत्यधिकरणस्य दत्तजलाञ्जलित्वापत्तेश्च। व्यक्तेर्विशेष्यतया भानात्। शक्यार्थानुशासनाकरणे बीजानापत्तेश्च। कर्त्रादिकृदन्तमहासंज्ञाकरणेन कृत्तिङोः तुल्यत्वबोधनाच्च। भावनाया एवाक्षेपाल्लाभ इत्यस्य

वक्तुं शक्यत्वाच्च। शाब्दयामीत्यनुभवविरोधापत्तेश्च। किञ्च करोतीत्यादीनां साधुत्वार्थं सूत्रव्यापारस्यावश्यकत्वे सर्वत्रैकरूपतैव युक्तेत्याद्यवोचाम।) यत्तु तैरुक्तं शानजंशे "कर्तरि कृत्" (3.4.67) इति शक्तिग्राहकमस्तीति तन्न। कृद्वाक्यशेषो ह्ययमनिर्दिष्टार्थेषु ण्वुलादिष्वेवोपतिष्ठते न तु शत्रादिषु, अन्यार्थेनैव तेषां निराकाङ्क्षत्वात्। "आकाङ्क्षितविधानं ज्याय" इति न्यायात्। तेन शय्यमाने आस्यमाने चायं गत इत्यादौ भावे क्रियमाण इत्यादौ कर्मणि च शानचो दौर्लभ्यापत्तेश्च। किञ्च "कर्तरि कृत्" (पा. 3-4-67)इति यत् कर्तृग्रहणं तस्यैव "लः कर्मणि" (पा. 3-4-69) इत्यत्रानुवृत्तेः कृतां तिङां च वैलक्षण्यं दुर्लभमित्यवोचाम।

यत्तु भट्टपादा ऊचुः – कर्तरि यदेकत्वं तत्र तिबित्यादिक्रमेण "लः कर्मणि" (पा. 3-4-69) इत्यस्य "द्व्येकयोः" (पा. 1-4-22) इत्यादेश्चैकवाक्यतया व्याख्यानान्न कर्तुर्वाच्यता सूत्रादायातीति तच्चिन्त्यम्। द्विवचनादिसंज्ञा ह्यादेशनिष्ठा। ततश्च तद्विधिना "द्व्येकयोः"(पा. 1-4-22) इत्यस्य एकवाक्यतास्तु। न च तत्र कर्तरीत्यस्ति यद् द्वित्वादिविशेषणतया कथञ्चिन्नीयेत। ननु लविधिलभ्यलकारानुवादेन आदेशविधेः प्रवृत्तत्वात्। तथा च लविधौ श्रूयमाणकर्तृग्रहणं कथं संख्यां विशिनष्टु। न हि तत्र संख्योपस्थापकमस्ति, लकारस्य द्विवचनादिसंज्ञाविनिर्मुक्तत्वात्।

स्यादेतत्। "लः कर्मणि"(पा. 3-4-69) इति सूत्रे ल इति लङ्लटोरकारानुबन्धयोः न सामान्यग्रहणं, किं तूत्सृष्टानुबन्धलकारसामान्यग्रहणमिति तावन्निर्विवादम्। तत्र ल इति जसन्तं मा भूत्। किन्तु ङसन्तमस्तु। "लः परस्मैपदम्"(पा.1-4-99) इतिवत्। आदेशापेक्षा चेयं षष्ठी। लस्य यः आदेशः स कर्मणि चेत्यादि(सूत्रार्थः)। केन विहितस्य लस्येहानुवाद इति चेत् "वर्तमाने लट्" (पा. 3-2-123) इत्यादिभिरिति गृहाण। एवं च कर्तरि यदेकत्वमिति भट्टपादोक्तयोजनिका निर्बाधैव चेन्मैवम्। ल इत्यस्य षष्ठ्यन्तत्वे आदेशानामेवार्थ उक्तः स्यात् सोऽपि तिबादीनामेव, न तु शत्रादीनाम्। तेषां द्विवचनादिसंज्ञाविरहात्। "द्व्येकयो"(पा. 1-4-22) रित्यादिनाऽस्यैकवाक्यतायास्त्वयोक्तत्वात्। न च त्वदुक्तरीत्या "कर्तरि कृत्" (पा. 3-4-67) इत्यनेन निर्वाहः। भावे कर्मणि शानचो दुर्लभत्वापत्तेरुक्तत्वात्। न च शानज्विधिना सह आत्मनेपदव्यवस्थापकमेकवाक्यतया "भावकर्मणोः" (पा. 1-3-13) इत्यनेनेष्टसिद्धिः। सकर्मकादपि भावे शानजापत्तेः। किं च आम्-विषयस्य लकारस्य अर्थो न निर्दिष्टः स्यात् , तस्य हि लुगादेशः। न चाभावरूपस्य द्विवचनादिसंज्ञाविनिर्मुक्तस्य च तस्यार्थादेशनं युज्यते, लभ्यते वा। ततश्च सोऽपि कर्तर्येव स्यात्। ततश्चानुप्रयुज्यमानोऽपि तदनुरोधेन कर्तृप्रत्ययान्त एव स्यात्। इष्यते तु भावकर्मणोरपि। अपि च जसन्तत्वे श्रुतेनैव सम्बन्धः। षष्ठ्यन्तत्वे त्वादेश

इत्यध्याहार्यमित्यतिगौरवम्। अत एव ल इति प्रथमान्ततयैव व्याख्यानं पुरस्कृतं हरदत्तेन। किं चोक्तरीत्या "लः कर्मणी"(पा. 3-4-69) ति सूत्रे आदेशा अप्यनुवाद्या इति फलितं, ते च "लस्य"(पा. 3-4-77) इत्यधिकृत्य "तिप्तस्झी"(पा. 3-4-78) ति विहिताः। तथा च तदेकवाक्यतयैव पदविशेषपुरुषविशेषव्यवस्थापकानामिव वचनविशेषव्यवस्थापकस्यापि प्रवृत्तिध्रौव्ये, पुनरिदानीं प्रवृत्तिर्निर्मूला, व्यर्था, अनिष्टावहा चास्तां तावत्। (व्यर्थेति। "तिप्तस्झि"(पा. 3-4-78), "द्व्येकयोः"(पा. 1-4-22) इत्याद्येकवाक्यतयैव एकत्वादौ वाच्यतायाः सिद्धत्वात्। न च कर्त्रादौ शक्त्यबोधनेन मीमांसकमतसिद्धिरेव फलमिति वाच्यम्। मतसिद्धौ पुनरन्वयः, पुनरन्वये च मतसिद्धिरिति अन्योन्याश्रयग्रस्तत्वात्। अनिष्टावहा चेति। गौरवस्य सत्त्वादिति भावः। किं च कर्तरि एकत्वे इत्यर्थाङ्गीकारेऽपि विशेषणतया कर्त्रादीनां प्रवेशात् तद्वाच्यत्वं दुष्परिहरम्। अनन्यलभ्यत्वं तु उभयोः (कारकस्य संख्यायाश्च) समानम्। अपि च संख्यायाः परिच्छेदकत्वेन विशेषणतैवोचिता एकस्मिन् कर्तरि इति। तथा च धर्मिणि शक्तिर्दुर्वारा। किञ्च "भावकर्मणोः" (पा. 1-3-13) "शेषात् कर्तरि" (पा. 1-3-78) इत्यादिभिः शत्रादिविधिना सहैकवाक्यत्वेन धर्मिणि शक्तिर्बोध्यते, तथा तिबादिविधिना सहैकवाक्यत्वेऽपि युक्तम्। वैषम्ये बीजाभावात्। अपि च त्वदुक्त-रीत्या धर्मिणि शक्त्यभावे सिद्धेऽपि च तिङां धर्मे शक्तिर्न सिध्येत्। अनुशासनाभावात्। तं विनापि तत् सिद्धौ "कर्तरि कृत्"(पा. 3-4-67) इत्यादीनां वैयर्थ्यापत्तिः स्पष्टैव।)

**< 23 >** (पृ. 93-94)

वस्तुतस्त्विति। संख्याया एव लकारार्थत्वं लःकर्मणि(पा.3-4-69),तिप्तस्झि(पा. 3-4-78) द्व्येकयोः (पा. 1-4-22), इति सूत्रत्रयैकवाक्यतया सिध्यति न कर्तृकर्मणोः इति मीमांसकोक्तं त्रयाणां पदैकवाक्यताऽसंभवरूपयुक्त्या निराकृतमपि युक्त्या दोषप्रदर्शनेन निराकरोति वस्तुतस्त्वित्यादिना। अत्र प्रधानतया प्रतिपाद्यमानो दोषः शतृशानचोः कर्तृवाचकत्वानापत्तिरूपः। लस्थाने एव तयोरादेशरूपेण विधानात् , आदेशानां स्थान्य-र्थाभिधायकत्वात् लकारस्य संख्यावाचकत्वे तयोरपि संख्यावाचकत्वमेव स्यात् न तु कथमपि कर्तृकर्मवाचकत्वम्। तथा च मीमांसकानां जञ्जभ्यमानाधिकरणसिद्धान्तभङ्गः इति बहुधा विकल्प्य प्रतिपादितम्।

स्वेच्छामात्रेण लक्षणायामसाधुत्वादिति। कारकार्थनिर्णयस्यान्ते महता प्रबन्धेन विभक्तौ न लक्षणेति निरूपितम्। व्याकरणस्य शक्तिनियामकत्वेन शक्तत्वस्यैव साधुत्वस्य मीमांसकैः भवद्भिः व्याकरणाधिकरणे साधितत्वेन च लकारस्य संख्यावाचकत्वे

तत्स्थानापन्नशतृशानचोरपि केवलकर्त्रादिगतसंख्यावाचकत्वमेव शक्त्या लभ्यते। भवन्मतमनुसृत्य लकारः संख्यावाचकत्वेनैव व्याकरणेनानुशिष्ट इति तत्स्थानिकशतृशानचोरपि संख्यावाचित्वे एव साधुत्वं स्यात्। कर्तृवाचित्वे त्वसाधुत्वमेव। व्याकरणाबोधिते लक्षणायाः अपि असाधुत्वमेवेति भावः।

< 24 > (पु. 97-99)

भट्टैरुक्तमिति। कर्त्रधिकरणे(मी.3-4-4) तन्त्रवार्तिके इति शेषः। "नानृतं वदेदि"ति नियमस्य क्रत्वर्थत्वमुत पुरुषार्थत्वमिति संशये तस्य क्रत्वर्थत्वसाधकमिदमधिकरणं कर्त्रधिकरणमिति प्रसिद्धम्। तिङ्प्रत्ययेन भावनायाः अभिधानात् तिङन्ते तस्याः प्राधान्याच्च अस्य प्रतिषेधस्य दर्शपूर्णमासप्रकरणपठितत्वात् प्रकरणेन क्रत्वर्थत्वमिति अत्र सिद्धान्तः। क्रतोर्मध्ये एतस्यापालने क्रतोरेव वैगुण्यं स्यात् । अतस्तत्परिहाराय प्रायश्चित्तादिकमनुष्ठेयं स्यात्। यदि च तिङा कर्ता वाच्यः स्यात्तर्हि श्रुत्या अस्य निषेधस्य पुरुषार्थतैव स्यात्। अनृतवदनस्य पुरुषार्थत्वे तु पुरुषस्यैव प्रत्यवायः स्यात् न तु क्रतोर्वैगुण्यम्। तदा तु पुरुषेण तद्दोषापाकरणाय स्मार्तप्रायश्चित्तादिकमनुष्ठेयं स्यात्।

विशिष्टग्रहणं नेष्टमिति। तिङा कर्तृनिष्ठा संख्याभिधीयते न कर्तेत्युक्ते कर्तृविशिष्टा संख्या केवला कथं विशेषणीभूतं कर्तारमनभिधाय अभिधीयते, विशिष्टबुद्धेः विशेषणज्ञानाधीनत्वात्। ततश्च कर्तुरप्यभिधानं प्राप्तमेवेति शङ्कायामुत्तरमिदम्। सत्यम्। अगृहीतविशेषणं विशिष्टग्रहणं नेति। न गृहीतं विशेषणं यस्मिन्निति तत् अगृहीतविशेषणम् , तादृशं विशिष्टग्रहणं विशिष्टज्ञानं नेत्यर्थः।विशेषणज्ञानं विना साक्षात् विशिष्टग्रहणं न भवतीत्यर्थः। नागृहीतविशेषणा विशिष्टबुद्धिःइति न्यायस्याप्ययमेवार्थः॥ तथा च विशेषणज्ञानं विशिष्टज्ञाने कारणमेव।परन्तु तद्विशेषणज्ञानं शब्दवाच्यमेव भवेदिति न नियमः। तदेवोच्यते – अभिधानाभिधाने त्विति। अभिधा – अभिधानं – वाच्यता। अनभिधानम् -- अवाच्यता वा। इह – विशिष्टबुद्धौ। कारणत्वेन केनचिदपि नाश्रिते । विशेषणस्य शब्देन अभिधा अभिधानम् उत अनभिधानम् इति परीक्षा नात्र विशिष्टबुद्धौ अपेक्ष्यते। किन्तु पूर्वं विशेषणज्ञानं भवति वा न वेत्येव। भवत्येवात्र विशेषणीभूतस्य कर्तुः ज्ञानं भावनया आक्षेपात्। ततश्च अनन्यलभ्यश्शब्दार्थ इति न्यायेन संख्यैव प्रत्ययार्थः सिध्यति। संख्या विभक्त्यर्थ इत्ययं पक्षः अनभिहितसूत्रे भाष्यवार्तिकयोः स्पष्टः। ननु तत्र कारकं संख्याविशिष्टं विभक्त्यर्थ इति पक्षान्तरमपि प्रतिपादितं किल। सत्यम्। तस्मिन्नपि पक्षे विशेषणी-

भूतसंख्याया एव विभक्त्यर्थत्वम् अनन्यलभ्यः शब्दार्थ इति न्यायादेव। विशेष्यभूतकर्तुः प्रमाणान्तरलभ्यत्वात् (आक्षेपलभ्यत्वात्)।

आक्षेप्यस्य कर्तुः शाब्दत्वं प्रतिपादयति – तद्वाचकशब्दस्यैवेति। तथा च तिङर्थ-भावनया कर्तृपदाक्षेपः। आक्षिप्ताच्च तस्मात् कर्तुः प्रतीतिरिति तस्यापि शाब्दत्वात् न "शाब्दमशाब्देनान्वेती" ति न्यायविरोधः इति तिङर्थसंख्यायाः आक्षिप्तकर्तर्यन्वये न किञ्चित् बाधकम्।
संयोगान्तरत इति। प्रमाणान्तरत इत्यर्थः। संबन्धान्तरत इति वा। तदुक्तं - लक्षणा वेति।

< 25 > (पु. 102-104)

"भावनया कर्तृकर्मणोराक्षेपात् अनन्यलभ्यः शब्दार्थः इति न्यायेन कर्तृकर्मणी-नाख्यातार्थः। न चाक्षिप्तकर्तृकर्मणोरशाब्दत्वम्। तद्वाचकशब्दाक्षेपेण तयोः शाब्दत्व-सम्भवात्। तिङ्स्थले कर्तृकर्मणोः संख्याभिधानमेवाभिधानव्यवस्थानियमाकम्। कर्तृ-कर्मणोराख्यातार्थत्ववादिभिः कुत्र कर्ता वाच्यः कुत्र कर्मेति जिज्ञासायां शबादिविकरणानां तात्पर्यग्राहकत्वं स्वीकरणीयम्।

अस्मन्मतेऽपि किंगता संख्या बोध्या इत्यत्र तदेव प्रमाणम्। यद्यपि कृत्स्थलेऽपि कर्तृकर्मणोराक्षेपलभ्यत्वं वक्तुं शक्यम्। अथापि देवदत्तः पाचक इत्यादिषु सामानाधि-करण्यस्य अनुभवमाश्रित्य कृत्स्थले कर्तृकर्मणोरेव वाच्यत्वं स्वीक्रियत" इति मीमांसकैः पूर्वं प्रस्तुतम्। तत्र कृतां कर्तृकर्मादिवाचकत्वे या सामानाधिकरण्येनानुभवरूपा युक्तिः प्रदर्शिता सा एव युक्तिः आख्यातानामपि कर्तृकर्मवाचकत्वसाधिकेति निरूपयितु-मुपक्रमते – अत्रेदं प्रतिभातीति।

लोकानुभवमेव प्रमाणतया स्वीकृत्य प्रकृतिप्रत्ययार्थान् प्रकल्प्य वाक्यार्थः बोध्यते व्याकरणेन। अत एवास्य शक्तिग्राहकत्वम्। सिद्धे शब्दार्थसम्बन्धे इत्यादिना शब्दार्थ-सम्बन्धानां नित्यत्वस्य लोकसिद्धत्वस्य च प्रतिपादनात्। अतः व्याकरणशास्त्र-बोधितोऽर्थः लोकानुभवविरुद्ध इति वक्तुं न शक्यते। देवदत्तः पचति इत्यत्र देवदत्ताभिन्न-कर्तृकः विक्लित्त्यनुकूलः व्यापारः इति बोधोऽनुभूयते। न चायं बोधः अनुभवविरुद्धः। अन्यस्मिन् पचति सति देवदत्तः पचतीति अप्रयोगात्। एतमेवानुभवमादृत्य व्याकरणेन च "लः कर्मणी"ति सूत्रेण लकारस्य कर्तृकर्मवाचकत्वं प्रतिपाद्यते। किञ्च आख्यातस्य कर्तृकर्मवाचकत्वे एव पुरुषव्यवस्थोपपद्यते।

तदेव वदति – त्वं पचसि इत्यादौ इत्यादिना। त्वं पचसीत्यत्र आख्यातस्य युष्मच्छब्दसामानाधिकरण्यमनुभूयैव समानाधिकरणे मध्यमपुरुषः विहितः। यदि च लोकानुभवसिद्धं सामानाधिकरण्यं लाघवादिकमनुरुध्य त्यज्यते तर्हि तदेव लोकानुभवमाश्रित्य भवद्भिः उपपाद्यमानं सामानाधिकरण्यमपि त्यक्तव्यं स्यात्। तदेवोपपादयति – नीलो घट इत्यादि।

नीलो घटः – नीलादिगुणवाचकानां गुणवाचित्वमेवेति भवत्सिद्धान्तः। तस्य च गुणस्य आश्रयतया घटादिष्वन्वयेन बोधसिद्धौ तदपहाय सामानाधिकरण्यं साधयितुं तत्र गुणवाचकानां गुणिवाचकत्वमुच्यते किल भवता। तदपि भवता त्यक्तव्यं स्यात्।

देवदत्तः पक्ता – कृत्प्रत्ययानां कृतिवाचकत्वेऽपि देवदत्तः पक्तेत्यादौ पाककृत्याश्रयः देवदत्त इति बोधः शक्य एवेति सामानाधिकरण्यमाश्रित्य तेषां कर्त्रादिवाचकत्वस्वीकारः अयुक्तः स्यात्।

ऐन्द्रं दधि – "सास्य देवते"ति सूत्रेण षष्ठ्यर्थे सम्बन्धे एव तद्धितो विहित इति तद्धितस्य सम्बन्धार्थकत्वेऽपि बोधः उपपद्यत एवेति सामानाधिकरण्यमाश्रित्य सर्वत्र यौगिकैः शब्दैः द्रव्यस्यैवाभिधानमिति भवत्सिद्धान्तासङ्गतिः स्यात्। चित्रगुः देवदत्तः, पिङ्गाक्षी गौः – उभयत्र षष्ठ्यर्थबहुव्रीहिः। तस्यापि सम्बन्धार्थकत्वमेव स्यात्। अत्रापि पूर्वोक्तसिद्धान्तविरोधः स्यात्। स्तोकं पचति, ज्योतिष्टोमेन यजेत – स्तोकमित्यस्य क्रियाविशेषणत्वात् धात्वर्थफलेन सह अभेदान्वयः, ज्योतिष्टोमस्यापि कर्मनामधेयत्वात् यजधात्वर्थयागेन सह अभेदान्वयः। अयमपि लोकसिद्धः न स्यात्।

तदपलापापत्तौ  तस्य अभेदस्य अपलापे सति, बहुव्याकुली स्यात् – बहुविधसिद्धान्तविरोधः स्यात्।

अभेदबोधे समानविभक्तिकत्वं प्रयोजकं, तच्च देवदत्तः पचति इत्यादौ नास्तीत्याशङ्क्य समाधातुमुपक्रमते  न चेत्यादि।

राज्ञः सुतस्य धनमिति। समानविभक्तिकत्वस्य अभेदबोधे नियामकत्वे अतिव्याप्तिं प्रदर्शयति – राज्ञः सुतस्य धनमिति। अत्र समानविभक्तिमत्त्वेऽपि राज्ञः सुतस्य इत्यनयोः अभेदेनान्वयो नेष्टः। अव्याप्तिं प्रदर्शयति - राजपुरुष इत्यादि। राजपुरुष इत्यत्र

राजपदे विभक्तिरेव नास्ति। अथापि राजपदस्य राजसम्बन्धिनि लक्षणामाश्रित्य राजपदार्थपुरुषपदार्थयोरभेदः वर्ण्यते आधुनिकैः नैयायिकैः मीमांसकैश्च। तन्न सिध्येत्। तथा धान्येन धनी इत्यत्र प्रकृत्यादित्वात् तृतीया अभेदार्थिका। धान्याभिन्नधनवानिति बोधोऽत्र इष्टः। धान्यधनशब्दयोः समानविभक्त्यन्तत्वाभावात् तन्न स्यात्। अयं विषयः पूर्वमपि चर्चितः।

मन्दप्रतारणमपास्तमिति। मीमांसकप्रतारणमिति भ2 मातृकाटिप्पणी।

< 26 > (पु.109-111)

वार्तिके एवोद्घोषितमिति। तन्त्रवार्तिके कर्त्रधिकरणे (मी.3.4.4.) भावनया अर्थापत्त्या आक्षिप्तेन लक्षितेन वा कर्त्रा सामानाधिकरण्यं नानुपपन्नमिति महता प्रबन्धेन निरूपितम्। आक्षेपपदार्थं द्विधा विकल्प्य दूषयति -- आक्षेपो यदीति। आक्षेपः अनुमानं न। तथा चेत् अनुमितकर्त्रादेः अशाब्दत्वात् तत्र शाब्दसंख्याद्यन्वयो न स्यात्। अथ अनुमितेऽपि यदि शाब्दान्वयःतर्हि धूमोऽयं ज्वलतीति वाक्यस्यापि साधुत्वं स्यात् । धूमानुमितवह्नेः ज्वलनकर्तृत्वस्य लोकसिद्धत्वात्। तदसम्भवादिति। तस्य सामानाधिकरण्यस्य असम्भवादित्यर्थः। धूमशब्दानुमितवह्नेः इदंशब्देन सामानाधिकरण्यासम्भवः इत्यर्थः। किञ्च चैत्रादिपदप्रयोगे चैत्रः पचति इत्यादिषु कर्तृविशेषस्य चैत्रादिशब्दैः बोधितत्वात् अन्यप्रमाणसिद्धस्य कर्तुरनुमानासम्भव एव। अथाक्षेपपदार्थः लक्षणा तर्हि पूर्वोक्तदोषो न। अपि तु पिङ्गाक्ष्यादियौगिकानां द्रव्यवाचित्वं न स्यात्। ततश्च सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते इति भवत्सिद्धान्तासङ्गतिः। तत्कथमिति चेत्तदेवोपपादयति – मूलयुक्तेः सामानाधिकरण्यस्येति। पिङ्गे अक्षिणी यस्याः सा इति बहुव्रीहिः। अयं षष्ठ्यर्थबहुव्रीहिः। तथा च अन्यपदार्थेऽत्र षष्ठ्यर्थः। "षष्ठी शेषे" (पा. 2-3-50) इति सूत्रेण सम्बन्धस्यैव षष्ठ्यर्थत्वप्रतिपादनात्। ततश्च पिङ्गाक्षिसम्बन्ध इत्येव समासार्थः सिध्यति। न तु सम्बन्धीति। अथापि पिङ्गाक्षी गौः इति सामानाधिकरण्यमनुलक्ष्य एतादृशेषु यौगिकेषु सम्बन्धिवाचित्वमाश्रीयते मीमांसकैः। तत्र च पिङ्गाक्ष्यादियौगिकानां द्रव्यवाचित्वे युक्तिः सामानाधिकरण्यमेव। अथ सामानाधिकरण्यसिद्ध्यर्थं तेषां द्रव्यवाचकत्वं मास्तु। भवन्तु ते यथानुशासनं सम्बन्धवाचका एव। सम्बन्धिबोधस्तु भवतु लक्षणया। ततश्च यथा पचति देवदत्त इत्यादिषु आख्यातलक्ष्येण कर्त्रा सह सामानाधिकरण्यम्, तथात्रापि लक्ष्येण सम्बन्धिना सह सामानाधिकरण्यं सिध्यत्येव। तथा च द्रव्यवाचकत्वयुक्तेः सामानाधिकरण्यस्य अन्यथा उपपादयितुं शक्यत्वात्, पिङ्गाक्ष्यादीनां द्रव्यवाचकत्वसाधकयुक्त्यभावात् द्रव्यवाचित्वं न

स्यात्। तदेवाह – द्रव्यवाचकसाधकान्तरस्याभावात् इति। एवं सामानाधिकरण्येऽन्यथा साधिते, द्रव्यवाचकस्य युक्त्यन्तरस्य अभावात् तेषां द्रव्यवाचकत्वसिद्धिः एकत्र। अपरत्र तेषां सम्बन्धाभिधायकत्वे प्रमाणोपलम्भात् सम्बन्धवाचकत्वसिद्धिरिति मीमांसकानां तत्र द्रव्यवाचकत्वमिति स्वसिद्धान्तस्य अनुपपत्तिः। पिङ्गाक्ष्यादिशब्दानां सम्बन्धवाचकत्वमेव सविस्तरमुपपादयति - तथा हीति। अयं सर्वोऽपि ग्रन्थः अरुणाधिकरणे तन्त्रवार्तिके पूर्वपक्षरूपेण प्रस्तुतः। स एव यथावदत्र कौण्डभट्टेन अनूदितः।

बहुव्रीहिः समासोऽयमिति॥ इयं च कारिका तन्त्रवार्तिके अरुणाधिकरणे (मी.3.1.6) भट्टपादैरुक्ता। तत्र पिङ्गाक्ष्यादिशब्दानां संबन्धवचनत्वमेव, न द्रव्यवचनत्वम् इति सन्दर्भे संबन्धवचनत्वसाधनाय कारिकेयं प्रस्तुता।

अस्याःअयमाशयः – गोमान् इत्यत्र "तदस्यास्त्यस्मिन्निति मतुप्"(पा.5.2.94) इति सूत्रेण अस्येत्यर्थे मतुप् विधीयते। तत्र मतुप्प्रकृतेः गोशब्दस्य गावः अर्थः। तद्वान् व्यक्तिविशेषः मतुपा अभिधातव्यः। ततश्च अरुणाधिकरणन्यायेन सम्बन्धस्य वाच्यत्वे सिद्धे, तेन सम्बन्धेन आक्षेपादेव सम्बन्धिनः प्रतीतिः स्यात्, जात्या व्यक्तेरिव। नागृहीतविशेषणा विशिष्टबुद्धिरिति न्यायेन विशेषणस्य सम्बन्धस्य पूर्वम् अभिधानमावश्यकम्। ततश्च विशेषणेन सम्बन्धेन विशेष्यस्य सम्बन्धिनः आक्षेपादिना लाभात् न तस्य शब्दार्थत्वम्। अनन्यलभ्यः शब्दार्थः इति न्यायात्। यथा च मतुप् अस्येत्यर्थे विहितः, तथा बहुव्रीहिरपि। षष्ठ्यर्थबहुव्रीहिरित्यर्थः। ततश्चात्रापि पिङ्गाक्षिशब्दौ न सम्बन्धिनमभिधातुं शक्तौ। किन्तु समास एव। ततश्च समासेन सम्बन्धाभिधानात्, तेन सम्बन्धेन आक्षेपात् सम्बन्धिनो लाभाच्च बहुव्रीहेरपि तुल्यन्यायेन सम्बन्धाभिधायकत्वमेव सिध्यति। अयं च तत्र पूर्वपक्ष एव। सिद्धान्तस्तु –

सर्वत्र यौगिकैः शब्दैः द्रव्यमेवाभिधीयते।
न हि सम्बन्धवाच्यत्वं सम्भवत्यतिगौरवात्॥ (त.वा.3-1-6-12)इति।

सम्बन्धवाचकत्वे महद्गौरवमिति गौरवदोषापत्तिरेव यौगिकेषु सम्बन्धिनोऽभिधाने मूलयुक्तिः। न तु सामानाधिकरण्यमात्रमिति वस्तुस्थितिः। विस्तरस्तु तन्त्रवार्तिकादवसेयः।

युक्तं चैतदिति। बहुव्रीह्यादेः सम्बन्धवाचकत्वमेव युक्तमित्यर्थः। तत्र अनुभवं प्रमाणयति – देवदत्तस्य गोमत्त्वमिति। तत्र दृष्टान्तमाह – घटत्वमित्यादौ इति। यथा घटादिशब्दानां घटत्वमेव वाच्यं, घटत्वमेव प्रकारः, तथा गोमच्छब्दस्य बहुव्रीहेश्च सम्बन्ध

एव वाच्यः, सम्बन्ध एव च प्रकारः इत्यर्थोऽवसेय इति (भ2) मातृकायां टिप्पणी। अत्र सर्वासु मातृकासु पदार्थीभूत इत्येव पाठः उपलभ्यते। स एव युक्तः॥

आकृत्यधिकरण न्याय इति। गवादिशब्दानां जातिवाचकत्वमेव। व्यक्तिलाभस्त्वाक्षेपादिति बोधकं मीमांसाशास्त्रे प्रथमाध्यायस्य तृतीयपादे नवममधिकरणम् आकृत्यधिकरणमिति प्रसिद्धम्। नागृहीतविशेषणन्यायेन प्रथमं विशेषणबोधस्य सिद्धावेव विशेष्यबोध इति, यत्र विशेषणं प्रमाणान्तरप्राप्तं स शब्दार्थः, तद्विशेष्यं तु विशेषणेनैव आक्षिप्यत इति अन्यायोऽनेकार्थत्वम्, अनन्यलभ्यः शब्दार्थ इति न्यायबलेन न विशेष्यस्य वाच्यत्वमिति बोधकमधिकरणम् आकृत्यधिकरणम्। तन्निर्णीतोऽर्थ एव आकृत्यधिकरण-न्यायः।

घटत्वस्यैव वाच्यत्वादिति। जातिशक्तिवादे घटशब्देनापि घटत्वमेव बोध्यते घटत्वशब्देनापि घटत्वमेव बोध्यते। तत्र घटशब्दे पदार्थभूतं घटत्वम् आक्षिप्तव्यक्तौ प्रकार इति तत्र तस्य प्रकारत्वात् घटत्वमित्यत्र तस्य विशेष्यत्वम्। ततश्च प्रकृतिजन्यबोधे घटपदजन्यबोधे यः प्रकारः घटत्वं, स एव घटत्वमित्यत्र त्वप्रत्ययार्थो भवति। एवमेव गोमत्त्वमित्यत्र संबन्धस्यापि त्वप्रत्ययार्थत्वं नानुपपन्नम्। त्वप्रकृतिभूतगोमच्छब्दे पदार्थ-भूतस्य संबन्धस्य आक्षिप्तसंबन्धिनि प्रकारत्वात्। तदेवाह – तत्रेव उपपत्तेः इति। तत्र इव घटत्वे इव संभवादित्यर्थः। अत्र तत्रैवोपपत्तेरिति पाठः अपपाठः। साम्यमेव कथयति – आक्षेपितव्यक्तौ तस्य प्रकारत्वं वा अत्रापि सममिति। घटपदार्थघटत्वस्य यथा आक्षेपित-व्यक्तौ प्रकारत्वं तथा गोमत्पदार्थगोमत्त्वस्य आक्षेपितसंबन्धिनि प्रकारत्वमित्यर्थः।

आक्षेपितव्यक्तौ जात्या आक्षिप्तव्यक्तौ, तस्य त्वप्रत्ययप्रकृत्यर्थस्य यत् प्रकारत्वं विशेषणत्वं, तत् अत्रापि गोमत्त्वमित्यत्रापि। संबन्धेन आक्षिप्तसंबन्धिनि तस्य त्वप्रत्यय-प्रकृत्यर्थस्य प्रकारत्वं सममिति वाक्यार्थः। उक्तं चेति। अरुणाधिकरणे तन्त्रवार्तिके इति शेषः।

< 27 > (पृ.115-117)

उक्तं चेति। अरुणाधिकरणवार्तिके एव पूर्वपक्षे। यथा गवादिषु रूढिशब्देषु जातेरभिधानात्, ततो विहितेन त्वप्रत्ययेनापि जातेरेवाभिधानं प्राधान्येन, तथैव गोमत् इति मतुपा यदि सम्बन्धोऽभिधीयते, ततः तस्मादुत्पन्नः त्वप्रत्ययः "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः" (प्रकृतिप्रत्ययौ सम्बद्धार्थं ब्रूत इत्यर्थः) इति न्यायेन सम्बन्धम् अभिदधाति। सर्वत्र

यौगिकेषु उत्पन्नः भावप्रत्ययः पाचकत्वं, पाठकत्वमित्यादिषु सम्बन्धाभिधायकत्वेन प्रतीयते, तत्र सम्बन्धस्य विशेष्यतया प्रतीतेः। ततश्च रूढिशब्देषु जातेः, गुणशब्देषु गुणस्य, यौगिकेषु सम्बन्धस्य च अभिधानमिति, न क्वचिदपि द्रव्यस्याभिधानम्। यदृच्छाशब्दानां डित्थ-डबित्थादीनां वेदे प्रयोगाभावात् वैदिकेषु सर्वत्र विशेषणस्य जातेः, गुणस्य, सम्बन्धस्य वा प्रतिपादनमेव इति यः आकृत्यधिकरणे पूर्वपक्षः, स एव सिद्धान्तरूपेण अत्र प्रतिपाद्यते। तत्रत्यः सिद्धान्तश्च यत्त्वित्यादिना अत्र पूर्वपक्षीक्रियते। अत्रत्यः सर्वोऽपि विषयः तन्त्र-वार्तिकानुवाद एव। परन्तु पूर्वपक्षस्य सिद्धान्तरूपेण, सिद्धान्तस्य च पूर्वपक्षरूपेण।

यत्तु मतुबादेरित्यारभ्य अरुणाधिकरणवार्तिके इत्यन्तग्रन्थस्य अयमाशयः। मतुबादेरित्यादिशब्देन अण् प्रत्ययस्य, बहुव्रीहेश्च ग्रहणम् । यत्र यत्र षष्ठ्यर्थस्य प्रत्यया-र्थत्वं, समासार्थता वा स सर्वोऽपि अत्र आदिपदग्राह्यः। अत्र च अयं विकल्पः – मतुबादिना सम्बन्धः किं सामान्यरूपेण अभिधीयते, उत विशेषरूपेण इति। न प्रथमः। तथा सति मतुबादेः परस्परं पर्यायता स्यात्। न द्वितीयः। तथा सति तस्य सम्बन्धिविशेषरूपतैव स्यात्। अतः मतुबादेः परस्परभेदाय सम्बन्धविशेषः अभिधातव्यः भवति। तथा च मतुबादिः सम्बन्धिनमपि अभिदधाति, सम्बन्धमपीति वक्तव्यम्। तत्र च सम्बन्धिनः अभिधानं विना सम्बन्धाप्रतीतेः प्रथमं सम्बन्धिनः अभिधानमावश्यकम्। ततश्च अभिहितेन सम्बन्धिनैव सम्बन्धस्य आक्षेपात् बोधसिद्धौ पुनः सम्बन्धवाचकत्वं मतुबादेः नावश्यकम्। तथा च सिद्धं यौगिकेषु द्रव्य(सम्बन्धि) वाचकत्वम्।इति। तदेवोच्यते- सर्वत्र यौगिकैः इत्यादिना। सम्बन्धवाच्यत्वं तु अतिगौरवान्नेति च। सम्बन्धवाचकत्वपक्षे च सम्बन्धिनः, सम्बन्धस्य च वाच्यत्वमभ्युपगन्तव्यमिति अतिगौरवमित्यर्थः। किञ्च एकसम्बन्धिज्ञान-न्यायेन सम्बन्धिना प्रतीतेन सम्बन्धस्य प्रतीतेः सिद्धा पुनः सम्बन्धे शक्तिकल्पनापि नोचिता। अनन्यलभ्यन्यायात्। उक्तं च – सम्बन्धिनैव सम्बन्ध इत्यादिना। किञ्च षष्ठ्याः, मतुबादेश्च सम्बन्धाभिधानेऽपि तद्बोध्यसम्बन्धः नैकविधः। षष्ठ्या असत्त्वभूतसम्बन्धस्यैव प्रतीतेः। मतुबादिषु तु लिङ्गसंख्याद्यन्वयात् तस्य सत्त्वरूपता वक्तव्या। ततश्च उभयत्र प्रतीयमानस्य सम्बन्धे भेदः सिद्धः। मतुबादिषु सत्त्वरूपसम्बन्धाभिधाने प्रमाणं तु न दृश्यते। अतः तत्र सम्बन्धस्य न वाच्यत्वं, किन्तु प्रतीयमानत्वमित्येव युक्तम्। एतदेवोक्तं विभक्तिवाच्यरूपेणेति।

**< 28 >** (पृ.120-123)

नन्वेवं गोमत्त्वमित्यादिषु भावप्रत्ययस्य सम्बन्धाभिधायकत्वं न स्यात् इति चेदुच्यते। भावप्रत्ययः स्वप्रकृत्यर्थसमवेतगुणग्राहकः। घटत्वमित्यत्र जातेः, शुक्लत्वमि-

त्यादिषु गुणस्य च प्रतीतेः। तथा गोमत्त्वम्, औपगवत्त्वमित्यत्र न कश्चित् गुणः अस्ति, यः भावप्रत्ययेनाभिधातुं योग्यः। भावप्रत्ययस्तु प्रयुज्यते। अतः गत्यन्तराभावात् तत्र भावप्रत्ययेन सम्बन्धाभिधानमङ्गीक्रियते। तदेवोक्तं – यदा स्वसमवेतोऽत्रेत्यादिना। एकहायनीत्यादिसमासानां च एकं हायनम् यस्याः इति न विग्रहः। किन्तु तत्समानः एकस्य हायनस्य इयमिति। तथा चात्र विशेष्यभूतेन इदं शब्देन द्रव्यमेव बोध्यत इति यौगिकानां द्रव्यवाचित्वमक्षतम्। इत्येवं मीमांसकः स्वमतं समर्थयति।

तत्खण्डयति – तच्चिन्त्यमित्यादिना। यया युक्त्या भट्टपादैः सम्बन्धस्य वाच्यत्वं तिरस्कृत्य सम्बन्धिनः वाच्यत्वं सिद्धान्तितं, तयैव युक्त्या सम्बन्धिनः वाच्यत्वं तिरस्कृत्य सम्बन्धस्य वाच्यत्वं सिद्धान्तयितुं प्रक्रमते कौण्डभट्टः। पूर्वं भट्टपादैः सम्बन्धस्य भानं सामान्यरूपेण वा विशेषरूपेण वा इति विकल्प्य तत्खण्डितम्। तथैव सम्बन्धिनः विषयेऽपि विकल्पयति – द्रव्यमपीति। सामान्यतोऽभिधाने पर्यायतापत्तिरिति दोषः। विशेषतः अभिधानमिति चेत् विशेषकत्वं द्वयोः प्रसिद्धं संसर्गस्य, प्रातिपदिकार्थस्य च। तथा च प्रतीयमानः सम्बन्धी संसर्गरूपश्चेत् अप्रतीतस्य संसर्गत्वायोगात् प्रातिपदिकार्थत्वापत्तिः। विशेषरूपेण प्रातिपदिकार्थत्वे तु चित्रगुः देवदत्तः, वैश्वदेवी आमिक्षी इत्यादिषु यौगिकैः चित्रग्वादिभिरेव देवदत्तादीनामभिधानात् देवदत्तादिपदप्रयोगानापत्तिः, तेषां पर्यायरूपत्वात्। किञ्च संसर्गवाचकत्वपक्षे संसर्गस्य प्रातिपदिकार्थत्वेऽपि न पर्यायतापत्तिः। चित्रगुरित्यादौ संसर्गविशेषकाणां गवादीनां सत्त्वात् संबन्धविशेषस्यैव (गोसम्बन्धस्यैव) प्रतीतेः। यदप्युक्तं मतुबादिप्रतिपाद्यसम्बन्धस्य विभक्तिवाच्यस्य च भेदः। विभक्तिवाच्यः असत्त्वभूतः, मतुबादिवाच्यस्तु तद्भिन्नः इति तदपि न युक्तमित्याह – षष्ठ्यर्थे विहितमतुबादेरिति। यतः मतुबादीनां षष्ठ्यर्थे विधानम्, अतस्तेषां षष्ठीव असत्त्वभूतसम्बन्धाभिधानमेव। तदेव उदाहरणमुखेन दर्शयति – सम्बन्धानामनेकत्वे तुल्यलिङ्गत्वेऽपीत्यादिना। एकशतं षष्ठ्यर्थाः इति भाष्योक्त्या षष्ठ्यर्थानामनेकत्वम्। सम्बन्धानामनन्तत्वेऽपीति पाठान्तरम्। तुल्यलिङ्गत्वेऽपीति। सामान्ये नपुंसकम् इति सम्बन्धानां समेषां तुल्यलिङ्गत्वम्। दण्डीति। दण्डसम्बन्धः अनेकविध इति यदि सम्बन्धः सत्त्वभूतः स्यात् तर्हि बहुवचनापत्तिरित्यर्थः। दण्डिनीति। स्त्रीलिङ्गे पुंलिङ्गे च प्रयोगानापत्तिः। तथा च यौगिकेषु वाच्यो वा प्रतीयमानो वा सम्बन्धः षष्ठ्यादिवत् असत्त्वभूत एव। लिङ्गसंख्याद्यन्वयाय च सम्बन्धेन सम्बन्धिनः आक्षेपः। तत्र दृष्टान्तं प्रदर्शयति – आख्यातसंख्ययेव कर्त्रादेरिति। तिङन्ते तिङर्थसंख्यायाः असत्त्वभूतभावनायाम् अन्वयानुपपत्त्या कर्त्रादिक-

माक्षिप्यते, तद्वत् इत्यर्थः। पूर्वं भट्टपादेन सम्बन्धिनैव सम्बन्धस्य सिद्धौ तत्र वाच्यत्वं नेति बोधयता यः श्लोकः पठितः –

सम्बन्धिनैव सम्बन्धः प्रत्येतुं यदि शक्यते।
पुनस्तस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेत्॥ (त.वा.3-1-6-12) इति,

तमेव सम्बन्धवाचकत्वपक्षसाधकत्वेन किञ्चित् परिष्कृत्य पठति –

सम्बन्धेनैव सम्बन्धी प्रत्येतुं यदि शक्यते।
पुनस्तस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेत्॥ इति।

सम्बन्धस्य, सम्बन्धिनो वा एकस्यैव वाचकत्वमिति तु युक्तम् । तत्र सम्बन्धस्य वाच्यत्वे एव प्रमाणम् व्याकरणम्, युक्तिश्च स्तः इति, यौगिकेषु सम्बन्धाभिधानमेव युक्तमिति भावः।

< 29 > (पृ.127-129)

भावप्रत्ययस्य स्वसमवेतगुणवाचकत्वमिति यदुक्तं तत्खण्डयति – यत्तु इति। अरुणाधिकरणवार्तिके एव भट्टपादैः भावप्रत्ययस्य स्वसमवेतगुणवाचकत्वमुक्तम्। घटत्वादिषु स्वं – आत्मीयं प्रकृत्यर्थः (जात्या आक्षिप्तः घटः) तत्समवेतो यः गुणः – घटत्वं, तद्वाचकत्वमिति समन्वयः। एतच्च जातिशब्देषु, गुणशब्देषु च कथञ्चित् प्रतिपादयितुं शक्यम्। न तु यौगिकेषु गोमत्त्वमित्यादिषु।

उक्तं हि तत्रैव – गोमच्छब्दे हि गावो विशेषणम्। तासां समवायेन पुरुषावृत्तित्वात् न तासां त्वप्रत्ययेनाभिधानम्। अतश्च गत्यन्तराभावात् सम्बन्धः त्वार्थत्वेनाश्रीयत इति। उक्तं च -

यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः।
तदा गत्यन्तराभावात् सम्बन्धो वाच्य आश्रितः॥ (त.वा.3-1-6-12)

गोमत्पदे हि गावो मतुबर्थे विशेषणम्। तासां पुरुषावृत्तित्वात् न त्वप्रत्ययेन ग्रहणमित्यादिना।

किञ्च प्रकृत्यर्थसमवेतवाचकत्वपक्षे घटत्वमित्यादिषु प्रकृत्यर्थे घटत्वे यद्विशेषणं घटत्वत्वं तस्य त्वार्थत्वं स्यात्। किञ्चैवं घटादिपदे द्रव्यत्वादीनामपि आक्षिप्तघटादिषु विशेषणत्वेन भानात् तेषामपि त्वार्थत्वं स्यात्। द्रव्यत्वादिकं घटपदजन्यबोधे न प्रकार इति तस्याग्रहणमिति चेत्, सम्बन्धिना सम्बन्धस्याक्षेपपक्षे संसर्गोऽपि न प्रकार इति गोमत्त्वमित्यादिषु त्वप्रत्ययेन सम्बन्धः कथं वा बुध्येत, अत एव तस्य अगतिकगतित्वमुक्तम्।

अतः भावप्रत्ययस्य न स्वसमवेतगुणवाचकत्वम्। अपि तु प्रकृत्यर्थमात्रवाचकत्वम्। पक्षे चास्मिन् घटादिषु जातेः शुक्लादिषु गुणस्य च यथा प्रकृत्यर्थत्वं तथा गोमान् इत्यादिषु सम्बन्धस्यैव प्रकृत्यर्थत्वमिति, घटत्वमित्यत्र जातेः शुक्लत्वमित्यत्र गुणस्य गोमत्त्वमित्यत्र सम्बन्धस्य च त्वार्थत्वं सुलभम्। एवं गत्यां सत्यां, गत्यन्तराश्रयणमपि नावश्यकम्।

अथ भावप्रत्ययस्य प्रकृत्यर्थमात्रवाचकत्वे त्वप्रत्ययप्रयोग एव व्यर्थः स्यादित्याशङ्क्य समाधत्ते –ननु प्रकृत्यर्थमात्रवाचकत्व इत्यादिना। घटशब्देनापि घटत्वमेव बोध्यते, घटत्वशब्देनापि घटत्वमेव बोध्यते इति चेत् त्वप्रत्ययप्रयोगः किमर्थः? तथा च लाघवानुरोधेन त्वप्रत्ययान्तप्रयोगविलयापत्तिरिति आक्षेपः।

समाधानं तु न त्वप्रयोगस्य वैयर्थ्यमिति। कथमिति चेदुच्यते – यद्यपि घटशब्दस्यापि घटत्वमेव वाच्योऽर्थः, घटत्वशब्दस्यापि तथा, अथापि घटशब्दार्थघटत्वं स्वाश्रयं व्यक्तिविशेषमाक्षिपति लिङ्गसंख्याद्यन्वयाय। आक्षिप्ते च व्यक्तिविशेषे प्रातिपदिकार्थघटत्वादिकं विशेषणं भवति। त्वान्तेन बोध्यं घटत्वादिकं तु न व्यक्तिविशेषमाक्षिपति, अत एव च तस्य न विशेषणत्वम्। किन्तु विशेष्यत्वमेव। एवं च विशेष्यत्वेन घटत्वादीनां बोधनार्थं त्वप्रत्ययप्रयोग इति, न त्वप्रत्ययप्रयोगः व्यर्थः। "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थः प्रधानम्" इति न्यायेन त्वार्थस्य भावस्य प्राधान्यमपि सङ्गच्छते। एवं च यौगिकेष्वपि सम्बन्धस्यैव वाच्यत्वं, सम्बन्धिनः आक्षेपलभ्यतेति पक्षे एव एकरूपता लाघवं चास्तीति "सर्वत्र यौगिकैश्शब्दैर्द्रव्यमेवाभिधीयते" इत्ययुक्तमेव। एवं संसर्गस्य वाच्यत्वे सिद्धे अरुणाधिकरणमेव व्यर्थं स्यात्। तदाह – अरुणाधिकरणं दत्तजलाञ्जलि स्यात् इति। तथा हि – अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणातीति श्रूयते। तत्र पिङ्गाक्षी–एकहायनीशब्दौ यौगिकौ। अरुणशब्दः गुणवाचकः। यौगिकयोः पिङ्गाक्षी-एकहायनीशब्दयोः यौगिकत्वात् द्रव्यवाचित्वं सिद्धवत्कृत्य गुणवाचके अरुणशब्दविषये विचारः आरब्धः। तत्र आरुण्यस्य गुणत्वेन, गुणस्य अमूर्तत्वेन क्रयणे करणत्वेनान्वयासम्भव इति, तस्य द्रव्यद्वारा क्रयणेऽन्वयः वक्व्यः। तच्च द्रव्यं ज्योतिष्टोमप्रकरणोक्तं यत्किञ्चित् द्रव्यम्, उत वाक्यात् उपलभ्यमानं पिङ्गाक्ष्यादिरूपमिति प्रश्नः कृतः। प्रकरणपठितयत्किञ्चिद्रव्यद्वारेति पूर्वपक्षः। तृतीयायाः कारकविभक्तित्वात् असत्त्वरूपस्यापि आरुण्यस्य सत्त्वरूपतामाश्रित्य करणत्वबोधकतृतीयाविभक्तिश्रुतेः बलवत्त्वात् साक्षात् क्रयणे करणत्वेन अन्वयः सिद्धान्तितः। अनन्तरं च स्ववाक्योपात्तपिङ्गाक्ष्यादिद्रव्यद्वारा तस्य क्रयणान्वयः सिद्ध्यतीति। यौगिकेष्वपि सम्बन्धस्यैव वाच्यत्वे अरुणयेति वाक्योपात्तानां त्रयाणामपि अद्रव्यवाचित्वात् स्ववाक्योपात्तद्रव्यद्वारा अन्वय इत्युक्तिरसङ्गता स्यात्। किञ्च पिङ्गाक्षी–

एकहायनीत्यनयोरपि अद्रव्यबोधकत्वेन साक्षात् क्रयणान्वयस्यैवानुपपत्तिरिति, त्रिष्वपि अनुपपत्तेः समायां केवलमरुणपदविषये एव विचारोऽपि अयुक्तः स्यादिति अधिकरण-मिदं सर्वम् असङ्गतमेव स्यादिति।

प्रस्थितं च गुणाधिकरणेनेति। मीमांसादर्शने द्वितीयाध्याये द्वितीयपादे नवम-मधिकरणं गुणाधिकरणमुच्यते। चातुर्मास्ये प्रथमपर्वणि श्रूयते – "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनम्" इति। अत्र हि सा वैश्वदेव्यामिक्षा इत्यनेन विश्व-देवदेवोतोद्देश्यकामिक्षाविधानात् विश्वेदेवदेवताकं कर्म विधीयते। एवं चात्र वैश्वदेव्या-मिक्षेति वाक्येन विश्वेदेवदेवताकं कर्म सिद्धम्। वाजिभ्यो वाजिनम् इति द्वितीयं वाक्यम्। अत्रापि वाजिनरूपं द्रव्यं वाजिपदबोध्यदेवोद्देश्येन विधीयते। वाजिपदेन अश्वानामेव रूढ्या प्रसिद्धेः, तस्य देवतावाचकत्वेनाप्रसिध्या देवतावाचकत्वाभावे तदुद्देश्यकद्रव्य-त्यागानुपपत्त्या रूढ्यर्थं परित्यज्य वाजमन्नं हविः अस्ति येषामिति मत्वर्थप्रत्ययान्तत्वं स्वीकृत्य, तत्रापि बहुवचनबलात् विश्वेदेवा एव पूर्ववाक्ये तद्धितप्रकृत्या बोधिताः बोध्यन्ते चेत् , पूर्वोक्तयागविशेषमनूद्य वाजनरूपगुणविधानं भवितुमर्हति इति आमिक्षावाजिनयोः उभयोः एकत्र विधानमिति अत्र पूर्वपक्षः।

सिद्धान्तस्तु आमिक्षारूपेण गुणेन अनुमितःविश्वेदेवदेवताकः यागः आमिक्षा-रूपगुणविशेषेण अवरुद्धः। तथा च तस्यैव अन्यगुणकत्वविधाने वाक्यभेदापत्तिः। अतः वाजिभ्यो वाजिनमित्यनेन वाजिदेवताकं कर्मान्तरमेव वाजिनगुणकं बोध्यत इति। अत्र च हेतुः वैश्वदेव्यामिक्षेति पदेन श्रुत्या आमिक्षोपसर्जनाः तद्विशेषणीभूताः विश्वेदेवाः प्रतीयन्ते। "सास्य देवता"(पा.4.2.24) इति सूत्रेण देवतावाचकत्वात् प्रातिपदिकात् अस्येत्यर्थे हवीरूपे द्रव्ये तद्धितप्रत्ययः विधीयते। तथा च तद्धितस्य देयं द्रव्यमर्थः। प्रत्ययार्थ-प्राधान्यन्यायेन प्रधाने प्रत्ययार्थे प्रकृत्यर्थस्य विशेषणत्वेन तत्प्रकृत्यर्थभूतानां विश्वेदेवानां उपसर्जनत्वम्। ततश्च तेषां अन्यत्रान्वयो वक्तुं न शक्यः। न च वाजिभ्यः इति पुनर्निर्देशात् अनुपसर्जनत्वम्। तथापि वैश्वदेवीत्यत्र समानपदश्रुत्या विश्वेदेवानामामिक्षान्वयः श्रौतः, वाजिभ्य इत्यत्र तु पदान्तरसन्निधानप्रयुक्तः वाजिनान्वयः इति वाक्यप्रमाणगम्यः। ततश्च वाक्यात् श्रुतेः बलवत्त्वेन विश्वेदेवानां आमिक्षासम्बन्धस्य शीघ्रं प्रतिपन्नत्वेन विलम्बेन वाक्येन तेषु पुनः वाजिनसम्बन्धः वक्तुं न शक्यः। एतदेव गुणान्तरावरुद्धत्वमित्युच्यते। गुणद्वयमध्ये अर्थात् आमिक्षावाजिनयोर्मध्ये बलाबलविचारे समानपदश्रुत्या आमिक्षायाः विश्वेदेवदेवतासम्बन्धस्य श्रौतत्वात् वाजिनस्य तु पदान्तरसम्बन्धेनैव तस्य वक्तव्यत्वात् "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इति प्रमाणेन

श्रुत्या वाक्यं बाध्यते दुर्बलत्वादिति। एवं देवतावाचकेऽपि प्राबल्यदौर्बल्यविचारःकृतः। विश्वेषां देवानां देवतात्वं तद्धितान्तत्वेन शक्त्या उक्तम्। वाजिनां तु वाजिभ्य इति चतुर्थ्या सम्प्रदानवाचिन्या साम्प्रतिकलक्षणया। तथा हि - चतुर्थ्याः त्यज्यमानद्रव्यद्देश्यत्वविशिष्ट-प्रतिगृहीतृत्वमर्थः। देवतायां प्रतिगृहीतृत्वाभावात् उद्देश्यत्वपर्यन्तमेव तदर्थो वक्तव्यः। ततश्च तदर्थैकदेशे लक्षणा स्वीकार्या। अतः तद्धितापेक्षया चतुर्थ्याः दौर्बल्यम्।
तदुक्तं –

> तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
> देवतायाः विधिस्तत्र दुर्बलं तु परं परम्॥ इति। (त.वा.2-2-9-23)

ततश्च वाजिनस्य पूर्वकर्मसम्बन्धस्य वक्तुमशक्यत्वात् "वाजिभ्यो वाजिनम्" इति वाक्येन वाजिदेवताकं कर्मान्तरमेव विधीयत इत्यधिकरणसारः।

> तद्धितस्येति। सा वैश्वदेव्यामिक्षेत्यत्र वैश्वदेवीस्थतद्धितस्येत्यर्थः। तन्त्रवार्तिके हि
> आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
> आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणम् ॥ (त.वा.2-2-9-23)

इति "सास्यदेवता" (पा.4.2.24) इति सूत्रविहिततद्धितस्य देवताविशिष्टं द्रव्यमर्थ इत्युक्तम्। ततश्च आमिक्षायाः विश्वेदेवदेवतासम्बन्धस्य श्रौतत्वात् श्रुत्या आमिक्षायाः विश्वेदेव-देवतासम्बन्धप्रतीतेः पुनस्तेषां वाजिनरूपगुणसम्बन्धः वक्तुं न शक्यः। आमिक्षाद्रव्य-विशेषणीभूतानां देवानां पदार्थान्तरसम्बन्धस्य अयुक्तत्वात्। वाजिभ्य इति पदेन यद्यपि तेषां पुनः पार्थक्येनोपस्थितिरिति वक्तुं शक्यम्। अथापि तत्र तेषां देयसंबन्धः वाक्यात् प्रतीयते आमिक्षायास्तु तत्संबन्धः श्रुत्या इति श्रुतिवाक्ययोः श्रुतेः बलीयस्त्वात् आमिक्षा-रूपगुणेन विश्वेदेवदेवतासंबन्धस्य अवरुद्धत्वात् न वाजिनस्य तत्सम्बन्ध इति निर्णीतम्। यदि च देवतार्थकतद्धितस्य अस्येति षष्ठ्यर्थे विधानात् सम्बन्धार्थकत्वं तर्हि तस्य देये शक्त्यभावात् वाक्यप्रमाणेनैव द्रव्यसंबन्धः वक्तव्यः इति आमिक्षावाजिनयोरुभयोरपि वाक्येनैव देवतासंबन्ध इति तत्र बलाबलविचार एव अयुक्तः स्यात्। ततश्च गुणाधिकरण-मेवानुपपन्नं स्यादिति।

तद्धितार्थसंबन्धाक्षिप्तेति। वैश्वदेव्यामिक्षेत्यत्र वैश्वदेवीति तद्धितान्तेन संबन्धे अभिहिते तेन संबन्धेन द्रव्यमाक्षिप्यत इति तद्धितप्रत्यार्थः यः संबन्धः तेन आक्षिप्तस्य द्रव्यस्यापि श्रौतत्वं भवतु ततश्च वाजिनामिक्षयोः स्वरूपतः भेदः सिध्यतीति न वक्तुं शक्यम्। आक्षिप्तस्यापि श्रौतत्वे कर्त्रधिकरणमेवानुपपन्नं स्यात्। तथा हि – कर्त्रधिकरणे तावत् "नानृतं वदेत्" इति वचनस्य क्रत्वर्थत्वं महताप्रयासेन साधितम्। तदर्थं च तिङ

भावनाया एव वाच्यत्वं न कर्तृकर्मणोः, कर्तृकर्मणोरभिधाने हि "नानृतं वदेदि"त्यत्र कर्तुः श्रौतत्वात् तस्य निषेधस्य पुरुषार्थतैव स्यात् न तु क्रत्वर्थतेति, तदर्थं भावनाया एव वाच्यत्वं न कर्तुरिति महता प्रबन्धेन व्यवस्थापितम्। यदि च आक्षिप्तस्यापि श्रौतत्वं तर्हि पुनस्तत्रैव कर्तुरवाच्यत्वेऽपि श्रौतत्वापत्तिः।भावनया कर्तुराक्षेपात्।तथा च भक्षितेऽपि लशुने न रोगशान्तिरिति न्यायेन व्याकरणागमातिक्रमणेनापि इष्टसिद्धिर्न स्यात्। तथा च सिद्धान्ता-सिद्धा तदधिकरणविचारः सर्वोऽपि व्यर्थः स्यात्। तदुक्तं कर्त्रधिकरणोच्छेदप्रसङ्गादिति।

< 30 > (पृ.131-134)

मीमांसकाः आख्याते भावनायाः, घटारुणादिषु जातिगुणयोः, यौगिकेषु द्रव्यस्य अभिधानमङ्गीकुर्वन्ति। तत्र च ते तत्र तत्र तस्य तस्य प्राधान्येनावागतिमेव हेतुतया प्रदर्शयन्ति। तदेवमतमुपपाद्यते यत्तु इत्यादिना। तेषामयमाशयः। "भावप्रधानमाख्यातम्" इति वचनात् आख्याते भावनायाः प्राधान्यम्। तथा नाम्नि "सत्त्वप्रधानानि नामानि" इति निरुक्तवचनात् सत्त्वप्राधान्यमागतम्। तदनुरोधात् पिङ्गाक्ष्यादियौगिकेषु द्रव्यस्य प्राधान्यम्। यद्यपि जातिगुणशब्देष्वपि द्रव्यप्राधान्यमेव निरुक्तवचनाल्लभ्यते। परन्तु जातिगुणशब्देषु घटारुणादिषु आकृत्यधिकरणन्यायेन जातिगुणयोः प्राधान्यम्। एतच्च अरुणाधिकरणात् निर्णीयते। अरुणया इत्यत्र अरुणपदस्य गुणरूपार्थकत्वेऽपि तस्य गुणस्य सत्त्वरूपतया भानमङ्गीक्रियते, "सत्त्वप्रधानानि नामानि" इति निरुक्तवचनसमन्वयाय। तथा गवादि-पदेष्वपि जातेरेव प्राधान्येऽपि तस्य सत्त्वरूपता अङ्गीक्रियते। ततश्च जातिगुणयोरेव तृतीया-र्थस्य संख्याकरणत्वयोः साक्षादन्वयः स्वीक्रियते। तथा च नाम्नि वाच्यार्थस्य नैकरूपत्वात् (जातिगुणवाचकयोः यौगिकानां च वाच्यार्थस्य भिन्नभिन्नरूपत्वात् एकत्र द्रव्यरूपत्वात्, अन्यत्र जातिगुणरूपत्वाच्च) कुत्र किमिति निर्णयाय जातिगुणवाचकेषु जातिगुणयोरेव प्राधान्यं, न द्रव्यस्येति शक्यार्थनियमाय अरुणाधिकरणं प्रवृत्तमिति नारुणाधिकरणस्य वैयर्थ्यम्। तथा च आख्याते भावनायाः प्राधान्यात् वाच्यत्वम्। न कर्त्रादेः। तथा पिङ्गाक्ष्या-दियौगिकेषु द्रव्यस्यैव प्राधान्यम्। तद्धितप्रत्ययस्य बहुव्रीहेश्च षष्ठ्यर्थविधानेऽपि न सम्बन्धस्य प्राधान्यम्। तदुक्तं – न कर्तृसम्बन्धादेः इति। आख्याते कर्तुः, यौगिकेषु सम्बन्धादेरित्यर्थः। आदिपदेन घटादिषु द्रव्यार्थः।

तत् तुच्छम् इति। अरुणया पिङ्गाक्ष्येत्यत्र अरुणपदार्थस्य आरुण्यस्य यथा सत्त्वरूपता, तत्र तृतीयार्थसंख्याकारकयोः अन्वयश्च प्रतिपादितः, तथा यौगिकेषु सम्बन्धाभिधानेऽपि तस्य सम्बन्धस्य सत्त्वरूपता प्रतिपादयितुं शक्या, सत्त्वप्रधानानीति वचनाविरोधश्चेति। यौगिकेष्वपि अरुणाधिकरणन्यायः अन्वेतुं शक्यः। ततश्च यौगिकेष्वपि

सम्बन्धस्यैव वाच्यतापत्तिः। अतस्तथा वक्तुं न शक्यते। अथ यौगिकेषु द्रव्यवाचकत्वं साधनीयं चेदित्थम्। तदेव उपपादयति – तस्मादिति। वैश्वदेव्यामिक्षा, पिङ्गाक्षी गौः, दण्डी देवदत्तः, पाचको देवदत्तः इति यौगिकेषु द्रव्येन सह सामानाधिकरण्यमनुभूयते। न च तत्र सम्बन्धे शक्तिः, द्रव्ये लक्षणेति वाच्यम्। अनुपपत्तिप्रतिसन्धानस्य लक्षणाबीजत्वात्, तादृशानुपपत्तिप्रतिसन्धानं विनैव द्रव्यबोधस्य लोकसिद्धत्वात्। एवं च लोकसिद्धं सामानाधिकरण्यमेव यौगिकानां द्रव्यवाचित्वसाधकम्। तच्च सामानाधिकरण्यं देवदत्तः पचति इत्यत्र आख्यातेऽपि कर्त्रादिभिः देवदत्तादीनामनुभूयत इति आख्यातस्य कर्तृकर्म-वाचकत्वम् अङ्गीकरणीयम्। अत एव – सामानाधिकरण्यस्यैव शक्तिव्यवस्थापकत्वेन चित्रगुः इति समासस्य द्रव्यवाचित्वं स्वीक्रियते। यद्यपि विग्रहेण यस्येति अन्यपदार्थ-षष्ठ्यर्थस्यैव प्राधान्यं प्रतीयते।अथापि विग्रहवैलक्षण्येन समासस्य सम्बन्धिवाचकत्वं स्वीक्रियत सामानाधिकरण्यानुरोधादिति भावः।

अथ सामानाधिकरण्यमेव यदि शब्दशक्तिव्यवस्थापकं, नीलो घट इत्यादिषु सामानाधिकरण्यमाश्रित्य जातिवाचकानां घटादिपदानामपि द्रव्यवाचित्वापत्तिरिति शङ्क्यते – अथैवमिति। समाधत्ते – नीलो घट इति सामानाधिकरण्यात् द्रव्यबोधेऽपि, तद्गतजातेः अपि शक्यत्वमावश्यकम्। अन्यथा जातेः शाब्दबोधे भानानापत्तेः। तथा च घटपदस्य घटत्वांशे शक्तिः अवश्यं कल्पनीया। तथा च नागृहीतविशेषणा विशिष्टबुद्धि-रिति न्यायेन जातेः शक्यत्वे, आक्षेपादिभिः द्रव्यबोधात् अनन्यलभ्यः शब्दार्थ इति न्यायेन पुनः तत्र द्रव्ये शक्तिकल्पना नावश्यकी।

प्रकृते चेति॥ पिङ्गाक्ष्यादियौगिकेषु प्रकृत्यर्थतावच्छेदकस्य सम्बन्धस्य प्रकृति-शक्त्योपस्थितत्वेऽपि, तदुपलक्षणत्वेन स्वीकृत्य द्रव्ये शक्तिः स्वीक्रियते। तत्र प्रमाणतया भट्टपादोक्तिं प्रदर्शयति – आनन्त्येऽपि हि भावानामिति। गवादिशब्दप्रतिपाद्यानां गोव्यक्तीनामानन्त्येऽपि, तेषु भावेष्वनुगततया वर्तमानं जात्यादिरूपं धर्मम् उपलक्षणी-कृत्य तेषु सर्वेषु भावेषु गवादीनां शब्दानां शक्तिः कल्पयितुं शक्या। धर्मस्य उपलक्षण-त्वाच्च न तस्य वाच्यार्थत्वम्। ततश्च न वा अनन्तशक्तिकल्पनापत्तिः, न वा व्यभिचारः। यदि च जातिवाचकेष्वपि जातिः उपलक्षणतया स्वीक्रियेत तर्हि तेषामपि द्रव्यवाचित्वं वक्तुं शक्यम्। तदुक्तं – केवलव्यक्तिवाच्यत्वमपि इति। वक्ष्यत इति। नामार्थनिर्णय इत्यर्थः।जातिशब्दानां यौगिकानां च वाच्यतावच्छेदके वैलक्षण्यमुप-पादयति – वस्तुतो गोमानिति।

< 31 > (पु.136-139)

कर्तृकर्मादिवाचकशब्दानामिति। शक्तिः कारकं, शक्तिमत् कारकमिति कारकविषये पक्षद्वयं श्रूयते। तत्र शक्तिः कारकमिति पक्षे दोषमुद्भावयति – कर्तृकर्मेति। शक्तिः कारकमिति पक्षे कर्तृपदस्य कर्तृत्वमर्थः, कर्मपदस्य कर्मत्वमर्थः, कारकशब्दस्य कारकत्वमर्थः। तथा च तेषां धर्मवाचकत्वात् देवदत्तादिद्रव्यवाचकत्वैः सह सामानाधिकरण्यं न स्यादिति। अतः देवदत्तः पचतीत्यत्र आख्यातार्थस्य देवदत्तादिभिः सामानाधिकरण्यमाश्रित्य यदाख्यातस्य कर्त्रादिवाचित्वमुक्तं, तन्न सङ्गच्छते। ततश्च आख्यातस्य कर्त्रर्थकत्वसाधकयुक्त्यभाव एवेति शङ्कितुराशयः। समाधत्ते – शक्तिमदेव कारकम् न तु केवलशक्तिरूपम्। तस्यैव पक्षस्य मुनित्रयसम्मतत्वात्। तस्यैव पक्षस्य मुनित्रयसम्मतत्वमुपपादयति – साक्षात् सूत्रकृतैवेति। युष्मद्युपपदे, अस्मद्युपपदे च समानाधिकरणे मध्यमोत्तमपुरुषयोः विधानमेव प्रमाणम्। न हि युष्मदर्थः अस्मदर्थो वा धर्मरूपः। ततश्च तत्सामानाधिकरण्यात् पुरुषपदवाच्याख्यातस्यापि धर्मिपरत्वमेव सिद्ध्यति। भाष्यकारस्यापि सम्मतिं प्रदर्शयति – भाष्ये इति। ततश्च शक्तिमत्कारकमिति पक्ष एव सिद्धान्तसिद्धः। तथा च "कर्तरि कृत्" (पा.3.4.67) "लः कर्मणी" (पा.3.4.69) तिसूत्रयोः कर्तृकर्मशब्दयोः धर्मिवाचकत्वात् "आश्रये तु तिङः स्मृताः" इति कारिकापि नासम्बद्धा। एवं प्रामाण्यं प्रदर्श्य, "कर्तरि कृत्" (पा.3.4.67) इति सूत्रस्थकर्तृपदस्य धर्मिवाचकत्वास्वीकारे दोषं प्रदर्शयति – शानजादेः इति। लकारस्य स्थाने एव शतृशानचोरादेशत्वेन, तयोः स्थान्यर्थाभिधायकत्वेन लकारस्य धर्मिवाचकत्वाभावे शतृशानचोरपि धर्मिवाचकत्वं न सिद्ध्येत्। ततश्च "जञ्जभ्यमानाधिकरणा" नुपपत्तिप्रसङ्गः मीमांसकानामिति भावः।

नन्वेवं भर्तृहरिणा शक्तिः कारकमिति पक्षः कथं प्रतिपादित इति चेत् – उच्यते – नित्याः षड् इति। तत्र कारिकायामन्येषामिति पदमेव अस्य पक्षस्य सिद्धान्तासम्मतत्वं सूचयति। अत एव वाक्यपदीये कर्तृनिर्वचनं "धातुनोक्ते क्रिये नित्यं कारके कर्तृतेष्यते" इति सङ्गच्छते। धात्वर्थक्रियाश्रयत्वस्य धर्मिणि एव सम्भवात्। पचतीत्यत्र तिङन्ते व्यापारस्य इव कर्तृकर्मणोः प्रतीतिः सर्वैरनुभूयते। अतः अनुभवानुरोधादपि तयोराख्यातवाच्यत्वमभ्युपेयमिति निरूपयति – अपि च पचतीति।

< 32 > (पु.143-144)

भावतिङां धात्वर्थानुवादकत्वं निरूप्य, तत्र लकारार्थतया वर्तमानत्वादिकं न बोध्येतेति शङ्कां समाधत्ते – कालस्य धात्वर्थव्यापारे एवान्वयस्य वक्ष्यमाणत्वात्, न तस्य तिङादिप्रत्ययवाच्यत्वम्। अपि तु तस्य धात्वर्थत्वमेव। तद् द्योतकाः तिङः। अथ यदि

वाचकत्वपक्षः, तर्ह्यपि तस्य प्रत्ययार्थत्वेन प्राधान्यं तु न। किन्तु धात्वर्थव्यापार-विशेषणत्वमेव। यद्यपि प्रकृतिप्रत्ययार्थयोः इति न्यायविरोधः, अथापि अगत्या तथा स्वीक्रियते, अनुभवानुरोधात्।

< **33** > (पु.147-149)

भावलकारे तिङर्थसंख्यायाः अन्वयोऽस्ति न वेति विचारयति – भावलकारे हीति। साधुत्वार्थं एकवचनप्रत्ययः योज्यते। परन्तु तत्र संख्यायाः अप्रतीतिरेव। यथा अव्ययेभ्यः औत्सर्गिकमेकवचनं तद्वत्। न च धात्वर्थभावनायां तस्या अन्वयः, धात्वर्थ-भावनायाः असत्त्वरूपत्वात्। लिङ्गसंख्यानन्वयित्वस्यैव असत्त्वरूपत्वात्। उक्तं च कैयटेन रूपप् (पा.5.5.66) सूत्रे "एका क्रिया। द्विवचनबहुवचनानि तु न क्रियापेक्षाणि। साधना-पेक्षाण्येतानि। अभेदैकत्ववति च संख्यारहितेऽव्ययाद्यर्थे च अवस्थितमेकवचनम् " इति। शब्दकौस्तुभे "सार्वधातुके यक्" (पा.3.1.67) इति सूत्रेऽपि दीक्षितः – तत्र कर्तृकर्मणी वदन् तिङ् तन्निष्ठां संख्यामपि प्रतिपादयतीति कर्तृकर्मणोर्द्वित्वे बहुत्वे च द्विवचनबहुवचने भवतः। भावे लस्तु असत्त्वावस्थापन्नां धात्वर्थभूतां क्रियामेवाभिधत्ते द्योतयति वेति तत्र प्रथमपुरुषैकवचनमेव भवति न मध्यमयमोत्तमौ। युष्मदस्मद् सामानाधिकरण्याभावात्। नापि द्विवचनबहुवचने। द्वित्वबहुत्वयोरप्रतीतेः। "एकवचनं तु उत्सर्गतः करिष्यत " इति भाष्यात् भवति। अत्र बहुवचनं नेति उत्सर्गः।

उष्ट्रासिका आस्यन्ते, हतशायिकाः शय्यन्ते इति।

"सार्वधातुके यक्" (पा.3.1.67) इति सूत्रे शब्दकौस्तुभे हि – "उष्ट्राणाम् आसिकाः स्वरूपत एव विलक्षणाः, हताश्च नानाप्रकारं शेरते उत्ताना अवताना विकीर्ण-केशाः विस्रस्तवस्त्रा इत्यादि। तत्साम्यात् आख्यातवाच्यस्यापि भावस्य स्वरूपगतभेदा-भासात् बहुवचनं भवत्येव। इव शब्दप्रयोगमन्तरेणापि इवार्थावगतिः भवति, "परत्र पर-शब्दः प्रयुक्त" इति न्यायात्। तदयमर्थः। यादृशानि हतानामनेकप्रकाराणि शयनानि तादृशानि देवदत्तादिभिः क्रियन्ते। इति। एवं चेह आसिकाः, शायिकाः इति द्वितीया-बहुवचनान्तं क्रियाविशेषणेन कर्मत्वात्। न चैव क्लीबत्वमेकवचनत्वं च स्यादिति वाच्यम्। "स्त्रियां क्तिन्" (पा.3.3.94) इत्यधिकारात् स्त्रीत्वावधारणेन "सामान्ये नपुंसकमि" त्यस्याप्रवृत्तेः। बहुत्वावधारणेन च एकवचनाप्रवृत्तेरिति दिक्" इति एतादृशप्रयोगाणां विशिष्टसन्दर्भविषयत्वं प्रतिपादितम्। अनेन प्रतिपादनेन भावे एकवचनं तु औत्सर्गिकं, बहुवचनं तु तत्तत्सन्दर्भवशादिति बोधयति दीक्षितः।

नागेशोऽपि हतशयनसदृशानि शयनानीत्यर्थके उपमाने बहुत्वोपादानसामर्थ्येन उपमेये तिङर्थक्रियारूपे उपमानगतबहुत्वारोपेण बहुवचनम् इति शेखरे उक्तवान्।

केचित्तु प्रयोगममुं कर्मणि प्रयोगमेव कथयन्ति। अकर्मकानामपि देशकालादि-कर्मकत्वेन "गोदोहः सुप्यत" इतिवत् अत्र कर्मणि एव लकार इति तेषामाशयः। पक्षे च अस्मिन् उपमानोपमेयभावः न प्रतीयते। अतः पक्षोऽयं न सम्यगिति अन्ये। उष्ट्रासिका इत्यादिप्रयोगाः असाधारणाः काचित्काश्च। अतस्तदनुसारं भावे प्रयोगे सर्वत्र बहुवचनादिकं नापादनीयम्। यतः एते विशिष्टाः लौकिकाः प्रयोगाः भाष्यकारेण अनुमोदिताः अतः तेषु बहुवचनं साधु। एतदेवोक्तं – भाष्यकारवचनादिति। अत्रैवेति। विशिष्टसन्दर्भे एवेत्यर्थः। प्रामाणिकाः भट्टोजिदीक्षितादय इत्यर्थः। अतोऽत्र कौण्डभट्टस्य अन्येषां च मतभेद-प्रदर्शनपराः व्याख्याः चिन्त्याः। आसधातोः शीङ् धातोश्च "धात्वर्थनिर्देशे ण्वुल् वाच्यः" इति वार्तिकेन ण्वुल्। "स्त्रियां क्तिन्" (पा.3.3.94) इत्यधिकारात् स्त्रीत्वम्। उष्ट्रानाम् आसिकाः, हतानां शायिकाः इति षष्ठीसमासः। आसिका इत्यस्य आसनं, शायिका इत्यस्य शयनम् इत्यर्थः। कर्तॄणां बहुत्वेन तद् बहुत्वस्य आसनशयनक्रिययोरारोपात् बहुवचनम्।

**< 34 >** (पु.153-155)

सिद्धान्तलेशोक्तमिति। सिद्धान्तलेशसङ्ग्रहे अप्पय्यदीक्षितोक्तमित्यर्थः। तत्र कालस्य धात्वर्थफलेऽन्वयः उक्तः। परन्तु तत्रैव अन्यत्र फलेऽन्वये दोषोऽपि प्रतिपादितः। अतस्तत्र स्वपरग्रन्थविरोधः। तदेव प्रदर्शयति – चिरविनष्टे घटे इति। फले तदन्वये चिरकालात्पूर्वं विनष्टेऽपि घटे तन्नाशस्य ध्वंसस्य नित्यत्वेन विद्यमानत्वात् नश्यतीति प्रयोगापत्तिरपि तत्रैवोक्ता।

प्रयोजकताविशेषस्यैवेति। आमवातजडीकृतकलेबरे उत्थानानुकूलयत्नसत्त्वेऽपि उत्तिष्ठतीति प्रयोगवारणाय फलव्यापारयोः प्रयोजकत्वरूपः सम्बन्धः वक्तव्यः। एवं च फलव्यापारयोरनुकूलत्वं संसर्ग इत्यादिव्यवहारेष्वपि अनुकूलत्वं प्रयोजकत्वरूपमिति परिष्करणीयमित्यर्थः। तदेव सोदाहरणं प्रदर्शितः यागाय यतत इतिवत् इत्यादिना।

**< 35 >** (पु.159-160)

कर्तरि, कर्मणि, भावे च सर्वत्र तिङन्ते व्यापारमुख्यविशेष्यक एव बोध इति बोधप्रदर्शनपूर्वकं निरूपयति – इत्थं चेत्यादिना। आख्यातोपात्तकर्तृकर्मणोः तद्विशेष-

वाचकदेवदत्तौदनयोश्च अभेदः सम्बन्धः। तत्र प्रथमान्तार्थः विशेषणम्। तिङर्थः विशेष्यम् इति विवेकः। एतदेव बोधप्रदर्शनपुरस्सरं निरूपयति – तथा चेत्यादिना।

< 37, 38 > (पु. 165-170)

अस्तु फलव्यापारयोः धात्वर्थत्वम्, कर्तृकर्मणोश्च आख्यातार्थत्वम्। "भावप्रधानमाख्यातम्" इति निरुक्तात् धात्वर्थे भावनायाः प्राधान्यमप्यस्तु। कौण्डभट्टस्य मते आख्यातपदस्य धात्वर्थकत्वात्। परन्तु नैयायिकाभ्युपगतः प्रथमान्तार्थविशेष्यकः बोधो भवतु इत्याशङ्क्य समाधत्ते – ननु भावनेत्यादिना। आख्यातार्थकर्तुरनन्वयापत्तेरिति।

देवदत्तः पचतीत्यस्य पाकानुकूलकृतिमान् देवदत्त इति नैयायिकाभ्युपगतः बोधः। तत्र तिङर्थकृतेः प्रथमान्तार्थे आश्रयतासम्बन्धेन अन्वयः। एवं वैयाकरणैरभ्युपेयते चेत् धात्वर्थव्यापारस्यैव आश्रयतासम्बन्धेन प्रथमान्तार्थेऽन्वयः वक्तव्य इति, आख्यातार्थकर्तृकर्मणोः कुत्रापि अन्वयो न स्यात्। तथा च आख्यातस्य आनुशासनिकं कर्तृकर्मवाचकत्वं निष्फलं स्यात्।

अथ "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इति न्यायेन धात्वर्थफलव्यापारयोः आख्यातार्थकर्तृकर्मणोरन्वयः, तयोश्च प्रथमान्तार्थेन सह अभेदान्वयश्च अस्तु, तथा च तयोः वैयर्थ्यमपि न, अनन्वयोऽपि न। तथा च पाकानुकूलव्यापाराश्रयाभिन्नः देवदत्तः इति बोधः वर्णयितुं शक्यः। आख्यातार्थकर्तृकर्मणोः प्रथमान्तार्थे विशेषणत्वम्। इत्याशङ्क्य समाधत्ते – आख्यातार्थप्रथमान्तार्थयोरभेदाभ्युपगमेऽपीत्यादिना।
पक्षे चास्मिन् क्रमशः एते दोषाः प्रदर्शिताः।

1. पक्त्वा गच्छतीतिवत् पचतिकल्पं गच्छतीत्यापत्तिः। ईषदसमाप्त्यर्थकः कल्पप् प्रत्ययः, स्वप्रकृत्यर्थगतां ईषदसमाप्तिं बोधयति। यदि पचतीत्यर्थः विक्लित्त्यनुकूलव्यापारः तर्हि ईषदसमाप्तः विक्लित्त्यनुकूलव्यापार इति पचतिकल्पमित्यस्यार्थः। यदि च पचतीत्यस्यार्थः विक्लित्त्यनुकूलव्यापाराश्रयः अर्थः, तदा कल्पबर्थस्य विशेष्ये कर्तरि अन्वयात् ईषदसमाप्तपाककर्तेत्यर्थः स्यात् पचतिकल्पमित्यस्य। तथा च पाचको गच्छतीतिवत् पचतिकल्पं गच्छतीत्यापत्तिः ईषदसमाप्तपाककर्ता गच्छतीति बोधस्य वर्णयितुं शक्यत्वात्। व्यापारमुख्यविशेष्यकत्वरूपसिद्धान्ते तु पाकगमनक्रिययोः विशेष्ययोःपरस्परमनन्वयात् तथा प्रयोगो न भवति।

2. आचार्यकल्पौ आचार्यकल्पा इतिवत् पचतःकल्पं, पचन्तिकल्पमित्यत्र कल्पबन्ते द्विवचनबहुवचनयोः आपत्तिः। आख्यातार्थकर्तृमुख्यविशेष्यत्वे कल्पबर्थस्य आख्यातार्थकर्तरि अन्वयेन तद्वित्वबहुत्वे आश्रित्य कल्पबन्तेऽपि द्विवचनबहुवचने स्याताम्। तत्र दृष्टान्तमाह- आचार्यकल्पौ आचार्यकल्पा इति। तिङन्ते व्यापारमुख्यविशेष्यत्वे तु पचतःकल्पम्, पचन्तिकल्पम् इत्यत्रापि धात्वर्थव्यापारस्यैव प्राधान्येन तस्य असत्त्वरूपत्वात् द्विवचनबहुवचनाद्यनन्वयेन न तादृशप्रयोगापत्तिः।
3. पश्य नृत्यति, पश्य मृगो धावति, पचतिभवतीत्यादिषु एकवाक्यतानापत्तिः। अयं च विचारः मूले एव विस्तरेण कृतः। अत्र सर्वत्र धात्वर्थभावनयाः अन्यधात्वर्थभावनायां विशेषत्वेन अन्वयः। पश्य नृत्यतीत्यत्र नृतधात्वर्थभावनायाः नर्तनस्य कर्मतासम्बन्धेन दृशिधात्वर्थदर्शने विशेषणत्वम्। पश्य मृगौ धावतीत्यत्र धावनक्रिया कर्मतासम्बन्धेन दृशिधात्वर्थदर्शने विशेषणत्वम्। पश्य मृगो धावतीत्यत्र धावनक्रिया कर्मतासम्बन्धेन दृशिक्रियायां विशेषणम्। पचतिभवतीत्यत्र पाकक्रिया कर्तृतासम्बन्धेन भवने विशेषणम्। तथा च धात्वर्थभावनाप्रकारकबोधं प्रति विशेष्यतया धात्वर्थभावनोपस्थितिः कारणमिति कार्यकारणभावः। तत्र दृष्टान्तमाह – कृज्जन्योपस्थितिरितिवत्। पाचकादिकृदन्ते "सत्त्वप्रधानानि नामानि" इति निरुक्तप्रामाण्येन प्रत्ययार्थकर्तुः प्राधान्यम्, तत्र धात्वर्थभावनायाश्च विशेषणत्वमिति अभ्युपेयते। तथा च तत्र धात्वर्थव्यापारविशेषणकबोधं प्रति कृज्जन्यकर्तृकर्माद्युपस्थितिः कारणमिति कार्यकारणभावः। तथैव अनेकतिङन्तघटितवाक्यस्थलेऽपि स्वीक्रियते इति भावः। अत एव धात्वर्थव्यापारस्य अन्यधात्वर्थव्यापारे विशेषणत्वस्वीकारादेव। पक्त्वा व्रजतीति। अव्ययकृतो भावे इति क्त्वादीनां भावे एव विधानात् क्त्वाद्यन्तबोध्यव्यापारस्य प्रधानतिङन्तार्थव्यापारे विशेषणत्वेन अन्वयः सङ्गच्छते। क्त्वाप्रत्ययप्रतिपाद्यसम्बन्धस्वरूपं निरूपयति – "समानकर्तृकयोः पूर्वकाले" (पा.3.4.21) इत्यनुशासनात्।

**< 39 >** **(पु.174-176)**

उपोद्घातसङ्गत्येति।

"प्रकृतार्थोपपादकत्वमुपोद्घात" इति उपोद्घातसङ्गतेःलक्षणम्। फलव्यापारयोर्धातुरिति कारिकया वैयाकरणमते धात्वर्थः कः, तिङर्थः क इति सविशेषमुपपादितम्। तत्र कर्तृकर्मणोः आख्यातार्थत्वमुक्तम्। तत्र द्वयोः फलव्यापारयोरिव सर्वदा आख्यातवाच्यत्वं

वक्तुं न शक्यम्। अपि तु कदाचित् कर्तुः, कदाचित् कर्मणः। ततश्च सन्देहः – क्व कर्तृवाचित्वं तिङः, क्व च कर्मवाचित्वमिति। स एव हि प्रकृतोऽर्थः जिज्ञासितः। तथा च जिज्ञासितप्रकृतार्थोपपादकत्वमेवात्र सङ्गतिः। सा च उपोद्घातरूपेति सूचयति – उपोद्घात-सङ्गत्येति।

< **40** > (पृ.178-180)

यथोचितमिति। अत्र दक्कन् कालेज् तृतीयमातृकायां "सकर्मकधातुसमभि-व्याहृतभावसाधारणविधिविधेयौ यौ यक्किणौ, तत्त्वेन कर्मद्योतकतेत्यर्थः, पच्यते ओदनः स्वयमेव, क्रमादमुं नारद इत्यबोधि सः इत्यादौ तु न भावसाधारणविधिविधेयौ यक्किणौ, किन्तु आतिदेशिक "कर्मवत्कर्मणा तुल्यक्रियः" (पा.3-1-87) इति विधिविधेयौ इति न तत्रव्यभिचार" इतिग्रन्थः विवरणात्मकः अधिकः स्पष्टार्थश्च।

< **41** > (पृ.183-185)

व्यापारो भावनेति। अनया कारिकया निरस्यमानानि मतानि कानि, तेषां स्वरूपं किमिति किञ्चिदत्र विवेचनीयम्। एतावत् पर्यन्तं वैयाकरणमतं किमिति सयुक्तिप्रमाणं निरूपितम्।तत्र फलं व्यापारश्च धात्वर्थः, कर्तृकर्मणी आख्यातार्थः इत्यपि सप्रमाणं निरूपितम्। इतः परं निरसनीयमतखण्डनमारभ्यते। अत्र खण्डनीयानि मतानि बहु-विधानि।

1. धात्वर्थः फलं, तिङर्थः कृतिः (यत्नः) – व्यापारस्तु, न कस्याप्यर्थ इति प्राचीन-नैयायिकमतम्।
2. सविषयार्थकेषु ज्ञानेच्छादिरेव धात्वर्थः, तत्र सकर्मकत्वं भाक्तमिति सर्वनैयायिका-भ्युपगतं मतम्।
3. व्यापार एव धात्वर्थः, फलं द्वितीयार्थः, कृतिः आख्यातार्थः इति नैयायिकमतम्।
4. धात्वर्थः फलम्, तिङर्थः कालः संख्या, धात्वर्थफलस्य स्वजनककृतिमत्त्व-सम्बन्धेन प्रथमान्तेऽन्वयः लिङि एव भावना वाच्या नान्यत्र इति प्राचीन-प्राभाकरमतम्।
5. धात्वर्थः फलम्, भावना आख्यातार्थ इति मण्डनानुयायिमतम्।
6. फलव्यापारौ धात्वर्थः, भावना आख्यातार्थः धात्वर्थस्य व्यापारस्य भावना-संस्पर्शाभावे सिद्धत्वेन भानमिति आधुनिकभाट्टमीमांसकमतम्।

पूर्वोक्तेषु प्रथमद्वितीयचतुर्थेषु मतेषु व्यापारस्य धातुना आख्यातेन वा अभिधानं न भवति। तथा च तिङन्ते व्यापारस्य अभिधानमेव नास्तीति आगतम्। तदिदानीं प्रथमं निरसनीयमिति क्रमशः निरसनाय आरभते – अत्र नैयायिका इत्यादिना।

अत्र कुसुमाञ्जलिकारस्य उदयनाचार्यस्य मतमनूद्यते। न्यायकुसुमाञ्जलौ पञ्चमस्तबके नवमदशमकारिकयोः विवरणवाक्यगतकरोत्यर्थ-निरूपणं कुर्वता आचार्येण फलमात्रस्य धात्वर्थत्वम्, कृतेः आख्यातार्थत्वं चोक्तम्। व्यापारस्य वाच्यत्वे व्यापारत्वस्य शक्यतावच्छेदकत्वे गौरवमिति, लाघवानुरोधेन कृतेरेव वाच्यत्वम्, कृतित्वमेव शक्यता-वच्छेदकमिति तदाशयः।

कृताकृतविभागेनेति। घटो मया कृतः, अङ्कुरः मया न कृतः इति लौकिकः व्यवहारः। घटो मया कृत इत्यस्य मद्यत्नसाध्यता घटस्य प्रतीयते। तथा अङ्कुरस्य तदसाध्यता च। तथा च कृञः यत्नार्थकत्वं सिद्धम्। कर्तृरूपव्यवस्थयेति। लोके हि कृत्याश्रये एव कर्तृपदव्यवहारः क्रियते। न व्यापाराश्रये। यदि च व्यापाराश्रयः कर्ता स्यात् तर्हि सर्वेषां कारकाणां कर्तृत्वं स्यात्। तेषां यत्किञ्चित् स्वव्यापाराश्रयत्वात्। तथा लोकप्रतीतिः अपि नास्ति। अतः कृतिरेव करोत्यर्थः।

यत्न एव कृतिः पूर्वेति। सा च कृतिः आख्यातार्थः। पचतीत्यस्य पाकं करोतीति विवरणात्। सा च यत्नरूपा एव आख्यातशक्या। पूर्वेत्यस्य शक्येत्यर्थः। नैयायिकमते शब्दार्थः द्विविध एव - शक्यः लक्ष्यश्च। अत्र पूर्वपदेन शक्यार्थः उच्यते। तर्हि रथो गच्छतीति प्रयोगो न स्यात् तत्र कृतेः बाधात् इति चेत् उच्यते – परस्मिन् सैव भावनेति। परस्मिन् लक्ष्यभूते इत्यर्थः। एवञ्च यत्र शक्यार्थः यत्नः न सम्भवति, तत्र आख्यातस्य भावनायां (व्यापारे) लक्षणेत्यर्थः। तदेवोपपादयति अग्रे – अनुकूल-व्यापारे लक्षणया प्रयोगात् इति।

अत्र परस्मिन् इत्यस्य मीमांसकमते इति व्याख्या तु चिन्त्यैव। अन्यमत-विचारस्य अत्र अप्रस्तुतत्वात्। विद्यते इत्याद्यनुरोधादिति। अस्ति, भवति, विद्यते, नश्यतीत्यादिषु भवनाश्रयः, नाशप्रतियोगी इत्येव बोधोऽनुभूयते। न हि तत्र यत्नस्य वा लक्ष्यस्य व्यापारस्य वा अनुभवः। अतस्तत्र आख्यातस्याश्रयत्वे प्रतियोगित्वे च लक्षणा स्वीकरणीया। तथा च यत्र यत्र यत्नानुभवो बाधितः, तत्र सर्वत्र आश्रयत्वमेव तिङा बोध्यते। तथा च रथो गच्छतीत्यत्रापि गम्धात्वर्थः उत्तरदेशसंयोगरूपं फलम्। तिङर्थः आश्रयत्वम्। तथा च संयोगरूपफलाश्रयो रथ इत्येव बोधः। अयमेव बोधो युक्तः, न तु

व्यापाराश्रयः इति। तदेवोपपादयति – अन्यदीयगमनानुकूलनोदनादिमति इति। गमनानुकूलं यत्र अन्यदीयं नोदनं, तत्र गमनाश्रये व्यापाराश्रयत्वस्य अभावात्, न गच्छतीति प्रयोगाच्च। न गच्छतीत्यस्य न स्वयत्नेन गमनाश्रयो भवतीत्यर्थः। यद्यप्यत्रोदाहृतकुसुमाञ्जलिग्रन्थेन धात्वर्थतया कः अभिप्रेतः केवलफलं वा फलव्यापारौ वेति स्पष्टतया न प्रतीयते। परन्तु तत्रैव अनन्तरकारिकायां फलस्यैव धात्वर्थत्वमिति सुस्पष्टं प्रतिपादितम् – तथा हि –न्यायकुसुमाञ्जल्यां पञ्चमस्तबके - "भावनैव हि यत्नात्मा सर्वत्राख्यातगोचरः" (न्या-कु-5-10) इति कारिकाव्याख्यायाम् - "न खलु सा भावना धातुना अभिधीयते। धातूनां क्रियाफलमात्राभिधायित्वात् । अन्यथा पाक इत्यादावपि भावनानुभवप्रसङ्गात्। आख्यातयोगेनैव हि पूर्वापरीभूतभावनानुभवो जायते। तस्मादाख्यातार्थः कृतिः। सा च यत्नरूपा। अतश्च कृतित्वमेव शक्यतावच्छेदकम्। न तु व्यापारत्वम्। तस्योपाधित्वेन शक्यतावच्छेदकत्वे गौरवात्। फूत्कारत्वादेरपि गुरुत्वादननुगतत्वाच्च नावच्छेदकत्वम्। किन्तु कृतित्वस्यैव जातिरूपतया लाघवेन शक्यतावच्छेदकत्वौचित्यात् कृतिरेव वाच्या" इत्युक्तमाचार्यैः। अत्र "धातूनां क्रियाफलमात्राभिधायित्वादि"ति प्रतीकमुपादाय तद्व्याख्यायां प्रकाशाख्यायां वर्धमानः - "फलस्य धात्वर्थतया पच्यर्थो विक्लित्तिर्लाघवात्, न तु तत्फलको व्यापारोऽधःसन्तापनादिः। न चैवं व्यापारविगमे फलसत्त्वकाले पचतीति प्रयोगापत्तिः। धात्वर्थानुकूलव्यापारवत्त्वस्याख्यातार्थतया व्यापारकाल एव पचतीति प्रयोगात्। अथैवं धात्वर्थतया फलं क्रियेति तण्डुलादेः कर्मता न स्यात् विक्लित्तिजनकफलभागित्वाभावात् इति चेन्न। परसमवेतव्यापारफलशालिनस्तण्डुलादेः कर्मत्वात्। विक्लित्त्यनुत्पादे व्यापारविगमदशायां "पाको वर्तत" इत्यत्र पाकपदे व्यापारलक्षणा। चैत्रः पचतीत्यत्र पाकानुकूलयत्नानुभवात् स एवाख्यातवाच्यः लाघवात्। न त्वनुकूलव्यापारः।यत्नत्वजात्यपेक्षया व्यापारत्वस्योपाधित्वेन गुरुत्वात्।न चाचेतनेऽपि आख्यातस्य मुख्यत्वार्थम् अनुगतो व्यापार एव शक्य इति वाच्यम्। शक्तिग्राहकेण लघुनि शक्तिग्रहात्। मुख्यत्वार्थं शक्तिकल्पने वृत्त्यन्तरोच्छेदापत्तेः।" इत्यादिना फलं धात्वर्थः कृतिरेव शक्यार्थः आख्यातस्य, तस्याश्च प्रथमान्तार्थेऽन्वयः ततश्च धातोर्वा आख्यातस्य वा व्यापारो न शक्यार्थ इति स्पष्टं तन्मतं प्रत्यपीपदत्। अन्यास्वपि कुसुमाञ्जलिव्याख्यासु आमोदबोधिनी -विवेकादिषु इदं स्पष्टम्। अतश्च एतादृशं मतमेव नास्तीति वचनं परास्तम्।

आख्यातवाददीधितावपि पूर्वोक्तं मतमित्थमनूदितम् -"आख्यातस्य यत्नो वाच्यः।पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात् । व्यवहारादिवद्बाधकं विना विवरणादपि व्युत्पत्तेः, किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विना

अनुपपत्तेश्च। अचेतने "रथो गच्छती"त्यादौ अनुकूलव्यापारे लक्षणेति प्राञ्चः। अन्यदीय-गमनानुकूलनोदनादिमति गच्छतीत्यप्रयोगात् रथो गच्छति जानाति इच्छति यतते द्वेष्टि विद्यते निद्रातीत्यादौ क्रियानुकूलकृतिव्यापारयोः अप्रतीतेः गत्यादिमात्रप्रतीतेश्च आश्रयत्वे, नश्यतीत्यादौ च प्रतियोगित्वे निरूढलक्षणा। कृञश्च यत्नार्थकत्वं क्रियाजन्यत्वेऽपि यत्न-जन्यत्वाजन्यत्वप्रतिसन्धानात् पटाङ्कुरयोः कृताकृतव्यवहारात् ज्ञात्रादिवदाश्रयपरतृजन्त-कर्तृपदस्य यत्नाश्रयबोधकत्वाच्च। क्रियायाः तदनुकूलव्यापारस्य वा कृञर्थत्वे तदाश्रयः कारकमात्रं वा कर्तृपदार्थः स्यात्।" इति प्राचीननैयायिकमतमुपन्यस्तम्। बृहद्दूषणेऽपी-दमेवानूदितमिति द्वयोः तोलनेन ज्ञायते। इदमेव हि कुसुमाञ्जलिकारस्य उदयना-चार्यस्यापि सम्मतम्।

< 42 > (पु.190-193)

अत्र वदन्तीति – स्वरूपसम्बन्धविशेष इति- घटो घटपदवाच्य इति अनुभवेन घटत्वस्य वाच्यतावच्छेदकत्वं सिद्ध्यति। दण्डः घटस्य कारणम् इति अनुभवेन दण्डत्वस्य घटकारणतावच्छेदकत्वं सिद्ध्यति। एवं घटो नास्तीति अनुभबलात् घटत्वस्य प्रतियोगिता-वच्छेदकत्वं सिद्ध्यति। एवम् अनुभवसिद्धाः वाच्यतावच्छेदकत्वादयः स्वरूपसम्बन्धविशेषा इत्युच्यन्ते। गुरुधर्मस्वरूपाणामपीति – घटत्वनिष्ठमवच्छेदकत्वं यदि घटत्वस्वरूपम्, तदा गुरुधर्मस्वरूपस्यावच्छेदकत्वस्य स्वीकारे न गौरवम् इति भावः। तस्य धर्मस्य क्लृप्तत्वात्। तदधिकस्य कस्यचिदकल्पनाच्च।

उभयत्रापि तुल्यत्वात् इति। वृत्तिज्ञानकार्यं पदार्थोपस्थितिः, तन्निष्ठकार्यतायां विषयतासम्बन्धेनावच्छेदकः पदार्थः, अवच्छेदकता-वच्छेदकं घटत्वादि। अत्र पङ्क्तिः – वृत्तिज्ञानकार्यतावच्छेदकतावच्छेदकत्वस्येति इति भवेत् इति श्रीमन्तः का.ई.देवनाथाचार्याः तिरुपतिस्थवेदविश्वविद्यालयकुलपतयः। स्वरूपसम्बन्धविशेष-स्यातिरिक्तत्वे लक्ष्यतावच्छेदकत्वमपि स्वरूपसम्बन्ध एवेति गुरुधर्मे लक्ष्यतावच्छेदक-त्वमपि स्वीकर्तुं न शक्यते, शक्यतावच्छेदकेन अविशेषात्। सुधीभिश्चिन्त्यमिति। प्राचीननैयायिकमते स्वरूपसम्बन्धः स्वरूपम् इति स्वीकृतम्। एवं प्रतियोगितेति। अन्यूनानतिरिक्तवृत्तिधर्मस्य गुरोरपि धर्मस्यावच्छेदकत्वसंभवात् स्वरूपसंबन्धविशेष-रूपत्वे गुरोः धर्मस्य प्रतियोगितावच्छेदकत्वं न स्यादिति भावः।

कम्बुग्रीवादिमान्नास्तीति। इदं वचनं दीधितिकारस्य। तेन कम्बुग्रीवादिमान्ना-स्तीति प्रतीतिबलात् गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वमङ्गीकृतम्। अन्ये दीधिति-

कारादयः। गुरुधर्मस्य प्रतियोगितावच्छेदकत्वं विनापि सा प्रतीतिरुपपादयितुं शक्येति निरूपयन् दीधितिकारवचनस्य चिन्त्यतां प्रतिपादयति - तच्चिन्त्यम् इति। चिन्ताबीजम् अग्रिमपङ्क्त्या निरूप्यते। तच्च गौरवज्ञानस्य प्रतिबन्धकत्वमेव नास्ति, कम्बुग्रीवादिमत्त्वस्य संसर्गतया प्रवेशात् इत्यादिना उच्यते।

अवच्छेदकत्वस्य संसर्गतया इति। कम्बुग्रीवादिमत्त्वं प्रतियोगितावच्छेदकत्वा-भाववत् इति निश्चये अवच्छेदकत्वं प्रकारतया अवगाहते। कम्बुग्रीवादिमान् नास्तीति निश्चयः यदि कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासम्बन्धेन कम्बुग्रीवादिमद्विशिष्टाभाव-विषयकः, तत्र कम्बुग्रीवादिमत्त्वस्यावच्छेदकता संसर्गतया भासते इति तयोः ज्ञानयोः समत्वाभावात् प्रतिबध्यप्रतिबन्धकभावः नास्ति।

धर्मितावच्छेदकशालि इति। कम्बुग्रीवादिमान् नास्तीति धीः निर्धर्मितावच्छेदक-कज्ञानम्,अभावत्वं कम्बुग्रीवादिमन्तं प्रति धर्मितावच्छेदकतया न भासते तत्र। निधर्मिता-वच्छेदककज्ञानस्य प्रतिबध्यत्वं नास्ति, प्रतिबन्धकत्वं तु कुत्रचित् भवति।

किञ्च, कम्बुग्रीवादिमत्त्वस्येति। इदं मतान्तरम्। पूर्वं गुरुधर्मस्यापि अवच्छेदकत्वं निरूपितम्। तत्र स्वरूपसम्बन्धरूपावच्छेदकत्वं स्वरूपापेक्षया नातिरिक्तमिति गुरुधर्मस्यापि तत्स्वरूपावच्छेदकत्वे दोषाभाव इत्युक्तम्। ततःगौरवज्ञानं कम्बुग्रीवादि-मान्नास्तीति धियं प्रति न प्रतिबन्धकमेवेति कम्बुग्रीवादिमान्नास्तीति प्रतीतिरुपपादिता। इदानीं कम्बुग्रीवादिमत्त्वस्य प्रतियोगितावच्छेदकत्वाभावेऽपि न यत्किञ्चित् घटवति कम्बुग्रीवादिमान् नास्तीति प्रतीतेः प्रमात्वमुपपद्यते।

किन्तु प्रमेयो घट इति। यथा प्रमेयो घटो नास्तीत्यत्र प्रमेयत्वं न प्रतियोगितावच्छेदकं किन्तु प्रतियोगिविशेषणम् तथा कम्बुग्रीवादिमत्त्वमपि न प्रतियोगि-तावच्छेदकम् अपितु प्रतियोगिविशेषणमेव। अतः गुरुधर्मस्य प्रतियोगितावच्छेदकत्वे नेयं प्रतीतिः प्रमाणमिति भावः। यत्किञ्चिद्घटवतीति। तद्घटवति भूतले कम्बुग्रीवादि-मद्घटान्तरप्रतियोगिकाभावस्याबाधितत्वात् कम्बुग्रीवादिमान् नास्तीति प्रयोगापत्तिः इत्यर्थः।

समव्याप्तेति। स च धर्मः प्रकृते घटत्वम्। तथा च तत्राभावः न केवलकम्बुग्रीवादिमत्त्वप्रतियोगिकत्वसंबन्धेन भासते अपि तु कम्बुग्रीवादिमत्त्वसमव्याप्त-घटत्वावच्छिन्नप्रतियोगिकत्वसंबन्धेन भासते। अतः यत्किंचिद्घटवति कम्बुग्रीवादिमान्ना-स्तीति न प्रयोगः इति इदं रामकृष्णभट्टाचार्येण निरूपितमिति।

रामकृष्णभट्टाचार्यः[10]

रामकृष्णभट्टाचार्यचक्रवर्तीति नाम्ना ख्यातः अयं महानैयायिकः काश्यां क्रि.श. षोडशशतकस्य पूर्वार्धे आसीदिति, दीधितिकारस्य रघुनाथशिरोमणेः नूतनानां सिद्धान्तानां प्रचारकश्चासीदिति ऐतिहासिकाः। अनेन च बहवो ग्रन्थाः रचिताः। ते च 1.प्रत्यक्ष-दीधितिटीका, 2.अनुमानदीधितिटीका, 3.आख्यातवादटीका, 4.नञ्वादटीका, 5.गुण-दीधितिप्रकाशः, 6.लीलावतीदीधितिटीका च। एतासु आख्यातवादटीकैव प्रकाशिता। अन्याश्च मातृकारूपेण तत्र अपूर्णाः उपलभ्यन्ते। अयं च महामहोपाध्यायोपाधिना भट्टाचार्यचक्रवर्तीत्युपाधिना च सम्मानित इति नञ्वादटीकापुष्पिकातः ज्ञायते। अयं च भट्टाचार्यः कौण्डभट्टेन सादरं स्मृतः। तदीयः अभिप्रायविशेषश्च सादरमङ्गीकृतः। श्रीरामकृष्णभट्टाचार्याः इति बहुवचननिर्देशेन कौण्डभट्टस्य न्यायशास्त्रगुरुः अयं भट्टाचार्यः स्याद्वेति संशयः जायते। भट्टोजीसमसामयिकः अयं भट्टाचार्यः कौण्डभट्टस्य गुरुस्थानीय एव स्यात्। अस्य ग्रन्थाः कौण्डभट्टेन परिशीलिताः अधीता वेत्यूहितुं शक्यते। रामकृष्णभट्टाचार्यस्य आख्यातवादटीकागतस्य "अत एव विपरीतव्युत्पन्नस्य घटः कर्मत्वमित्यादितोऽपि बोधः" इति वाक्यस्य अनुवादः भूषणसारे अष्टमकारिकाव्याख्याने "घटः कर्मत्वमानयनं कृतिरित्यादौ विपर्ययेणापि व्युत्पन्नानां नैयायिकनव्यादीनां बोधो न तद्व्युत्पत्तिरहितानाम्" इति दृश्यते इति निरूपयति ब्रान्क्हार्षृ महोदयः स्वीये लेखे[11]।

< 43, 44 > (पु.197-202)

नन्वस्तु इत्यारभ्य स्थितस्य ग्रन्थस्य अन्वयः इत्थम्। "नन्वस्तु तर्हि" इत्यस्य अग्रे "इत्यादिभिः दूषितप्रायमि"त्यनेनान्वयः। तथा च "ननु तर्हि धातोः केवलव्यापार-वाचकता फलं कर्मप्रत्ययार्थः.......नैयायिकप्राचां मतमपि यद्यपि ......इत्यादिभिः उक्त-युक्तिभिः दूषितप्रायमस्तु, तथापि इति अत्र ग्रन्थस्य समन्वयः कार्यः। यद्यपीत्यनन्तरं "त्यजिगमिस्यन्दीनां पर्यायतापत्ति"रित्यारभ्य..... "स्पन्दस्त्यागो गमनमित्यादेरविशेषा-पत्तेः उक्तत्वाच्च" इत्यन्तो ग्रन्थः धातोः केवलव्यापारवाचकत्वमिति प्राचीननैयायिकमत-खण्डनपरः। आपाततः दर्शनेन अयं ग्रन्थः अनन्वित इव लक्ष्यते। धातोः केवलव्यापार-

---

[10] वङ्गे नव्यन्यायचर्चा – दिनेशचन्द्रभट्टाचार्यः – 1951 pp-270-271

[11] Bhattoji dikshita and the revival of the philosophy of grammar – Johannes Bronkhost – "samskritasadhuta" – studies in honor of Prof. Ashok. N. Aklujkar. D.K.Printword – NewDelhi-2012.pp.71-72.

वाचकत्वं, फलं कर्मप्रत्ययार्थः इति इदम् अत्यन्तप्राचीनं नैयायिकमतम्। "क्रियाकालयोगाभिधायि क्रियाप्रधानमाख्यातम् धात्वर्थमात्रं च कालाभिधानविशिष्टम्" (न्या.सू. 5.2.7) इति न्यायभाष्यमत्र प्रमाणम्। अत्र आख्यातशब्दः तिङन्तपरः। तथा च तिङन्तं क्रियाकालाद्यार्थबोधकम्, धात्वर्थस्तु कालविशेषेण विशिष्यते, इति तस्यार्थः। अत्र क्रियाशब्दः लोकप्रसिद्धव्यापारपर एवेति केवलव्यापारस्य धात्वर्थत्वे भाष्यमिदं प्रमाणम्। इदं च प्राचीनं मतमिदानीं न केनापि नैयायिकेनाद्रियते। ननु इत्यारभ्य रचितोऽयं कृञोऽकर्मकतापत्तेः इत्यस्य अवतरणिकारूपः। तत्र यद्यपि ....तथापि मध्ये वर्तमानः ग्रन्थः उक्तप्राचीननैयायिकमतखण्डनपरः। तेनैव खण्डनेन कृञः फलव्यापारोभयार्थकत्वं सिद्धम्। तर्हि किमग्रे क्रियते इति चेदाह – सविषयमात्रेति।अत्र कृञ् सविषयकधातूपलक्षणम्।तथा च यथा कृञः फलव्यापारोभयवाचकत्वं,तथा जानात्यादिसविषयकधातूनामपि फलव्यापारोभयवाचकत्वमेवेति सर्वनैयायिकाभ्युपगतस्य जानात्यादेः केवलज्ञानेच्छादिक्रियावाचित्वस्य खण्डनार्थमेव कृञोऽकर्मकतापत्तेरितीति। तथा च जानात्यादेः केवलव्यापारवाचकत्वे अकर्मकतापत्तिः स्यादिति भावः। अयमस्य ग्रन्थस्य सारः – धातोः केवलव्यापारवाचकत्वं, द्वितीयादिकर्मप्रत्ययस्य फलवाचकत्वमिति प्राचीननैयायिकमतम्। ग्रामं गच्छतीत्यत्र अम् प्रत्ययार्थः संयोगः, गम्-धात्वर्थः तदनुकूलव्यापारः, तथा च ग्रामनिष्ठसंयोगानुकूलव्यापार(अनुकूलकृति)वान् इति बोधः। ग्रामं त्यजति इत्यत्र च अम् प्रत्ययार्थः विभागः, तदनुकूलव्यापारश्च त्यजेरर्थः, तथा च ग्रामनिष्ठविभागानुकूलव्यापार(अनुकूलकृति)वान् इति च बोधः। मते चास्मिन् कर्प्रत्ययस्य अनेकार्थत्वमागतम्। अनेकार्थस्य तस्य तत्र तत्र वाच्यार्थस्य नियन्त्रणाय तत्तद्धातुसमभिव्याहारः कारणत्वेन स्वीकरणीयः, तथा च अम् प्रत्ययस्य संयोगरूपफलवाचकत्वे गम्धातुसमभिव्याहारस्य, विभागरूपफलवाचकत्वे त्यजिसमभिव्याहारस्य च कारणत्वं कल्प्यते। तत्तद्धातुसमभिव्याहारस्य कारणत्वस्वीकारात् न ग्रामं गच्छति, ग्रामं त्यजतीत्यत्र विभागसंयोगयोः बोधापत्तिः। अकर्मकस्थले कर्मप्रत्ययस्यैवाभावात् फलप्रतीतिरेव न भवति। किन्तु धातुना केवलव्यापारमात्रप्रतीतिः इति तन्मतस्वरूपम्। एतत् निराक्रियते – त्यजिगमिस्यन्दीनामित्यादिना। पूर्वोक्तोदाहरणद्वये ग्रामं गच्छति, ग्रामं त्यजति इत्यत्र संयोगविभागयोः द्वितीयार्थत्वात् तदनुकूलः व्यापार एव धात्वर्थ इति, संयोगविभागजनकव्यापारस्य एकरूपत्वात् एकार्थतापत्तिः। तथा च भावप्रत्ययान्तयोः तयोः गमनं त्याग इत्यनयोः एकार्थकत्वात् पर्यायतापत्तिः। तथैव स्पन्देरपि। तथैव केवलयोः गच्छति, त्यजति इत्यनयोरपि पर्यायता स्यात्। किं च "कर्मवत् कर्मणा तुल्यक्रियः"

(पा.3.1.87) इति सूत्रेण यदा कर्मस्थो भावः विक्लित्त्यादिरूपः धात्वर्थत्वेन विवक्षितः (कर्मकर्तृप्रयोगे) तदा कर्मकर्तुः कर्मवद्भावो विधीयते पच्यते तण्डुलः स्वयमेवेत्यादौ। अयमपि प्रयोगो न स्यात्। विक्लित्तिरूपफलस्य धात्वर्थत्वाभावेन पचादीनां कर्मस्थभावकत्वाभावात्। न च तत्र अग्निसंयोगस्य धात्वर्थत्वे तत्संयोगस्य तण्डुलादिषु सत्त्वात् पचेः कर्मस्थभावकत्वमुपपद्यत इति वाच्यम्। तथा सति तादृशसंयोगस्य उभयनिष्ठत्वेन अग्नावपि तस्य सत्त्वात् पच्यते अग्निः स्वयमेव इति प्रयोगापत्तिः। अथ धात्वर्थजन्यफलाश्रयः एव "कर्मवत्कर्मणे"( पा. 3.1.87) तिसूत्रे कर्मशब्देन गृह्यते। तथा च तादृशधात्वर्थजन्यफलाश्रयत्वं तण्डुलं पचतीत्यादौ तण्डुलानामेवेति तण्डुलः पच्यते स्वयमेव इति प्रयोगः उपपद्यते, अग्नेस्तु तादृशफलाश्रयत्वाभावात् न भवति तथा प्रयोग इति चेत् – यत्यते पटः स्वयमेव इति प्रयोगापत्तिः। अत्रायं सन्दर्भः। कश्चित् प्रावरणाद्यर्थं पटमुत्पादयितुं यतते। तत्र चैत्रः प्रावरणाय पटे यतते इति प्रयोगः। यतेश्च अकर्मकत्वात् न पटशब्दात् द्वितीया। परन्तु इदानीं पटस्यापि धात्वर्थजन्यफलाश्रयत्वेन कर्मत्वं स्यात् पटस्य धात्वर्थयत्नजन्योत्पत्तिरूपफलाश्रयत्वात्। यदि च धात्वर्थः फलमपि स्यात् तर्हि उत्पत्तेरत्र धात्वर्थत्वाभावात् न तदाश्रयत्वेन पटस्य कर्मत्वमिति वक्तुं शक्यम्। तथा अस्वीकृत्य धात्वर्थजन्ययत्किञ्चित्फलाश्रयत्वमेव कर्मत्वमिति स्वीकारे यत्यते पटः स्वयमेव इति प्रयोगापत्तिः दुर्वारा। उत्पत्तिरूपफलाश्रयत्वमाश्रित्य कर्मत्वास्वीकारे क्रियते घटः स्वयमेव इत्यपि न स्यात्। यतेरिव कृञः अपि यत्नमात्रवाचित्वात्। अत्र कृञः सकर्मकत्वात् कर्मवद्भावः, यतेः अकर्मकत्वात् कर्मवद्भावो नेत्यपि वक्तुं न शक्यम्। सकर्मकत्वाकर्मकत्वनिर्वचनस्यैव मतेऽस्मिन् कर्तुम् अशक्यत्वात्। तथा हि – धात्वर्थव्यापारजन्यफलकत्वं सकर्मकत्वम्। यथा पचतीत्यत्र धात्वर्थः अधिश्रयणादिरूपव्यापारः, तज्जन्यं फलं विक्लित्तिः तादृशफलवत्त्वात् सकर्मकत्वं पचेः। अथवा विक्लित्तिरूपफलजनकव्यापारवाचकत्वरूपसकर्मकत्वं पचेः। एतादृशं सकर्मकत्वं कृञः उपपादनीयं चेत् फलम् उत्पत्तिः, तज्जनकक्रिया यत्नः, तद्वाचकत्वमित्युपपादनीयम्। तथा चेत् पूर्वोक्तरीत्या यतेरपि कृञ इव सकर्मकत्वापत्तिः दुर्वारा। तथा च "कर्मवत्कर्मणे"( पा. 3.1.87)त्यतिदेशप्रवृत्तिः दुर्वारा। नाप्यत्र यतेः स्वकर्माभावात् अतिदेशाप्रवृत्तिरित्यपि वक्तुं शक्यम्। स्वकर्मत्वस्यैव अत्र निर्वक्तुमशक्यत्वात्। यदि च तत् धात्वर्थव्यापारजन्ययत्किञ्चित्फलाश्रयत्वं तर्हि बहुत्रातिव्याप्तम्। अतिव्याप्तिमेव दर्शयति – गमेः पूर्वस्मिन् देशे इति। गम्-त्यज्-स्यन्दादिषु सर्वत्र संयोगविभागयोः प्रतीतिः, धात्वर्थव्यापारजन्यत्वं च अस्त्येव। अथापि गमेः उत्तरदेशसंयोगस्यैव धात्वर्थत्वेन, त्यजेः पूर्वदेशविभागस्यैव धात्वर्थत्वेन,

स्यन्देः केवलव्यापारार्थकत्वेन च गमेः प्रयोगे प्राप्यमाणस्य त्यजेः प्रयोगे त्यज्यमानस्य च कर्मत्वम्, स्यन्देस्तु धात्वर्थफलस्यैवाभावात् न वा त्यज्यमानस्य न वा प्राप्यमाणस्य कर्मत्वमिति सर्वाभ्युपगतो विषयः। इयं व्यवस्था धात्वर्थव्यापारजन्ययत्किञ्चित् फलाश्रयत्वं कर्मत्वमित्यभ्युपगमे अशक्या। तथा च गमेः प्रयोगे यथा संयोगाश्रयत्वेन उत्तरदेशस्य ग्रामादेः कर्मत्वं, तथा त्यज्यमानस्य प्रयागादेः विभागाश्रयत्वेन कर्मत्वं दुर्वारम्। तथा त्यजेर्विषये यथा त्यज्यमानस्य विभागाश्रयस्य कर्मत्वं, तथा प्राप्यमाणस्य उत्तरदेशस्य संयोगाश्रयत्वात् कर्मत्वं दुर्वारम्। तथा स्यन्देरपि पूर्वोत्तरदेशयोः त्यज्यमानप्राप्यमाणयोः कर्मत्वं दुर्वारमिति भावः। अथैतादृशातिव्याप्त्यादिवारणाय स्वार्थान्वितप्रत्ययार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वमिति वक्तव्यम्। स्वं धातुः, स्वार्थः व्यापारः। तदन्वितः प्रत्ययार्थः कर्मप्रत्ययार्थः संयोगादिरूपः, तद्व्यधिकरणो यो व्यापारः देवदत्तादिनिष्ठः, तद्वाचकत्वं गम्यादेः इति समन्वयः। तथा च कर्मप्रत्ययार्थफलव्यधिकरणव्यापारवाचकत्वरूपसकर्मकत्वस्वीकारेण ग्रामं गच्छतीत्यत्र अम् प्रत्ययार्थः संयोग एव, ग्रामं त्यजतीत्यत्र अम् प्रत्ययार्थः विभाग एव विवक्षित इति नान्यत्र कर्मत्वस्यातिव्याप्तिः, कर्मप्रत्ययार्थाश्रयस्यैव कर्मत्वात्, न वा सकर्मकत्वानुपपत्तिः फलव्यधिकरणव्यापारवाचित्वस्य सम्भवात्। अकर्मकस्थले कर्मप्रत्ययस्यैवाभावात् स्यन्दादिविषये एतल्लक्षणस्याप्रसक्तिरेवेति न कश्चिद्दोषः।अथापि कर्मप्रत्ययानाम् अनन्तफलेषु शक्तिकल्पनम्, तत्र पुनः व्यभिचारवारणाय तत्तद्धातुसमभिव्याहारस्य कारणत्वकल्पनमित्यादिगौरवाय कल्पते। तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन इति न्यायेन तत्तद्धातुसमभिव्याहृतप्रत्यये शक्तिकल्पनापेक्षया तद्धातावेव शक्तिकल्पने लाघवम्। अन्यथा सुबन्तेष्वपि सर्वत्र सुपामेव घटादिबोधकत्वं, घटादिप्रातिपदिकसमभिव्याहारस्य च तत्र कारणत्वमित्यपि कल्पयितुं शक्यत्वेन घटादिप्रकृतिषु शक्तिसिद्ध्यनापत्तिः। किञ्चैवं सकर्मकत्वस्य कथञ्चिन्निर्वाहेऽपि भावप्रत्ययान्तेषु त्यागः गमनमित्यादिषु एकार्थत्वापत्तिः दुर्वारैव। अतः धातोः व्यापारवाचकत्वमिव फलवाचकत्वमप्यभ्युपेयम् इत्यनेन प्रकारेण धातोः केवलव्यापारवाचित्वपक्षः दूषितप्रायः। इदानीं दूषणीयस्तु सर्वनैयायिकाभ्युपगतः जानात्यादिसविषयकधातूनां केवलव्यापारवाचित्वमिति पक्षः। तदेव निराकरोति - कृञोऽकर्मकतापत्तेरित्यादिना।

< 45 > (पृ.205-207)

कृञोऽकर्मकतापत्तेः इत्यस्य कृञः अकर्मकतायाः एवापत्तेरित्यर्थः। अर्थविशेषे कृञोऽकर्मकतायाः इष्टत्वात्। "अकर्माकाच्च" (पा. 1.3.35.) इति सूत्रेण अकर्मकात् कृञः आत्मनेपदविधानात्। तदेवोदाहरणद्वारा प्रदर्शयति – वायुर्विकरुते, सैन्धवाः

विकुर्वते इति। अत्र कृञः विकारप्राप्तिरर्थः। विकाररूपकर्मणः धात्वर्थरूपेणोपसङ्ग्रहात् अकर्मकत्वम्। तथा च अकर्मकतापत्तेः इत्यस्य सकर्मकत्वानापत्तेरिति तात्पर्यम्। यथा यतधातोः सर्वथा अकर्मकत्वमेव, तथा कृञः अपि स्यादिति भावः। नैयायिकः पुनः प्रकारान्तरेण कृञः यत्नवाचित्वं समर्थयितुं शङ्कते – नन्वेवमिति। वैयाकरणानां मते फलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वं, फलसमानाधिकरणव्यापारवाचित्वमकर्मकत्वम्। तथा च धातोः व्यापारार्थकत्वं वा यत्नार्थकत्वं वा न सकर्मकत्वाकर्मकत्वप्रयोजकम्। किन्तु फलसमानाधिकरणार्थकत्वं,फलव्यधिकरणार्थकत्वं च। तथा च कृञः यत्नार्थकत्वेऽपि उत्पत्तिरूपफलव्यधिकरणयत्नवाचकत्वात् सकर्मकत्वम् वक्तुं शक्यम्। तथा च नाकर्मकत्वापत्तिः इति। समाधत्ते – इति चेन्नेति। एवं सति यतेरपि सकर्मकत्वं स्यात्। यत्किंचिदुत्पत्तिव्यधिकरणयत्नार्थकत्वस्य वक्तुं शक्यत्वात्। उत्पत्त्यादिफलस्य भवन्मते धात्वर्थत्वाभावात्। धातोः केवलव्यापारवाचकत्वात्।

तदेवाह – केवलव्यापारवाचकत्वरूपस्य तस्य भवद्भिरभ्यु-पगमात् इति। एवं केवलव्यापारवाचकत्वपक्षं निराकृत्य, नव्यनैयायिकाभ्युपगतं जानातिकरोत्यादेः केवलव्यापारवाचित्वं निराकर्तुमाह – यद्वेति। कौण्डभट्टस्य समये नव्यनैयायिकाः दीधितिकारप्रभृतयः। जगदीशगदाधरौ तु कौण्डभट्टात् वयसा अवरौ। जगदीशः कौण्डभट्टसमकालिकः स्यात्। परन्तु शब्दशक्तिप्रकाशिका भूषणादनन्तरं रचिता। शब्दशक्तिप्रकाशिका 1665 क्रि. वर्षे रचितेति ऐतिहासिकाः। भूषणग्रन्थस्तु षोडश शतकारम्भे एव रचितः।1602 क्रि.वर्षाङ्कितमातृकायाः उपलब्धिरेव तत्र प्रमाणम्। अस्माभिः प्राप्तास्वपि मातृकासु अत्यन्तं प्राचीना तालपत्रमयी आन्ध्रलिप्या लिखिता मातृका 1647 क्रि.वर्षे लिखिता अस्ति, या च प्रतिलिपिरूपा। प्रतिलिपीकरणसमय एव तत्र 1647 क्रि.वर्षः निर्दिष्टः। ततश्च भूषणरचना अत्यन्तं प्राचीना। कौण्डभट्टेनापि दीधितिकारमतमेव तत्र तत्र उट्टङ्कितम्। नव्यनैयायिकास्तावत् फलव्यापारयोः धात्वर्थत्वमङ्गीकुर्वन्ति। फलविशिष्टः व्यापारः धात्वर्थ इति तेषां मतम्। इदमेव मतं शब्दशक्तिप्रकाशिकायाम् व्युत्पत्तिवादे च विस्तरेण प्रतिपादितम्। आख्यातार्थस्तु कृतिरेव। तथा च धात्वर्थविषये वैयाकरणानां नव्यनैयायिकानां च ऐकमत्यमेव लघुभेदं विना। भेदश्च केवलमयम् यत् फलव्यापारयोः विशकलितयोः पृथक् शक्तिः अङ्गीक्रियते वैयाकरणैः, फलविशिष्टव्यापारस्य धातुशक्यत्वमुच्यते नैयायिकैः। एवं धातुसामान्यस्य फलविशिष्टव्यापारवाचित्वाङ्गीकारेऽपि सविषयकधातूनां जानात्यादीनां तु केवलज्ञानेच्छादिवाचित्वमेव तैरुच्यते। तत्र तु धातोः केवलव्यापारवाचित्वमेवेति तेषां मतम्। अत्र

आख्यातवाददीधितिं प्रमाणयति – "पटं जानाति, इच्छति, कुरुते, चैत्रो मैत्रेण ज्ञायते, इष्यते, क्रियते वा घट इत्यत्र कर्मप्रत्ययेन यथायथं विषयित्वं विषयत्वं वोच्यते, फलाभावेन धात्वर्थतावच्छेदकफलाश्रयत्वरूपकर्मत्वासम्भवादिति निरूपितमाख्यातवादशिरामणौ" इति। ज्ञान-इच्छा-द्वेष-यत्नानां गुणेषु अन्तर्भावात् जानात्यादीनां तदर्थकत्वमेवेति तत्र ज्ञानादिरेव व्यापार इति तैः स्वीक्रियते। तदतिरिक्ततया फलं पचत्यादिष्विव किमपि नानुभूयते इति, न फलविशिष्टव्यापारवाचित्वमेषाम्। यद्यप्येते सकर्मकाः, तथापि न मुख्यवृत्त्या सकर्मकाः इति तेषाम् आशयः।

तदेव निराकर्तुमारभते – यद्वेति। अकर्मकतापत्तेः इत्यस्य सकर्मकतानापत्तेरित्यर्थः। कृञः यत्नार्थकत्वे कृञोऽपि सविषयार्थकत्वेन केवलव्यापारवाचित्वात् सकर्मकत्वं न स्यादिति। तदेव उपपादयति – तथा हीति। वैयाकरणमते यथा स्वार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वं, तथा नव्यनैयायिकमते फलविशिष्टव्यापारवाचित्वं सकर्मकत्वम्। यत्र एतादृशं सकर्मकत्वं नास्ति, सः धातुः अकर्मकः। यथा स्यन्द् धातुः। तत्र तु केवलव्यापार एवार्थः। न तु फलविशिष्टः। एवं च यथा स्यन्दतेः केवलव्यापारवाचकत्वेनाकर्मकत्वं, तथा कृञः अपि केवलव्यापारवाचकत्वेन अकर्मकत्वमेव स्यात्। तदेवोपपादयति – त्वन्मते इत्यादिना। अत्र प्रमाणतया आख्यातवादशिरोमणिं प्रदर्शयति। पटं जानाति, इच्छति, कुरुते इत्यत्र द्वितीयार्थः विषयित्वं, चैत्रो मैत्रेण ज्ञायते, इष्यते, क्रियते घटः, इत्यत्र कर्म तिङर्थः विषयत्वम् इति समन्वयः। पटं जानातीत्यत्र पटविषयकज्ञानवान् इति बोधः। चैत्रो मैत्रेण ज्ञायते इत्यत्र मैत्रनिष्ठज्ञानविषयः चैत्र इति बोधः। इयमकर्मकतापत्तिः न केवलं कृञः। अपि तु सविषयार्थकानां सर्वेषाम्। अत्र कृञ् सविषयार्थकधातूपलक्षणम्। फलस्यैवाभावेन फलावच्छिन्नव्यापारवाचकत्वरूपसकर्मकत्वासम्भव इति भावः।

नन्वेवं पटादीनां कर्मत्वानापत्तिः। धात्वर्थतावच्छेदकफलाश्रयत्वस्यैव मतेऽस्मिन् कर्मत्वात् इति चेत् सत्यम्। तत्र च भाक्तं कर्मत्वमिति, धातोः सकर्मकत्वमपि भाक्तमिति(लाक्षणिकमिति) तैः स्वीक्रियते। तदेवोल्लिखति – यत्त्वित्यादिना। भाक्तत्वस्य अयुक्ततां प्रतिपादयति – व्यवहारस्येति। भाक्तं व्यवहारमाश्रित्य कार्यप्रवृत्तिः कुत्रापि नास्ति। अत्रैवोदाहरणं भूषणसारे प्रदत्तं "न हि गङ्गापदस्य तीरे भाक्तत्वेऽपि न तेन स्नानादिकार्यं कर्तुं शक्यम्" इति। किञ्च आख्यातवादशिरोमणावेव फलावच्छिन्नव्यापारवाचकेभ्य एव कर्मप्रत्यय इत्युक्तम्। तथा च सविषयकधातुष्वपि येषां सकर्मकत्वमिष्टं तत्र कस्यचित्फलस्यापि स्वीकार आवश्यक एव।

**< 50 >** (पु.228-230)

द्व्यर्थः पचिरिति। "कर्तुरीप्सिततमं कर्म" (पा. 1.4.49.) इति सूत्रस्था भाष्यपङ्क्तिरियम्। तत्र हि –"अथेह कथं भवितव्यं तण्डुलानोदनं पचतीति, आहोस्वित् तण्डुलानामोदनं पचतीति? उभयथापि भवितव्यम्। कथम्? इह हि तण्डुलानोदनं पचतीति, द्व्यर्थः पचिः, तण्डुलान्पचन्नोदनं निर्वर्तयतीति। इहेदानीं तण्डुलानामोदनं पचतीति, द्व्यर्थश्चैव पचिः, विकारयोगे षष्ठी, तण्डुलविकारमोदनं निर्वर्तयति" इति। अत्र कैयटः – द्व्यर्थः पचिरिति। विक्लेदनोपसर्जने निर्वर्तने पचिर्वर्तते। तण्डुलान् विक्लेदयन् ओदनं निर्वर्तयतीत्यर्थः। तत्रोपसर्जनविक्लेदनक्रियापेक्षं तण्डुलानां कर्मत्वम्। प्रधानभूत-निर्वर्तनापेक्षं त्वोदनस्य। द्व्यर्थश्चैवेति। तण्डुलानां सम्बन्धिनं विकारविशेषमोदनं विक्लित्त्या निर्वर्तयतीत्यर्थः। सा च विक्लित्तिः सामर्थ्यात् तण्डुलानामेवेति विज्ञायते।

पूर्वोक्तकैयटपरिशीलनेन पचेः द्व्यर्थत्वं च विक्लेदननिर्वर्तनरूपक्रियाद्वयाभिधायित्व-रूपमिति ज्ञायते। तत्र विक्लेदनक्रियायाः विक्लित्तिः फलं, निर्वर्तनक्रियायाश्च उत्पत्तिः फलम्। तादृशफलद्वयाश्रितत्वेन तण्डुलोदनयोः कर्मत्वमिति कैयटस्य आशयः।

कौण्डभट्टस्तु अत्र व्यापारद्वयार्थकत्वं नाङ्गीकरोति। किन्तु एक एव व्यापारः विक्लित्त्युत्पत्तिरूपफलद्वयसाधक इति तस्य आशयः। तथा च विक्लित्ति-उत्पत्तिरूपफल-द्वयवाचकत्वमेव द्व्यर्थत्वमिति तस्याशयः। तदेव स्पष्टं कथयति – एकस्यैव व्यापारस्य उभयफलहेतुत्वसंभवेन व्यापारद्वयार्थत्ववर्णनस्याप्यसंभवात् इति।धातोः फलव्यापारो-भयवाचकत्वे भाष्यमिदं प्रमाणमित्यत्र न कस्यापि विप्रतिपत्तिः।

उपलक्षणमिति। स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वमुपलक्षणत्वम्। अत्र च कृञ् धातुः स्वस्य फलव्यापारोभयवाचकत्वं प्रतिपादयन् , स्वेतरेषां स्वजातीयानां सर्वेषां धातूनां फलव्यापारोभयवाचकत्वं प्रतिपादयतीति कृञ् धातुः धातुसामान्यस्य उपलक्षणं भवति।

**< 51 >** (पु.234-236)

पचति पाकं करोतीति विवरणवाक्यगतकृञः व्यापारार्थकत्वेऽपि क्वचिद्यत्नप्रतीतिः भवितुमर्हतीति प्रतिपादयति – कथं तर्हीत्यादिना। धातुः शक्तः। व्यापारो शक्यः। तथा च शक्ततावच्छेदकं धातुत्वजातिः। सामान्यतः व्यापारत्वं च शक्यतावच्छेदकम्। अतः सर्वत्र धातुषु व्यापारस्यैव वाच्यता। तर्हि क्वचिद्यत्नत्वेन बोधः कथमिति चेत् उच्यते – शक्ति-भ्रमात् लक्षणया वेति।

अथात्र यत्नस्य कृञर्थत्ववादी पृच्छति – भवता व्यापारस्य वाच्यतां स्वीकृत्य यत्ने लक्षणा उच्यते, तर्हि तथा मास्तु यत्न एव वाच्यो भवतु , व्यापार एव लक्षणास्तु तथा सति मम मतेऽपि न दोष इति। समाधत्ते – सत्यम् इति। व्यापारस्यैव वाच्यत्वे युक्तिं प्रदर्शयति – व्यापारत्वस्याधिकसङ्ग्राहकत्वेनेति। अधिश्रयणमारभ्य यत्नपर्यन्तं सर्वोऽपि क्रियासमूहः व्यापारपदेन संग्राह्यो भवतीति, तत्समूहगतैकदेशेऽपि तद्वाचकशब्दस्य प्रवृत्तिः स्वतः सिद्धा ग्रामशब्दवत्। तथा च समूहे व्यापारे शक्तिः, तदेकदेशबोधने लक्षणेति स्वीकारेण शक्यार्थस्य अत्यागेनैव तत्सम्बद्धार्थैकदेशप्रतीतिः लक्षणयेति, एकदेशभूत-यत्नादिषु लक्षणा युक्ता। यत्नस्यैव धात्वर्थत्वे तु व्यापारे तस्य प्रयोगे लक्षणैवोपपादयितुं न शक्या, शक्ययत्नसम्बन्धस्य व्यापारे उपपादयितुमशक्यत्वात्। अतः व्यापारे लक्षणा अधमा भवति। तदेव कथयति – जघन्येति। यत्नबोधं विनैव व्यापारबोधस्थलं निदर्शयति – दावाग्निर्वनं दहति इति। अत्र दहधातोरचेतनकर्तृकत्वात् यत्नरूपोऽर्थः विवक्षितु-मेवाशक्यः।

**< 52, 53 >** (पृ.241-249)

केवलफलवाचकत्ववादिनिरासेनेति। तिङन्ते धातुना वा आख्यातेन वा व्यापारो वा भावना वा कृतिर्वा यत्नो वा नोच्यते। किन्तु तत्र धातुः फलमात्रमभिधत्ते। आख्यातं तु संख्यां, कालं चेति प्राचीनप्राभाकरमतमत्र केवलफलवाचकत्ववादीति पदेन निर्दिश्यते। इदमेव मतं भूषणसारे व्यापारो भावनेति कारिकायाः लडाद्यन्ते भावनायाः अवाच्यत्वं वदतः प्राभाकरादीन् प्रति व्यवस्थापयति इति अवतरणग्रन्थेन निर्दिष्टम्। भूषणसारे प्रधानतया प्राभाकारमतनिराकरणं व्यापारो भावनेति कारिकायाः लक्ष्यमिति च ज्ञायते। भूषणे तु प्रथमं नैयायिकमतमेव लक्ष्यतया स्वीकृतम्। तदनुसारमेव "व्यापारो भावना, किन्तूत्पादनं, निर्वर्त्ये च विकार्ये च" इति कारिकात्रयं व्याख्याय अनन्तरम् "अथवा व्यापारो भावना सैवेत्यादिना साधितमपि विवरणानुरोधेन व्यापारवाचकत्वं केवलफलवाचकतावादि-निरासेन समर्थयितुं तन्मतनिरासनाय अयं ग्रन्थः" इति उपक्रम्य तथा हीत्यादिना तदेव प्राचीनं प्राभाकरमतं विस्तरेण प्रतिपादितम्। इदं च प्राभाकरमतं प्रकरणपञ्चिकायां वाक्यार्थमातृकायां, वाक्यार्थरत्ने, शब्दशक्तिप्रकाशिकायां चोपलभ्यते। तथा हि – "कार्याभिधायिलिङादीनामेव कार्यविशेषणीभूतकृतिरूपभावनावाचकत्वम्। तदतिरिक्ता-ख्यातस्य न भावनावाचकत्वम्। फलमात्रं धात्वर्थः। प्रकृत्यर्थफलेन आक्षेपात् संसर्ग-मर्यादया वा व्यापाररूपभावनायाः भानम्। आख्यातार्थस्तु कालः संख्या च। यच्च प्रतिपाद्यते पचति - पाकं करोति इति विवरणेन करोतिसामानाधिकरण्यात् सर्वाख्यातानां भावनावचनता

सिद्ध्यतीति तन्न युक्तम्। यद्यपि करोतिः प्रयत्नपरः तथाप्यत्र किं करोति इति प्रश्नस्य यत्करोति तत्किमिति करोत्यर्थविषयता यदि स्यात् तर्हि पचतीत्युत्तरस्य पाकं करोतीत्यर्थता। नचैवं लोकविवक्षा। किन्त्वनवगते व्यापारविशेषे तद्विशेषावगमाय प्रश्नः क्रियते। तत्र चोत्तरभूतेन पचतीत्यनेन व्यापारविशेष एवाभिधीयत इति युक्तम्। सर्वोऽपि प्रश्नः प्रतिवचनं च सामान्यतो ज्ञाते विशेषतोऽज्ञाते। अत्र च धात्वर्थगोचरे एव ज्ञानाज्ञाने। अतश्चात्र करोतेः कस्यचिदभूतस्य भवनेऽनुकूलस्वभावोऽर्थः। सर्वेऽपि धात्वर्थाः तादृशा इति करोतिना प्रष्टुं निर्देष्टुं च शक्यन्ते। किं च किंकरोति पचतीति प्रश्नोत्तरे सप्रयत्नक्रियेषु घटेताम्। अप्रयत्नक्रियेषु "किं करोति? रथो गच्छती"त्यादिषु कथम्? सप्रयत्नेष्वपि "आस्ते, शेते" इत्यादिषु कथन्तराम्? करोतेर्व्यापारमात्रविषयत्वेऽभ्युपगते तु सर्वत्रोपपत्तिर्भवति। अतश्च नाख्यातानां करोत्यर्थता। "क्रियाप्रधानमाख्यातम्" इति लिङ्विषये एव। तत्रैव क्रियायाः विशेष्यतया बोधात्। न च पचतीत्यस्य पाकं करोतीति विवरणं दृश्यते, तत्र प्रकृत्यर्थादपि स्फुटत्वात् प्रधानत्वाच्च प्रत्ययार्थस्यैव विवरणं करोतिना क्रियत इति आख्यातार्थस्य करोत्यर्थतेति वाच्यम्। तच्च अशब्दार्थकर्मत्वविवरणवत् अशब्दार्थसम्बन्धघटककृतिविवरणमेव, "पचति चैत्र" इत्येतत्पदजन्यबोधे धात्वर्थपाकस्य स्वानुकूलकृतिसम्बन्धेन चैत्रविशेषणत्वात्। अतः नैतद्विवरणमपि तद्वाच्यत्वसाधकम्। धात्वर्थप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावः। कारकाणामपि धात्वर्थे फले एव अन्वयः। उक्तञ्च प्रकरणपञ्चिकायां वाक्यार्थमातृकायाः द्वितीयपरिच्छेदे शालिकानाथेन - "वृद्धव्यवहाराच्छब्दार्थनिर्णयः। न चाख्यातानां भावनावचनत्वमन्तरेण कस्यचित् वृद्धव्यवहारस्यानुपपत्तिः। प्रश्नोत्तरे तु सम्बन्धज्ञानोत्तरकालभाविनी। अतो न तद्वशेन सम्बन्धनिरूपणा। कर्त्रादिसंख्यामात्रवाचितया आख्यातप्रयोगोपपत्तौ नाधिकं शक्यं कल्पयितुम्। "पाकं करोति देवदत्त" इत्यत्र पच्यर्थं पाकशब्दो ब्रवीति, तदनुगुणं प्रयत्नं करोतिराचष्टे, आख्यातं तु केवलकर्तृसंख्यां वक्तीति सिद्धं तावत्तन्मात्रवाचित्वम्। अतोऽन्यत्रापि तत्रैव वर्तत इति युक्तम्। एवं "पचति देवदत्त" इत्यस्य यद्विवरणं "पाकं करोती"ति न तदप्यनुपपन्नम्। पचतीत्यत्र यः पुरुषप्रयत्नः यत्सम्बन्धेन पच्यर्थसाध्यभूतः तं करोतिना प्रकृतिभूतेनोपादाय विवरणोपपत्तेः। यत्रापि प्रयोगो "रथो गमनं करोति" इति तत्रापि प्रयत्नस्यापरस्याभावात् गमनस्य साध्यतां दर्शयितुं गौणः करोति प्रयोगो द्रष्टव्यः। यस्तु "ओदनं पचती"त्यादौ वृद्धव्यवहारे एव प्रकृत्यर्थातिरिक्ते प्रयत्ने प्रयोगात् आख्यातानां तदर्थमाह स इत्थं शिक्षयितव्यः - वत्स ! किं न वेत्सि अनन्यलभ्यः शब्दार्थ इति। इह च प्रकृत्यर्थाक्षेपेणापि तत्सम्भवात् न शक्यते तद्वाचकता आख्यातानाम् आश्रयितुम्" इति।

जगदीशोऽपि शब्दशक्तिप्रकाशिकायाम् आख्यातवादे

"धात्वर्थेन विशिष्टस्य विधेयत्वबोधने।

समर्थः स्वार्थयत्नस्य शब्दो वाख्यातमुच्यते॥"(श.श.प्र.श्लो.97)

इति आख्यातलक्षणव्याख्यायां - "ननु कृत्यादिकं नाख्यातार्थः, किन्तु कालः संख्या च, तयोः प्रकारान्तरालभ्यत्वात्।"चैत्रः पचति, रथो गच्छति" इत्यादौ धात्वर्थस्यैव पाकगत्यादेः कृतिमत्त्वाश्रयत्वादिसम्बन्धेन चैत्रादौ प्रकारत्वात्। "मैत्रः पच्यत" इत्यादितो मैत्रादेः कर्तृत्वादिना "तण्डुलः पचती"त्यादौ तण्डुलादेः कर्मत्वादिना संसर्गेण पाकादावनन्वयेन धात्वर्थ एव धर्मिणि नामार्थस्य भेदेनान्वयोऽव्युत्पन्नो न तु नामार्थेऽपि धात्वर्थस्य। न चैवं "ज्ञानं चैत्र" इत्यादितोऽपि बोधरूपस्य धात्वर्थस्याश्रयत्वसम्बन्धेन चैत्रे धर्मिणि अन्वय-प्रसङ्गः। तत्र ज्ञानादिपदस्य बुद्ध्यर्थकनामतया तदर्थस्य नामान्तरार्थे भेदेनान्वयस्याव्युत्पन्न-त्वादेव तदसम्भवात् इति प्राभाकराः" इति तन्मतं प्रपञ्चितम्। नन्वेवं फलमात्रस्य धात्वर्थत्वे तस्यैव नामार्थे भेदेनान्वयः स्वीकर्तव्यः। न चेष्टापत्तिः। धात्वर्थप्रातिपदिका-र्थयोः साक्षात् भेदेनान्वयस्य अव्युत्पन्नत्वात्। अन्यथा "तण्डुलः पचति चैत्र" इत्यादा-वपि अन्वयो भवेदिति चेन्न। विशेष्यतासम्बन्धेनाभेदातिरिक्तसंसर्गकप्रातिपदिकार्थ-प्रकारकबोधे निपातसुबादिजोपस्थितेरेव हेतुत्वमिति धात्वर्थे प्रातिपदिकार्थस्य भेदेन प्रकारतया अन्वयानभ्युपगमात्। अतश्च धात्वर्थस्य कृतिमत्त्वादिसम्बन्धेन प्रथमान्ता-न्वये न किंचिद्बाधकम्।इति।

लडादौ इति। लिङादिविध्यर्थकेतरलकारे इत्यर्थः। विध्यर्थकलिङ्लोडाद्यन्ते भावनायाः वाच्यत्वस्य तैः स्वीकारात्। भावना वाच्यैव नेति। यत्नत्वेन कृतित्वेन व्यापारत्वेन वा न वाच्येत्यर्थः। अपि तु संसर्गरूपेणैव तस्याः प्रतीतिरित्यर्थः। पचति – पाकं करोतीति विवरणात् आख्यातस्य यत्नार्थकत्वमाक्षिपति – यत्त्विति। अत्र हि भावनायाः आख्यातार्थत्वे युक्तिद्वयं प्रदर्श्यते। तत्र प्रथमा युक्तिः विवरणम्। किं करोतीति प्रश्ने पचतीत्युत्तरम् च। अत्र च प्रश्नः क्रियाविशेषविषयक इति, विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वात् सामान्यतः क्रिया करोत्यर्थः सम्पद्यते।तेन च विवरणेनाख्यातस्य करोत्यर्थकत्वं सिद्ध्यति। द्वितीया युक्तिः धात्वर्थस्य फलस्य साक्षात् चैत्रादिप्रथमान्ते अन्वयानुपपत्तिः। इति। यदि चाख्यातस्य भावना न वाच्या, तर्हि धात्वर्थफलस्य भेदसम्बन्धेन स्वजनककृतिमत्त्वसम्बन्धेन साक्षात् प्रथमान्तपदार्थे चैत्रादावन्वयः वक्तव्यः। धात्वर्थनामार्थयोः तथा भेदेन अन्वयः अव्युत्पन्नः। यदि च तथान्वयः

स्वीक्रियेत तर्हि तण्डुलं पचति चैत्रः इत्यर्थे तण्डुलः पचति चैत्र इति प्रयोगापत्तिः, तण्डुलनामार्थतण्डुलस्य निष्ठत्वरूपेण भेदसम्बन्धेन धात्वर्थफलेऽन्वयात् इति।

समाधत्ते – तन्नेति। तत्र प्रथमयुक्तेः निराकरणं विवरणस्येति। विवरण-वाक्यबोधविषयाः यावन्तः पदार्थाः ते सर्वेऽपि विव्रियमाणवाच्यार्थाः न भवन्ति। तथा हि - पाकं करोति इति विवरणे चत्वारः अर्थाः प्रतीयन्ते। तत्र पाकपदार्थः पाकः, अम् पदार्थः कर्मत्वं, कृञ् धात्वर्थः क्रिया, तिप्रत्ययार्थः एकत्वादि। एतेषु चतुर्षु पचतीत्यस्य विवरण-रूपेण पाकनामार्थः पाकः, कृञर्थः क्रिया च पचतिपदार्थत्वेन स्वीक्रियते। अन्ययोः द्वयोस्तु न शब्दार्थत्वम्। अमाद्यर्थस्य तु न शब्दार्थत्वं, किन्तु संसर्गरूपत्वमेव इति नैयायिकादीनां मतम्।

प्राभाकरास्तु विवरणवाक्ये केवलं पाक इति नामैव शब्दार्थविवरणम्। अन्यत्सर्वं संसर्गविवरणमेव। न तु शब्दार्थविवरणमिति कथयन्ति। तथा च पाकं करोतीति विवरणेन धातोः पाकार्थकत्वमेव प्रतीयते, न तु फलभावनोभयवाचकत्वमित्यर्थः। तदेवोपपादयति – तथा हीति। "चैत्रः पचती"त्यत्र पचधात्वर्थस्य विक्लित्तिरूपफलस्य स्वजनककृत्या-श्रयत्वसंबन्धेन चैत्रे प्रथमान्तार्थेऽन्वयः। तथा च विवरणवाक्यगतेन अम्प्रत्ययेन, करोतिना च अयं संबन्ध एव बोध्यते। संसर्गस्य तु अपदार्थत्वं नैयायिकमीमांसकमतसाधारणम्। तदेव स्पष्टं कथयति – द्वितीयाख्यातयोरिवेति। एवं च द्वितीया, करोतिः आख्यातं च मिलित्वा एतादृशं सम्बन्धं बोधयन्तीत्यर्थः। द्वितीयाख्यातयोर्विषये तु तदर्थस्य अशब्दार्थत्वं तयोः संसर्गबोधकत्वं च सर्वाभ्युपगतम्। नन्वेवं पाकानुकूलकृत्याश्रयः चैत्र इति लोकसिद्धः बोधः न सिद्ध्येदिति चेदाह – कृतित्वादिप्रकारकबोधस्तु इति। अयं च बोधः न प्राथमिकः, अपि तु मानसिकः पार्ष्टिकः। अमुमेव मानसिकं बोधमादाय किं करोतीति यत्नप्रश्नः, पचतीत्युत्तरमपि सिद्ध्यति। अतः विवरणं वा, यत्नप्रश्नो वा नाख्यातस्य यत्नार्थत्वसाधकम्। तदेव वदति – प्रश्नोऽपीत्यादिना। वस्तुतः किं करोतीति व्यापारविषयकः प्रश्नः न सार्वत्रिकः। अपि तु क्वाचित्कः। अतः तत्सन्दर्भे फलवाचकपाकशब्दस्य तद्विषयकयत्ने लक्षणा। तत्र पाकपदं लक्षणया पाकविषयकयत्नं बोधयतीत्यर्थः। किं करोतीति फलविषयकः प्रश्न एव सार्वत्रिकः। अतः स च उपपन्न एव। पाकशब्दस्य फलमात्रवाचित्वात्। एतावता विवरणेन आख्यातस्य वा धातोर्वा व्यापारार्थकत्वं साधयितुं न शक्यमित्युपपाद्य, नामार्थधात्वर्थयोः भेदेनान्वयोऽव्युत्पन्न इति यदुक्तं तद्विषयेऽपि समाधत्ते – तण्डुलः पचतीत्यादाविति। तण्डुलः पचतीत्यत्र तण्डुलनामार्थस्य विशेषणतया धात्वर्थविक्लित्तौ भेदेनान्वये तण्डुलः विशेषणं भवति धात्वर्थश्च विशेष्यम्। चैत्रः पचतीत्यत्र तु

पचधात्वर्थः विक्लित्तिः विशेषणम् चैत्र इति नामार्थो विशेष्यम्। तथा चात्र धात्वर्थः विशेषणम्। चैत्र इति नामार्थः विशेष्यम्। इदानीमत्र तण्डुलः पचतीति प्रयोगः तण्डुलं पचतीत्यर्थे वारणीयः। स च नामार्थस्य धात्वर्थे विशेषणतया भेदेन अन्वयो न इति कल्पनयैव वारयितुं शक्यः। तथा च धात्वर्थस्य विशेषणतया नामार्थेऽन्वये तु न किञ्चिद्बाधकम्। न वा अतिप्रसङ्गः। तथा च तिङन्ते भावनायाः वाच्यत्वे उक्तं पूर्वोक्तं युक्ति-द्वयं युक्त्याभासरूपमेवेति भावः। नामार्थस्य विशेषणतया अन्वयबोधं प्रति विशेष्यतया निपातसुबादिजन्योपस्थितिरेव हेतुः कल्प्यते। तदेवाह – निपातसुबादिजन्योपस्थितेरिति। अयं च कार्यकारणभावः सर्वैरभ्युपगत एव। इदानीं धात्वर्थस्य साक्षात् प्रथमान्तार्थेऽ-न्वयस्वीकारे लाघवमपि प्रदर्शयति – धात्वर्थप्रकारकबोधे प्रथमान्तपदजन्योपस्थितेरेव लाघवेन हेतुत्वात् इति। लाघवमेव उपपादयति – अन्यथेति। अयं भावः। यैः आख्यातस्य यत्नाद्यर्थकत्वं स्वीक्रियते तैः कार्यकारणभावद्वयमित्थं कल्पनीयम्। धात्वर्थप्रकारकशाब्दबोधे विशेष्यतया आख्यातार्थयत्नाद्युपस्थितिः कारणम् इति प्रथमः। ततः आख्यातार्थस्य प्रथमान्तार्थेऽन्वयाय आख्याता-र्थयत्नादिप्रकारकबोधे विशेष्यतया प्रथमान्तपदजन्योपस्थितिः कारणमिति द्वितीयः। यदि च धात्वर्थस्य साक्षात् प्रथमान्तार्थेऽन्वयोऽभ्युपेयते तर्हि धात्वर्थप्रकारकबोधं प्रति विशेष्यतया प्रथमान्तपदजन्योपस्थितिः कारणम् इति एक एव कार्यकारणभावः। तथा च आख्यातस्य यत्नाद्यर्थकत्वे आख्यातस्य तत्र शक्तिः तत्र धात्वर्थान्वयाय पृथक् कार्य-कारणभावः इति द्वयम् अधिकतया कल्पनीयमिति तत्पक्षे गौरवम्। मत्पक्षे तु आख्याते शक्तिकल्पनापि नावश्यकी, तदर्थं कार्यकारणभावश्च नावश्यक इति लाघवमित्यर्थः।

आख्यातस्य भावनायां (यत्ने) शक्तिरिति यस्य मतं तन्मते आख्यातस्य भावनार्थकत्वं वक्तव्यं, पचति इत्यस्य पाकानुकूलयत्नवानिति बोधार्थमिति शङ्कते – न चेति। समाधत्ते – यदि तत्तद्बोधमाश्रित्य शक्तिः कल्प्यते तर्हि आख्यातस्य कर्तरि शक्ति-ग्रहवतः बोधार्थं कर्तरि अपि शक्तिः कल्पनीया स्यात् इति आह – एवं ह्याख्यातार्थः कर्तेति। आख्यातार्थस्य कर्तृकर्मार्थत्वे तयोः आख्यातस्य शक्तिकल्पना गौरवाय चेत् आख्यातस्य कृतिफलयोः शक्तिकल्पनापि गौरमेव भवति। तदेवाह – कृतिफलयोरिति। अत्र कृतिफलयोः शक्तिकल्पनागौरवमधिकमिति चेत् कर्तृकर्मणोः शक्तिकल्पनागौरवं तवाप्यधिकमिति दिक् इति वाक्यम् असम्बद्धमिव प्रतीयते। नैयायिकमते कर्तृकर्मणोः शक्तिकल्पनाया एवाभावात्। अतः अत्र कर्तृकर्मणोः शक्तिकल्पनागौरवमधिकमिति चेत्, कृतिफलयोः शक्तिकल्पनागौरवं तवाप्यधिकमिति दिक् इति वाक्येन भाव्यम्।

< 54 > (पु.250-255)

भावनायाः सर्वथा लडाद्यन्तेऽवाच्यत्वे वाजपेयाधिकरणविरोधमाशङ्कते – यत्तु पार्थसारथिमिश्राः इति।

शास्त्रदीपिकायां वाजपेयाधिकरणे[12] पार्थसारथिमिश्रैरुक्तम् – ये तु कार्याभिधायिनामेव भावनाभिधेयत्वम् न सर्वाख्यातानामाहुः तेषां काष्ठैः पचतीत्यादौ भावनाभावाद्धात्वर्थेनैव कारकाणां सम्बन्धात् क्रियारूपत्वं धात्वर्थस्याभ्युपगन्तव्यम्। अतश्च स्वरूपेणैव धात्वर्थः कारकसम्बन्धमर्हतीति विनैवावृत्त्या यज्यभिहितेनैव रूपेण साध्यसाधनाभ्यां सम्बध्यत इति अधिकरणमिदमनुपपन्नं स्यात् इति।

अयमत्राधिकरणसारः – "वाजपेयेन स्वाराज्यकामो यजेत" इति यद्ययं गुणविधिः स्यात् तर्हि वाजपेयरूपगुणेन स्वाराज्यफलेन च यज्यर्थस्य यागस्य सम्बन्धो वक्तव्यः। स च एकदैव वक्तुमशक्य इति वाजपेयेन यागं भावयेदिति यागेन स्वाराज्यं भावयेदिति यागस्यावृत्त्या सम्बन्धो वक्तव्यः। तथा च वाक्यभेदापत्तिः। तस्य वाक्यदोषत्वात् तदपाकरणाय सोमेन यजेतेत्यादिष्विव वाजपेयवता यागेन स्वाराज्यं भावयेदिति मत्वर्थलक्षणा आश्रयणीया। मत्वर्थलक्षणा तु पददोषः, अतो मत्वर्थलक्षणां वारयितुमत्र वाजपेयपदं कर्मनामधेयं तत्प्रख्यशास्त्रात्, वाजपेयनामकयागेन स्वर्गं भावयेदिति एकवाक्यता इति सिद्धान्तः। न च यजेतेत्यत्र प्रकृत्या धातुना यागमात्रमुच्यते। प्रत्ययांशेन तु भावना। तयोः समभिव्याहारात् कर्मत्वकरणत्वसाधारणं सम्बन्धसामान्यं प्रतीयते। अतश्च यागस्योभयरूपसाधारण्यात् भावनापि यागकर्मिका यागकरणिका चेति द्विरूपा भवति। सा च भावना तन्त्रेण यागकरणिकांशेन फलसम्बन्धं यागकर्मिकांशेन गुणसम्बन्धं च लभते इति विनैव मत्वर्थलक्षणां यागे गुणविधानमुपपन्नं भवति वाजपेयेन यागं कुर्यात् यागेन च स्वाराज्यमिति। अतोऽयं गुणविधिरेवेति वाच्यम्। धात्वर्थभावनयोः सम्बन्धमात्रस्यैवाख्यातबोध्यत्वे तस्याः अनिर्धारितत्वात् नोक्तरूपोऽन्वयः सिद्ध्यति। तथा हि – फलस्य साधनापेक्षित्वाद्यागकरणिकैव भावना फलसम्बन्धमर्हति। तथा गुणस्य साध्यापेक्षत्वात् यागकर्मिकैव भावना तत्सम्बन्धमर्हति। आख्यातात् सम्बन्धसामान्यावगतिरेव न भवति। किन्तु समभिव्याहारात् पदान्तरान्वयपर्यालोचनया लक्षणया सम्बन्धविशेषस्यैवावगतिः। एवञ्च यागस्य कर्मपरत्वे गुणस्यैव सम्बन्धः, करणपरत्वे फलस्यैव सम्बन्ध इति वाक्यभेदादिकं विनोभयसम्बन्धः वक्तुमशक्यः। किञ्च यागो

---

[12] मी.सू. 1-46 शा.दी. मयूखमालिकासहिता –पृ.72 पं 3-7

यस्मिन्नेव क्षणे करणात्मनावगम्यते न सस्तस्मिन्नेव क्षणे साध्यात्मना प्रतीयते। तस्मात्तन्त्रन्यायस्य नात्र सम्बन्धः। किञ्च साध्यसाधनभूतयो-र्यागयोर्न सारूप्यम्। साध्यत्वे प्राधान्योद्देश्यत्वानुवाद्यत्वानां साधनत्वे गुणत्वोपादानत्व-विधेयत्वानां च विरुद्धानां धर्माणां भासमानत्वात्। धात्वर्थस्याक्रियात्वाच्च न यागस्य भावनामनन्तरीकृत्य साक्षात् फलगुणोभयसम्बन्धो वक्तुं शक्यः। कारकरूपस्य यागस्य साक्षात्कारकान्तरान्वयस्याव्युत्पन्नत्वात्। एवञ्च गुणविधित्वे तस्य वाक्यभेदं वारयितुं सोमेन यजेतेत्यादिष्विव मत्वर्थलक्षणा स्वीकर्तव्या। तद्वरं वाजपेयं सुराद्रव्यमस्मिन्निति सुराग्रहविधानात् तत्प्रख्यतया नामधेयत्वमिति।

अत्र पार्थसारथिमिश्रस्यायमाक्षेपः। प्राभाकराणां मते लडाद्यन्ते भावनायाः वाच्यत्वाभावात् फलमात्रं धात्वर्थो भवति। तथा च काष्ठैः पचति इत्यादिषु करणादि-कारकाणां पचधात्वर्थे एवान्वयो वक्तव्य इति तस्यैव क्रियात्मत्वमभ्युपगन्तव्यम्। अतश्च धात्वर्थः कारकसम्बन्धमर्हतीति "धात्वर्थस्याक्रियात्वात् तस्य स्वरूपेण कारकान्तरा-न्वयायोग्यत्वात् तस्य साध्यत्वेन साधनत्वेन वा एकरूपेणैव एकदाऽन्वयो भवतीति साध्य-साधनरूपेणान्वयार्थम् आवृत्तौ वाक्यभेदापत्त्या मत्वर्थलक्षणापत्त्या च वाजपेयशब्द-स्तत्प्रख्यशास्त्रात्कर्मनामधेयम्" इति सिद्धान्तविरोधः। किञ्च "वाजं वा एषोऽवरुरुत्सते यो वाजपेयेन यजते, यो राजसूयेन यजते योऽश्वमेधेन यजते" इत्यादिषु सामानाधिकरण्य-मपि न सिद्ध्यति। स्वस्मिन् स्वस्य करणत्वेनान्वयस्य क्वाप्यभावात्। अतश्चाख्यातस्य भावना-वाचकत्वमभ्युपेयमिति।

तस्य समाधानम्। एतदपि न युक्तम्। "वाजपेयेन स्वाराज्यकामो यजेत" इति वाक्ये लिङः कार्याभिधायकत्वात् कार्यविशेषणीभूतकृतेरपि तद्वाच्यतया तस्यां कृतौ यागस्य विषयतयान्वयात्, तत्रान्वयितावच्छेदकतया करणत्वम् औपादानिक-प्रमाणादुपस्थितं शाब्दबोधे भासते, वाजपेयादिगुणनिरूपितं साध्यत्वं चेति वैरूप्यं स्यादिति तत्परिहारायावृत्तिर्वा मत्वर्थलक्षणा वा स्यादेवेति तद्वारणार्थं नामधेयत्वा-ङ्गीकारस्यावश्यकत्वात्। अतश्च न वाजपेयाधिकरणविरोधः। यदि च कारकाणां धात्वर्थेऽ-न्वये काष्ठैः पचतीतिवत् काष्ठैः पाक इति स्यादिति चेत् भावनावाच्यत्ववादिनां काष्ठैर्भावनेत्यापत्तिस्तुल्या। यदि च कारकाणामाख्यातोपात्तभावनायामेवान्वयात् काष्ठैर्भावनेत्यापत्तिर्नास्तीत्युच्यते, तर्हि लडाद्यन्तोपात्तधात्वर्थे एव कारकान्वया-भ्युपगमात् काष्ठैः पाक इत्यापत्तिरपि नास्ति। यो वाजपेयेन यजते इत्यादिषु सामानाधि-करण्यानुपपत्तिरुभयत्र तुल्या। विधिवाक्यभिन्ने उत्सर्गप्राप्तस्य साध्यत्वस्य धात्वर्थे

त्यागायोगात्। यदि च विधिवाक्यानुवादकत्वादत्र धात्वर्थस्य करणत्वमिष्यते तर्ह्यस्मिन्नपि मते तदुपपद्यते।नापि पचतीत्यादावाख्यातकालान्वयानुपपत्तिः। जानातीत्यादौ धात्वर्थे एवान्वयात्। क्वचित्तु आक्षिप्तभावनायामन्वयः। एवञ्च भावनाया लिङतिरिक्तलकारे वाच्यत्वस्यैवाभावात् तस्याः कृतित्वेन वाच्यत्वमुत व्यापारत्वेनेति विचारः निष्फल एव।इति।

< 57 > (पु.269-270)

मण्डनमिश्रानुयायिनस्तु इत्यारभ्य प्रतिपादितं प्राचीनं भाट्टमतं यच्च मण्डनमिश्रेण भावनाविवेकग्रन्थे प्रतिपादितम्। तस्य च मतस्य संक्षिप्तं स्वरूपमत्र प्रस्तूयते।

फलमेव धात्वर्थः।भावना तिङ् प्रत्ययार्थः। तथाहि -"पूर्वापरीभूतं भावमाख्यात-माचष्टे व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तमि" (नि-अ-1-पा. 1)ति निरुक्तादाख्यातस्य फलोत्पादिका क्रिया अर्थ इत्यवगम्यते। भावपदस्य भूधातोः णिजन्ताद्भावे घञि निष्पन्नत्वेन भवनानुकूलव्यापारपरत्वात्। सैव भावनेति क्रियेति च व्यवह्रियते। पचतीत्याद्याख्यातस्य (तिङन्तस्य) पाकं करोतीति विवरणात् भावनाभिन्नफलस्यापि तिङन्तवाच्यता निश्चीयते। तच्च फलं धात्वर्थः।नाप्युभयं धात्वर्थः।अन्यायोऽनेकार्थत्वमिति न्यायात्। किञ्च यथा घटं करोतीत्यत्र जननोत्पादश्रुतिविषयां भावनां करोतिर्बोधयति तथैव पाकं करोतीत्यत्रापि। अन्यथा अनेकार्थत्वात् अभिधेयनिश्चयायोगात् व्यवहाराङ्गतैव न स्यात्। क्लृप्तसामर्थ्यानु-सारेण प्रयोगोपपत्तेः क्लृप्तार्थत्यागे अन्यार्थकल्पने च प्रमाणाभावात् , किं करोतीति प्रश्ने करोतेरुत्पादनार्थकत्वस्यैव सर्वसम्मतत्वाच्च। एवञ्च पचतीत्यस्य पाकं करोतीति विवरणात् तिङः करोत्यर्थता सिद्धा ।

उदासीनत्वविच्छेदलक्ष्यं धात्वर्थकारणम् ।
स्पन्दव्यापारपर्यायं करोत्यर्थं प्रचक्षते ॥ (भा.वि.प्रथमभागः)

इति अधिश्रयणादिसंयोगभेदेभ्योऽव्यापारात्मकेभ्यो भेदेन करोति स्पन्दते चेष्टते व्याप्रियते इति पदबोध्यः व्यापारः करोत्यर्थः।नहि चलित्वा स्थितस्य क्रियाप्रभवपूर्वोत्तरदेशसंयोग-विभागाः भावः।अतस्तदालम्बनो व्यापारप्रत्ययो न जातु विरमेत्।अतः व्यापार एव भावना-पदार्थः। यद्यपि "न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्यय" इति नियमेन पार्थक्येन प्रकृतिनैरपेक्ष्येण प्रत्ययस्य नार्थबोधकत्वम्, अथापि "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इति न्यायेन पदार्थे यः प्रधानभूतः प्रकृत्यर्थभिन्नतया च भासमानः स एव प्रत्ययार्थ इत्यनुमातुं शक्यम्। "तदागमे हि दृश्यते" इति न्यायाच्च। एतच्च आख्याता-र्थाधिकरणे(भावार्थाधिकरणं – मी. 2-1-1) तन्त्रवार्तिके भट्टपादैस्स्पष्टीकृतम्। यदि च

भावना धात्वर्थोऽभविष्यत् तर्हि भावकृदन्तानां तिङन्तानां च बोधे वैलक्षण्यमेव नाभविष्यत्। पचतीत्यस्य यथा पाकं करोतीति विवरणं दृश्यते न तथा पाक इत्यस्य। "धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते" इति भावनासंस्पर्शरहितस्य धात्वर्थफलस्यैव भाव-घञन्ते भानम् । न हि "का क्रिया ? पाकः" इति प्रश्नोत्तराभ्यां करोतेर्धात्वर्थसामानाधि-करण्यमिति भ्रमितव्यम्। अत्र पाकशब्दस्य लक्षणया भावनाप्रतिपादकत्वात्। न ह्यभिधेय एव शब्दार्थ इति व्यवस्था। "यत्परः स शब्दार्थ" इति पचिना लक्षितभावविशेष-निबन्धनमपि ऐकाधिकरण्यं भवति। तिङन्ते तु भावना न लक्ष्या। पाकः पचतीत्यनयोः पर्यायतापत्तेः। तथा हि - पाक इत्यनेन सिद्धावस्थापन्नस्य पचतीत्यनेन साध्यावस्था-पन्नस्य च भावस्य बोध इति सर्वानुभवसिद्धम्। साध्यत्वं च भावनासंस्पर्शकृतम्। यदि च सा प्रत्ययेनाभिधीयेत तर्ह्येव तत्संस्पर्शो भवति। न च प्रत्ययेन भावनायाः अनभिधानेऽपि पचतीत्यत्र प्रत्ययप्रतिपादितकर्तृकारकसम्बन्धाद्धात्वर्थस्य साध्यत्वावगमो भवतीति वाच्यम्। भावोत्पन्नलकारे स्थीयते इत्यादिषु प्रत्ययेन कर्तृकारकप्रतिपादनासम्भवात् तत्सम्बन्धस्य वक्तुमशक्यतया साध्यत्वानवगमप्रसङ्गात्। अस्ति च तादृशावगतिर्भावतिङन्ते। "देवदत्तेन स्थीयते" इत्यस्य "देवदत्तेन स्थितिः क्रियते" इति विवरणात्।

ननु भावनासंस्पर्शनिरपेक्षं साध्यत्वं धातुनैवोच्यते। अन्यथा भावनाया अपि साध्यत्वात् पुनः भावनासंस्पर्शव्यपेक्षा इत्यनवस्था स्यात्। न च पाक इत्यत्रापि साध्यत्व-प्रतीतिः स्यादिति वाच्यम्। प्रत्ययार्थेन सिद्धत्वेनाभिभूतत्वादिति चेन्न। धात्वर्थस्य स्वाभावि-कसाध्यत्वे मानाभावात्। पचत्यादौ भावनासंस्पर्शकृतसाध्यत्वोपपत्तेः। देवदत्तेन पाक इत्यादौ च लक्ष्यमाणभावना विषयकः कारकसम्बन्धः। अत एव देवदत्तेन पाक इत्यस्य "देवदत्तेन पाकः क्रियते" इत्यर्थो वर्ण्यते। प्रसिद्धश्च गम्यमानभावना विषयकः कारक-सम्बन्धः शङ्कुल्या खण्ड इत्यादौ । न च धात्वर्थभावनयो र्न तात्विको भेदः किन्तु शब्दोपकल्पित एव। धात्वर्थ एव व्यापारात्मना धातुनोपादीयमानः प्रत्ययाच्च फलभावनासमर्थतया गम्यमानः फलभवनसमर्थव्यापारवचनभावनाक्रियादिशब्दार्थ इति वाच्यम्। प्रयत्नपरिस्पन्दयोः धातुवाच्यसंयोगविभागाद्यतिरिक्तयोः प्रत्यक्षसिद्धत्वात्। तथा हि - चलतीत्यक्षिजातः प्रत्ययः संयोगविभागातिरिक्तं परिस्पन्दमालम्बते। प्रयत्नोऽपि मानसप्रत्यक्षग्राह्यो यस्मिन् सति भूतानि प्रवर्तन्ते। स च आत्मकर्तृको व्यापारः। यदि च धात्वर्थव्यापारयोरभेद स्तर्हि विक्लिद्यति पचतीत्यनयोः पर्यायतापत्तिः। विक्लित्तिरूप-धात्वर्थातिरिक्तव्यापारानभ्युपगमात्। उभयत्र तण्डुलानामेव कर्तृत्वात्। यदि च धात्वर्थातिरिक्तो व्यापारोऽङ्गीक्रियते तर्ह्येव कर्तृभेदात् भेदप्रतीति र्भवति ।

नन्वस्तु तर्हि धात्वर्थफलातिरिक्तो व्यापारः। सोऽपि धातुवाच्य एवास्तु । पाकमभिसन्धाय प्रेषणमध्येषणं वा करोति सर्वं तत्पचिनाभिधीयते । तदुक्तं "तदभिसन्धिपूर्वकं प्रेषणमध्येषणं वा तत्सर्वं पच्यर्थ" इति तन्न। भावे घञादयो विधीयन्ते। धात्वर्थश्च केवलो भाव इत्यभिधीयत इति पाकशब्दाद्विक्लेदनं प्रतीयते न कर्तृव्यापारः। तस्माद्विक्लेदनमेव पच्यर्थः। घञन्तेन च सिद्धावस्थापन्नो धात्वर्थ उच्यते। तद्यदि विक्लेदनार्थककर्तृव्यापारः पचेरर्थः स्यात् तर्हि पाक इत्यस्यार्थः सिद्धा पाकक्रियेति कथयेयुः। न त्वेतदस्ति। पाकः सिद्ध इत्येव व्यवहारः। एवं तिङन्तेऽपि "पच्यन्ते तण्डुलाः स्वयमेव, यजते यजमानः" इत्यादिषु विक्लेदनं सङ्कल्पविशेष इत्यादय एवार्थाः प्रतीयन्ते इति पचतियजतीत्यादिषु धातुभागस्यापि तदर्थकत्वमेवोचितम् । नत्वन्यार्थे शक्तिकल्पनम्। कर्तृकर्मभावार्थकप्रत्ययान्तेषु सर्वेषु नियततया फलांशस्यैवोपस्थितेरव्यभिचारात् फलमेव धात्वर्थः। प्रत्ययागमे एव कर्तृव्‍यापारबोधात् तत्प्रत्ययाभावे तद्बोधाभावाच्च "तदागमे हि दृश्यते" इति न्यायेनान्वयव्यतिरेकाभ्यां कर्तृव्यापारः प्रत्ययार्थः इत्येव युक्तम् । तदुक्तम् -

"तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः ।
प्रत्ययश्रुतिवेलायां भावनात्मा प्रतीयते ॥" (तन्त्र-वा 1-1-24) इति ।

अस्ति सत्ता भाव इत्येतेषां भिन्नोपस्थितिजनकत्वात् तिङन्तवाच्यसत्तायाः भावप्रत्ययान्तवाच्यसत्तायाश्च भेदोऽस्त्येवेति अस्त्यादावपि तिङा भावनाभिधीयत एव । तदुक्तम् - "अस्त्यादावपि धर्म्यंशे भाव्येऽस्त्येव हि भावना" (तन्त्रवार्तिकं भावार्थाधिकरणं – 2-1-1) इति ।

न च केवलफलस्यैव भावप्रत्ययान्तार्थत्वे गमनमिति ल्युडन्तेन संयोगस्यैवाभिधानात् तस्य ग्रामनिष्ठतया च "ग्रामो गमनवानि"ति प्रयोगापत्तिरिति वाच्यम्। निरूपकत्वादिसम्बन्धविशेषेण वर्तमानस्यैव फलस्य धातुवाच्यत्वमिति ग्रामानुयोगिकसंयोगस्य धातुवाच्यत्वं नास्तीत्यतस्तदापत्तिर्नास्तीति गागाभट्टाः। वृत्त्यनियामकसम्बन्धेन वर्तमानस्य फलस्य न धातुवाच्यत्वमिति तदर्थः। व्यापारस्य धातुवाच्यत्ववादिनापीदमवश्यमभ्युपेयम्। अन्यथा आभिमुख्यादिसम्बन्धेन संयोगानुकूलक्रियायाः ग्रामेऽपि सत्त्वात्तादृशप्रयोगापत्तेः।

वस्तुतस्तु कृत्प्रत्ययानां द्रव्यप्रधानव्यापारवाचित्वमेव। किं कृतवान् ? इष्टवान् , किं क्रियः? पाचकः, इत्यादिना करोतिना विवरणदर्शनात्। यथा भावार्थकतिङन्ते स्थीयते सुप्यत इत्यादिषु भावना प्रत्ययवाच्या तथा भावार्थककृदन्तेऽपि। इयांस्तु विशेषः। तिङन्ते

साध्यत्वेनाभिधीयमानायाः कृदन्ते सिद्धत्वेन भानमिति। अतश्च ग्रामो गमनवानिति प्रयोगापत्तिर्नास्ति, "गमनजन्यसंयोगाश्रयो ग्राम" इति प्रयोगोऽप्युपपद्यते। अत एव "ओदनस्य पाक" इत्यादिषु "कर्तृकर्मणोः कृति" (पा. 2-3-65) इति कर्मणि षष्ठी। एवं कर्मकृतामपि कारकभावनोभयवाचकत्वात् "ओदनस्य पक्ते"त्याद्यपि नानुपपन्नम्। न च कृतां नानार्थकतापत्तिरिति वाच्यम्। धातुभ्यः कृतामल्पसंख्याकतया बहुसंख्याकधातूनां नानार्थकत्वस्वीकारापेक्षया कृतां नानार्थकत्वे लाघवात्। "चैत्रो देवदत्तेन पाचयती" त्यादावपि कर्तृव्यापारविषयः प्रेरणादिप्रयोजककर्तृव्यापारः णिजर्थः, धात्वर्थविषयः कर्तृ-व्यापारस्तिङर्थ इति न भवति भावयोस्तुल्यार्थता। स्वयुक्ताख्यातार्थव्यापारव्यधिकरण-फलवाचकत्वं सकर्मकत्वम्, स्वयुक्ताख्यातार्थव्यापारसमानाधिकरणफलवाचकत्वमकर्म-कत्वमिति सकर्मकत्वाकर्मकत्वव्यवस्थापि सिद्ध्यति। प्रत्ययार्थव्यापाराश्रयत्वं कर्तृत्वम्। प्रत्ययार्थव्यापारव्यधिकरणफलाश्रयत्वमेव कर्मत्वम्। भावनामुख्यविशेष्यकः शाब्दबोधः। यतस्तण्डुलमित्यादिद्वितीयाद्यन्तपदानां क्रियापदं विना निराकाङ्क्षबोधजनकत्वं नास्ति, अतो ज्ञायते क्रियापदं द्वितीयान्तादिपदार्थस्य विशेष्यसमर्पकमिति। द्वितीयाद्य-र्थश्च प्रातिपदिकार्थस्य विशेष्यः "प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानमि" तिव्युत्पत्तेः। तिङन्तघटकधात्वर्थस्य आख्यातार्थ एव विशेष्यः "प्रकृतिप्रत्ययार्थयो"रिति न्यायादेव। आख्यातस्य कालः संख्या व्यापारः भावना च अर्थाः। तेष्वपि भावनैव विशेष्य-भूता। "भावप्रधानमाख्यातमि" ( नि-आ-1-पा)ति निरुक्तस्मृतेः। अतश्च वाक्यजन्यबोधे भावनैव मुख्यविशेष्यतया भासते। "तद्भूतानां क्रियार्थेन समाम्नायः" (मी 1-1-24) इति सूत्रयन् जैमिनिरपि क्रियापदबोध्यभावनामुख्यविशेष्यकं बोधं प्रमाणयति। धात्वर्थस्य कारकत्वादपि भावनायामन्वयो युक्तः। द्वितीयाद्यर्थकारकाणामपि न धात्वर्थेऽन्वयः। कारकस्य कारकेण निराकाङ्क्षत्वात्। किन्तु आख्यातार्थभावनायामेव। पचतीत्यत्र "पाकं करोत्युत्पादयति साधयति भावयति जनयती"त्यादिविव्रियमाणाख्यातार्थोत्पादनायाम् एकदेशभूतायामुत्पत्तौ वा आधाराधेयभावेन धात्वर्थः पाकः कर्मतयान्वेति। अत एव विवरणवाक्ये पाकपदात् कर्मानुवादिका द्वितीया। यत्र चौदनं पचतीत्यादौ आख्यातार्थभावनायामन्वययोग्यमोदनादिवृत्तित्वं द्वितीययोपस्थापितं तत्र धात्वर्थस्य करणत्वेनैवान्वयः। अत एव "पाकेनोदनं करोति" इति विवरणं सङ्गच्छते। "अग्निहोत्रं जुहोती"त्यादौ जुहोतिधात्वर्थस्यैव भाव्यतया कर्मत्वमिति तद्विशेषणीभूताग्निहोत्रपदे द्वितीया। "नीलं घटमानय" इत्यादौ नीलादेरिव तस्य कर्मविशेषणपदत्वात् । यस्यां भावनायां स्वर्गादिभाव्यं विना निष्फलत्वेन लिङुपात्तभावनायाः अन्वयासम्भवस्तत्र

धात्वर्थस्य न कर्मत्वेनान्वयः। एककर्मावरुद्धे कर्मान्तरस्यानाकाङ्क्षितत्वात्। किन्तु करणत्वेन। अत एव "सोमेन यजेते"त्यादौ स्वर्गस्वरूपेण स्वर्गकामपदोपात्तेनाक्षिप्तेन वा भाव्येन सकर्मिकायां भावनायां करणतया यागादेरन्वयः। तथा च स्वर्गवृत्तेर्याग-करणिकाया उत्पत्तेरनुकूलो व्यापारः प्रवर्तनागोचर इति यजेतेत्यत्र वाक्यार्थः। अत एव यजेतेत्यस्य यागेन स्वर्गं भावयेदिति विवरणम्। अत एव ज्योतिष्टोमेन स्वर्गकामो यजेते-त्यत्र ज्योतिष्टोमपदोत्तरं यागकरणत्वस्यानुवादः। यत्र तु वाक्ये करणकर्मणी शब्दान्तरो-पात्ते तत्र प्रकरणवशादुपस्थितार्थानुवादको धात्वर्थो न भावनायामन्वेति। तत्र च धातुरा-ख्यातप्रयोगमात्रप्रयोजको निरर्थकप्रायः। अतश्च तस्य वाक्यार्थे निवेशो न भवति। यथा "दध्नेन्द्रियकामस्य जुहुयादि"त्यादौ । आख्यातार्थः कालः समानप्रत्ययोपात्तभावनाया-मन्वेति। संख्या तु भावनाक्षिप्तकर्तरि।

कर्तृकर्मणी नाख्यातार्थः। भावनया आक्षेपात् लक्षणया वा तद्बोधोपपत्तेः। न च अभिधानानभिधानव्यवस्थोच्छेदः। अनभिहिते इत्यस्याबोधिते इत्यर्थात्। बोधश्च श्रुत्या आक्षेपाद्वा। स चाख्याते आक्षेपात्। कृत्प्रत्यये तु श्रुत्या। अत एवोक्तं कर्त्रधिकरणे(मी 3-4-4) भट्टैः "यादृशस्तु गुणभूतः कर्तात्रावगम्यते न तादृशेन विना भावनोपपद्यत इति अर्थापत्याऽनुमानेन वा शक्ता अनुगमयितु" मिति । नापि कृत्प्रत्यये आक्षेपात् आख्याते च श्रुत्येति वैपरीत्यापत्तिः। आख्याते प्रधानीभूतभावनया कर्तुराक्षेपस्य युक्तत्वात्। भावनायाः आक्षेपलभ्यत्वे तु प्राधान्यं तस्या न स्यात्। एवं कृत्स्वपि प्राधान्यात् कर्तृकर्मवाचित्व-मावश्यकम्। अतो युक्तस्तेन भावनाक्षेपः।उक्तञ्च "यदि कर्त्रा धात्वर्थेन वा भावनावगम्येत ततः पाचकपाठकादिपदेष्विव तिरोहितस्वरूपावगम्येत। प्राधान्यात्तु शब्दार्थत्वाध्यवसानमि" ति। न च पुरुषव्यवस्थोच्छेदः। भावनाक्षिप्तकर्त्रा सह युष्मदर्थस्य सामानाधिकरण्यात्। कर्तृविशिष्टसंख्याभिधानाद्वा अभिधानव्यवस्थोपपत्तिः। किञ्च "लः कर्मणी" (पा. 3-4-69 ) ति सूत्रात् आख्यातस्य कालसंख्याबोधकत्वमेव सिद्ध्यति। तथा हि - "लः कर्मणि" (पा. 3-4-69) "तिप्तस्झि" (पा. 3-4-78) "द्व्येकयोः" (पा. 1-4-22) इत्येतेषामेकवाक्यतया विधानेन कर्तुरेकत्वेऽभिधेये लकारैकवचनं तिबादि प्रयोक्तव्यमित्यर्थः सिद्ध्यति। एवञ्च कर्तृकर्मणोर्भावनयैवाक्षेपात् न ते वाच्ये, अनन्यलभ्यः शब्दार्थ इति न्यायात्। कर्तृकर्मणो-र्विवरणमपि तात्पर्यार्थविवरणमेव।तस्मात् पाकं करोतीत्यशब्दार्थकर्मत्वविवरणवत् इतरेतरयोगद्वन्द्वे समुच्चयांशविवरणवद्वा न तदर्थनिर्णायकम् । एवञ्च फलमेव धात्वर्थः। नन्वेवं "भूवादयो धातवः" (पा. 1-3-1) इति सूत्रभाष्यविरोधः। क्रियावाचकत्वे सति गणपठितत्वं धातुत्वमिति तत्रोक्तत्वादिति चेन्न। तत्र क्रियापदेन धात्वर्थमात्रस्य फलस्यै-

वाभिप्रेतत्वात्। तस्मात् फलं धात्वर्थः स्पन्दप्रयत्नरूपा भावना आख्यातार्थ इति सिद्धम् । इति॥ अत्र च पूर्वापरीभूतं भावमिति कथनेन, करोति स्पन्दते चेष्टते व्याप्रियते इति पदबोध्यत्वप्रदर्शनेन, वस्तूनामुदासीनत्वविच्छेदसाधनत्वेन अर्थात् तेषां कारकत्वसम्पादकत्वेन च तस्याः निरूपणेन, संयोगविभागादिधात्वर्थफलात् अतिरिक्तत्वेन भासमानायाः एव तत्पदवाच्यत्वनिरूपणेन च सर्वोऽपि फलातिरिक्तः स्पन्दरूपो वा प्रयत्नरूपो वा भावभावनापदाभ्यामभिप्रेत इति स्पष्टतया अवगम्यते। "पाकं करोति" इति विवरणवाक्यगतकरोत्यर्थः "स्पन्दव्यापारपर्यायं करोत्यर्थं प्रचक्षते" इति श्लोकार्थेन विव्रियते इति अतोऽपि स्पष्टं यत् करोत्यर्थः न केवलप्रयत्नरूपः अपितु स्पन्द-व्यापार-प्रयत्नादिसमुदायरूप इति । इदमेव भाट्टमीमांसकानां प्राचीनं मतं कुमारिलभट्टाभिमतं च।

आधुनिकमीमांसकास्तु "पुरुषप्रयत्नरूपोऽर्थः भावना तिङर्थः, अन्यस्तदतिरिक्तः स्पन्दव्यापारादिपदवाच्यः धात्वर्थः" इति वदन्ति। तथा च नव्यमीमांसकानां मते फलं व्यापारः(प्रयत्नातिरिक्तः)धात्वर्थौ, भावना प्रत्ययार्थः। अयं च धात्वर्थव्यापारः न साध्यत्वेनावगम्यते, किन्तु यदा भावना संस्पर्शः अर्थात् भावनाबोधकप्रत्यययोगः धातोः, तदैव स व्यापारः साध्यत्वेन प्रतीयते इत्यपि एतेषां मतम् ।

< 63 > (पु.295-297)

<u>बोधो व्युत्पत्त्यनुसारी, न च बोधानुसारिणी व्युत्पत्तिः।</u>

अत्रेदमवधेयम् – देवदत्तः पचति इति वाक्यात् कश्चित् बोधः जायते यत्र देवदत्तनामा कश्चित् व्यक्तिविशेषः, एकः, पुमान्, कर्ता, विक्लित्तिः, तदनुकूलःव्यापारः, तस्य वर्तमानता, उत्पादना, एकत्वम् इत्यादयः विषयाः भवन्ति। एते च विषयाः अवगम्यन्ते इति तु तत्तद्विषयकप्रश्नोत्तराभ्यामवगम्यते। यथा कः पचति ? किं पचति ? कदा पचति? पचनक्रियास्वरूपं किम्? तया किम् जायते? इत्यादि। एतादृशानां प्रश्नानामुत्ताराणि सर्वाणि एकीकृत्य यदि वयं बोधस्वरूपं वर्णयामः तर्हि तदित्थं भवति – कश्चित् एकः पुरुषः स्वक्रियया अधिश्रयणादिरूपया (विक्लित्तिं) तण्डुलेषु मार्दवं वैशद्यं च इदानीम् उत्पादयति इति। एवं बुद्धिविषयेषु पूर्वोक्तेषु पदार्थेषु देवदत्तपदात् के विषयाः बुध्यन्ते, पचतिपदात् के विषयाः बुध्यन्ते, तत्रापि प्रकृतिभागेन के प्रत्ययभागेन के, तेषां विषयाणां परस्परमन्वयः कीदृशः इत्यादिविचाराः पदवाक्यप्रमाणशास्त्रेषु क्रियन्ते।

तत्र हि नैयायिकाः देवदत्तपदात् प्रथमान्तात् देवदत्तसंज्ञकः, कश्चित् एकः पुरुषः बुध्यते। पचति शब्दाच्च विक्लित्तिः, तदनुकूलव्यापारः, उत्पादना, वर्तमानत्वम्, एकत्वं च

बुध्यते।, तैः उत्पादना एव कृतिशब्देनोच्यते। मीमांसकैस्तु भावनाशब्देन। यत्नशब्देनापि सा एवोत्पादनाभिधीयते। एतेषां बुद्धिविषयाणां पदार्थानाम् एकीकरणेन वाक्यार्थः सिध्यति। एकीकरणं च एकस्मिन् पदार्थे पदार्थान्तरस्य विशेषणविशेष्यभावेन अन्वयेन सिध्यति। देवदत्तशब्दात् अवगम्यमानानां चतुर्णां तथा अन्वये सति एकत्वसंख्याविशिष्टः पुंस्त्वविशिष्टः देवदत्तसंज्ञकः कश्चित् व्यक्तिविशेष इति, विक्लित्त्यनुकूलः यः व्यापारः, तज्जनिका वर्तमाना कृतिः इति पचतिशब्दात् च बुध्यते। (पचतिशब्दे च पूर्वोक्तार्थापेक्षया संख्यापि एका अतिरिक्ततया बोधे भासते। तस्याः संख्यायाः पचतिपदार्थे अन्वयः न भवति अयोग्यत्वात्। द्रव्ये एव संख्यायाः अन्वययोग्यत्वात्। अतः पचतिशब्दार्थसंख्या प्रथमान्तपदार्थेन अन्वेति इति नैयायिकाः।पचतिशब्दे कर्तृकर्मणोरपि बोधमङ्गीकुर्वन्तः वैयाकरणाःसंख्यायाः कर्तृकर्मणोरन्वयं स्वीकुर्वन्ति।मीमांसका अपि लक्षणया बोधविषय-कर्तृकर्मणोरन्वयं स्वीकुर्वन्ति॥) एवं देवदत्तः पचति इति पदद्वयबुद्धानां पदार्थानां एकी-करणेन विक्लित्त्यनुकूलः यः व्यापारः तज्जनिका या वर्तमाना कृतिः तदाश्रयः एकत्व-संख्याविशिष्टः(एकः) पुंस्त्व(लिङ्ग)विशिष्टः(पुमान्) देवदत्तसंज्ञकः कश्चित् इति वाक्यार्थः सिध्यति। अस्मिंश्च वाक्यार्थे देवदत्तः विशेष्यः। अन्यत्सर्वं विशेषणम्। विशेष्यभूतः देवदत्तः प्रथमान्तेन बुध्यते इति अयं बोधः प्रथमान्तमुख्यविशेष्यकः इत्युच्यते।

मीमांसकानां मते तु देवदत्तः पचति पदार्थयोर्मध्ये पचतिपदार्थः मुख्यः भवति। अतश्च एकत्वविशिष्ट-पुंस्त्वविशिष्ट-देवदत्तकर्तृका विक्लित्त्यनुकूलव्यापारानुकूला वर्तमाना उत्पादना (भावना) इति बोधः भवति। बोधे चास्मिन् पचतिशब्दार्थः मुख्यः विशेष्यम्। देवदत्तपदार्थः विशेषणम् इत्युच्यते।

वैयाकरणानां मते व्यापारे एव भावनायाः अन्तर्भाव इति सामान्यतः पृथक् तस्य प्रदर्शनं न क्रियते। अपेक्षायां सत्यां क्रियते एव(ज्योतिष्टोमेन यजेतेत्यादौ)। तथा च वैयाकरणानां मतेऽपि मीमांसकानामिव एकत्वविशिष्टपुंस्त्वविशिष्टदेवदत्ताभिन्नकर्तृकः विक्लित्त्यनुकूलः वर्तमानो व्यापारः इति बोधः। एवं त्रिविधः बोधः तत्तच्छास्त्रानुसारं भवति यद्यपि बोधे विषयाः समानाः। एवं चात्र भेदः पदार्थानामेकीकरणे(अन्वये)एव भवति। इदानीमयमत्र प्रश्नः – देवदत्तः पचति इति वाक्यात् सामान्यजनस्य कीदृशो बोधः भवतीति। अत्र उत्तरं नास्त्येव। न केनापि एतन्निरूपयितुं शक्यम् बोध एतादृश एव भवतीति। परन्तु बोधोऽस्त्येव। यतः तद्वाक्यश्रवणात् तदनुकूलप्रवृत्तेः दर्शनात्। तत्त-च्छास्त्रवासनावतां तु तत्तद्रूपः बोधो भवितुमर्हति। अस्यामवस्थायाम् इदमेव युक्तमिति कथनं साहसमात्रमेव।

अथात्र बोधविषयाणां एकीकरणाय(अन्वयाय) काश्चन व्युत्पत्तयः स्वीकृताः। तेषां तेषां पदार्थानां योग्यतामाकाङ्क्षादिकं च अनुसृत्य। तत्तद्व्युत्पत्त्यनुसारं च तेषां तेषां विशेषणविशेष्यभावेन अन्वयेन वाक्यार्थः सिद्ध्यति। यथा – तिङर्थकृतेः विशेषणतया अन्वयबोधे विशेष्यतया प्रथमान्तपदार्थोपस्थितिः कारणमिति एका व्युत्पत्तिः नैयायिकानाम्। तथा तिङर्थसंख्यान्वयबोधं प्रति विशेष्यतया कृत्यन्वय्युपस्थितिः, प्रथमान्तपदार्थोपस्थितिः वा कारणमिति। वैयाकरणानां मते देवदत्तपदार्थः कर्तापि। अतः कारकप्रकारकान्वयबोधं प्रति विशेष्यतया धात्वर्थभावनोपस्थितिः कारणमिति व्युत्पत्तिः। मीमांसकानां च कारकप्रकारकान्वयबोधं प्रति विशेष्यतया आख्यातार्थभावनोपस्थितिः कारणमिति व्युत्पत्तिः। एवं विविधाः व्युत्पत्तयः तत्तच्छास्त्रसिद्धान्तानुसारं भवन्ति। तत्तद्व्युत्पत्त्यनुसारं च तेषां तेषां बोधः। तदेवोच्यते – बोधो व्युत्पत्त्यनुसारी। न तु बोधानुसारिणी व्युत्पत्तिरिति। यदि च बोधानुसारिणी व्युत्पत्तिः स्यात् एवं बहुव्युत्पत्तिभेद एव न स्यात्।

**< 70 >** (पु.327-330)

अथ मण्डनमिश्रानुयायी पुनरित्थं वदति - भवता यदुक्तं "भूवादयो धातवः" (पा.1.3.1) इति सूत्रं धातुत्वग्रहे प्रमाणं, तदेवास्माकमपि। क्रियावाचकाः भ्वादयः धातुसंज्ञका इत्येवार्थः अस्माभिरपि स्वीक्रियते। अतः अस्माकं मते सूत्रविरोधः नास्ति। किन्तु तत्र क्रियाशब्देन न लोकप्रसिद्धा क्रिया स्वीक्रियते। किन्तु धात्वर्थ एव। स च धात्वर्थः फल रूप एव। फलस्यापि क्रियापदेन व्यवहारः "कर्मवत्कर्मणा तुल्यक्रियः" (पा.3.1.87) इत्यादि सूत्रभाष्ये दृश्यते। अतः "क्रियावाचकत्वे सति गणपठितत्वं धातुत्वमि"ति लक्षणमस्माकं मतेऽपि सङ्गच्छते इति तदाह - नन्वित्यादिना।

धात्वर्थत्वमिति॥ "क्रियावचनो धातुः" इति लक्षणम्। तत्र क्रिया नाम का इति जिज्ञासायां या धातुसंज्ञकेन प्रतिपाद्यते सा इति वक्तव्यम्। तथा च धात्वर्थरूपक्रियाज्ञाने धातुसंज्ञाज्ञानमपेक्षितम्। धातुसंज्ञाज्ञाने च क्रियाज्ञानमपेक्षितमिति। स्वज्ञानाधीनज्ञानाधीनज्ञानविषयत्वरूपः अन्योन्याश्रयदोषः प्राप्तः। अन्योन्याश्रयश्च उत्पत्तौ ज्ञप्तौ च प्रतिबन्धकः। उत्पत्तौ यथा - देवदत्तस्य यज्ञदत्तात् यज्ञदत्तस्य देवदत्ताच्च उत्पत्तिः न भवति, कार्याव्यवहितनियपूर्ववर्तिनः एव कारणत्वात् तस्य च उभयत्रासम्भवात्। ज्ञप्तौ यथा – "हलन्त्यम्" (पा.1-3-3) इत्यत्र इत्पदार्थज्ञाने हल्पदार्थज्ञानस्य कारणत्वं, हल्पदार्थज्ञाने इत्पदार्थज्ञानस्य कारणत्वं न सम्भवति। अन्योन्याश्रयः स्थितौ न प्रतिबन्धकः। यथा - पृथिवीजलयोः आधाराधेयभाव इत्यादावुभयोः परस्पराधाराधेयभावेन स्थितेः सर्वाभ्युपगमात्। ग्रहपदमिति॥ "प्रकृते धात्वर्थस्य क्रियात्वे सति क्रियात्वस्य धात्वर्थत्वे

बाधकाभावेन क्रियावाचकत्वे सतीति विशेषणदानस्य अनुचितत्वापत्ते" रिति दर्पणः। धात्वर्थत्वस्य क्रियात्वे, क्रियात्वस्य धात्वर्थत्वे बाधकाभावेन दोषोद्भावनमसङ्गतं स्यात् अतः तज्ज्ञानप्रतिबन्धकत्वमेव सूचनीयमिति अत्रान्योन्याश्रयस्य ज्ञप्तिप्रतिबन्धकत्वमिति सूचयितुं ग्रहपदं पूरणीयमित्यर्थः। अनेनात्र अन्योन्याश्रयस्य ज्ञप्तिप्रतिबन्धकत्वं सूच्यत इति भावः। यदि च क्रियाशब्दः लोकप्रसिद्धव्यापारसन्तानवाचकः, तदा तु क्रियात्वज्ञाने धातुत्वज्ञानस्य अनावश्यकत्वात् न दोष इति भावः। क्रियाशब्देन फलस्य लोके व्यवहाराभावादिति तात्पर्यम्।

< 76 > (पृ.363-366)

एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वादिनेति।

इदं योग्यतालक्षणं चिन्तामणौ शब्दखण्डे प्रतिपादितम्। तथा हि – बाधकप्रमाविरहो योग्यता। बाधकप्रमाविरहो नाम इतरपदार्थसंसर्गे अपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावः। "पयसा सिञ्चती" त्यत्र पयोनिष्ठकारणतायाः निरूपकत्वसंसर्गे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावः अस्ति, "पयोनिष्ठकरणतानिरूपकत्वं सेकनिष्ठात्यन्ताभावप्रतियोगि" इति प्रमा नास्तीति समन्वयः। "वह्निना सिञ्चती"त्यत्र तु वह्निनिष्ठकरणतानिरूपकत्वे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वस्यैव सत्त्वात्, अर्थात् "वह्निनिष्ठकारणतानिरूपकत्वं सेकनिष्ठात्यन्ताभावप्रतियोगी" ति प्रमायाः एव सत्त्वात् न तत्र योग्यतेति।

अत्र आदिपदेन तत्र प्रतिपादितं लक्षणान्तरं सूच्यते। तच्च – इतरपदार्थसंसर्गे अपरपदार्थनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं योग्यतेति। "पयसा सिञ्चती" त्यत्र पयोनिष्ठकारणतानिरूपकत्वे सेकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वमस्तीति लक्षणसमन्वयः। "वह्निना सिञ्चती" त्यत्र तु तादृशधर्मवत्त्वमेवास्ति। तच्छून्यत्वं नास्तीति तत्र न योग्यता। इति। योग्यताज्ञानस्य शाब्दबोधकारणत्वं च मणिकारेण अङ्गीकृतम्। नव्यैस्तु[13] "योग्यताज्ञानं न शाब्दबोधहेतुः। वह्निना सिञ्चतीत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धात् न शाब्दबोधः। तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम्" इति अयोग्यतानिश्चयस्य शाब्दबोधप्रतिबन्धकत्वम् उक्तम्। न तु योग्यतायाः कारणत्वम्।

---

[13] न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे मतमिदं प्रतिपादितम्। इदं मतं दीधितिकारस्य स्यात्।

अन्ये तु शाब्दबुद्धिसाधारणविशिष्टबुद्धिसामान्यं प्रति बाधनिश्चयस्य प्रतिबन्धकत्वादेव "वह्निना सिञ्चती"त्यादौ बाधनिश्चयदशायां नान्वयबोधः। तथा च न योग्यताज्ञानस्य शाब्दधीहेतुत्वं न वा अयोग्यतानिश्चयस्य शाब्दबोधप्रतिबन्धकत्वं वा कल्प्यमिति पूर्वोक्तं मतद्वयं खण्डयन्ति। तदेवाह – किन्त्वनुमित्यादिसाधारण्येनैव क्लृप्तप्रतिबन्धकीभूतबाधज्ञानादेव न वह्निनेत्यादौ बोध इति।

यद्विशेषयोः इति। यद्विशेषयोः कार्यकारणभावः सोऽसति बाधके तत्सामान्ययोरपीति न्यायस्वरूपम्। घटकार्यं प्रति कुलालकृतिः कारणम् इति कार्यकारणभावेऽवधृते सति कार्यत्वावच्छिन्नं प्रति कृतित्वावच्छिन्नं कारणम् इति कार्यकारणभावः सिध्यति इत्यस्योदाहरणम्। असति बाधके - सामान्यकार्यकारणभावे बाधकज्ञानाभावे सति इत्यर्थः।

यत्तु घटोऽघट इति। घटोऽघट इति वाक्यात् घटभेदविशिष्टभिन्नः घट इति बोधो भवेत्, तद्वारणार्थं योग्यताज्ञानस्य शाब्दबोधं प्रति कारणत्वं वक्तव्यम्। घटभेदस्य घटेऽन्वययोग्यता नास्ति। न च बाधाभाव एव शाब्दबोधं प्रति कारणम् , तत्र बाधज्ञानस्य घटभेदाभाववान् घट इत्याकराकस्य सत्त्वात् न बोध इति वाच्यम्। घटत्वविशिष्टे घटभेदज्ञानस्य प्रतिबध्यस्याप्रसिद्धेः। अनाहार्यज्ञानं हि प्रतिबध्यम्। स्व(घटभेद)विरुद्धघटत्वरूपधर्मितावच्छेदककस्व(घटभेद) प्रकारकज्ञानस्याहार्यत्वात्।

तत्तुच्छमिति। घटः घटभेदवान् इति अनाहार्यज्ञानमुपनीतभानात्मकं प्रसिद्धम्। नैयायिकमते घटभेदे घटात्मकविशेष्यघटितस्य लौकिकसन्निकर्षस्याभावेऽपि ज्ञानलक्षणाप्रत्यासत्तेः संभवात् (वैयाकरणमते संस्कार एव ज्ञानलक्षणप्रत्यासत्तिस्थाने स्वीकृतः) घटविशेषणतया घटभेदभानमनाहार्यमेव भवतीति भावः। तादृशज्ञाने - आहार्यज्ञाने। इच्छाविशेषाभावे आहार्यज्ञानं न जायते। प्रकृते उपनीतभानात्मकं प्रतिबध्यं प्रसिद्धम्। तच्च अनाहार्यमिति। घटोऽघट इति अनाहार्योपनीतभानस्य प्रसिद्धौ विप्रतिपत्तेराह - किञ्चैवम् इति। वस्तुतः व्युत्पत्तिवादे घटोऽघट वाक्यार्थप्रकरणान्तोक्तरीत्या तादृशोपनीतभानादिकमप्रसिद्धमेव। अन्यत्रेति। यत्र बाधनिश्चयस्य प्रतिबन्धकत्वप्रसिद्धिः, तत्र बाधाभाव एव हेतुरस्तु योग्यताज्ञानस्य कारणता मास्तु इत्यर्थः।अत्यन्तासतेति। वन्ध्यासुतादिना। वन्ध्यासुतो याति इत्यादौ न शाब्दबोध इति।

अस्य क्षोणिपतेः – अयं श्लोकः महाकविश्रीहर्षस्य नैषधीयचरिते द्वादशसर्गे षडुत्तरशततमः दमयन्तीस्वयंवरसन्दर्भे वर्तते। स्वयंवरे हि साक्षात् सरस्वती एव दमयन्तीम् एकैकस्य राज्ञः समीपं नीत्वा तस्य गुणगणादिकं वर्णयति। तत्र मगधाधिपस्य

कीकटस्वामिनः वर्णनसन्दर्भेऽयं श्लोकः। तत्र हि अयं मगधाधिपः विंशत्या श्लोकैः वर्णितः। तत्रायमन्तिमश्लोकः। मगधाधिपस्य अकीर्तिलेशोऽपि नास्तीति बोधयितुं तस्य अकीर्तिमेव शशविषाणादिवत् वर्णयति कविः सरस्वतीमुखेन अस्मिन् श्लोके। अस्य भूपतेः अकीर्तयः कूर्मरमण्याः कच्छप्याः उत्पन्नं यद्दुग्धं, तन्मयः यस्समुद्रः, तस्य तीरे गीयन्ते। कीदृशाः ताः अकीर्तयः? परार्धादपि परया संख्यया गणिताः। परार्धसंख्या गणिते अत्युत्तमसंख्या। यस्याः परा संख्या नास्ति। पुनः कीदृशाः? प्रज्ञाचक्षुभिः जात्यन्धैः दृश्यमानाः, तेषां प्रत्यक्षविषयाः। तिमिरप्रख्याः-तिमिरवत् श्यामाः। एतादृशाश्चाकीर्तयः निषादादिसप्तस्वरातिरिक्तमष्टमं स्वरं स्वीकुर्वता वन्ध्यायाः जातेन मूकानां समूहेन अष्टमस्वरेण गीयन्त इति श्लोकस्य भावः। अत्र परार्धादधिका संख्या, जात्यन्धैरवेक्ष्यमाणत्वं, तिमिरस्य चाक्षुषरूपत्वं, स्वरस्य अष्टमत्वं, वन्ध्योदरात् उत्पत्तिः, कच्छपिकादुग्धम् इत्येतानि यथा सर्वथा न सन्ति तथा अस्य अकीर्तयः न सन्तीति विपर्यवसानया वृत्त्या वर्णना एषा। कच्छप्याः दुग्धं नास्ति। सा तु स्वापत्यानि दर्शनमात्रेण पालयतीति लोकप्रसिद्धिः। प्रज्ञाचक्षुश्शब्दस्य योगिपरत्वेऽपि योगिनां प्रत्यक्षविषयत्वं ज्योतिष एव, न तु तिमिरस्येति, अत्र वर्णितानां समेषाम् असम्भव एव। अत्र किलाकीर्तयः इत्यत्र किल आकीर्तयः इति च्छेदेन आसामस्त्येन कीर्तयः आकीर्तय इति व्युत्पत्त्या, अस्य भूभृतः कीर्तयः न सन्तीत्यपि अत्र ध्वनिः। अत एव दमयन्ती तं विहायाग्रे गता।

अत्यन्तासत्यप्यर्थे ज्ञानं शब्दः करोति इति, बाधनिश्चये अयोग्यतानिश्चयेऽपि शाब्दबोधः भवत्येवेत्यत्र उदाहरणतया अयं नैषधीयश्लोकः उदाहृतः।

< 79 > (पु.384-388)

कृदभिहितो भावो द्रव्यवत् प्रकाशते

"सार्वधातुके यक्" (पा.3.1.67) इति सूत्रे भाष्ये कृदभिहितभावस्य तिङभिहितस्य भावस्य त्रयः भेदाः उक्ताः। तत्र प्रथमः भेदः कृदभिहितो भावो द्रव्यवत् भवति इति। तत्र हि अस्ति खल्वपि विशेषः कृदभिहितस्य भावस्य तिङभिहितस्य चेति त्रिः उपक्रम्य त्रयः विशेषाः प्रतिपादिताः। तथा हि –

1. अस्ति खल्वपि विशेषः कृदभिहितस्य भावस्य तिङभिहितस्य च। कृदभिहितो भावो द्रव्यवत् भवति। किमिदं द्रव्यवदिति। द्रव्यं क्रियया समवायं गच्छति। कं समवायम्। द्रव्यं क्रियाभिनिवृत्तौ साधनत्वमुपैति। तद्वच्चास्य भावस्य कृदभिहितस्य भवति। पाको वर्तत इति। क्रियावन्न भवति। किमिदं क्रियावदिति। क्रिया क्रियया समवायं न गच्छति। पचति पठतीति। तद्वच्चास्य भावस्य कृदभिहितस्य न भवति - पाको वर्तत इति।

तत्र कैयटः –द्रव्यवदिति। द्रव्यत्वेन प्रसिद्धो यो घटादिः तद्वदयं भावो भवति। लिङ्गसंख्यासाधनसम्बन्धप्रतिपत्त्या। तत्र वस्तूपलक्षणं यत्रेति द्रव्यलक्षणयोगेऽपि प्रसिद्धप्रसिद्ध्यपेक्षः उपमानोपमेयभावः। क्रियाक्रिययेति। ननु पचति भवति, पश्य मृगो धावतीति कर्तृकर्मभावेन क्रिया क्रियया सम्बध्यत एव। एवं तर्हि करणादिरूपेण समवायं न गच्छतीति विवक्षितम्। ननु साध्यत्वात् क्रियायाः कथं क्रियान्तरं प्रति कर्तृकर्मभावः। विषये भेदादेकस्याप्यर्थस्य साध्यसाधनभावसम्बन्धसम्भवाददोषः। तदुक्तं हरिणा –

तत्र यं प्रति साध्यत्वम् असिद्धा तं प्रति क्रिया।
मृगो धावति पश्येति साध्यसाधनरूपता॥
तथा विषयभेदेन सरणस्योपजायते॥ इति। (वा.प.तृ.क्रि.49,51)

तत्र कर्तृकर्मत्वमाख्यातवाच्यस्य भावस्य न विरुद्धम्। तथा च भवति क्रियापेक्षमेव तस्य कर्तृत्वम्। सर्वश्चार्थः स्वेन रूपेण भवतीति भवने कर्तृत्वमुपपन्नमेव। कर्मापि क्रियाफलत्वात् प्रधानमिति कर्मत्वमपि तस्योपपद्यते। करणत्वादीनि तु सर्वात्मना गुणभावमन्तरेण नोपपद्यन्त इति प्राधान्येनात्यन्तविरोधात् तस्य नोपपद्यन्ते।

2. अस्ति खल्वपि विशेषः कृदभिहितस्य भावस्य तिङभिहितस्य च। तिङभिहितेन भावेन कालपुरोषोपग्रहाः अभिव्यज्यन्ते, कृदभिहितेन पुनः न व्यज्यन्ते।

3. अस्ति खल्वपि विशेषः कृदभिहितस्य भावस्य तिङभिहितस्य च तिङभिहितो भावः कर्त्रा सम्प्रयुज्यते। कृदभिहितः पुनः न संप्रयुज्यते। – अत्र कैयटः – कृदभिहित इति। ननु कृदभिहितस्यापि भावस्य भवति कर्त्रा योगः। यथा ब्राह्मणानां प्रादुर्भावः इति। तत्राहुः – एकपदवाच्येन कर्त्रा न युज्यते, यथा पचतीति कर्ता वाच्यो नैव पाक इति। शुद्धस्यैव भावस्य प्रत्यायनात्। अथवा घञादिभिः सिद्धरूपता भावस्य अभिधीयत इति तेन रूपेण कर्त्रा योगाभावो, धातुरूपप्रतिपाद्यतया तु साध्यतया कर्त्रा योगो भवति। अथवा उपलक्षणभावेन भावः कर्त्रा युज्यते कृत्सु पाचक इति, तिङ्क्षु पचतीति साध्यमानतया प्राधान्येन। तत्र कृत्सु प्राधान्येन कर्त्रा योगो नास्तीत्ययमत्रार्थः।

आख्यातशब्दे इति।

एतावता प्रबन्धेन धातुसामान्ये व्यापारप्रतीतिः साधिता। स च व्यापारः साध्यत्वेन प्रतीयमाना क्रियेत्यपि साधितम्। साध्यत्वं च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वरूपमुत्पाद्यत्वमिति चोक्तम्। तच्चासत्त्वभूतत्वमित्यपि प्रतिपादितम्। तादृशक्रियैव कारकान्वययोग्येत्यपि प्रतिपादितम्। तथा च धातुना साध्यरूपायाः असत्त्वभूतायाश्च क्रियायाः अभिधाने, तदुत्तरं विहितानां घञादिभावप्रत्ययानामपि "भावे" (पा. 3.3.18)

इत्यधिकारे विहितानां प्रकृत्यर्थानुवादकत्वेन असत्त्वभूतक्रियाबोधकत्वमेव प्राप्तम्। तथा च "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्यसिद्धान्तविरोधः। कृदभिहितः – घञादिभावप्रत्ययाभिहितः, भावः - धात्वर्थः क्रियारूपः, द्रव्यवत् - द्रव्येण तुल्यं द्रव्यवत् इति तृतीयान्तात् "तेन तुल्यं क्रियाचेद्वतिः" (पा. 5.1.115) इति वतिः। द्रव्येण तुल्यं नामार्थेन तुल्यं प्रकाशते भासते इत्यर्थः। द्रव्यधर्माणि लिङ्गसङ्ख्याकारकत्वानि गृह्णातीत्यर्थः। यद्वा द्रव्यं – क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकरूपसिद्धत्ववत्, तेन तुल्यं प्रकाशते इत्यर्थः। सिद्धत्वेन भासते इत्यर्थः। तथा च "धातुना साध्यावस्थापन्ना क्रियाभिधीयत" इति सिद्धान्तविरोधः समापतितः। भाष्यकारेण सिद्धावस्थतापन्नक्रियाप्रतीतेः प्रतिपादनात् इति शङ्कायां समुत्पन्नायां भाष्यविरोधस्तु विरोधाभास एव, वस्तुतः तदपि भाष्यमस्मत्पक्षसाधकमेवेति निरूपयितुमुपक्रमते - आख्यातशब्दे इत्यादि कारिकया। इयं च कारिका वाक्यपदीयस्था सन्दर्भानुगुणेति अत्र योजिता। कारिकायामत्राख्यातशब्देन तिङन्तद्वयघटितं "पश्य मृगो धावति", "पचति भवति" इत्यादिवाक्यमुद्दिष्टम्। "मृगो धावति पश्येति साध्यसाधनरूपते"ति तदुत्तरवाक्यपदीयकारिकापि अस्यां व्याख्यायां प्रमाणम्। "आख्याते शब्दौ यस्मिन्" इति बहुव्रीहिसमासः। भूषणसारव्याख्यातारः सुबोधिनीकारास्तु आख्यातशब्दव्युत्पत्तिविषये विविधमतानीत्थं परिशीलयन्ति – "आख्यातशब्दे इति। आख्यातशब्दौ स्तो यत्रेति मत्वर्थीयेन अर्श आद्यच्प्रत्ययेन तिङन्तद्वयघटितवाक्ये इत्यर्थ इति केचित् – तन्न। तत्पुरुषे सति मत्वर्थीयोऽजिति वृत्तिद्वये गौरवात्। आख्याते शब्दौ यत्रेति बहुव्रीहिर्वाक्यरूपान्यपदार्थे इत्यपरे, तदपि न। अन्यपदार्थनिरूपितशक्तिकल्पने गौरवात्। ततश्च आख्यातयोः शब्दे(वाक्ये) इति षष्ठीतत्पुरुषः, अवयवावयविभावसम्बन्धश्चात्र षष्ठ्यर्थः।तथा च तिङन्तद्वयनिष्ठावयवत्वनिरूपितावयवित्ववद्वाक्यात्मकशब्दे इत्यर्थः" इति। तत्पुरुषेणैवापेक्षितार्थसिद्धौ बहुव्रीहिपर्यन्तमनुधावनं न युक्तमिति तेषामाशयः।अन्ये सर्वे बहुव्रीहिमेवाश्रयन्ते। अत्र तत्पुरुषापेक्षया बहुव्रीहिरेव शीघ्रप्रतिपत्तिकर इति तेषामाशयः स्यात्। अथात्र तत्पुरुषः भवितुमर्हति वा न वेत्यपि विचारणीयम्।

यद्यपि षष्ठीसमासविषये कोऽपि विशिष्टः नियमः नास्ति अथापि गमकत्वे सत्येव सः।अवयवावयविभावसंबन्धं पुरस्कृत्य षष्ठीसमासः अवयववाचकस्य विशेष्यत्वे एव प्रचुरतयोपलभ्यते "मत्पाणिः" इत्यादौ। अवयविनः विशेष्यत्वे च तादृशसमासः मृग्य एव। अत एवात्र षष्ठीसमासः न स्वीकृतः व्याख्यातृभिरित्यनुमीयते।

सरूपसूत्रे सार्वधातुके यगिति सूत्रे च भाष्यादौ।

तिङन्तबोध्यक्रियायाः अन्यस्यां तिङन्तबोध्यक्रियायां कर्तृत्वेन कर्मत्वेन च अन्वयः शब्दशक्तिस्वभावादेव सिध्यति। अत्र प्रमाणतया पूर्वोक्तसूत्रद्वयस्थं भाष्यं कैयटं च प्रदत्तम्। भाष्यादावित्यत्र आदिशब्दः कैयटपरः।

तत्र "सरूप" (पा.2.2.64) सूत्रे हि भाष्ये "किं पुनः कारणं सरूपाणा-मेकेनाप्यनेकस्य अभिधानं भवति" इति प्रश्नस्य "अभिधानं पुनः स्वाभाविकम्" इत्युत्तरं दत्तम्। तथा च यथा एकेन अनेकाभिधानं शब्दशक्तिस्वभावः तथैव क्रियायाः क्रियान्तरे कर्तृकर्मभ्यां अन्वयोऽपि स्वाभाविक इति भावः।

"सार्वधातुके यक्" (पा.3.1.67) इति सूत्रे भाष्ये – "क्रिया क्रियया समवायं न गच्छति पचति पठतीति। कृदभिहितस्य तु भवति – पाको वर्तत" इत्युक्तम्। तद्व्याख्यायां प्रदीपे – "ननु भवति पचति, पश्य मृगो धावतीति कर्तृकर्मभावेन क्रिया क्रियया सम्बध्यत एव। एवं तर्हि करणादिरूपेण समवायं न गच्छतीति विवक्षितम्। ननु साध्यत्वात् क्रियायाः कथं क्रियान्तरं प्रति कर्तृकर्मभावः? विषयभेदादेकस्याप्यर्थस्य साध्यसाधनभाव-संबन्धसंभवात् अदोषः। तदुक्तं हरिणा –

तत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया।
सिद्धा तु यस्मिन् साध्यत्वं न तमेव पुनः प्रति॥
मृगो धावति पश्येति साध्यसाधनरूपता।
यथा विषयभेदेन सरणस्योपपद्यते॥ इति। (वा.प.तृ.कि.49,51)

तत्र कर्तृकर्मत्वमाख्यातवाच्यस्य भावस्य न विरुद्धम्। तथा हि – भवति क्रियापेक्षमेव तस्य कर्तृत्वम्। सर्वश्चार्थः स्वेन रूपेण भवतीति भवने कर्तृत्वमुपपन्नम्। एवं कर्मापि क्रियाफलत्वात् प्रधानमिति कर्मत्वमपि तस्योपपद्यते। करणत्वादीनि तु सर्वात्मना गुण-भावमन्तरेण नोपपद्यन्त इति प्राधान्येनात्यन्तविरोधात् तस्य नोपपद्यन्ते।" इत्युक्तम्।

कृद्योगा च षष्ठी समस्यत इति वाक्यविहितस्यापि षष्ठ्यसम्भवात्, षष्ठ्यन्तस्य उत्तरपदार्थेनान्वये भार्या राज्ञः, पुत्रो देवदत्तस्येत्यादाविवासामर्थ्याच्च असम्भवात् इति।

पाक इत्यादिघञन्ते प्रकृत्या साध्यावस्थापन्नक्रियाया एवोपस्थितौ ओदनस्य पाक इति प्रयोगः प्रमाणतया प्रदर्शितः। तथा अनङ्गीकारे ओदनपाक इति षष्ठीसमासा-नुपपत्तिः उक्ता। तदुपपादकवाक्यमिदम्। तत्रायं सन्दर्भः – ओदनस्य पाक इत्यत्र अध्याहृतं भवतीति तिङन्तक्रियामादाय षष्ठ्याः उपपादनं कर्तुं न शक्यम्। "कर्तृकर्मणोः

कृती"(पा. 2-3-65)ति कृद्योगे एव षष्ठीविधानात्। अध्याहृततिङन्तक्रियासम्बन्धमादाय तु षष्ठी न भवत्येव। "न लोके"(पा.2.3.69)ति लादेशयोगे षष्ठीनिषेधात्। इत्युक्त्वा अध्याहृतक्रियामादाय षष्ठ्युपपादने ओदनपाक इति समासानुपपत्तिः उक्ता। यदि च अत्र अध्याहृततिङन्तक्रियामादाय षष्ठीत्युच्येत, तर्हि "षष्ठी"(पा.2.2.8) इति सूत्रेण षष्ठी-समासो वक्तुं न शक्यः। ओदनस्येति षष्ठ्यन्तस्य उत्तरपदार्थेन पाकेन अन्वयाभावात् असामार्थ्यात्। एवं "कृद्योगा च षष्ठी समस्यते" इति वार्तिकविहितस्य षष्ठीसमासस्यापि अनुपपत्तिः। इदानीमत्र षष्ठ्याः अध्याहृततिङन्तयोगात् उत्पत्त्या, कृद्योगषष्ठीत्वाभावात्, वार्तिकेन कृद्योगषष्ठ्या एव समासविधानात्। तथा च षष्ठ्यसम्भवात् – कृद्योगषष्ठ्य-सम्भवात्, "कृद्योगे"ति वाक्यविहितस्यापि समासस्य असम्भवात् ,अन्वयाभावे असामर्थ्यात् समासो न स्यात् इति भावः। वाक्यान्ते वर्तमानस्य असम्भवात् इत्यस्य कस्यापि समासस्य "षष्ठी"(पा.2.2.8)ति विहितस्य वा "कृद्योगे"ति वार्तिकविहितस्य वा असम्भवात् इत्यर्थः। एवं च सर्वथा समासासंभवः इत्यर्थः। एतदेव बोध्यते "वाक्य-विहितस्यापी"त्यत्रत्येन अपिशब्देन।

< **83** > (पु.414-415)

सम्बोधनपदं यच्च

क्रियायाश्च विशेषणं कदाचित् सामानाधिकरण्येन भवति। यथा सुष्ठु करोति, शोभनं करोति इति। अत्र करोत्यर्थस्य सुष्ठ्वित्यादिविशेषणविशिष्टस्यैव प्रतीतेः सुष्ठ्वित्या-दीनां करोतिक्रियया सामानाधिकरण्यम्। वैयधिकरण्येनापि विशेषणं भवति यथा व्रजानि देवदत्तेति। अत्र हि देवदत्त व्रजानीति देवदत्तस्य व्रजनक्रियायाश्च सामानाधिकरण्यं नास्ति। केवलमामन्त्र्य देवदत्तं व्रजत्यसाविति देवदत्तामन्त्रणविशेषिता केवला या विलक्षणा व्रजनक्रियेत्याख्यातं सविशेषणमेवेति वाक्यलक्षणसद्भावात् प्रवर्तत एव निघातः।

<85> (पु.423-426)

एतेन यजतिषु येयजामहं करोति ...... तथाप्यसमस्तनञः क्रियायामन्वयः सिद्ध एवेत्यपास्तम्।

अयं ग्रन्थः शास्त्रदीपिकायाः पर्युदासताधिकरण(मी.10.8.1.) विषयानुवादः। तथा हि – मीमांसाशास्त्रे दशमेऽध्याये अष्टमे पादे प्रथममधिकरणं प्रदेशानारभ्याधीतयोः निषेधस्य पर्युदासताधिकरणमिति प्रसिद्धमिति। तत्र हि –"नार्षेयं वृणीते न होतारम्" इति महापितृयज्ञे दर्शपूर्णमासिके अतिदिष्टस्य, अनारभ्याधीतस्य "यजतिषु येयजामहं

करोति नानूयाजेषु" इत्यस्य च निषेधस्य पर्युदासता वा प्रसज्यप्रतिषेधता वेति विचारः कृतः। पर्युदासता च सिद्धान्तिता। शास्त्रदीपिकायां पार्थसारथिमिश्रैः इदमधिकरणमित्थं व्याख्यातम्। तदेवात्र सङ्क्षिप्यते –

अत्रायं पूर्वपक्षः।

तत्र श्रुत्यर्थलाभाय प्रतिषेधोऽन्यथा पुनः।

पदद्वयमप्यन्यपरत्वात् लक्षणा भवेत्॥ (शा.दी.10-8-1) इति।

अयं प्रतिषेध एव। नार्षेयं वृणीते इत्यत्र त्रीणि पदानि। न आर्षेयं वृणीते इति। तत्र आर्षेयं वृणीते इत्यार्षेयवरणकर्तव्यता या प्रतिपाद्यते, सा च नञा प्रतिषिध्यते इति, त्रयाणां पदानां स्वसङ्केतितार्थप्रतिपादकत्वात् श्रुतिवृत्तिता। तथा नानूयाजेषु येयजामहं करोति इति वाक्येऽपि अनूयाजेषु येयजामहकरणकर्तव्यता अनूयाजेषु येयजामहकर्तव्यताया प्रतिपाद्यते अनूयाजेषु येयजामहं करोति इति वाक्येन, सा च नञा प्रतिषिध्यते इति सर्वेषां पदानां स्वसङ्केतितार्थप्रतिपादकत्वात् श्रुतिविषयता। यदि च पर्युदासता तर्हि यथा अब्राह्मणमानयेत्यत्र नञ्–ब्राह्मणशब्दाभ्यां ब्राह्मणभिन्नो लक्ष्यते, तथा इहापि नञ्-आर्षेयशब्दाभ्याम् आर्षेयभिन्नो लक्षणीयः, तथा नानूयाजेवित्यत्रापि नञ्-अनूयाज-शब्दाभ्यां अनूयाजभिन्नानि यागान्तराणि लक्षणीयानि इति न आर्षेयमिति न अनूयाजेषु इति पदद्वयेपि स्वसङ्केतितार्थपरित्यागेन अन्यार्थबोधनाय लक्षणा आश्रयणीया। लक्षणा पददोषः। न हि श्रुतिसम्भवे लक्षणा युक्ता। किञ्च पर्युदासपक्षे न आर्षेयमित्यत्र, न अनूयाजेष्वित्यत्र च नञ उत्तरपदेन साकाङ्क्षत्वात् समासे सति अनार्षेयमिति, अननूयाजेष्विति स्यात्। तत्र समासस्य नित्यत्वात्। तथा हि - "समर्थः पदविधिः"(पा. 2-1-1) इति सूत्रे वार्तिकम् - "वावचनानर्थक्यं स्वभावसिद्धत्वात्"इति। राजपुरुषादिसमासेन विग्रहवाक्यस्य निवृत्तिः स्यादिति, तदर्थं "विभाषे" (पा. 2-1-11) ति सूत्रमारब्धं सूत्रकृता। तस्य प्रत्याख्यानवार्तिकमेतत् "वावचनानर्थक्यमिति"। अयं भावः - "विभाषे" (पा. 2-1-11)ति सूत्रं नारम्भणीयम्। वृत्तिविग्रहयोः भेदस्य स्वभावसिद्धत्वात् इति। अनेन च वार्तिकेन वृत्त्या योऽर्थो बोध्यते न स विग्रहेण बोध्यत इति ज्ञायते। तथा च नञः उत्तरपदेन सम्बन्धे सति समासः नित्यः स्यात्। ननु नेदं वार्तिकं वृत्तिविग्रहयोः भिन्नार्थतायां प्रमाणम्। किन्तु द्वयोरपि लोकप्रयोगसिद्धत्वे एवेति चेन्न। तथा सति उपकुम्भमित्यादिष्वपि विग्रहवाक्यप्रयोगस्य साधुत्वं स्यात्। उपकुम्भं, कुम्भकार इत्याद्यव्ययीभावोपपदसमासादिषु तदर्थे विग्रहवाक्यप्रयोगो नेष्टः। अतश्च

वृत्तिविग्रहयोः भिन्नार्थत्वादेव तत्तदर्थप्रतिपादनाय तयोः स्वभावसिद्धत्वमिति विभाषावचनप्रत्याख्यानं युज्यते। अतश्च वार्तिककारस्य अयमेवाशयः।

ननु नात्र नञ्समासः। किन्तु निरनुबन्धेन 'न' शब्देन समासः, नैकं नैकधेत्यादिवदिति चेन्न। असमासे नशब्दस्योदात्तत्वं समासे तु समस्तस्यान्तोदात्तत्वात् शेषनिघातेन अनुदात्तत्वमिति भेदस्य सत्त्वात्। अतः नात्र समासः। समासाभावे पर्युदासोऽपि न भवति, उत्तरपदेन सम्बन्धाभावात्। अपि तु क्रिययैव नञः सम्बन्धः। एवं प्रतिषेधपक्षे सिद्धे, प्रतिषेधस्य प्राप्तिपूर्वकत्वात् आर्षेयवरणस्य अनूयाजेषु येयजामह-करणस्य च मानान्तरेणाप्राप्तत्वात् प्राप्तिः,निषेधश्चाभ्यां वचनाभ्यां कल्पनीयाविति विकल्पः सिध्यति इति।

अत्र सिद्धान्तः –

यत एव विकल्पोऽयं प्रतिषेधे प्रसज्यते।
अतस्तत्परिहाराय पर्युदासाश्रयो वरम्॥(शा.दी.10-8-1) इति।

यथा पर्युदासपक्षे लक्षणापत्तिरूपः दोषः, तथा प्रतिषेधपक्षेऽपि पक्षे तदत्यन्ता-भावकल्पनरूपः दोषः। पक्षे तदभावकल्पनापेक्षया लक्षणारूपः पददोषः एव वरम्। वृत्तिविग्रहयोः समानार्थत्वं सर्वाभ्युपगतमिति, विभाषावचनप्रत्याख्यानमपि वार्तिककारस्य अयुक्तमेव। राज्ञः पुरुषः, राजपुरुष इत्यनयोः बोधेऽपि ऐकार्थ्यमेव। तथा हि – य एव राजपुरुष इति वृत्तेरर्थो राजविशिष्टः पुरुषः, स एव राजपुरुष इत्यस्यापि। बोधविषयाणां पदार्थानां समत्वात्। यद्यपि वृत्तौ पदद्वयमपि अनन्याक्षिप्तस्वार्थं सदेकं विशिष्टं प्रति-पादयति, अत एव तत्रोपसर्जने विशेषणादियोगो न, वाक्ये तु अर्थान्तराक्षेपं सहते यथा ऋद्धस्य राज्ञः पुरुष इत्यत्र राजपदम् ऋद्धस्य विशेषणसम्बन्धमनुभवत् पुरुषं विशिनष्टि। न चैतावता अर्थभेदः। प्रतिपाद्याभेदात्। यदि चैतावता भेदेन समासो वाक्यस्यानिवर्तक इत्युच्येत तर्हि ततो विभाषावचनात् प्राग्विहितेन उपकुम्भादिसमासेनापि वाक्यं न निवर्तेत। तथोपपदसमासेन कुम्भकारादिना। न चैवमिष्टम्। तस्मादवश्यादेयं विभाषावचनमिति तदानर्थक्यवचनं न युक्तम्। तस्मादसमासेऽपि विकल्पपरिजिहीर्षया युक्तं पर्युदासा-श्रयणम्। एवं च प्रकृतिवत्कुर्यात् आर्षेयवरणव्यतिरिक्तं पितृयज्ञे, अनूयाजव्यतिरिक्तेषु यज्ञेषु येयजामहं कुर्यात् इति वाक्यार्थः। अत्र वावचनानर्थक्यं स्वभावसिद्धत्वादिति वार्तिकस्य न्याय्यत्वं, तस्य पूर्वपक्षोक्तात् अन्याशयकत्वं च प्रतिपादयति सोमनाथः स्वव्याख्यायां मयूखरत्नमालिकायामित्थम् – वस्तुतस्तु कात्यायनवचनस्य न्याय्यत्वेऽपि एकार्थीभावव्यपेक्षालक्षणसामर्थ्यभेदनिबन्धनादर्थभेदमादाय वावचनार्थक्यं वदता

कात्यायनेनापि प्रतिपाद्याभेदाङ्गीकारेण राजविशिष्टपुरुषस्य समासगम्यस्य, राज्ञः पुरुष इति वाक्यगम्यत्ववत् समासगम्यस्यापि पर्युदासस्य वाक्यगम्यत्वसम्भवेन समासैकलभ्यत्वाभावात् असमासेऽपि न पर्युदासतानापत्तिरिति ध्येयम्। इति।

युक्तं चैतत्। वावचनानर्थक्यं स्वभावसिद्धत्वादिति वार्तिकस्य न समासनित्यताभिप्रायकत्वम्। अपि तु वृत्तिपक्षाभिप्रायकत्वम्। तदुक्तं भाष्ये समर्थसूत्रे - "वावचनमनर्थकम्। किं कारणम्? स्वभावसिद्धत्वात्। इह द्वौ पक्षौ वृत्तिपक्षश्च अवृत्तिपक्षश्च। तत्र स्वाभाविके वृत्तिविषये नित्ये समासे प्राप्ते वावचनेन किमन्यच्छक्यमभिसम्बद्धुम् अन्यदतः संज्ञायाः। न च संज्ञायाः भावाभावौ इष्येते। तस्मान्नार्थो वावचनेन "इति।
अथ विभाषाधिकारप्रत्याख्यानपक्षे उपकुम्भादिषु वाक्यनिवृत्तिः कथमिति चेत् अगमकत्वात्। ततश्च तादृशस्थले एकार्थीभावविवक्षैव, न तु व्यपेक्षाविवक्षेति भावः। तदेव निरूपयति – एवमुपकुम्भादावबोधकत्वादेव वाक्यस्यासाधुत्वमिति। तत्र प्रमाणं प्रदर्शयति – एतस्माद्धेतोरिति। भाष्यकैयटाभ्यामिति। समर्थ(पा. 2-1-1) सूत्रे हि – सविशेषणानां वृत्तिर्न, वृत्तस्य वा विशेषणयोगो नेति वचनमारब्धम्। तत्र च देवदत्तस्य गुरुकुलमित्यादिषु वृत्तिर्न स्यादिति दोषः उक्तः। तदपाकरणाय अगुरुपुत्रादीनाम् इति पूर्वोक्तस्य सङ्कोचः कर्तव्य इति प्रस्तुतम्। तद्वचनप्रत्याख्यानसन्दर्भे सविशेषणानामिति वचनं वा अगुरुपुत्रादीनामिति तस्य सङ्कोचो वा नापेक्षितः अगमकत्वादेव वृत्तिर्नेत्युक्तम्। तदुपपादनं चेत्थम् कृतं भाष्ये – इह समानार्थेन वाक्येन भवितव्यम्, समासेन च। यश्चेहार्थो वाक्येन गम्यते "महत्कष्टं श्रित" इति नासौ जातुचित् समासेन गम्यते महत्कष्टश्रित इति। एतस्माद्धेतोः ब्रूमः – अगमकत्वादिति, न ब्रूमः अपशब्दत्वात् इति। यत्र च गमको भवति, भवति तत्र वृत्तिः। तद्यथा देवदत्तस्य गुरुकुलम् देवदत्तस्य गुरुपत्रो देवदत्तस्य दासभार्येति। तत्र न ब्रूम इति प्रतीकमुपादाय कैयटः – लोके प्रयुज्यमानस्य साधुत्वमसाधुत्वं च विचार्यते गोगाव्यादिशब्दवत्। महत्कष्टश्रित इति तु महत्कष्टं श्रित इत्येतद्वाक्यार्थे नैव प्रयुज्यते। प्रयुक्तानां चेदमन्वाख्यानम्। अतो नात्र समासो भविष्यतीत्यर्थः।

तथाप्यसमस्तनञः क्रियान्वयः सिद्ध एवेति।

इदं वाक्यं शास्त्रदीपिकायां नास्ति। कौण्डभट्टेन योजितम्। अस्य अयमाशयः – यत्र विकल्पाद्यापत्तिः तत्रैव असमस्तनञः उत्तरपदेनान्वयः। सर्वत्र तथा स्वीकारे लक्षणापत्तिरूपः पददोषः प्रसज्यते। अतः सामान्यतः असमस्तनञः क्रियायामेवान्वयः इति पार्थसारथिमिश्राणाम् आशय इति, स एव पूर्वोक्तवाक्येनोक्त इति विभावनीयम्।

ततश्च अत्र परास्तता नाधिकरणविचारस्य। अपि तु असमस्तनञः सामान्यतः क्रियान्वय-नियमस्य। समासायोग्यस्यैव नञः क्रियान्वयनियमस्य प्रतिपादनादिति भावः।

< 86 > (पु.431-434)

कारकाण्यपि क्वचित्तथाभूतान्येवेति ।

क्वचिदर्थे गुणभूतान्येव इत्यर्थः। पक्ता, पाचकः, पक्व इत्यादौ कारकस्य धात्वर्थापेक्षया प्राधान्यावगमेऽपि तस्य कृद्बोध्यस्य कारकस्य अस्ति, तिष्ठति, गच्छती-त्यादिपदान्तर(तिङन्त)बोध्येऽर्थे गुणतैवेति न कदापि तस्या सर्वात्मना प्रधानभावः। एवं च फलस्य भावनायामन्वयो निर्विवादः।कारकाणां भावनायामन्वयस्य विवादग्रस्त-त्वेऽपि क्वचिदर्थे गुणभावो निर्विवादः।स चार्थः फलं वा व्यापारो वास्तु। सर्वथा च फलस्य, कारकणां च गुणभाव एव। "क्वचिद्गुणभूतान्येव" इत्येवकारेण ग्रन्थकारः अमु-मेवार्थं द्रढयति। एवं च फलस्य कारकाणां च क्वचित् क्रियान्तरे तिङन्तबोध्ये विशेषणत्वेन गुणभावात् "गुणानाञ्च परार्थत्वात् असम्बन्धः समत्वात् स्यात्" इति न्यायेन कारकाणां फले अन्वयासम्भवात् भावनायामेवान्वयः सिध्यति इति।

< **90** > (पु.447-450)

भेद्यभेदकेत्यादि। इयं च कारिका तिङर्थवादमञ्जूषायां तिङां कर्तृकर्माद्यर्थकत्व-मेवेति निरूपयता नागेशेन उल्लिखिता ।अयमेव अस्य श्लोकस्य सांप्रदायिकः सन्दर्भ इति सूचयति कौण्डभट्टः "वस्तुतो धातोर्भावनानभिधायकत्वे" इत्यादिना "सम्प्रदाय" इत्यन्तेन। इयं च भेद्यभेदकेति कारिका हरिकारिकेति नागेशः।परन्त्वियं कारिका इदानी-मुपलभ्यमाने वाक्यपदीये नोपलभ्यते । अतः इयं भर्तृहरिकृतमहाभाष्यव्याख्यायां स्यात् , या च व्याख्या पूर्णतयेदानीं नोपलभ्यते । अथवा कालक्रमेण वाक्यपदीयात् भ्रष्टा स्यात् । भूषणे भेद्येति सम्प्रदाय इत्युक्तम् । तथा च सम्प्रदायरूपेण पठ्यमानेयं कारिका अज्ञात-मूलेत्यपि स्यादस्य आशयः ।

भेद्यं च भेदकं च भेद्यभेदके इति द्वन्द्वः।तयोः सम्बन्धः भेद्यभेदकसम्बन्धः इति षष्ठीतत्पुरुषः।तादृशसम्बन्ध एवोपाधिः इति कर्मधारयः।तादृशोपाधेः भेद इति पुनः षष्ठी-तत्पुरुषः।तादृशभेदः निबन्धनं यस्येति बहुव्रीहिः।इदं च साधुत्वस्य विशेषणम्। कारिकायां पूर्वार्धस्य समस्तस्य इत्थमेव व्युत्पत्तिः प्रदर्शिता कौण्डभट्टेन भेद्यं विशेष्यमित्यारभ्य तन्निबन्धनं साधुत्वमित्यन्तेन । इयं च कारिका प्रौढमनोरमायां " तेन तुल्यं क्रियाचे-द्वतिः"(पा.5-1-115) इति सूत्रव्याख्याने "महानसवत्" इत्त्यादिषु वत्यर्थस्य पक्षान्वयेऽ-

साधुत्वप्रतिपादनसन्दर्भे उल्लिखिता। व्याख्यातं च किं विशेष्यके किं प्रकारके किं संसर्गके बोधे उद्देश्ये किं साधु किं नेत्येव शास्त्रीयविचारविषयः। उक्तं हि भगवता "सत्यामर्थावगतौ शब्दैश्चापशब्दैश्च भक्ष्याभक्ष्यादिवन्नियमः क्रियते" इति ।

अत्र च शब्दरत्नकारः – भेद्यं - विशेष्यं , भेदकं - विशेषणं , सम्बन्धः - तयोः संसर्गः , उपाधिः - पश्वादिः इति व्याख्यामकरोत् । अनया व्याख्यया भेद्यं च भेदकं च सम्बन्धश्च उपाधिश्च भेद्यभेदकसम्बन्धोपाधयः। तेषां भेदः जातावेकवचनम्। तेषां ये भेदाः, तन्निबन्धनं साधुत्वमिति व्युत्पत्तिः लभ्यते। तथा च अस्यां व्याख्यायां भेद्यादिचतुर्णां द्वन्द्वः, ततः भेदशब्देन षष्ठीतत्पुरुषः , ततः निबन्धनशब्देन बहुव्रीहिरिति व्युत्पत्तिः सिद्ध्यति।

मञ्जूषायां कलाव्याख्यायां कारिकापूर्वार्धः इत्थं व्याख्यातः – " भेद्यं - विशेष्यं , भेदकं - विशेषणं, तयोः सम्बन्धः, तद्रूपाः ये उपाधयः, तेषां यो भेदः तन्निबन्धनं साधुत्व-मित्यर्थः।" इति । एतदनुसारं भेद्यभेदकसम्बन्धानां द्वन्द्वः, ततः उपाधिशब्देन कर्मधारयः, ततः भेदशब्देन षष्ठीतत्पुरुषः। ततः निबन्धनशब्देन बहुव्रीहिश्च। अत्रायं विवेकः – प्रथम-व्याख्यायां विशेषणविशेष्यभावसम्बन्धरूपोपाधेः यो विशेषः तन्निबन्धनं साधुत्वमित्यर्थः। द्वितीयव्याख्यायां विशेषण-विशेष्य-सम्बन्ध–उपाधीनां यः भेदः , तत्तन्निष्ठप्रत्येकभेदाश्रितं साधुत्वमित्यर्थः। तृतीयव्याख्यायां भेद्यभेदकसम्बन्धरूपोपाधीनां यो भेदः तन्निबन्धनं साधुत्वमित्यर्थः। अत्र प्रथमव्याख्यैव कौण्डभट्टसम्मता ।

भिद्यते अन्यस्माद् व्यावर्त्यतेऽसौ इति भेद्यम्। भिद्धातोः कर्मणि " ऋहलोर्ण्यत्" (पा. 3-1-124) इति ण्यत् । विशेष्यमित्यर्थः । विशेष्यताश्रय इति यावत् । भिनत्ति - अन्यस्मात् व्यावर्तयति इति भेदकम्। "ण्वुल् तृचौ" (पा. 3-1-133) इति कर्तरि ण्वुल्। विशेषणमित्यर्थः। विशेषणताश्रय इत्यर्थः। विशेषणमेवावाच्छेदकतया इतरव्यावर्तकम् । यथा च घटत्वमेव घटं पटादिभ्यो व्यावर्तयति । तयोः सम्बन्धः विशेषणविशेष्यभावः । अयमेव संसर्गः संसर्गताख्यविषयताश्रय इत्यर्थः। सविकल्पके हि ज्ञाने विषयतात्रयं भासते । विशेष्यता , विशेषणता , संसर्गतेति । तत्र घट इति ज्ञाने घटत्वं विशेषणम् । अतस्तत्र विशेषणतारूपा विषयता अस्ति। घटरूपं द्रव्यं विशेष्यम्। अतस्तत्र विशेष्यता-रूपा विषयता अस्ति । घटत्वविशिष्टो घट इति बोधे घटत्वघटयोः विशेषणविशेष्यभावः सम्बन्धः। अतस्तत्र संसर्गतारूपा विषयता अस्ति। विशेषणविशेष्ययोः सम्बन्धः विशेषणविशेष्यभावश्च सार्वत्रिकः सामान्यरूपेण भासते । तन्निरूपकः पुनः समवायादिः तत्र तत्तद्विशेषरूपेण भासते। तथा च पदार्थस्य पदार्थान्तरात् भेदकत्वेन विशेषण-

विशेष्यभाव एव इतरव्यावर्तको धर्मः।स एव उपाधिः - इतरव्यावर्तकः, तस्य च यः भेदः - विशेषः समवायादिसम्बन्धः, तन्निमित्तं साधुत्वम् इति कारिकापूर्वार्धः ।
अस्य अयं भावः। घटादिशब्दानां घटत्वादिकं प्रवृत्तिनिमित्तम् ।तदेव भेदकम् । यश्च तदाश्रयीभूतः घटादिः तदेव भेद्यम् । तयोः घटत्वघटयोः यः विशेषणविशेष्यभावः घटत्वनिरूपितविशेष्यत्वं घटे, घटनिरूपितविशेषणत्वं घटत्वे इति तयोः परस्परसम्बन्धः, स एव सम्बन्धः उपाधिः - इतरव्यावर्तकः।अयमेव घटं पटादिभ्यो व्यावर्तयतीति भावः । तस्य च यः भेदः - विशेषणविशेष्यभावनिरूपकः समवायादिः। एतन्निबन्धनं साधुत्वं शब्दस्य। अस्य अयमर्थः। समवायसम्बन्धेन घटत्वविशेषणकघटविशेष्यकबोधकत्व-शक्तिरेव घटशब्दे।तथा च समवायेतरसम्बन्धेन कालिकादिना, घटघटत्वयोः विशेषण-विशेष्यभावव्यत्यासेन वा बोधकत्वं घटशब्दे नास्तीति, तादृशार्थबोधाय यदि घटशब्दः प्रयुक्तः तर्हि असाधुरेव स भवति। तदेवोपपादयति – यस्मिन् विशेष्ये यादृशविशेषणान्विते यादृगानुपूर्व्याः सूत्रवार्तिकभाष्यकाराद्यन्यतमेन साधुत्वमुक्तं, स शब्दस्तत्र साधुः अन्यत्रासाधुरेव । अत एव दन्त्यमध्योऽस्वशब्दोऽश्वे साधुर्न किन्तु दरिद्रे इत्यादि। एवं च "लः कर्मणि च भावे चाकर्मकेभ्यः" (पा. 3-4-69) इति सूत्रेण लकाराणां तदादेशाना-माख्यातानां कर्तृकर्मादिवाचकत्वस्य बोधितत्वात् आख्यातं कर्त्राद्यर्थे एव साधुः, तदति-रिक्तेऽर्थे (भावनायाम्) असाधुरेव । तथा चाख्यातस्य भावनाभिधायकत्वे व्याकरणशास्त्र-विरोधात् असाधुता स्यादेव । एवं " भूवादयो धातवः " (पा. 1-3-1) " क्रियावचनो धातुः" "भाववचनो धातुः" "कश्च धात्वर्थः? क्रिया " ( " उपसर्गाच्छन्दसि धात्वर्थे " (पा. 5-1-118) इति सूत्रभाष्ये) इत्यादिसूत्रवार्तिकभाष्यैः धातोः भावनावाचित्वस्य निर्धारितत्वेन भावनायामेव धातोः साधुत्वं शक्तिश्चेति अन्यार्थे अन्यशब्दप्रयोगवत् धात्वर्थभावनायां तिङ्प्रयोगः असाधुरेव भवतीति, भावनावाचित्वेन तिङां प्रयोगे अनृतवदनमेवेति, तन्निमित्तकं प्रायश्चित्तं मीमांसकानां दुष्परिहरमेव । किञ्च याज्ञे कर्मणि तथा प्रयोगे क्रतौ वैगुण्यापत्तिः।

ननु व्याकरणस्मृतेः "अथ शब्दानुशासनम् " इति भाष्यात् शब्दशास्त्रमित्यभि-युक्तव्यवहाराच्च साधुत्वमात्रबोधकत्वम्। न तु शक्तिग्राहकत्वम्।"लोकतोऽर्थप्रयुक्ते शब्द-प्रयोगे शास्त्रेण धर्मनियम" इति वार्तिकात् "मृजेः अक्ङित्सु प्रत्ययेषु मृजिप्रसङ्गे मार्जिः साधुर्भवती" ति वृद्धिसंज्ञासूत्रभाष्यात्, "साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः " (वा. प. ब्र.141) इति वाक्यपदीयाच्च व्याकरणस्य साधुत्वमात्रबोधकत्वं लभ्यते न तु शक्ति-ग्राहकत्वम्। पदपदार्थसम्बन्धस्य लोकत एव सिद्धेः, लोके तत्तदनुभवमाश्रित्य

अर्थनिर्णय इति, मीमांसकानां तिङैव भावनाबोधानुभवात् , तस्य तदर्थकत्वमेवेति , तिङ्क्षु भावनायां शक्तिः ज्ञायते। व्याकरणबोध्यस्य तिङन्तस्यैव प्रयोगात् साधुत्वमप्यक्षतम् । ततश्च तिङां भावनायां शक्तिः सिध्यतीति न कश्चिद्दोषः इति वदन्तं मीमांसकं निरसितुम् कारिकायाः अस्याः अत्रोल्लेखने तात्पर्यं स्पष्टयितुं च आह – व्याकरणस्य तत्तदर्थपुरस्कारेणेत्यादिना।

तथा हि – मीमांसकास्तावत् साधुशब्देभ्य एव बोधमङ्गीकुर्वन्ति। नासाधुभ्यः। तथा च बोधजनकतारूपायाः शक्तेः साधुशब्दमात्रवृत्तितया, जात्यखण्डोपाधिव्यतिरिक्तानां सावच्छिन्नत्वनियमेन बोधजनकताया अपि सावच्छिन्नत्वात्, तदवच्छेदकतया साधुत्वमेव धर्मः कल्प्यत इति शक्तिसाधुत्वयोः समनियतत्वेनैकत्वात् साधुत्वमेव शक्तत्वं पर्यवसितम्। तथा च व्याकरणस्य साधुत्वमात्रप्रतिपादकत्वेऽपि साधोरेव तन्मते बोधकत्वेन शक्ति-निर्णायकत्वमपि सिद्धम् । तथा च " लः कर्मणी " (पा. 3-4-69) ति सूत्रेण तिङां कर्तरि कर्मणि च विधानेन तेषां तयोरेव बोधने साधुत्वमिति भावनाभिप्रायेण तिङ्प्रयोगः असाधुरेवेति , तस्य तिङः भावनाबोधकत्वमेव न सिद्धमिति तात्पर्यम् ।

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः"(वा.प. ब्र.141) इति वाक्यपदीयात्, "सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः" इति वार्तिकात्, "अथ शब्दानुशासनम्" इति भाष्याच्च व्याकरणस्य साधुशब्दप्रतिपादकत्वं सिद्धम् । एतच्च सर्वाभ्युपगतं तत्त्वम् । साधोरेव बोधकत्वमिति मते साधव एव शब्दाः शक्ताः, नासाधवः इति भावनायां तिङां प्रयोगे मीमांसकानां प्रायश्चित्तीयत्वमेव।

< 91 > (पु.453-454)

नानृतमिति॥ मीमांसाशास्त्रे तृतीये अध्याये चतुर्थे पादे अष्टमे अधिकरणे "नानृतं वदेत्" इति निषेधस्य क्रत्वर्थत्वं वा पुरुषार्थत्वं वेति विचार्य क्रत्वर्थत्वं निश्चितम् । अत्रायं संशयः - किमयं पुरुषधर्मो विधिः , उत शुद्धक्रतुधर्मो विधिः , क्रतुयुक्तपुरुषधर्मो विधिरिति। अस्य च निर्धारणार्थं प्रथमम् वदेदित्याख्यातं(तिङ्) कर्तारमभिधत्ते वा न वेति विचारणीयम्। अत्रत्यमाख्यातं कर्तारमभिदधातीति पूर्वपक्षः। तथा हि –

"प्रतीतेः स्मरणात् कर्तृविशेषैरपृथक्श्रुतेः ।
कर्तृवाच्यत्वमाख्यातप्रत्ययस्यावसीयते ॥ " (शा.दी.3-4-8-18-19)

(1)वदेदित्याख्यातात् कर्ता प्रतीयते। यश्च यतः प्रतीयते स तस्यार्थ इत्यन्वयव्यतिरेकाभ्यां निश्चीयते।

(2) व्याकरणस्मृतिरपि " कर्तरि कृत् " (पा. 3-4-67) इत्यधिकृत्य "लः कर्मणि च" (पा. 3-4-69) इति चकारेण कर्तरीत्यनुकर्षात् आख्यातस्य कर्तृवाचित्वं बोधयति ।
(3)पचति देवदत्त इति कर्तृविशेषवाचकैः देवदत्तादिपदैः सामानाधिकरण्यादप्याख्यातस्य कर्तृवाचित्वं सिद्धम् । एवम् आख्यातस्य कर्तृवाचित्वे सिद्धे , कर्तुः प्रत्ययार्थत्वात् "प्रकृति-प्रत्ययार्थयोः प्रत्ययार्थः प्रधानम्" इति न्यायेन प्रकृत्यर्थवदनं प्रति कर्ता प्रधानभूत इति , वदनस्य पुरुषार्थत्वात् निषेधोऽपि पुरुषार्थ एव। यद्यपीदं दर्शपूर्णमासप्रकरणे पठितम्। अथापि आख्यातात् कर्तुः बोधात् श्रुतिप्रमाणेन कर्त्रर्थत्वमेव(पुरुषार्थत्वमेव) स्यात्। न तु प्रकरणात् दर्शपूर्णमासादि क्रत्वर्थत्वम्। प्रकरणापेक्षया श्रुतेः बलवत्त्वात्। तथा च स्मृति-प्रतिपादितस्य अनृतवदननिषेधस्य मूलभूता इयं श्रुतिर्भवति। तथा च पुरुषेण न कदा-चिदपि अनृतं वक्तव्यमिति सिद्ध्यति। अथवा श्रुतिप्रकरणयोरत्रविरोधाभावात् , अर्थात् श्रुत्या प्रकरणेन च प्रतिपाद्यमानयोः पुरुषार्थ क्रत्वर्थत्वयोः परस्परविरोधाभावात् द्वयोरपि स्वीकारे क्रतुयुक्तपुरुषधर्मोऽयं निषेधः सिद्ध्यति। तथा च पुरुषधर्म एवायं निषेध इति पूर्वपक्षः ।

अत्र सिद्धान्तः – क्रत्वर्थ एव प्रतिषेधः।अनृतवदनेन न केवलं पुरुषस्यैव प्रत्यवायः, अपि तु क्रतोः वैगुण्यमपि बोधनीयम् । तेन यः प्रत्यवायं ज्ञात्वा क्रतुमविगुणं चिकीर्षति, तेन क्रतौ अनृतं वर्जनीयम् । एतस्य नियमस्यातिक्रमे क्रतुदोषः स्यादिति , तदपाकरणाय पायश्चित्तमिति विशेषः । ननु व्याकरणेन आख्यातस्य कर्त्रर्थकत्वबोधनात् प्रकरणात् श्रुतेः बलवत्त्वाच्च निषेधः पुरुषार्थ एव स्यात् , न तु प्रकरणाद् क्रत्वर्थ इति चेदुच्यते –

"आख्यातप्रत्ययाः सर्वे क्रियायाः अभिधायकाः ।
तत एव प्रतीतस्य न कर्तुरभिधेयता ॥
न स्मृतिः कर्तृवाचित्वे संख्यावाचित्वगोचरा ।
सामानाधिकरण्यं च लक्षणातो गवादिवत् ॥ " (शा.दी.3-4-8-18-19)

अनन्यलभ्यः शब्दार्थ इति हि न्यायः। तथा च तिङा भावनायामभिहितायां तदविनाभावा-देव लभ्यमानः कर्ता न आख्यातवाच्यो भवितुमर्हति । ननु कर्तुः आख्यातवाच्यत्वाभावे व्याकरणस्मृतिविरोध इति चेन्न। व्याकरणस्मृतिरपि आख्यातस्य कर्त्राद्यर्थकत्वं न वदति। तथा हि – " लःकर्मणी " (पा. 3-4-69) ति शास्त्रस्य " द्व्येकयोर्द्विवचनैकवचने " (पा. 1-4-22) इति संख्याशास्त्रेण सह एकवाक्यतया अन्वयेन कर्तुरेकत्वे एकवचनं , तस्य द्वित्वे द्विवचनमित्येवार्थः सिद्ध्यति। ततश्च व्याकरणमपि कर्तुः संख्यामेव आख्यातार्थतया

बोधयति। न कर्तारम्। संख्याशास्त्रे द्व्येकयोरिति भावप्रधानो निर्देशः। तथा च द्वित्वै-कत्वयोरित्यर्थः। अतः आख्यातेन कर्तुरवाच्यत्वे स्मृतिविरोधोऽपि नास्ति । ननु तथापि "पचति देवदत्त" इत्यत्र सामानाधिकरण्यानुरोधात् कर्तृवाच्यत्वमावश्यकमिति चेन्न । आख्यातेन लक्ष्यमाणेन कर्त्रा सह सामानाधिकरण्यसम्भवात्। " गौः शुक्ल " इति वत्। शुक्लादिशब्दानां गुणे एव शक्तेः। तद्वति लक्षणा। तथा च आख्यातस्य कर्ता नार्थः। किन्तु भावनैव। अतोऽत्र श्रुत्या कर्ता न बोध्यत इति श्रुतिविरोधाभावात् दर्शपूर्णमास-प्रकरणपाठात् अस्य निषेधस्य क्रत्वर्थतैवेति। ततश्च स्पष्टं कर्तुराख्यातार्थत्वे निषेधस्य क्रत्वर्थताऽसम्भवः इति । तदेव सूचयति – क्रत्वर्थत्वं न सिध्येत् इति ॥

< 92 > (पृ.457-459)

अत्रेदं वक्तव्यम् इति।

दर्शपूर्णमासप्रकरणे नानृतं वदेत् इति श्रुत्या विधीयमानोऽयं निषेधः दर्शपूर्णमासप्रकरणपठितत्वात् क्रतुधर्मोऽपि भवितुमर्हति, वदेत् इति वदनक्रियाकर्तृबोधात् वदनस्य पुरुषधर्मत्वाच्च पुरुषधर्मोऽपि भवितुमर्हतीति संशये, व्याकरणेन लकारस्य कर्त्रर्थकत्वबोधनात् तिङा श्रुत्या कर्तुरुक्तत्वेन पुरुषधर्म एवेति पूर्वपक्षे च "तिङः न कर्तृबोधकत्वं किन्तु भावनाबोधकत्वमेव। भावनयैव कर्तृकर्मणोराक्षेपः, लक्षणया वा तयो -र्बोधः। अतः साक्षात् कर्तुः तिङर्थत्वाभावात् न श्रुतिः अत्र प्रमाणं भवति। अतः प्रकरणात् क्रत्वर्थत्वमेव" इति सिद्धान्तितम्। अथास्य क्रत्वर्थत्वेऽपि अनृतवदनस्य पुरुषधर्मत्वात् पुरुषधर्म एव भवतीति पक्षद्वये को वा विशेष इति शङ्कायामाह मीमांसाभाष्यकारः – "आह यदा उभयोरपि पक्षयोः नानृतं वदितव्यमिति को विचारणार्थ इति। उच्यते। पूर्वस्मिन् पक्षे पुरुषधर्मस्तत्र भ्रंशे स्मार्तं प्रायश्चित्तम्। सिद्धान्ते दर्शपूर्णमासधर्मः, तत्र भ्रंशे याजुर्वेदिकं प्रायश्चित्तम्" इति।

अयं च सिद्धान्तः भावनायाः तिङर्थत्वे एव युज्येत। तिङः कर्तृकर्मार्थकत्वमिति वैयाकरणमते तु श्रुत्या कर्तुरुक्तत्वात् श्रुतेः प्रकरणात् बलवत्त्वाच्च केवलपुरुषधर्म एव स्यात्। ततश्च क्रतावपभाषणे केवलं स्मार्तं प्रायश्चित्तमेवानुष्ठेयं स्यात् न तु याजुर्वेदिकम्। अतश्च वैयाकरणमते सिद्धान्तविरोधः इति शङ्का पूर्वमुपस्थापिता।

अस्य समाधानं द्विधा उच्यते कौण्डभट्टेन अत्रेदं वक्तव्यमित्यादिना। तत्र प्रथमं समाधानमित्थम् – यत्र श्रुत्यादिषु द्वयोः उपस्थितिः तत्र द्वयोः विरोध एव बलाबल-विचारः। यत्र नास्ति द्वयोर्विरोधः, अर्थात् प्रमाणद्वयप्रतिपाद्ययोः अर्थयोः न विरोधः, अपि

तु समन्वय एव शक्यः तत्र बलाबलविचारो न। अपि तु प्रमाणद्वयस्यापि समन्वय एव। तत्र दृष्टान्तः – जञ्जभ्यमानाधिकरणम्। (एतदधिकरणविषयः पूर्वमपि आगतः। तत्रैव अस्य अधिकरणस्य स्वरूपं वर्णितम्। अतः पुनः अत्र न वर्ण्यते।) अत्र हि शतृप्रत्ययः कृत्प्रत्ययः कर्तृबोधकः मीमांसकमतेऽपि। अतः श्रुत्या पुरुषार्थत्वम् अवगतम्। प्रकरणाच्च क्रत्वर्थत्वम्। तथा चात्र श्रुत्या केवलपुरुषार्थत्वमेव वक्तव्यम्। अथापि अत्र श्रुतेः प्रकरणस्य च विरोधाभावात् पक्षद्वयेऽपि "मयि दक्षक्रतू" इति वदनस्य पुरुषधर्मत्वस्यैव प्राप्तत्वात् द्वयोः प्रमाणयोः समन्वयेन अस्य क्रतुयुक्तपुरुषधर्मत्वं निश्चितम्।

उक्तं च जैमिनीयन्याय-मालाविस्तरे – "क्रतावपि जञ्जभ्यमानपुरुषसंभवेन वाक्यप्रकरणयोः विरोधाभावे सत्युभाभ्यां क्रतुयुक्तपुरुषसंस्कारत्वावगमात्" इति। तथा अत्रापि श्रुतिप्रकरणयोरविरोधात् श्रुत्या कर्तुरुक्तत्वेऽपि न दोषः इति।

द्वितीयं समाधानं त्वित्थम् – वैयाकरणमते तिङर्थः कर्ता। धात्वर्थः भावना। तिङन्ते च "भावप्रधानमाख्यातम्" इति निरुक्तबलात् धात्वर्थभावनाप्राधान्यमङ्गीक्रियते। तथा च वदेत् इति तिङन्ते तिङा कर्तुरुक्तत्वेऽपि तस्य धात्वर्थभावनाविशेषणत्वात्, धात्वर्थभावनाया एव विशेष्यत्वाच्च अयं निषेधः विशेष्यभूतभावनायामेवान्वेतीति, नात्र तिङर्थः कर्ता साक्षात् निषेधं स्वविषयकत्वेन स्वीकर्तुम् अलम्। अतः वैयाकरणमतेऽपि अस्य निषेधस्य क्रत्वर्थत्वमेव सिद्ध्यति।इति।तथा च वैयाकरणमते न वा अधिकरण-विरोधः न वा मीमांसकसिद्धान्तविरोध इति भावः।

स्त्र्युपायेत्यादि। व्याकरणाधिकरणे तन्त्रवार्तिके अयं श्लोकः भट्टपादैरुक्तः। तत्र हि "यद्यपि च साधुशब्दोच्चारणमुच्चारयित्रर्थं, क्रत्वर्थं च न भवति, तथापि तद्गतनियम-प्रतिषेधयोरेव क्रत्वर्थत्वपुरुषार्थत्वे भविष्यतः। न हि यदर्थे कर्मणि यौ नियमप्रतिषेधौ तावेव केवलौ तदर्थौ भवतः।
तथा हि –

स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात्॥ (त.वा.(व्या.अ)1-3-8)

अतश्च परार्थोच्चारणावपि नियमप्रतिषेधौ स्वप्रयोजनाकाङ्क्षावेलायां सन्निहित-पुरुषप्रधानौ विज्ञायेते।" इति साधुभिर्भाषितव्यमिति नियमस्य नानृतं वदेदिति निषेधस्य च क्रतुयुक्तपुरुषार्थत्वमुक्तम्।

अनारभ्याधीतस्येति। _ नानृतं वदेदिति द्विः वेदे पठितः। तत्र दर्शपूर्णमासप्रकरणे एकत्र। अनारभ्येत्यस्य प्रकरणं विनेत्यर्थः। अन्यत्र च तैत्तिरीयब्राह्मणे प्रकरणं विना पठित इत्यर्थः। तैत्तिरीयब्राह्मणे प्रथमाष्टके प्रथमप्रपाठके चतुर्थानुवाके सप्तमं वाक्यम् -

"तस्मादाहिताग्निर्नानृतं वदेत्" इति।

उभयमपि निषेध्यमिति अन्यत्र निर्णीतमिति। तन्त्रवार्तिके व्याकरणाधिकरणे(मी.द.1-3-8) सत्यं ब्रूयादित्यादिस्मृतिविहितस्य सत्यद्वयस्य निर्वचनसन्दर्भे इत्थमुक्तम् - "सत्यवचनं च सर्वश्रुतिस्मृतिषु स्वर्गसाधनत्वेन यागसाधनत्वेन च नियतम्। सत्यं च द्विविधम्। शब्दसत्यम् अर्थसत्यं च। तत्र यथैव यथावस्थिताविप्लुतार्थवचनं श्रेयस्साधनम् एवं यथावस्थितशब्दसत्यवचनमपि। यथा चार्थसत्यविपर्ययः प्रत्यवायाय, एवं विनियोगकालप्रयुक्तशब्दानृतवचनमपि। शब्दसाधुत्वज्ञानं च व्याकरणाभियोगविशेषादित्युक्तम्।" इति। अनेन च स्पष्टं ज्ञायते यत् व्याकरणेन अनुशिष्टादन्यस्मिन्नर्थे आख्यातस्य प्रयोगः प्रायश्चित्तायैव कल्पते इति।

इति महामहोपाध्यायरामकृष्णमाचार्यविरचिता
धात्वाख्यातसामान्यार्थनिर्णयस्य
प्रकाशाख्या टिप्पणी समाप्ता। श्रीकृष्णार्पणमस्तु।

प्राचीनप्रकाशनाभ्यां भेदेन प्रकृतग्रन्थे स्थिताः युक्ततमाश्च पाठभेदाः

| Page no. | प्रकृतग्रन्थपाठः | 1900 | 1915 |
|---|---|---|---|
| 6 | दूषये | दूषयेय | |
| 13 | पुरःस्फूर्ति..... | पुरस्फूर्ति | |
| 14 | "कृतीष्टसाधनतावादे" | " " नास्ति | |
| 22 | प्रयोगापत्तिश्च | प्रयोगापत्तेश्च | प्रयोगापत्तेश्च |
| 23 | दोषात् | | दोषत्वात् |
| 23 | निरस्तमिति दुर्निरूपमेव क्रियात्वम् | निरस्तम्। तस्मात् तद्दुर्तिरूपमेव क्रियात्वम् | |
| 24 | दर्शनेनास्य | दर्शनेनास्याः | |
| 29 | न च तत्त्वं तत्त्वमेवाव-च्छेदकम् | न च तत्त्वमेवावच्छेद-कम् | न च तत्त्वमेवावच्छेद-कम् |
| 29 | सिद्धिरित्यपरैः | सिद्धिरित्यपरे | सिद्धिरित्यपरे |
| 34 | धात्वर्थत्वाविवक्षणात् | | धात्वर्थाविवक्षणात् |
| 35 | प्रत्यय | | प्रयत्न |
| 38 | कृतिविशिष्टवाचि | कृतिविशिष्टकर्तृवाचि | कृतिविशिष्टकर्तृवाचि |
| 41 | तत्रैवं | तत्रैव | तत्रैव |
| 45 | श्रुत्या | शक्त्या | |
| 45 | सिद्धान्तस्यैवमसम्भवात् | सिद्धान्तस्यैव सम्भवात् | |
| 57 | कृतिमानिति | वृत्तिमानिति | |
| 59 | अनन्तकृत्यादा..... | अनन्तवृत्त्यादा | |
| 60 | अभेदबोधादर्शनात् भेदेन बोधदर्शनाच्च | अभेदबोधात् भेदेन बोधदर्शनाच्च | |

| | | | |
|---|---|---|---|
| 60 | इत्यादाविव | इत्यादावपि | |
| 64 | कर्तृद्वित्वादि | कर्तृत्वादि | |
| 64 | नामार्थप्रकारक | | नामार्थक |
| 71 | न पचति चैत्र | | न च पचति चैत्र |
| 78 | लक्षणयोपस्थिते | लक्षणयोपस्थितेः | |
| 84 | धन्धनम् | दन्ध्रणम् | दन्धनम् |
| 88 | परिच्छेदकस्य | | परिच्छेदस्य |
| 89 | प्रवृत्तेः लविधौ कर्तृ-ग्रहणम् | | प्रवृत्तेः। लविधौ कर्तृ-ग्रहणम् |
| 89 | विनाऽनिष्पन्नम् | | विना निष्पन्नम् |
| 99 | संख्यान्यतराभिधाने | संख्यान्यतराभिधाने वाच्यत्वे | |
| 103 | अतन्त्रत्वात् | तन्त्रत्वात् | |
| 104 | तन्त्रमिति | तन्नमिति | |
| 110 | अस्येत्यत्र | अस्त्येत्यत्र | |
| 111 | ब्रूत इति | | ब्रूते इति |
| 117 | तु अस्त्वर्थाक्षिप्त एव | तु अर्थाक्षिप्त | |
| 122 | कर्त्रनाक्षेपकत्वेऽप्याख्यातोपात्ताया | | कर्त्रानाक्षेपकत्वेप्याक्षेपाख्यातोपात्ताया |
| 123 | अन्वयासम्भवात् | अन्वयसम्भवात् | अन्वयसम्भवात् |
| 128 | तत उपस्थितिः त्वेन | तत उपस्थितत्वेन | तत उपस्थितत्वेन |
| 128 | विशेष्यत्वस्य न्यायसिद्धत्वात् | विशेष्यत्वस्यान्यायसिद्धत्वात् | |
| 132 | पाचको देवदत्तः | इदं नास्ति | |

| | | | |
|---|---|---|---|
| 133 | सुसङ्गममेवेति | सुसङ्गतमेवेति | सुगममेवेति |
| 138 | वाच्यतावच्छेदकत्वे | वाच्यतावच्छेदकत्वेन | |
| 143 | सारित्वेनार्थानिर्णायकत्वं | सारित्वेनार्थनिर्णायक त्वं | |
| 144 | विधायकबलेन | विधायकवचनेन | |
| 148 | द्विबह्वोर्द्विवचनै.....बहुत्व विवक्षायां च | | एतस्य ग्रन्थस्य स्थाने द्विबह्वोः इत्येवास्ति |
| 153 | वर्तमानतादशायां | | वर्तमानदशायाम् |
| 161 | नङ्क्ष्यति | नक्ष्यति | |
| 161 | पूर्वेद्युः नष्ट | परेद्युः नष्ट | पूर्वेद्युनष्ट |
| 169 | शानच् | शता | |
| 175 | पुरस्कारेणैव | पुरस्कारेणेव | पुरस्कारेणेव |
| 180 | क्रमादित्यादि | क्रमादित्याद्यादि | |
| 184 | नावच्छेदकत्वम् | | नावच्छेदकम् |
| 190 | प्रतियोगितावच्छेदकत्वव त् | | प्रतियोगितावच्छेदकव त् |
| 192 | प्रतिबन्ध्यम् | प्रतिबध्यम् | प्रतिबध्यम् |
| 197 | विभागभाने | | विभागभागे |
| 198 | कर्मस्थभावकानाम् | | कर्मस्थभावनकानाम् |
| 200 | यत्यते स्वयमेव | यतते स्वयमेव | यतते स्वयमेव |
| 201 | कृञादि | कर्त्रादि | कर्त्रादि |
| 202 | ....पपत्त्यैवं | .....पपत्त्यैव | |
| 202 | केवलयत्नवाचकत्वम् | केवलवाचकत्वम् | केवलवाचकत्वम् |
| 202 | यत्नो यत्नमात्रम् | | यत्नो न यत्नमात्रम् |

| | | | |
|---|---|---|---|
| 205 | असङ्गतेः | असङ्गतिः | |
| 211 | विष्णुर्योग | विष्णुयोग | विष्णुयोग |
| 211 | न च | येन च | |
| 218 | वाचकत्वमकर्मकत्व | | वाचकत्वकर्मकत्व |
| 223 | कृञोऽर्थ | कृतोऽर्थ | |
| 223 | इदं च .......तथा | अयं ग्रन्थः नास्ति | |
| 229 | चोपपादयितुम् | चोपपादितम् | चोपपादितम् |
| 229 | वाच्यतावच्छेदकम् | | वाच्यतावच्छेदकत्वम् |
| 230 | विना। | विना | विना |
| 234 | कृञा | कृञो | |
| 235 | प्रश्नौ | प्रश्नो | प्रश्नो |
| 251 | सम्बध्येत | सम्बध्यते | |
| 251 | वोच्यते | चोच्यते | |
| 252 | अनुवाद्यत्वोपादानत्व | अनुवाद्यत्वापादानत्व | |
| 252 | सुराग्रह | सुराद्रव्य | |
| 255 | यत्नप्रतीतेः | यत्नप्रतीतिः | |
| 259 | सर्वत्रैवार्थे | सर्वत्र वार्थे | सर्वत्र वार्थे |
| 264 | निष्ठतायाम् | | निष्ठायाम् |
| 270 | वाचकत्वेन | वाचकत्वे | वाचकत्वे |
| 288 | धात्वर्थकारकै | धात्वर्थः कारकै | |
| 288 | सम्बन्धमात्रमुक्तम् | सम्बन्धमात्रयुक्तम् | |
| 289 | भावनाद्वारके विशिष्टबोधे | अयं पाठः नास्ति | |
| 301 | सङ्ख्यान्वयोपपत्तये | संख्यान्वयोपपत्तेः | संख्यान्वयोपपत्तेः |
| 301 | लब्धे | लभ्ये | |

| | | | |
|---|---|---|---|
| 309 | ननु | न तु | |
| 310 | ण्यन्ता एव | ण्यन्तादाव | |
| 311 | भावनाया | भावना | |
| 320 | भ्वर्था वा वादयः | भ्वर्था भूवादयः | भ्वर्था भूवादयः |
| 324 | केचित्तु | | केश्चित्तु |
| 328 | धात्वर्थः क्रिया | धात्वर्थक्रिया | |
| 329 | न सूत्रम् | | न नास्ति |
| 334 | सुतोऽभवत् | सुताभवत् | |
| 335 | उभयत्र | उभय | उभय |
| 340 | कथमन्यथा...मूलकृता | अयं पाठः नास्ति | |
| 345 | कल्पते | | कल्प्यते |
| 358 | वाक्यस्याबोधकत्व | | वाक्यस्यावबोधकत्व |
| 358 | एवेत्यर्थप्रतीतिः | एवेत्यर्थः। प्रतीति | |
| 364 | घटोऽघट | घटो घट | घटो न घट |
| 364 | अवच्छेदकक | अवच्छेदक | अवच्छेदक |
| 365 | तिमिरप्रख्या | बधिरश्रव्या | |
| 365 | शाब्दविशिष्ट | शब्दविशिष्ट | शब्दविशिष्ट |
| 374 | निरुक्तकारोक्तेऽप्यात्मांशस्य | कारोक्तेरप्यात्मांशस्य | |
| 379 | भियैव | | भियेव |
| 380 | सा च ..... सकर्मकः | पाठः नास्ति | |
| 381 | पतेः | यतेः | पत्तेः |
| 386 | प्रकृत्या असत्त्वरूपाया | प्रकृत्याः सत्त्वरूपायाः | |

| | | | |
|---|---|---|---|
| 393 | नियमतस्तत्र | नियमस्तत्र | |
| 393 | परं | वरं | |
| 394 | एतदभिप्रायेणैव...भावः | | ग्रन्थपातः |
| 399 | यादृशः | | तादृशः |
| 399 | साधनत्वेने | | साधनत्वं ने |
| 407 | तयावगमेन | | तयागमेन |
| 407 | दर्शनोपयोगि | | दर्शनोपयोगि। |
| 409 | कारकानन्वयिता | | कारकान्वयिता |
| 419 | यथा | तथा | |
| 424 | भाष्यं | भाष्ये | |
| 424 | अनुयाज | अनुपात्त | अनुपात्त |
| 431 | यथा | | तथा |
| 433 | शमकत्व | शामकत्व | शामकत्व |
| 434 | ........पत्तिः | .......पत्तेः | |
| 441 | इन्यादीनाम् | | इत्यादीनाम् |
| 445 | भुक्त्वा पाकः | ग्रन्थः नास्ति | ग्रन्थः नास्ति |
| 449 | समानायामर्थावगतौ | | समानार्थावगतौ |
| 453 | प्रतिषेध्यः | प्रतिषिद्धः | प्रतिषेधः |
| 454 | वासन्नेव | वासन्नैव | |
| 457 | निर्णये न | निर्णयेन | |

## अनुबन्धः 3 - परामृष्टग्रन्थसूची


1. अथर्ववेदप्रातिशाख्या – चौखाम्बा, वाराणसी, 1962
2. आचार्य हेमचन्द्र और उनका शब्दानुशासन – चौखाम्बा, 1963
3. आचार्य श्रीमलयगिरिविरचितं शब्दानुशासनम् – लालभाई दलपतभाई भारतीय-संस्कृतविद्यामन्दिर, अहमदाबाद, 1967
4. ऋग्वेदप्रातिशाख्यम् - उव्वटवृत्तिसमेतम्, वाराणसी, 1959
5. कच्चायनव्याकरणम् - तारा पब्लिकेशन्, वाराणसी, 1962
6. काव्यानुशासनम् – हेमचन्द्रविरचितम् , महावीर जैनविद्याप्रकाशन, मुंबई, 1964
7. काशकृत्स्नधातुव्याख्यानम् - सं व्युधिष्ठिरमीमांसक, वाराणसी, शक 1887
8. काशिकावृत्तिसिद्धान्तकौमुद्योः तुलनात्मकमध्ययनम् – डा.महेशदत्तशर्मा, पूना, 1974
9. कुवलयानन्दः – निर्णयसागरप्रेस, मुम्बई, 1912
10. जैनेन्द्रव्याकरणम् – भारतीयज्ञानपीठम्, काशी, 1956
11. तन्त्ररहस्यम् - गायकाडओरियण्टलसीरीज 24, बडौदा, 1923
12. त्रिकाण्डशेषः – पुरुषोत्तमदेवकृतः, सटीकः, मुम्बई, 1915
13. नञ्शिरोमणिटीका – आख्यातवादटिप्पणं च - रघुदेवकृतं, सरस्वतीमहलप्रकाशनम्, तञ्जावूरु, 1972
14. नानार्थार्णवसङ्क्षेपः – त्रिवेंड्रम्, 1923
15. निरुक्तम् – दुर्गावृत्त्या युक्तम् निर्णयसागरप्रकाशनम्, मुम्बई, 1926
16. न्यायकुसुमाञ्जलिः – टीकाचतुष्टयोपेता , दर्भंगा, 1972
17. न्यायकुसुमाञ्जलिः – व्याख्यात्रयोपेतप्रकाशयुता, चौखम्बा, 1957
18. न्यायदर्शनम् - भारतीयविद्याप्रकाशनम्, वाराणसी, 1966
19. न्यायमञ्जरी - विजयनगरसंस्कृतग्रन्थमाला, वाराणसी, 1934
20. न्यायलीलावती - व्याख्यात्रयोपेता,चौखम्बा,1991
21. न्यायवार्तिकम् – वाराणसी, 1916
22. न्यायवार्तिकतात्पर्यटीका - विजयनगरसंस्कृतग्रन्थमाला 15, काशी, 1898

23. न्यायसुधा - तन्त्रवार्तिकटीका, वाराणसी, 1902
24. पदवाक्यरत्नाकरः – सटीकः, वाराणसेयसंस्कृतविश्वविद्यालयप्रकाशनम्, वाराणसी, 1990
25. पदार्थदीपिका – राजराजेश्वरप्रेस, वाराणसी, 1900
26. परमलघुमञ्जूषा - गायक्वाड ओरियण्टल सीरीज, बडौदा, 1961
27. पातञ्जलदर्शनम् - कलकत्ताप्रकाशनम्, 1940
28. प्रकरणपञ्चिका - न्यायशुद्धिसमेता, काशीहिन्दूविश्वविद्यालय, 1991
29. प्रतापरुद्रीयम् - रत्नापणसहितम्, मद्रास, 1970
30. प्रौढमनोरमा - बृहच्छब्दरत्नशब्दरत्न सहिता – भागद्वयोपेता – हि.वि.वि., 1964, 1992
31. ब्रह्मसूत्रशाङ्करभाष्यम् - कल्पतरुपरिमलोपेतम् निर्णयसागरप्रकाशनम्, मुम्बई, 1938
32. भरतनाट्यशास्त्रम् – द्वितीयभागः, बडौदासंस्करणम्
33. भाट्टचिन्तामणिः – तर्कपादः समयूखः चौखम्बा, 1934
34. भाट्टरहस्यम् - शास्त्रमुक्तावली, काञ्चीपुरम्, 1900
35. भावनाविवेकः – मण्डनमिश्रकृतः, प्रथमद्वितीयभागौ, वाराणसी, 1922-23
36. महाभाष्यम् - भारतीयाधिशासनसंरक्षकतायां प्रकाशितम्, नवभागात्मकम्, प्रतिभा-प्रकाशनम् , 1999
37. मीमांसादर्शनम् – षट् भागाः, तन्त्रवार्तिकशाबरभाष्यसमेतम्, आनन्दाश्रमप्रकाशनम्, 1947
38. मीमांसाश्लोकवार्तिकम् - तात्पर्यटीकासहितम्, मद्रास, 1971
39. रसगङ्गाधरः - गुरुमर्मप्रकाशसरलायुतः, काव्यमाला 12, निर्णयसागरप्रकाशनम् , 1947
40. वाक्यपदीयम् – ब्रह्मकाण्डम्, हरिवृषभ-अंबाकर्त्रीटीकाद्वयोपेतम्, संपूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी, 1963
41. वाक्यपदीयम् - प्रथमद्वितीयकाण्डौ, आन्ध्रव्याख्या, तेलुगु अकादमी, हैदराबाद, 1974
42. वाक्यपदीयम् – तृतीयकाण्डः, प्रथमभागः, दक्कनकालेज, पूना, 1963

43. वाक्यपदीयम् – तृतीयकाण्डः, द्वितीयभागः, वाराणसी, 1928

44. वाक्यपदीयम् - वृत्तिविचारः, त्रिवान्कूर विश्वविद्यालयः, त्रिवेंड्रम्, 1942

45. वाक्यार्थरत्नम् - मैसूर ओरियंटल लाइब्ररी प्रचुरणम्, 1943

46. विभक्त्यर्थनिर्णयः - चौखम्बा, 1901

47. वैयाकरणभूषणनिबन्धसङ्ग्रहः - चौखाम्बा, 1939

48. वैयाकरणभूषणसारः – दर्पणकाशिकायुतः, चौखम्भा, 2009

49. वैयाकरणभूषणसारः – दर्पणपरीक्षायुतः, हरिदाससंस्कृतग्रन्थमाला 133, चौखम्बा, वाराणसी, 1939

50. वैयाकरणभूषणसारः – प्रभादर्पणयुतः, आदर्शग्रन्थमाला 2, वाराणसी, 1947

51. वैयाकरणभूषणसारः – तत्त्वदर्शिनीव्याख्यायुतः, विजयनगरम् ,आ.प्र., 1967

52. वैयाकरणभूषणसारः – शाङ्करीयुतः, आनन्दाश्रमसंस्कृतग्रन्थावलिः 135, पूना, 1957

53. वैयाकरणभूषणसारः – सरलासुबोधिनीयुतः, श्रीहरिकृष्णनिबंधमणिमाला 7, बनारस, 1952

54. वैयाकरणसिद्धान्तभूषणम् - काशीसंस्कृतग्रन्थमाला, 1900

55. वैयाकरणसिद्धान्तभूषणम् – काशिकाव्याख्यासहितवैयाकरणभूषणसारयुतम्, आङ्ग्ल-टिप्पणीसहितम् , मुम्बई, 1915

56. वैयाकरणसिद्धान्तभूषणम् - रूपालीटिप्पणीसहितम्, वाराणसी, 1985

57. वैयाकरणसिद्धान्तभूषणम् - आङ्ग्लटिप्पणीसहितम्, भा.वि.प्रकाशन्, दिल्ली, 1987

58. वैयाकरणसिद्धान्तमञ्जूषा - संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1977

59. वैयाकरणसिद्धान्तलघुमञ्जूषा – चौखम्बासंस्कृतग्रन्थमाला 46, 1919

60. व्युत्पत्तिवादः - मूलमात्रम् शास्त्रमुक्तावली, काञ्ची, 1900

61. शब्दकौस्तुभः – प्रथमभागः, चौखम्बा, 1929

62. शब्दकौस्तुभः – द्वितीयभागः, चौखम्बा, 1929

63. शब्दशक्तिप्रकाशिका – सटीका, चौखम्बा, 1934

64. शाब्दतरंगिणी - संस्कृतविद्यासमितिः, मद्रास, 1969

65. शास्त्रदीपिका - मयूखमालिका – युक्तिस्नेहप्रपूरणीव्याख्याद्वययुता, निर्णयसागरप्रकाशनम्, मुम्बई, 1915
66. शौनकीयबृहद्देवता - चौखम्बा, 1963
67. षड्भाषाचन्द्रिका - निर्णयसागरप्रकाशनम्, मुम्बई, 1916
68. सिद्धान्तकौमुदी - तत्त्वबोधिन्या सह, निर्णयसागर, 1934
69. सिद्धान्तकौमुदी – बालमनोरमातत्त्वबोधिनीयुता, मोतीलाल बनारसीदास, दिल्ली, 1964
70. सेश्वरमीमांसा – मीमांसापादुका, उभयवेदान्तग्रन्थमाला, 1971
71. संस्कृतव्याकरणशास्त्र का इतिहास –युधिष्ठिरमीमांसक, भागद्वयम्
72. किरणावली-गुणप्रकाशः - Government Press, Allahabad, 1933
73. रघुवंशः - सञ्जीविनीव्याख्यायुता, चौखम्बा
74. नैषधीयचरितम् - चौखम्बा, वाराणसी
75. मीमांसादर्शनम् – भागचतुष्टयोपेतम्, टीकापञ्चकसनाथीकृतम्, ताराबुकएजन्सी, वाराणसी, 1989
76. History of Navya Nyaya in Mithila – Prof. Dinesh Chandra Bhattacharya, Dharbhanga, 1958.
77. Studies in Indian literary history - Vol.III, 1956.
78. Trends in Linguistics – Panini- A Survey of Research – George Cardona, Paris, 1976.
79. Journal of Historical Research Vol.35.
80. Tanjore Descriptive Catalogue Vol.XII

# The Vaiyākaraṇasiddhāntabhūṣaṇa of Kauṇḍabhaṭṭa

The *Vaiyākaraṇasiddhāntabhūṣaṇa*, also known as *Vaiyākaraṇabhūṣaṇa*, is an authentic text in Pāṇinian semantics. It is a commentary on the *Vaiyākaraṇamatonmajjana* compiled by the great grammarian Bhaṭṭoji Dīkṣita (17 th c.), and is written by Kauṇḍabhaṭṭa, the nephew of Bhaṭṭoji. The main intention is to refute the objections raised by Naiyāyikas and Mīmāṃsakas on various aspects of Pāṇinian semantics and to establish the grammarians' views on the subject. The *Vaiyākaraṇasiddhāntabhūṣaṇasāra*, an abridged version of the *Vaiyākaraṇabhūṣaṇa*, also written by Kauṇḍabhaṭṭa, is the more famous text with more than ten commentaries written on it. But nobody has so far attempted to write a commentary on the *Vaiyākaraṇabhūṣaṇa* and though the text has been published four times from different places, none of them can be treated as a critical edition.

The *Vaiyākaraṇabhūṣaṇa* is being published here with the *Nirañjanī* commentary by Pandit Ramyatna Shukla, and explanatory notes *(Prakāśa)* by the editor. The edition itself is prepared taking a 17$^{th}$ c. manuscript as base, and comparing it with 40 other manuscripts from different parts of India, and with printed versions. The present volume contains the first part of the work and is devoted to the meaning of roots and verbal suffixes which is at its heart.

*Le* Vaiyākaraṇasiddhāntabhūṣaṇa, *également connu sous le nom de* Vaiyākaraṇabhūṣaṇa, *est un texte authentique de la tradition sémantique pāṇinéenne. C'est un commentaire du* Vaiyākaraṇamatonmajjana *compilé par l'éminent grammairien Bhaṭṭoji Dīkṣita (17e s.) et écrit par son neveu, Kauṇḍabhaṭṭa. Son intention principale est de réfuter les objections soulevées par les Naiyāyika et les Mīmāṃsaka sur divers aspects de la sémantique pāṇinéenne et d'établir le point de vue des grammairiens sur le sujet. Le* Vaiyākaraṇasiddhāntabhūṣaṇasāra, *une version abrégée du* Vaiyākaraṇabhūṣaṇa, *également écrit par Kauṇḍabhaṭṭa, est un texte plus connu, avec plus de dix commentaires écrits à son sujet. Mais jusqu'à présent, nul n'avait tenté d'écrire un commentaire sur le* Vaiyākaraṇabhūṣaṇa *et, bien que le texte ait été publié à quatre reprises en différents endroits, aucune de ces publications ne pouvait être considérée comme une édition critique.*

*Le* Vaiyākaraṇabhūṣaṇa *est publié ici avec le commentaire* Nirañjanī *du Pandit Ramyatna Shukla et des notes explicatives* (Prakāśa) *de l'éditeur scientifique. L'édition elle-même est préparée sur la base d'un manuscrit du 17e s., en le comparant avec 40 autres manuscrits provenant de différentes régions de l'Inde, ainsi qu'avec les versions imprimées. Le présent tome, contenant la première partie de l'œuvre, est consacré à la signification des racines et suffixes verbaux qui est au cœur du* Vaiyākaraṇabhūṣaṇa.

9 788184 702088
ISBN (IFP): 978-81-8470-208-8

9 789383 097135
ISBN (SSSU): 978-93-83097-13-5